
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

M-2985

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विकम सवंत)	Additional Particulars / Remark
रामायण		धर्म	अपूर्ण	[illegible]	५/१३	800	संस्कृत	कागद				

॥ हे पुस्तक बाळकृस्नदेव पुजारयाचे होय सत्य ॥
॥ भागवत प्रारंभ ॥ रामचंद्र ॥ प्रथमस्कंध ॥

॥नुःसिः नृसिः नृसिंहंतीतिनृसिंहः सिनोतिबध्नाति
इतिसिः षिञ्बंधनेक्विप्॥

भा०प्र०
१

श्रीगणेशायनमः ॐनमःशिवाय ॐनमोभगवतेवासुदेवाय ॐश्रीब्रह्मविद्यासंप्रदायप्रवर्तकेभ्योनमः ॐनमःश्रीपरमहंसास्वादितचरणकमलचिन्मकरंदायभक्त
जनमानसनिवासाय श्रीरामचंद्राय वागीशायस्यवदनेलक्ष्मीर्यस्यचवक्षसि यस्यास्तेहृदयेसंवित्तंनृसिंहमहंभजे १ विश्वसर्गविसर्गादिनवलक्षणलक्षितं श्रीकृ
ष्णाख्यंपरंधामजगद्धामनमामितत् २ माधवोमाधवावीशौसर्वसिद्धिविधायिनौ वंदेपरस्परात्मानौपरस्परनुतिप्रियौ ३ संप्रदायानुरोधेनपौर्वा
पर्यानुसारतः श्रीभागवतभावार्थदीपिकेयंप्रतन्यते ४ काहंमंदमतिःक्वेदंमंथनंक्षीरवारिधेः किंतत्रपरमाणुर्वैयत्रमज्जतिमंदरः ५ मूकंकरोतिवाचालंपं
गुंलंघयतेगिरिं यत्कृपातमहंवंदेपरमानंदमाधवम् ६ श्रीमद्भागवताभिधःसुरतरुस्ताराङ्कुरःसज्जनिः स्कंधैर्द्वादशभिस्ततःप्रविलसद्भक्त्यालवालोदयः द्वात्रिंशत्त्रि
शतंचयस्यविलसच्छाखाःसहस्राण्यलंपर्णान्यष्टदशेष्टदोतिसुलभोवर्वर्तिसर्वोपरि ७ श्रीपरमानंदमाधवायनमः ॰ अथनानापुराणशास्त्रप्रबंधैश्चित्तप्रसादमल
भमानस्तत्रतत्रापरितुष्यन्नारदोपदेशतः श्रीमद्भगवद्गुणवर्णनप्रधानंभागवतशास्त्रंप्रारिप्सुर्वेदव्यासस्तत्प्रतिपाद्यपरदेवतानुस्मरणलक्षणंमंगलमाचरमाच
रति जन्माद्यस्येति परंपरमेश्वरंधीमहीतिध्यायतेर्लिङि॰ छान्दसंरूपंध्यायेमेत्यर्थः वेदवादस्थलेवक्तुरेवनतिर्युक्तेतिध्येयः बहुवचनंचशिष्याभिप्रायंतमे
वस्वरूपतटस्थलक्षणाभ्यामुपलक्षयति तत्रस्वरूपलक्षणंसत्यमितितत्त्वविदेतुः यत्रयस्मिन्त्रयाणांमायागुणानांतमोरजःसत्वानांसर्गोभूतेंद्रियदेवतारू
पः अमृषासत्यः यत्सत्यतयामिथ्यासर्गोपिसत्यवत्प्रतीयते तंपरंसत्यमित्यर्थः अत्रदृष्टांतः तेजोवारिमृदांयथाविनिमयोव्यत्ययः अन्यस्मिन्नन्यावभासः
यथाधिष्ठानसत्तयामिथ्यासर्गोपिसत्यवत्प्रतीयतेतद्वदित्यर्थः तत्रतेजसिवारिबुद्धिर्मरीचितोयप्रसिद्धा मृदिकाचादौवारिबुद्धिरित्यादियथायथमूह्यं यद्वातस्यै
वपरमार्थसत्वप्रतिपादनायतदितरस्यमिथ्यात्वमुक्तं यत्रमृषैवायंत्रिसर्गोनवस्तुतःसन्निति यत्रेत्यनेनप्रतीतमुपाधिसंबंधंवारयति स्वेनैवधाम्नासदानिर
स्तंकुहकंकपटंमायिकंविश्वंयस्मिन्तं तटस्थलक्षणमाह जन्मादीति अस्यविश्वस्यजन्मस्थितिभंगंयतोभवतितंधीमहीति अत्रहेतुः अन्वयादितरतश्चार्थेषुका
र्येषुपरमेश्वरस्यसद्रूपेणान्वयात् अकार्येभ्यःखपुष्पादिभ्यस्तद्व्यतिरेकात् यद्वाअन्वयशब्देनानुवृत्तिःइतरशब्देनव्यावृत्तिः अनुवृत्तत्वात् सद्रूपब्रह्मकारणंमृ
त्सुवर्णादिवत् विश्वस्यव्यापकत्वात् विश्वंकार्यंघटकुंडलादिवदित्यर्थः यद्वा सावयवत्वादन्वयव्यतिरेकाभ्यां यदस्यजन्मादितद्यतोभवतीतिनिश्चेयः तथाचश्रुतिः यतो

य

वाइमानिभूतानिजायंतेयेनजातानिजीवंतियत्प्रयंत्यभिसंविशंतीत्याद्याःस्मृतिश्च यतःसर्वाणिभूतानिभवंत्यादियुगागमे यस्मिंश्चप्रलयंयांतिपुनरेवयुगक्षयेइत्या
द्याः तर्हिकिंप्रधानंजगत्कारणत्वाद्ध्येयमभिप्रेतंनेत्याह अभिज्ञोयस्मात्सऐक्षततलोकान्नुसृजाइतिसइमांल्लोकानसृजतेत्यादिश्रुतेः ईक्षतेर्नाशब्दमितिशास्त्राच्च प्रधानंजगत्का
रणंनभवतिअतःईक्षतेर्हेतोः दृश्यमितिन्यायाच्च तर्हिजीवस्यात् नेत्याह स्वराट् स्वेनैवराजतेयस्तस्मात्स्वतःसिद्धज्ञानमित्यर्थः तर्हिकिंब्रह्माहिरण्यगर्भःसमवर्तताग्रेभूतस्यजा

टी०
१

॥स्वरूपलक्षणंनाम प्रकृष्टप्रकाशवान्चंद्रोयथा॥ अथातटस्थलक्षणविलक्षणं॥ यथाशाखाचंद्रः इतिवेदांतोदाहरणे॥ ३०॥

अथ पंचभिरध्यायै रासक्रीडोच्यते हूता गोपी भोग्याः कृष्णरूपा शाष्द्वाद्याः पंचते यतः १ तत्रादौ वेणुनाहूतगोपीसंलापकौतुकं रासः क्रीडासमारंभस्त
त्रोत्तर्षान्महकृतं वंदे राधाप्रियं गोपीरासमंडलमंडनं श्रीकृष्णं यत्कृपालेशो मंदानां कामपूरकः २ श्रीबादरायणिरुवाचेति पाठे बदरिकाश्रमे तप
स्यतस्तस्य पुत्र इति सर्वज्ञत्वप्रेममयत्वादि बोध्यते अतः प्रेम्णो वश्रोतव्यमिति व्यंग्यं शुकउवाचेति कोमलत्वापत्ता ततः कोमलचित्ततयैव श्रोतव्य
मिति गोपीनां नवसंगमं स्मरन्नाह भगवानपीति एतावंतं कालं गोप्य एवं वर्धमानानुरागचपलचित्ततया रंतुं मनश्चक्रुः भगवांस्तु वयोविशेषं प्रती
क्षमाणो न चक्रे संप्रति ता योग्यवयः प्राप्ता वीक्ष्य मयेमा रंस्यथ क्षपा इति प्रतिश्रुता रात्रीश्च वीक्ष्य भगवानपि रंतुं मनश्चक्रे इत्यपेरर्थः श्लेषण त्तानवै
राग्यादिषड्गुणपूर्णोपि ता रात्रीर्वीक्ष्य उद्दीपनत्वेनानुभूयेति किमुत गोपीर्वीक्ष्येति तासां सौंदर्यप्रेमाद्यतिशयो व्यज्यते अथ वृंदावनशोभामुद्दीपिका
माह शरदेति शारदीयं नवमवर्षस्थाज्ञेयाहे तौत्ततीया शरदोत्फुल्लमल्लिका सहेतुत्वात्तावेपि हेतुत्वात्तस्याभिनवत्वं बोध्यते तेन सर्वपुष्पविकासोव्य
श्रीशुकउवाच भगवानपि ता रात्रीः शरदोत्फुल्लमल्लिकाः वीक्ष्य रंतुं मनश्चक्रे योगमायामुपाश्रितः १ तदोडुराजः ककुभः करैर्मुखं प्राच्या विलिंपन्नरुणेन शं
तमैः सच्चर्षणीनामुदगाच्छुचो मृजन् प्रियः प्रियाया इव दीर्घदर्शनः २

ज्यते एवमियं रिरंसा तत्प्रेममय्येव न प्राकृतकाममयीत्य पित्तेयं निवृत्तिपरेयं पंचाध्यायी सप्रेमामृतकल्लोलविह्वलीकृतचेतस इत्यादिस्वाम्युक्ते
श्च तत्र दुर्घटघटनसमाधानायाह योगमायापराख्याचिच्छक्तिस्तामाश्रित इति श्लेषेण योगो गोपीसंयोगस्तदर्थं मायाकृपा तामाधिक्येनाश्रित इति
एवं चंद्रमपि प्राचीदिशा सह रंतुमुद्यतं मन्यमानस्य भगवतो भावं व्यंजयन्नाह तदेति तत्क्षणे सप्रसिद्ध उडुनां राजा चंद्र इति उडूनां तत्परिवारत्वेनो
दयो ध्वनितः उदगात् उदितः किं कुर्वन् प्राच्याः ककुभाः दिशः मुखं शंतमैः सुखकरैः करैः रश्मिभिर्हस्तैश्च अरुणेन उदयरागेण विलिंपन् अरुणं कुर्व
न् कइव दीर्घकालेन दर्शनं यस्येति श्रोत्कंठ्य स प्रियः स्वप्रिया इति अन्योन्यमनुरागः मुखं शंतमेन करेण अरुणेन कुंकुमेन यथा लिंपति प्रि
यापरिजनानां शुचः शोकाश्रुणि च मार्जयति तथा चंद्रोपि चर्षणीनां जनानां शुचः शारदर्कजतापदुःखानि मृजन्नपनयन्नित्यर्थः २ चंद्रोद
यं दृष्ट्वा भावविशेषाविर्भावेन वनमागम्य तच्च तद्रश्मिरंजितं दृष्ट्वाकर्षणवंस्या गायदित्याह दृष्ट्वेति राधावृंदावने मतेस्फूर्तेः रमा अत्र राधा तस्याः

राम
४१

आननस्याभेवाभायस्यतं कुमुद्वंतं कुमुदविकासकरं चंद्रं दृष्ट्वा तद्दर्शनेन चराचरा मुखं स्मरत्स्यात् तस्य मुखगोप्याकर्षणाय कलं जगावित्यन्वयः स्मरस्वरूप
पादनाय साम्येन विशेषाणि तथा चानन पक्षे कोः पृथिव्याः सुत्कार्यतयास्ति कुमुद्वदिति लिंगविपरिणामेन योज्यं अखंड मंडलं षोडशकलं आने
नराकृतिथिर्ध्वन्यते मुखपक्षे अखंडमनूनं मंडलं नासाकरणाद्यंगवृंदं यत्र नवकुंकुममिवारुणं पक्षे लिप्तेन नवकुंकुमेनारुणं कालवत्स्थाना
स्यापि शोभामाह वनमिति चंद्रस्य नवैर्गोभिः करैरभितोरंजितं यद्वाभावेक्तः अभिरंजितं श्रीकृष्णाभिरंजनं यत्र कलं मधुरं अस्फुटं च जगौ वेणु
नेति कलपदात्तत्वेणुगीतेति वक्ष्यमाणात् ज्ञेयं तत्र मधुरत्वं मनोहरणाय अस्फुटत्वं सर्वासां स्वस्वाह्वान भ्रमाय अन्येषां तदाह्वानानिश्चयाय
मधुरत्वेन सर्वेषामेवाकर्षणं वारयति वामदृशामेव मनोहरं यथा तथेति श्लेषेण स्वस्मिन्कुटिलमेव पश्यतीनां सर्वेंद्रियप्रवृत्तिमूलमत्याकर्षणेन
तथादर्शनाभावायेति अत्र श्लेषांतरेण कामबीजं जगाविस्यर्थः तथाहि कलं ककारलकारौ वामदृक् स्थितं दीर्घकारं मातृकान्यासोक्तमिति
प्रथमाक्षरत्रयं दृशामिति हलंतत्वात् टापि द्वितीयासंबंधसामान्ये षष्ठीवा मनोहरं मनोधिष्ठात् चंद्राकारं बिंदुं हरतीति तत्सहितमित्यर्थः एवं क्लीमि
दृष्ट्वा कुमुद्वंतमखंडमंडलं रमाननाभं नवकुंकुमारुणं वनं च तत्कोमलगोभिरंजितं जगौ कलं वामदृशां मनोहरं ३ निशम्य गीतं तदनंगवर्धनं व्रजस्त्रियः
कृष्णगृहीतमानसाः आजग्मुरन्योन्यमलक्षितोद्यमाः स यत्र कांतो जवलोलकुंडलाः ४

तिसिद्धं तत्र वंशीलक्षणं अर्धांगुलांतरोमानं ताराद्दिविवराष्टकं ततोंगुलांतरे यत्र मुखरंध्रं तथांगुलं शिरोवेदांगुलं पुच्छमंगुलं सा रतु वंशिका नवरंध्रा
स्मृता सप्तदशांगुलमिता बुधैः दशांगुलामिता स्याच्चेत्सा तारमुखरंध्रयोः महानंदा मोहिनी च या तु स्याद्द्वादशांगुला आकर्षणी सापि वेणुरत्नस्वर्णैस्त्रिधो
दितेत्यादि शंयचाकर्षणी हि मीज्ञेया ३ अतः कामबीजयुतगीतेन गोप्य एवाकृष्टा इत्याह निशम्येति तदुक्तप्रकारं श्रीकृष्णविषयमनंगं अंकुरितप्रायं व
र्धयतिसद्यः पल्लवितत्तयासांगं करोतीति तत् एतेन गानस्यामृतसेकत्वं कृष्णेन पूर्वमेवाकृष्टाः मनस्थाः सर्वे भावायासांताः संप्रति तु गीतं श्रुत्वा आजग्मुः अ
न्योन्यमज्ञापितोद्यमाः असापत्न्यायेति भावः यद्वा कृष्णगृहीतमानसत्वेन विचारास्फूर्तेः अत एव जवेन चंचलकर्णभूषणाः जग्मुरिति वक्तव्ये आजग्मुरि
त्युक्तिः शुकस्य कृष्णांतिके स्वावस्थानस्फूर्तेः कांतो यत्र तत्रैवस्थाने इति गानस्याकर्षणे विद्यारूपत्वं ४ एवं तत्राप्तिमुक्त्वापि श्रीकृष्णस्वरूपश्रवणे त
त्रवणाच्चित्तानां तत्क्षणमेव त्रैवर्गिककर्मनिवृत्तिरिति ज्ञापनाय अर्धोवसितदेहिकादिकर्मत्यागपूर्वकं पुनस्तत्रस्थानाह्यममेववर्णयन्नकासांचित्स्वज्ञाति

ना.ग.पू.
४१

कृष्ण
४१

कर्मपरित्यागमाह दुहंत्य इति युग्मकं दुहंत्यो दोहयंत्यः वेणुगीताभिमुखं ययुः दोहं दोहनं दुग्धं वा यतः समुत्सुका विलंबमसहमानाः अपरा इति पूर्वेणापरे
णाप्यन्वेति एवमग्रेऽपि पयश्चुल्ल्यामधिश्रित्य पक्वमनुद्वास्य अपराः संयावं चाधिश्रित्य अनुद्वास्यानवतार्य ५ लोकत्यागं वदन् बंधुत्यागादित्यागमाह
परीति हित्वा ययुरिति पूर्वेणान्वयः अतिस्निग्धत्यागमाह पाययंत्य इति सुतान् भ्रातृपुत्रादीन् हित्वा न तु स्वस्यैव प्रसूतान् भृंगाररसानानुगुणत्वात्
धर्मत्यागमाह शुश्रूषंत्य इति दैहिकत्यागमाह अश्नंत्य इति अनाचांता एवेत्यर्थः ६ कासांचित्संगाज्ञाया प्रत्यहमंगेष्वाभरणं करोति बहुज्ञा इति
गीतगोविंदोक्तरीत्या क्रियमाणस्य स्वांगवेषस्याप्युत्कंठया त्यागमाह लिंपंत्य इति अंगरागं कुर्वंत्यः प्रमृजंत्यः अंगोद्वर्तनादि कुर्वंत्यः कासांचिद्देहावय
वविशेषानुसंधानमपि नातमित्याह व्यत्यस्तेति स्थानतः स्वरूपतश्चोर्ध्वाधोधारणेन विपरीतानि वस्त्राभरणानि यासां ताः श्रीकृष्णतुष्ट्यर्थं कर्म तदासक्त
मनस्तयान्यथाकृतमपि फलत्येवेति भावः विभ्रमाख्योऽयमनुभावः यथोक्ते विभ्रमो हारमाल्यादिभूषास्थानविपर्यय इति पद्यात्तु परिहस्यत्तगवताय
दुहंत्योऽभिययुः काश्चिद्दोहं हित्वा समुत्सुकाः पयोऽधिश्रित्य संयावमनुद्वास्यापरा ययुः ५ परिवेषयंत्यस्तद्धित्वा पाययंत्यः सुतान् पयः शुश्रूषंत्यः पतीन् का
श्चिदश्नंत्योऽपास्य भोजनं ६ लिंपंत्यः प्रमृजंत्योऽन्या अंजंत्यः काश्च लोचने व्यत्यस्तवस्त्राभरणाः काश्चित्कृष्णांतिकं ययुः ७ ता वार्यमाणाः पतिभिः पितृभि
र्भ्रातृबंधुभिः गोविंदापहृतात्मानो न न्यवर्तंत मोहिताः ८

भावत्कारितमिति ज्ञेयं एवं सर्वा अपि कृष्णांतिकं प्रतिययुः प्रस्थितवत्यः ७ न च कृष्णाकृष्टमनसां विघ्नाः प्रभवंतीति बोधयन् स्वैर्बलात्कारितवात्यानुसंधाना
नामपि तासां लज्जादित्यागमाह ता इति कृष्णं तु राज्ञो गम्यत इति तत्तदंतिकवर्तिपत्यादिभिर्मुहुर्वार्यमाणा अपि ययुरेव यतो मोहिताः हतविवेकाः तत्र हेतुः गोविंदेति
अयं पत्यादीनामपि शैथिल्ये हेतुर्ज्ञेयः गोविंदगीतातुष्टचेतस एतास्तद्दृष्टा तेन परावर्तिता इष्टास्या यास्यतीति मत्वा शिथिलाग्रहा इति भावः क्षणांतरे च तद्योग
मायाकल्पितास्तत्प्रतिरूपा दृष्टा ता एव पराकृत्यागता विभाव्य न वनेऽन्वेषणायान्यथा वन्वा भगवते स्वरूपे ध्यादिकमकुर्वन्निति वक्ष्यमाणानुसारात्क
ल्प्यं ८ यदि तु पत्यादिभिर्विघ्निता अभिनिविष्टास्तर्हि सद्यो देहमत्यक्षयन्निति सर्वासां भावविशेषं दृष्टांतेन प्रदर्शयन्नाह अंतरिति त्रिभिः अत्रेयं श्रीकृ
ष्णप्रेयस्यः खल्वनेकविधाः तत्र गोलोकादिवासिन्यो राधाद्या भगवता सहावतारभाजो नित्यसिद्धाः काश्चिदपराः साधनसिद्धाः यथा पद्मोत्तरख
ंडे पुरा महर्षयः सर्वे दंडकारण्यवासिनः दृष्ट्वा रामं हरिं तत्र भोक्तुमैच्छन्सुविग्रहं ते सर्वे स्त्रीत्वमापन्नाः समुद्भूताश्च गोकुले हरिं संप्राप्य कामेन
ततो मुक्ता भवार्णवात् इति बृहद्वामनपुराणे काश्चन श्रुत्यवतारपाउक्ताः संभवंतु सुरस्त्रिय इत्युक्तेर्देवकन्या अपि काश्चिदत एव पाद्मे चातु

रास॰ ४२

विंध्यमुक्तं गोप्यस्तुश्रुतयोज्ञेयाः ऋषिजागोपकन्यकाः देवकन्याश्चराजेंद्रनमानुष्यःकथंचनेति तत्रऋषिजानांसाधनवशात्सिद्धभावानां प्रा
कृतदेहवतीनांमध्येकासांचिदवस्थेयमुच्यते पतिशुश्रूषणार्थं मंतर्गहगताः पत्यादिकृतद्वारनिरोधादिनिबंधनानलब्धाविनिर्गमोयाभिस्ताः पूर्वासामि
वासांन तावः पद्व इतिनभक्तिप्रभावास्तत्यादिशैथिल्यंजातमितिज्ञेयं तस्मिन्कृष्णेभावनाअत्यंतंद्वातयुक्ताःसत्यःस्तमेवदध्युः ध्यानावेशेनमुद्रितनेत्राः
यद्वामीलितंलोचनंमन्यान्तोषज्ञानंयासांताः ९ ततश्चसद्यएवश्रीकृष्णंप्राप्ताःसत्यस्त्रिगुणकार्यंदेहंजहुरित्याह दुःसहेति युग्मकेन ननुकथंजहुः परमात्मे
तिज्ञानाभावातत्राह जारबुद्ध्यापीति नहिवस्तुशक्तिर्बुद्धिमपेक्षते अन्यथामत्स्यापिपीतामृतवादितिभावः ननुकर्मबंधनेसतिकथंजहुः कथंवातंप्रापुस्तत्रा
ह सद्यःप्रक्षीणबंधनाइति ननुभोगविनाकथंप्रारब्धक्षयः मैवंसद्योभोगेनैवतत्क्षयादित्याह दुःसहेति उत्कंठयादुःसहोयःप्रेष्ठविरहः तेनतीव्रः परांकाष्ठामा
पन्नस्तेनतापेनधुताअशुभाः तदप्राप्तिपरमदुःखभोगेनैवपापंक्षीणमित्यर्थः तथाध्यानप्राप्ताच्युतस्याश्लिगनेननिर्वृत्तिः परमसुखभोगस्तयाक्षीणपुण्यबंधना

अंतर्गहगताःकाश्चिद्गोप्योलब्धविनिर्गमाः कृष्णंतद्भावनायुक्तादध्युर्मीलितलोचनाः ९ दुःसहप्रेष्ठविरहतीव्रतापधुताशुभाः ध्यानप्राप्ताच्युताश्लेष
निर्वृत्याक्षीणमंगलाः १० तमेवपरमात्मानंजारबुद्ध्यापिसंगताः जहुर्गुणमयंदेहंसद्यःप्रक्षीणबंधनाः ११ राजोवाच कृष्णंविदुःपरंकांतंनतुब्रह्मत
यामुने गुणप्रवाहोपरमस्तासांगुणधियांकथं १२

इति संचितक्रियमाणनाशस्तु तस्मिन्दृष्टेपरावरे इतिश्रुतेः श्रीकृष्णब्रह्मसाक्षात्कारेणचादेहांतेपरंब्रह्मतारकंव्याचष्टेइतिसिद्धः अ॰ ऽ ऽ जिघांसयापिहरयेइ
त्यत्रेवजारबुद्ध्यापीत्यपिनाताद्दशबुद्धेर्निंद्यत्वंव्यज्यवस्तुमहिम्नातिप्राशस्त्यंव्यंजितं तथाचवक्ष्यते आसामहोचरणरेणुजुषामित्यादिवांछंति यद्भवभियोमुनयो
वयंचेत्यादिवगुणमयंदेहंजहुरित्युक्त्यानचिन्मयदेहेनगोलोकादौतत्प्राप्तिर्ध्वन्यते एवंतद्विहारसंकल्पः कल्पतरुस्वभावेन भगवतातत्क्षणेकेत्रेवबापूरितइत्युक्त
मितिदिक् १०।११ ननुप्रत्यगभिन्नब्रह्मत्वेनश्रीकृष्णसाक्षात्काराभावात्कथंमोक्षःकथंवाकांतत्वेनतंध्यायंतीनां अतेपिज्ञानोत्पत्तिरितिब्रह्मत्ताानवादीनांसदेहमपाकर्तुमि
यंश्रीकृष्णमाहात्म्यंज्ञानन्नपिराजोवाच कृष्णमिति कांतकमनीयंविदुर्नब्रह्मेति संचितक्रियमाणस्थूलकजन्मादिप्रवाहोपरमः कथमिति किंचपरमात्मानंसंगताइत्युक्त्या
तासांसायुज्यमुक्तिरुक्तेतिमन्यमानोभक्तानामपिसंदेहमपानुदन्राजोवाच कृष्णमिति केवलंकांतंविदुः नतुब्रह्मतयानिर्गुणतयाप्रत्यगात्मेदनवा अतोगुणधियांश्रीकृ
ष्णगुणकानुबद्धप्रेममयीनांतासांगुणप्रवाहोपरमःचिन्मयगुणपरंपराश्रयस्वचिद्विग्रहस्योपरमःब्रह्मोपासकानामिवकथमिति श्लेषेणचकेवलंकांतंविदुःन
ब्रह्मतयाव्यापकतयातोयथामांप्रपद्यंतेइतिन्यायेनव्यापकतायास्तास्वप्रकाशनादंतर्गहेप्राकट्याभावेनविरहमयगुणप्रवाहोपरमःसुदरोयमित्येवंज्ञानंतीनां कथं
हेमुनेसर्वज्ञेत्यर्थः १२

ना॰ग॰ दृवा॰ ४२

कृष्ण

वहिर्मुखानां ब्रह्मज्ञानवादिनां भक्तानां च संदेहनिरासार्थं राजप्रश्नप्रवृत्तिस्तथापि तान् लक्षीकृत्य भर्त्सयन्निव किंचित्सामर्षत्वेन शुक उवाच व्यक्तवचनः श्रीशुक उवाच उक्तमिति किं पृच्छसीति भावः कृष्णमेनमवेहि त्वं सर्वेषामेव वस्तूनामित्यादावनावृतं सच्चिदानंदब्रह्मैव घनतकाठिन्यवत् घनीभावमापन्नं श्रीकृष्ण नमायोपाधिकमिति बहुशः सप्रमाणमुपपादितमतो न तत्र ब्रह्मत्वेन ज्ञानमपेक्षत इति द्विषतामपि चैद्यादीनामसुरादीनां सायुज्यनिदर्शनैर्दुन्दुभिघोषायत इति नात्र चोद्यावकाश इति अथ च द्विषन्तं तज्जन्मानि सामीप्यादिकमनिच्छन्नपि तीव्रध्यानमहिम्ना ज्ञापकात्तो भिन्नपितांसिद्धिं पार्षदरूपतां गतो लोके सत्तदानीं सायुज्यमुक्तिं गत इति प्रत्यक्षतो लक्ष्यमाणोपीति भावः किंपुनः सर्वदा तत्सामीप्यकामेन तीव्रध्यानपराश्रिन्मयदेहं न तत्सामीप्यसिद्धिं गता इति श्लेषपक्षे चायमुत्तराशयः येयथामामित्यस्य स्वरानुमित्रादि भावेन भजंतां तथा तथा भजामीत्येवार्थः नतु वस्तुस्वभावलोप इति अन्यथा चैद्याजामिलप्रभृतीनां मुक्तिप्रदत्वादिबुध्यभावेन मोक्षाभावप्रसंगादिति व्यापकतया ज्ञानाभावेपि तदंतिकप्राकट्यादि विरहोपरम इ

श्रीशुक उवाच उक्तं पुरस्तादेतत्ते चैद्यः सिद्धिं यथा गतः द्विषन्नपि हृषीकेशं किमुताधोक्षजप्रियाः १३ नृणां निःश्रेयसार्थाय व्यक्तिर्भगवतो नृप अव्ययस्याप्रमेयस्य निर्गुणस्य गुणात्मनः १४ कामं क्रोधं भयं स्नेहमैक्यं सौहृदमेव च नित्यं हरौ विदधते यांति तन्मयतां हि ते १५ न चैवं विस्मयः कार्यो भवता भगवत्यजे योगेश्वरेश्वरे कृष्णे यत एतद्विमुच्यते १६

ति १३ देहीकृन्धनमनावृत इति शंकां परीकुर्वन् भक्तानाम प्रार्थितमपि निःश्रेयसं दातुं भगवतस्तत्र तत्र प्राकट्यमात्रमित्याह नृणामिति गुणात्मनो गुणनियंतुः अप्रमेयस्यापरिछिन्नस्य तत्मना ज्ञादि विकाररहितस्य निर्गुणस्यैव भगवत इयमनावृत ब्रह्मस्वरूपाव्यक्तिः वंशीविभूषणमेघश्याम तया प्राकट्यसाध्य भक्तानां निःश्रेयसं मोक्षः स्वलीलानंदप्राप्तिश्च तत्संपादयितुमेव अन्यथा भ्रूविजृंभमात्रेण ब्रह्मांडकोटिसंहारसमर्थस्य भूभारसंहारमात्रार्थमवतारानुपपत्तिरित्यर्थः अतस्त द्विग्रहस्यानावृत्त सच्चित्स्वरूपतया परतत्वे कृतपत्यान्न देहीसाहस्यमपि कुतो देहित्वमिति भावः १४ अस्त्ववतारकालिकानां वार्तासर्वदातनानामपीयं रीतिरित्याह काममिति काम गोपीनामिव प्रेममयं स्नेहं ध्याइव स्थिरं सामयं च क्रोधो द्वेषश्चैद्यादीनामिव भयं कंसादीनामिव स्नेहं गोपवृष्णिपांडवानामिव ऐक्यमात्मारामाणामिव सौहृदं भक्तिः कथं कैसिकादीनामिव विदधतो विदधत इति पाठो अत्र स्नेहसौहृदे एवानुमते अन्यद्वंतानिभया केमुत्याय ऐक्यमपि नानुमतं यानिर्वृत्तिस्तनुभृतां तव पादपद्मध्यानादित्युक्तरीत्या तथानंदानुभवाभावात् एवशेषस्य सर्वत्रान्वये नैके

रास
४३

कृतः कृतार्थीभावो व्यज्यते तन्मयतां तत्सायुज्यस्वसारूप्यादि मुक्तिं तदेकस्फूर्तिं च अतः कथंचित्तदासक्तिर्मुक्तिकारणमिति भावः १५ न चायं भगवतो
ति नारद इत्याह न चैवमिति विस्मयोऽसंभावना पर्यवसायी त्वया न मंतव्योऽसौ ऐश्वर्यस्य तन्महिमा भिन्ने न तु न कार्य इव वैतण्डिकतर्काभिनिवेशेन क्रियतां नाम
ति भावः यतः श्रीकृष्णादेतस्थावरादिकमपि मुच्यत इत्यर्थः १६ एवमयरासलीलाप्रसंगे इदशः प्रश्नः समाधानप्रपंचश्च रसविघातकत्वादनुचित इति
व्यञ्जयन्पुनरप्रार्थितः स्वयमेवोत्कंठया प्रस्तुतमाह ताः वेणुगीतविक्लवाः तदा हा व्रजयोषितः व्रजे एव स्थातुं योग्या अपि स्वांतिकमेवायाता दृष्ट्वा वाचःपेशैः
विमोहयन् हृतविवेकाश्चकुर्वन्नवदत् ते च वाग्विलासाः द्विविधाः शाब्दिका आर्थिकाश्च आद्याः स्मितावलोकादिपूर्वकसुललितवर्णविन्यासादयः स्वाभा
विकाः द्वितीयारसभावगर्भिताः संतो वास्तवार्थाः प्रेक्षाप्रार्थनामयत्वेन त्रिविधाः तत्रादौ वास्तवार्थाः अते प्रार्थनामयश्च निजोत्कंठ्यबोधकाः मध्ये उपेक्षा
मयास्तु स्वस्मिंस्तासामुत्कंठावर्धनार्थं नतूपेक्षार्थं एवं मनस्यन्यद्वचस्यन्यदित्याकारगुप्त्या नर्मकौतुकविशेषेण तासां वशीकरणार्थाश्च तथोक्तौ योग्यतामाह
वदतां श्रेष्ठः वाग्विदग्धीगुरुः यतो भगवान् ज्ञानादिभिः सर्वातिशायी यद्वा सर्वेषामपि श्रेष्ठोऽन्तर्वेणार्थेयथा व्रजयोषितः साहाजिकस्वप्रेमबन्धस्ता अपि ताः

ता दृष्ट्वांतिकमायाता भगवान्व्रजयोषितः अवदद्वदतां श्रेष्ठो वाचः पेशैर्विमोहयन् १७ श्रीभगवानुवाच स्वागतं वो महाभागाः प्रियं किं करवाणि वः व्रजस्यानाम
यं कच्चिद्ब्रूतागमनकारणं १८

प्रेममयं कामविकारं प्राप्ता अपि अंतिकमायाता अपि साक्षाद्दृष्ट्वापि स्वयं भगवान् तासां भाववत्तोपिकपटवाक्यैर्मोहयन् वैकल्यं प्रापयन्नवदत् यतो नर्मोक्तिवादिषु
श्रेष्ठः नर्मविशेषार्थमित्यर्थः १७ तासां तथागमनं दृष्ट्वाति प्रीत्याह स्वागतमिति युष्माकं शोभनमागमनं कृतं महान् भागो भजनं यासां सर्वपरित्यागेन मदेकोप
क्षया आगतत्वात् अतस्तासां प्रेमवशः सन्नाह प्रियमिति तासामागमनेन व्रजस्थानां क्षेमाशंकयाह व्रजस्येति अस्तु वा तथा मन्यमानाः स्वपार्श्वस्थानितिवक्ष्य
माणरीत्या सर्वमनोमयं विधास्यते आगमनकारणं तु ज्ञातमपि मत्प्रीतिविशेषार्थं मुखतो ब्रूतेति वास्तवोऽर्थः अथ नर्मार्थमुपेक्षामयः युष्माभिः सुष्ठु आगतं
चिदिति संबंधः महद्भाग्यं पातिव्रत्यरूपं यासां अतो वः प्रियं किं करणीयं तद्वा ज्ञापयेतु पतिव्रतानां प्रियाचरणेन मम धर्मः स्यादिति भावः भवदीयानां क्षेमविधाने
नापि मम परं श्रेय इति तद्वादिरूपतामित्याशयेनाह व्रजस्येति यद्वा स्वागतमित्यादिना समागतेषु वक्तुं योग्यं नर्मणा उक्त्वा सर्वाः ससंभ्रममागता वीक्ष्य स्वयमपि कैतवे
न संभ्रमिव पृच्छति व्रजस्यानामयमिति तोऽचतुरसिंहयथा सति गोपा अप्यागताः स्युरित्याशंकामंगनानामेव कोऽप्युपद्रवः स्यादिति तर्केण निरस्यन्नाह इति स्वा
गमनप्रयोजनं ब्रूतेति यद्वा किं करवाणीति पृष्टे तदाशयाज्ञानेन लज्जया चानुत्तरा वीक्ष्य मन्मथोत्कवेगेनेव न वदथेति कैतवेनारोप्य पृच्छति व्रजस्येति सहासमुखी
वीक्ष्याश्वस्तामभियन् लज्जामिवाह तिष्ठतु मम दुस्तर्कः यूयमेव ब्रूतेति अथ प्रार्थनामयोऽर्थः हे महाभागाः महद्भाग्यभवतीनां यतः इदृशीज्योत्स्ना इदृशं वनं

४३

गोपव.
४३

क्षम

इदानीं यौवनं तत्रापीदृशो हमनुवर्तिप्रिय इति ते प्रार्थइत्युत्तसोपानमाह कच्चित् युष्माकं स्वागतं प्रार्थनामाह किं वः प्रियं कर्तव्यं भवतीनां यत् हृदगतं तदेव
ममापीष्टमिति भावः अनुत्तरा वीक्ष्य पुनः प्रार्थयितुं सोपानांतरमाह अजल्पेति प्रार्थयति ब्रूतेति मा लज्जतेति भावः १८ श्रुतागमनकारणमित्युक्तया मंदहासा
न्नातासां स्वविषयकभाव बहिर्व्यक्तीकर्तुं वस्तुस्थितिमाह रजनीति एषा वनसंबंधिनी घोररूपा मासादेव रात्रिस्त्रिडोचितेति भावः किंच घोरसत्त्वेति भी
त्याक्रीडापि सम्यङ् न सेत्स्यतीति भावः अत इदानीं प्रतियातेति भवदीप्सितं समयांतरे स्यादिति भावः यद्वा ननु भोः रसिकशेखर आगमनहेतुं किं पृच्छसि भवा
निव वयमपि वने विहर्तुमागताः स्मेति पृच्छन्तं वस्तुस्थितिमाशंक्योपेक्ष्यानिषेधति एषा प्रत्यक्षा रजनी न तु दिनं ततः कुलवधूनां बहिरागमनं नोचितमिति भावः
नो रात्रिविलासीनूसा मुदित्य वधूनामागमने को दोषः किं व्रजे स्माभिरुत्सवो नेन गम्यतेत त्राह वन एव घोररूपा न व्रजे सहायबाहुल्यात् हे कुवलयनेत्रे यज्ञ्या सक्ती
रात्रीस्तत्राह घोरैः सत्त्वैर्व्याघ्राद्यैर्नितरां व्याप्ता अतो व्रजं प्रतिनिवृत्त्य गच्छत नात्र विलंबो युक्त इत्याह नेति कथं भवता स्थीयते तत्राह स्त्रीभिरिति स्त्रीणामल्प
सत्त्वादिति भावः ननु त्वमेव भीरुर्नो स्माकं घोरेभ्यो भयं तत्राह सुमध्यमा इति तनुमध्यानामबलानां बलिष्ठेभ्यो भयं स्यादिति भावः यद्वा घोरसत्त्वसेविते स्फ

रजन्येषा घोररूपा घोरसत्त्वनिषेविता प्रतियात व्रजं नेह स्थेयं स्त्रीभिः सुमध्यमाः १९ मातरः पितरः पुत्रा भ्रातरः पतयश्च वः विचिन्वंति ह्यपश्यंतो मा स्म व्यं बंधुसा
ध्वसं २०

केत्व सार्श्वे स्थितानां नो न कुतो भयमित्याशंक्य निषेधति नेति इह मत्पार्श्वे स्त्रिभिर्न स्थेयं आबाल्यब्रह्मचारिणा मया स्त्रीसंगस्य परिहृतत्वात् तत्रापि बा
लवृद्धाभिः सह वासे न दोषो युयं तु युवत्यः सुंदर्यश्चेत्याह हे सुमध्यमा इति ननु कपटो व्रजे स्मत्सहवासस्तु बहुधा भवति तत्राह इह निर्जने वने रात्रौ च अत इह
दानीं युष्मत्स्थित्या ममाकीर्तिः स्यादिति प्रतियातेवेति श्लेषेण पुनः प्रार्थयते तत्र वने मा भैष्टेत्याहार्धेन एषा उदितचंद्रा जनानुरंजयतीति रजनी घोररूपा
व्याघ्रादिसेविता चेति मात्र कोप्यायास्यतीति भावः यद्वा अघोररूपा तमोहानात् अतो ज्योत्स्नायादिनप्रायत्वाद घोरैः सत्त्वैः रंगकोकिलाद्यैर्निषेविता अथ
वाघोरं दुःखानां भयजनकं बल्लयस्य तेन मया निषेविता अतः सर्वतः व्रजं प्रतिनयात प्रार्थनीयाल्लोइ एवं पूर्वेत्रव्रतेत्स्य यमपि इहैव स्थेयं यतः स्त्रीभिः स्त्री
णामिदमेवस्थानं रतियोग्यमिति भावः सुमध्यमा इति सुंदरीणामदंतिके एवं स्थातुं उचितमिति भावः १९ ननु त्वत्क्रीडादिनोद्दीपितस्मरा विलंबं न त्वं सहामहे त
त्राह मातर इति मात्रादिसमक्षमागता वो नक्तीवाद नस्थाने त्वागच्छेयुः युष्मदप्राप्त्या प्राणान्वास्य जेयुः अतो बंधूनां साध्वसपरिहाराय समयोत्तरं वा प्र
तीक्षत बंधुभ्यः साध्वसपरिहाराय वनांतरं वा चलत नेति यद्वा ननु पुरुषसिंह त्वदंतिकस्थानां नः कुतो भयं किंच भोः सुप्रतिष्ठा जनकोपि न स्यतीति दुः

कीर्तेर्मा भैषीस्तत्राह मातर इति अतो मात्रादिष्वेकोप्यत्रागतो मत्पार्श्वे युष्मान् पश्येत् तदोभयेषां भयलज्जे स्यातां अतो नस्थित्वोभयेषां बंधुभ्यो भयं बंधोर्मम
दुष्कीर्तिभयं च माकुरुतेति श्लेषेण प्रार्थना पक्षे नात्र बंधुजनागमनमाशंक्यं यतो मातर इति हि रेवार्थे गहनेवनेस्मिन्नंधा इवापश्यंत एवाविचिंत्येति यद्वा विचि
न्वंत्य एव नह मार्गेणापि न द्रक्ष्यंतीत्यर्थः अतो बंधुभ्यो भयं माकुरुतेति २० तासां भयादि नावनं तरं जिगमिषां दृष्ट्वा भयादित्याजनाय नान्यदीदृशं वनमिति प्रदर्शनेन
नावं वर्धयति दृष्टमिति राकेशः पूर्णचंद्रः यमुनास्पर्शिनोनिलस्य लीलामंदगतिस्तया कंपमानैस्तरुपल्लवैः शोभितमिति ननु बंधुजनास्तद्वाक्याद्यतिक्रमेण
स्वत्वा एवेति कुतस्तद्भयमिति चेत्तर्हि एवमत्र रात्रावागमने कोर्थ इति सकैतवं क्षणं ध्यात्वा अहो ज्ञातं ज्ञातं वनशोभेक्षणार्थमेवागता इति तच्च संपन्नमेवेति वन
दर्शयन्नाह दृष्टमिति तद्यातेति परेणान्वयः यद्वा प्रणयकोपेन तासां यदन्यतो दर्शनं तदन्यथोत्प्रेक्षते तत्र कोपेन पराङ्मुख्य वनोन्मुखीः प्रत्याह दृष्टं वनमिति ऊर्ध्वमुखीः
प्रत्याह राकेशाकरेति तीराभिमुखीः प्रत्याह यमुनेति प्रार्थनापक्षे न केवलमत्र वने तत्कृपा नाव एव किंतु सुखनिधानत्वमपीति दर्शयति दृष्टमिति सर्वगुणयुक्तं
वनं दृष्टमेव तत्तस्माद्गोष्ठं मा यातेति परेणान्वयः २१ भवन्मनोरथानुसारेण दृष्टमित्याद्युक्तं वस्तुतस्तु नायं सतीधर्मः स्वस्वधर्मेण मत्सेवा नमेव पूर्वकांडे सिद्धांतिन
मित्याशयेनाह तदिति यतो यूयं सतीः सत्यः मा चिरं शीघ्रमेव घोषं यात गत्वा च पतीन् शुश्रूषध्वं ननु त्वत्सेवामसहमाना आसंत तस्ते तत्संगे ज्ञातदूषणाभिरस्माभिः पाति

दृष्टं वनं कुसुमितं राकेशकररंजितं यमुनानिललीलैजत्तरुपल्लवशोभितं २१ तद्यात मा चिरं गोष्ठं शुश्रूषध्वं पतीन्सतीः क्रंदंति वत्सा बालाश्च तान्पाययत दुह्यत २२

वत्सेन त्वत्सात्रात्रयोर्निराजनीवत्यदूरतस्यक्तमित्याशंक्य कारुण्येन यातेत्याह क्रंदंतीति वत्सान्पाययत बालार्थं दुग्धं गोभ्यो दुह्यतेति एतच्च वनतन्नोपि सान्निध्यास
क्तत्वाद्द्वासाद्यदोह्यत तत्प्रियगवाद्युपेक्षया अत्रेदं तत्त्वं युवतीर्गोपकन्याश्चेति हरिवंशोक्त्या कात्यायनीव्रतलब्धवराणां पत्यंतरैर्नैव विवाह इत्युक्तेः अन्यासामुत्कंठा
वर्धनार्थं पत्यंतरैर्विवाहप्रतीतावपि न संभोगः किंतु मन्यमानाः स्वपार्श्वस्थान् स्वान्स्वान्दारानिति वक्ष्यमाणरीत्या तत्पतीनां ताभिरंगसंगाभ्रममात्रं अत एव तासां नन्त्रा
तापस्य च मपि सहितो स्वामीति तापिनीश्रुतेः वध्वाव ध्व इति अत्रैवोक्तेः श्रियः कांताः कांतः परमपुरुष इति ब्रह्मसंहितोक्तेश्च भगवत्पत्नीत्वेनोक्तानां रासादपूर्वं पश्चाद्वा
पत्यंतरसंभोगानौचित्यात् जातापस्यानां जघन्यानौचित्यात् नायिकात्वेन पुरुषोत्तमे नायके आलंबनभावत्वेवर्णनीयरसवैरस्यापातात् नत्वेतस्मात्परोवर्णनीयः श्रृंगा
रोस्तीसर्वाः शास्त्रकाव्यकथाश्रयारसा इति वक्ष्यमाणात् अतो देवरादिपुत्रा एव पुत्रत्वेनोक्ताः पायनं च गोदुग्धस्यैव न स्तन्यस्य अत एव पूर्वमपि पाययंत्यः शिशून्पय इत्युक्तं न
तु सुतान्स्तनमिति तस्मात्पतयो लोके तथा प्रतीताः पुत्राश्च गोणार्थाः इति उपेक्षापक्षे तत्तस्माद्वनशोभेक्षणमनोरथस्य पूर्णत्वात् गोष्ठं यात विलंबं मा कुरुत किमर्थं पतीन्सेव
ध्वं यतः हे सतीः सत्यः अतः परपुरुषस्य मे पार्श्वे वस्थानमयुक्तमिति भावः क्रंदंति बाला इति तत्करुणयाच्च गच्छतीति ननु भो कामातुरनवयं रस्य धर्ममागताः किंतु वनशोभेक्षणाय
त्याशंक्य श्लेषेण प्रार्थयते तत्तस्माद्बंधुभ्यः साध्वसाभावात् वनशोभादिरिति सामग्रीसत्वाच्च अन्यार्थमागता अपि अचिरात् शीघ्रं मा यात किंतु रासानंतरं रात्र्यंते यास्यथेत्यर्थः न

न्रपतिशुश्रूषणोद्यर्थं शीघ्रमेव गंतव्यं तत्राह पतीन्माशुश्रूषध्वमिति शाप्दस्य सर्वत्रागेनुवृत्तिः सतीः श्वश्रूप्रमुखाः माशुश्रूषध्वं यद्वा पतिव्रता पदवीमासेवध्वं यद्वत्सा बाला
श्च मात्रं दति तन्मातृणां दासादीनां च सत्वात्तस्मात्तान्मापायत मादुग्धत चेति २२ अहोवत बाल्यादयोपि सर्वे परित्यक्ता एवस्याः शंक्य तानिवर्तयन् सभ्याद्यं पक्षांतरमाह अथवेति
सतीनां भवतीनां रतलील्यार्थमागमनं न स्यादेवमस्नेहेन यंत्रिताशयाः वशीकृतचित्ताः सत्सोमदर्शनार्थमेव यूयमागता इति स्यात् तच्च उपपन्नं युक्तं हि यतः सर्वेपि प्राणिनो मयि प्रीता भवं
ति इति अथरूपवासंरं भक्षुभि तद्दृष्टीर्दृष्ट्वा जंतुसारधारणतानिर्देशेनातिक्षोभयन्नाह अथवेति दृष्टं वनमिति पक्षापेक्षयापक्षांतरं मयि अभिस्नेहः प्रीतिसामान्यातिशयः न तु रत्या
ख्यस्तमादागता नवनदर्शनायेति शेषं पूर्ववत् प्रार्थनापक्षे यद्यप्यन्यप्रयोजनायागतास्तथापि क्षणं विश्रम्य यातेत्युक्त्वा पक्षांतरमाह अथवेति यदि वा मदभिस्नेहाद्रस्याख्यादा
गतास्तर्हि तदेतदुपपन्नं युक्तमेव यतः प्राणिमात्राणि मयि प्रियंते तादृशभाववतीनां का वार्ता अतो ध्रुनामयासहरमध्वमिति भावः २३ मद्दर्शनार्थमागतानामपि वो व्रजगमनमेव यु
क्तं यतो भर्तृशुश्रूषादिस्वधर्मेणैव ममाधिका प्रीतिरित्याशयेनाह भर्तुरिति परो धर्म इति तासां भावपरीक्षार्थं एतावानेव लोकेस्मिन्पुंसां धर्मः परः स्मृतः भक्तियोगो भगवति तन्ना
मग्रहणादिभिरिति भगवत्सेवनस्यैव परमधर्मत्वोक्तेः यद्वा ननु त्वयि यद्यस्मत्स्नेहो निश्चितस्तर्हि त्वच्छुश्रूषापि युक्तेत्याशंक्य धर्मशास्त्रेण भावयति भर्तुरिति भर्त्रादीनां शुश्रू
षणादिकमेव धर्मः न तु यत्र स्नेहस्तच्छुश्रूषणं न तु तच्छुश्रूषादिकमपि क्रियतरवतत्राह अमाययेति परपुरुषभजने तत्सकपटं स्यात्ततो धर्मोपि दुष्येदिति भावः कल्याण्यः सेहस

अथवा मदभिस्नेहाद्भवत्यो यंत्रिताशयाः आगता ह्युपपन्नं तत्प्रियंते मयि जंतवः २३ भर्तुः शुश्रूषणं स्त्रीणां परो धर्मो ह्यमायया तद्बंधूनां च कल्याण्यः प्रजानां चानुपोषणं २४ दुःशी
लो दुर्भगो वृद्धो जडो रोग्यधनोपि वा पतिः स्त्रीभिर्न हातव्यो लोकेप्सुभिरपातकी २५

त्यः प्रार्थनापक्षे न केवलं स्नेहादेवोपपन्नत्वं धर्मतोपीत्याह भर्तुरिति अमायया कन्याभावादारभ्य वृत्तो यो भर्ता न तु पित्रादिभिर्बलाद्दापादितस्तस्यैव शुश्रूषणं परो धर्मः तथा
तद्बंधूनां चेत्यादि भीष्मेणांबायाः परित्यागेन बाल्यापादितस्य तद्धर्मतो भर्तृत्वासिद्धेः अतस्तेकपटेन भर्तारः सद्भाववृत्तत्वेन त्वहमेव सत्य भर्ता वः शुश्रूषणीय इत्यर्थः २४ किंच
पतित्यागे तत्पापेन लोकद्वयभ्रंश इत्याह दुःशील इति चौर्यादिरतः दैवहीनः जराव्याप्तः सामर्थ्यहीनः महारोगी स्वोदरभरणेप्यसमर्थ इति क्रमेणार्थः अपः प्रत्येकमन्वयः
अपातकी पतनहेतुपापवान्हेय इत्यर्थः यद्वा ननु सर्वथायतयस्यक्ता एव किं तच्छुश्रूषाद्युपदेशेन तत्राह दुःशील इति दुःशीलादिकोपि न हेयः व्रजनारीतु सर्वस्य सद्गुण
युतो निष्पापश्च कथं त्याज्यः स्यादिति भावः प्रार्थनापक्षे तस्माद्वस्तुतः हमेव पतिरिति स्थिते दोःशील्यादियुक्तोपि पतिर्न हेयः सर्वसद्गुणयुक्तः पतिरहं कथं हातव्य इत्याह दुःशी
ल इति पतिर्न हातव्यस्ते तु वस्तुतो न पतय इति भावः २५ भर्तृशुश्रूषणममाययाचेद्धर्म इत्युक्तं तद्विवरणायाह अस्वर्ग्यमिति चौर्यपारदार्यादिवर्जनसहितमग्निहोत्रा
चरणं धर्मस्तथा जारसौख्यवर्धनपूर्वकमेव पतिशुश्रूषणं स्वर्ग्यो धर्म इति भावः यद्वा जारसौख्यं दृष्टादृष्टभयप्रदर्शनेन भावयति अस्वर्ग्यमिति स्वर्गप्राप्तौ प्रतिकूलं न तु मास्तु
स्वर्गस्तत्राह अयशस्यमिति पूर्वयशोलोपकं ननु गुप्तत्वे कथमयशस्तत्राह तथापि फल्गु तुच्छं क्षणिकत्वात् ननु त्वया सह तदप्यपरिमितं तत्राह कृच्छ्रं दुःसाध्यं न नु वनवि
हारात्कसाध्यमेव तत्राह यमदंडासत्यादिभ्यश्च भयं प्रापयतीति तत् ननु त्वदधरामृतापेक्षया सर्वमुपेक्षितं न कुतोपि भयमत आह स्वपरदेशयोर्व्यवहारपरमार्थयो

अनिंदितं औपपत्यं जारसौख्यं ननु इष्टसिद्धौ निष्ठापि सुसहा तत्राह कुलस्त्रिय इति संबोधनं कुलकलंकः कुलस्त्रीभिः परिहार्य एवेति भावः प्रार्थनार्थश्च पूर्वोक्तरीत्या
हमेव मुख्यः पतिस्तत एवोपपत्यं इति तत्संगसुखमेवास्वर्ग्यादिरूपमिति यद्वा तदुत्प्रेक्षितानि स्मृतिवाक्यानि परुसर्वोपरिकः अधर्मः अपातक्यपि दुःशीलादिपतिर्नेहा
तव्य इति काक्वा हातव्य एवेत्यर्थः औपपत्यं पत्युः सामीप्यं अस्वर्ग्यादिदोषयुक्तमेवत्स्यैव मन्यपराणीति छलेन सनर्मव्यंजयति २६ वियोगकालिकभक्तप्रेमवैयग्र्यप्रदर्श
नलालसावान् भगवान् तासां प्रेमवैयग्र्यदर्शनार्थमाह श्रवणादिति श्रवणादिभिर्यो मयि भावः प्रेमोत्कंठ्यवैयग्र्यरूपः स यथा मत्प्रियः मद्वैयग्र्यापादकत्वात्तथा संनिक
र्षेण यो भावः स नेति भावः यद्वा एवं बहुधा प्रत्याख्याने प्यनिवृत्तिं दृष्ट्वा पूर्णमपि तासां भावमपह्नुवन्नौदासीन्यं विदधत्ते श्रवणादिति अपह्नवे भावेंगसंगो न रसावहः पक्ष
भावश्च यथा श्रवणादिना भवति न तथांगसंगेन विरहे उत्कंठ्यात तद्भावो द्वः संयोगे उत्कंठाशैथिल्यादिति भावः प्रार्थनापक्षे ननु येन सङ्गभावेन स्वस्य भर्तृत्वं तदभावा गो
पानां अभर्तृत्वमुक्तं तस्यैवासंभवः तत्र विप्रकृष्टत्वात्तेषां सन्निकृष्टत्वात्संनिकृष्टे एव भावो दयादित्याशंक्याह श्रवणादिति श्रवणादिना मयि यथा भावः तथा संनिकर्षेणा
पि पतिं मन्येषु तेषु न स्यादित्यर्थः तस्मात् गृहं प्रतिनयातेति न अत्रानुषंगः यद्वा ततो गृहात् गिनिस्यन्त्रा आकारप्रश्लेषः अभावेन स्वनोनाचेत्यमरोक्ते रयात नयातेत्यर्थः २७
विप्रियमिति अनेकार्थस्पर्शित्वेनानिश्चिताशयत्वात् उक्तेहास्यभावेनोपेक्षार्थस्यैव स्फुरणात् भग्नस्तद्रति विषयो मनोरथो यासां चिंतोध्याने आपुः अयं प्रेमार्द्रोप्यस्म
हो भाग्येन काठिन्यं गतः तत्किमसुनस्यादिभिरनुनयेम उत प्रतिवचनेन नष्टजं प्रतिनिवृत्त्यावास्याशयं निर्धारयेम अथवा सद्यः प्राणांस्त्यजेमेत्यादिचिंतया मारिस्त्यर्थः २८
चिंताप्राप्तानां स्थितिमाह कृत्वेति शुचः शोकात् दुःखात्तेन दीर्घोष्णेन श्वसनेन शुष्यंतो बिंबवद्दारुणाः कोमलाश्चाधरा येषु तानि मुखानि अवश्रवांचीकृत्या वामपादांगुष्ठेन महिं
लिखंत्यः हे भूमे विदीर्णा भव प्रविशाम वयमित्याशयेनेवेति भावः गृहीतकज्जलैरश्रुभिः कुचकुंकुमानि क्षालयंत्य इत्यस्त्राणां धारारूपत्वं बहुवचनेन बाहुल्यं च व्यंग्यं तू
ष्णीं तस्थुः चिंतावेशेन वक्तुमस्फूर्तेः सर्वत्र हेतुः उरुः दुःखभरो यासामिति अनेन नैवर्ण्यस्तंभादयोपि बोध्यः एते च चिंतानुभावा नावक्ष्यमाणनिषेधनरूपार्थविरुद्धाः का
मीकृतप्रार्थनायां कुलवतीनां तत्संभवात् २९ प्रेष्ठमिति किंच प्रेष्ठं प्रियतममपि प्रियसामान्यादपि भिन्नत्वाभिप्रतिभाषमाणं प्रत्याचक्षाणं तर्हि कथं तस्मान्मनो न न्यवर्तयन् तत्रा
ह तदर्थे कृष्णप्राप्त्यर्थं विनिवर्तिताः निर्वासनं निरस्ताः सर्वाभिलाषा याभिः यतः कृष्णं आनंदघनतया चित्ताकर्षकं अतः कृत्वत स्म दुःखभरे कथं वक्तुमशक्ताः तत्राह संरंभेति को
पावेशेन गद्गदा गिरो यासां कोपेन दुःखावरणादिति भावः नेत्रमार्जनं विषादकोपसंधिजं तच्च श्रीमुखावलोकनपूर्वकमुक्त्यर्थं किंचित्संरंभेति विषादांशसत्त्वात्कोपप्रवि
षादकार्यं गद्गदत्वं अनुरक्ता इति सर्वत्र हेतुः ३० श्रीगोप्य ऊचुरिति मैवमिति अत्र सर्वासामुक्तौ कोलाहलत्वं तया रसानाधायकत्वान्मुख्यानामेवोक्तिः सा च तन्नः प्रसीदेति
सिंचांगेति तन्नः प्रसीद वृजिनेति तन्नो निधेहीति ते च तु कृत्वः उपसंहारानुसाराच्छ्लोकद्विकचतुष्टयस्थितानां तासां क्रमेणेति ज्ञेयं सर्वासां भगवत्सन्मुखत्वं च पुरुराजिमं
डलैरित्यत्र गोपबालानामिव ज्ञेयं श्रीकृष्णवल्लभानां गोपीनां पादरेणुमिह वंदे। वादामदनविनोदे हृदिणा यासामनेकार्थाः १ गोप्यः कृत्तिपुत्रिधान्याख्या वास्तवार्थस्य बो
धिनी ऐश्वर्यस्य निषेधस्य त्वेवं तेया समासतः २ अथ पत्यादित्यागेन त्वद्भजने स्माकं धर्मो वेत्यास्तां तवैवतावदस्मत्यागे दोषाः परिहार्य इत्याहुः मैवमिति नृशंसं कठिनं सा

क्षान्मारकं वा नृशंसो घातुकः क्रूर इत्यमरात् एवमेतद्वचनसहस्रमपि किं पुनरेतदित्यर्थः तत्रापि हे विभो अस्मत्प्राणनाथ तत्रापि भवान् प्रमादस्वभावः गदितुमपि नार्हतीति किं
मुत व्यवहर्तुमित्यर्थः स्वागतं वा इत्यादि सन्न्यायेन दूरत्तमपि निवर्तनार्थतया नृशंसमवेति सर्वं वक्तुमनर्हमवेति भावः इत्थं चेदं स्वागतमिति पादस्याप्युत्तरं बोध्यं ननु भोः प्रि
यवादिन्यस्तर्हि किं कर्तुमर्हामि तत्राहुः अस्मान् भजस्व मनोरथपूरणेनानुवर्तस्व यतस्तव पादमूले भक्त्या सेवितवतीः पादपद्ममित्यनुक्तिर्नृशंसोक्त्या काठिन्यं विभा
व्य अनेन प्रियं किमिति पादस्योत्तरं ननु गोपगृहिणीर्वः कथमेवं भजामि तत्राहुः संत्यज्येति सर्वान्विषयान्पत्यादीन् ३ त्वत्कृते प्रतिकूलान् सम्यक् दार्ढ्येन त्यक्त्वा अनेन
व्रजस्यानामयामित्यादि दुग्धतेत्यतस्योत्तरं त्यक्तविषयक कुशलादिचिंतयानासंभवात् विषयत्यागेन देहेपि गलितप्रेमतत्या रजन्येषेत्यादिवाक्यमप्युपादेयमिति व्यं
जितं व्यतिरेकेणाहुः दुरवग्रह हे दुराग्रह अस्माननन्यगातीर्मा त्यज त्यागे दोषस्यादिति भावः कथमित्याशंक्य धर्माद्यनपेक्षस्यापीश्वरस्य धर्मपालनावश्यकतादर्शं
नादित्याहुः देव इति तत्र मुमुक्षूनपि किमुत त्वदेकरक्षकान् यद्वा अमुमुक्षून् मोक्षमप्यनिच्छून् यद्वा मुमुक्षून् तदन्यत्सर्वं त्यक्तुमिच्छून् शरणागतान् भजते स्वीकरोति शरण्य
त्वाख्यधर्मलोपभियेति भावः तथास्मान्भजस्वेति भजत इति द्वितीयांतपाठे भजस्वेत्यस्य विपरिणामेनात्रान्वयः अत्र नंदनंदनत्वेनैव श्रीकृष्णोल्लब्धभावा अपि तायस्याः स्त्री
भक्तिर्भगवत्यकिंचने त्याद्युक्तेर्हरिभक्तिमहादेव्याः सर्वामुक्त्यादिसिद्धय इत्यादिनारदोक्तेश्चानादृता अपि ज्ञानादिसिद्धयः परिचरंतीति प्रेममय्यपि तासां वचसि पार
मैश्वर्यज्ञानमयोप्यर्थो भक्तानां स्फुरतीति तासां महिमसूचनाय व्याख्यायते हे विभो अंतर्बहिर्व्यापकत्वस्याद् भक्त्या अस्मान् भजस्व अन्यथा ये यथा मां प्रपद्यंते तां
स्तथैव भजाम्यहमित्यादि स्ववचनबाधापत्तिः भो तत्त्वज्ञ पूज्याः कथं विषयसुखमिच्छन्तस्तत्राहुः संत्यज्येति त्वयास्वहरतः प्रेमविलासरूपत्वेनाशेषपुरुषार्थसारत्वा
त्परमार्थसुखमेवेच्छाम इति भावः ये यथा मामिति वचः सत्यं चेदस्मद्वदन्याशेषत्यागेनास्मान्भजस्वेति गूढाशयः हे स्वच्छंद अस्मान् प्रपन्ना मा त्यज ईश्वरत्वादधर्मस्य
र्शापि प्रतिज्ञाहानिः सत्यसंकल्पश्रुतिविरुद्धत्वादनुचितेति भावः सालोक्यादि मुक्त्यन्तान् विषयान् संत्यज्यापि ते त्वाम् अमुमुक्षून् यद्वा ते ते तुभ्यं त्वां प्राप्तुं विषयान् मुमुक्षू
न् अन्यजन्मन्यनपि भज पाठांतरे मोक्षेच्छया भजतोन्यानपि मा त्यज यतो यथा यथावत् परिपूर्णतया आदिपुरुषो देवो भवानिति अनुरक्तप्रियेणाति प्रार्थ्यमाना
रहःप्रीयाः अंगतर्गौढानुरागिण्यो निषेधनपरा बहिः तत्केलिः श्रेयसीत्यत्र बोधितः आतुरीवशात् आर्त्यार्थेनेपि गोपीभिर्निषेधार्थः स वर्ण्यते मैवमिति एवमी
दृशं किं प्रियकरवाणि मया सह किंचित् ब्रूतेत्यादिकं नृशंसं वक्तुं नार्हति तत्र हेतुः संत्यज्येति याः सर्वविषयान् संत्यज्य तव पादमूलं भक्ताः ता एव दुःखग्रहं स्वच्छंदं
यथास्यात्तथा भजस्व अस्मान् आस सर्वशेन त्यज प्रभावो हि भजमानानेव भजते तत्र दृष्टान्तमाहुः देव इति ३१ ननु विषयास्संत्यज्यंतानाभर्तृशेवादिस्वधर्मः कथमति
क्रम्यते इत्याशंक्य वेदांतमतमालंब्य स्वस्मिन्नात्मनि निष्ठत्वं तस्मिन्नात्मत्वं प्रति भावत्वेनारोपयंत्य आत्मनिष्ठानामस्माकं न क्वापि धर्मेऽधिकार इत्याशयेनाहुः यदि
ति ति धर्मविदेति सोपिहासं धर्ममेव वेत्सि न त्वधिकारविचारमिति व्यंग्यं पत्यादीनामनुवृत्तिः स्वधर्म इति यदुक्तं एतदुपदेशपदे उपदेष्टरि ईशे तत्समर्थे त्वय्येव मेवास्तु

एवमेवान्याउपदेष्टव्यानचयमितिभावः यतोभवांस्तनुभृतामात्मा किलेतिवितर्के तत्रहेतुः प्रेष्ठः सर्वेषांनिरतिशयप्रेमास्पदत्वादित्यर्थः तथाबंधुः हितकारी अ
तः परमात्माच अतस्त्वदेकप्रवणतयाऽस्मन्निष्ठानामस्माकंनकर्माधिकारइतिभावः यद्वानायमस्माकमपराधः किंतुरूपगुणमाधुर्यादिभिस्त्वमेवाकर्षकस्य स्म
तवैव अतस्त्वमेवमुपदेशस्यपदंविषयः ~ आत्मानमेवोद्दिश्येत्यर्थः यतः स्वंबंधुरः मनोहरः आत्मास्वरूपंयस्यसः अतप्रेष्ठश्च यदित्वत्त्वएवंनस्याः कुतो
वयंपत्यादित्यज्ञेमतिभावः यद्वासर्वोपिपरोपदेशएव पटुर्नत्वाचरणेइत्याशयेनसान्नर्माहुः एतत्त्वय्येवास्तु विद्दमुमोहिनीभूत्वावीरमोहनमाचरत्त्वथात्व
मेवस्त्रीभूत्वापत्यादिसेवाधर्ममाचरेत्यर्थः यत्तउपदेशपदेगुरौ नहिगुर्वनुष्ठितेकर्मणिशिष्यप्रवृत्तिः तत्रचईशोसर्वकर्तासमर्थे नन्वेवंकटपरमथिकः
प्रीतिंकुर्यात्तत्राहुः भवान्स्वभावतएवप्रेष्ठः बंधुरात्मामनोहरश्चेति ऐश्वर्यपक्षेतु यदुक्तंपत्यादिशुश्रूषणंधर्मइति एवमेतत्त्वय्येवास्तु यथातरोर्मूलनिषेच
नेनेतिन्यायेनत्वच्छुश्रूषणेनैवपत्यादिशुश्रूषणसिद्धिरित्यर्थः कुतः उपदेशपदेशुश्रूषणीयत्वेनोपदिश्यमानानांपत्यादीनांपदेअधिष्ठाने यतईशो नही
श्वरमधिष्ठानंविनाकोपिपतिपुत्रादिर्नामास्ति ईशत्वेहेतुः किलनिश्चयेनास्माभवानिति अतः प्रेष्ठोबंधुश्च भवानेवेति सर्वबंधुषुकरणीयंत्वय्येवास्त्विति भा
वः निषेधार्थश्च पत्यादीनामनुवृत्तिः स्त्रीणांस्वधर्मइतियदुक्तं एतदुपदेशकर्तरिउपदेशसमर्थेचत्वय्येवास्तु आस्तां एवमेवत्वयाउपदेशनीयमित्यर्थः यतः
प्राणीनांप्रेष्ठः प्रेमविषयः बंधुः प्रेमकर्ता आत्माहृदयाशयः कथंशुश्रूषणीयः सत्यभर्ताकोवाकपटभर्तेत्यादिविचारस्त्वस्माभिरेवज्ञायते नात्रपांडित्यंप्रदर्शनीयमि
तिभावः ३२ एतत्सदाचारेणदृढयन्त्यर्धकेनकुर्वंतीति कुशलाः यएतस्मिन्महाभागा इत्यादिगर्गोक्त्यनुसारेणसारासारज्ञाः त्वयिनित्यप्रियेस्वस्मिन्परस्मिंश्चस्व
भावतः सदासुखमयेप्रीतिंकुर्वंति अतस्तद्विपरीतैः स्वेआत्मीयेआत्मीन् आत्मनिच आर्तिदैः दुःखप्रदैः पत्यादिभिरस्माकंकिंप्रयोजनं तदेवमुक्त्वा प्रथमदिनस्थि
ताउपसंहरंति तस्मान्नोस्मान्प्रतिप्रसीद प्रसादव्यतिरेकेणव्यंजयति चिरात्कौमारमारभ्यधृतामाशांमाछिंद्याः सफलयेत्यर्थः तच्छेदेसद्योजीवनच्छेदः स्यादिति
भावः हेवरदकुमारीषुदत्तवरहेईश्वर अन्यासामपिदुर्घटमनोरथपूरणसमर्थपरमेश्वरेत्यपिपाठः चिरादाशाधृतौहेतुः हेअरविंदनेत्रेति अतिसुंदरेतिभावः
श्लेषेणचारविंदवद्रात्रौमुकुलितेनेत्रेयस्येत्यतः सुंदरीयस्मासुपेक्षायुक्तेवेतिनर्मव्यंग्यं ऐश्वर्यार्थस्तुहिशास्त्रप्रसिद्धकुशलानारदाद्याः रतिभावं त्स्यांतयतो
नित्येप्रियेच तत्रहेतुः स्वेआत्मनीपरमात्मनीत्यर्थः अतोस्माकंपत्यादिभिः किंप्रयोजनं ननुभवत्सस्यादयोपिमादृशाएवनेत्याहुः आर्तिदैरिति सममन्यत् निषे
धार्थश्चएवंनचहंससर्वेषांतनुभृतांप्रेष्ठश्चेद्धयमपिस्वोचितंरत्यारव्यभावंमयिकुरुततत्राहुः कुशलाःसाध्व्यः आर्तिदैःदुःखच्छेदकैः पत्यादिभिर्हेतुभिः स्वगृहादौ आ
त्मनिचनित्यप्रियेसतित्वयिरतिंकुर्वंतिकिंअपितुनेत्यर्थः तस्माद्धेवांछितप्रदहेगोकुलेश्वर नः प्रसीद प्रसादमेवाहुः चिरादृयमत्रमाआसंभनतिछामलुङ्
तिअस्तत्वेलुङि लङ् इपमार्षशीघ्रंअहंगतुमनुजानीहीत्यर्थः त्वयिधृतांस्थितांधृङ् अवस्थाने आसांआस्मदंगसंगेच्छारूपांछिंद्याः छिंधीति ३३ किंचप्रतिया
तेतियदुक्तंतदशक्यंचित्तादीनांचयेवापहृतत्वादितिद्वितीयदिकस्थिताआहुः चित्तमितियदस्माकंचित्तमेतावंतंकालंगृहेषुनिर्विशति तत्सुखेनात्वयाप

हृतं करावपि योर्गृहस्वगृहे साधुनिगृहीचितेकृत्ये निर्विशत स्तावपि पादौ च योर्गृहकृत्ये गमने वा निर्विशत स्तावप्यपहृतौ अतस्तव पादहृत्वा स्पदमपि न चलतः
अतो ऽतः कथं व्रजेयाम तर्हि मयैवाग्रे गम्यते पृच्छत आगम्यतां तत्राहुः व्रजं गत्वापि किंकरवाम चित्तापहारो ऽत्तया सर्वेन्द्रियापहारः सिद्धो करपादापहारोक्तिः
ग विशेषतः पतिशुश्रूषा व्रजे गमनपरिहाराय यद्वा यच्चित्तं पूर्वं सुखे आसीत् तद्भवता पहृतं सत् गृहेषु न प्रविशत्यपि कुतः कुरादिकं प्रवेशयेत् करावप्यप
हृतौ गृहकृत्ये न निर्विशतः ननु तथाप्यत्र न तिष्ठत गच्छतैव तत्राहुः पादौ च त्वयापहृतौ न चलत इति समन्यत अत्र नर्मेदं वनेनो न किंचित्प्रयोजनं ना
पि त्वद्दर्शनार्थमागताः किंतु चित्तवित्तमहृतं तदर्थमागताश्चौरं प्राप्यापि गृहीतुं च आक्रोशनार्थं गंतुं अपि च न शक्नुमः त्वया करपादापहरणात् अतस्त्व
त्तनादिमं त्वत्तश्चोरवरे किंकरवामेति ऐश्वर्यपक्षे ऽपि प्रायः समं निषेधार्थश्चैवं ननु मयावेणुना कृष्टाः आंताश्च कथं गच्छत तत्राहुः गृहेषु त्वत्ताज्ञायमानेन सु
खेनापहृतं चित्तं यस्माद्गृहकृत्ये निर्विशति करावपि गृहकृत्ये निर्विशतः यद्वा चित्तं गृहसुख एवास्ति ननु भवतापहृतं यस्मात् गृहेषु निर्विशति एवं करावपीति
पादौ पदमपि कथं न चलतः अपि तु चलत एव कथं नयाम अत्र च किं वा करवामेति ३७ एवं द्वितीयादिकृस्थिता अप्याशामेव स्फुटं वदंत्यास्तास्त्वस्याख्याने दोषं व्य
जयंत्युपसंहरंति सिंचेति निर्वापय नः कामाग्निमित्यर्थः आदौत्रियोक्तिर्वैयग्र्येण त्वयासंदीपितोपि त्वयैव निर्वापणीय इत्याहुः तवैव हाससहितावलो
कः कलगीतं च तज्जनितो दीपितो हृच्छयाग्निरिति अवलोकगीताया च्छतवा तत्त्वे व्यंग्यं न वाग्निसेकसाधनं जलभाजनेन मेतिकेइति परिहासमाशंक्याहुः
अंमृतेनैव त्वंसिंच तत्र च तस्य पूरेण न स्थूलधारया नर्महत्वादिति भावः स्वार्थेकन् नन्वमृतं दुर्लभतरं कृतः प्यते इत्याशंक्य कथमिदं गोपयसीत्याहुः त्वदध
रेति अहो नास्येनामृतेन तच्छांतिः प्रत्युतोज्जीवनं किंतु त्वदधरामृतेनैवेति भावः एवमन्यमृतयोर्लोकविलक्षणत्वं हृच्छयपदेनाग्निरात्रत्वं औषधस्यां
तः प्रवेशायाधरामृतपानं च व्यज्यते एवं च स्पष्टं रतप्रार्थनमार्ति वैयग्र्यान्निषेधार्थाच्छन्नत्वाच्च नरसविरुद्धं नो चेद्यदि न सिंचसि तर्ह्ययमेको ऽग्निस्तथा
विरहाज्जनिष्यते योग्निस्तेन दग्धशरीरास्ते पदयोः पदवीं सान्निध्यं ध्यानेन अंते मतिः सा गतिरिति न्यायेन याम सखे इति स्नेहोद्बोधनं यद्वा नन्विदमिदानीं दु
र्लभं जन्मांतरे स्यात्तत्राहुः ~ नो चेदिदं दुर्घटं नैवेति चेत् ध्यानेनापि नैव याम त्वत्पदपदवीप्राप्तिर्नैव संभवेत् यतो विरहाग्नेर्वैकुंठचिता न तु संगामृतयोग्यादे
हायासांताः तीव्रध्यानेपि अधुनैव जन्मांतरेपि विरहस्यैवानिश्चयादिति सखे इति पश्चात्तापि दुःखस्यादिति भावः इदमपि पद्यमैश्वर्यार्थे समानं निषेधा
र्थस्त्वयं अंगहे त्वं पटनः अस्माकं हासावलोकगीतेन सहजेन जातो यस्तव हृच्छयाग्निस्तं त्वदधरामृतपूरणैव सिंच यस्याधरामृतेन स्वकामाग्निं
सेक्ष्यसि साकाप्यस्मासु नास्त्येवेत्यर्थः इष्टे मधुरवस्तुनि दुर्लभे सति सो ऽष्ठपुटी लोके लिख्यत इति नर्मव्यंजनं यद्वा च त्वामस्मत्तो ऽन्यासामेवाधरामृतपूरे
णेत्यर्थो भाति नो चेद्दत्वा द्रुणहा सिंचेत् स्वपतिविरहाग्न्युपयुक्ता देहा त्वेवमग्नियमहीत्यर्थः तथापि ध्यानेनचिंतनेपि त्वत्पादयोः पदवीमपि न याम नयो

४७ स्यामः सखेइति आबाल्यं सख्यादस्मत्यातिव्रस्यं ज्ञानासीति भावः ३५ ननु यदि रहस्येषु न शक्तिस्तथापि कुलिनानां बोग्रहे एवस्थातुं युक्तं तत्र तृतीयादिकु ४८
स्थिताआहुः यर्हीति हे अंबुजाक्ष यर्हि अस्मद्भाग्योदयकाले कदाचिदेवेत्यर्थः क्वचिदपि दुर्लभे देशे त्वयाभिरमिता निजभावव्यंजनया नंदिताः सत्यः तव पा
दतलं रमाः या रमणीयायाः ज्ञाता वेकं च रमणीनां दत्तक्षणं दत्तोत्सवं अतः अस्याक्ष्म करेण संवाहनाद्यर्थमिति भावः कदाचित्कत्वे हेतुः अरण्यजनेषु
पुलिंद्यादिषु दर्शनादिना नेन प्रीतिं कुर्वतः नास्मदादिषु अतो दुर्लभस्येत्यर्थः रमणीनां त्यागाच्चेदृशानां स्वीकाराद् उपालंभो व्यंग्यः तत्र भर्त्स्ये वान्येषां स
मक्षं स्थातुं अविन पारयामः अन्यदर्शनमपि न रोचत इत्यर्थः को प्यक्व्यात न विद्यामयः पादमात्रस्पर्श एवेति भावः नो मिथ्यावादिन्याव्रजे वसथैव तत्राहुः पै
अंजः अनायासेन तत्र बलाद्वसामेति भावः ऐश्वर्यपक्षे रमाया लक्ष्म्या अपि क्वचिदेव दत्तावसरं ते यतो रण्यजनागोपादय एव प्रियायस्याधिकृतो भाग्यं य
तोरण्यजनप्रियत्वेपि यर्हि कदाचिदेवास्याक्ष्म शेषं समानं अनेनाथवा मदभिस्नेहस्यादरुत्तरं न जंतु साधारण प्रेम्णा आगता इत्याशयात् निषेधार्थस्तु न
नुसखे इति युष्मदुक्त्यास्य ते बाल्ये युष्मदंगस्पर्शोपि ज्ञात इति तत्राहुः यर्हीति बाल्येवानरादिप्रियस्य सतः ते पादतलं यर्हि रमण्यादत्तावसरं तदभिसारो
न्मुखमभूत् तत्प्रभृति तैः तं कालमारभ्य वाकिमयं गंनास्याक्ष्म त्वयाकटाक्षादिभिरभिरमिता अपि अत एवान्येषां श्वरः प्रभृतीनां समक्षं स्थातुं पारयामः अन्य
था तैर्ईष्येम हीति भावः ३६ ननु महाकुलीना यूयं महिषीपदयोग्याः कथं पातदतलमस्याक्ष्मेति दास्यभावेन वदथ तां क्व यल्लक्ष्मीदृष्टांतेनाहुः श्रीरिति यल्यस्मा
द्वक्ष्मीर्वक्षसि नारायणस्येत्यर्थात् पदंलब्ध्वापि तस्य पादपद्मरजः अकमे प्रेयस्कचित पदाभिलाषं त्यक्त्वा दास्यमेवाभिलषितवतीत्यर्थः तुलस्यासहेति पदेत
सापत्न्यमप्यंगीचकार भृत्यजुष्टं इति भृत्यसंमर्दमपि सेहे कीदृश्यपि सा यस्याः स्ववीक्षणकृते श्रीरामेनोवितोकयत्विस्यत ईर्थं अन्यसुराणामपि प्रयासः सा
यथा नारायणदास्याभिलाषवती तद्वद्वयमपि प्रेयसीपदयोग्या अपि पादरजः प्रपन्ना दास्यमिच्छाम इत्यर्थः तस्य तव च गुणमहिमेवायं यत्तस्या अस्मांकं च न त्वता
भिमानमेव कारयतीति भावः श्रीपादांबुजरजः वयं पादरजः इति परूपको नयज्ञुक्तिस्त्याश्रियः प्रभावासत्त्वास्य प्रसादृश्योपाधिकं पादभजनं न तथास्माकमि
ति व्यंग्यं यद्वा ननु कथं साध्वीकुलाचारं लंघयथेत्याशंक्य साध्वीशिरोमणिदृष्टांतेनाहुः श्रीरिति स्वभर्तुर्वक्षसि पदंलब्ध्वापि यस्य तवैव दावनसंबंधि पाद
रजोमात्रं चकमे तस्य तव पादरजो वयमपि प्रपन्नाः वस्यते हि तामिश्रयत इंदिरानूभ्वदत्र हीति तुलस्यासहेति वक्षःस्थानविशेषणेसौभाग्यातिरेको व्यंग्यः रजोविशेषणेन तु
तुलस्यवतार भृतां वृंदादेवीं त्येया तस्या वृंदानाश्रितत्वश्रवणात् अनेन भर्तुः शुश्रूषणमित्यादेरुत्तरांतरं ऐश्वर्यपक्षे श्रीर्यस्य तव वक्षसि पदं लब्ध्वापि यस्य तव पा
दरजः अकमेति शेषं समानं निषेधार्थस्तु ननु श्रीर्वृंदे अपि स्वपतित्यागे नात्र वनेतिष्ठतः काश्ययत आहुः यतया श्रीः वृंदया सह अत्र स्थितं ते पादरजश्चकमे
नागच तद्वद्वयमपि पादरजःप्रपन्नाः का क्वा नैवेत्यर्थः तयोरेव तद्युक्तं नास्माकमित्यर्थः ३७ अथ तृतीयादिकुस्था उपसंहरंति तन्न इति तत्तस्मात्सर्वाकहेतोः प्रसीद प्रसा ४७
९७ दमाहुः दास्यं अस्मदिच्छानुरूपं देहीति ननु तर्हि दुर्लभमित्याशंक्य सदैन्यमाहुः वसतीर्गृहादिकं विसृज्य तव उपत्रप्रसंगेन स्थितो आशाया सा तथाभूताः प्रा

व्याइति यतः हे पुरुषरत्न तव सुंदरस्मितयुक्तावलोकेन तीव्र उद्दीपितो यो मदनः तेन तप्तचित्तानां हे वृजिनार्दन दुःखहंतः अस्माकं विरहदुःखदानमनुचितमिति भावः तवो
पासः उपासना तस्य नाशनो याः सु इति श्लेषेण वसतिविशेषणं च हे सुंदरस्मितनिरीक्षण त्वत्त्वत्तो यः स्तीव्रः काम इति वा ऐश्वर्यपक्षे योगिन इव गृहादि त्यक्त्वा तव भजना
शया प्राप्ताः तव स्मितस्य निरीक्षणं हासं हरेरिति स्फुटत्वया यत्क्रियते तेन तीव्रः भजनमनोरजः तेन तपः पूतं चिंतया सामिति दास्ये जाताधिकाराणामस्माकं त्वदृष्ट्या इव स्त्री भावो
चित्तं दास्यं देहीत्यर्थः निषेधपक्षे प्रसीद आगन्तुं त्यजेत्यर्थः हे वृजिनार्दनेति छेदः त्वदुपासनाशया गृहादि त्यक्त्वा न प्राप्ता वयं तस्माद्यास्त्वत्सुंदरेत्यादि लक्षणास्तासामेव दा
स्यं देहि नः प्रयोजनं पुरुषान् गोपानेव गोकुलवधूवेषेण रूपयसि तदुत्कंठयेत्यर्थः ३९ नन्वहो प्रथमं मूल्यं वदत पश्चाद्दास्यो भवत्य इत्याशंक्य स्वमुखादिदर्शनदा
नमेव मूल्यमिति चतुर्थदिङ्स्थाः आहुः वीक्ष्येति विशेषेण दृष्ट्वा विशेषमाहुः अलकैः केशैः वृतं ललाटपरिलसद्वृतं मुखमिति मुखस्योर्ध्वभागस्य शोभा कुंडलयोः श्रीर्य
योस्तं गंडस्थले यस्मिन्निति पार्श्वयोः अधरे सुधा यस्मिन् तच्च तच्च यद्वा श्रीयुतं मुखान्वयि गंडस्थले चाधारसुधा चेति द्वंद्वैकवद्दीर्घपाठः श्रीहेतु गंडस्थल इत्यादि लोभवि
शेषोऽस्यास्तीति विशेषणेन चाधारसुधानुमाने हसितेनावलोको यस्मिन् हसितं च अवलोकश्चेति द्वंद्वैकवद्वेत्यधोमध्ययोः दत्ताभयं भुजदंडयुग्ममिति पद्यादि भययहार
कत्वं गाढाश्लेषेण कामभयहारित्वं च व्यंग्यं दंडेति सुवृत्तत्वादि तथा श्रिया कत्रैकं श्रेष्ठं रमणं यस्मिन् तद्वक्षश्च विलोक्य वदास्यो भवामेति अपेक्षितदानमेव मूल्यमि
ति लोके प्रसिद्धमिति भावः चद्वयं विलोक्येति पुनरुक्तिश्च भुजवक्षसोः स्वानुरागवैशिष्ट्यव्यंजनाय तथा मुखे चुंबनं भुजवक्षसोश्चालिंगनमिति प्रयोजनद्वयं च द्विः
क्रियोक्तिव्यंग्यं वीनां पक्षिणां भीक्षणीयेति श्लेषेण स्वनेत्राणां खंजनखगत्वं तत्रालकसंकुलत्वपाशैः सद्बंधः गंडयोः पाशस्थानत्वं सुधायाश्चाहारत्वं हसितावलोकेति तन्ने
त्रयोः गोपीनेत्रखंजनाकर्षकखंजनत्वं भुजवक्षसोः संचारदेशत्वं च व्यज्यते ऐश्वर्यपक्षे तु नन्वहं माधिकोवेति तत्त्वं फलं विचार्य दास्यो भवत तत्राहुः वीक्ष्येति श्रि
येकरमणमिति मुखादीनामपि विशेषणं लक्ष्म्येव स्वयंवरकाले सर्वं विचारितं किमस्माकं विचारणेति भावः निषेधार्थे तु ननु कथं तर्हि मम अंगानि निरीक्षमाणा एव ति
ष्ठत तत्राहुः वीक्ष्येति विलोक्यापि किं दास्यो भवाम का का नैवेत्यर्थः ३९ नन्वेवं पतिव्रताभिरुपहसनीया भविष्यथ तत्र सरोषदैन्यमाहुः कास्त्रीति अंग हे कृष्ण कला
निपदानि यत्र तदमृतमयवेणुगीतं आयतेति पाठे मूर्छनालापयुतेन संमोहिता का निजधर्मान्न चलेत् सर्वैव चलेदित्यर्थः स्त्रीति यन्मोहिताः पुरुषा अपि चलिता इति भा
वः गीतश्रवणमात्रेणैवं किंपुनस्त्रैलोक्यस्य सौभाग्यं यत्र तादृशं प्रत्यक्षरूपं निरीक्ष्येति यत् याभ्यां गीतरूपाभ्यां पश्वावस्थावराश्च पुलकान्यबिभरुरिति ऐश्वर्यपक्षे
ननु विचारज्ञानफलानीसामानाधिकरण्यापक्षेणात्केथं लक्ष्म्यासानेन च युष्मत्सिद्धिः तत्राहुः सर्वापि गीतश्रवणमात्रेणार्याचारं त्यक्त्वा त्वय्यासक्ता भवेत् पश्वादयोपि
रूपं दृष्ट्वा मुनय इव सुपुलका अभवन् न च विचारस्तत्त्वज्ञानं वा तेषां नापि मोक्षाभावः यत्र पत्यस्तथापरे इत्यादि उपक्रम्य प्रसिद्धा मामीयुः अंजसेत्युक्तेर्मोक्षस्तु ज्ञानं वस्तु म
हिमैवायमीदृश इति भावः निषेधार्थश्च ननु यदि मम आगदर्शने युष्माकं न क्षोभः तर्हि कथं चलितुं इच्छत तत्राहुः केति गीतमोहिता अपि आर्यचरितात् सदाचारात् अंतः
तेत्वतः का न च चलेत् नापयायात् यस्मात् वादयोपि सपुलकास्तद्रूपं दृष्ट्वा च आर्यचरितं भंगभिया कानापयायात् सुंदरीणां सुंदरनिकटे स्थितिर्लोके विगाहन
हे० हेतुरिति मोहितापि चलेत् अमोहिता वयं कथं नापयास्याम इति भावः ४० एवं चतुर्थदिङ्स्थिता अपि स्वाभिलषितं वदंत्य उपसंहरंति व्यक्त

मिति यथादिपुरुषो देवः सुरलोकस्य गोपनार्थं अदित्या दवभिजातः तथा भवान्व्रजजनस्य दावादिभयं वर्षवातादिपीडां च हर्तुं व्रजेश्वर्यामभिजातः व्यक्तं निश्चितं तस्मा
दस्माकं कामादिभयार्तिनाशे त्वद्व्रतभंगाऽपत्तेः नोस्माकं स्तनेषु तापहारकं करपंकजं निधेहि सदैन्यमाहुः शिरःसु चेति किंकरीणामिति इति ऊर्ध्वमस्मानात्मदासीः कु
र्विति भावः हे आर्तबंधो इति त्वद्दासीनां तापो नुचित इति भावः ऐश्वर्यार्थस्तु आदिपुरुषो देवो भवान्सुरलोकगोपनार्थं एवं यथाज्ञातस्तथाधुना व्रजजनार्तिनाशायाभि
ज्ञातः तस्माद्धे यथा मां प्रपद्यंते इत्युक्तपक्षमोक्षरीत्या कामभावेन भजंतीनामस्माकं मनोरथानुसारेण कामार्तिनाशाये त्याहुः तन्न इत्यादि शिरःसु चेति कामवासनाभर्ज
नेन शुद्धभक्तिप्रवणताप्रादनार्थमिति भावः निषेधपक्षे बल्लात्स्पर्शं न मा शंक्याहुः व्यक्तमिति धर्मलोपभयादितो ऽप्यस्मद्रक्षणं न वो चितमिति दूर्वा द्वाशयः नोनिषे
धे आर्तबंधोः धर्मभंगभयार्तिनाशक हे तत्कामाग्निसंतापितकिंकरीणां दासीनामपि किमुतास्माद्दशासतीनां शिरःस्वपि करं नो निधेहि मास्थापय किमुत स्तनेषु मा निधेहि
ति तदेवं स्वागतमित्यादि प्रकरणं संलापारब्धो न भवतः ॥ उक्तिप्रत्युक्तिमहाक्यं संलापइति कीर्त्यते इत्युक्तेः ४१ इति एवं निजोक्तिवदनेकार्थस्य [illegible] विक्लवितं प्रेमवैक्लव्य
फल्यमयरोषदैन्योक्तिं श्रुत्वा निजं तच्छ्रवणाभिलाषं च्छुर इत्येषर्थः ततः प्रहस्य परिहासोक्तावपि विकल्योदयात्प्रतिवचनसोष्टवात्स्यारव्यभाबोदय व्यंजनान्ता यवा प्र
कर्षेण हसित्वा दैन्योक्तिश्रवणात्सदयं यथा तथा गोपीरमयामास सदयमिति दयैव हेतुर्न कामुकतेति भावः आत्मारामोपीत्याश्चर्याय अहो तासां प्रेम-प्राबल्यं सन
काद्यात्मारामगणवशीकरणगुणोपि ताभिर्वशीकृत इति कथमेकोसंख्याः गोपीः रमयामास तत्राह योगेश्वरेति ४२ रमणप्रकारं चतुर्भिर्वर्णयन् तत्संगतिशोभां सद
ष्टांतमाह ताभिः स्त्रीभिः समीपागताभिर्वृतो ऽच्युतः सर्वाभिः संगमेच्युतिरहितः सन् विशेषेणाशोभत उदाराणि विचित्रचातुरीनयत्नन्यतयाश्रेष्ठानि मुक्त्यादिफलदातॄणि वा
चेष्टितानि करस्पर्शनपुष्पार्पणकटाक्षादीनि यस्य अत एव प्रियस्य ईक्षणं तत्कर्तृकं स्वकर्तृकं वा तेन विकसितानि मुखानि यासां स उडुभिरिति मुखानां कुमुदत्वं कृष्णमुख
स्य चंद्रत्वं यद्वा मुखानां चंद्रत्वं कृष्णस्य कुमुदत्वं न च कुमुदेन चंद्रस्तूयते तस्य कृतोपमा एवं तासां रसोदय उक्तः तस्य तमाह उदारोहासो यथा द्विजकुंददीधितिर्यस्य ताराभि
र्वृत एणांकः पूर्णचंद्र इवेति अन्योन्यापेक्षशोभमानत्वं गोपीनां तन्वीत्वस्वर्णवर्णत्वं च व्यंग्यं अनुगानरीत्यानु ४३ इत्थं शोभयावनमपि शोभयन् वनप्रदर्शनगीता त्यां का
ममुद्दीपयन् ताः पुलिनं नेतुं संचचारेत्याह उपेतीति उद्दीपितं चंद्रादिकं हर्षेण उद्वेगो यन् ताभिश्चोपगीयमानः अनुगानरीत्यानुक्रियमाणो ऽस्य चंद्रादिवर्णनमय गानैः श्लेषेण
वर्ण्यमानः तच्चैवं सकलरसतनुर्युवतिषु सुरुचिः क्षणदासु चारुतारासु कलितश्यामोल्लसितोरशाभाप्रयानविधुर्जयतीति यद्वा कृष्णनाम्ने वानुगानरीत्या गीयमानः कृष्णः
शारच्चंद्रमयं कौमुदीं कुमुदाकरं जगौ गोपिजनस्त्वेकं कृष्णनाम पुनः पुनरिति विष्णुपुराणात् अत्रार्थद्वयानुसारेण कृष्णं च तन्नाम च केवलं जगावितिव्याख्येयं अनुरक्तस्त्री
शतयूथानां पतिः कामतापक्षिप्तताभिः श्लेषेण यूथानि अधरद्वारापिबतीति वैजयंतीं पंचवर्णां मालां बिभ्रत्परिबभ्राम ४४ नद्याइति हिमवालुकाकर्पूरस्तद्वद्वालुका
यत्र तत् शोकपार्थिवादिः तस्या नद्याः तरलैस्तरंगैरानंदयति स चासौ कुमुदामोदयुक्तवायुश्च तेनोपलक्षितं पुलिनं गोपीभिः स हरेमे आनंदेतिमांद्यशैत्यसौरभ्येस्पष्टं जुष्टं
तत्र रत्नानंदि कमलामोदवायुं चेति पाठे युगमकं निशिकमलानां विकासः शारदिमल्लिकानामिव भगवत्प्रभावेण ४५ बाहुप्रसारः परिरंभारंभः परिरंभश्च यद्वा बाहुप्रसारेण
परिरंभः गाढालिंगनं करादीनामालंभनं स्पर्शश्च नर्मपरिहासः नखाग्रपातश्च तैः क्ष्वेल्याक्रीडया अवलोकैर्हसितैश्च लज्जादिनाछाद्यमानमपि तासां काममुद्दीपय

यत्र ताः रमयामास सुंदरीणामिति सौंदर्योत्त्याय त्राकृतिस्तत्र गुणा वसंतीति न्यायेन वैदग्ध्यं व्यंग्यं ॥३६॥ न विना विप्रलंभेन संभोगः पुष्टिमश्नुते इत्यादि नरतोक्तन्यायात् तासां प्रेमो
द्रेकेणात्मक्रीडाविशेषं वर्णयिष्यन् विप्रलंभश्रृंगारं वक्तुमारभते एवमिति एवं प्रेमवश्यता प्रकारेण लब्धः संमानः सौभाग्यं याभिस्ताः तं प्रति मानिन्यो बभूवुः भुवि अत्र अन्य
त्र च याः स्त्रियस्तासां सर्वासां मध्ये प्रत्येकं सर्वा एवात्मानमधिकं मेनिरे स्त्रियः प्रतिगर्वितश्च ताश्च बभूवुरित्यर्थः तत्र मानः दंपत्योर्भाव एकत्र सतोरप्यनुरक्तयोः स्वानीष्टाश्लेषवीक्षा
दिविरोधी मान उच्यते अहेरिव गतिः प्रेम्णः स्वभावकुटिला ततः सनिमित्तो निर्निमित्तो वा द्वन्द्वो मानि उदंचति यथा पुष्पं गृहाण दत्तमित्युक्ता प्रेयसा प्रिया आहात्रानीय मे देयं यत्समानोत्थ
हेतुकः एकस्यैकुसुमदत्तेऽन्यासां मानः स हेतुक इत्यादि रसशास्त्रसिद्धांतानुसारात् गर्वस्तु अन्यासां श्रीकृष्णनायकत्वाभावात् अत्र त्यानां तच्छाभेऽपि स्वसदृशसौभाग्यत्वाभावा
वाभिमानात् अस्य हि रसस्यैव मेवोत्कर्ष इति ॥३७॥ तासां तादृशीनां तत् तं सौभाग्यहेतुकं गर्वं तं मानं च वीक्ष्य गर्वो युक्तोऽयं तराशाध्यः मानश्चानुनयाद्यसाध्य इति विशेषतो दृष्ट्वा गर्वस्य
प्रशमाय मानविषये प्रसादाय प्रसादनाय तत्रैवांतरधीयत अंतरधात् चीडो देवाधिकात्लड् नन्वन्यत्र गच्छन् दृष्ट इत्यर्थः वक्ष्यमाणानुसारेण राधया सहांतरधात् इति ज्ञेयं यद्वाऽऽरा
धयेति कर्त्रध्याहारः धाञः कर्मणि लिङ् यद्यपि सहेतुकमान एवांतर्धानरूपापेक्षाद्यपनयः निर्हेतुकस्तु यं किंचित्प्रतीकारेण शाम्येत्तथापि गर्वसंबंधेन मानस्य गाढत्वात् गर्वमानो
नयस्यापि ज्ञात्यर्थमेवमुपेक्षा किंचैवमंतर्धानेन सर्वासां युगपन्मानापहारे सर्वाभिरासस्सिद्धिर्नान्यथा क्रमिकप्रसादनासंभवात् एकस्याः प्रथमं प्रसादने सैव किमिति प्रथमं प्रसा
दितेत्यपरस्या मानाधिक्यापत्त्याद्वादिति तथा च सर्वाः प्रतिरासरसं द्रष्टुं प्रेमैव वर्धनो यायं विप्रलंभः नाहं तु सख्य इत्यादि वक्ष्यमाणात् केशव इति केशः अंशवोऽस्य संतीति भारतीयव्युत्प
त्यात् तस्य कांत्या तासां शोभा चंद्रेणेव ताराणां तदंतर्धाने सर्वासां शोभाराहित्यं च व्यज्यते ॥३८॥ इति श्रीभागवतदशमस्कंधभूषणः अध्यायो नवविंशो गातोषिणीसारसंग्रहे ॥
इति तोषिणीसारे एकोनत्रिंशोऽध्यायः ॥२९॥ त्रिंशे भगवन्मार्गणाय गोपीनां वने वने भ्रमणमुन्मादं कृष्णमयतां वर्णयिष्यन् तावद्वर्णयति अंतरिति सहसैवांतर्हिते इति अंत
र्धानस्यातर्क्यत्वं व्रजांगना इति तासां तदेकप्रियत्वेन तापातिशयोचितत्वं करिष्य इत्यादि तदेकान्त्वेन तच्छिद्रदातापाधिक्येद्वंतः सहसैव तमपश्यंत्य अतप्यन्निति रंकः सहसा
प्राप्तं सार्वभौमश्रियं नेत्राभ्यां पश्यन्नानंदमग्नस्तदैवाकस्मान्नेत्रद्वयाध्येति तरां तप्यति तथेत्युपमा व्यज्यते १ तामेव गत्येत्यादिना पद्याधिकाध्यायद्वयेन व्यंजयति गत्या चानु
रागश्च स्मितं च विभ्रमेक्षितानि सविलासनिरीक्षितानि च तैश्च मनोरमाः आलापाश्च विहाराः श्रृंगारचेष्टाश्च विभ्रमं च चित्तवृत्त्यनवस्थानं श्रृंगाराद्विभ्रमो तत्र इत्युक्तलक्षणैः ते
रमापतेर्गत्यादिभिर्बाहुप्रसारेत्यादिनोक्तैः अकूटमानिचित्तानि यासां ताः अतस्तदात्मिकाः तन्मय्यः तत्र च प्रमदाः ज्ञात्यैव प्रकृष्टमदाः तस्य विविधाश्चेष्टा जगृहुः तदनुकरणेः अ
क्रीडन्नित्यर्थः अत्र अनुरागाच्चित्तवृत्त्यनवस्थानेमानसे आलापो वाचिकः शेषा गत्यादयः कायिकाः उपलक्षणमेतदन्यभावानामपि २ तदात्मकत्वं व्यंजयति गतीति आदिनावि
हारविभ्रमौ प्रियस्याकेषु गत्यादिषु प्रतिरूढा आविष्टा मूर्तयो देहेंद्रियाणि यासां ताः अतः कृष्णस्यैव विलासविभ्रमायासां यद्वा कृष्णविहारस्य विभ्रमो भ्रांतिर्याभ्यस्ताः एवं
तदात्मिकाः स्त्रियः तुरेवार्थे यत्र युष्माकमुत्कंठा असावहमेव तथाविहारी इति सर्वा मिथो निवेदितवत्यः लीलारव्यो नुभावोयं प्रियानुकरणं लीलारम्यैर्वेषक्रियादिभिरित्युक्तेः
तथा च गीतगोविंदे इति मधुरिपुरहमिति भावनशीलेति ३ एतस्य पंचयिष्यन् प्रथमं तापातिशयेन तासामुन्मादावस्थामाह गायंत्य इति संहताः सर्वत्र सम्यक्मार्गणार्थं सख्ये
न वान्या ८ न्यं मिलिताः सत्यः अमुमेव रागेन दुरवदमपि तमेव विषजल्पाप्ययादित्यादिरीत्या उच्चैर्गायंत्यः उच्चैर्गानं तं प्रति दूरान्तिजातिश्रावणाय गीतप्रियस्य तस्याकर्षणाय वा
वनाद्वनांतरं विचिक्युः अमृगयंतेति गानान्वेषणयोर्यौगपद्यं मध्ये मध्ये तु वनस्पतीन् पप्रच्छुः वृक्षान्प्रति प्रश्ने हेतुः उन्मत्तकवदिति स्वार्थे कन् पुरुषमंतर्यामिणं अतआ

नामदत्तु   तोषणी

४८

४८ कान्तावदेदं तरं बहिश्च व्याप्य संतमपि स्वप्रियस्यादर्शनात् पप्रच्छुः यद्वा तासामिदं किमरण्यरुदितप्रायमेव नेत्याह आकारेति यद्वा स्थावरादिषु अन्तर्बहिश्च विरहावेशा
त् स्फुरंतं स्वपतिं वृक्षान्पप्रच्छुः तत्र जडीः स्फूर्तिर्दूरात् अतस्तु निकटादिति येवं सति प्रश्नो प्युन्मादे नैवेति ज्ञेयं ५ दृष्टा स्मत्प्रियतमा एते तन्माधुरीमग्नत्वे नास्मद्वाक्येषु ना
वदध्युरिति संभाव्य कश्चिदितिसंबुध्याचावधीपयेत्यो महत्वादेते परस्येयुरित्याशया प्रथममश्वत्थादीन्पृच्छंति दृष्ट इति भो विद्यमुत्र प्लक्षरुद्ररूपाश्वत्थादयः वो युष्मा
भिर्दृष्टः कच्चित् किमर्थमसौ पृच्छते इत्याशंक्याहुः प्रेमहासेयुतैरवलोकनैर्नो मनो हृत्वा चोर इव गत इति हृत्वेति मनसो रत्नत्वं न तु तत्किमिति तत्रान्यस्तेन त्राहुः नंदसू
नुरिति विश्वसनीयत्वादिति भावः युष्माभिर्दृष्टत्वे एतस्यामवद्दिशि स्यादित्यन्वेषयामेति भावः ५ महत्त्वाभिमानादेते स्मान्क्षुद्राः प्रति अवज्ञया न कथयेयुरिति मत्वा पु
ष्पेरुपकारिणः कुरबकादीन्पृच्छंति कच्चिदिति इतो दर्पहेति पाठे इतः कचित् गतः किमित्यर्थः गत इति पाठे इतः इत्यध्याहारेण स्वामिव्याख्या ज्ञेया दर्पहृद्दृष्ट इति पदं अ
त्र गत इत्यन्तेोर्गच्छन्दूरतोपि दृष्टः स्यादिति भावः रामानुज इति नंदसूनुरि-तिवत् न-नु मानिनीनां वः कथं मनो हृतं तत्राहुः मानिनीनां मानमयगर्वहरं स्मितमपि दृष्ट
स्मृतं वा यस्य अतः स्मितादिस्मृतिमात्रेण हृतमानास्तद्वियोगे क्षणमपि जीवितुमशक्ता अन्वेषयामः पृच्छाम श्चेति भावः ६ एते पुरुषजातित्वेन श्रीकृष्णपक्षिणोस्मद
स्मृत्युपायान कथयेयुरिति स्त्रीत्वेनात्मपक्षीयां तुलसीं मत्वा कृष्णप्रियया स्तस्यास्तद्दर्शनं संभाव्य पृच्छति कच्चिदिति कल्याणि हे जगन्मंगल्ये तत्र हेतुः गोविंदेति चरणेस्याद
रव्यंजकं गुरुचरणेरुक्तमितिवत् हे गोविंदप्रिये इत्यर्थः प्रियत्वे हेतुः त्वाभिन्न्यदिति अलिकुलैः सह तितस्त्री याशीत्नी मुखा अपि नवोर्यतः इति भावः न च तत्र तवानवधानं
संभाव्यं यतः स्तोति प्रिय इति श्लेषेणातिक्रांताः प्रियाः अस्मादृश्या येन अच्युत इति कदापि स्खलतो न च्युतो भवतीत्यवस्यं त्वदंतिकमागतस्त्वया दृष्ट इति भावः ७ तद्दुर्य
माणतयाज्ञाताभिमानेयं कथयेदिति कृष्णसेविका अपि गुणाधिका अपि नम्रतया निरभिमाना एताः कथयेयुरिति पृच्छंति मालतीति हे मालत्यादयः युष्माभिः किं अदर्शि दृष्टः
पुष्पाद्यवचयार्थ करस्पर्शनेन प्रीतिं जनयन्नूयातः किं दर्शनं जातमेवस्यात् स्पर्शो पि किं-जात इति पृच्छामः न चात्रापल्लापः संभवति पुष्पविकासादिरूपप्रीत्याख्यस्य
र्शचिन्हदर्शनादिति भावः पुष्पप्रियत्वान्माधवो वसंतइवेति श्लेषेण तत्र हेतुः यात इति तुल्यदुःखत्वेन कथनयोग्यता पुष्पिणीष्वपि युष्मासु नखक्षता इति सूचन
या सन्नमैर्व्या मल्लतीज्जात्योराबांतरभेदः यूथिकाजुइ इतिख्याता ८ श्रीकृष्णस्य दास्यए तास्तद्द्येन नूनं न कथयेयुरिति तीर्थवासित्वेन मुनिप्रायाः फलादिभिः सर्वप्राणि
तर्पकाएते कथ ये युरिति मत्वान्यान्प्रत्याहुः चूतेति चूताम्रयोः कदंबनीपयोश्चावांतरभेदः जंबुकेति पाठः युष्मा कथने कोनोर्थस्तत्राहुः परेति भविका इति स्वा
मिसंमत इति पाठः परार्थमेव भवो जन्म एषामिति व्याख्यानात्समासांतः कप् इकारयुक्त पाठे परार्थं न विकं मंगलं फलाद्युत्कर्षो येषामित्यर्थः तत्रापि उपसमीपे कूलं येषां ते उ
पकूलाः यमुनाया उपकूलाः तीर्थवासित्वेन सत्यवादिन इति भावः ननु स्वयमेवान्विष्य गृह्यतामित्याशंक्य निजार्तिं ज्ञापयंत्य आहुः रहितात्मनां विरहनिष्ठत्ता नानां मृत
प्रायतया वेष्टुमशक्नुवतीनामित्यर्थः पूर्वंदर्शनादिप्रश्नमत्रत्याल्यैर्न दर्शनं सिद्धवत्कृत्य कृष्णस्य मार्गं शंसंति इति मार्गकथनं प्रार्थितं ९ एवं मार्गकथनप्रार्थनेन मार्गस्म
रणात्तन्नूमौ दृष्टिं निधाय तस्याः सर्वत्र सत्वेनावस्यं तद्दर्शनं संभाव्य तस्यामंकुरोद्गमं श्रीकृष्णपादस्पर्शजं पुलकं ज्ञातं मत्वा तस्याः सौभाग्यं वर्णयंति किं त इति हे क्षिते त्वं
याकिं तपः कृतं यात्वं केशवांघ्रिस्पर्शोत्सवो यस्याः सैव मसि यतः अंगरुहैरंकुरैरोमांचिता शोभसे ते पएव विकल्पयंति अंघ्रिसंभवः कृष्णांघ्रिस्पर्शसंभवो यमुत्सवः किं
मुरुक्रमविक्रमात् त्रिविक्रमपादस्पर्शरुपतपोजन्यः अहो किंवा वराहमूर्तेर्भगवत आलिंगनजेन पुण्येन वभूवेति कथयेति शेषः एवं च त्वं सुभगा वयं च कृष्णपादस्पर्श ४८

नामदत्ते

४८

भावात् दुर्भगा एवेति तस्याद्दस्पर्शी मनु भवंतीत्थं रूपया तन्मार्गं दर्शयेति भावः १० भगवान् राधया सहैवांतर्हित इति पूर्वस्पष्टमनुक्तमर्थं गोपीमुखेन मध्ये मध्ये व्यंजयति सप
त्नीमुखेन व्यज्यमानं सपत्नीमाहात्म्यं सौभाग्यातिरेकं स्पष्टं स्यादिति तत्र किमेकल एवांतर्हितः कयाचित्सहैवेति संदिहाना एव पर्यटंत्यः कुचकुंकुमवासितकुंदगंधमाघ्राय कामप्यादाय यांत
र्हित इत्यनुमायाहो श्रोत्रनेत्रादिमत्यः प्रष्टव्या इत्यन्यां पृच्छंति अपीति हे सखि एणपत्नि अप्यच्युतो वो युष्माकं समीपं गतः अपि किं ननु नित्यं गच्छति किमाश्चर्यं तत्राहुः प्रियया सहेति
प्रियायुक्तस्य दर्शनेन किमधिकं तत्राहुः प्रियया सहैव गात्रैः प्रियाश्लिष्टैः सदानंदपूर्णैः रंगैः इह युष्माकं सर्वमृगीणां दृशां निर्वृत्तिं परमानंदं विस्तारयन् ननु अनेन पथा प्रियया सहैव
गत इति कथं ज्ञातं तत्राहुः कांताया अंगसंगेन तत्कुचकुंकुमरंजिताया कुलपतेः श्रीकृष्णस्य कुंदस्रक् तस्या गंध इह वाति आगच्छति कुलपतेः कांतांगसंगस्य कुचसंगि कुंकुमस्य तच्छवि
मत्कुंदस्रजश्चेत्येवं चतुर्विधोपि गंधो भ्यासवशादस्माभिरत्र प्रत्यभिज्ञायते न चैवं निश्चितमिति भावः तत्र एणपत्नीति पत्युर्नो यज्ञसंयोग इति स्मृतेरेणानां भर्वांतरयज्ञैर्याज्ञिकत्व
येण्या यज्ञपत्नीत्वमिति दृष्टप्रशंसा उपगत इति तद्भाग्यप्रशंसा दृशां निर्वृतिं वितन्वन्नित्यादि दृष्टिप्रशंसा अच्युत इति प्रियावियोगराहित्यं कांतेत्यादि द्वयप्रशंसा कुंदस्य शुभ्र
तया कुंकुमशोभायोग्यता इह इति गंधवैशिष्ट्यं वातीति तत्संसर्गिवातस्य सौभाग्यमिति व्यंगमाला ११ निशार्तिनरं दृष्ट्वा तत्र वामत्वा तौ विहाय पुष्पफलभारेण नम्रांस्तरून् श्रीकृष्णं दृष्ट्वा
प्रण-तान्मत्वा तस्य प्रियया गतिविलासं भावयंत्यः पृच्छंति बाहुमिति हे तरवो रामानुजो वः प्रणामं किं वा प्रणयावलोकैरभिनंददिति ननु कुतो नाभिनंददित्याशंक्य तस्य तया सह विला
सावेशं संभाव्य आहुः बाहुमित्यादिना आदौ चरन् तत्तद्गतिविलासव्यग्रः तत्र च प्रियायाः स्निग्धायाः स्कंधे बाहुमुपधाय कोमलेयमिति प्रिया किंचिदाधाय ननु तामेवास्मान् दर्शयितुमा
गतः कथमस्मत्प्रणामं नाभिनंदेत्तत्राहुः तुलसिकाया भ्रमरकुलैः अन्वीयमानः गृहीतपद्मः प्रियायाम् भ्रमरबाधावारणाय पद्मधूननासक्त इत्यर्थः अतः कथमभिनंदेदिति भावः त
दामोदमदांधैरिति तुलसीगंधोत्कर्षः मालां बिभ्रद्वैजयंतीसहचालिकुलैर्विना तुलसिकालिकुलैः कुंदस्रज इति मालात्रैविध्यं व्यंजितं युगपत्क्रमेण वातजारणमुक्तं १२ काश्चित्तु वि
लसतु प्रियया किं तस्याः ईर्ष्यया तं तु मृगयध्वमित्याशयेनाहुः पृच्छतेमा इति वनस्पतिरूपस्य पत्युः बाहुं न प्राश्लिष्यः इमा लताः पृच्छत ननु स्वपत्याश्लेषे कथं तत्संगतिसंभावना
तत्राहुः नूनं तस्य कृष्णस्य करजैः स्पृष्टा इति कथमिदं तर्कितं तत्राहुः उत् उच्चैः पुलकान्यंकुरमिषेण बिभ्रति अहो आश्चर्ये ऐवं पुरेत्यर्थः नहि स्वपतिसंगता वीरुत् पुलकं संभ
व इति भावः १३ तास्ता विचेष्टा जगृहुरित्याद्युक्तं प्रपंचयितुमुपक्रमते इतीति एवंप्रकारेण उन्मत्तस्य वच इव वचो यासां ताश्च ताः गोप्यः अन्वेषणे कातराः विरहदुःखेन तदन्वेषण
मपि कर्तुमसमर्थाः सत्यो गायंत्य उच्चैरित्युक्तगानानुक्रमप्राप्ताः पूतनावधादिलीला अपि अनुचक्रुरित्यर्थः यतस्तदात्मिकाः तस्मिन् श्रीकृष्ण एव आत्मा चित्तं यासां ताः गाढासक्त
दासक्ता इत्यर्थः तत्र कृष्णानुकरणं तीव्रध्यानेन तदात्मकतयेति स्फुटमेव पूतनाद्यनुकरणं तु कृष्णविषयकतद्धेतुकभयादिजनितपूतनाद्यात्मकतया व्याघ्रादिभयेनोन्मत्तस्य व्या
घ्राद्यनुकरणवत् अतो न प्रेमविरुद्धभावसंकरः १४ तदात्मकत्वेनानुकरणरूपं लीलाख्यमनुभावं नवभिः प्रपंचयति कस्याश्चिदिति बाल्यानुकरणे एव पूतनावदाचरंत्याः
कृष्णायंती कृष्णवदाचरंती काचित् स्तनमपिबत् स्तनपानमन्वकरोदित्यर्थः तोका इत्वा तोकवदात्मानं कृत्वा सह पादाभ्यां भुवमवष्टभ्य अधोमुखावस्थित्या शकटायमा
नां पदाहतवती अत्र सर्वत्र शानचि प्रयोक्तव्ये शत्रंता लौकिकप्रयोगैरेतत्कृतीनां अलौकिकत्वं व्यज्यते १५ एका दैत्यवदात्मानं कृत्वा कृष्णाभिमानवतीं कृष्णस्य अर्भबा
ल्यं भावयंतीमन्यां जहार तद्धरणमनुचकारेत्यर्थः घोषाः किंकिण्यः तेषां निस्वनैः सहितौ अंघ्री कर्षंती रिंगणमनुचकार १६ द्वे चिक्रिडितुः काश्चन गोपबालायमानाश्चि
क्रीडुः लीलांतरमाह वत्सायितेति अन्या काचन कृष्णायमाना तत्र कासुचिद्वत्सायमानासु एका अन्या काचन कृष्णायमाना हंति हननमनुमनुकरोति १७ दूरे वर्तमाः
दूरगाः

गाः समासीनास्तिस्त्यस्तान्नाच यद्वद् यथा कृष्णम् आकृ यति तथाहू यतं कृष्णमनुचर्वतीं अनुकुर्वतीमिति वा पाठः अन्या गोपमध्यः १९ एवमनुकरणमात्रं उक्त्वा आसाव
हमिति न्यवेदि पुरिति यदुक्तं तस्य पंचयति चतुर्भिः कस्याश्चिदिति ललितां गतिं नृत्यल्लीला १४ वातवर्षाभ्यामिति तल्लीलावेशेन साक्षाद्दृष्टादि स्फूर्तिर्ज्ञेया एवं दावा
ग्नि पश्यतेस्यपि यंती पर्वतोसाटने इव यत्नमनुकुर्वती उत्तरीयवस्त्रमूर्ध्वं दधार २० दुष्टाहे इतितिरस्कारेण गच्छ इतः यतः जातोहमिति तल्लीलायामेतद्वाक्यो त्त्यभावे प्य
नुकरणं तत्रस्य वाक्य तासर्योर्थेन २१ तत्रोवाचचरे गोपाः तत्रैकोवाच हे गोपाः इति पाठौ तत्र कालीयदमनलीलानुकरणप्रसंगे दावाग्निं पश्यते तद्वुवाच यत उल्बणं चक्षु
स्तेजो हरमतो नेत्राणि पिदध्वं निमीलयत २२ पुनरेकेनानुकरणमाह बद्धेति अन्यया यशोदायमानया उलूखलेनोलूखलत्वानुकारिण्या गोप्या सुदृगिति चकितदृग्भ्यामि पि
भयानुकरणमिति भावः मुखपिधानं च हस्ताभ्यां बालस्वभावोयं भीतेः कंपरोदनवाक्यादेरनुकरणं भेजे एवमन्यल्लीलानुकरणमप्यूह्यं २३ उक्तरीत्या तत्तल्लीलागानुकरणा
नि कुर्वंत्यः मध्ये मध्ये लतातरुभ्यः पृच्छंत्यः वनप्रदेशे पदान्यपश्यन् परमात्मन इत्याश्चर्येण अहो मुनयोपि वेदेपि तत्तच्चकानि शब्दस्वरूपाण्येव पदानि तर्कयंतिमात्रं तस्यतः
स्व वन एव व्यक्तानि सचिन्हानि पदान्यपश्यन् एतदंशेपि मुनीनां नतज्ञाग्यसाम्यं कुतस्त्रेयसीत्याद्यंशेऽइति २४ ततश्चान्योन्यामाहुः पदानीति स्फुटमेतानि महामिलगमानि नंदसूनोः प
दानि ध्वजादिभिर्लक्ष्यंते हीति ध्वजादीनां तत्पादचिन्हत्वं प्रसिद्धमित्यर्थः यतो महात्मनः पुरुषोत्तमस्य आदिपदादन्यान्यपि तानि च पद्मे श्रीकृष्णमेव प्रकृत्य षोडशैव तु चिन्हानि
मया दृष्टानि तत्पदे दक्षिणे चाष्टचिन्हानि इतरे सप्त एव च ध्वजापद्मं तथा वज्रमंकुशो यव एव च स्वस्तिकं चोर्ध्वरेखा च अष्टकोणं तथाष्टमं इंद्रचापं त्रिकोणं च कलशं
चार्धचंद्रकं अंबरं मत्स्यचिन्हं च गोष्पदं सप्तमं स्मृतं षोडशं च तथा चिन्हं शृणु देवर्षिसत्तम जंबूफलसमाकारं दृश्यते यत्र कुत्रचिदिति शंखध्वजापत्रैस्तच्चिन्हितं चर
णद्वयमिति तापिन्युक्तेः चक्रांकितपदाते नेति वाराहाच्च २ चक्रशंखातपत्रैरून विंशतिः पादस्य चतुर्दशांगुलं दैर्घ्यं विस्तारस्तु षडंगुल्यः तत्र मध्ये ध्वजा १ पद्ममंगुल्यधः २
वज्रं दक्षिणपार्श्वे ३ तदग्रेंकुशः ४ यवोंगुष्ठमूले ५ स्वस्तिकं कुत्रचित् ६ आदिचरणमारभ्य यावद्वै मध्यमास्थिता तावदूर्ध्वरेखा अंगुष्ठतर्जन्योरंतरालाद्यावन्मध्यमीत्यन्ये ७
अष्टकोणमग्रतोष्टांगुलीस्पृक्का ८ अथ वामे अग्रतश्चतुरंगुलं स्पृक्का इंद्रचापवन्निर्गुणं तद्वर्णं धनुः ९ मध्ये त्रिकोणं १० अमृतकलशं कुत्रचित् ११ त्रिकोणस्याधोर्धचंद्रः १२
अंबरं मंडलद्वयात्मको बिंदुः सर्वचिन्होपरि १३ मत्स्यः सर्वचिन्हाधः १४ गोष्पदमिंद्रचापाधः १५ जंबूप्रमाणं तद्वर्णं षोडशं चिन्हं पदद्वये १६ दक्षिणपादांगुष्ठमूले चक्रं १७ तदधःस्थ
त्रं १८ वामपादांगुष्ठमूले शंख इति १९ सर्वचिन्हानि श्रीकृष्णपाद एव अंकान्येतानि भो विद्वन् दृश्यंते तु यदा तदा कृष्णाख्यं तु परं ब्रह्म सुविज्ञातं न संशयः द्वयं वाथ त्रयं वाथ चत्वारः
पंच चैव च दृश्यंते वैष्णवश्रेष्ठ अवतारे कथंचनेति पाद्मोक्तेः दर्शनप्रकारो विष्णुपुराणे विलोक्यैका भुवं प्राह गोपी गोपवरांगना पुलकांचितसर्वांगी विकाशिनयनोत्पला ध्वजव
ज्रांकुशाब्जांकरेखावंत्यालि पश्यत पदान्येतानि कृष्णस्य लीलालंकृतगामिन इति २५ तैस्तैर्ध्वजादिशोभितैः वीप्सामध्ये दूर्वामयादिभुवा विच्छिन्नतया स्थानबाहुल्यात् अग्रत इति ताव
स्पर्यं तं भगवांतां केन नयनात् अबलाविरहान्वेषणाभ्यां निर्बला अपि कृष्णमार्गे मृगयमाणा नवध्वा राधायाः पदैः सुपृक्तानि मिश्रितानि २६ तत्र सर्वा एवाहुः कस्याः पदानीति प
रीचीयं तामिति विशेषः स्त्रीत्वज्ञानं तु लघुत्वाभिमतत्वादि स्त्रीपदचिन्हैः तेन स्वांशेन्यस्तः प्रकोष्ठो यस्याः तस्या रात्रौ सुखगमनार्थं दूरे वल्लान्नयपयनोर्थं चेति भावः तस्यां प्रीतिरनेन सूचि
तातामेव दृष्टां तेन प्रकटयति करिणा यातां हस्तिन्या ४ यथेति २७ तस्याः सुहृदश्चाहुः अनयेति नूनं तर्के निश्चये वा ईश्वरः नक्षेष्ठानसमर्थः अनयैवाराधितः नास्माभिः यतोस्मा
न्वेनेनिशिदूरतस्यत्कारहः अस्मदगम्य एकांतस्थाने यामेकामेवानयत् अनेन राधयत्याराधयतीति राधेत्यर्थः तस्मान्नामसूचितं नूनं राधाया एव पदानि स्युरिति भावः स्पष्टं

राधेति नामाग्रहणं तत्प्रतिपक्षाणां गोपीनां संकोचात् मुनिनापि तन्नाम्नः स्पष्टमनुक्तिर्देवस्य परोक्षप्रियत्वात् सर्वतोपि तस्याः स्वप्रहृष्यत्वाभिप्रायव्यंजनायच अन्यथा ब्रह्मविवर्तोदो
राधयो देवो माधवेनैव एधिका विभ्राजंते जने ष्वेति ऋक्परिशिष्टेच प्रसिद्धमाहात्म्यायास्तस्याः कथमत्रापलापः संगच्छतेति दिक् २८ तटस्था आहुः धन्या इति हे आल्यः सख्यः अ
हो इति पुण्याः गोविंदपादपद्मरेणवः धन्यत्वे हेतुः यानिति ब्रह्मादीनां यथोत्तरं श्रैष्ठ्यं रमायाः श्रेष्ठ्यार्थं देवीति मूर्ध्नेति भक्तितरः अद्यमपराधो विरहदुःखं वा तस्मादस्य गोभावा
त् रेणुतोपि तुच्छा वयमिति भावः रेणुमाहात्म्यभावनेयं प्रेमकृतैव प्रेमात्मसदपि माहात्म्यं स्फोटयति यथा भरतस्य किं वाम्प्ररे अचरितं तत्पर इति गद्ये स्वमगापदस्पर्शेन तु
वो भाग्यं किं पुनर्भगवत्प्रेमा सत्यं माहात्म्यमिति २९ प्रतिपक्षा आहुः तस्या इति उच्चैरधिकं क्षोभं दुःखं गोपीनां सर्वासामेवास्माकं सर्वस्वं अच्युतस्य नित्यं स्वावियुक्तस्याधारं ध
नं भुंक्ते रहो भुंक्ते इति पाठो ३० तस्या अंतरंगसख्य आहुः नेति खिद्यंति सुजाते सुकुमारे अंघ्रितले यस्यास्तां प्रियतमां हस्ताभ्यामंके निधाय निन्ये ३१ पुनः प्रतिपक्षाः सासू
यमाहुः इमानिति वधूः स्कंधेन वहतः यातः कामिनः केवलं कामतल्पटस्य न तु प्रेमरसविदग्धस्येत्यर्थः हे गोप्य इति एतत्तर्के प्रयं विदग्धा इति भावः इदं पद्यं क्वचिन्न दृश्यते ३२ अ
न्याः सख्य आहुः अत्र प्रसूनेति लिंगमाहुः प्रपदेति पादाग्राभ्यामाक्रमणं भुवो यत्र ते असकले पदे पश्यतेति प्रतिपुष्पवृक्षाभिप्रायं द्वित्वं तेन पादान्यत्र महात्मन इति विष्णुपुराणोक्त
बहुत्वेन न निरोधः ३३ माल्यखंडपतनं दृष्ट्वा पुनर्विपक्षा आहुः केशेत्यर्धेन चूडनोच्चितोपवेशं दृष्ट्वा सख्य आहुः तानीत्यर्धेन कांतामधिकृत्य तानि प्रसूनानि चूडयता चूडाकारेण ब
ध्नता ध्रुवमिहोपविष्टं ३४ एवं गोपीमुखेनैव राधया सह तां लीलां प्रशस्य स्वयमपि प्रशंसति रेमे इति आत्मरतः स्वतस्तुष्टः आत्मारामः स्वक्रीडोपि तया सर्वाधिकप्रेमाश्रयविषयरूपया
राधया यथा ताभिस्तर्कितं तथा रेमे चेत्यर्थः स्वात्मरत इति पाठांतरं अखंडितः अस्याः सकाशादविमुच्यतः सन्नित्यर्थः तस्या इदृशः प्रेमा येन तादृशात्मारामत्वादिकमनादृत्यात तया रेमे इति
भावः इदृशप्रेमविहीनाः कामिनः कामिन्यश्च स्वक्रीडयोपरास्तादर्शिता इत्याह कामिनामिति मत्तमूर्च्छादिपूर्णदेहेंद्रियतर्पणेच्छारूपकामस्वभावानां दैन्यं दुर्गतत्वं कार्पण्यं स्त्रीणामपि त
दन्यासां तादृशीनां दुरात्मतां दुर्गतनायकवशीकरेण गर्वादिदुष्टस्वभावतां दर्शयन्निति अस्यामानगर्वादेः प्रेममयत्वात्कृष्णप्रेमवर्धकताच नाह मात्मानमाशासे इत्यादिषु संमतैवेति नान्य
था व्याख्यातं ३५ इत्येवमिति इदं पद्यं साम्यसंमतं पूर्वार्धे सति रेमे तयेत्यस्य शुकोक्त्यादित्वात् संगतेः एतदर्थस्य रेम इत्यतः पूर्वत्वौचित्यात् उत्तरार्धे सति साचेत्यत्र स्वाम्यवतारिकायास्त्र
संगतेः यां गोपीमित्यत्रैव तद्व्याख्यौचित्यात् ३६ एवं तयोः प्रेमाणं प्रपश्य प्रेमविलाससमयं मानं प्रसादनादिकं च वर्णयति साचेति पादोनत्रिभिः साचतदा मेने इत्यनेन पूर्वं तासु स्थितायास्त्र
पितस्याएवं मदोनाभूदिदानीं जात इति लभ्यते तेन पूर्वं तस्य गाढानुरागप्राधान्येन तदेकस्फूर्त्या हर्षादिमय्येव मनोवस्थासीदधुना तु कथंचित् बाह्यस्फुरणे जाते अन्यगोप्यादिकमनु
संधाय गर्वादिप्रचुरा साजातेति व्यज्यते आत्मवरिष्ठत्वे हेतुः गोपीः सर्वा एव कामयमाना अपिहित्वात्र सो विचित्रमहात्म्यः स्वांतत्रोति दुर्लभोपि प्रियः मदेकप्रेमकर्ता सन् भजत इति ३८
वनप्रदेशे तेनैव सह त्यागर्विता सती केशवं स्वस्याः केशान्वयते गन्धातितमब्रवीत् त्वया सह रस्या परिभ्रमणादिना च श्रांताहमिति आजमयहेतुं व्यंजयंत्याह न पारय इति अ
धिमुग्धे इतोप्यग्रे स्थानं दृष्टं गम्यमस्ति तत्राह नयेति पूर्ववदंके निधाय त्वमेव नयेत्यर्थः ३९ एवं तस्याः स्वाधीनभर्तृकात्वोचितकृत्रिमालस्यादिम...नर्मवाक्यं श्रुत्वा नर्मणैव सोंत
र्हित इत्याह एवमिति त्रिभिः पादैः स्कंधमदंसमारुह्यतामितिनर्मणाह यद्वा स्कंधः प्रकांडे काये चेति कोशात् कायः सच्चात्रयोग्यतादं कादिः ततोंतर्दधे च तस्याः सकाशादप्यंतर्धा
नं ईर्ष्यापगमात् सपत्नीनामेकमत्यमपि प्रयोजनं ज्ञेयं एवं स्वाधीनभर्तृकात्वमयीं प्रेमपरकाष्ठां प्रदर्श्य सनर्मणपि विप्रलंभे दैन्यमोहपरकाष्ठां दर्शयति सेति सपादेन सा तदृशा
नेकजीवना मुहुर्विललाप ३९

विलापमाह हे इति आर्तिसंबोधानमिदं सर्वत्र प्रयोज्यं योज्यं नाथस्स्वामिन् रमण कीनोचितसुखद प्रेष्ठ मयि प्रेमविस्तारक इदं सोपि संप्रत्येकाकी कवर्तसे वीप्सा वैयग्र्येण
आलिंगनस्मृत्या मुह्यंतीचाह महाभुजेति दैन्येनाह दास्याः सख्या दावयोग्यायाः तत्रापि कृपणाया इदं दुःखं सोढुमशक्तायाः परिहर्तुं चाज्ञानेस्याः सखे कृपया दर्शनं
ज्ञसाहचर्यसुखसंनिधिं दर्शय संनिहीतोस्मीत्यपि ज्ञापयमात्रं तावतैव स्वस्था स्यामिति भावः औदार्यं नामानुभावोयं औदार्यं विनयं प्राहुः सर्वावस्थागतं बुधा इत्युक्तेः
ततो विमुह्य भूमावपतदिति ज्ञेयं अन्ये मोहितामित्युक्तेः ३० अन्विछंत्यो भृगयमाणाः अविदूरतः नातिदूरे मोहितां मूर्छितां ईर्ष्यापरामां दैन्यमत्येन सखीमिति ३१ तया
कथितमिति संतापापण प्रभ्नानंतरमिति ज्ञेयं कथं भवतीभ्यो विछिन्ना भवमिति नाहाशिषे दूरते आगत्य आत्मानुसंधानमकार्षमित्यादि वृत्तं कथितमाकर्ण्य तत्रात्लक्ष्मी
पतेरपि मानप्राप्तिं च श्रुत्वा गर्वलक्षणाद्दौरात्म्यात् त्यागरूपमवमानं श्रुत्वा विस्मयं प्रापुः दौरात्म्येति तया दैन्येनोक्तं तदनुवादः यद्वा दूर आत्मा देहः श्रीकृष्णो वा यस्याः सा
दूरात्मा तद्भावो दौरात्म्यं दूरविश्लेषादित्यर्थः परमं विस्मयं ययुरित्यस्य पादत्रयेणाप्यन्वयः सर्वतत्त्वहरितस्य तन्मानप्राप्तेश्च स्वेषु परत्से हस्तेषु प्युपूद्ध्यचरत्वात् ३२ ततः स
खीभिर्धृतहस्तया तया सहिताः पुनरन्वेषयामासुरित्याह ततइति विरलवृक्षत्वात् वनं व्याप्य यावत् ज्योत्स्ना लक्ष्यते तावद्वनमविशन् प्रविस्याम्भृगयंत ततो निबिडवनगते तमसि
प्रविष्टं श्रीकृष्णं पदचिन्हैर्वितर्क्य ततो वनान्निवृत्ताः यतः स्त्रियः तद्दुरवगंकाकुलस्वभावाः स्वपराक्रतावयमेत्र दुःसंचरस्थलनगछेततो निश्रमेव्येतिधियेति भावः हरेरिति
पाठे हरेस्ततोन्वेषणादित्यर्थः ३३ ततस्तत्र प्रविष्टस्य तस्य दुरवगंकया दुरवमग्नाबभूवुरित्याह तन्मनस्का इति तत्स्थलप्रविष्टे तस्मिन्नेव मनो यासां ताः तद्विषयः दुःखमयः सं
लापो यासां तस्मिन्निमित्ते परितोभ्रमणरूपा विचेष्टा यासां तस्मिन्नात्मा यत्नो यासां तथाभूताः सत्यस्तस्य गुणानेव कृपावलोकादीन् न तु स्वत्यागादिदोषान् गायंत्य आत्मानम
पि न सस्मरुः किमुतागाराणीत्यर्थः ३४ किंतु हृवं यत्र श्रीकृष्णेन संगतिरासीत्तदेव कालिंद्याद्दूरप्रसरच्छष्ट्पुलिनं दैन्योपालंभादिमयमुच्चैर्गानं श्रुत्वा स्वयमेव श्रीकृष्ण आगमि
ष्यतीति धिया विरूयागत्य कृष्णं भावयंती ध्यायंतीताः कृष्णस्यागमनेकांक्षितं यासां ताः कृष्णं जगुः उच्चैर्विलेपुः समवेताः उच्चत्वायमिलिताः सत्यः ३५ इति भागवते तोषिणी
सारसंग्रहे त्रिंशोध्यायः ३० एकत्रिंशे श्रीकृष्णमेव गायंत्यस्तदागमनं प्रार्थयंते जयतीति हे दयित ते जन्मना व्रजः व्रजस्थः सर्वोपि अधिकं यथा स्यात्तथा जयति उत्क
र्षेण वर्तते हि यतः इंदिरा लक्ष्मीः संपद्रूपेण अत्र व्रजे शश्वन्निरंतरं श्रयते श्रीरिति स्वनामसा ८ फल्याय अजन्मलंकृत्य वर्तते एवं सर्वव्रजस्य सर्वस्मिन्मंगले जाते केवलं तावकास्त्वदी
या गोपिजना विरहदुःखिता दिक्षु त्वां विचिन्वते अतस्त्वया दृश्यतां प्रत्यक्षीभूयतामिति प्रेरणात्यामेनाकर्मकत्वात् भावेलोट् यद्वास्माभिर्भवान् दृश्यतामिति लोट् यद्वा तावकादिक्षु
विचिन्वत इति त्वया दृश्यतां ज्ञायतामिति वाक्यार्थ एवं क्रमे अस्तु तावद्दर्शनादिकं प्राणवल्लभेन त्वया दयालुना अस्मद्दुःखमात्रमपि ज्ञायतामित्यर्थः दुःखदर्शने परदुःखकारतेरो
वश्यं साक्षात्कुर्वेदिति गूढाशयः ननु दयितस्य विरहे दयिता न जीवेयुस्तत्राहुः त्वयि निमित्ते धृष्टता सवः त्वत्प्राप्त्याशया जीवंतीत्यर्थः एषु केषु प्रायश्च तुर्णां पादानां द्वितीयाक्षर हल्ले
क्यं केषुचित्स्वादेषु प्रथमसप्तमाक्षरहल्लैक्यं तत्र केचित् रासबवादीनामालंकारिकादिसमयसिद्धसावर्ण्यादैक्यं १ विचिन्वंतु मम किमिति चेत्तत्राहुः शरदिति हे सुरतनाथ
हे वरद अशुल्कदासिका अमूल्यदासीर्नः शरदुदाशये शरत्कालिकहृदे इति पद्मस्य जन्मकालस्थानयोः श्रेष्ठ्यं साधुसम्यक् जातेयत् सत्सरसिजं विकसितं पद्मं इति जन्मनः जाते
र्व्यक्तेभ्य तस्याप्युदरं अंतरोभाग इति पद्मस्य शोभायाः पराकाष्ठोक्ता तत्रत्यामपि श्रियं मुद्रमाप्ति हरति तद्दृक्स्फुरणेन निःश्रीकं पद्ममतस्तस्य दृक्श्रीर्दृनमनया ज्ञायत इति भावः तया दृ
शा एकया पिनिघ्नतो मारयतस्ते त्वया क्रियमाण इह लोके बधो न किं चौरेणेव वने गुप्तः कृतो वधो लोकैर्मज्ञायतो नाम हत्यापि किं

नस्यादिति भावः दृशोऽस्य सुरतनाथेत्यत्रान्वये दृशैव सुरतया चकेत्यर्थः यद्वा दृशैव शुक्लदासिकाः दृक्कूरूपशुल्केनैव दासीरपि त्यागेन मारयतः इत्थं च त्वया ~ पहृतप्राणप्रत्यर्पणा
यदृस्यत्तामिति भावः श्लेषेण तस्मिन् चौर्यदोषमारोप्योपालंभः चोरो हि सतामपि श्रियं निगूढं दुर्गस्थामपि हरति किंचिद्दातुं कांश्चित् हंति च तथा साधुजातस्य सतः पद्मस्य जले दुर्गे
सहस्रपत्रप्रकारगर्भस्यापि श्रीर्हृता स्मान् हत्वा किं हर्तुमिच्छसि स प्राण एव दास्यो भवामेति किंच जारवरत्वमपि त्वय्यायातं निगूह्य स्थापिता पिश्रीरपि नायिका त्वया दृशैव हृता त
त्रसरत्नानां सर्वत्र भ्रमंतीनां नः का वार्तेति हे सुष्ठु रतानां जनानामुपतापक हे निजवरच्छेदक सखिद्रोहादिदोषपरिहारार्थमप्यागम्यतामिति भावः २ बहु मृत्युभ्यः परं परया साक्षाच्च
त्वया रक्षिताः किमिदानीं विषमेषुणा मारयसीत्याहुः विषेति ऋषभ हे श्रेष्ठ विषजलं कालीयहृदजलं तेन यो गोगोपानां नाशः तस्मात् व्यालराक्षसात् बालान् वत्सांश्च गिलितो घासु
रात् पालवत्सरक्षया सर्वव्रजरक्षणादयमपि रक्षणाताइति परंपरा वर्षमि ८ श्रान् मारुतात् वैद्युतानलादिनिरपाताच्चेति साक्षात् वृषमयात्मजात् व्योमात्मजाद्वत्सासुरः वंशाहतो
को ■ निरगादिति वत् मयात्मजो व्योमासुरः तद्भ्रयित्र मग्नेवक्ष्यमाणमपि ससास्तूर्वभावीति ज्ञेयं तद्वीलायाश्चाति बाल्ये एव योग्यत्वादिति निर्णेष्यते इति पुनः परंपरया रक्षा अर्थकौ सं
गरणं हति विश्वतः सर्वस्मादपि भयादिति ३ तदेवं प्रभावत्वादेव मनुमिमहइति याचकरीत्यास्वाभीष्टसाधना यस्तुत्यर्थमाह नखल्विति भवान्निश्चितं यशोदासुतो न भवति किंतु सर्व
प्राणिनां बुद्धिसाक्षी अतोऽस्माकं हृत्तापं जनात्येवेति भावः अवतारहेतुमनुमिमते विखनसा ब्रह्मणा प्रार्थितः सन् भक्तकुलेऽस्मिन् उदेयिवानुदितो न नु अतो भक्तोपेक्षा न युक्तेति । भावः
ननु न द्रष्टयं न भक्तास्तत्राहुः विश्वगुप्तय इति सर्वस्यापि पालनप्रार्थनान्नोपेक्ष्य स्वेति भावः यद्वा खलु निषेधे अंतरात्मदृगपि गोपिकानंदनो न भवतीति नेत्यर्थः शेषं समानं यद्वा शौर्यमाहुः
गोपिकायाः अस्मत्पालिकाया व्रजेश्वर्या नंदनो भवान्न भवति किंतु सर्वत्रौदासीन्यात् परमात्मैव प्रायो ब्रह्मप्रार्थनया तत्कृतव्याजेनात्र विश्वस्य दैत्यादिभ्यो गुप्तये प्रकटोऽसि गोपिकानंद
नत्वेऽस्मदुपेक्षा न युज्यतेति भावः अथवा नञः प्राङ्निर्देशात् सर्वपादेष्वन्वयः हे अस इव प्रतिकूल न भवान् यशोदासुतो न तथात्वेऽस्मदुपेक्षानुपपत्तेः अखिलानां स्त्रीणां पुंसां च हृद् वि
तभावज्ञोऽपि न अस्मद्विरहदुःखादिज्ञानाभावात् ब्रह्मणा वेदादिमुखेन सर्वस्यापि गुप्तिः कार्या न कस्यापि घात इति प्रार्थितो न नहिंस्यात्सर्वाभूतानीत्यादिके प्रार्थनारूपेणापि त्वया न
८ श्रुतं अन्यथास्मद्घातेन प्रवर्तेथा इति भावः कृपालुत्वेन भक्तानां कुले च नोदेयिवान् भक्तकुलोचितकृपालुत्वाद्यभावात्तत्र कुले जन्माभिनिष्पत्तमिति भावः ४ पूर्ववदैश्वर्यसंभाव्य प्रा
र्थयंते विरचितेति संसृतिभयाच्चरणं प्रपन्नानां दत्ताभयं मोक्षदमित्यर्थः कामदं त्रिवर्गप्रदं लक्ष्मीपाणिग्रहणशान्तिकरपद्मं कांत हे प्रियनः शिरसि धेहि यद्वा संसारांतर्वर्तिपावकभय
नाशकमिति शौर्यं कांतं च तत्कामदं चेति स्वतः सुखरूपं अभीष्टदं च श्रियः संपदधिष्ठात्र्याः करो गृहीत इव येनेति सर्वसंपदा व्रजे सत्त्वं अतोऽस्माकं विरहभयनाशकं त्वत्प्राप्तिरूपाभीष्ट
दं अनुषंगीततया संपत्प्रदं करपद्मं शिरसि धेहि अर्थद्वयेऽपि संगीकुर्विति भावः हे वृष्णिधुर्य वृष्णिविशेषव्रजराजकुलतिलकेति ५ एवमंगीकारं प्रार्थ्य त्रिभिरभीष्टविशेषान् प्रार्थयंत्यः
प्रथमं संगं प्रार्थयंते व्रजेति हे वीर अदेयस्यापि दाने समर्थ नः नञ अस्माकं निकटे तिष्ठ प्रथमं तावच्चारु मनोहरं कमलतुल्यमाननं योषितामबलानां नः अतस्त्वमेव दर्श हे
व्रजजनार्तिहन् मुखाप्रदर्शनेऽस्मन्मरणापत्त्या आर्तिहननव्रतभंगः स्यादिति भावः निजजनानां प्रेयसीनां स्मयस्य मानस्य नाशकं स्मितं यस्य स्मितमात्रेण माननिरासे सुलभे तद्धानेना
लमिति भावः सखे इति अस्मदभिमतसख्ये न भजतेति भावः ननु सख्येऽप्ययोग्याः कथं यभिसारीक्य दैन्येनाहुः भवतः किंकरीरिति यद्वा प्रणयकोपेनाहुः व्रजजना[illegible]र्तिहंतापि या
बितां वीर स्त्रीवधे समर्थ हे निजजनानां हास्यध्वंसनेन मुखकान्त्यादिकपटस्मित अभवत् किंकरीः अस्मदन्या अहासिरेव भजज मुखपद्मं च नो प्रदर्श्य मरणस्यैव निश्चितत्वा
त् ६ अथानं तत्तापशांत्यै प्रलेपौषधमिव बहिर्हृदि अंगसंगमीप्सवो देनचरणसंगमेव प्रार्थयंते प्रणतेति तव पदांबुजं नः कुचेषु यद्वा ते त्वदीयानां नः कुचेषु कृणु ननु पापादहं
बिभेमि तत्राहुः प्रणतमात्राणां देहिनां नलकूबरादीनां स्थावरत्वप्रदपापहर्तृ अतः कुतस्तव पापशंकेति भावः प्रणतानामस्माकं मानाद्यपराधनाशकमिति वा ननु कठिनेषु स्म

दुःखं चरणे कथं निधेयं तत्राहुः तृणेति पशुसंगत्या वनेषु भ्रमणादिदमधिकं दुःखं नेति भावः अन्ततया नर्हा अपि पश्चाद्वयं वयमनुकंप्या इति चार्थः ननु स्तनेषु पादार्पणं न शोभनं तत्
त्राहुः श्रीति नखचंद्रादि शोभास्पदत्वात् दत्तादितोप्यलंकार एव स्यादिति भावः ननु तर्हि पापनाशनाद्यर्थमेवैवमिष्यते नेत्याहुः हृच्छयं कामं ऋंधीति एतदेव नः प्रयोजनमित्यर्थः
तत्र सामर्थ्यमाशंक्याहुः फणिनः फणास्वर्पणमात्रेण तद्विषदर्पस्येव हृदि स्पर्शमात्रेण कंदर्पस्य नाशो न दुष्कर इति भावः ७ अथ तद्भावितस्मरत्वातितप्ताः बहिर्लेपमात्रेणात
स्ताः पस्याशांतिं मत्वांतः प्रवेशनार्हस्याधररसस्य सुधाप्रचुरस्य पानं प्रार्थयंते मधुरयेति अधरसीधुनानः आप्यायस्व संजीवय अन्यथा स्यामरण दशैव संनिहिता स्याशयेनो पा
स्यां दशामाहुः तव मधुरया गिरा स्मर्यमाणया कठोराभ चमत्हिवा प्राणास्त्वमसिराधिके अस्तित्वनान्याचकोरस्य चंद्रलेखां विना गतिरित्यादिरूपया मुह्यंती देहादिविस्मृ
तिं प्राप्नुवती कीदृश्या वल्गुनि वाक्यानि यस्याः बुधानामर्थज्ञानाद्व्यंजनादिवृत्तिभिः शं नंदप्रदया गिरा मोहनादेव विवेकापगमाद्विधिकरी दासीत्वं गताः यद्वा गिरैव विविधिक
रीः धुना विरहस्य मुह्यंतीः इमाः प्रत्यक्षा नात्र संदेह इति भावः हे पुष्करेक्षणेति उक्त्यवसरे दृष्ट्यादिनापि मोहनत्वं कथमदे हयाचत त्राहुः हे वीरदानेदयायां वेत्यर्थः ८ कथं
तर्हि जीवथेत्याशंक्य त्वत्कथामृतेनेति स्वानुभूततन्महिमवर्णनपूर्वकमाहुः तवेति स्वर्गभवं नामृतं किंतु तव कथैवामृतं स्वतः फलरूपं फलांतरसाधनं च तत्र हेतुः तप्तजीवनं
त्वद्विरहतप्तान् किमुत संसारतप्तान् जीवयतीति तप्तानां ज्ञानीनां जीवनरूपं च तप आलोचने पीता गावो भुक्ता ब्राह्मणा इतिवत् प्रत्ययः यतः कविभिः ब्रह्मविद्भिः सनकादिभिरपीडितं स्तु
तं न त्वमृतं नैवं मृतं तथा कल्मषापहं कामकर्मरूपं कथासेवनांतरायं चापहंतीति न तु विपरीतं एवं मृतमपि श्रवणमात्रेणैव मंगलं सर्वार्थसाधकं किमुतार्थविचारेण तत्वनुष्ठानापेक्षं श्री
मत् सुशांतं तनुमादकं आततं लोकत्रयव्याप्तं तच्च स्वर्ग एव इदृशं कथामृतं भुवि ये भूरि कुत्रापि ये गृणंतीति निरूपयंति ते भूरिदाः सर्वेभ्यः सर्वार्थप्रदाः किमुतास्माकं जीवनदा इति ते चास्मा
सु सखीजनाएवेति यद्वा भूरिदा पूर्वजन्मसु बहुदानादिकृतवंत इत्यर्थः कथामृतस्यैवं माहात्म्यं किं पुनर्दर्शनादेरतस्तावद्दृश्यतामिति यद्वा मत्कथयाक्षणं कालो नीयतामित्याशंक्य क
थामेवोपलभंते कथैवामृतं मृतिः सैवोद्दीपनविधयास्मान्मारयति कुतः तप्तजीवनमिव तप्ततैले जलमिवेत्यर्थः कविभिरेव कल्मषापहं यथा स्यात्तथेडितं तेषामेव कल्मषनाशादि
नास्माकं नाम सुखदमित्यर्थः अस्माभिस्तु श्रवणेनैव मंगलमिति श्रूयते न त्वनुभूयत इत्यर्थः व्यर्थमेव श्रीमदेन सौंदर्यगर्वेणाततं सर्वत्र प्रसृतं अतो ये भुवि भूरि तो गृणंति ते
भूरिदाः महाघातकाः दोषवखंडने अतः कथाश्रवनालमिति भावः ९ किंचास्माकं कथाश्रवणेनापि कथंचित्तात्कालिकजीवनमात्रं स्यान्नतु तापशांत्यानिर्वृतिः अनुरागमयैः
प्रहसितादिभिः त्वदीयपूर्वविलासैर्मनसोतिक्षोभादित्याहुः प्रहसितमिति हे प्रियप्रलोभनस्वभाव प्रथमं प्रहसितं अस्मद्दर्शनमात्रात् उक्त हसितं ततः प्रेम्णा मनोहरमीक्षितं ईक्षणं
तथावापाठः ततः सखिभिः सह विहारः तच्च त्रयं ध्यानेचिंतनेपि सर्वार्थदं ततो रहसि संविदः वेण्वादिना संकेतनर्माणि हृदि स्पर्शो हृदयंगमाः एषां मनः क्षोभणे यथोत्तरं श्रैष्ठ्यं
हे कुहकेति तच्च सर्वं कपटमयमेवेदानीं तर्कितमिति भावः न इति बहूनामनुभवं प्रमाणयति मनः क्षोभयंति हि निश्चितं १० तच्च भवता क्षोभनदानं संयोगवियोगयोरविशे
षमेवेत्याहुः चलसीति द्वाभ्यां यत्यदा व्रजाच्चलसीति चलनमारभ्यागमनपर्यंतं कलिलतोक्तापथः श्यारयन्नीति असंख्यानां ते पांचारणायचर्मस्य ... स्ततो भ्रमणं
संभाव्यते पशुतयात्वत्पादवेदनामज्ञात्वा दुर्गमे भ्रमणं च तद्वा नलिनवत्कोमलं ते पदं शिलैः सभूकवन्यधान्यकणिशैः तृणेरंकुरैश्च सीदतिक्लिश्यदिति नो मनः क
लिलतामस्वास्थ्यं प्राप्नोति हे नाथ व्रजेश्वरेति तेन तवायुक्तमिव कांतेति अस्मत्करस्पर्शार्हमेव तद्धितिभावः यद्वा नाथ प्रियजनोपतापक तर्हि तापहेतुश्चिंताविवे

कान्त त्यज्यतां तत्राहुः कांतेति प्रियजनचिंताविवेकेनाप्यपरिहार्येति भावः एवं वियोगे वनभ्रमणमप्यतितापदमिति तद्विहाय द्रुतमेहीति तात्पर्यं ११ दिनपरिक्षये तु क्षयशब्देन दिने द्व
यः समस्तपदेन सायंकालस्य उद्दीपकत्वं नीलकुंतलैरावृतं घनरजस्वलं घनं गोघनवितयोरिति कोशात् गोरजश्छुरितं वनरुहाननं कुंतलादिवृतत्वेन अलिमालाकुलपराग
छुरितपद्मतुल्यमाननं बिभ्रदिति सौंदर्येण गोपिषु गोपोचितवेषेण च विशेषत उद्दीपनं तत्र मुहुर्गोनिरीक्षणादिछलेन पुनः पुनर्दर्शयन् नो मनसीति मनोभुवस्तस्या प्र
तिकार्यत्वं स्मरं स्मरणमात्रेणैव क्षोभकं तं बलाद्यासि अर्पयसि हे वीरेति अत्रैव तत्त्वं वीरो नकुसुमेषुपराभवे इति सरोषं नर्म एवं सर्वथा स्मरमेव यच्छसि न त्वं संगमिति संयोगका
लेऽपि तव सर्वं कपटमेव चरितमस्माकं तु सर्वं स्नेहमयमेवेति भावः १२ अतोऽधुना कपटं विहायैवं कुर्विति पूर्वोक्तप्रार्थनाद्वयमुपसंहरंति प्रणतेति द्वाभ्यां प्रणतानां नागतस्पृत्या
दीनां कामदं सर्वार्थदं अत एव वत्साहरणाते पद्मजेनार्चितं विरवनसाधितं इत्यत्रोक्तव्याख्या वा देश्वर्यानुमानं वा धरणीध्वजादिचिन्हैर्मंडयतीति सौंदर्यं कृपालुत्वं च ध्यापादिध्ये
यं इंद्रवृष्ट्याद्यापत्सर्वापनिवर्तकत्वस्यानुभूतत्वात् एवं साधनत्वमुक्तं स्वतः फलरूपत्वमप्याहुः शंतमं चेति हे आधिहन् हे रमणेति विरहव्यथाशांतये विचित्रक्रीडासुखसं
पादनाय चते पादकमलं नः स्तने धर्पयेति भावः १३ अपि च वीर हे सुरतसमरप्रतिभटप्रियाजयसमर्थ तवाधरं एवामृतं तत् नो वितर देहि कीदृशं सुरतं प्रेममयं संभो
गेच्छां वर्धयति तदिति मद्यादिवन्मादकत्वं तत्रान्तनिष्ठोक्ता शोकं त्वदप्राप्तिदुःखं नाशयतीति तत् इतरेषु सार्वभौमादिब्रह्मानंदांतसुखेषु रागस्येच्छाया विस्मारणं विलापकं नृणा
मपि किमुत नारीणां तास्वप्यस्माकं किमु तेति भावः तदाहुः स्वरितेन षड्जादिनादितेन वेणुना पुंसापि अस्वासत्त्या चुंबितं नाद्यामृतवासितमिति भावः एवंश्लोकाभावे तर
सुखानादराभ्यां परमपुरुषार्थतोक्ता १४ किंच क्षणमपि त्वददर्शने परमं दुःखं दर्शने च सुखं तद्वक्तुं न शक्नुमः इत्याहुः अटतीति यद्भवान् काननं वृंदावनं अटति गच्छति तदा
त्वामपश्यतां सर्वेषां व्रजजनानामपि किमुतास्माकं क्षणोर्धमपि युगवद्भवति चिरमदर्शनं त्वत्यंतमसह्यमिति भावः अथ दिनांते श्रीमन्मुखदीक्षतां च पश्यतां जनानाम
पि दृशां पक्ष्मकृत् ब्रह्मा जडो मंद एव निमेषव्यवधानस्याप्यसह्यत्वात् ततः सत्वरं दर्शनं देहीति भावः यद्वा त्वत्तोऽस्माकं न किंचित्सुखं ज्ञातं किं तु दर्शने ऽदर्शने च दुःखमेवेत्या
हुः अटतीत्यदर्शने दुःखमुक्तं दर्शनेऽप्याहुः कुटिलेति जडः अज्ञः यद्वायः पक्ष्माणि कृततिस्म निमीलनाभावसंपादक एवाजडः सरसत्तः किं वास्य दृशां पक्ष्माछि देवा जडउ
दीक्षतां उच्चैः पश्यतु वयं तु पक्ष्मपिहितदृशो जडाः किं पश्यामेति दर्शनेऽपि पिधानदुःखमिति भावः १५ आस्तां तत् अद्य तु अत्यंतमयुक्तं कृतमित्याहुः पतीति पतीन् सुतान् अ
न्वयांस्तत्संबंधिनः भ्रातृन् पितृआदिबांधवांश्चातिक्रम्यैव समीपमागताः यतः स्तवो द्वेगीतेन मोहिता हरिण्य इवेति भावः कीदृशस्य गतिविदः अस्मदागमनं ज्ञानतः
आगमनार्थमेवोद्गीतमिति भावः अस्मन्मोहकान् गीतगतिविशेषान् जानत इति वा यद्वा तव गतिं स्वभावं जानत्यो विदग्धा अपि वयं मोहिताः मोहनमंत्रप्रायत्वात् दुर्ज्ञानस्येति
भावः एवं स्वयमेवानीता योषितः निशि त्वामृते कस्त्यजेत् न कोपीत्यर्थः कितव हे वंचनशील किंतवापि केतवलब्धं स्वीकरोति न तु तिरस्करोतीति ततोऽपि विलक्षणस्त्वं
अच्युत हे स्वगुणादव्यभिचारीन् १६ अतस्तव यास्पृक्तानां नस्त्वदृष्टिनिदानं हृद्रोगस्यागसंगमुख्यरसेनापाकुर्वित्याहुर्द्वाभ्यां रहसीति तव हृच्छयस्य कामस्योदयं
वीक्ष्य कीदृशं रहसि संविदो यत्र तं अनुमार्षः प्रहसितमाननं यत्र प्रेम्णा वीक्षणं यत्र ततो विशालं श्रियोधाम उरश्च वीक्ष्यास्माकं मतिस्पृहेत्यस्मदर्थकर्तकयोः वीक्षण
स्पृहणक्रिययोरीक्षतेः कोः यद्वा स्पृहेति संपदादित्वात् भावेक्विपित् तीया मनो वीक्ष्यातिस्पृहया मुह्यतीत्यर्थः अतिस्पृहमिति चित्सुखः एवंस्पृहाया अप्रतिकार्ये स्वभाववे

५२

नदैन्यंसूचितं १७ अजोकसांवनौकसांचसर्वेषांवृजिनहंत्री दुःखनिरसनितवव्यक्तिः प्राकट्यं अतोंतर्धानमयुक्तमिति भावः विश्वमंगलं सर्वशुभदाच अलमितिशायनेत्यन्त यत्रान्वयी
अतस्त्वएहात्मनांचतस्पृहारूपंदमनसां नोमनाक् इषत् किमपित्यजकार्पण्यमकुर्वन् देही किंतत् स्वजनहृद्रोगाणां यद्रतिगोप्यनिषूदनं निवर्तकमौषधं यतत्तदेवदेहीति गूढा
भिप्रायः मनागीति याचकरीत्या वस्तुवस्तु स्तोकं ज्ञामिति बहुत्वेननितरांसूदनमितिनिशब्देन चचिरकालंनिरंतरविचित्रांगसुखंदेहीत्यभिप्रेतं १८ अथातिप्रेमविस्फुटितहृदया
दत्यआहुः यदिति हेप्रियतवातिकोमलंपदांभोजं कुचेषुक ठिनेषु अतःपादयोर्यथाशंकयाशनैःशनैर्दधीमहिधर्तुंयोग्यं आर्हकृत्यत्वचश्चेतिलिङ् तेनाटवीमटसी अधुनानि
शिवनेत्यमसि नयसीतिपाठे गच्छसीत्येवअर्थः नयगताविति स्मरणात् अयं वस्तनेषु चरणधारणे हेतुः अटनजनितानिष्टशंकयाचरणेएवस्त्वेहातिशायोपजननात्स्यैवस्तनेषु
धारणमित्याशयात् तत्संबुजंकूर्पादिभिः सूक्ष्मपाषाणादिभिः किंस्वीन्नव्यथते अपितुव्यथतेवेति नोधीः भ्रमति मुह्यति अत्रहेतुः भवानेवायुर्जीवितं तासां इत्थमेवत्वयि ६८ या
तासवहस्रपक्रमः अतस्तवअभावासाम्भज्जीवनेष्ववेतिप्राणान्धारयितुं नशक्नुमइतिभावः १९ इतिश्रीमद्भागवतदशमस्कंधभूषणः येकत्रिंशतमोध्यायः तोषिणीसारसंग्र
हे एकत्रिंशः ३१ स्वप्रेमामृतकल्लोलविह्वलीकृतचेतसः सदयंनंदयनगोपीरुद्गतोनंदनंदनः १ द्वात्रिंशत्प्रेमयुक्तैःसोपालंभैर्विरहालापैर्विवशमनाभगवानाविर्भूयगोपी
रसांत्वयदितिवर्णयिष्यन् तापप्रपंचनमुपसंहरति इतिति एवंप्रभृतिचित्रधाअनेकधाउच्चैर्गीयंत्यः प्रलपंत्योविरहव्याकुलतयानर्थकमपिजल्पंत्यः सुस्वरंकरुणादीर्घस्वरेण त
द्दर्शनेअतिस्पृहायासा १ शौरिः शूरवंशाविर्भूतइतिप्रसिद्धोविगतप्रायप्राणतयाशंक्यमानानांरुदतीनांतासामेवाविरभूत् पूर्वतोप्यपूर्वाविर्भावात् त्रैलोक्यलक्ष्म्येकपदंवपुर्दधदि
त्यादिवक्ष्यमाणात् तथैवाह साक्षादिति साक्षान्मूर्तिमान्योमन्मथःअपितुव्यूहांतर्गतोजगन्मोहकः कामदेवः नतुप्राकृतोमनोभूस्तदंशःतस्यापिमन्मथःमोहनवशक्तिप्रदोमोहकश्चेत्य
र्थः एवंस्वरूपस्यापूर्वतामुक्त्वाविलासवेषयोरप्याह स्मयमानेतित्रिभिर्विशेषणैः पूर्वतोपिविलक्षणस्मितपीतांबरस्रग्धरइत्यर्थः तत्रस्मितंस्वागस्यपरिहासमत्वेयंव्यंजनाय
पीतांबरावृतत्वंस्वागतःस्वस्यसंकुचितत्वबोधनाय स्रग्वित्वंस्रगेवैकास्त्रीमत्सहृदिनान्यायुष्मान्विनेतिव्यंजनाय २ आगतंदूरतआविर्भूयगतिक्रमात्स्वांतिकंप्राप्तंविलोक्यरोद
नवैवस्येनईषद्दर्शनेप्यनिश्चयात्सम्यक्दृष्ट्वा अबलाविरहार्तिक्षामाअपियुगपदुत्थिताः यतःप्रेष्ठंतत्रदृष्टांतः तन्वःकरचरणादयःविलासानुभावोदय गतिस्थानासनादीनांमु
खनेत्रादिकर्मणां तात्कालिकंतुवेशिष्ट्यं विलासप्रियसंगजमित्युक्तेः ३ अथमुख्यानांगोपिनांचेष्टितभेदैर्भावभेदंपंचभिर्वर्णयति तत्रादौतासांमुख्यानांनामानि चंद्रावलीश्यामला
शैव्यापद्माराधाललिताविशाखाभद्रेति प्रहरादसंहितायांचंद्रावलीस्थानेधन्योक्ता सरलस्वभाववामस्वभावभेदेनासांद्वैविध्यंतत्रापिखरस्वभावमृदुभावस्वाधीनकांतत्व पराधी
नकांतत्वैरवांतरभेदाः वामानांहिवशःकांतोतःश्रेष्ठाकामिनीषुताः वामताचाभिमानश्चस्त्रीणांकामायुधंवरं अतस्तासांवशःकांतोयथा भामावशोहरिः हरिवंशेविस्तरेणवर्णि
तोन्यासनोतथेत्यतएवात्रदक्षिणाश्चतस्रोर्धेनार्धेनोक्ताः वामास्तिस्रः लेकेकपद्येनेति प्रथमंचंद्रावलीचेष्टितमाह काचिदिति भ्रमणतेमस्याकरावल्लेबनव्याजेनस्पर्शो
त्सुक्यात् करांबुजंदक्षिणमंजलिना संहतहस्तद्वयेनजगृहे इयंमृदुःकांताधीनादक्षिणाचइयंचराधाप्रतिस्पर्धिनि तथाचोक्तंबिल्वमंगलेः राधामोहनमंदिरादुपागतश्चं
द्रावलीमूचिवान् राधेक्षेममिहेतितस्यवचनंश्रुत्वाहचंद्रावली कंसक्षेममयेविमुग्धहृदयेकंसःक्वदृष्टस्त्वयाराधाक्वेतिविलज्जितोनतमुखःस्मेरोहरिःपातुवः इति चंद्र
नेनलिप्तंवामबाहुं इयंराधास्कंधेअधत् श्यामलानाम्नी अकृष्णबाहुधारणात्खरापराधीनकांतादक्षिणाच ४ अत्रशौरेरित्यनुषंगः तौ चूलपतनभयादादरात् श्यामाजलि
नागृहणं नहस्तेन इयंचंद्रावलीसखीशैव्यानाम्नी मृदुःकांताधीनादक्षिणाच एकास्वमुखमुपविष्टासती वामभुजेनप्रियामाल्यंबध्नतिष्ठतः तस्यांघ्रिकमलं दक्षिणेस्त

५२

भागवता ५२

नयोर्न्यधात् ॥ यतः स त्वमात् इयमपि चंद्रावलिसखी पद्माख्या प्रखरा कांताधीना दक्षिणा च ५ अथ वामा सिस्त्राह एवेति भ्रुकुटिं भ्रुवं कुटिलीकृत्य प्रणयकोपावेशेन विकृ
त्वा सविदष्टाधरोष्ठा भूत्वा कयाः कटाक्षाः तेषां विक्षेपैर्भ्रंतीव शौरिमैक्षत बिब्बोकाख्योनुभावोयं इष्टेपि गर्वमानाभ्यां बिब्बोकः स्यादनादर इति तल्लक्षणात् तथा ललिताख्योपि
तदुक्तं अनावार्यापि दृष्टस्याल्ललितं भ्रुविचेष्टितमिति याः सर्वाः प्रपरित्यज्य नीता पश्चात्सक्ता च सैव यमेव प्रखराति वामा स्वाधीनकांता राधिकानाम्नी देवी कृष्णमयी प्रोक्ता राधि
का परदेवता सर्वलक्ष्मीमयी सर्वकांतिः संमोहिनी परेति बृहद्गौतमीये राधा वृंदावने वने इति मत्स्यादौ सर्वगोपिषु सैवैका विष्णोरत्यंतवल्लभेति पाद्मे च प्रसिद्धा इयं गोपाल
तापिन्यां गांधर्वेति नाम्ना प्रसिद्धेत्याहुः ६ अनिमित्तं तीभ्यां दृग्भ्यामापीतं आस्वादितमाधुर्यमपि पुनः पुनर्जुषमाणानां तृप्यत् अत्र मुखस्याम्बुजरूपकेण सौंदर्यस्य मधुत्वं दृशोर
सनात्वं तेनास्यासक्तिर्व्यंग्या सेत्तोद्दास्यभक्तिनिष्ठाः इति तत्स्यभावेदृष्टांतः इयं सन्मुखदर्शनीत्वात् प्रखरा स्वयमेवागत्य मामालिंगयिष्यतीति स्वस्थाने स्थिता स्वाधीनकांता राधा
सखी ललितानाम्नी ७ हृदि कृत्य हृदयं नीत्वा ततः साक्षादिव भानात् लज्जया नेत्रे निमील्य पुलकांगी सति आलिंगनमनुकृत्यासीत् योगीवेत्यंतः स्फूर्तौ दृष्टांतः इयं मृद्वी स्वाधी
नकांता विशाखानाम्नी राधासखी तृतीया वामा एवं समोक्ताः अष्टमी तु विष्णुपुराणे काचिदायांतमालोक्य गोविंदमतिहर्षिता कृष्ण कृष्णेति कृष्णेति प्राह नान्यदुदेरयदि
ति इयं सरला भद्रानाम्नीति महानुभावसमस्यायुक्तिप्रायं व्यत्लेखियत् क्षांत्वा तच्चापलं संततः कुर्वंत रसिकान् हृदि ८ अन्यासां वृत्तमाह सर्वा इति केशवस्य तेजोनिधेरवलोके
ति एवमंतर्धानेपि वीक्ष्यमाणं च केशव इति केशव पदस्यार्थः तदयं भावः तस्यांतर्धाने तासां तेजो तर्धानमासीत् संप्रत्याविर्भावे तासां कोटिलाभः संजात इति प्राहुः ब्रह्मतंत्रे महा
भागवतं प्राप्य यथा जनाः तापहान्या कृतार्थास्तद्वत् ९ ततो मदमानो हित्वा मिलितास्ताभिस्ताभिर्वृतस्य भगवतः शोभाविर्भावमाह ताभिरिति त्रिकेण शोकविधूतो हतु विशेषा
विष्णुपुराणे ततः काश्चित्प्रियालापैः काश्चिद्भ्रूभंगवीक्षितैः निन्येनुनयमन्याश्च करस्पर्शेन माधव इति भगवान् सर्वपूर्णोपि ताभिर्वृतोधिकं व्यरोचत पुरुषवदुपासनादिसिद्ध
ज्ञानवीर्यादिशक्तिभिर्यथेति तातेति त्वदनुकंपया रहस्यमिदं प्रकाशयामीति भावः १० शोभोपकरणान्याह तामिति द्वाभ्यां सम्यक् हस्तधारणादिना दाय रासयोग्यं पुलिनांत
रं विविंस्याधिष्ठाय विभुरिति सर्वासां समादाने सामर्थ्यं विकसत्कुंदमंदारैः सुरभिर्योनिलस्तस्मात् षट्पदा यत्र ११ शरच्चंद्रांशुभिर्नासंदोहैः राकात्वात् अंधकारैर्ध्वस्तैः रात्रिगतं
तमो यत्र तेति दिनतुल्यता अतः शिवं सुखकरं यमुनाया हस्तरूपैस्तरंगैरास्तृताः कोमलवालुका यत्र एवंभूतं पुलिनं ताः समादाय निर्विश्य व्यरोचतेत्यन्वयः यद्वा ताः समादा
य ताभिः सहैव प्रविश्य विभुः स्ववैभवप्रकटनपरो बभूवेति शेष इति युग्मकमेव १२ हृष्टानां तासां प्रेमसेवामाह तद्दिति तस्य श्रीडोक्षकस्य विभोर्दर्शनेनाल्हादेनास्पिता हृ
द्रुजः सर्वाधयो यासां ताः मनोरथस्य वांछितस्य परां काष्ठां पूर्णकामतां ययुः श्रुतयो यथेति तत्सलीलाप्रतिपादिकाः श्रुतयोपीदृशलीलाविशिष्टं तं प्रकाश्य नानातात्पर्य दौ
स्थ्यं त्यजंतीति तत्रैव च पर्यवस्यंतीत्यर्थः श्रुतयोपि रासलीलावर्णनेन कृतार्था जाता इति सहोत्स्यलंकारार्थो व्यज्यते यद्वा ज्ञानकांडस्थाः श्रुतयो तन्निरसनाद्यन्वेषणमा
नैः क्लिष्टाः स्वरूपलक्षणया परमेश्वरं दृष्ट्वाल्हादपूर्णा अन्वेषणमनोरथं हित्वा कृतार्थास्तद्वदिति ततश्च सुस्थिरचित्ताः सख्यः स्वैरुत्तरीयैर्हृद्याकुंकुमवस्त्रैः रतः एवं कुचकुं
कुंकुमैः रंजितैः रासनमासनं ध्रुवे आत्मप्रियाय विविधं रचयामासुः तच्च विस्तीर्णमेकमेव वर्गशः पृथगेवेति १३ सः प्रेमरसांबुधिवर्धनः श्रीकृष्णचंद्रः स्वयं भगवानी
श्वरोपि तत्रासने उपविष्टः सन् तत्रापि गोपीवेष्टितः शिशुभे दुर्लभत्वमाह योगेश्वरैः सिद्धसमाधिभिरंतर्हृदि रकोगतचित्तैः कल्पितं भावनामात्रेण स्थापितमासनं यस्य

अलुक् समासः अर्थोक्तेः कल्पितमित्यिवा गोपीपरिषत्कृतत्वेनैव योगिभिर्ध्यातः स तत्रोपविष्टः संचकासे इत्यन्वयः अर्चितः ताम्बूलनर्मस्मितादिना सत्कृतः त्रैलोक्ये या लक्ष्मीः शोभादि संपत्तिस्तस्य एकं पदमाश्रयं वपुर्दधत् तासां मध्ये प्रकटयन्नित्यर्थः १४ प्रणयस्वभावज्ञां गूढां कोपोत्पत्तिमाह सभाजयित्वेति एवं संभाव्यं तं भाविरे वक्ष्यमाणप्रश्नं पृच्छुः ता इति रोषः कीदृश्यः ईषत्कुपिताः तत्र हेतुमाह अनंगदीपनं पूर्वं परित्यज्य गमनेन अधुना तु नानाविलासैः काममुद्दीपयतिमात्रमिति अंककृतांघ्रिसहितहस्तयोः संस्पर्शनेन मृदुसंमर्दनपूर्वकं संस्तुत्य प्रशंसया ईषत्तोष्येति कोपगोपनं सहासलीलेक्षणेन विभ्रमो विलासो यस्यां तया भ्रुवा उपलक्षिताः भ्रूविलासमात्रेण प्रव्यंजितकोपा इत्यर्थः अवहित्थाख्यः संचारी भावोयं अनुभावपिधानार्थोवहित्थाभाव उच्यते इत्युक्तेः एवमासनपक्षे प्रश्नादिपरिपाटि नतद्वर्गे एवमेवेति ज्ञेयं तदिदं योगमायावैभवं यत्सर्वासामपि तत्र तत्र तथैव प्रश्नादिति १५ सेयं परिपाटि पुनरेवमस्मत्यागं माकुर्विति बोधनायेत्याह गोप्य ऊचुरित्यादिना तत्र भगवतोऽकृतज्ञतां तन्मुखेनैवापादितुकामा लोकवृत्तान्तमिव पृच्छंति भजतः प्राणिनः अनुतज्जनानुसारेण भजंतीति केचित् एके न द्विपर्ययं यथा स्यात्तथा अभजतोपि भजंतीत्यर्थः अन्ये उभयान् भजतश्चाभजतश्च न भजंति एतत्साधु यथा तथा ते ते के किंवा तेषां फलं तद्विविच्य कथयेत्यर्थः नो इत्यवधापयंति अनवधानव्याजेन स्वदोषं मा वंचयेति गूढाशयः १६ तदभिप्रायं ज्ञात्वोत्तरमाह मिथ इति ये मिथो भजंति तेन्योन्यं भजंते किंतु स्वात्मानमेव हि यतः स्वार्थैकस्वीयेदवफले एवैकांततउद्यमो येषां ते तत्र च सौहृदं न केतवमयत्वात् नापि धर्मः ईदृशो हि स्यात् तदाह तज्जनं स्वार्थार्थं धर्माद्यर्थतया प्रतीयमानमपि स्वप्रयोजनार्थमेव अन्यथा अन्यप्रकारेण मिथो भजनं न स्यात् यद्वा एतन्मदुक्तं मिथ्या नेत्यर्थः हे सख्य इति युष्माकमीदृशं भजनं नेति भावः १७ एवं सोपाधि भजतामुद्दिष्टयोरपि धर्मसौहृदयोः सापवादत्वमुक्त्वा निरुपाधि भजतामनुद्दिष्टयोरपि तयोर्निरपवादत्वमाह भजंतीति अभजतो ये भजंति ते द्विविधाः करुणाः स्निग्धाश्च तदुदाहरणं करुणाः पितरश्चेति तत्र यथाक्रमं धर्मः सौहृदं च यद्वा उभयमुभयत्र करुणेषु सौहृदस्यापि पितृषु पुत्रादिपालनजन्यधर्मस्यापि सत्त्वात् साध्वी भार्या सुतः शिशुरित्यादिस्मृतेः अभजंतमपि मां भजंत्यो यूयमिह स्य एवेति भावः १८ तृतीयप्रश्नोत्तरमाह भजतापीति त इमे चतुर्विधाः एके आत्मारामाः अपरे दृष्टाः केचिदात्मकामाः विषयदर्शनेपि भोगेच्छाशून्याः अन्ये अकृतज्ञाः उपकारानुपकारज्ञानशून्याः अपरे गुरुद्रुहः उपकर्तॄन् गुरूनपि स्मृताः तस्मै द्रुह्यंतीति तथा गुरूपेक्षका इत्यर्थः अतिकठिना इति भावः १९ नानाक्रीडाभिर मममाणो यं नात्मारामः आप्तकामो वा नाप्यकृतज्ञः एवमुत्तरादि चातुर्यात् अतो कृतज्ञतामात्रमापादयितुं प्रष्टः स्वमुखेनैव चरमकोटिप्रविष्ट इति संतुष्टा अक्षिसंनिकोचैः परस्परं गूढस्मितमुत्ता दृष्टाह नेति हे सख्य उक्तचातुर्विध्यरहितोप्यहं भजतोपि न भजामि तथापि परमकारुणिकः परमसुहृच्च कथं अमीषां भजतां अनुवृत्तिः निरंतरं ध्यानेतस्यवृत्तिर्यस्मात्तस्मै प्रेमप्रकर्षायेत्यर्थः एतत्सदृष्टांतमाह यथेति तस्य धनस्य चिंतया निभृतो व्याप्तः स्यात् क्षुत्पिपासाद्यपि न वेद एवं स्वस्य हिते पित्वं सर्वपुरुषार्थसारसर्वस्वस्वप्रेमादानात् भक्तप्रेमरसास्वादलोलुपत्वं च संततं तद्वर्धनत्वान्नसत्यादितिज्ञेयं २० एवं यथा धन इत्यादिप्रकारेण वो युष्माकं मय्यनुवृत्तये एवमयाति रोहितमंतर्धानेन स्थितं किं कुर्वता परोक्षं यथा स्यात्तथा वः भजतैव युष्मत्प्रेमालापादिकं शृण्वता अनुमोदमानेन चेत्यर्थः तत्र हेतुः मदर्थे उज्झितः लोकः युक्तायुक्तत्वाविचारात् वेदश्च धर्माधर्मानादरात् स्वाः ज्ञातयश्च स्नेहत्यागात् याभिस्तासां हे अबलाः इति लोकादित्यागे दुर्बला अपीति भावः तत्तस्मात् मा मां असूयितुं दोषारोपेण द्रष्टुं नार्हथ यूयं न योग्याः स्थ तत्र हेत्वंतरं प्रियं प्रिया इति यद्वा हे मायेन निषेधे तथापि प्रियं मल्लक्षणमसूयितुं मार्हथेति मा अपितु मया दत्तदुःखत्वाद् अर्हथैव यतः प्रियं प्रियायाः प्रियासु प्रियस्य तथाकर्तुमयुक्तत्वादिति भावः इयममप्येकानुनयचातुरी २१ अस्तामिदं परमार्थं तु शृणुतेत्याह नेति निरवद्यसंयुजां निरवद्या कामममयत्वेन प्रातीयमानापि वस्तुतो निर्मलप्रेममयत्वेन निर्दोषा संयुक् मद्विषयकचित्तैकाग्रता अंगसंगमो वा यासां तासां

वः स्वसाधुकृत्यं स्वीयं प्रत्युपकाररूपं विबुधायुषापि चिरकालेनापि यद्वा विगतो बुधो गणनाभिज्ञो यस्मात्तेनानंतेनायुषापि न पारये कर्तुं न शक्नोमि तत्र हेतुः या भवत्यो दुर्जरकुलत्वबद्ध
त्वेनाछेद्या अपि गेहशृंखलाः गृहसंबंधिन्यः शृंखला इव इह परत्र सुखहेतुत्वेन धर्ममर्यादाः शृंखलामिति वा क्वचित्पाठः निःशेषं छित्वा मामभजन् आत्मनिवेदनं कृत
वत्य इत्यर्थः मच्चित्तं तु बहुषु प्रेमयुक्तं नैवमेकनिष्ठमतो न पारये इत्यर्थः तस्माद्युष्माकमेव साधुकृत्येन तद् युष्मत्साधुकृत्यं प्रतियातु प्रतिकृतमस्तु युष्मत्सौशील्येनैव ममा
नृण्यं न तु मत्कृतप्रत्युपकारेणेति भावः २२ इति श्रीमद्भागवते दशमस्कंधसंश्रयः द्वात्रिंशोऽगमदध्यायस्तोषिणीसारसंग्रहे इति तोषिणीसारे द्वात्रिंशत्तमोऽध्यायः ३२ श्री
त्रयस्त्रिंशे रासलीलाजलकेलिवनकेलिभिः तस्य गोपीरतिं वर्णयिष्यन् भगवत्कृतानुनयेन तासां प्रसत्तिमाह इत्थमिति इह गीः सुपेशलाः मनोहराः वाचः श्रुत्वा विरहाकूतानवद्यो विन
श्यज्जातं तापं जहुः विरहेऽप्यपरित्यागश्रवणात् स्वस्य ऋणित्वप्रतिपादनेन पुनर्वियोगेऽप्यसंभवं त्यागशंकापगमाच्च अतः पूर्वं मुक्तोऽपि तापस्त्यागः सम्यक्कृत इति विवक्षया श्रीपुनरुक्तौ तद् अ
श्रृंगहे राजन् यद्वा तस्य भगवतोऽगेन आश्लिंगितेन संपन्नमनोरथाः यद्वा तासां गोपीनामंगैरुपचिता आशिषो यस्य तस्य भगवतः १ तत्र ताभिः सहैकमत्यसति गोविंदः पुरुषोत्तमः रास
क्रीडां कर्तुं प्रवृत्तः स्त्रीरत्नैरिति रूपादिभिः तासां सर्वोत्कृष्टत्वेन रासंसंपत्तिः प्रितैः प्रेमविवशैः अनुव्रतैः स्वाधीनैरतोऽपि स्त्रीरत्नत्वं अन्योन्यमाबद्धागृहीता चाहवः करा याभिः अन्योन्यत्वं
तासामेव न तु तेन नर्तकैर्गृहीतकण्ठानां अन्योन्यात्तकरस्त्रीयां नर्तकीनां भवेद्यासौ मंडलीभूय नर्तनमिति रासलक्षणात् २ तत्साहित्यमाह चतुर्वर्णाधिकसार्धेन रासेति रसकृद्व
युक्तः सुखमयः क्रीडाविशेषः कृष्णेन सदानंदेन निमित्तेन संप्रवृत्तः यद्वा तन्वि विततव्यर्थः कृष्णेन सम्यक्प्रवर्तित इत्यर्थः गोपीमंडलमंडित इति तासां रासशोभाविशेषहेतुत्वं कथं
कृतेन कंठगृहीतानां तेन स्वाभयतश्चाश्लिंगितानां मंडलरूपेणावस्थितानां तासां द्वयोर्द्वयोर्मध्ये प्रविष्टेन पुनः कीदृशेन येऽसर्वाः स्त्रियः स्वनिकटं मामेवाश्लिष्ट इति मन्यन्ते ते
न नन्वेकस्य कथं तथा प्रवेशस्तत्राह योगः अचिंत्याद्भुतशक्तिविशेषः तस्येश्वरेण ननु कृष्णमात्रादर्शने कथमुक्तलक्षणानेकनटवद्रासशोभादर्शने सर्वगोपीनां सर्वासां रास सु
खप्रदर्शनार्थं हि रासारंभः मैवं कयाचिन्नाट्यविद्यया गोप्यादिषु स्वतुल्यबहुवेषादिरूपया यासौ बहुत्र भाति अस्ति तु ममैव निकट इति तासां संमतमात्रं ननु कृष्णमंतरं नापश्यन्निति
अन्यथा मन्येरन् इत्यत्र यमपश्यन्निति वदेदिति अत्र च तासामानंदमोह एव मूलं अत्र द्वयोर्द्वयोरित्यनेन गोपीद्वयांतरितः श्रीकृष्ण इति गोप्यर्धसंख्याकः श्रीकृष्णमूर्तियुतं रा
समंडलमत एव कृत्वा तावंतमात्मानमिति वक्ष्यमाणेन पुनरुक्तिर्नेति तातचरणाः एकैकगोप्यंतरित इत्यपरे एतत्पक्षे पुनरुक्तिपरिहारो वक्ष्यते ३ तावत्तत्क्षणमेवौत्सुक्यमनसां
सस्त्रीकाणां देवानां विमानशतैः संकीर्णं नभो बभूव अनेन दिविता दृशोऽसंभाभावो व्यज्यते औत्सुक्यमत्र नृत्यादिदर्शने एव नरहस्यक्रीडादर्शने रासत्वात् अत्र रहस्य
लीलांशे तेषां नेत्राद्याछादनं माययेति ज्ञेयं ४ तत इति तेभ्यो दिवौकोभ्यः दुंदुभिनादो मंगलार्थं स्ववर्ग्यमेलनार्थं च नितरां पेतुरित्यनेन बहुवचनेन रंगस्थल्यां पुष्पास्त
रणं बोध्यते अमलमिति तेषां तदानीं सर्वदुर्वासनानिरासः ५ रासकृतावाद्यादिसंपत्तिमाह वलयानामिति सप्रियाणां कृष्णसहितानामिति बहुरूपस्य भगवतोऽपि
वलयादिशब्दस्तावत्प्रगोमो व्यज्यते ६ भगवान् देवकीसुतोऽपि तत्र वृंदावने यशोदासुतत्वे एव शिशुभे तत्रापि ताभिरतिशुशुभे एतद् दृष्टांतेन साधयति मध्ये मध्ये सु
जातावेकत्वं एवं मारकत इत्यपि मेघचक्रे इत्याद्युक्तेः हैमानां मणीनां मध्ये मध्ये महामारकतनीलमणय इव यथा नीलमणेर्हैममणिमध्यवर्तितयैव शोभाधिका
तथा तस्यानेकधा भूतस्य स्वर्णवर्णाभिस्ताभिराश्लिष्टस्य शोभातिशय इत्यर्थः अत्र मध्यपदेन मंडलमध्यगतं मध्यं मध्यशंकुस्थानमपि तत्र स्वयं भगवान् रा
धयाश्लिष्टो वेणुं वादयन् परितो भ्रमन् रासमंडलमस्वर्थं मंडयामासेति ज्ञेयं इत्थमाकल्पिते मंडले मध्यगः संजगौ वेणुनादे देवकीनंदन इति बिल्वमंगलोक्तेः कृ

श्री

मदीपिकायां शंकुस्थानीयस्य तरुण्यालिंगितोऽत्रेश्च ७ सतामिरिव ताश्चपि तेनात्यर्थं रेजुरित्याह पादन्यासैरिति पादानान्यासैर्नृत्यगतिविशेषैः भुजविधुतिभिः अन्योन्या
बद्धबाहुत्वमुत्सृज्य अभिनयार्थं कृतैः करचालनैः सस्मितैः भ्रूभंगविलासैः काञ्च्यां तु कुटिलीभवन्मध्यगैः चलत्कुचैः पटैश्च गंडेषु चंचलैः कुंडलैः स्विद्यंति स्वेदबिं
दुलंकृतानि मुखानि यासां कबरे पुरश्लथनासु च दृढांगबंधयोर्यासां ताः तत्कृष्णं गायंत्यो विरेजुः तत्र नानामूर्तिः श्रीकृष्णो मेघचक्रमिव गोप्यस्तडित इव स्वेदस्तुषार इव गीतं ग
र्जितमिवेति ज्ञेयं तडिद्दृष्टांतसूचितं तासां स्वाभाविकं संबंधं व्यनक्ति कृष्णमवध्य इति ८ तासां नृत्यस्य भरमुक्ता गानस्याप्याह उच्चैरिति नृत्यमाना इति नृत्यकालेपि गा
नं त्यानत्याक्षः यद्वा तच्छील्यादो चारेणेयेद्वा नृत्येन मानः श्रीकृष्णकृतो यासां स्निग्धकंठ्यः गानादिप्रयोजनमाह रतिः श्रीकृष्णकर्तृका प्रीतिः प्रिया यासां न च गानादि
श्रमः यतः कृष्णस्याभिमर्शेन मुदिताः अयं गानादावपि हेतुः गीतस्योच्चैस्त्वमाह यद्गीतेन विश्वं व्याप्तमिति यद्वा यद्गीतेन स्वयं कल्पितरागसमूहेन षोडशसहस्रसंख्या
तेन विश्वमावृतं तदनुसारि गानपरं जातमित्यर्थः ९ एवं वृत्तासां प्रेमचेष्टितानि सार्धपंचाभिराह काचिदिति मुकुंदेन सहेति तस्याप्राधान्यं स्वरजातीः षड्जादिस्वराला
पगतीः अमिश्रिताः कृष्णोन्नीतानि रसंकीर्णाः उन्निन्ये उत्कृष्टं कल्पयामास ततश्च प्रीयमाणेन तेन साधुसाध्विति संमानिता विस्ताहर्षेण इयं राधासखिल्लिता १० त
दित्यर्धकं काचिदेव केवलरागमयं प्राधम्यादादितालमयं वा गीतं ध्रुवं ध्रुवाख्यं तालविशेषं कृत्वोन्नीतवती तस्यै विशाखानाम्नी राधासखैव एवं तो यथा न वति तथा मानमदा
त् मुकुंद इति शेषः एवं गानप्राधान्येन प्रेमोक्त्वा कांचित्संभोगप्राधान्येन अतिप्रीतिविलसितान्याह काचिदित्यादिना पार्श्वस्थस्य स्वनाया समग्रहणे गदान्तरदृष्टे ताधिप
त्कुंचितां गदाकारां यष्टिं बिभर्त्ति यद्वा गदति वर्णानीति गदा वंशी बिभर्तीति मध्यशंकुस्थानीया मूर्तिर्व्यंजिता सौकुमार्यात् श्रमकार्श्येन श्लथंतो वलयाः गलत्स्या मल्लिकाश्च
कबरस्था यस्याः सा विश्रमाय स्कंधं जग्राह एवमस्याः स्वाधीनभर्तृकात्वं मध्यस्थितात्वं च दर्शितं तस्माच्छ्रीराधिकेयं ११ शोभाविलासमाह तत्रेति स्वकंधस्थितं स्वभावत एवो
त्पलतोप्यधिकं सौरभं यस्य तं तत्रापि चंदनालिप्तं बाहुं चुचुंब नेहेतुः हृष्टरोमेति प्रेमविवशोस्यर्थः तद्रोम्णामपि हर्षो वक्तुमशक्यः किं पुनस्तस्या इति श्लेषेण व्यज्यते प्रागल्भ्याख्या
नुभावोयं स्थितिः त्रांकृत्य प्रयोगे बुद्धेरुक्ता प्रगल्भना इत्सक्तेः १२ शोभ्याविलासमाह कस्याश्चिदिति नृत्येन विक्षिप्ते चंचलेत्कुंडले च स्वाभाविकिगंडस्थिते च तत्समाहारः त्विषं
तेन मंडितमिति भाति स्वगंडे न श्रीकृष्णगंडे नृत्यश्रमव्याजेन संदधत्याः संयोजयंत्याः प्रादात् तन्मुखं स्वमुखसंमुखं कृत्वेति भावः १३ कूजंतिनूपुरे मेखला च यस्याः सा नृ
त्यंती काचित् गायंति च काचिदिति काचित्सदा कृत्वा हृद्वेत्येये तत्र का कद्धस्तोत्कामभादंजलिना जग्राहेत्यर्थः काचित्तु स्तनयोर भास्थापितवतीत्यर्थः आद्या चेद्भावत्वी पूर्वं वद्धस्त
ग्रहणानुसारात् द्वितीयात्तस्यवीप फातत्साहचर्यात् स्तनयोर्धारणरूपपूर्वसाम्याच्चेति भाति पार्श्वस्थाच्युतस्य पार्श्वभागमत्यजस्तस्य हस्तस्त एवाक्रांतापहारित्यात् अतःशि
वेश्चांतासती अधात् तावगोपनार्थं श्रमशांत्यर्थमिवेत्यर्थः अष्टमी विष्णुपुराणे काचित्सप्रेल्लसद्बाहुः परिरभ्य चिचुंबतं गोपीगीतस्तुतिव्याजनिपुणामधुसूदनमिति श्री
जयदेवचरणास्त्विदं राधाया एव चेष्टितं विष्णुपुराणे संगृहीतमिति रासोल्लासभरेणेति श्लोकेन व्यंजयामासुः १४ एवमन्या अपि विविधं विजह्रुरित्याह गोप्य इति अ
च्युतं कांति गुणेविच्युतिरहितं श्रियापि अत्यंतवल्लभं प्रेमविषयं न त्वेवं लब्धं तं कांतं पतिं लब्ध्वा यद्वा श्रियः कांतमपि स्वस्य कांतं वल्लभं निरतिशयप्रेमकर्तारं लब्ध्वा
विश्लेषभियातेन स्वदोर्भ्यां गृहीतकंठ्यः अत आनंदेन गायंत्यो विजह्रिरे एवं श्रीतोप्यधिकसौभाग्यमासामुक्तं नाथश्रियोंगवनितांतरतेः प्रसाद इति १५ तत्र गायकवा

दकेषु सस्त्रीकेषु गंधर्वा रसावेशेन मुह्यंत्यत्र अन्यामेव वाद्यादिसंपत्तिं दर्शयन्नुक्तं सौभाग्यस्पर्द्धयति कर्णेतिद्वाभ्यां स्पर्द्धयति कर्णोत्पलैश्च अलकविटंकैः कुंटिलकुंतलालकैः क-
पोलैश्च घर्मैश्च वक्त्रेषु श्रीः शोभा यासां ता इति रासश्रमेपि शोभोक्ता श्रमेपि शान्तत्वे हेतुः भगवतासममिति तत्साहित्येनोल्लसिता चलन्नूपुरे घोषाः किंकिण्यस्तद्रूपैश्च वाद्यैः भ्रम-
राएव गायका यस्यां तस्यां रासभायां नन्ततुः स्वकेशाभ्यस्रस्तास्रजो यासामिति नृत्यगतिसंक्षुब्धाः केशाः स्रस्ताः स्रजः पादेषु पुष्पवृष्टिमिव चक्रुरित्युत्प्रेक्षा भ्रमराणां तत्तदु-
चितगायकत्वेन लोकविलक्षणत्वं भगवता सहेति तासां तत्सदृशवैदग्ध्यादिकं च व्यंग्यं १६ रमायाईशः प्रभुरपि व्रजसुंदरीभिरेवैवं रेमे न तु तयेति तासां रमातोपि प्रेमाधिक्यं सूचि-
तं एवं पदार्थमाह परिष्वंगेति आश्लेषश्च तासां करस्पर्शनं च तन्मुखादीनां सप्रेमावलोकनं च उद्दामविलासस्तनस्पर्शादिश्च भावव्यंजकं स्मितं च तैः ननु तत्प्रेम्णा रमतां नाम स-
र्वोत्कृष्टगुणलावण्यतो भगवतो हृमेव न सदृश्यः ताइत्याशंक्य तत्पत्नीभावयोग्यताबोधनाय तासां सर्वकलाकौशललावण्यमाधुर्यादिकं स्वपतितुल्यमेव न विलक्षणमिति
दृष्टांतेन व्यंजयति यथेति कश्चिदर्भकः स्वप्रतिबिंबैर्विभ्रमो यस्य स्वतुल्याभिः स्वप्रतिबिंबमूर्तिभिरमते तथासौ गुणलावण्यादिना स्वतुल्याभिः स्ववधूत्वयोग्याभिः
ताभिरेमेइत्यर्थः अतएव पूर्वं गोपवध्वइति वक्तव्ये कृष्णवध्वइत्युक्तं सर्वमिदं सौंदर्यादिकं स्वीयमेव तासु संचारितमिति दृष्टांतव्यंग्यमिति स्वामिपादाः यथोक्तं श्रियप्रति-
बिंबद्वारेव स्वस्य मुखमाधुर्यमनुभवति तथा भगवानपि तादृशस्वप्रेयसीद्वारेवेति व्यंग्यमित्येके १७ ततस्तासामानंदवैवश्येन रासविरामोजनीत्याह तदिति तस्यांगसंगेन क्र-
मेण प्रकर्षंगतामुन्मीलितिस्तया विवशेंद्रियाः तदेवाह केशानित्यादिना दुकूलं परिधानीयं कुचपट्टीकामुत्तरीयं कंचुकीं वा विभ्रष्टथान्यता न्यंजसा प्रतिव्योढुं यथापूर्वं धर्तुं न
समर्था व्रजस्त्रियः विस्रस्तानि मालाआभरणानि यासां ताः १८ किं वाच्यं ता अकुलेंद्रियाइति तद्दर्शनमात्रेण देव्योपीत्याह कृष्णेति भगवतोभिनवक्रीडादासभावप्रेममयप्री-
त्या दृष्ट्वादेवादिस्त्रियः निजायोग्यत्वादिविचाररहित्याद्भगवद्विषयककामेन परिपीडिताः संतो मुह्यन् चंद्रादीनां स्तब्धत्वं व्यंजयितुं तत्र हेतुमुत्प्रेक्षते विस्मितइति प्रायोनिशा-
नाथेन गतो विस्मृता यां ततः प्राक् स्थितामहास्तत्र तत्रैव तस्थुरित्यतिदीर्घासु रात्रिषु यथासुखं स्वच्छंदविहारसिद्धिरिति भावः वस्तुतो नायं हेतुः तेषां ज्योतिश्चक्राधीनगतित्वा-
त् स्वगतेरस्य त्वल्पत्वात्प्रतिलोमत्वाच्च तस्मात्तल्लीलामाधुर्येण नदीप्रवाहस्येव सवायुकस्य शिशुमारचक्रप्रवाहस्यैव स्तब्धत्वं प्रतिपादितमिति ज्ञेयं १९ अथ रासानंत-
रं विश्रम्य कृतां रहस्यलीलामाह कृत्वेति द्वाभ्यां यावतीर्यावत्यो गोपजातीयायोषितस्तावतीरात्मकृतीः कृत्वा श्रृंगाररसलीलया राराम रेमे रासकालएव प्रतिगोप्येकः कृष्णइति
मते च पुनरुक्ति रासविश्रमसमयएकीभूतत्वं कल्पयित्वा परिहरणीया रमणं चेदं पृथक्कुंजादिषु ज्ञेयं २० रतिविभ्रमेथो रमणं तन्मयेन विहारेण अतिविहारेत्यपि पाठः
वदनानि प्रामृजत्स्वेदापसारणालकसंवरणादिना उज्वलयामास आदौ मार्जनं तच्च प्रकर्षेण तदपि कारुण्यकृतं तत्रापि स्वपाणिना तत्रापि शंतमेन स्पर्शमात्रेण स्वभावातः
सुखकरेण तत्र कांतोचितप्रेमविशेषेणेति परमसंतोषेणमुक्तं २१ ततोतिहृष्टास्तं प्रहर्षयामासुरित्याह गोप्यइति स्फुरतां कनककुंडलानां कुंतलानां च त्विषा या गंडश्री-
स्तयेति सुंदरयातत्या सुधितेन अमृतायितेन सहासावलोकनेनेति मनसा भावविशेषेण ऋषभस्य पृष्ठः श्रीकृष्णस्य मानं पूजां कुर्वत्यः यद्वा मम हृत्स्याव ध्वइति गर्व-
मर्पयंत्यइव तत्कर्माणि जगुरिति वाचेति त्रिधा प्रहर्षणमुक्तं पुण्यानि चारूणीति गाने हेतुः तस्य नखैः स्पर्शेन प्रमोदो यासामिति गानप्रवीणा अपि कथं कृतमौनाइति
प्रणयकोपेन नखैर्गानि प्रवर्तना तासां प्रमोदइति भावः हेलाख्यानुभावोयं मनोविकाराख्यभावसूचको हावइच्यते हावएव भवेद्धेला व्यक्तश्रृंगारसूचकइत्युक्तेः २२

अथ तस्य भगवतो जलकेलिमाह ताभिरिति द्वाभ्यां तासामंगसंगेन घृष्टा मर्दिता या स्रक् कौंदी तस्या अतएव तासां कुचकुंकुमेन रंजिताया: संबंधिभि: गंधर्वपा: गायनश्रेष्ठा: आल
यो ऽलिमरास्तैरनुद्रुत: स ऋषभ: यद्वा या: गोप्य: भगवदंगसंगेन घृष्टा: स्रजो यासां ता: अथ च स्वकुचकुंकुमरंजिता: रतिलीलावेशेन सर्वांगसंसक्तकुंकुमा: ताभिर्युत: तासां श्रममपने
तुं स्वयमपि श्रांत: सन् यामुनं वा: जलमाविशत् श्रांतत्वे हेतु: भिन्न: सेतु: रतिमर्यादा येन स तल्लीलो द्रुम इत्यर्थ: गजो पि विविदारितवप्रतया श्रांतो भवति सकुचेति स्वकुचेति पाठे २३
सलीलाकौतुकी युवतिभि: जलक्रीडायां पटुतराभि: अंभसि इतस्तत: सर्वदिक्षु जलै: सिच्यमान: प्रेम्णोक्षित: सप्रेमेक्षणे नांतरपि सिच्यमान इत्यर्थ: अत्र गोपिपुरे मतथांतर्बहि
स्ता अपि स्वयं सिंचति स्मेत्यर्थ: गजेंद्रस्येवास॰ क्ति मैथीलीलायस्य देवै: सदा सर्वत्र स्तूयमानतया प्रशस्तो य: २४ वनक्रीडामाह ततइति स्वजलक्रीडानंतरं जलस्थलप्र
सूनानां गंधो यत्र तेनानिलेन जुष्टानि दिशा: तटं स्थलं च यस्मिन् तस्मिन् यमुनायाउपवने चोरे चचार क्रीडे इत्यर्थ: भृंगाणां प्रमदानां च गणै: आवृत: इति अंगसौरभ्यलावण्ययोर
ति: गजो पि मदच्युतया भृंगावृत: आसक्तो करेणुभि: २५ एवं प्रथमरात्रिकृतरासक्रीडामुक्त्वा तुक्तं संगृण्हन् अन्यरात्रिषु तत्प्रकारमतिदिशन्नुपसंहरति एवमिति प्रतिश
रदं चंद्रांशुरम्या: सर्वा एव निशा: सिषेवे शारत्संबंधिन: काव्येषु कथ्यमाना ये रसास्तेषामाश्रयभूता निशा: यद्वा निशा इति अत्यंतसंयोगे द्वितीया निशा: व्याप्य शृंगाररसाश्र
या: शरत्काव्यकथा: शारदिसर्वदेशकालकविभिर्या वर्णयितुं शक्यं तेतावती: कथा: सिषेवे आचचार यद्वा ज्योत्स्नावती: सर्वा वसंतादिनिशा अप्येवं सिषेवे तथा शार
द: संवत्सरस्य या: काव्यकथा: पूर्ववदनेता ताश्च सिषेवे किंतु रसाश्रया एव न तु विरसतया कविवर्णिता अपीत्यर्थ: आत्मनि मनसि अवरुद्धा: स्थापिता: आध्माता इति यावत् सो
रता: सुरतसंबंधिन्यै: न: तासां स्त्रीभावादयो येन अत्र हेतु: अनुरत: अनुरक्त: स्त्रीगणो यस्मिन् तासां प्रेमैवात्र हेतुर्न काम इत्यर्थ: यत: सत्य: काम: भक्तमनोरथो यत्र यद्विष
य: स: यद्वा अन्यविषयको पि काम: सत्यो यस्मात् सो ऽरतं चरमधातुस्खलनं तदवरोधोक्त्या काजेयान्ति रितिस्वामिचरणा: २६ वंशीवादैररण्ये व्रजयुवतिजनाकर्षणं भाषणं तत्क्री
डावध्वा सहांतर्धिरिह युवतिभिर्मार्गणं चारुगीतं प्रादुर्भाव: सुपृष्टोत्तरनटन रह: क्रीडनानि प्रमोदो वारि क्रीडा वने थो विहरणमियति श्रीमतीरासलीला १ रासलीलाश्र
वणेनांत: सुखं तु दिल्लोपि केषांचित्संदेहं वितर्क्य स्वसंदेहव्याजेन त्रिभि: पृच्छति संस्थापनायेति युग्मकं सम्यक्स्थापनाय प्रवर्तनाय रक्षणाय च प्रशमाय सवासनोन्मूलनाय यो
वतीर्ण: हि प्रसिद्धं धर्मसंस्थापनार्थ यस्यादो अंशेन बलदेवेन सहेति तत्र धर्मसंस्थापना दिवाग्रह: यद्वांशेन यो जगदीश्वर: मायोपाधिकईश्वरो यदंश इत्यर्थ: २७ स: धर्मसे
तवो वेदादिनिबंधा: तेषां वक्ता च कर्त्ता दक्षकर्त्ता धर्ममनुतिष्ठन् अन्यथोक्त्या चरणयोर्विसंवादेन लोके ऽनगत्स्थेत किंचाभितो रक्षिता तत्प्रतिपक्षवधादिना वर्धक: पालक
श्च परदाराभिमर्शनरूपं महासाहसिकं धर्मसंस्थापनादे: प्रतिकूलं च कथमाचरत् न चेशाचेष्टितं कथं मयाज्ञातुं शक्यं तत्राह हे ब्रह्मन्नेतन्नस्ते सर्वज्ञ इत्यर्थ: २८ आप्तका
मानां नाधर्मस्पर्श इति चेत् तर्हि कामाभावान्निंदितं केनाभिप्रायेण कृतवानिति पृच्छति आप्तकाम इति कृतवान् दृशां कैमी चेदाप्तकामोपि धार्मिकाणां यदूनां पतिरपि च न स्यादि
ति भाव: क: अभिप्रायो यस्य स कृतवान् यद्वा किं कुत: कृतवान् एतं प्रायो बाहुल्येन न: इति करचालनेन संदेहिवर्गनिर्देश: संशयं सर्वज्ञाचरिते च शास्त्रविरुद्धत्वाभ्यां
च्चितांदोलन अभिसंदिहानेभ्यो नयममस्वा संशयं खल्वाछिंधीत्यर्थ: हे सुव्रत ब्रह्मचर्यादिनिष्ठ भवादृशाचारविरोधस्तत्को पश्य स्यादिति भाव: २९ भगवति
के मुख्येन परिहर्तुं साधारण्येन महतां वृत्तमाह धर्मेति ईश्वराणां कर्मादिपारतंत्र्यहीनानां ब्रह्मेंद्रबृहस्पतिविश्वामित्रादीनां धर्मातिक्रम: साहसं च वीक्ष्यते तच्च
३०

षां तेजीयसां प्रत्यवायाय न भवति वन्हेः सर्वभुक् यथा नापवित्र्यायेति ३० तर्हि महदाचरणप्रामाण्यादन्योपि करोतु तत्राह नेति देहादिपरतंत्रः धर्मातिक्रममयं महतां चरितं
नाचरेत् मनसापि कुतः वाचा कर्मणा वा मौढ्यात्तेषामैश्वर्यं स्वस्यासामर्थ्यं चाजानन्नित्यर्थः अरुद्रः शिवभिन्नः विषमाचरन्नदन् यथा लोकहयान्नश्यति नश्यत् ईश्वरस्तु प्रस्कृतै
श्वर्यं प्रकाशस्य नीलकंठवत् शोभत एवेति भावः ३१ तर्हि सदाचारप्रामाण्यं व्याहतं तत्राह ईश्वराणामिति सत्यं प्रमाणमतस्तदुक्तमाचरेत् आचरितं तु क्वचित् प्रामाण्य
नमात्रं अनस्तेयत्स्ववचसा अविरुद्धं तदेवाचरेत् बुद्धिमानिति एवमविचारे निर्बुद्धिरित्यर्थः ३२ ननु तेपि स्ववचोविरुद्धं किमित्याचरंति तत्राह कुशलेति निरहंकारिणामहं
काराभावेन कर्मणि निरलेपा इत्यर्थः यस्य नाहंकृतो भाव इत्यादिवचनात् प्रमाणयितुमेवेति भावः प्रभो बोद्धुं समर्थ ३३ जीवानामपि निरहंकारतामात्रेणानर्थाभावस्तदा कुतो
भगवतो न ० र्थशंकेत्याह किमुतेति परमेश्वरस्य पुण्यपापाभ्यां संबंधः किमुत सुतरामेव न विद्यत इति पूर्वेणान्वयः सर्वनियंतुर्जडेन कर्मादीनां नियमनासंभवात् इति भावः ब
लवत्सुष्ठु किमुत सत्सतीवचनिर्भरे इत्यमरः ३४ एतत्कैमुत्यांतरेण स्फुटयति यदिति यस्य पादपंकजयोः पुरागानां कांतिरेणुना मनुध्यानेन तत्प्रा अन्यत्रात्मबुद्धय स्तत्प्रेम
पूर्णाः तथा योगस्य साधनभक्तेः ज्ञानयोगस्य वा प्रभावेण ध्वस्तकर्मबंधाश्च स्वैरं चरंति अविहितमपि कुर्वंति तत्र च बुध्यमाना न भवंति भक्तेच्छामात्रेण न कर्मपारतंत्र्येण तंल्लो
के प्रकटितं वपुर्येन तस्य न कुतोपि बंधशंकेत्यर्थः अतो भक्तविशेषानुग्रहाय दुर्वासः पराभवादाविव क्वचिन्मर्यादामप्यसौ लंघयतीति भावः ३५ एवं गोपीनां परदारत्वमं
गीकृत्य परिहृतं तत्र च जारकुलटादिशब्दव्यवहारः स्यात्तमप्यसहमानस्तत्परदारत्वमेव खंडयति गोपीनामिति योंतश्चरति अध्यक्षो बुध्यादिसाक्षी तत्प्रेरकः परमात्मेत्यर्थः
न तस्य परो नाम कश्चित् के वा परदाराः तस्यैव तत्पतिद्वारा सदैव सर्वस्त्रीभोक्तृत्वादिति भावः ननु परमात्मा निराकारः श्रूयते तत्राह स एव क्रीडनेनैव हेतुना इह निजदेहप्रकाश
क इत्यर्थः एष क्रीडनदेह इत्यपि पाठः यद्वा यः सर्वेषां देहिनामंतश्चरति स परमात्मैव गोपीनां सुरांगनावतारत्वेनोक्तानां सामान्यानां तथा तत्पतीनां तासु मुख्यानां तद्विशेषाणां
अध्यक्षः राधाद्यानां च मुख्यः पतिः न तु लोके पतित्वेन प्रसिद्धास्ते इत्यर्थः ताभिस्तेषां मनसापि तत्त्वाभावात् तैः सहसंभोगाभावस्योपपादितत्वाच्च न तेपतयः नहि बलाद्विवाहितानां
मसंभुक्तानां दारत्वसिद्धिरन्यस्मै दानविधानाद्दत्तो न तासां परदारत्वं व्रतप्राप्तवराणां अनूढानां तु नतरामिति भाव इति भातितेषां तासु व्यूढता भ्रममात्रमिति प्रकारांतरं तु पर
तरपद्ये स्पष्टी भविष्यति न च तथापि विष्णुरूपत्र रतिं तत्र च क्रूरकर्मा सास्थिमयदेहासु तासु चिदानंदमूर्तेस्तस्य रतिर्जुगुप्सितेति वाच्यं मुकुंदस्पर्शनात्सद्यो बभूव प्रमदोत्तमोस्क
क्तरीत्या तत्स्पर्शनादिना तदैव स्पर्शमणिलोहन्यायेन तद्रतियोग्यदेहात्वल्लक्षणप्रमदोत्तमात्वं प्राप्य तत्क्रीडायोग्यता जातेति सिद्धांतात् ३६ नन्वाप्तकामस्य कुतः क्रीडने प्र
वृत्तिः कुतस्तरां लोकदृष्ट्या विगीते तत्रेस्य तत्राह अन्विति भक्तानां विषयी मुमुक्षु मुक्तानामनुग्रहाय तादृशीः सर्वचित्ताकर्षिणीः क्रीडाः करोति याः साधारणीरपि किमुत
रासलीलामयीः श्रुत्वा मानुषं देहमाश्रितः सर्वोपि मुक्तमारभ्यातिबहिर्मुखकामिपर्यंतस्तत्परो भवेत् कामिनोपि स्वपरान्कर्तुमिति भावः भक्तानामिति पाठे युक्तास्त्रिविध भ
क्तानामित्येवार्थः देहमास्थित इत्यपि पाठः यद्वा मानुषं सर्वमनुष्यसंबंधिनं देहं भूर्लोकं यस्य पृथिवी शरीरमिति श्रुतेस्तत्रापि शरीरशब्दप्रयोगात् आश्रितः तत्राविर्भूतः स
न् भगवान् तादृशीः क्रीडा भजते याः श्रुत्वा स्वयमपि तत्परो भवेत् यद्वा यदा भक्तैर्गीयमानाः शृणोति तदासक्तो भवति किमुत मुक्तादिकामिपर्यंत इत्यर्थः उक्त एव भावः ३७
ननु नेयं क्रीडा तत्परत्वापादने नु सर्वभक्तानुग्राहिका व्रजौकसामसूयोत्पत्त्या तत्परत्वासंभवादत आह नेति व्रजौकसः स्तासां पतिपित्रादयः खलु निश्चये कदाचिदपि कृ

९८

दृमायनास्ययन्तिस्यर्थः दारान्नित्युपलक्षणं यतः स्वस्वदारदुहित्रादीन् स्वसंनिहितान् मन्यमान्येनानित्यर्थः ननु तथाप्यनुगतानां सेवकादीनामज्ञानतो ज्ञानतामपिवा
दारसंतोगोनसंभज्ञसइत्याशंकायामाहुस्त्याबाक्य भेदेनानेनेवोत्तरंतस्य दारान् स्वान् स्वान् स्वस्वदारान् मन्यमानानित्यर्थः उभयत्र हेतुः योगमायया मोहिता इति अयं भावः भ
वत्प्रेयस्यस्तानतेषां दारा। विवाहकाले योगमायाकल्पितानामन्यासां तत्सदृशीनां तैः पाणिग्रहणात् अतस्तासु तेषां मूढानां त्वं... स्या दारत्वमननमात्रं रासलीलानिशासु तत्स्व
वीपरनिशासु च संतताकल्पितछायाख्यसूर्यभार्यावत् योगमायाकल्पिता अन्या एव स्वपार्श्वस्था जनुभूयता एवमाइति मेनिरे इति न किंचिदसमंजसं ३८ एवं प्रासंगिकमुक्तोप
संहरति ब्रह्मेति सुरवामृतसिंधुं तमवगाह्याप्यत्सागृहान्नेनिच्छन्त्योपिययुः तेन सह व्रजनिकटमागत्य स्वस्वगृहमार्गान् जग्मुः तत्र हेतुः ब्रह्मरात्रे ब्राह्ममुहूर्ते प्राप्ते तत्कालस्य गृहाव
स्थितियोग्यत्वात् तदर्थस्य तस्य सर्वस्य पुनः कथमपेक्षातआह वासुदेवेन सत्वं विशुद्धं वसुदेवशब्दितमित्युक्तेः प्रेम्णा तासां विशुद्धं चित्तमधितिष्ठता तेनानुमोदिताः पुनः संगदानप्र
तिज्ञास्तुत्यादिभिः प्रत्येकमनुनयनकारितानुमोदना इत्यर्थः भगवान् प्रियो यासां भगवतो वा प्रिया इति तत्प्रीत्यर्थं स्वयं वियोगदुःखं सहंते स्म न तत्सकोचनरूं शमिति भावः ३९
रासलीलाश्रवणादेः कामप्रत्वेन भगवत्प्रीत्यावहत्वेन च तल्लीलाया भक्तिमयत्वं व्यंजयन् श्रोत्रर्ल(?)नाशिषप्युन्निवस्वाभाविकं फलमाह विक्रीडितमिति विश्वासान्वितत्वं चित्तावेशार्थे
नैरंतर्यार्थं च निरंतरं श्रृणुयात् र अनंतरं स्वयं वर्णयेच्च भक्तिं प्रेमलक्षां अचिरेण धीरः सन् हृद्रोगं कामामितिप्रेममय भगवद्विषयककामव्यावृत्तिः आशु सजति यद्वा कामं यथेष्टं आ
शु न किल लब्ध्वा कामादिसर्वं हृद्रोगमचिरेण हिनोतीत्यर्थः ४० सकृत्तोषिणीग्रंथास्त्रेमामृतसंस्थितेः मयोध्दृता भावमुक्ता भूषयेत्पापिकापतिः १ पंचाध्यायिरासपराव्याख्यानेतियथा
मति श्रीमत्कृष्णशिरोरत्नानंतोपाध्यायसूनुना २ नवेतितोषिणीव्याख्यातथा श्रीस्वामिनिर्मिता तत्संग्रहे निष्क्लेयत्रश्रितोहं सतुष्यतां ३ इतिश्रीमद्भागवतदशमस्कंधप्रश्नगः त्रयस्त्रिंशात
मोध्यायस्तोषिणीसारसंग्रहे १ इतित्रयस्त्रिंशोध्यायः ३३ कामवशः कामवशान् भजतोऽपि तल्लीलयापिकामवशान् युक्तो हि बहुव्रीहिस्तत्पुरुषं जनयते बहुव्रीहिं १ अथरासलीला
तुल्यां शंखचूडवधावसानामन्यां लीलां वकुं मध्ये जातत्वेन क्रमप्राप्तमहिम्नस्तनंदमोचनं शापप्राप्ताहिदेहतो विद्याधरमोचनं चाह एकदेति रासानंतरं शिवरात्रिरं चतुर्दश्यामित्यर्थः
देवस्य श्रीशिवस्य यात्रायां गोपालेन व्रतादि विधायकवेदपालकेन श्रीकृष्णेन हेतुना आजातकौतुकास्तत्प्रवर्तिता इत्यर्थः तेनंदादिगोपाः अनोभिर्दीनार्थं बहुद्रव्यनयनायेति भावः अंबि
कावनमिति प्रसिद्धं शिवक्षेत्रं १ प्रभुं विभुमिति पाठो कृष्णमनत्यादिष्टदानसमर्थमित्यर्थः हेनृप ते इतिरासलीलासमाहितमवधापयति २ गावो गाः मधुमधुरं मध्वन्नं मधुसहितान्न
माहृताः तत्तीर्थस्थैः देवः शिवो विद्युर्वा ३ जलमात्रं प्राश्य यतो गृहीतव्रताः तां रजनीं शिवरात्रीं अत्यंतसंयोगे द्वितीया ऊषुर्न्यवसन् सनंदो नंदानुजः संज्ञायां कन् ४ द्वितीयदिने पारणो
त्तरं रात्रिवृत्तमाह कश्चिदिति न चेदं शिवरात्रिवृत्तं तत्र जागरविधिविरुद्धशयनासंभवात् अहिः अजगरः उरगः उरसा गच्छन्नित्यज्ञानहेतुः हेत्वंतरं शयानमिति पूर्वरात्रौ जाग
रोपवासादिना अतेर्गाढंनिद्राणमित्यर्थः अमसीच्चरणयोर्ग्रसितुं प्रवृत्तः ५ ग्रस्तः पदयोरेवावीप्साग्रासात् तातेति स्नेहात् अतएवाह प्रपन्नत्वं कृष्णत्वेन पुत्रस्य तव रक्षणवर्ग
गतं परिसर्वतो मामोचय संसर्गिणो मीत्यर्थः महानिति सीघ्रामम नाश्य कालीयदमनं मध्येदं प्रार्थितमिति ज्ञेयं ६ अजगरस्य ग्रस्तापरित्यागस्वभावाशंकयोल्मुकैर्ज्वलत्का
ष्ठैरेव ताडयामासुः ७ कृष्णसंकोचाद्यस्य वर्गे दूरे स्थितस्तदनंतरमत्येत्य ससंभ्रमन् गाछन्नमत्येव पादेनास्पृशादेव न तु जघान स्पृष्टसाधुपादस्य पादताडनानौचित्यात् इदम
त्रतात्पर्यं कथंचित् साधुपादस्य स्पर्शात् श्रीकृष्णेमदर्शनं ग्रस्तश्रीनंदपादस्य स्वद्वेषस्याप्यहेर्यथा ८ श्रीमतः सर्वसंपन्निधानस्य पादस्य स्पर्शस्वभावेनैव हतानि अशुभा
नि महद्वज्ञादीनि बहुजन्मसंचितानि चयस्यसः इदं तु न चित्रमित्याह तेजेइति सर्पवपुः सर्पाकारमेव हित्वा तेनैव वपुषा विद्याधराकारं तेजे ध्रुवसेरं ध्यादिवदित्यर्थः

९८

विद्याधरे पुत्रैरेवार्चितं इति सर्वरूपतोपि विशेष उक्तः ९ गोपे पुनिजैश्वर्यं व्यंजयितुं स्पृशेकेशः सर्वज्ञोपि तमपृच्छत् सम्यक् बद्धांजलिरित्यादिना वस्थितं भास्वरवपुषोपलक्षि
तं हेमकिरीटादि रूपितं १० अद्भुतदर्शनः श्रुमदर्शन इति पाठो कोभवान् यः परया श्रिया प्रकाशते स एतां माजगरीं गतिं कथं वा प्रापितः केनेति शेषः ११ तस्य स्पर्शप्रभावेण तस्य भ
क्तिरप्युत्पन्नेति व्यंजयति सर्पउवाचेत्यादिना देव देहोपि सर्पतां निर्दिशः सर्प देहाभेदविवक्षया तद्देहस्यैव विद्याधराकारत्वात् कश्चिदिति विनयः श्रिया रूपसंपत्त्या च विशिष्टः
अचरं भ्रमन्नास १२ विरूपान् तपः कार्श्यादिमतः प्राहसं उपहसितवानस्मि प्रलब्धैरुपहसितैस्तैः स्वेन पापेनेति प्रलब्धे हेतुः १३ अहो दुर्वचो महत्प्रभावो येन मत् दुष्कृतमपि स्
कृतमभूदित्याह शापइति करुणात्मभिरिति दीनोद्धारव्यग्रत्वं एतेन श्रीकृष्णपादस्पर्शो तमंगलं भावीति तेरुक्तमिति निश्चेयं मत् यतः शापात् पदाश्रीचरणेनेति दौर्लभ्यं पादेति पा
ठांतरं १४ शापनिर्मुक्तोहं त्वा पृच्छे स्वलोकान् गंतुमनुज्ञां याचे ननु मोक्षं कुतो न याचसे तत्राह भवेति भवभीत्या मनसापि शरणागतानां संसारभयापहस्त्वं अस्माकं तु साक्षा
त्वत्पादस्पर्शो नाम यत्नसिद्धो मोक्ष इति भावः अमीवहन् भवदुःखनाशन १५ किंतु त्वत्प्रपन्नतेव ममेष्टेत्याह प्रपन्नोस्मीति प्रपन्नोहमित्यपि पाठः प्रपन्नता दुर्लभेति चेदाह
महायोगिन् अचिंत्यैश्वर्य यतो महापुरुष परमेश्वर विशेषतश्च सतां पते देववृषभेति पाठो एतन्मनोरथपूरणं न दुःशकमिति भावः अतः कृतार्थं मां स्वलोकगमनायानुजानी
हि ननु प्रपन्नतेच्छा लोकगमनेच्छा चेति विरुद्धं तत्राह सर्वलोकेति सल्लोकोपि त्वदीय एवेति भावः १६ त्वन्माहात्म्ये चाधुनैवानुभूतमित्याह अस्तेसद्यः केन विनिर्मुक्तमिति पा
ठे पूर्वेणान्वयः १७ किंचत्वसादस्पृष्टोहं स्वस्पर्शेनान्यानपि गत्याकृतार्थयिष्यामीत्याशयेनाह यदिति नामैकमपि उच्चारयन्नैव नश्रद्धया गृणन्निति वर्तमानत्वेन पूर्णाचार
पानपेक्षा अखिलानित्यधिकारानपेक्षा सद्य इति कालानपेक्षा श्रोतॄनिति किमुतात्मानं चकारात्तत्संबंधिनोपि तस्य ते पदास्पृष्टोहं त्व्यत्र आधिक्येन सर्वांस्तान्पुनातीति कि
मु वाच्यमित्यर्थः १७ अनुज्ञाप्य मौनं संमतिलक्षणमिति ज्ञायेनानुज्ञां प्राप्य १८ आत्मवेत्तत्वं स्वरूपवैभवं नियमं त्रिरात्रतीर्थवासात्मकं १९ सबल्ला रक्षिता गोपा अपि हिं कृत्वा
सुदर्शनं अबलाः शंखचूडाख्यं वैकुंठे तं सुदर्शनं १ रासलीलाः सा । ० हूरो विवक्षितं तल्लीलांतरमाह कदाचिदिति अथ तच्छिवरात्र्यनंतरं कदाचित् होलिकापूर्णिमायां रामस्यापि
तल्लक्षणं केचन सरवायोपि ज्ञेयाः तथैव होलीकाक्रीडाव्यवहारात् वने व्रजसंनिहिते अलौकिकप्रभावत्वं द्वयोरपि विशेषणं २० विहारमाह उपेतित्रिकेण उपगीयमानौ हो
लिकोचितगीतिभिर्वर्ण्यमानौ यतो बद्धसौहृदैः अनेन रामस्यापि पृथक् प्रेयसीगणात्तेयः सर्वमेलस्तु [illegible] होलिकावसरत्वात् २१ निशाप्रवेशं सत्कुर्वतौ उदितश्चंद्रस्ता
राश्च यत्र वसंतप्रवेशान्मल्लिकागंधेन मत्ताः भ्रमरा यत्र २२ प्रबंधरूपेणाग्रथितत्वादन्ये यंगपत्कल्पयितुमशक्यमपि स्वरसमूहस्य मूर्छितमेकविंशति मूर्छनाः कल्प
यंतौ मनः श्रवणयोः सुखावहं यथा तथा जगायतौ २३ मूर्छिताः गीतलीनचित्ताः श्लथितवस्त्रदेहं ततः स्रस्ताः केशाः स्रजो यस्मात्तथाभूतं नाविदुः २४ एवं होरिकोचितमे
व क्रीडतोर्गायतोश्च अतस्वैरं संप्रमत्तजनत्वात्तिलोके तथाव्यवहारात् अभ्ययादभ्यगामिति पाठो २५ अपि मुखव्यानातो निरीक्ष्यमाणावप्यनादृत्य यतो निःशंकः तौ नाथौ यस्य तं स्त्रीगणं स्वनिवास
दिक् उदीच्यां प्रयामास २६ गोप्तारावितिस्नेहेनैकमस्यं दस्युनाचौरेण ग्रस्ताविप्राव्यालस्पसा कृतौ गाविलोक्यत स्वात्मा धावं नीत हत इति तेनास्पर्शो व्यज्यते २७ भयं मा प्राप्नुतेसभयारावौ तरसा
जवेन त्वरायुक्तं तमासेदतुः विकटेगतौ २८ कालः प्रेरकः तत्प्रेरितोमृत्युश्च ताविवेति यथाक्रमं दृष्टांतः मूढः कृत्यं किमप्यजानन् २९ तमिति ननु हस्तस्थितशालप्रक्षेपादिना दूरत एव किं
न जघान तत्राह जिहीर्षुरिति मृतस्य स्पर्शायोग्यत्वेन जीवत एव रत्नग्रहेच्छयेत्यर्थः यद्वा मणिसत्त्वा वधितज्जीवने नियमात् जिहीर्षो ३० अभ्येत्य स्वपि मुखं गत्वा पलायमानस्य पृष्ठतो हनन
नायोग्यत्वेन नोचितस्यात् ननु पलायमानस्य तथापि वधो न युक्तो तत्राह दुरात्मनः दस्योरित्यर्थः शिरसा सह मणिं जहार ततः नीयाल्लु गार्वः यद्वा शिर [illegible] चूडामणिंच सह एकदेव जहार ३१ नितरां हत्वे
ति लिंगदेह भंगात् पश्यंतीनामिति सर्वासां स्वसौभाग्यगर्वितानां अनादृत्य तासां मात्सर्याभावात् यच्चागतं ज्ञायादादिति प्रीत्येति तद्दक्षिणपारितोषिकव्याजेनेति भावः ३२ इति श्रीमद्भाग-३४ध्याय
अध्यायः ३४

राम
५८

विरहजतापं मोह ध्वांतमवार्य दिविष्ठपुष्पवतोः द्वादशाविधरवितुल्य श्लोके युग्मोदितेर्जहुर्गोप्यः १ एवं रात्रिषु भगवता बहुधा तिरमिताभिर्दिवानदिरहिताभिर्व्रजललनाभिस्तन्महदुःखं क ५८
थं निस्तीर्णमित्यपेक्षायामनुगीतेन तन्निस्तारप्रकारमाह गोप्य इति तमनु तेन सह दूतं वेगेन गतं चेतो यासां ते लक्ष्मीकस्यद्भवीभूतचिता इति वा दुःखेन कृच्छ्रेण १ नामत्राहुह्रकेतस्मादिह द्वादशा
युगुलानि तत्र पूर्वस्मिन्पद्ये तल्लीला परस्मिंस्तत्पोष्यवर्ग इत्येवं नियतं युग्मवर्णनं सेयं दर्व्यंगं प्रमतोल्लश्लाना हस ते पोष्यवर्गं विना कश्चित् तौ विना पोष्यव गोपीस्ये तौ युग्मेन वर्णितौ १ अत्रय
द्यपि नास मागता नां प्रतिदिने लीला सामान्य वर्णनं पराणां गोपीनां वाक्यसंगतं होय मध्याय इति मिथः संगस्यानपेक्षा तथापि मुनींद्रेण प्रातरादितल्लीला क्रमत एव तत्संग्रहः कृत इति व
क्रमसंगस्येव व्याख्यायते तत्र गृहान्निर्गमप्रभृति गमनाद्यधितस्य वन्यक्रीडा यथानुभवं गायंत्य आदौ प्रातर्वहिरागम्य भगवता वनलनेनिवादितेन वेणुना रात्रिशापेव्याप्तिदिदक्षया स्थिता
नां सिद्धवनितानां बाहुकृतकपोलत्वेन षड्ध्वंदृष्टितयास्वाः पस्यंतं तमन्यमानानां प्रेममोहमाहुः वाम इति वामे सव्ये भ्रूनेषेण मनोहरे च बाहौ तत्कृत्ले अर्पितः इ पत ग्नी वा परिवर्त्य वामकपो
लो येन वल्गिता नर्तिते भ्रुवौ येन हस्वल्लमार्ष दीर्घो पिकिंचित् समुकुंदः कोमलांगुलिभिराश्रिताः मार्गाः सप्त स्वरछिद्राणि यस्य अकृर्मकठिनोहसो पादो चाध्वनिकोमलोवितिमहतोचिन्हत्वे
पिकामलेत्स्फुरि न्यागा पदक्षिकका ठिन्येपि लस्वंतरा पक्ष यातिकोमल्तासदं गतातिकठिन वेणुस्पर्शोनोचित्यत्वेत नायच तं अधरे अर्पितं वेणुं यद्वाधरोर्पितो दत्तो यस्मै तं वेणुं अधरे बिंबाद्धिरू
पका प्रयोगः स हा वेणुं चुंबनेन तस्मिन्लीर्ष्योदयात् यत्र यदा ईरयति वादयति हे गोप्य इति युष्माभिरेव वक्ष्यमाणं वोढुं शक्यं नान्येरिति भावः २ तदा व्योमयाने विमानयाववनिता दव्यस्ता सिद्धैः स्वप
तिभिः सहितापि तद्वेणुवादनमाकर्ण्य तैः सहैव विस्मिता बभूवुः ततः कामसमार्गणैः कतलिभिः श्रीकृष्णाय समर्पितं चित्तं यासां तथा बभूवुः ततः सलज्जाश्च एवं लज्जावत्योपि काममार्गणव
शात्तया कश्मलं ययुः मोहपर्यंतां दशां प्रापुः अतः स्खलिता अपि नीव्यो विस्मृता याभिस्ता इत्यो बलज्जुरित्यर्थः यत्रदेव्योपि मुह्यंति तत्र का नयमिति भावः एवं कृतस्य श्रीकृष्णस्य विरहे कथं सहाम
इति वाक्यशेषः ३ ततो वनांतिके गत्वा सर्वगो गोपाल मेलनाय गोपीनिवर्तनाय च वेणुमवादयत् तदा स्ता मन्यनार्तो नयतो व्रजवनयोः स्थिताः परस्परं वोपि मुहुर्मुहुरित्याहुः हंतेति सच्चमत्कारं इदं चि
त्रमद्भुतं हे अबलाः इति प्रेमविक्लत्वेन तया शक्तिराहित्यं व्यंग्यं अतएव शृणुतेत्यवधापयति हारे स्फुरन् हासो यस्य यद्वा हारवत् शुभ्रो हासो यस्य यद्वा हारो मनोहरो हासो यस्य यस्मिन्नुरसीति वा हार
वच्छोभमानो हासो यत्रोरसीति वा हाराणां हासो विशदा दीप्तिर्यस्मिन् उरसीति वा तत्र स्थिरा विद्युदिव लक्ष्मीर्यस्य सः स्थिरेति चित्रत्वे कारणं विद्युच्छदेनोरसो घनत्वं वि [illegible] घुक्तघयोगेनहार
हासयोर्बलाकात्वं तादृशाघनत्वेन तापहारित्वं च व्यंग्यं जगदानंदकंदस्य नंदस्य सूनुः कृतएव जनानां गोपरामादीनामानंददः अयं सर्वानुभूयमानः यदा नादितवेणुर्भवति ४ तदा व्र
जे ये निरूढाः शाकटवाहा वृषाः वने च ये हरिणादयो याश्च गावः ते वेणुवाद्येन हृतं चेतो येषां अतएव हरादेव ते ईद्धाधावन चर्विता नापित्यक्ताः कवलास्तृणग्रासा यैस्ते उत्तंभिताः कर्णा यैस्ते
निद्रिता इवासन् निद्रितेषु किंचिच्चलनादिदर्शना दृष्टांतांतरपदा दोल्लिखितवृषादि चित्रमिवेति तिरश्चामिदमतिचित्रमिति भावः ५ ततो वनं प्रविष्टेन वन्यभूषणभूषितेन तेन जलपाना
र्थं गवामाह्वाने शष्पवतीनां नदीनां मोहं संतानयंती बर्हिणेति हे आलि सखीति विश्वासार्थं स वेणुवाद्यविशारदो मुकुंदः कर्हिचित् प्रथमं जलपायनकाले यत्र यदा गाः समयतत्तन्नाम्नाह्व
यति वेणुनेत्यपरितनश्लोकादपकर्षः सबलः गोपैः सह इति श्रीकृष्णवेणुनादेते पां वेणुनादस्यापसर्जनत्वं यद्वा मधुरतरस्वकंठेनेवाह्वयतीति कीदृशः बर्हिणस्तबकैः मयूरपिच्छैः गैरिका
दिधातुभिः पल्लवैश्च बद्धश्चासौ मल्लानां परिबर्हः भूषापरिकरस्तमनुकरोति सः ६ तर्हि तदा तद्ध्वनिश्रवणात्स्मरितः प्रकारांतरेण तत्प्राप्त्यभावं ज्ञात्वानिलेन प्रापितं पादपद्मरज एव स्पृह
यंत्यो लक्ष्यंते स्पृहेरीप्सित इति संप्रदानत्वस्येप्सिततमत्वविवक्षया कर्मत्वेन बाधः यतः सरितः संतत वहनशीला अपि स्तब्धप्रवाहतया भग्नगतयो दृश्यंत इति स्वपतिसमुद्रानुसरणत्यागेन
लोकद्वयोपेक्षोक्ता तथापि वयमिवता अपि अबहुपुण्याः यतो न प्राप्नुवंति केवलं प्रथमतः प्रेम्णा आलिंगनानुरागेन तदिच्छया कंपिता भुजाः प्रसारितकराइव तरंगा यासां ततः स्तिमिताः निश्चला
अपो यासां ता स्तब्धसर्वचेष्टां च लक्ष्यंत इत्यर्थः ज्ञापिनाम पित्लोचनयोः स्तिमितः जलत्वं यद्वास्तिमितांगी त्वं जलत्वं अत्रैवं क्रमः आदौ नादश्रवणं ततो गतिभंगस्तदालिंगनेच्छया भुजकंपः ततो
रजोमात्रस्पृहा ततस्तदप्राप्तिदुःखेन निःश्चेष्टत्वमिति अचेतनानामेवं का वास्माकं दोष इति भावः ७ ततो गाः पाययित्वा स्वयमपि पीत्वा गोभिः सह गिरिभुवमवगाह्य गाश्चारयन् इरगता
स्तावेणुनाजुहावतदा स्वनवराणामपीदृशमित्याहुः अन्विति अनुचरैः सखिभिर्गोपैः सम्यक् प्रेम्णा चानुअनुक्रमेण सहभावेन वा वर्णितं सकौतुकं स्तुतप्रभावमयं चरितं यस्य सः आदिपुरु
षइव स यथा देवैर्वर्ण्यते तद्वत् यद्वा नारायण इवाचलश्रीरपि वनचर इत्यादि अचलाश्च मादावप्यच्युत तालावण्यादि संयत् यस्य गिरितटेषु विषमेषु चरंतीः श्रांता इति भावः वेणुनादे
नसः तदाकानचतुरः यदेवाह्वयति ८ तदावनेयावस्योत्वतातरव श्च्यतस्ततयः लेतानामा [illegible] बुद्धिः स्त्रीत्वेन सतुल्यत्वात् विघ्नं सर्वत्र स्फुरंतं श्रीकृष्णं स्वास्मिन्प्रकाशमानं सूचयंतः

हासो

वृक्षा अप्येवं द्रवेति तच्चेष्टे न व्यंजयति न तास्वयमित्याशयः यद्वा मुनयो विहगमिलनमित्यर्थः मुनयः स्त्रीपुंसरूपा साधनसाध्यसंपन्ना इव लतादयोपि पुष्पफलाढ्याः भारेण प्रणताः प्रणतभाराः राजन्ते ता दितादृ
शा विटपाया सां येषां च मुनयोपि प्रणताः अश्रुरूणीव मधुधाराः वर्षुः अंकुरोद्भेदमिषेण प्रेम्णा हृष्टतनवः वर्षुः सस्रुः इति पाठो यद्वा मधुनो धारा यत्र तादृश्यः सस्युः प्रेमसस्रुः स्वच्छत्वात् तेन प्रेक्षकजने
विस्तारयामासुः नूनं विहंगवनचरं दृष्ट्वा मुनय एव सस्त्रीका लतातरुरूपेण जातास्तादृशा भाववंतो लक्ष्यंत इति भावः ११ कुलं मल्लवेषो तया मल्लक्रीडासु रचितात्र वेषांतरान्तं यदं कल्प्यते मल्लक्रीडाश्रान्तः संगवांते
सरसि स्नात्वा कृततिलकवनमालादि वन्यवेषो गोप्यैः सह हलीको प्रविश्य गोसंभालनाय सखीन् प्रस्थाप्य भ्रमरमात्रपरिवारो वेणुवादयन् रमते इति तदा पक्षिणामप्याकर्षणं किं पुनरन्येषामित्याहुः दर्शनीयतिमना
हरंगो रीकादिमयस्तिलको यस्य दिव्यपुष्पमयवनमालास्त्वपि दिव्यः सर्वाङ्गमंगं योयस्याः सा तुलसीतस्यास्तत एव दिव्यनमधुना मत्तैरलिकुलैः पर्यायेणामतत्वाद्वाल्गु उच्चैस्वजासनुसारेण विचित्ररागेणवाय
हीतं तदेवाभीष्टमित्यादियन्ता दरेणग्रहणहन् इदंस प्रेयर्ष्य इदानीं तद्गीतस्यादरो नास्माकमिति भावः यदाधरे संधितवेणुर्नवति वेणुवादनमारभते तदैवेत्यर्थः १० तस्मिन्सरसिस्थिता ये सारसा हंसाश्च विहंगा अन्ये
च चक्रवाकादयस्ते सर्वे विचारु गीतेन हृतचेतसो गीतानि मुखमस्यते परमभागधेया हरिं मनोहरतया तन्नामा प्रसिद्धं श्रीकृष्णमुपलक्षीकृत्यासनउपविविशुः तत्र तेषामानंदसमाधिमाहुः यतचित्ताइत्यादि
नाहंतरखेदेन थास्वस्वस्थलामाभावात् यद्वा विस्मये पूर्ववत् श्लेषेण हरिं विहगमुयनचित्ता मुनय उपासते जजन्तेत द्विरूपमाव्यंजिता ११ ततो मन्यान्हे सखिभिरानीते स्रग्वतसादिभिर्विलसन् गवामनुरोधेनातपे पि
भ्रमन् मेघच्छायेच्छया मल्लीर रागंजगो तदा किं पथ्युलेखन विश्वसास्वाप्यानंदः किंच दूरस्थमघस्यापि हस्यनामित्याहुः सहेति सखिसैन्यसहितः स्त्रग्भिरवतंसाभ्याचविलोसोयस्य क्षितिं विचरति तस्या गिरेः सए वक्षि
तेरपि धन्यता पादको यस्य सानुषु समभू भागेषुर्वर्तमानो वेणुनादप्रतिध्वनिभ्र द्रिगिरिसानुभि ज्ञोत हर्षो विशेषता वेणुरवेण यद्वा विश्वं हर्षयन् उपरंभतिना दनाष्टरयति हे व्रजदेव्यः अदृष्टमप्येतद्धितुं समर्थाः १२
तदामेघापि प्रहर्षेण उच्चैर्गर्जितुमिच्छन्नपि महतः श्रीकृष्णस्यातिक्रमणशंकितचेतो यस्य सः न पुरतो गच्छति न च्चोच्चैर्गर्जतीत्यर्थः किंतु तत्रैवास्थितः सन् वेणुरवमनु अनुकूलं तमानपापकं यथा तथा मंदंमंद
अ गर्जति किंच पश्चिभ्रांतमत्वा सुहृद् विश्वार्तिहरणनीलत्ववर्णादिसाम्यात् सखायं श्रीकृष्णं सुमनोभिर्मंदमंदमभिवर्षत् मेघाच्छन्नदेवैः कृतपुष्पवर्षमेघकल्पमित्युक्तं विरलजलहद्भिर्वा पुष्पतया कल्पिता गर्जन
स्यवर्तमानत्वेन पौनःपुन्येव दृष्टे भूतत्वेन स्वकृत्यं प्रतपादातपात्राययतइति प्रतपत्रछत्रं छायया कुर्वन् स्वत्र पुष्प इतिशेषः श्लेषेण तु सुमनोभिः शोभनमनोवृत्तिभिः छायया देहेन गर्जनाद्वा चेति त्रिधा सेवाकाः १३
एवं शकां तगोष्ठीः संगृह्य यशोदासभागतात्रपि कालक्रमप्राप्यासंगृह्यते तत्रोल्काने मध्यान्हे स्वपुत्रागमनविलंबाशंकया विद्यमानां यशोदां गानादिनानाविधक्रीडावेशादिविलंबे हेतुरुक्ते पूर्वकंताः क्रीडावर्णने
न प्रोत्साहयंत्यः इतरजनवत्स्पष्टं नद्वानो कथं नेननिजभावमपिगूहयंत्यः सोच्चयंति विविधेति सतीहे जगदूज्यय शोदतवसूनोनानागोपक्रीडासु निपुणायहास्वरजातीः स्वरालापभेदाननयत् उन्नीतवान् यदा
चाधरबिंबे दत्तवेणुः सत्स्वरजातीरनयत् कथंभूताः निजेन ग्रीक्षायासुतानत्वेन्यतः श्रुतोऽइत्यर्थः वेणुवाद्यविषयेतुद्रुरूधानानाप्रकाराइत्यर्थः १४ तत्तदाताः स्वरजातीः सवनसः मंद्रमध्यतारभेदेन यद्वा प्रातरादि
काल वारंवारमित्यर्थः उपधार्य स्वस्वस्थानेप एवश्रुत्वेत्यर्थः अतो गीतस्य कालत्रयस्यापि सर्वंगत्वं व्यज्यते सुरेशाः गंधर्वादिद्वारा गीतादिश्रवणवंतोपि स्वयं कवयोपि शक्रपुरोगास्तत्सहिता लोकपालादयः शर्वादयो
देवीगणेशादयः ब्रह्मपुरोगाश्च तुसनन्नारदादयः क्रमस्तु प्रथमं शक्रादयः समीपत्वाद्दृग्भिर्मुखवृत्तित्वाच्च श्रुतवंतः २ ततः शर्वादयः केलास्थत्वपर्यंतमुखवृत्तित्वात् ततो ब्रह्मादयोत्यंतं तन्मुखवृत्त्वाद्दूरस्थत्वाच्च तत्र
नताकंधराश्चित्तेचानत तत्स्रवणं येषां ते तथाभूतास्त्रपि न निश्चितं तत्वं भेदो येस्ते मोहयम्युः यद्वा किमिदं सुपारगीतं किं वा मोहनः कोप्यपमंत्र इत्यनिश्चियसन्नंतः पश्चाद्धीतव लीनाः सर्वे विसस्मरुरित्यर्थः १५ अथ
तदनंतर जातलीला मयी पुनरेकांतगोष्ठी संगृह्यते तत्कथाश्रयेण लंघितेपि तृतीयायामे नागते भगवति काश्चिद्दुःखदुःखिता स्तद्दुष्टुं पुष्पावचयादिमिषेण वनं गत्वा तत्रानुभूतं दिनांतरे प्रस्तुवंतितत्संगृह्यते तत्रय
मवतारिका अहो सखय अस्त्वन्येषां मोहकं मोहवातोस्माकमेव श्रुयतामिति प्रमवेवस्येन्माहुः निजेति ध्वजादीन्यद्भुतानि लक्ष्माणि चिन्हानि येषु तैः यद्वा ध्वजादिभिर्विचित्रैश्चलल्लाभिः स्कंदरैश्च अतएव निजा
न्यसाधारणानि पदान्येव अब्जदलानि बहुस्त्वं गोरवात् तैर्व्रजसंबंधिभुवः गवादिखुराक्रमणव्यथां शमयन् गापश्चाद्गत्यापादस्पर्शस्वभावेनांकुराद्युत्सत्या तथानुमानात् वर्ष्मणा देहेन धूर्योगजं द्रस्तदृष्ट
ने लीलया गच्छन् यतईरितवेणुवादितवेणुः सन् शीघ्रगमने वेणुवादनासंभवात् १६ यत्व्रजति इतस्ततो भ्रमति तेन निमित्तेन सविलासमीक्षणं तेनार्पितो मनोभवस्य वेगो यास्कृताः वयंकुञ्जाः वृक्षास्तेषां यत
गतिं जाड्यं प्रापिताः सत्यः यद्वा गत्यासाकुजगति गमिनाः वीक्षणविलासार्पितकाममोहेन तु वेसनमपिन विद्यामः कबरं नेति किं यत् चार्थेवा शब्दः तत व्रजेनेना स्माकमगमत्वं वीक्षणविलासेच मुग्धत्वमित्युक्तं १७
अथ चतुर्थयामसुखे कृत वेषांतरो गृहागमनयवेणुवादनेन गाः समाहरति गणयितुंच तदा हृग्योप्याकृष्यंते किमुत वयमित्याहुः मणीति मणीन् ग्रथितान् गोगणनार्थं धरति तथा सन् कुचिह्नचो मणिभिरासमंता
द्गणयन् यत्रयदा कदाचिद् गायत् कृष्णमवसैर संख्याते रित्यक्तरीत्या गवामसंख्यातत्वेपि यूथशो गणनाभिप्रायेणेदं दयितः गंधो यस्यास्तस्यातुलस्या मालया विशिष्टः यद्वा भ्रमरगानै मालायां परिकल्प्य सेर्ष्य
माहुः मालया सहागायतेति सा पत्नेन तस्या धार्ष्ट्योक्तिः किं कुर्वन् प्रियस्यानुचरस्यांसे भुजं वामं दक्षिणकूर्परं वालीलया विन्यस्यसन् किमनुचरस्य भाग्यमिति भावः १८ तदा तत्र क्वणितवेणोरवेण पत्न
ता निचितानियासां ताः कृष्णस्य मृगस्य वा गस्य गृहिण्यः प्रेयस्यपि श्लेषेण श्रीकृष्ण भार्यात्वं प्राप्ता इति नर्मकृष्णमनुगत्यात्नवसान्वासत पतिस्यागेन कृष्णमेवाश्रिता इत्यर्थः यतो गुणगणासमुद्र विमुक्ता गृहाशा
याभिः यद्वान्यत्काः गृहाः पत्यादि परिकरा आशा आनंचया भिस्ताः वयमित्यनुक्ता गोपिकाइवेत्युक्तिः पारोक्ष्येण रसविशेषाय १९ अथ पुनर्व्रजेश्वरी सभागत पूर्वोक्त लीलावर्णनं संगृह्यते एवं वृंदावनप्र

देशो धुक्षि डित्वा सायाह्निगाः परावृत्य द्वितीयजलपानाय यमुनायामानीय तत्र क्रीडनस्तत्स्थलीलास्तत्र गत्वा स्वयमनुभूय कान्तातिक्रमेणार्तो यत्रोद्दाममभिगम्य तदागमनवार्तया स्वस्थयितुं युगमत्रयेणाहुः तत्र
तावत् विलम्बहेतुं निवेदयंति कुंदेति दिनभ्रमणश्रान्त्या यमुनायां स्नात्वा तीरमागत्य कुंददाममभिः वृतः कौतुकेनोत्सवेन वेशोत्तंकारो येन स नंदसूनुः श्रीकृष्णः हे अनघे यशोदे तव तु वत्सः गवां वत्स इव परमस्ने
हविषयः सूनुः विजहार क्रीडति स्म विलम्बहेतवो गोपेत्यादिभिः क्रीडासक्तैर्गोपैर्जलादितृष्यामंदगतैर्गोधनैश्च ततः स्वयं च प्रणयिनां सखीनां नर्मदः परिहासकेलिभिः सुखदः २० तदा च स्पष्टवायुर्तेन गम
नानुकूले यथा स्यात्तथा मंदवायुः वायुरपि सत्वरं न चलतीति भावः तमुपवाति वीजयति यद्वा समीपे वातीति यत्रासौ तत्रैव नान्यत्रेत्यर्थः मलयजस्य चंदनस्येव यः स्पर्शस्तेन शीतश्च स्पर्शस्तेन यद्वा विसर्गलोपेन
मलयजो दक्षिणो वायुरित्यन्वयः यद्वा मलयजस्य भगवतोंगानुलिप्तस्य स्पर्शेन मानयन् तं पूजयन् किंच गंधर्वादिगणाः वंदिन इव स्तावकाः संतो वाद्यगीतपुष्पादिभिः परिवव्रुः परितरुपासत ते पितदागमनवि
लंबं सेहुरित्यर्थः तथापि वायौरेषां च मां गलितं कृत्वा शीघ्रमागमिष्यतीति भावः २१ ततउक्तं द्वयात्त्रालिकादिकमारुह्य तदेव दर्शयंत्यः परावृत्य व्रजागमनरूपे व हेतुरिति व्यंजयंत्य आगमनं वर्णयंति वत्स
लइति व्रजस्य गवां च रूपया हितकारि तत्रोदाहरणमाहुः यत् यस्मात् अगध्रः पर्वतमपि धरतीति वृद्धैरास्यादिभिर्व्रजांतः प्रवेशोचंदनावसरा प्राप्त्या पथ्य एव वंद्यमानचरणः वृद्धास्त्रपि शीघ्रमागे तु नदतीत्या
शयेन सेव्यमिदं वंद्यमानेति वर्तमानतोस्या वेदनादनिवृत्तिः उपोद्घ्येकीकृत्य तदर्थं व्रजे स्वागमनस्थापनाय च गीतयुक्तो वेणुर्यस्य सः २२ श्रमजनितस्वेदादियुक्तया रुचा सहजशोतयानेत्राणां हर्षमुन्नयन उच्चैः
प्रापयन् खुररजोभिर्व्याप्तः स्रजप्रवयस्येति अंगानुमुहुः सखिभिः स्वाचरीयेरजोपसारितमिति भावः कृत्तदांसर्वेषामस्माकं आशिषः मनोरथस्य दातुमिच्छयेति कृपयेवेतीत्यर्थः अन्यथोक्तरीत्या वदने कृत्स्नं
पत्कावातस्यनेति भावः एष इत्यंगुल्या निर्दिशंति देवकीजठराद्भूतश्चंद्र एवेति दिनतापहरणादिसाम्यात् उडुस्थानीयानां व्रजसत्वायः कृष्णचंद्रजनिस्थानत्वेन देवक्युदरस्य सत्वमयतया च शुक्लत्वा क्षीराब्धित्व
देवक्यत्र यशोदैव सान्त्वने प्रवृत्तानि मोत्रं तरसूचनस्य विरुद्धत्वात् व्रजराजत्वाद्देव एव देवको नंदस्तत्पत्नी देवकीति योगसंभवात् देनाम्नी नंदभार्या या सा शोदा देवकीतिचेस्कन्त्यारुढिसत्वात्त्व २३ ततोपि समी
पमायांतं कथयंति मदेति मदोत्र हर्षकृतचित्तविकारः स च स्वभावत एव विशेषतश्चायौवनात्प्रेयसीजनदर्शनादिति गोपीसभावासनानुसारेण एवं तत्तद्भावा तत्तद्रसाभिव्यक्तिः तेन मदेन विविधतया घूर्णिते
लोचने यस्य ईषदिति सामर्थ्यात् घूर्णितेत्यनेनान्वेति व्रजप्रवेशकाले तत्र तत्र संगतानां सुहृदां प्रणामालिंगनस्मितसंभाषणावलोकादिलक्षणयथोचितमानदाता आपादं कुंदादिमालावान् ईषत्पक्वबद
रवत्पांडुरं वदनं यस्य तत्र साधारणेन हेतुः कनककुंडलयोः कांत्या कोमलगंडस्थलं शोभयन् अस्माकमिव स्वापि विरहात्पांडुरमुखतेति तु गोप्यभिप्रायेण साधारण्येन हेतुः २४ यदुपतिरिति हरिवंशोया द्वेष
पि सर्वेषु भवंतो मतिं वह्वाभाः इति व्रजागतस्य रामस्य गोपान् प्रत्युक्तो निर्धारणसप्तमीनिर्देशात् यदूनां गोपानां पतिरित्यर्थः गजेंद्रगतिः व्रजगवां व्रजनिवासानां गो तुल्यानामस्माकं यद्वा व्रजस्य सर्वस्य गवां
नेत्राणां वनेतं दिनतापं शमयन् तेन च मुदितानि वक्राणि यस्मात्स हृष्टमुखविकासकः सन्निलयर्थो ज्ञाति दिनांते एष उपयाति समीपमायाति दिनांत उदितश्चंद्र इवेति २५ उपसंहरति एवमिति हे राजन्निति ता
सां विरहगीतेनमुखं तं स्वस्थयति एवं लीलागाने व्रजस्त्रियापि स्त्रियः अहःस्वतद्विरहमयेषु पि रेमिरे निर्वृता बभुवुः यतः स्वस्मिन्नेव चित्तं चेतनाजीवने यासां नु एवं कृष्णलीला एव गायंत्यः तस्मिन्नेव म
नः संकल्परूपया सा महानुदयः उत्सवः भगवत्प्राप्तिरूपो गानादिकर्मसिद्धिर्यासां ताः २६ इतिश्रीमद्भागवतदशमस्कंधसंश्रयः पंचत्रिंशत्तमोध्यायस्तोषिणीसारसंग्रहे ॥१॥ इतिदशमे पंचत्रिंशोध्यायः ३५
मल्लीलास्वैरगानादिरतादिष्टं महत्तमं हन्ति सहनुरव्यापयितु मरिष्टमसुरोत्तमं १ एवं नवमदशमैकादशवर्षेषु स्वैरलीलाभिर्दिवारात्रौ च गोपीप्रमुखानां सर्वेषां व्रजौकसां परमानंदं विस्तार्य द्वादशवर्षके
संहर्तुमना भगवांस्तं नारदेन तान् मग्नत्ते चवे सकदेव पुत्रत्वेन ज्ञापयामासेति वंकुप्रथममेकादशवर्षे चैत्रपौर्णमास्यां कृतमरिष्टासुरवधं सार्द्धपंचदशभिः कथयन् तदागमनादिकं वर्णयति सार्द्धत्रयेण
अथेति सार्धद्वयकं एवं परमोत्सवे वर्तमाने तद्विरुद्धार्थीतराधिकार्थो थशब्दः तर्हीति उक्तप्रकारेणाश्रकृष्णो यदा गोष्ठं प्रविष्टस्तदुत्तरं प्रदोषइत्यर्थः तथा च विष्णुपुराणे प्रदोषार्धे कदाचित्तु रासासक्ते जनार्दने
त्रासयत्समदो गोष्ठमरिष्टः समुपागत इति प्रदोषार्धे सूर्यास्तोत्तरं घटिकात्रयेति क्रान्त इत्यर्थः तत्पूर्वं भोजनादिविधाय रासार्थं गोष्ठाद्बहिर्निर्गत इति रासासक्तइत्यस्याशयः वृषभाकृतिरसुरः महांतो
ककुत्का यो यस्य सः खुरैर्विदारितां महीं कंपयन् १ रंभमाणः वृषजातिशब्दं कुर्वन् मत्ततया पुच्छोद्यमेन महीं पदा विलिखन् उद्यम्य ऊर्ध्वं कृत्वा वप्राणि तटान्युत्क्षिपन् किंचित् किंचित् मध्ये मध्ये इषदीषत्
पुरीषं मूत्रं च मुत्रयन् मुत्रमुत्सृजन् अनिमिषलोचनः २ भयानकत्वमाह यस्येति सार्धयुग्मकेन यस्य वज्राघाततुल्यध्वनिना गवां नारीणां च गर्भाः पतंति स्रवंति च आचतुर्थात् भवेत् स्रावः पातः पंचमष
ष्ठयोः इति विभागः अंगेति स नयमिव संबोधनं २ ककुदिपर्वतस्थ श्रृंगाकारं गवि शंती वेत्युत्प्रेक्षा घनपथपर्यंतोच्छ्रायो विवक्ष्यते अप्यर्थे चः किंवा [illegible] ध्यं गोप्य इति गोपान् प्रति त्रेसुः ४ पशवो भीता
स्तस्य दुष्टत्वात् तदुक्तं हरिवंशे अरिष्टो नाम हि गवां मरिष्टो दारुणाकृतिः दैत्यो वृषभरूपेण गोष्ठानि परिधावति श्रृंगप्रहरणो रौद्रः प्रहरन् गोषु दुर्मद इत्यादि व्रजं प्रदोष विसंत्यज्येति महातयं राजन्नि
ति विस्मयेन कृष्णेत्यर्धकं गोविंदं गोकुलेंद्रतया भिषिक्तं कृष्ण कृष्णेति क्रोशंतः कोलाह ४ लं श्रुत्वा रासस्थानाभिगमनान्निवृत्त्याभिमुखमायांतं शरणतयोपसेदुः ५ इत्यंते निजकृत्यं चक्रुर्गोविंदाभिम
कृत्यं च क्रइत्याह भगवानपीति अथेति पाठे नंतरमेव वृषासुरं वृषाकारमसुरं ज्ञात्वेति भावः उपेति गोष्ठदूरतः स्वसमीपे इत्यर्थः ६ आह्वानप्रकारमाह सपालैरिति गोपालैरिति क्वचित् ॥ त्रासितः

किंफलं नकिमपीत्यर्थः कुतः मयीशास्त्रीतिबलदर्पहाहमिति पाठांतरं दुष्टानां दुष्टकर्मणां दुरात्मनां दुःखभावानांच अतोनत्रासनफलं अधुनैव मयात्वयिहते एते निर्भयाभविष्यंतीति भावः गोरू
पमांकथंहनिष्यसीतितत्राह असत्तमेति देत्यएवत्वमित्यर्थः ७ इतिएवंवदन् आस्फोट्यकरतलेन बाहुमाहत्यतेन शब्देन कोपयन् श्रीदामोदरो भुजैवभोगः कृतस्वपीनत्वादिनाहि देहस्तंप्रसार्य
तिसावज्ञत्वं अच्युतःस्वस्थानादचलः नचचालततः स्थानादितिहरिवंशाद्युक्तेः हरिर्निर्भयस्थित्या मनोहरः ८ उद्यताऊर्ध्वंगच्छता पुच्छेनतस्ततोनिपतंतोमेघायस्मात्ससमीपमागमत् ९ कथं
तदाह अग्रेन्यस्तेपुरतःकृतेशृंगाग्रेयेन स्तब्धेरक्तवर्णेलोचनेयस्य कटाक्षेण आक्षिप्यतीर्यक्कृतदृष्ट्यासंतर्ज्येत्यर्थः असत्वरं त्वेवेगेच दृष्टांतः इदेति १० मत्यपोवाह प्रतिलोमम प
सार्यचिक्षेप ११ अपविद्धः अपक्षिप्तःपातितइत्यर्थः सत्वरं यथास्यात्तथा सत्वरइतिक्वचित् स्विन्नानिस्वेदवंतिसर्वांगानियस्य क्रोधेनव्याप्तः सत्पुनराद्रवत् १२ तस्यवधंहर्षेण बृहद्गताभ्यां
गायन्निवाह तमितिभूतलेनिपात्यपदासमाक्रम्यनिःपीडयामास कृत्वाविषाणमुत्पाट्य यमदंडेनेव तेनैवजघानसचापानृतः १३ तत्प्रकारमाह अस्रगिति मूत्रंचशकृच्चेतिसमाहारद्वंद्वः
सम्यगुत्सृजन् निति किंचित्किंचिच्छकृन्मुंचन्निति पूर्वोक्ताद्विशेषः प्रचलितनेत्रः उद्धृतं यथातथानिःसृतेः क्षयंजगामेतिसक्रोधं वस्कनस्तु दर्दुरकेस्यरिष्टस्यादेमोक्षोक्तेर्मृत्योर्हेतोः क्षयंभगव
तोनिवासंगतइत्यर्थोविवक्षितः अथतस्यसम्यक्मरणनिश्चयोतरं कूराइंद्रइतियावज्जीवनसंदेहं भयानपगमाव्यज्यते १४ स्वजातिभिर्गोपैः सबलइतियुक्तं श्रुत्वानुजस्नेहेन तत्रतस्यागमनात्
गोपीनांमूर्तिमान्नयनोत्सवइतिसर्वैः सहव्रजंप्रविश्यपुनर्निर्गम्यरासलीलयाताभिः सहरेमेइतिव्यंजनाय सचापेंद्राव्यष्वंहत्वाकांतचंद्रेनिरुणमुखे अरविंदाभयनयनः पुनरेवरराम हेतिहरिवं
शोक्तेः आदिवराहतिगोवर्धनेद्रेरासार्थं गत्वामानसगंगायाउत्तरेरिष्टासुरंहत्वा पार्ष्णिघातेनतीर्थमुत्पाद्यतत्रगोपैः सहस्नात्वाराधिकादिभिः सहतत्ररासार्थमागत्यराधामुक्तवान् ममतावदि
देतीर्थंतवतुकेतितलोराधातमाश्लिष्यतत्सोहार्देनराधाकुंडेतिप्रसिद्धंतीर्थंतत्तीर्थसमीपेचकारेतिविशेषउक्तस्तत्रतवेदकवाक्यतानुसारेणस्नानोत्तरंसर्वैः सहव्रजंप्रविश्यपुनरागत्यराधिकामु
क्तवानित्यादितत्त्वेयं १५ इयमेवकथंमथुरानगरीनगरीयसीनदग्राप्रसिता इतिकंसमुवाचमुनिः सहसा सहसाधुवरोवसुदेवसुतो १ तदाह अरिष्ट इति सार्धयुग्मकेन निहितइति चिरकालि
कत्वंतेयं गोवर्धनगतरासस्यवासंतत्वात् तदेवारिष्टवधात् कंसनघस्तुमाघशिवरात्राविति प्रसिद्धः अद्भुतकर्मणेति गोवर्धनोद्धरणादिकर्मणांकंसंप्रतिकथनाभिप्रायेण भगवानतएव देवब्र
ह्मादिवद्दुर्दर्शनंयस्य मयारामकृष्णौ वसुदेवसुतावित्यादिवृत्तेकथितेसनावत्रानयेतोच्येनेहनिष्यतोयादवादीश्वपालयिष्यन्इत्यादिज्ञानन्नित्यर्थः १६ देवक्या अष्टमगर्भत्वेनप्रसिद्धा
कन्यांयशोदायाःसुतामाह यशोदायाः सुतत्वेनप्रसिद्धं श्रीकृष्णं देवक्याःसुतमाह रोहिणीपुत्रंरामंचइदेवक्याःसप्तमंसुतमाह तर्हिकथंव्रजंगतोतत्राह वसुदेवेनेति बिभ्यतेति त्वत्तोभी
तेत्यानतवनध्यइतिभावः स्वोत्सातिश्यासोभित्रंचवैप्रसिद्धंत्वमेवनज्ञानासीत्यर्थः हताइतिस्वोक्तदृढीकरणायतस्यकोपंभयंचजनयितुंच १७ क्षुभितमिंद्रियंयस्येति विवेकापगमः १८ बबंधे
तिहतेपितरितच्छोकाद्याकुलोअवसरप्रतीक्षांकुर्वीयातांबद्धयोस्तुपित्रोर्मोचनार्थमत्राश्वेवागच्छयातामिति नारदोक्तमंत्रेणेवतद्ध्यान्निवृत्तोबबंधच देवक्यासहेतिशीघ्रंतयोरगमनाय १९
प्रतियातेइति केशीप्रेषणमंत्रभंगशंकयातत्रापिनिवारणशंकयावा आवभाष्यभोभ्रातरित्यादिसंबोध्यहन्येतांप्राप्येतामितिचाग्देवीमतेर्थः तयोर्लीयतामितिभावः एवमग्रेपि २० आहकोम
णानियुयाज २१ भोभोइतियुग्मकं मुष्टिकेत्येकवचनांतपाठेवीरेतिप्रोत्साहनार्थं द्वयोर्विशेषणं बहुत्वेवीराश्च चाणूरश्चेत्यादिवृत्तद्वंद्वात्संबोधनेजस् किन्त्विनिश्चितंनारदोक्तिप्रामाण्यात् २२
ताभ्यांसकाशान्ममम्हत्युर्निश्चयेनकथितोविधात्रेतिविशेषः इहेति स्वस्थानेतुबल्ल्तिष्ठे इतिभावः मल्ललीलयेति अन्यथासावधानोस्यातामितिभावः २३ अतस्तद्वंचनार्थमुत्सवसामग्रीसंपा
द्यतामित्याह मंचाइति विविधाराज्ञामात्यादियोग्यभेदेनमल्लक्रीडास्थानात्परितःस्थिताः किमर्थंतदाह पौरेति संयुगंमल्लयुद्धं अयंपौरादीनामपिवंचनप्रकारः २४ भद्र हे चतुरहस्तिपकरंगद्वा
रसमीपेनीयतां राजद्वारेहस्तिस्थापनरीतिः प्रसिद्धेतितद्वंचनंस्यादितिभावः २५ देवोप्युत्सवः कर्तव्योयेनतदुत्सवव्याजातौ वध्यानेयोस्यातामित्याशयेनाह आरभ्यतामिति भूतराजायभूते
श्वरनाम्नेमथुराक्षेत्रपालायरुद्रायेत्यर्थः मिढुषेवरवृष्टिकर्त्रेधनुषिचरुद्रआवास्यपूजनीयइतितस्यधनुर्यागत्वं २६ अर्थतंत्रे द्वितीयपुरुषार्थशास्त्रमेवजानातिनधर्मादिशास्त्रं यदु
पुंगवमिति सर्वैर्यादवानामास्थास्पदमयमिति गोपानामपिविश्वासःस्यादित्याशयेनेतिभावः ततस्तेत्रेतिपाठे २७ भोभोइत्यादरेदानपतेहेवदान्येति मयार्थ्यमानंदेहीतिभावः मत्प्रमदर्थं मि
त्राचितकृत्यं क्रीयतांत्वत्तोन्यःसादरोहिततमश्चनविद्यते २८ हेशौरत्वामाश्रितः शरणंगतोहं ननुसर्वार्थशक्तस्यमित्याशंक्यशक्तस्यापिविनासाहाय्यंकार्यसिद्धिर्नेतिदृष्टांतेनाह यथे
तिविभुरपीतिद्वेषेणविहीनोन्द्रेनत्वंव्यंजयति २९ कार्यमाहगच्छेति अनेनाधुनानिर्माल्यात्कृतेनइत्यभिनवरथस्थानमनुग्रहदर्शनाय वसुतोभगवतःपुरप्रवेशसामग्रीदेवकारिता

तेया ३० किमर्थं तत्राह निसृष्ट इति द्वाभ्यां तयोरेकतरादिति शेषः वैकुंठेति तैरपि देवैर्निसृष्टेन तेन मे किं स्यादिति भावः नंदाद्यैः सहेति अन्यथा शंकया नागमिष्यत इति भावः तेषामप्यनिष्टकरी
ष्यामीति गूढाशयः उपायनसाहित्यं मखस्य ताबोधनाय ३१ तत्र्व किमर्थं तत्राह घातयिष्य इति कालो मृत्युस्तत्तुल्येन अशनितुल्यैर्मल्लैः वाग्देवीमते तु यदीह पुर्यामानीतौ भवतस्तदा हस्तिने
व हेतुभूतेन घातयिष्ये रंगांतः प्रापयिष्यामि गजाहितः स्वयं पराभूय तयोरुत्साहवर्धनेनांतः प्रवेशे हेतुः अतो मल्लानां मम च मृत्युरूप इत्यर्थः तदनंतरं च मुक्तो स्वस्य मुक्ति निमित्तं मल्लै
रेव स्वसमीपं प्रापयिष्ये इति पूर्ववत् अतो मुक्तिहेतुत्वाद् दंष्टुतोपमैः अमुक्तिमार्गस्थित तेजोमयनेत्र देवतुल्यैरिति ३२ ननु तद्वधवामदनिष्टं कुर्युस्तत्राह तयोरिति युग्मकेन कुतः पूर्वमेव नह
निष्यसीतत्राह तयोर्हतयोः सतो स्तत्प्रधाने चेति काधातिशयः देवीमते तु मुक्तौ तयोः प्राप्तयोस्तद्धृष्ट्वा नापि प्राप्स्यामि तद्विना भूतत्वादिति भावः तत्कान् मम वधं दृष्ट्वा स्वसौशील्येन मद्विषयकानुताप
युक्तान् ३३ स्थविरं सर्वतो ज्येष्ठं तेन स्त्रायत एव राज्यकामुकं अविद्विषः येमान्द्विषंति अहमेव यान् द्वेष्मि तानपीत्यर्थः ३४ तत इत्यर्धकं अहमपि भोजनत्वा तद्बंधूरेव नेत्याह हे मित्रेति नष्टकंटका नष्ट
शत्रुः ३५ जरेति सार्धकं नृपान् कौरवादीन् देविमते नष्टाः मत्स मुख्याः सन्मार्गपीडकायस्या यतो जरासंधादिभिः सहैव सूकरपक्षीयान् पूर्वोक्तोग्रसेनादीन् प्राप्स्यमहीं भोक्ष्ये मुक्तो सर्वानंदान् भविता सो
वै भौमाद्या नेदान् प्राप्स्यामीत्यर्थः ३६ अर्भकाविति प्रतार्यानेतुं शक्याविति भावः प्रतारणप्रकारमाह धनुरिति वन्येभ्यस्तत्रापि बालेभ्यः उत्सवपुरीशोभादिदर्शनं रोचत एवेति भावः ३७ स्वस्य भगवद्
र्शनं तावानीयकं समारणमित्यादिष्टो सिद्धं निश्चित्य तदुक्तं श्लाघने द्वाभ्यां राजन्निति तव विचारितं सम्यगित्यत्र राजत्वं हेतुर्व्यज्यते राजा स्त्वदंडनीतिशास्त्रानुसारित्वादित्यर्थः स्वावद्यमरणं तन्मो
जेनं कुर्यात् तत्प्रतिकारादौ यतेतैव अन्यथात्महत्यापापापत्तेः किं तु सिध्यसिद्ध्योः समः सन् तदभिनिवेशेन पापेषु न प्रवर्ततेत्यर्थः हि यतो दैवं फलदं सममिति पाठे भावमिति शेषः ३९ दैवपक्षे
दृष्यितु यत्तस्य फलव्यभिचारमाह मन इति अपि पदात्किमुत दैवोपहृतानित्यर्थः तथाप्याज्ञामिति सर्वदेवमये शक्ति भक्ति प्रदर्शनं ३९ स्वं गृहं अंतःपुरं ४० इति श्रीमद्भागवत दशमस्कं
धमध्यगः अध्यायः षट्त्रिंश एष तोषिणी सारसंग्रहे १ इति श्रीभागवते दशमस्कंधे षट्त्रिंशोध्यायः ३६ कंसप्रतापरविरथतुरंगं केशिनमहन्त्वयं कृष्णः विरथमपुनरुदयं तमसि तु राहुह
सन्नूल्वत्रसखं १ माघकृष्णद्वादश्यां प्रातः केश्यागमनमाह केशीति केशी तु नंदव्रजं जगामेति शेषः महाहयः सन् महीं निर्जरयन् विदारयन् मनोजवः स्वपितृतुल्यः मनोजवः सपितृसंनिभ इत्य
मरोक्तेरिति भाति अन्वर्थनाम स्वं दर्शयति सटेति केसरैरेव धूतानि व्यस्तानि अभ्राणि विमानानि च तैः संकीर्णं नभः कुर्वन् हेषितैः स्वजातिशब्दैर्भीषितं भयं प्रापितमखिलं येन १ तद्धेषि
तैः हेषितैः निजव्रजं त्रासयंतं पक्षांतरे स्वगोकुलमिति व्यस्तमेव तं स भगवान् अन्वगणीः पुरतो यमुनातटे निर्गतः सन् उपाह्वयत् स्वसमीपमाजुहावेत्यर्थः गंगाशतगुणं पुण्यं यत्र केशी निपातित इति
वराहे यमुनामाहात्म्योक्तेः आघ्रापित तद्घट्टविशेषस्य केशीमथनतीर्थत्वेन प्रसिद्धेश्च ततो मृगेंद्रवद्यन्नदच्च कथं भूतं तं बालैः पुच्छलोमभिः परिभ्रामितामघायेन तं आजोसंगमार्थं आत्मा
नं श्रीकृष्णं मृगयमाणं अत्र भगवतो गोपान्प्रत्यभयोक्ति विष्णुपुराणे अलं त्रासेन गोपालाः केशिनः किं भयातुरैः भवद्भिर्गोपजातीयैर्वीरवीर्यं विलोप्यते किमनेनाल्पसारेण हेषिताटोपका
रिणेत्यादि २ स केशी तं कृष्णं दृष्ट्वा मुखेन खं पिबन्निव मुखं प्रसार्येत्यर्थः अभिमुखमभ्यगमत् किं चास्य मर्षणः असहमानः सन् प्रत्यकू पद्भ्यामाजघान हंतुं प्रवृत्तः दुरासदो दुर्ग्रहः यतश्चंडज
वः अतो दुरत्ययः अन्यैरभिभवितुमशक्यः ३ तद्वंचनं वंचइत्वा यतोधोक्षजः इंद्रियजन्यज्ञानाविषयः स कथं तस्य पादताडनक्रियाविषयः स्यादिति भावः तं च हननाय प्रसारितपादयोर्हस्ता
भ्यामरुषा लीलयेव गृहीत्वा भ्रामयित्वा उत्सृज्य प्रक्षिप्य व्यवस्थितस्तथैव तस्थौ ततः केशी मूर्छित इति शेषं ४ व्यादाय मुखं प्रसार्य वेगेनाद्रवत् सोपि हरिः हसन् यथा कश्चिद्व्यालपालः
स्वसर्पमाखुभयरहितस्तद्बिलप्रवेशयति तथा प्राणमूषकबिले केशीवक्त्रे सव्यं भुजं प्रावीविशत् ५ निर्जराग्न्येनोर्ततया निश्रीनस्यापि केशिनः अनेनतना केशवेन कृताल्पमुखमता १
नदेतत्त्वि त्रमिवाह दंता इति चर्वणाय भगवद्भुजस्पर्शिनस्ते वज्रोपमा दंता नितरां समूलल्पेतुः तप्तत्र्ययो लोहस्पर्शाः स्पर्शतो यथा कर्मणि षष्ठ्यभावस्तद्गर्हमिति निर्देशो नानित्यत्वात्
विसर्गलोपेन पाठः अत एवार्थांतरं तप्तमयमतितप्तद्रव्यं तस्य स्पर्शिनो यथेति सम्यक्प्राणमार्गणरोधनेन वर्धे तत्त्वनान्यैर्लक्षितं यतस्तद्देहगतः आमयो जलोदरादिः ६ लेंडपुरीषं ७
कर्कटिकाफलं यथा फर्के सद्यस्तं विदार्य तेन द्विदीर्णा द्विगतप्राणा तस्य देहात् अत्र विशेषो विष्णुपुराणे द्विपादपुष्टपृष्ठार्धश्रवणेकाक्षिनासिके केशिनस्ते द्विधाभूते शकले च विरेजतु
रिति अयत्नहतारिरप्यविस्मितो गर्वरहितः पक्षांतरे भीषणवधेपि न विगतस्मितः भयाभावात् तदाह अयत्नेति तथा च विष्णुपुराणे अनायस्ततनुः स्वस्थो हसंस्तत्रैव संस्थित इति तत्रैवैतद्दृष्ट्
तरं गोपगोपीकृतस्तकस्याद्युत्सवविशेष उक्तः ८ तन्नयतां फपद्धयितु तत्तद्रसपाकभावनाचार्यः कंसायोचेच्यततमिह हरयतसाकसिद्धिमाह मुनिः ९ मनसस्तन्मयतां विना भगवत्प्राप्तिर्न

तिमत्वा तदर्थं कंसाय श्रीकृष्णमव्यक्तमुपदिश्य भयेन तन्मयतां सिद्धान्तात्वाव घ पूर्वकं कंसादिभ्यो मुक्तिं देहीत्याशयेन देवर्षिर्विज्ञापयति तत्रस्तौति देवर्षिरिति नचायं स्तावक इत्याह भागवतप्रवर इति ससैनिकंसा
गमनभयनिवर्तनेन व्रजस्यापि हितान्याचरणात्कंसादेरपि मुक्तिपर्यवसायकत्वाच्च सर्वं कृतं भगवतस्तत तल्लीलासंपादनाधिकृतभक्तेषु श्रेष्ठः श्रे। इत्यर्थः वक्तव्यस्य रहस्यतां द हसित्र भाषत ८ मया यत्कंसं प्रति सू
चितं तद्भवदीयताद्वारा लीलावसरं ज्ञात्वैव यतो भवत्प्रसादेन भवतस्त्वं लीलानुक्रमं च वे प्रीतिविज्ञापयन् तत्वं तावदाह त्रिभिः कृष्णेति युग्मकं हे कृष्णेति सदानंदं ब्रह्मत्वेव त्वमिति भावः वीप्सा तन्निर्धाराय अप्रमेया
त्मन् अप्रमेयः ब्रह्म कथमेवं भूतमिति तर्कितुमशक्यः स्वस्यापि विस्मापक आत्मा स्वरूपं यस्य एवं स्वरूपमुक्त्वा तटस्थलक्षणान्याह योगानामित्यचिंत्यशक्तीनामीश जगदीश्वर हे त्रीलोकीपते वासुदेव वि
भुत्वात्सर्वभूतेषु वर्तमानत्वात् अखिलाधार सर्वाधिष्ठान संप्रति सात्वतां यादवानां गोपानां च मध्ये श्रेष्ठतया विराजमान नित्यत्वं व्यंजयति हे प्रभो कात्यायनशक्तिमन् १० एवं संबोधनैरेव श्रीकृष्णतत्वं
६ दर्शयित्वा विष्णोस्तु त्रीणि रूपाणि इत्युक्तं शास्त्रमाह त्वमिति सर्वभूतानामेकः अनुस्यूत आत्मा अंतर्यामीत्यत्तीयं सर्वभूतस्थमित्युक्तस्वरूपत्वमित्यर्थः अंतरत्वेनुस्यूतत्वे च दृष्टांतः एधसां काष्ठानामंत
र्ज्योतिरिवेति भूतैः स्वांतस्थितोंतर्यामी किं छादयते तत्राह गूढ इति तत्र हेतुः गुहाशयः बुद्धेरभ्यंतरः किंच बुद्ध्यादिसाक्षी न हि दृश्येन स्वद्रष्टा दृश्यत इत्यर्थः त्वं महापुरुषो द्वितीयं त्वंडसंस्थितमित्युक्तो वि
राडंतर्यामीत्यर्थः ईश्वरः प्रथमं महतः स्रष्टृ इत्युक्तो महदादिस्रष्टापि त्वमेवेत्यर्थः एवं रूपत्रयात्मनापि स्थितस्त्वमिति भावः ११ प्रकृतोपयोगित्वेन प्रथमरूपस्य कार्यमाह आत्मनेति साधनांतरनिरपेक्षत्वे हेतुः
सत्येति संकल्पैकसाध्यत्वात्स्वकारकापेक्षाभावादिति भावः १२ एवं तत्वं प्रदर्श्य लीलानुक्रमान् गुरवरूपावतारे कारणमाह सत्वमिति भूधरा राजानः तद्रूपाणां दैत्यादीनां राजरूपाः प्रमथाः काशिराजादयः
सेतूनां साधूनामिति पाठो १३ एवं भूतनाद्यानाश्रिता एनाये तु परमदुर्मार इत्याह दिष्ट्येति अतः केशवनामा भविष्यतीति शेषः यस्मात्त्वयैव दुष्टात्माहतः केशीजनार्दन तस्मात्केशवनामा त्वं लोके गेयो भविष्यसी
ति विष्णुपुराणे तदुक्तेः केशं केशिनं अर्दयाद्य चवातिहिनस्तीति व्युत्पत्तेरिति भावः १४ स्वस्य लीलाभिज्ञतां स्पष्टीकर्तुं भविष्यद्विवरणव्याजेन चाणूरादिवधं विज्ञापयति चाणूरेत्यादिना अप्यर्थे च काराः
ते तेषां सर्वेषामवस्यतद्व्यत्त्वं विज्ञाप्येत परश्वोहनीति अद्याक्रूर एष्यति परश्वो मथुरां गंतासि परश्वः श्वाणूरादीस्त्वयानिहतान् द्रक्ष्यामीत्यर्थः १५ तस्येति पंचकं तदनंतरं शंखादीनां वधमिति शेषः स
र्वेषां द्रक्ष्याम्यहमिति पंचमश्लोकस्थेनान्वयः शंखः पंचजनः तावि संग्रहमात्रमेतन्न तु क्रमो विवक्षितः १६ वीराणां राज्ञां कन्याः हे वीरेति वा वीर्यमेव शुल्कं तद्दादिर्यस्य कन्याभनत्तया देस्ते देच प्रकाराय
त्रंते पापाद्गोहरणजात् द्वारकायामिति यथार्हं पूर्वत्रपरत्र च योज्यं तेन द्वारकानिर्माणादि सूच्यते १७ नार्ययोज्ञाववस्यासह मृतपुत्राणां प्रदानं उपादानमिति क्वचित् स्वधामतः स्वस्थानविशेषात् १८ प
श्चात्यौं दुकवधानंतरं १९ अन्यानि एकेन युगपन्नानागृहेषु बह्वीभिः सह गार्हस्थ्यादीनि भवान्करिष्यति तानि द्वारकामावसन्नहं द्रक्ष्यामि अवात्सीन्नारदो ह्यभीक्ष्णमित्येकादशोक्तेः २० अर्जुनसारथि
तामात्रेण निधनं नचेदमाश्चर्यं यतः कालरूपस्य सतः अमुष्य अदो विश्वमपि क्षपयितुं क्षमो नाशयितुं क्षेमस्य २१ एवं विज्ञाप्य कृतार्थं नंदनं तं नमस्यति द्वाभ्यां विशुद्धेति विशुद्धं केवला द्युपाधिरहितं विज्ञान
मानं दं ब्रह्मेति प्रसिद्धं यत्तद्ब्रह्मस्वरूपभूतं विज्ञानं तद्रूपो याघनो मूर्तिस्तल्लक्षणं भगवंतं निरतिशयैश्वर्यं शरणं यामि ननु विज्ञानस्य कथं करचरणाद्याकारमूर्तित्वं भगवत्वं वा तत्राह स्वरूपभूतया
चिंत्यया चिच्छक्त्या सम्यगाप्तः ससर्वोप्यर्थो येन यतः आमोघं वांछितं चिद्रूपेच्छाशक्तिस्तत्पोषयिणीयस्य ननु मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति जडामिथ्यारूपा मायाख्या शक्तिरप्यप
रामम श्रूयते तथा सह मे नैरूपः किं न स्यामित्याशंक्याह स्वतेजसेति स्वरूपप्रकाशेन नित्यनिवृत्ता माया तद्गुणास्तत्कार्यप्रवाहश्च यस्मात्तं २२ त्वामित्यर्धे पूर्ववत् तदंशानत्व परं स्वाश्रयं स्वतंत्रं आ
त्माधीनया मायया विनिर्मिता अशेषा महदादिविशेषकल्पना येन ननु एवं भूतस्य मम मायिकप्रपंचे अभिव्यक्तिः किमर्थं तत्राह क्रीडार्थमिति अद्य संप्रति तु क्रीडार्थं यादवादीनां मध्ये जातः प्रक
टितः मनुष्यादिमहोनराकृतिर्ब्रह्माख्या येन तं त्वां प्रपद्ये सर्वं अश्वंतनोस्मि अभ्यानेति पाठेप्ययमेवार्थः २३ यदुपतिमिति व्रजेत्यं तु मनिछन्नपि यदुपतित्वव्यंजकविशेषणे मुन्युक्ते तत्तदंगीकृत
वान्यसौमित्यर्थः साष्टांगप्रणम्य यतो भक्तश्रेष्ठः श्रीकृष्णदर्शनेनभवोत्सवो यस्य सोपि ययौ यतोनुज्ञातः २४ मुनिर्ययौ भगवानपि पशून पालयद्दिस्यपेरर्थः यतो गोविंदः प्रकृत गोकुलेंद्रत्वोचित
लीलामनुमोदमान इत्यर्थः हत्वेति मुनिसंवादात्पूर्वं वस्यानुवादः प्रीतैर्गतकेशीनयैः पालैः सह २५ पर्वतं नो व्योमवधो वेषधारि प्रसंगतः अत्रोच्यते तत्तौ नैष नारदेनानुवादितः १ नापि भावितयानेन
विज्ञापित इस्फुटं किंचैवं ताद्दशलीलेयं कौमारे ऽभवेततः मयात्मजादिति च सा गोप्यकृतिरपि संगता तस्मादत्रैकदेशेत तृतीयाद्यार्थबोधकं २ एकदा बकवधोत्तरकाले निलायनं चौरितस्यति
रोधापनं चोरेति केचिच्चौराः केपिरक्षकाः केचन मेषाइताइत्यभिनये नेत्यर्थः २६ तत्र तस्यां क्रीडायां मेषायिता मेषवदाचरिताश्चैके एवं तत्राद्रिसानुषु चिक्रीडुः २७ स्वयं चोरवदाच
रितः सन् प्रायो बहून् पोवाह अपकृष्य निनाय २८ पिदधे छादितवान् चत्वारः पंच वा चतुः पंचावशेषिताः अवशेषिताः अवाप्योरुपसर्गयोरित्यल्लोपः पंचावशेषपर्यंतं पालक
गोपानाम ज्ञानं च स्वीये रेव चौरा इत गोपेर पहृता इति च मत्र २९

राम
६१

तस्याः करस्यैव तत्कर्म नस्त्वीय गोपानामिति विज्ञाय शरणदः शरणरूपमात्मानं ददातीति सः हरिः सिंह इव २० बाल्यपि मोक्तुमिच्छन्नपि निजरूपमास्थायापि नाशक्नोत् २१ दिवीति भयेन दूरत एव स्थित्वाह
र्षेण पश्यत्स्विव त्यर्थः पशुमारममारयत् यज्ञिय पशुमिव श्वासरोधेनामारयदित्यर्थः उपमानेक कर्मणि चेति णमुल् म्रियते पर्यंतस्यानुप्रयोगश्च तस्याः क्रीडायां धृतचोरस्य क्षणं दंडेऽप्यनुक्रीयते तत् व्याजे
नामारयत् श्वासरोधनं चेतेन गोपानामनु छ्वासंरोधनात् २२ कृष्णतो दुःखस्थानात् दिविस्थैर्भूविः ॥ गोपेभ्यः स्तूयमानः गोपैः सह विवेशेति वा अनुगैर्गोपैरिति पाठांतरं त्वस्य गोकुलमिति वक्ष्यमाण
स्या गोनास्त्यतीन इति भावः २३ श्रुताः श्रूरा भ्रूरसाकौन्ददाताना युंचा जिह्मवः नव्यो महान् कृष्णकृतो नव्यो म विज्ञयः श्रुतः १ इति श्रीमद्भागवतदशमस्कंधमध्यगः सप्तत्रिंशतमोध्यायस्तोषिणीसारसं
ग्रहे ॥ इति भागवतदशमसप्तत्रिंशोध्यायः ३७ कृष्णाननं कांतिसंघोघकं संदृश्यमवाप्तु भजंति स्म कंसं तस्मै नमो क्रूरबुधाय कंसो यं हर्तुं मारब्धयदुनायकः सः १ न नं श्रीकृष्णवर्मेव स्वर्द्दुर्यद्वृष्णिकुला
ध्वनि अचिंतयद्यभाक्रूरस्तत्रैवापसत्कृति २ तदेवं नारदेन कंसवधादिकार्यं विज्ञापिते क्रूरोपि गोपालमगादित्याह अक्रूरोपीति कंसादिष्टः केशी प्रातरागतस्ततो क्रूरोपि प्रयया विस्त्यपरर्थः यस्यां रा
त्रौ कंसेनादिष्टस्तां रात्रिमुषित्वा महती भक्तिरूपा मतिर्यस्य प्रययौ प्रतस्थे नंदेति विशेषणं शुकस्य तच्छिष्टत एवं स्फूर्तेः १ महामतित्वमेवाह गच्छन्नित्यादिना गच्छन्नेव पथि परां भक्तिमुपगतः एवं किम
याचरितमित्यादि प्रकारैरेतत् मयापि भगवान्द्रक्ष्यत इत्यचिंतयत् यतो महत् कृष्णरूपारूपं भाग्यं यस्य २ चिंतितमेव प्रपंचयत् तस्य सवितर्कहर्षोक्तिमाह किमिति मयापीत्यन्वयः गर्हितेनापी
त्यर्थः किं कतमत् भद्रं भगवत्सृष्टादि वासमुच्चये अथवा कास्मै अर्हते प्रजाय यस्मात् भद्रादेः केशवं दुर्दर्शी ब्रह्मशिवयोरपीशं द्रक्ष्यामि तत्त्वाद्यैव ३ सदैन्यमाह ममेति एतत्पूर्वश्लोकोक्तं भाग्याचरणा
दि साध्यं यद्वाधुनिकं स्वानुभवैकवेद्यमाहात्म्यं उत्तमाः भवतमो नाशनः श्लोकोपि यस्य तस्य दर्शनं दुर्लभं किंतु साधनबाहुल्येस्तदपि जन्मांतरे एव लभ्यं मन्ये यतो विषयात्मनो विषया विष्टस्य
शूद्राज्जन्म यस्य तस्य वेदोच्चारणं यथा जन्मांतर एव नरर्भस्य द्रस्यतु प्रायश्चि चेन्नेह जन्मान्यपि स्यादित्यर्थः ४ धृतिमतित्यामाह मैवमिति अधमस्य साधनसंपद्धिनस्यापि मे अच्युतस्य भ
जनाभासेपि कृपालुत्वात्व्यतिरहितस्य दर्शनं स्यादेव निरर्शनं चिंतयति कर्माधीनैः प्रवाहेण संसार्यमाणोपि कश्चित्सांकेत्यनामादिनिमित्तेन कश्यनाज्ञामित्यादि स्तरति भगवंतं प्राप्नोति नदी रूपकेण नद्या
ह्रियमाणः कीटादिरनुकूलवातादिना तरतिं तद्वदिति व्यज्यते ५ एवं निश्चिस्य सगर्वमाह ममेति अमंगलं ममाद्यैव नष्टमेव भवोजन्म च सफलं जातं यतो योगिभिरपि ध्येयमेव यस्यादपद्मं तत्साक्षा [illegible] त्वस्य न
मस्यामीत्यर्थः अत्र भगवत्कारुण्यमेव हेतुरिति सविस्मयमाह ६ अत्र भगवत्कारुण्यमेव हेतुरिति सविस्मयमाह कंस इति बताश्चर्ये अतिखलः कंसोपि ममात्यंतमनुग्रहं कृतवान् यतोमुना प्रहितो हरेरंघ्रिपद्मं द्रक्ष्या
मि भगवत्कारुण्यं विना सकथं मामेव प्रेषयेदिति भावः पूर्वे अंबरीषादयो यस्यांघ्रिपद्मस्य नखमंडलस्यैकयापि कांत्यां तः स्फुरितमात्रयात मः संसारमरन्तीर्णाः ७ अंघ्रिपद्मस्य महिमाधिक्यं विभावयन् सच
मत्कारमाह यदिति प्रपंचाधिकारिभिर्ब्रह्मादिभिः करैर्यदंघ्रिपद्ममर्चितं अर्च्यमानः मतिबुद्धीति वर्तमानोक्तिः षष्ठ्यर्थो वा आर्षः एवं ब्रह्मादिकोपास्यत्वेनैश्वर्यमुक्त्वा तच्छिरस्य देस्तद्धस्यदेश्योपास्यत्वमाह श्रि
येत्यादिना श्रियेति सौभाग्यातिशयः इदं वैकुंठस्थानामुपलक्षणं मुनिभिरिति प्रपंचस्य भक्तोप्याह कं सिद्धे सार्थके तं के श्रेत्यर्थस्तेन परमपुरुषार्थत्वं तस्य कृपालुत्वं गोकुलस्य सर्वोत्कर्षं च व्यंजयन्नाह गोचा
रणेति तदेवात्र गनामनुचरं भवति तदप्यास्तां गोपिकानां कुचनिर्माल्यरूपैः कुंकुमैरंकितं भवतीत्यहो आश्चर्यमिति भावः आचितमिति पाठे व्याप्तं ९ इदं नारदादिमुखात् प्रसादिश्रुत्वा प्रेमैकस्फूलभक्त्वं चिंतितमि
ति नदासभावविरोधः बालकृष्णमुरस्याधायत्लोलयंतीनां गोपिकानामिति चार्थः एवं गोकुलचरितस्फूर्तिर्भक्तिप्रभावेणैवेति ज्ञेयं ८ एवं तस्य नादोपादाक्षादर्शनं विभाव्य लोभेन श्रीमुखदर्शनेपि मनोरथं
करो ति द्रक्ष्यामीति शोभनौ कपोलौ नासिका च यस्मिन् तत् स्मितसहितावलोको यत्र अरुणे कंजलोचने यत्र तच्च तच्च गुडालकावृतं वक्रं केशावृतं मुखं नूनं निश्चयेन द्रक्ष्यामि निश्चये हेतुः प्रदक्षिणमिति प्र
दक्षिणं गोर मुखाश्च रंतः कृष्णमे युतामंगलदा अयुग्मा इत्यर्थक शकुनं तत्रादिति भावः ९ अधुनातिलोभेन सर्वांगदर्शनेव मनोरथं करोति अपीति विद्मोः परिपूर्णस्य भगवतः उपलंभनं दर्शनं हयं मम दृशः फ
लेअपिः प्राकाम्ये प्रकामं अद्यनस्यादिति न अपितु भविता भविष्यत्येव तत्राध्यं जरा नभवितेति न किंचनायासेनेव नतु योगादिवत्साधनक्लेशबाहुल्येनेत्यर्थः अद्यतने लुडार्षः कीदृशास्य स्वेच्छयैव मनुजत्वे मनु
वेशोप्रादुर्भूतत्वं प्राप्तस्य लावण्यस्याखिलसौंदर्यस्य धामाश्रयस्तस्य १० ननु कर्तृत्वादिधर्मै रस्मदादितुल्यतया प्रतीयमानस्य कथं विष्णुत्वेन दौर्लभ्यमुच्यते कुतश्च तद्दर्शनादेर्महात्म्यं तत्त्वं तथात्वेवातव कथं सौ
लभ्यमितीमां शंकां क्रमेण त्रिभिः श्लोकैर्निरस्यति य इति त्रिकं सत्त्वावतीर्ण इति तृतीयस्थेनान्वयात् यः असस्ततोः स्थूलसूक्ष्मयोर्देहयोरपि शाप्यत्कारणदेहे पि ईक्षिता साक्षितया विद्यमानः साक्षित्वे हेतुः अ
हंरहितः अहंकाररहीनः तत्रापि केमुख्ये न हेतुः स्वतेजसा स्वप्रभावेण अपास्तं तमस्कृत्ना विद्यातत्कृता भिदा भेदश्च भ्रमोभिनिवेशादिश्च येते जीवगता अपि येन् स्वशक्त्या जीवेपि विद्याशक्तिमुत्पाद्य तद
सीनादिना शोकस्य कुत आविद्यको हं कोर इति भावः तथापि तदीक्षया तदीक्षणप्रेरितया स्वयास्वाधीनया मायया प्राणाक्षधीभिः कर्मेंद्रियज्ञानेंद्रियांतःकरणैः सह आत्मनस्स्वस्वरूपे रचितैर्जीवैः स
दनेषु गोपीगृहादिषु कर्मणि कुर्वन्ति वाभिमुख्येनेयते ज्ञायत इत्यर्थः यद्वा स्वयं रचितैर्जीवैः प्राणाक्षधीभिस्तत्प्रवृत्तिलिंगेन सदनेषु सर्वभूतहृदयेषु अनुमीयते मात्रं न तु दृश्यत इति भगवानस्त छष्ण

काल
ना.द.तो.
६१
६१

वीक्षते पुलक्षितः स्वात्मना हरिः इत्येवं ध्यादिभिर्द्दृष्टेत्यादिद्वितीयोक्तेः ११ एवं परमात्मत्वेन दुर्लभत्वे चव्यं जयित्वा तद्दर्शनादेर्महात्म्यत्वं केमुत्येन व्यंजयन् तद्विमुखान्निंदति यस्येति गुणाः कारुण्याद
यः कर्माणि च जन्मानि च तैर्विमिश्राः युक्ता वाचः जगत् श्रोत्र वक्त्रादिरूपं सर्वमेव प्राणंति सफलजीवनं कुर्वंति अन्यथा भस्त्राः किं न श्वसंत्युतेति न्यायेन मृतप्रायत्वात् शुंभंति विरक्तिशांत्यादिगुणो सा
दनेन शोभंति मुमुक्षाज्ञानोत्पादनेन पवित्रयंति च नहि ज्ञानेन सदृशं पवित्रमिहेत्युक्तेः किमुतात्मानं किं पुनस्तद्दर्शनादिरिति भावः तत्र हेतुत्वेन गुणादिस्वभावानाह अखिलानि अखिलस्य वा अमी
वा निःसर्वानर्थमूलानि पापानि घ्नंतीति तैः तथा शोभनानि मंगलानि सर्वसद्गुणमुक्त्यादीनि च येभ्यस्तैः व्यतिरेकमाह तैर्विशेषेण रिक्ताः शून्या या यास्ता वाचः सालंकाराः अपि वस्त्राद्यलंकृतशववच्छोभ
नाः सतां मताः शवस्येव व्यर्थत्वं स्वतोऽशोभनत्वं स्वाश्रयस्याप्यशोभाहेतुत्वं स्वतोऽपवित्रत्वं परस्याप्यपावनत्वं चेत द्रष्टा इति भावः विरक्ताः इति पाठे तत्पुविरक्ता अनासक्ताः इत्यर्थः १२ एवं यदीक्षिता यस्य
गुणादीनामेवं माहात्म्यं स च स कृत् दुर्लभोऽपि साक्षात्तान्वयेऽवतीर्णः सन् अजे आस्ते ततो मम सफलं भूत इति भावः स्वसेतून् धर्मादिमर्यादाः पालयता ममर वर्गाणां स्वदर्शनादिना सुखकर्ता अन्यकालिकानामपि
यशोद्वारा शर्मकृत्त्वमाह यत्रा इति यद्यशो देवा अपि गायंति यच्च अशेषजीवानां मंगलं तत्तत्कर्तृत्वं च नास्मदादिवत्कर्मपारतंत्र्येणेत्याह ईश्वर इति १३ ननु एवं सात्वतान्वये वतीर्णत्वादिना सर्वेयाद
वादिसाधारण्यात् तर्हि कथं सुलभस्तत्राह तमिति तु शब्दः सर्वयादवादितोऽपि निजभाग्यवैशिष्ट्यविवक्षया अहं तु नूनं निश्चये अद्यैव तं द्रक्ष्ये गतिं गम्यं गुरुमुपदेष्टारं त्रैलोक्याद्यपि कांतं अतो दृष्टिम
तां स्वसहितानां सर्वेषां महोत्सवरूपं विस्मापनं स्वस्य चेत्युक्तेः अत एव च श्रियोऽपि ईप्सितं इप्सा तस्या स्पदं एवंभूतं रूपं सौंदर्यं दधानं द्रक्ष्ये इत्यत्र लिंगं उषसः प्रभातकाला शुभदर्शनाआसन्न सुप्रभा
तहि शुभफलसूचकमित्यर्थः बहुत्वमेकेन सुप्रभातेन दृष्टं फलं न स्यादिति भावः १४ ननु तयादर्शनमात्रेण तु प्यामन्नो रथांतरं कुरुते अथेति तद्दर्शनानंतरं क्षणमेव रथादवतीर्णः सन् प्रधानयोपु
रुषयो रामकृष्णयोश्चरणयोः भिरुप्यात्मलाभाय यद्वा स्वस्य भगवत्प्राप्तये केवलं बुद्धैव च तं साक्षादहं नमस्यामि वर्तमानसामीप्ये लट् आभ्यां मनयोः सखीनुगोपाश्च नमस्यामि वनौकस इति किं
पुनः सखीनिति सर्वानपि वंदावनप्राणिनो नमस्यामीत्यर्थः किमन्यन्नमाहरिष्ये कर्तुं शक्यमिति भावः १५ अधुना तत्किं विशेषेण येन नमस्कारे प्यत्र त्या केरस्पर्शमभिलषति द्वाभ्यामपीति प्राकाम्य अधास्यत धास्यति
निजेति कस्यचित् अश्रियस्य सख्युर्हस्तधारणेऽपि कृतार्थता तथापि निजहस्तं धास्यति किमिति भावः हस्तपंकजं विभायति दत्तेति कालस्य भुजंगाः अलक्ष्यगामित्वात् तस्यानुद्रवणेनोद्विग्नानां मनःशरणे षूनां जीवा
नां चतुर्थ्यर्थे षष्ठ्यः तेभ्यो दत्ताभयं प्रावृतानां मुच्यस्त यनिवर्तकं भुग्नस्तूणं भवभयनिवर्तकं चेत्यर्थः १६ पुनस्तदेव विभावयन् मनोरथं दृढयति समर्हणमिति सम्यगर्ह्यते येन तद्दानसंकल्पादके कौसि
कः इंद्रः यातक्रतुः समाप्तिकाले बलिश्च पदत्रयमिति भूदानकाले निधाय जगत्त्रयं प्रतामापेति अधुना इंद्रः बलिर्भावि मन्वंतरे इति विभागः बलिपक्षे भूतानि दृशः फलस्यापूर्वरूपेणोत्पन्नत्वात् एवं सकामभ
क्तेषु सर्वे समृद्धिपदत्वमुक्त्वा अनुरक्तानां परमानंदपदत्वेन सर्वदुःखनिवर्तकत्वमाह यदिति वावितर्के कस्माद्विघ्नत्वेवं वितर्कयामीत्यर्थः दिव्यपंकजेषु गंधोद्गुणलेशो यस्य तादृशं यद्धस्तपंकजं विहा
रे रासक्रीडायां श्रमं स्पर्शमात्रेण सर्वयोषितां युगपदभ्यपानुदत् अहो अद्भुतं कारुण्यमिति भावः १७ उत्कंठास्वभावेन संभवमाशंक्यमति त्वबलेन परिहरति नेति कंसेन प्रहितोऽतस्तस्य दूतोऽहं तथापि मयि
अरेरयमिति बुद्धिं न करिष्यति यतो विश्वदृक् सर्वज्ञः अतो मम चेतसो यदंतर् बहिश्च वृत्तं दृक्षादिरूपं बहिरेव यदीहितं कंसादेः स्यरूपं चेष्टितं एतद्यः क्षेत्रज्ञः अंतर्यामी नित्यं संविदेक्षतएवेति १८ एवंनि
श्चित्य प्रेमोत्थस्वभावेन मनोरथांतरं करोति अपीति अंघ्रिमूले चरणोपाते वहितं संहितं मां दयाद्रया दृशा इक्षितापि इष्यतीति संभावयामि तदा च सद्यो वन विनष्टं समस्तकंससेवादिलक्षणं कल्म
षं यस्य गताविविधाशंका यस्य तादृशः सन् परां मुदं वोढा वहस्तन् प्राप्स्यामीत्यर्थः १९ तेनात्मानमन्यमनोरथः सुहृत्तममिति परममित्रं मां परीरप्स्यते आलिंगिष्यति दृढः स्यामिति गाढालिंगनमभिप्रेतं
तदेव भगवान्मात्मा देहः तीर्थी क्रियते अन्येषामपि पावनहेतुः करिष्यते अत आलिंगनोत्कमोत्सुकः प्रारब्धकर्मवृषः बंधश्च तदुद्भसीति शिथिलो भविष्यति २० मनोरथांतरं लब्ध्वेति अंगसंगलब्ध्वा हर्ष
णपुनः कृतप्रणामं किं च कृतांजलिं मां गत भौतातेति यद्वावक्ष्यति यतः उरुकीर्तिः दीनरूपाकरत्वादिरूपा यस्य तदा वयं जन्मभृतः सफलजन्मानः इत्यस्य मनोरथस्य सर्वतो महत्त्वमभिप्रेतं एवं पूर्वमनोर
था नामुत्तरोत्तरं श्रेष्ठ्य महीयसा भगवता यद्वा गुणैर्महत्तमेन तत्कृते नापि किं पुनस्तेन योनादृतः संभाषणादिना न संमानितः अमुष्यजंतोः तन्महत्तमानादृतं जन्म धिगिति २१ ननु सुहृदोऽपरि रं
तप्रश्नाद्याजीवधर्माः श्रीकृष्णकर्पं संभाव्यंते तत्राह नेति चकारः सुहृत्तमादित्रये न्वेति पुनर्नकारः प्रियादिनिषेधे प्राप्तिप्रियादित्रयनिषेधद्वदार्ढ्यायएवेति भक्तानि स्येत्रान्वेति वैकल्पस्य समु
च्चये तथा चायमर्थः तस्य कश्चिद्केऽपि दयितः प्रीतिविषयः सुहृत्तमः उपकारतः प्रत्युपकारविषयश्च न तद्विपरीतः अप्रियश्च अपकारतो द्वेषविषयश्च नैव उपेक्ष्यो वा सोपि नैवेत्यर्थः यद्य
प्येवं तथापि भक्तानेव भजते अप्रियाद्यनावपि अभक्तान्न भजतीत्यर्थः तत्र च यथा यादृशा भावनया ये भक्ताःस्तांस्तथा तादृशा प्रादुर्भावादिना भजते ये यथा मां प्रपद्यंते तांस्तथैव भजाम्य

हमित्युक्तेः एवमपि वैषम्यनैर्घृण्ये नेत्यत्र दृष्टांतः सुरद्रुमइति तस्मान्मयि सुहृत्त्वमादिभावादिकं करिष्यत्येवेति भावः २२ एवं संभाव्य लब्धाश्वासोन्यमनोरथं कुरुते किं चेति किं संभावनायां वास
मुच्यये अग्रजश्च किं मया क्रियमाणां जल्पावेव परिगृह्य गृहं प्रवेश्य प्राप्तानि सर्वाणि पूजादिसत्कृतानि येन तं मां वसुदेवादिषु कंसस्याच्छिन्नं प्रक्ष्यतीत्यर्थः गृहप्रवेशनादौ हेतुरग्रज इति २३ ए
वं चिंतयन् मार्गमपि न वेद तथापि रथेन प्राप्तः इदमत्र व्यंजयति चिंतयत्येव सततं स्वकं नो वेद सत्पथं विपथं वै पतदपि प्राप्तात्यक्रूरवद्धरिं २४ गोष्ठे तत्समीपे पदानि ददर्श पदानां माहा
त्म्यमाह व सर्वैर्लोकपालैः किरीटेषु ज्वायत अमलाः संसारादिमलनिवर्तकाः पादरेणवो यस्य तस्य छिन्ते कोनु रुमुत्सवो रेभ्यस्तानि क्षित्यालंकाराय व्यक्ततया धृतानीत्यर्थः अब्जो
त्यादितस्यैवैतानि पदानीति चिन्हानेहेतुः २५ तद्दर्शनजन्याल्हादेन विवृद्धः संभ्रमः कर्तव्यतानुसंधानाभावकरी मानसीत्वरा यस्य उद्धानिरोमाणि यस्य अश्रूणां तेत्रा कुलेनेत्रे यस्य र
थादवप्लुत्य नु च पदेषु अचेष्टत अलुंठत्प्रेमासन्ति यथा लक्षं सर्वैरन्वेति परमेश्वरस्थानिरग्रहोऽस्मान्ति दुर्लभानि निविभावयन् नमवदेश्चेत्यर्थः २६ ननु किमर्थमेवं व्यलुंठत इत्यत आह पेक्षा पानाति
प्रमसंभ्रम फल्यो हेत्राइति व्यंजयन् भक्तानुरदेकेणप्रशंसति देहमिति देहभाजा सेनाभावेव पुरुषार्थः कंसस्य संदेशादारभ्य हरेर्लिंगस्य पादचिन्हस्य दर्शनेन छत्लोलुंठनरूपः श्रवणादिनाच यदर्चि
तमित्यादिकं चकुं कुमांकितमित्यादि विभावनरूपो योयमक्रूरस्य संभादिराहित्येन जात इति नहीदमक्रूरस्यांतः मुखांतरतास्यैल्लक्षणदंभमूलकं अंतर्गमित्वचिंतनात् नापि कंसभयव्यंजनाय
कंसनापितं बंधुवर्गशोकव्यंजनायवा नहर्शनाल्हादस्फुटेः प्रेमविभिन्नधैर्य इति तृतीयोक्तेश्च २७ पुनरथमारुह्य गच्छन् प्रथमं कृष्णं ततो रामं चापश्यदित्युक्तेन ददर्शेति व्रजे गवामावासम् दित्याह
ध्ये कीदृशौ गोदोहनस्थानं गतौ तत्रापि वत्सवर्गमध्ये ददर्शेति पराशरवेदव्यासो पायनौ तावेवयथा दर्शनक्रमं वर्णयति पीतेत्यादि तत्रादौ दूरादेव वस्त्रदर्शने ततः पद्मवद्रुत्केक्षणदर्शने २८ स्तो
क्षणदर्शनेन च किशोरौ यमन्तरुत्तमित्याह किशोराविति ततोवर्णनिर्वर्णनमित्याह श्यामत्लेति ततः शोभोपलंभ इत्याह श्रीतिव्रहदिति वत्सादिनियमनार्थमुत्थापितभुजयोर्दर्शनमित्यर्थः
ततः श्रीमुखावलोकनमित्याह सुमुखाविति सुंदरेति ततः सर्वांगसौंदर्यपर्यालोचनमित्यर्थः बालानवपि द्विरदविक्रमाविति बलाद्यवगतिः २९ ततो वत्सादिप्रस्थानोद्यमावेतौ दृष्टौ इत्याह ध्वजेत्या
दि ततस्तत्कृपादर्शनमित्याह सान्त्विति रूपाविल्लसितस्मितयुक्तमीक्षणं ययोस्तौ ३० उदारेति ततोगवाक्कानरोधनादि महामनोहरक्रीडादर्शनमित्यर्थः ततो वेषविशेषदर्शनमित्याह स्रग्वि
णौ रत्नाहारालंकृतौ वनमालिनो पादालंबितपुष्पादिमालाधरौ स्नातावित्ति गृहस्थानादि विधायात्रागताविसर्थः विरजेति अदंतोपि रजःशब्दोस्ति ३१ ततएश्वर्यानुभवो जात इत्याह प्रधाने
ति प्रधानभूतौ पुरुषौ यतश्चाद्यौ तत्र हेतुः जगद्धेतू अतो जगत्पती जगत्यर्थ भूभारहरणाय स्वांशेन मूर्तिभेदेनावतीर्णौ पुनः कीदृशौ बलेति यः सर्वतोधिकबलः यः श्च केशीहंतेत्यर्थः ३२
इतः कथमेवं विशेषदर्शनं तत्राह दिशाइति क्रमशो रात्र्यंशोज्ञा तेपि स्वप्रभया विगततिमिराः दिशः कुर्वंतौ शैलदृष्टांतोन्यसवयस्कापेक्षया बृहत्त्वविवक्षयास्तनशैलेत्यादिवत् यथा मारकतो
रौप्यश्चेतौ कनकाचितौ स्तस्तथा स्वर्णालंकारे बृहत्तयावर्णाभ्यां च शोभमानावित्यर्थः ३३ सतथा निकटगतोक्रूरः रथात्तूर्णमवप्लुत्य गतिविच्छिन्नदान्याग्रस्येति शेषः समावस्थित योः रामकृष्णयो
श्चरणसमीपे दंडवत्सपात सर्वत्र हेतुः स्नेहविव्हल इति स्थिप्यपितव्यत्व व्यवहाराद्यनुसंधानशून्यत्वादिति भावः ३४ स्नेहमोहितत्वमेव व्यंजयति भगवदिति आनंदेन यद्बाष्पं तेन व्याप्ते इ
क्षणे यस्य स सम्यग्वक्तुमपि नाशकदिति भावः श्रीकृष्णात् सन्नस्वरत्वादत्रूरोहमिति स्वकथनेपि नाशकत् किंपुनरश्चागत्यादि संपादनमित्यर्थः अपिन्नपेतिपादौ ३५ भगवान्कारुणि
कः सर्वज्ञश्च अतएवतमभिप्रेत्य अक्रूरोयमेतदर्थमागत इतिज्ञात्वा रथांगस्फेपत्लक्ष्मणं चक्रध्वजवज्राद्युचिन्हितहस्तेनाभिमृश्याकृष्य च मातः सन्नालिंगितवान्तु पितृव्ये व्यवहारेणनम
स्कृतवान् तत्र हेतुः प्रणतवत्सल इति तदीयदास्यभावज्ञाइत्यर्थः येय थामामित्युक्तेः ३६ संकर्षणः यद्दूनामप्रथक्भावादिति निरुक्तनामा अंजलिरूपेण सहितौ पाणीगृहीत्वा स्वगृहत्वेना
नितेनंदगृहमनयत् सानुज इति अग्रजत्वादातिथ्यकरणे मुख्यतोक्ता ३७ प्रवरं रत्नादिमयं मधुपर्कं उचितार्हणमानीयार्पयत् ३८ संवाह्य पादसंवाहनं कृत्वा पादप्रक्षालनसंवाहनयो
रप्रत्याख्याने हेतुः आदृतः सादरः तथादरपरिपाटीं दर्शितवान् यथाक्रूरोपि तदैश्वर्यं विस्मृत्य तदिच्छानुसारी बभूवेत्यर्थः ३९ तस्मै भुक्तवते पथ्यपर्यं चतुर्थ्ये अस्यदिनस्य द्वात्रिंशं पर
श्चश्चतुर्दश्यां कंसमारणात् प्रातः पारणाकरणेन पोषितत्वं भगवते द्रक्ष्यामीति भक्तिविशेषेण रात्रिपारणानिषेधातिक्रमस्तूपंगवत्संनिधिमहात्म्यविशेषपर्यालोचनया ४० सत्कृ
तं सम्मानितं निरनुग्रहे अतिक्रूरे केन प्रकारेण सुखं जीवथ इत्यर्थः दाशार्ह इति कंसस्य यदुकुलद्वेष्टृत्वेन भयादिनेयत्यं सूनाहिंसा तस्या भवः सौनः पश्वादिघाति सपालको येषां ते
अवयो मेषा इवासन्ता वितजीवना इत्यर्थः ४१ क्रूरतामाहयइति स्वस्य स्वसुस्तत्रापितोकान् बालापत्यानि तत्रापि क्रोशंत्याः इति निर्दयत्व असूनेन तर्पयतियः केवलं स्वदेहर

क्षार्थमित्यर्थः अतः खलः तस्य कंसस्य प्रजानामधीनानां वः त्वहे अक्रूर जीवनमेव दुर्लभं तंत्र कुशलं किंस्वित् कतमत् विचारयामेति ७ मधुरया वाचा परिपृच्छन परिप्रश्नेन चेत्थं सत्कृतः अध्वपरि
श्रमं संसारश्रमं यद्वा मार्गे परिश्रमं मय्युपेष्यत्यरिबुद्धिमित्यादि वितर्करूपं मनःखेदं जहाविदत्यर्थः ७३ इति श्रीमद्भागवत दशमस्कंधे अष्टत्रिंशत्तमोऽध्याय स्तोषिणी सारसंग्रह १ इति अष्टत्रिंशोऽध्या
यः ३८ अक्रूरेण यते यात्यच्युतो देववशात् ननु आयाको रागतः श्रित्रमित्याशयाहुः स्मगोपिगोः १ न क्वो नाम मनोरथाः सत्यात् वंतीति द्योतयन्नाह सुखेत्यादि नंदेत गृहं गत सति पर्यंके सुखमसं को चमुप
विष्टः तरामकृष्णाभ्यां तौ बूत्वा द्धेरुरुमानितश्च पथिकल्पितमनोरथानां प्राप्ति भावनया पूर्णमात्मानं मेने तत्र हस्तपंकजधारणरूप क्षेपेण रथात्पूर्णमिति पद्योक्तं न मनोतर मत्स्यं तातेति संबो
धनं कंस चेष्टितप्रश्नश्चानुपदं वक्ष्यते सोऽपादतं राममभिसारं भ्यपूर्वं त्रो क्ताएव २ ननु धर्मादिवर्गं चेत् मनोरथान् कथं न चकार तत्राह किमिति किंचनेति पूर्वोक्तप्रसाद मयतत्प्रकारं विना
न्यत् किंचिदपीत्यर्थः राजन्निति त्वयेदं ज्ञायत एवेति भावः २ देवकीति तत्कृतत्वमात्मनि व्यंजयन् पप्रच्छेत्यर्थः चिकीर्षितं भाविनीचेष्टां यद्वा तन्मारणाय स्वयं कर्तुमिष्टं अग्रजकर्तृकत्वे नैव पूर्वप्रश्नो भावितस्तथा
पितत्सतिनिधी त्वयानुजन्नचनमग्रजस्येव संपन्नमिति ज्ञेयं ३ तातेति पितृव्यस्य पितृतुल्यत्वात् सौम्येति साधुत्वेनागतं यथा तथा आगताः एकवचनान्तः पाठः क्वचित् भद्रमस्त्विति दैन्येनागतं समाश्वासय
ति स्वस्क इः ज्ञातयः सपिंडाः बंधवोऽसपिंडाः संबंधिनः तेषामपि किमनमीवम दुःखं सुखमित्यर्थः अनामयमारोग्यं ४ एवं प्रश्नादिना तिसंगतस्त्वाह किंन्विति अंग हे अक्रूर पृच्छामि नोमातुल इति नाममात्रं यस्य
वस्तुतस्तु कुलामये नचायमेकस्य किंतु नोऽस्माकं सर्वकुलस्यैव रोगे अतस्तत्रायं योग्योचितः एतावत्कालं मातुलनाम्नेवोपेक्षितं इति भावः नः स्वानां ज्ञातीनां तत्प्रजानां च ५ अस्मन्निमित्तो अस्मद्धेतोः आर्ययोः एकत्वे बहुवच
नं वृजिनं दुःखं आर्ययोर्निरपराधयोः योऽहमेव हेतुस्तस्मात् पुनः किंतु पतापस्वभावात् ६ अद्यास्माकं नो दर्शनं मम सम्यक् एकांते ज्ञातमेतद्दिष्ट्या भद्रं ज्ञातं यतः कांक्षितं अयं भावः नित्यमेवाहं भवाद्दर्शप्रियजनाद
र्शनाकांक्षा किंचतत्रागत्य कंसमेव हेलया हत्य कंसं हंतुमिच्छामि नचपरमस्निग्धात्रत्यपित्रनुमतिं विना तत्रागमनं युक्तं नवा तद्धेतुकारणयुक्तिनिश्चयः अतो यदि कश्चित्तत्र हेतत आगच्छेत देतद्ध्येयं सिद्धं दिष्ट्या कांक्षितमा
सीदित्याशस्तत्रागमनकारणं तावद्वर्ण्यतां तस्मिन् ज्ञात आयातिचिंतां करिष्याम इति ७ एष इति युग्मकं भगवतो भगवते तिपाठो यतो माधवो मधुवंशराजः सर्वांकितदाह वेरेत्यादि ८ पः धनुर्मख छद्मा संदेशो यस्य
यश्चाणूरादिभिर्घातनमर्थो यत्र यथा स्यात्तथा प्रेषितः तं संदेशं तमर्थं च वसुदेवात्मजन्म कृष्णजन्म यत्नारदेनोक्तं तत्कंसस्य कृष्णस्य पुरतो वर्णयत् अत्र विशेषतः इतेजनवाक्यं हरिवंशे॥ पितरं वसुदेवं च
सततं दुःखभाजनं दीनं पुत्रवधः श्रोतं युवामथसमेष्यथः दह्यमानं दिवारात्रौ सोत्कंठेनांतरात्मना तां च दक्ष्यसि गोविंद पुत्रैरमद्दितस्तनीं देवकीं देवसंकाशां सीदंतीं निहतप्रभां स्वर्भानुवनग्रस्तां शशांकस्य कलामिव त्वत्स
ताबेल्यकुशलाल्लयाबाल्ये वियोजितां अरूपज्ञातवविनी वक्रास्यास्यं दुर्वर्चसः यदिल्वोज्जन यित्वासादेवकी परितप्यते अपत्याभोनुकस्तस्यावरं स्थेवानपत्यता वृद्धौ तवाद्यपितरौ परं भर्त्स्य तत्वमागतो भर्त्स्यते तेत्येक्रते तेन कं
सेनाशुतद्बुद्धिनेत्यादि ९ प्रहस्येत्यक्रूरं प्रतितद्वक्ता तापनाय पतः शात्रूहतवीर हंता विज्ञापने हेतुः पितरमिति आहारान्नादिष्वेव नत्वन्यदपि विजनतु रित्यत्रात ९ तो पयर्थः विज्ञापयामासतुरित्यर्थः
पितृसंनिधिं गत्वेति शेषः १० सोऽपि पुत्रपालनव्यग्रतया प्रसिद्धो नंदो पीत्यर्थः तद्विज्ञापनमोहित इति भावः अतएव गोपान् समादिशन्न तत्संमतो हृदिति उपायनान्यत्तमवस्तूनि ११ यास्याम इति साधर्कं रसा
न्नघृतादीन् श्लेषेण साधुद्वेषादिनिदानरोगचिकित्सार्थं रसान् दास्याम इति यांति ज्ञानपदा इत्यन्वयः तापनाय क्षत्राब्रजरक्षाधिकृतेन सर्वतो घोषितवान् १२ ताः कृष्णैकजीवनाः गोप्यस्तत्तदा अक्रूरमागतमुपश्रु
त्य कस्यचिदन्यं कथयतो मुखाच्छ्रुत्वा साक्षात्तास्तु कस्यापि कथनाशक्तेरिति भावः अत्यर्थं दुःखिताः मरणमपि सुखं मेनिरे इत्यर्थः तामिथ्येव्यथा न तस्य कंसाद्भिमिष्टशंकया किंतु तद्विरह भीत्येव विरहभीरपिनात्यंति
कं तत्रस्थितिनिश्चयेन तासां मुकुंदं द्दुत्यादेराशंकामयमात्रत्वात् अन्यथा तासां मतं नंदादिभिराहतं स्यादिति ज्ञेयं १३ रासदर्शितप्रेमतारतम्येनासामुत्तरोत्तरमवस्था वैशिष्ट्यमाह त्रिभिः तत्र भद्रादीनां श्वास
वैवर्ण्यं अर्थेनाह काश्चिदिति तेन श्रवणेन कृतो हृत्तापस्तेन यः श्वासस्तेन म्लानानि विवर्णानि भूता मुखश्रियस्तिलकादयोपि किमुत वर्णा यासां ताः तत्कृतहृत्तापेति परत्रापि गम्यं वैवर्ण्यादि पूर्वपूर्वावस्था
श्चोत्तरत्र ज्ञेयाः नृ्यामलादीनां कांत्यमप्याह स्रंसतीति दुकूलानि वलयानि केशाग्रंथयश्च यासां ताः द्रुताश्च काश्च न बाहुबुः १४ चंद्रावल्यादीनां प्रलयमप्याह अन्या इति तस्य श्रीकृष्णागमनस्यानुध्यानेन क
थमसौ यास्यति कथं वा तत्र स्थास्यति कथं च मां विनाजीवेमेत्यादिलक्षणेन तेन निवृत्ताशेषेंद्रियवृत्तयो यासां इमं लोकं देहं दैहिकं च नाविदुः आत्मलोकं स्वस्वरूपं प्राप्ता जीवन्मुक्ता इवेति १५ राधादीनां प्रलयाति
शायनमप्याह स्मरंत्य इति श्रौरेः श्रीकृष्णस्य गाता पत्यत्वात् तिमानेन गंतुकामस्य गिरः स्मरंत्यः संमुमुहुः अप्रतिकार्यं मोहं प्रापुः कीदृशीः अनुरागेण यस्मिंस्तेन रिता अतो हृदिस्पृशः मनोज्ञाः चित्राणि पदानि यासु ताः विशेष
तोपि मनोज्ञत्वं १६ अन्यच्च किं जातं स्यादिति शंकासंस्कारबलाल्लब्धबाह्यवृत्तयः सर्वाः पूर्वे प्रारमागत्यर्क्षे दृश्यो बिलपुरित्याह युग्मकेन गतिमिति सुललितां गतिं व्रजं प्रवेशनिर्गमादौ मुहुर्दृष्टांत देव सखि
भिः सह ललितां चेष्टां तत्रचालनः प्रतिललितं सस्नेहं हासं नलोकनं एवमपि रतिप्राप्यनाश्वासाद्योनः शोकस्तद्भवहारीणि नर्मभाषितरसाभिव्यंजकपरिहासास्ततः कुंजादौ प्रोद्दामानि सोरतचरितानि
च १७ चिंतयंत्यः हंत तत्तदस्माकं संप्रति विच्छिन्नमिति सानुतापं भावयंत्यः अतो भृशमिलितं सर्वं मुखमेव यासां स्वभावतो निमेषविरहतोऽपि भीताः अच्युतानुपसन्न महाविरहेण विक्लवाः सर्वत्र हे
तुः अच्युत एवासक्ता यासां संघशः इति मिलितत्वे प्यवांतरसंगभेदात् शोकप्रकर्षेणाश्रुः एतद्वृत्ता सा परिदेवनं प्रादोषिकघोषणमारभ्यत तत्रस्थान पर्यंतं ज्ञेयं १८ विधातरित्येवं दुष्टसंगतिं विधाय वियु

दयतीति मत्वा नास्त्येवाक्रोशंस्य आहुः अहो इति त्रिभिः अहो खेदे हे विधातः सर्वं त्वमेव विदधासीति भावः अतः सर्वेषु दयां कर्तुमर्हस्यापि तव क्वापि दया नास्ति यतो देहिनः देहाद्यासक्तान् जीवान् अन्योन्यं मैत्र्या हितान्
रणेन स्नेहेन च संयोज्यापि अपार्थं च एवं विधातस्त्वे प्रत्यर्थं निर्दयत्वमाहुः अकृतार्थान् न प्राप्तभोगान् अपि तान् वियोजयसि दयालुस्तु कृतार्थान् अपि न वियोजयेदिति भावः किंच ते विक्रीडितमपार्थकं अपगतो अर्थो हे
तु प्रयोजनं यस्मात् अपार्थत्वे दृष्टान्तः अर्भकेति संयोजने अकृतार्थवियोजने च हेतुप्रयोजनादर्शनाद्बालिशत्वमिति भावः १९ आस्तां मैत्रीप्रणयपूर्वकं संयोज्य वियोजनं नाम तावत् त्वं श्रीकृष्णं सकृत् प्रदर्श्या दृश्य
ताकरणमप्यतिनिघ्नमित्याहुः य इति २ यस्त्वं मुकुंदस्य सर्वदुःखमोचकस्य वक्त्रं प्रकर्षेण ततं तत्सौंदर्यरसानुभवपूर्वकं दर्शयित्वा पारोक्ष्यस्वार्थे ष्यञ् परोक्ष्यं अदृश्यं करोषि अतस्तवेदं कृतं कर्मासाधु असाध्विति निंद्यमित्यर्थः
प्रकर्षमेव दर्शयंति अलिस्तैरित्यादि कुंतलैः भ्रमरकैः रावृतमिति ऊर्ध्वभागे श्रीनासा सुकपोलमिति पार्श्वद्वये उन्नसमिति मध्ये शोकमपनुदति यः स्मितलेशः मंदहासस्तेन सुंदरं हासमाधुर्यं अधरारुणित दंतपंक्तिमाधुर्या
न्यां सर्वतातिशयोक्तीति भावः विष्णुपुराणे सारसमर्थं गोकुलस्य विधिना हरता हरिं प्रहृतं गोपयोषित्सु निर्घृणेन दुरात्मनेति २० किंच दृष्ट्यापहारित्वेनातिक्रूरस्त्वमित्याहुः क्रूर इति हि एव त्वमेव च स्फुहर रसि बत खेदे वि
ष्णुपुराणेपि अहो गोपीजनस्यास्य दर्शयित्वा महानिधिं उत्कृत्तान्यद्य नेत्राणि विधात्राकरुणात्मनेति अतः दृष्ट्यापहारदोषमजानन्नेवथेति नन्वक्रूरो हरति नाहं तत्राहुः अक्रूरसमाख्ययेति अक्रूर नाम्ना ध्रुवं त्वमेवागतो
सि अत्रान्यस्याज्ञानेः कृ संहरामि नन्वेव त्वं कृतज्ञत्राहुः येनेति येन त्वद्दत्तचक्षुषा त्वदीयं सकलसृष्टिनैपुणं मधुद्विषः मधुनि मधुराणि पद्मादीनि दृष्टिः अंत एतणयर्थः स्वदृष्टजनैः प्रीत्या विषयाणि कारयतीत्यर्थः तस्य
कदेशं द्राक्ष्मेति यन्नेत्रवक्त्रादिसौंदर्यामृताधिक्यं नात्र पद्मचंद्रादिसुंदरेषु तस्मिन् दृष्टे नाभिरुच्यान्यमपश्यत तच्चक्षुषोरणमेव तत्करणे स्यादिति भावः २१ उदासीनं विधातारं किं निंदामः आली यो यं नंदसूनुरेवत
थाविध इत्याहुः नेति नंदसूनुः व्रजराजसुतत्वेनास्मानीक्षितुं योग्यापि न समीक्षते नापेक्षते अपदृष्टेव दूरप्रस्थानोद्यमात् अतश्चलसौहृदः असौ समीक्षायां विशेषायां हेतुः विहायेति गृहादीनामुत्तरोत्तरं श्रेष्ठं अ
क्षस्वदेहार्पणादिना दासीत्वं प्राप्ताः दास्यापगतो हेतुः स्वितितस्त्वते नेवस्मितादिनाविवशाः किंच नवं नवं प्रियं यस्य तथासौ अस्मान् हित्वा गमनान्नूनं माधुरीष्वेव प्रीतिर्जातास्यादिति भावः २२ अत एव सर्वमाहुः सुखमि
ति पंचभिः माथुरीणां रजनीयं सुप्रभाता भवेत् विप्राद्याशिषश्च सत्यास फला भवेयुः याः पुरांतः संप्रविष्टस्य व्रजस्पतेः सुतार्षः व्रजजनैकभोग्यस्य श्रीकृष्णस्य मुखं पास्यंति नेत्ररसनयोः स्वादयिष्यंति कीदृशं नेत्रप्रांतेनो
द्धे भितं स्मितमेवासवो रसो यत्र तत् विष्णुपुराणे कोनुस्व प्रांस भाग्यानि द्रष्टस्माभिरधोक्षजं विस्तारितोत्तनयना या द्रक्ष्यंत्यनिवारिता इति २३ ननु हि त्राणि दिनानि तथा भवतु पुनरस्मत्स्नेहेन पित्रादिभिश्च परावर्तित आयास्यति तत्राहुः
तासामिति मधुवमंजुलैः भाषितैर्वशीकृतचित्तः तथा तासां सलज्जस्मितैर्विभ्रमैश्च भ्रमन् एतत्सर्वं विस्मरन् परवान् पित्राद्यधीनोपि यद्वा अत एव तासामधीनः सन् मनस्वी धीरोपि अविदग्धाः नः कथं प्रत्येष्यति न कथमपीत्यर्थः
ग्राम्या हरिरयं तासां विलासनिगडैः यतः नवतीनां पुनः पार्श्वं कया युक्त्या समेष्यतीति त्यादि विष्णुपुराणेपि २४ किंचास्मद्दुर्लभमद्यान्य एव प्राप्स्यतीत्याहुः अद्येति तत्र पूर्वा दाशार्हादीनां दृशः दृष्टीनां महोत्सवः भविष्य
ते प्राप्स्यति भूमा बाल्ये न पदीतिस्मृतेः मतः श्रीरमणे विष्णुप्रियां लक्ष्मीमपि रमयितुं जातरः इति कनु श्रीलयस्य तं गुणनिधानं देवकीसुतं द्रक्ष्यंति देवक्य त्रयत्र देवहूर्वोक्तेः ये चाध्वनि गच्छंतं द्रक्ष्यंति तेषामपि दृशां प्राप्स्य
ति २५ अक्रूरं त्राप्यस्यत्राहुः मैतदिति एषा विधा कर्म यस्य अत एव निर्दयस्य अक्रूर इत्येतच्छोभनं नाममात्रं यतोतीव दारुणः परमक्रूरः कुतस्तदाहुः योसौ जनं सामान्यमात्रमपि किं पुनरस्मादृशा मवलाः दुःखितं
दुःखितं मरणोन्मुखमपीति सापद्व्यंग्यं पुनरेषमयानीय युष्मास्वर्पिष्यत इति वचसाप्यनाश्वास्य प्रियादात्मनो किं पुनर्देहप्राणादेः प्रियं कृष्णं अध्वनः पारं अतिदूरं देशं नेष्यति अतोतिक्रूर एवायमिति भावः क्रूरं नु
लगतिः कोडद् दुःखायास्त्वां गुणच्युते अकांडेयुज्यते नेयमक्रूरप्रेरिताच्युते १ २६ अहो कंसदूतोयं क्रूर एव नंदनंदनोप्यस्मान् त्यक्ष्यति कठिनो भूत्वा गोपा दयोपि तमेवानुसरंतीत्याहुः अनार्द्रधीरिति कठिनाधी
र्यस्य स तावदेष कृष्ण एव यतो रथनीडमारूढः अमी गोपाः श्रीदामादयोपि अनोभिः सहितास्तान्यारूढो इत्यर्थः अनु अनुक्षणं गंतुं त्वरां कुर्वंति यतो दुर्मदामताः कस्यापि विचारादर्शनात् स्थविरैश्चोपेक्षितं तेपि न वि
चारयंतीत्यर्थः सर्वे पेतेऽस्याविचारस्य फलं भोक्ष्यंतीति भावः किंचाद्यास्माकं दैवमपि प्रतिकूल्यमीहते प्रवर्तते यदि दैवमनुकूलं स्यात्तर्हि कश्चिद्विघ्नैः प्रतिहन्येत वज्रपातो वा स्यात् पथि ते सर्वे परावर्तेरन्निति २७
सायमस्माभिर्वो लेप एवमनसा कृतः सोप्यस्मानंगीकृतवानिति पतिरेव संपन्नः संप्रति नः परित्यज्य व्रजन् वीरवर्णी यः कुत्स्यात्र संकोच इत्याहुः निवारयाम इति समुपेत्य निर्लज्जे साहसं समीपं गत्वा हस्तवस्त्रधारणादि
ना माधवं वारयिष्यामः माधवमित्यस्य लक्ष्म्या यथा यं दृढबद्धोस्ति तथैवास्माभिरिति भावः ननु कुलवृद्धाद्य ओकत्वं दृष्ट्वा शासिष्यंति तत्राहुः किमिति अकरिष्यन् करिष्यंति न किमपीत्यर्थः यतः निमिषार्द्धेपि दुस्त्य
जत्वेनानुभूतात् कृष्णादिनयान्मोचकस्य तस्य संगात् दैवेन विध्वंसिताः अतो दीनचेतसश्च या स्तासां नः अयं भावः यद्यसौ निवृत्तः स्यात् तदा तेषु लज्जा अपि तमेव सुखं भजेम यदि न निवृत्तस्तदा सिद्धमेव मरण
मिति नः किमपि ते कुर्युरिति निवारयामेवेति २८ अथ निवारणायोद्यता अपि बहुजनसंघट्टे तत्र स्वप्रवेशायोगमदृष्ट्वा सभयमाहुः यस्येति हे गोप्यः यस्य ललितं स्मितं च मधुररहस्यसंकेतवार्ता च लीलाव
लोकश्च आलिंगनं च अनुरागेणैतानि यस्यां तस्यां रासक्रीडासभायां अस्माभिर्निशाः क्षणा इव नीताः स्म विस्मये तमनु श्रीकृष्णं विना पारं विरहदुःखस्य कथं नु अतितरेम न कथमपीत्यर्थः २९ आस्तां
दुःखतरणं जीवनमेव न स्यादित्याहुः य इति अह्नः अवसाने अनंतैः अनंतस्यानंतबलतया संकर्षणपर्यायतया वा तन्नाम्ना प्रसिद्धस्य रामस्य सखा तत्सहित इत्यर्थः वृतः यस्यैवं वेष्टितो रजोधूसरा अलकाः स्रजश्च य
स्य सः व्रजं विशन् स्मितं च कटाक्षापांगदर्शनं च निरीक्षणं कदाचित् पूर्णक्षणा चेति द्वंद्वैक्यं तेन चित्तं क्षिणोति संमोहयति अमुं कृष्णं विना तावत् कथं भवेम जीवेम नु आशंकायां अतो द्यसायमेवात्र
त्यामरिष्याम इति भावः ३० अथ विरहातुरत्वेन विशेषविलापाशक्त्या नामभिरेव विलेपुरित्याह एवमिति अनेन प्रकारेण भाषणं बहु अन्यदपि ब्रुवाणा अथ विरहविवशाः यतो व्रजस्त्रियः अत एव

कृष्णप्रेमणा सक्तानि मानसानि यासां ताः अतोऽलज्जं हित्वा करुणोच्चस्वरेण रुरुदुः कथं तदाह गोविंद हे गोकुलेंद्र त्वां विना गोकुलमिदं दुःखशिलोच्चयं दुःखस्थानं क्षयतीति भावः हे दामोदरेति यशोदाप्रेमानुस्मारणं त्वा
विना तस्याः कीदृगवस्था स्यादिति भावः माधवेति श्रूयत इंदिरे स्कन्तत्यनुसारेण विदक्षप्रियया लक्ष्म्यापि गृहं च्व्यतोसीति वरनायकस्त्वं योग्य एवासि माधि वेतः कथमधुनास्मान् परित्यज्य व्रजसीति भावः मां लक्ष्मीमपि धु
नोति वियोगेकपयतीति श्लेषेण वियोगे मरणसंभवात् कथं पुनर्द्रक्ष्यामीति सूचयति इति च्वेति पाठः ३१ कंसं हंतुं दुर्नेयं तं नयं तं स्वं सहाग्रजः कर्तुं समुत्सुकं पितरं समुत्सुकं पितरं यथा यो १ स्त्रीणामिति एवं रुदतो
नां व्रजस्त्रीणां अनादरे पृष्टोता आनाहस्याक्रूरो नोदयामास इत्यर्थः अतस्ताभिरप्यपराधं मत्वोक्तं योसावनाश्वास्येति अस्याक्रूरापराधस्य फलं नदीविदुर्बुधाः स्यमंतकप्रसंगेन गृहापसरणादिकं २ उदित
इति सलज्जापेक्षया कृतमैत्रादिकमित्रदेवस्य संध्योपास्यादिकं कर्म येन सः रथं समारुह्य मामुह्य यामा रहमिति शेषः देवस्कोमर्वतरि तास्ला नाः कुर्वन् कुमुद्वतीर्गोपीः माथुरनारीः फुल्लाः कृष्णविधुरुदयगिरेरथं भाति १३२
तं रथमन्वसज्जेन पश्चादगच्छन् ततस्तस्य नेन सूचितं विलंबहेतुः आशयेति उपायनेरत्नादि कुं भांचेति यात्रामंगलं सूचितं ३३ रंजिताः निरीक्षणादिना किंचिद्दानेदिताः प्रत्यादेशं दूतद्वारावधिविज्ञप्तैः प्रतिवचनैः ३४
तास्तप्यमानाः आयास्ये इति श्रीमगमिष्यामीति बहूनि ईदृशवाक्यैः संप्रेमैः शपथादिपूर्वकं स्नेहमयै नेतुष्टलमयैः अदत्तस्वमार्गे आगमनं चेद प्रतिज्ञातं दंतवक्त्रवधानंतरं भविष्यतीति तत्रैव स्थापयिष्यते इति नास्य भ
क्तवेचकत्वं ३५ तथापि तासां सद्यः प्राणरक्षैवा कृत्नं नातीति त्याह यावदिति इषदपि हस्यत ताव तरथरेणुंचानुप्रस्थापितानि चित्तानि याभिस्तास्तत्वमपि पुत्रिका इव निश्चलाः समीपे पिलोकेई ष्टाः ३६ विशेषेण
मथुरामगत्यैव परावर्तनेनिराशाः किंतु तत्र गत्वा कृतकार्यः आयास्यतीति साशाः सत्योनिवृत्ताः प्रियस्य चेष्टितं तस्मात्मच्छरणं गाय मित्यादि प्रतिज्ञानुसारि चरितं गायंत्यो विशोकाः आत्यंतिकवियोगाशंकोत्थ शोकेन रहि
ताः रात्र्यहनि निन्युः अदर्शनदुःखं विषद्य गमयामासुः धारयंत्यति कृष्णप्रायः प्राणान् कथं चन प्रत्यागमन संदेशैरितिलक्ष्यमाणात् ३ अहनी इति स्वस्त्योरिविवत् यद्वा श्वायनराहित्यादिदिनधर्मयोगाद्रात्रेरप्यहस्त्वविव
क्षया ३७ अथ तासामिव भगवतोपि प्रियजनप्रेमार्द्रतास्वभावेनार्तिर्जाता किंतु गांभीर्येण गोपिता गमनं त्वावश्यककार्यार्थमित्याह भगवानपीति सोपि तद्दुःखदर्शनाक्षमतया वायुवद्वेग प्रचालितरथेना घनाशिनीं वि
योगव्यसनादिशमनीं कालिंदीं अनेताख्यतीर्थप्रदेशं प्राप्य छिन्नं मध्याह्नं प्राप्तः प्राप्तमध्याह्नसमय इति वेदितव्यं वा केः ननु तस्य विरहार्तिर्न स्पष्ट दृष्टा तत्राह रामाक्रूरेति तत्संकोचाच्चिग्गूहितेति भावः यद्वा व्रजदु
खदर्शनाविगमनेहेतुः रामेति इदानीमेव पितरौ मोचनीयावित्यतः तयाग्रहवशादिति भावः वायुवेगरथस्य कालिंदीप्राप्तौ ताबच्चिलंबो हृलादि द्वारगोपीसांत्वनं व्यातुल्यैनवक्षावदत् यारथगमने कौटिल्येन चज्ञेयः ३८
उपस्पृश्याचम्य स्वहस्तेनांजलिं कृत्वा स्वं संस्पृहं श्रीमदुपामंत्र्यानुज्ञाप्य रथोपरीति रुक्मवोपवेशनार्थं शत्रुशंकयेति स्वामिपादाः हृदमनंततीर्थं तीरमिति पाठांतरं ४० अस्तिवेदं जपन् समन्वितो एकत्रैव वर्तमानौ ४१ तावितियुगमकं इ
हजले इति एतद्विचिंत्य ४२ तत्र स्यंदनेपि यथा पूर्वमासीनौ व्यचष्टेति पूर्वेणान्वयः पुनश्चाक्रूरोन्यमज्जत तत्र हेतुः दर्शनमिति मृषा किमिति विचिंत्येत्यर्थः ४३ श्रीगोपिकापराधप्रतिबद्धदर्शोश्व फलं कृतनयाय निजमहि
मानमविदुषे निजांशावैभवमदर्शयद्भगवान् १ अक्रूरोत्यद्भुतं रूपं मज्जन्नपि ददर्शयत् भुवनेततरं तोपि नापस्यन्मुनयः किल २ कृष्णइतियुग्मकं तत्रैव हृदे सिद्धादिभिः स्तूयमानमहीश्वरमद्राक्षीत् ननु पूर्वचतुराम कृष्णौ ४४ सह
स्रशीर्षाणि यस्य सहस्रं फणामौलयः किरीटानि च संति यस्य श्रीस्तोदित्वादिभिः बिसमृणालमिव धवलं श्वेतं शिखरैः श्वेतं कैलासमिव स्थितं ४५ अथ षड्भिः श्लोकैः तस्योत्संगे कुंडलीकृतदेहार्धे उपविष्टं रूपविष्टं ददर्श हेति हरिवंशे कैः
पुरुषं ब्रह्मांडांतर्यामिणो लीलावतारं विलोक्य स्तौ बीदिति एकादशश्लोकाभ्यामन्वयः ४६ रोगानने हनुर्यस्य उन्नतनासिकायस्य तं चतं च सकपोलश्वासावरुणाधरश्च ४७ तुंगोरस्कं घोयस्य उरस्थलेरेखारूपा श्रीर्यस्य प्रेय
सीरूपा तु वक्ष्यते तं च तं चत्रिवलीयुतं पल्लवोश्वत्थदलं तत्सदृशमुदरं यस्य ४८ कटितटं विस्तीर्णकटिः श्रोणिर्नितम्ब नागश्च बृहद्भ्यां मांस्यां करभसदृशोरुद्वयेनचान्वितं ४९ इषदुन्नतो गुल्फौ अरुणनखव्रातश्च तेषां दीधितिभिः नवाः कोमलाः
अंगुल्यः अंगुष्ठो च ता एव दलानि तैः शोभमानं पादपद्मं यस्य ५० महार्हणादिकमाह द्वाभ्यां समाहार्हेति महार्हमणिव्रातायेषु तैः किरीटादिभिर्विशिष्टं ५१ सूर्यकोटिवद्भ्राजमानं पद्मस्य पृथगुक्तिरनायुधत्वात् ५२ परिवारानाह त्रिभिः सुनं
देति पार्षदादिभिः पृथक् पृथक् अभिप्रायो येषां तैर्वचोभिः स्तूयमानं तत्र पार्षदैः स्वामीति स्तूयमानं सनकाद्यैर्ब्रह्मेति ब्रह्माद्यैर्महेश्वर इति मरीचिरत्र्यंगिरसौ पुलस्त्यः पुलहः क्रतुः भृगुर्वसिष्ठो दक्षश्चैते नवभिर्द्विजैः परः प्रजा
पतिरिति ५३ भक्तः उपश्चिचरः प्रह्लादादिभिः परदेवतमिति अमलात्मभिरिति सर्वपरिवारविशेषणं सर्वाभिप्रायाणां युक्तत्वव्यंजनाय येषां दिङ्नियमं आगमानुसारात् तथाहि पार्षदाः पूर्वाद्यष्टदिक्षु पश्चिमे सनकादयः ब्रह्माद्या दक्षिणे
भागे मरीच्यादयो वामे महदाद्याः संमुखे ५४ आवरणदेवताः शक्तीराह श्रियेति श्रीः संपदः संपादयित्री लक्ष्मीः शरीरपुष्टिसंपादयित्री पुष्टिः गीः सरस्वती कांतिः शोभाधिष्ठात्री कीर्तिर्यशोधिष्ठात्री मनस्तुष्टिसंपादयित्री तुष्टिः इला
भूम्यधिष्ठात्री ऊर्जा लीलाधिष्ठात्री विद्या जीवानां मुक्तिहेतुर्ज्ञप्तिः अविद्या संसारहेतुरज्ञानं मायातयोः कारणं शक्तिर्ह्लादिनी संवित् याभायाः तंतरंगा चिच्छक्तिरितिव्यह्रीयते इयमेव महालक्ष्मीरित्येन्ये आभिरन्याभिश्चाणिमा
दिभिर्निषेवितं ५५ विलोक्य अस्मत्पक्षस्यैव कृतेमैश्वर्यमिति ज्ञात्वा प्रीतः ५६ सत्त्वं धैर्यं रुद्धकंठतया शनैरब ५७ इति श्रीमद्भागवतदशमस्कंधमध्यगः नवत्रिंशतमोध्यायस्तोषिण्यां सारसंग्रहे १ इति भागवते दशमे एकोन
चत्वारिंशोध्यायः ३९ सकलानसफलानेवं कृत्वाक्रूरमनोरथान् पूर्यते त्रस्वकामायछ्राव्यं भक्तात्स्वकीर्तनं १ तत्र तावन्नारायणत्वेन प्रणमति नत इति हेतुरूपमत्वा त्वां नतोस्मि ननु परिच्छिन्नत्वात्तत्र मिवाह पय्युसति
विना शाबान् केन पुनर्विशेषणेन नतोसीत्यत्राह आद्यं पुरुषं अव्ययं च अनादिनिधनमित्यर्थः निरुपाधिचिद्रूपत्वेन परिच्छेदासिद्धेरिति भावः तत्र हेतुः अखिलहेतूनां प्रकृत्यादीनामपि हेतुं सतु नारायणो नाह तत्राह नाराय
णात्वा तदुपपादयति यन्नाभीति यतः ब्रह्मणः १ तस्य तैर्निरुपाधित्वेन परमतत्त्वरूपत्वे द्योतइतुमखिल हेतुहेतुत्वं प्रपंचयति भूरिति आदिः स्वस्यादिरहंकारः अजा माया आदिस्तस्या अपि व्यक्तत आदिः कृतस्तदवच्छिन्नो
जीवः एते यज्जगतो हेतवस्ते सर्वे तेवत्तव अंगभूता अंगाद्धीमूर्तेर्भूता उत्पन्नाः मायादिकारणतया निरुपाधिचिद्रूपं त्वदंगमिति भावः २ ननु चेतावंतं कालं कथमेवं न ज्ञातवानसि तत्राह नैते इति अजाद्यादिर्येषां ते एते आत्म

॥ नस्तेस्वरूपं नविदुः अनात्मतया जडत्वेन हेतुना जडत्वे हेतुः गृहीताः प्रत्यक्षादिग्राह्याः नहि चिद्रूपो दृक्‌ग्राह्य इति भावः नन्वेवं जडा न जानंतु जीवस्तु ज्ञास्यति तत्राह अजइति सत्रजोब्रह्मापि मायायागुणैरनुबद्धः आवृतः
गुणातीतं ते स्वरूपं न वेद अतएव तत्सादिहृतवानन्यः कुतो ज्ञास्यति तस्मादधुना कृपयैवमैश्वर्यप्रदर्शनाद्देवज्ञाय स इति भावः २ ननु यदि केपिन जानंती तर्हि कथं तेषां मुक्तिः संसारनिवृत्तिर्वेत्साशंक्य यथावद्ज्ञानाभावेपि येन केनापि मार्गे
णभजतो गत्यासीत्साह त्वमित्यादिना योगिनः हैरण्यगर्भादयउपासकाः अध्यात्माधिभूताधिदैवसाक्षिणं महापुरुषं तद्‌तर्यामिणमीश्वरं चेत्येवमादिरूपेण त्वां यजंतीत्यर्थः ततश्च त्वत्प्रसादात्तत्त्वज्ञानं मुक्तिश्चेति भावः ४ एवं
सांख्ययोगावेकीकृत्योक्तौ त्रयीमार्गं कर्मज्ञानभेदेन दर्शयति त्रय्याचेतिद्वाभ्यां वैतानिकाः कर्मयोगिनः त्रय्याविद्यया कर्मकांडमय्याविततैर्विस्तारितैर्यज्ञैः त्वां वै त्वामेवयजंते नन्विंद्रचंद्रादीन् तेयजंते कथं मां तत्राह नानावज्र
हस्तादीनिरूपाणि येषां तेषाममराणां नाम्नात्वामेवयजंतीत्यर्थः त्वमेवेंद्रादिरूप इति भावः ५ ज्ञानयज्ञेन समाधिना ज्ञानविग्रहं चिन्मात्राकारं ब्रह्माख्यं चिद्घनमूर्तिं भगवदाख्यं वा ६ वेदमवशैवमार्गावाह द्वाभ्यां अन्येचेति ते त्वयोक्ते
नपंचरात्रादिविधिना संस्कृतात्मानो दीक्षिताः संतः त्वन्मयाः बहिरंतश्च त्वत्स्फूर्तिमंतः बहुव्यामूर्तयः वासुदेवसंकर्षणादयो मत्स्याद्यश्च यस्य महानारायणरूपेणैकमूर्तिकं तं तं च तेच ७ बकाचार्यविस्तेदेन शैवपाशुपतादिमार्गे
ण भगवत्सुमुप भगवंतमुपेतिपाठो ८ किंत त्वद्विशेषनिर्देशेनेत्याह सर्वे इति येप्यन्येति येनानेतिपाठो अन्यस्मिन्कृद्रदेवतादावेवननुत्वयि धीर्येषांतथाभूताअपि सर्वेएवत्वां यजंति तत्रहेतुः सर्वदेवमयश्चासावीश्वरोतर्या
मीचेति किंतु यजंत्यविधिपूर्वकं तत्वेनातश्च्यवंति तेदेवान्देवयज्ञो यांतीत्याद्युक्त्यान्यधीत्वेन तात्त्विकं फलं नस्यादिति भावः ९ तस्मात्सर्वेमार्गास्त्वय्येवपर्यवस्यंतीतिसदृष्टांतमाह यथेति अद्रेःप्रभूतानद्यः पुनःपर्जन्येना
पूरिता बहुस्रोतसोपि गमनावसाने सर्वतः सिंधुमेवयथा विशंति तद्वदिमागतयो मार्गाः वेदादिप्रभवाः नानामुनिपर्जन्यापूरिताअंततो विचारावसाने त्वामेवविशंतीति १० ननु किमुच्यते मार्गा अंततो विशंतीति प्रथमत एव
कथं न विशंति तत्राह सत्त्वमिति भवतः शक्तिः प्रकृतिस्तस्याः सत्वादयो गुणाः तेषु गुणेषु प्रकृतिकार्योपाधयः स्थावरादयाब्रह्मपर्यंतांजीवाः प्रोताः प्रविष्टाः अतस्तेगुणाः प्रकृतो सोचत्त्वयीत्येवं कार्यत्वविचारक्रमेण तदवसान
एव त्वां विशंतीति भावः ११ ननु भवतः प्रकृतेरिति ममापि प्रकृतिसंबंधं कृषेत तो जीवानां मम चाविशेषः स्यादित्याशंक्यविशेषमाह पूर्वोत्तराभ्यां धीनुभ्यमिति तुभ्यं नमोस्तु ते इत्यस्याविद्ययस्यनेनान्वयः अविषक्तदृष्टये
दृष्टापि सर्वत्रानासक्तायेत्यर्थः तत्रहेतुः सर्वात्मने स्वव्यतिरिक्ताभावादविषक्त इत्यर्थः किंच सर्वधियां साक्षिणे साक्षीमात्रत्वान्नक्वाप्यसक्तिरिति भावः त्वदितरेषु तु देवादिजात्यालिंगितदेहाभिमानिषु तेत वाविद्यया गु
णप्रवाहः प्रवर्तते अतो महान्विशेषः १२ सर्वात्मने इत्यनेनोक्तं सर्वमयत्वं प्रपंचयति त्रिभिः अग्निरिति युग्मकं अग्निर्मुखं मुखत्वेनाध्यधिष्ठानत्वादित्यर्थः एवमग्रेपि कं मूर्धा प्राणश्च बलं च १३ परस्य ते अक्षिणी नखानि १४ ए
नं विराट्‌रूपेणस्तुत्वा अनंतब्रह्मांडकारणत्वेन स्तौति त्वयीति अव्ययात्मनि निर्विकारे पुरुषे पूर्णे मनो मयमनोवृत्तिर्व्यंगत्वयि लोकाब्रह्मांडानि संजीहते संचरंती सृष्टिप्रलययोर्बहिरंतर्भवंतीत्यर्थः सपालाः ब्रह्मादयापधिका
रयो रारोहंति पतंति चेत्यर्थः बहवोन्येजीवाश्चेहामुत्रगतागतं कुर्वंतीत्यर्थः ब्रह्मांडानां संचरणेदृष्टांतः जलेयथा जलौकसः सूक्ष्मप्राण्यंडराशयइति बाल्लादीनां तु यथावोदुंबरांतः केसरेषु मशकाः परस्परवार्तानभिज्ञा
इति एवमनंतब्रह्मांडादीनि त्वयि संचरंतीत्यर्थः १५ तस्माद्वर्हं त्वत्स्वरूपज्ञाने दुर्घटं त्वद्वतारलीलानां दर्शनश्रवणानुसंधानैः शोकनिवृत्तिः परमानंदश्चजायतेतः सर्वेतानादिकं क्लेशं विहायतानेव गायंतीत्याह यानीति आमृ
षामार्जितां शुकृयेषां यानियानीति सर्वरूपाणां शोकमार्जकत्वं लोकाः सर्वेजना इत्यधिकारानपेक्षा मुदेतितन्मानस्य स्वतः पुरुषार्थत्वं चाभिप्रेतं १६ अतः स्वयमप्यवतारलीलागायंस्तान्नमस्यति नमइति सर्वेकारणं मत्स्याय च

रुपाय

रकाराह्स्यत्रतोपदेशसंग्रहः एवमग्रेपिचकारायोज्याः तुभ्यमित्यन्यत्रापि योज्यं मधुकैटभयार्दस्य वेदहर्त्रे १७ अकूपारायेति अकूपारः समुद्रस्योत्कूर्मराजेपि कीर्तित इति विश्वः क्षित्युद्धारो विहारोयस्य सूकरस्य तवमूर्तिर्यस्य १८
अद्भुतसिंहत्वेपि हे साधुलोकभयापह १९ भार्गवरामस्य कुठारायुधत्वात्क्षत्राणां वनरूपकं ते न तेषां तत्र किंचिदपि कर्तुमक्षमत्वं व्यंग्यं २० क्रमप्राप्तं बलरामं श्रीकृष्णलक्षण वासुदेवादि चतुर्व्यूहांतः पातिसंकर्षणत्वेन प्र
णमति नमस्तइति अनाविर्भूतयोरपि प्रद्युम्नानिरुद्धयोः नमस्कारस्तापिन्यादिश्रुति प्रामाण्यान्नित्यत्वमभिप्रेत्य अंत्योनमः शब्दः प्रद्युम्नेपि योज्यः २१ शुद्धाय वेदनिंदनेपि निर्दोषाय तत्र हेतुः दैत्यानि म्लेच्छप्राय एवप्रायेणराज्यका
रित्वसाहस्येन क्षत्रिया स्तद्वंत्रे कल्कौदंतःम्लेच्छवेषः सोस्मिन्नस्तीतद्रूपमस्य २२ एवंलोकोद्धाराय त्वयावतारेषु कृतेष्वपि त्वत्कृतिं विहायान्यत्र प्रवर्तमानानां त्वन्मायामोहितानामिति शोचन्नाह भगवन्निति असति देहादावाम
हायस्य भ्राम्यते मुहुरावृत्त्या प्रवर्तते न तु त्वत्कृत्याविस्यर्थः २३ त्वत्कृतौ प्रवृत्तोप्यहं त्वत्कृतिं तत्कृद्विषिसंगदोषात्स्वबुद्धिः यामायया पुनर्गृहाद्यासक्तो नेवमित्याह अहंचेति चोप्यर्थे २४ मूढत्वमेवाह अनित्यति
अनित्यकर्मफले नित्यमिति अनात्मनि देहादावात्मेति दुःखरूपे गृहादौ सुखमिति विपरीतबुद्धिः सन् सुखदुःखादिद्वंद्वे छारामः क्रीडायस्य दुःखेपि रतौ हेतुः तमसाव्याप्तः हि निश्चये आत्मन एव साक्षात्प्रियं न तु पुत्रादिवद्
हव्यवधानेन तं त्वात्मानं जान इति २५ एतदेवसदृष्टांतमाह यथेति तस्माज्जलाद्भवंतितेः शैवालादेः तथामायाजवनिकाछन्नं त्वांहित्वा हं पराङ्मुखो देहाद्यासक्तोस्मीति २६ एवंजानतः कुतो विषयाभिमुख्यंतत्राह ने
ति कृपयाविषयोन्नत्यजंती धीर्यस्य अतः कामकर्मभ्यां पूर्ववासनातद्‌स्थकर्मभ्यां क्षुभितं विषयसंयुक्तैर्बलिभिः इंद्रियैरितस्ततआकृष्यमाणं मनो नियंतुं नशक्नोमीति २७ सोहमसत्वंतत्रापि असतां तथाविधानां माहशां
दुरापं तवाङ्घ्रिं सकपोसकृत्कुगत्यमोत्सुक उपगतः समीपे प्राप्तोस्मि अतस्तदध्यकपगमनेच तवदनुग्रह एवेत्यहं मन्ये अनुमहे सतीतिवा अपिर्मतिरित्यत्र योज्यः पुनरहं शब्दस्यान्येवदतुस्वस्वसाधनबलमिति भावः अन्य
थासदुपासनापि त्वयि मतिरपि च दुरापा किंपुनस्त्वदंघ्रिप्राप्तिरित्याशयेनाह पुंस इति यर्हिचिरेण त्वत्कृपया सती श्रद्धा त्वदुपासना यथासतामुपासनात्तवेतयाच संसारापवर्गस्त्वद्‌सनाक्षयः स्याततदैवत्वयिमति
र्भक्तिरपिस्यादिति त्वत्कृपाविनानसदुसनानतरां लभमतिर्नतमांत्वदंघ्रिप्राप्तिरित्यर्थः २८ एतत्सादिसर्वविज्ञातरिपरमसमर्थे त्वयिकिं विज्ञापयानीतिसकाकु प्रणमन्नात्मानमर्पयति द्वाभ्यां नमइति विज्ञानमेवमूर्तिर्य
स्य अतएवसर्वज्ञानानां कारणाय पुरुषस्यजीवस्येशाय दुःखादिप्रापकाः कालकर्मादयस्तेषां नियंत्रे ब्रह्मणे परिपूर्णाय अनंताः शक्तयोयस्य २९ वासुदेवाय सर्वकारणरूपाय सर्वभूतक्षयाय प्रलयाश्रया

य हे हरे पीकेशास्थितिकाले सर्वांतर्यामिन् शरणागतं मां पाहीति प्रार्थनं ३० इति श्रीमद्भागवते दशमस्कंधवर्तनः चत्वारिंशतमोध्यायस्तोषिणीसारसंग्रहे ४० इति भागवते दशमे चत्वारिंशोध्यायः ४० अक्रूरं भगवानयमदर्शय
द्रूपमद्भुतं दिव्यं अक्रूरोपि च मथुरामेनमनंतानद्भुतां महोत्सवदां १ तस्येति तमनाह स तमप्यष्टे वां तरधापयत् नटो नाट्यमिवेत्याकस्मिकत्वेद्भुतत्वे च दृष्टांतः १ धीमो बालौ कुचते मल्लाद्याइतिहृदेघमांशं
को मज्जयति स्माक्रूरः साश्चर्यमणिस्ततो भ्रमज्जनलात् १ तदाह स इति अपि चेरुक्तसमुच्चये अंतर्हितं तदिति वीक्ष्य आवश्यकं माध्यान्हिकं जलमयोपचारैस्तीर्थे भगवत्स्नानादिकं च कृत्वा २ हृषिकेशः स
र्वस्तोपि कौतुकार्थमिति भावः तथा हृष्टाद्भुतत्व प्रकारेण त्वामवगच्छामः बहुत्वं रामाद्यपेक्षयो ३ भूमावियति जले या वेति अद्भुतानि संति तानि तावंति त्वय्येवेह संति न तु भूम्यादिषु पृथक् संति तत्र हेतुः विश्वात्मके अतो विपश्यता
मया भूम्यादौ किं न दृष्टं न किमपि अपि तु त्वय्येवेति भावः ४ किंतु त्वद्रूपे स्मिन् दृश्यमाने तानि सर्वाण्यद्भुतायनकल्पंते इत्याह यत्रेति भूम्यादौ यान्यद्भुतानि तानि सर्वाणि यत्र त्वयि संति तत्त्वां सकलाद्भुतमयमनुपश्यतः निरंत
रं पश्यता मया किमन्यद्भुतमिह दृष्टं त्वां विना न किंचिदद्भुतमिति भावः हे ब्रह्मन् सर्वतो बृहत्तम ब्रह्मन्नेति वा पाठः इहाद्भुतमिवाद्भुतमिति पाठो ५ गांदीनीसुतोक्रूरः दिनात्यये दिनस्यांत्ययामे अथापराह्णे इति वक्ष्यमाणात्
तत्रापराह्णः सायान्हापरपर्यायस्त्रेधा भक्तदिनांत्यभागः इत्थं च वक्ष्यमाणलीलानामवकाशलाभः अक्रूरतीर्थादतिनिकटपुरोपवनस्य दिनात्यये प्राप्तिरक्रूरस्याश्चर्यदर्शनादिना तत्रैव चिरविलंबात् ६ किंच पथिलोकान् प्रीणयितुं मेदा
गमनादपीसात्रायेनाह मार्गे इति ग्राम्यजना अपि प्रीताः इति वस्तुस्वभावोक्तिः हे राजन्निति एतत्सर्वाज्ञायत एवेति भावः दृष्टिं नादद्युः पश्यंत एव स्थिताः ७ प्रतीक्षमाणाः अवतस्थिरे अनिष्टाशंकिनी बंधुस्त्रेहयानीति न्यायेन वर्त्मनि ईक्षमाणा
ऊर्ध्वावस्थिता आसन्नत्वं पविष्टा इत्यर्थः पूर्वं रथश्रेष्ठेणानुगतु मशाक्तामार्गे रथचिन्हमहच्छापि वक्रमार्गे तच्चिन्हानेनासो गत इति मत्वाशीघ्रमित्तनाय कृष्णवर्त्मनागताः पुरसमीपेपितमहच्छोत्कंठया निरीक्षमाणा एव तस्थुरिति भावः ८
ईश्वरोपि स्वपाणिना तत्पाणीं गृहीत्वा यतो भगवान् वात्सल्यादिगुणकः इषद्धास्येन प्रीतिं सूचयन्नूचे गृहं च प्रविशातो अवमुच्य विश्रम्येत्यर्थः अथ तस्य वेशानंतरमेव पुरीं द्रक्ष्यामः तांततिसादरं विश्रमार्थं विलंबप्रार्थयते १० ना
हमित्यत्र हेतुः हे प्रभो त्वदनुगमनमेवोचितमिति भावः ननु महात्मयाप्रविशात तत्राह स्यक्तुमिति तत्र हेतुः नाथ सर्वेषां कामपूरक तत्रापि तेभक्तं मां सत्यं न त्याज्यः किंतु स्वैरं पुरीं द्रष्टुं स्वल्पकाले स्वगृहं प्रस्थाप्य से तत्राह भक्तवत्सलक्ष
णमपि न त्यक्तस्यागासहि हमो इति ११ तर्हि किं कार्यं तदाह आगच्छेति ननु स्वकस्येच्छा पयितुं त्वकं संपास्यसी नेत्याह यामेति सर्वे वयं पूर्वं गृहा नैव यास्यामः संप्रति महच्छासैन्यमाह अस्मान् सनाथान् कुरु यद्वानोस्माकं गेहान् सनाथान् कुरु बहुत्वं
बंधुनपेक्ष्य अधोक्षजेति इंद्रियज्ञानागोचरस्य तवागमनादेव सनाथत्वमिति भावः एकाकी च नागच्छेत्याह साग्रजः सत्राकचव्रचरक्षकसहितैः सुहृद्भिः पित्रमित्रादिभिः स हेति एवं सद्यः कथं घटेत तत्राह स्कत्तमेति तव माहात्म्येने
वे घटेत न मद्योग्यतयेति भावः १२ ननु पित्राग्निस्कारहज्यापूयं युष्माद्गृहस्य स नाथा एव तत्राह पुनीहिति गृहमेधिनो पंचसूनादिपराणां यस्य पादरजसः क्षालनोदकेन गृहादौ सिक्तेन पित्रादयोग्निरंतरं तृप्यंति तेन गार्हस्थ्यकृत्यस
माप्त्या कृतार्थता स्यादिति भावः १३ तर्हि रजस्त्वच्छौच जलं चानीयतां तत्राह अवनिज्येति महान् श्लोकयः व्यासादिप्रशास्यः अतुलमिंद्रादिदुर्लभं एकांतभक्तानां गतिं प्राप्यं त्वां च नित्यं लेभे बलिर्वत्सलः तत्र क्षालयितुमिच्छामीति भा
वः १४ शुचय इति पापीपावनेनान्यतीर्थवदशुचित्वं निरस्तं याभिः स्वः स्वर्गं ब्रह्मलोकं प्राप्ता इत्यर्थः एवं पावनत्वं सर्वं वंद्यत्वं महद्वस्तानिस्तारकत्वं परपदप्रापकत्वं चोक्तं १५ देवदेव हे ब्रह्मादिपूज्य तथापि जगन्नाथत्वेन मा
मप्यनुगृहीतुमर्ह ननु त्वं न पुण्यवान् तत्राह पुण्येति यस्य श्रवणादिपि पुण्ये किमुत दर्शनादिना ममेति भावः किंच यदूत्तमेति तत्कुलजातोहमवस्यानुग्राह्य इति भावः ननु कंससंगित्वं तत्राह उत्तमेति पूतनादिगति प्र
नेनोत्तमश्लोकीर्ते किंच नारस्य जीवमात्रस्याश्रय त्वां विना न कोप्यनुगृह्णीयादिति भावः स पार गृह्णन्नमतिनम इति १६ आर्यसमन्वितइति कृष्णादिसाहित्यं निरस्तं तेषां तत्रारुचिवितर्कात् कदेस्यपेक्षायामाह यदुचक्रेति यदेति
शेषः संकेते नोक्ति मेत्र भंगभयात् जननीपितरौ बद्धौ पादचाभ्यां अत्र दुःखिनौ संप्रति त्वदनुग्रहाति ध्यग्रहणेनैवोचितामिति भावः १७ स श्रीकृष्णमानयनेन हृष्टोपि इव इति वाक्यालंकारे आयास्य इत्यंगीकारेणास्यंतर्मनस्या
नावाप्तागृहं ययाविति श्वः कंसं निहत्या गते तिसंभाव्य स्वगृहमुपस्कर्तुमिति भावः १८ गोपैर्वयस्यैः परिवारितः १९ श्रीकृष्णमद्दृष्ट्वा पुरीं चतुर्भ्मेणवर्णयन्नादौ स्वाभाविकीं शोभामाह ददर्शेति सार्द्धद्वयेन स्फाटिकमयानि तुं
गानि गोपुराणि पुरद्वाराणि गृहद्वाराणि च यस्यां तां बृहंति हेममयानि कपाटानि तोरणानि च यस्यां ताम्रआरः पित्तले च तन्मयाः कोष्ठाः दुर्गप्रकारा यत्र परिखाभिर्दुरासदां दुर्गमां तत्र पूर्वोत्तरयोः कांति द्योतएव परिखात्वे
अन्यत्र जलपूर्णखातगर्तरूपाणि उद्यानैः १ फलप्रधानवने रम्यां च सा तु उपवने पुष्पप्रधानवनेः शोभितां च तां पूर्वोक्तेशाकटावतरणवनेतु बात्वमाकृत्रिमं च क्रमस्त्वेवं उद्यानमुपवने परिखाः कोष्ठः तत्र गोपुराणि च
तर्गृहद्वाराणि हार्षुकपाटादीनि २० सौवर्णाश्चतुष्पथाः हर्म्याणि धनिकगृहाणि निष्कुटगृहारामास्तैश्च श्रेणीनामेकनिलयोपजीविनामुपवेशस्थाने रम्ये श्वगृहे रत्नकृतां अमलः स्फटिकः हरितो मरकतः वैडूर्यादि रत्नैर्जु
ष्टेषु वलभीषु वेदिषु गवाक्षच्छिद्रेषु मणिनिबद्धभूमिषु च उपविष्टैः पारावतैर्मयूरैश्च नादितां प्रतिध्वनियुतां तर्गृहां तत्र वलभ्यो गृहपुरोभागेषु वक्रदारुच्छादनानि समेवच्छभिर्वलभी युवान इति माघकाव्ये रूपपरिगृहा
तीति वर्णितं वेदयो गृहाद्बहिरवेष्टनभूताः पार्श्वादिविश्रांतिवेदिकाः अथ धनुर्मखोत्सवार्थं कंसकृतां श्रीकृष्णप्रवेशमंगलत्वेन संपन्नां शोभामाह संसिक्तेति सार्द्धेन सुगंधिजलादिभिः सिक्ताः रथ्या राजमार्गाश्च पण्यवी
थयश्चान्यमार्गाश्चांगणानि च यस्यां प्रकीर्णमाल्या इयायत्र तत्राकुरानवोत्फिन्नयवादयः २२ उत्तमजलपूर्णकुंभैः स्वलंकृतानि द्वाराणि येषां ते गृहा यत्र तां कथं भूते दध्नाचंदनसिक्तैः प्रसूनानां दीपानां चावल्याये षु
ष्वदैः फलगुच्छे रूपलक्षितारंभाः क्रमुकाश्च तत्सहितैः संकेतुभिः ध्वजयुक्तैः पट्टिकाभिः तस्तिमाशाणि वस्त्राणि तद्युक्तैः तत्रस्थरीतिः द्वारेषु भयतस्तोदूलोपरिकुंभाः तत्परितः पुष्पावलिः कंठे पट्टिकाः मुखे पल्लवाः तदुपरि
पूर्णपात्रे दीपाः संनिधौ क्रमुकारंभाः केतवस्तोरणानि चेति २३ तामिति त्रिकं नरदेववर्त्मना राजमार्गेण पुरीं संप्रविष्टौ रामकृष्णौ द्रष्टुं समीयुः संघशाः प्राप्ता एव हर्म्याणि चारुरुहुरेव निवारिता अपि न निवृत्ता इत्यर्थः २४
औत्सुक्यमाह द्वाभ्यां काश्चिदिति निःस्वनं निशाम्येति द्वितीयपद्यस्थस्य सर्ववाक्ये ष्वन्वयः पौरजनानां हर्षकोलाहलं श्रुत्वेत्यर्थः काश्चिद्विपरीतं धृतानि वस्त्राणि भूषणानि च याभिस्तथा भूताः सत्यः युगलेषु च युग्म
धार्यमपि कुंडलादिषु एकमेकं विसृज्य समीयुः अथापराः कृतमेकमेव पत्रंययोस्ताश्रवणे यासां एकमेवचरणाभरणं यासां ताश्च ताश्च अपरास्तु एकनेत्रे कज्जलं निधाय द्वितीयं लोचनमनंजयित्वैव समीयुः २५

नेधिणिटा

राम
६५

तदपास्येति सर्वत्र योज्यं तद्भोजनं हित्वा सर्वत्र हेतुः सोत्सवाः हर्षभराक्रांतचित्ताः क्रियमाणैर्लास्यंगायत्रकृतस्नानाः तदभ्यंजनमपास्य शय्यानादुत्थायतन्निद्राजाड्यमपास्य निजार्भकेस्तन्यंपाययंत्यः तदपास्य पायनंत्यक्त्वा
पश्चात्तमर्भकमपोह्य मातरः स्नेहविशेषवत्योपीति भावः २६ दूरतस्तावत् श्रियापिरतिजनकेनवपुषैव दृशामुत्सवंददत् तत्रापि मनोहरदेहवत् चरणन्यासवत्त्वेन दृश्यमानस्तंददत् नेकहेतुः अरविंदनेत्रतया दृश्यमानस्तं
ददत् तत्रापि प्रगल्भा मनोहरणसमर्थास्तीला भ्रूनर्तनादयः हसितंच मुक्तावलोकने इंगितंददत् तासांमनोसिजहारेति उत्सवंददज्जहारेति श्लेषेण हरणचात्पर्यं मनसोरत्नस्तंचव्यंग्यं अन्योहिचतुरलुब्धः उत्सवेर्जनो
न्मन्योन्यरत्नादिहरति इयंदर्शनक्रमेणव्याख्या पाठक्रमेणत्वेवं अरविंदलोचनतयैवजहार किमुततादृशावलोकनैः तादृशविक्रमः सन्नेवजहार किमुततादृशानंतलीलाश्रयवपुषेति अतएवसाधकतमत्वविवक्षा भप
त्रतृतीया २७ अनुद्भूतं प्रेम्णा निरंतरं द्रवीभूतं चेतोयासां एतच्च मुहुः श्रवणेनैवतद्दृष्टानुस्मृततरा ततश्चतस्य प्रेक्षणं चोल्लुष्टस्मितंचतदेवस्मृघातया सेचनेनलब्धः संमानोयाभिस्ताः अनंतमप्याधिंजहुः तत्रहे
तुः आनंदघनविग्रहं तं परिष्वज्येति तत्कथं दृग्द्वारेण मनसिलब्धं दृशिवाष्पणलज्जयावामुद्रितायांमनसि तत्स्पर्शः साक्षादिवालिंगनसंपतेरिति भावः आलिंगनचिन्हं हर्षत्वचइति अरिंदम हे निर्जित कामत्वादृशो
जितकाम एवैतच्छ्रवणेमुख्याधिकारीति भावः २८ आधिस्यागलक्षणमाह प्रासादेति सौमनस्यैः कुसुमसमूहैः रतिनोवर्षन् यतः प्रमदाः श्रीकृष्णप्रेम्णा प्रकृष्टमदाः २९ इत्थंस्मृतगामिभिस्त्रिभिः कृतसमानमादावुक्त्वा
ब्राह्मणकृतमाह दधीति उदकपूर्णैः घटैः सहितैर्दध्यादिभिः उपायनैः फलादिभिः तेकथंकंसान्तं नीतास्तत्राह प्रमुदिताः सोयंभगवानित्यानंदेन सर्वेषां भयापगमादिति भावः ३० पौराः पुरस्त्रियः गोपीनामेवश्लाघना
त् क्लीबभावम्यार्षः यद्वा पुरौकसः सर्वएवगोप्यइत्युपलक्षणं नराणांचतुर्दशलोकानामपि यद्वा जीवमात्राणामुत्सवोया भ्यां पश्यंतीतिवर्तमानोक्तिः पुनर्गमनसंभावनात् ३१ अमानयंत्स्मृमनसः कृष्णमित्रिष्टाहिजाः स्त्रि
यः दुष्टात्मारजकोनेति तद्वधः षड्भिराहतत्र मानेविदधतीश्रिष्यदलसलिलेरप्ययाचतेमहतेसंपन्नाअपिदुष्टामहेश्वरायापियाचतेनैव २ तदाह रजकमिति षड्भिः रजकोवस्त्रनिर्णेजकः सएववस्त्राणांरंगमपिकुर्व
न् रंगकारः केचित्तु स्वभावंकंसानुगं अयोतवस्त्ररंजनस्थानात्पुरांतर्दितिशेषः गदाग्रजइति श्रीकृष्णसापत्न्यात् गणमुख्यस्यगदनाम्नोजन्म भगवतित्रजंगते कंसमोचितवस्त्रदेवाज्ञातमितिसूचनाय देवरक्षितया
लब्ध्यानवचात्रगदादयइत्युक्तोदेवरक्षितेयोयंगदोनतुरोहिणेयः बलानुजस्यतस्यभाविजननत्वात् ३२ कथमयाचतत्तदाह देहीति नयुवांयोग्याविति नवाच्यमित्याह अर्हतोरिति मूल्यविनाकथंदद्यानितत्राह भविष्यतीति पर
श्रेयः ऐहिकामुष्मिकंच एवमुक्तिस्तस्य दौरात्म्यं ततोवधयोग्यतांचव्यंजयितुं श्लेषादकारप्रश्लेषेणदातुस्ते इहभक्तिसुखमयं परंश्रेयोनभाविकिंतु अपरं केवल्यं कैवल्यमेव अत्रचजीवनसंशयः अतः शरणमेवागच्छ
तिभावः ३३ सर्वतः परिपूर्णेनेति कौतुकादेवेतिभावः ३४ हेउद्धतारजतो निःशंकचेष्टाः यतोगिरिवनेचराः सूयंनित्यमीदृशान्येववासांसिकिंपरिधत्त यद्राजद्रव्याणि प्रार्थयध्वे यद्यपि जगद्गुरस्त्रसर्वोत्कृष्टमेवस्ववर्णाज
नेद्रव्याणिचाभीप्सथकिंनेवेत्यर्थः व्याजमात्रमिदं यद्वा याचनमितिभावः ३५ हेबालिशाः आशुयातपलायध्वं हियतः बध्नंति जहरंति छिंदंति अस्माभिस्तु चात्विज्ञात्वादेवक्षांतमिति भावः देवीत्याह यातः प्राप्तआशुश्च्यपत्नोमाद
शोमूर्खैर्वालिशाः येस्तेयदि जीजीविषाजीवबलप्राणधारणयोः बलधारणेच्छातत्त्वमुक्तनेच्छातदेमैवंप्रार्थ्य ननुशूरेरजकेपिकथंबलंदर्शनीयंतत्राह राजकुलानि राजवंस्या भवद्भिधाः इत्यंजनंबध्नंतीत्यादि ३६ विकत्थमा
नस्य श्लाघापूर्वकमुच्चैर्जल्पतस्तिष्ठतएवतस्यशिरः खड्गानुकारिणाकराग्रेणैवछित्वादूरेचिक्षेप ३७ वैचेतिपाठौ मार्गसर्वतः मार्गस्यसर्वदिशोदुद्रुवुः ३८ आत्मप्रियेपीतनीलवर्णेआददत् दत्तवान् गृहीतवानितिवा अत्रा
यंभगवतोभिप्रायः कंसेनमत्कोत्सनायैवतानिनवानिवस्त्राणिरंजितानि तद्युद्धेनैवप्रथमंतदुत्सवं विघ्नयामीति वस्तुतस्तुवस्त्राणिभगवतास्त्रियान्येव तद्द्वारामेलितानि नरकमेलितकुमारीगणवदिति ३९ सूरवरावममंडत
वासनाभरणसंहतिभिर्भवन्नावासनाः क्षपइत्युविहताशुभवायकाः प्राभजतेनजगत्सुभवायकाः तदाह ततइति तद्धाधाकृत्वा परिधानाच्चप्रीतरश्चैर्लेयेरेवाकल्पैः कदकोगदाहेडोभूषणेस्तयोर्वेपरचितवान् यंतोविचित्रवर्णैः म
णिमयसौवर्णभूषणतुल्यैः कुतोनिजमणिमयालंकारस्यागः कुतोवासोपिचैलेयालंकारमेवददौतत्राह अनुरूपतः मल्लुलीलायामत्रोदकत्वेनतस्यैवानुरूप्यादित्यर्थः ४० विरेजतुः भक्तसेवास्वीकारादितितत्वेसीतेतरोश्रूकृष्ण
द्दोपर्वणिउत्सवे ४१ लोकेत्रैवकिमुतपरत्र परमांश्रियंसंपदं परमैश्वर्यं प्रभुत्वं स्मृतिंचेंद्रियपाटवंच तस्यतस्मैप्रादात् ४२ स्रुमनोबंधननिपुणोमालाकारः स्रुदामनामायत् बध्वाकृष्टाः स्वगुणैः सुमनः श्रेष्ठायतः फलमुक्ताः
तदाह ततइति स्वयंजगमतुः पूर्वंतस्य श्रीकृष्णनिकटानागमनंतुपायनमाल्यरचनाभिनिवेशेन सिरसाभूविननामेति वैद्यमवेपिरूवंविष्टभ्यहस्ताभ्यां पस्पर्शशिरसामहीमिति तद्दर्शनार्थनिष्क्रांतपरिवारेमाल्यानिविष्टदृष्टौतस्मिन्
सहसातस्यातिकागमनेदंडवत्प्रणामस्थानसंकोचादितिभावः ४३ अर्हणपूजोपकरणंधूपदीपनैवेद्यादि आदिनानीराजनचामरविजनादि ४४ स्तुतिश्चकृतेत्याह प्राहेति प्रेमगद्गदत्वादिप्रकारेणावदत् किंवाच्युयुवांपश्यतांनोज
न्मसार्थकमिति कुलंचपावितं सर्वेभूताभविष्यंतः कुलजाः संबंधिनश्चतीर्णा इत्यर्थः पित्रादिप्रीत्याकृतकृत्यताचेत्याह पितृदेवेति सर्वत्रहेतुः हेप्रभोपरमेश्वरेति विभोइतिक्वचित् ४५ ननुवसुदेवसुतयोः कथमेवंस्तु
तिस्तत्राह भवंताविति पुरुषरूपेणकारणं स्वरूपेणततःपरंच इहमथुरायां अंशेनत्रयेशोगेपयादेवैःसह यद्वांशेनजगतःकारणमित्यन्वयः यस्यांशांशांशाभागेनेतिवक्ष्यमाणात् क्षेममभयंभवोवृद्धिः चहेयंद्वयोरपिधा
धान्यायः ४६ रजवधेनायकानुग्रहेपिचनयुवयोर्वैषम्यमित्याह नहीति सुहृदोजगदात्मनोश्चतावन्नविषमादृष्टिः भजंतंभवभजतोरपिनविषमा यतः समयोः समोहंसर्वभूतेषुनमेद्वेष्योस्तिनप्रियः चयः येभजंतितुमांभ
क्त्या मयितेतेषुचाप्यहं मदन्यंतेनजानंतिनाहंतेभ्योमनागपि सुरद्रुमायद्वदुपाश्रितोर्थदइत्युक्तेः यद्वाईश्वरयोरप्यभक्ताधमगच्छागमनंसर्वत्रसमतयैवेति दैन्येनाह नहीति अयमनुग्राह्योयंनेतिविषमादृष्टिर्न यतःसुहृद्
दोः निरुपाधिकृपाकरयोः किंचजगदात्मप्रियंययोः कुतः भजंतंभजतोरपिभूतेषुत्तमाधमेषुसमयोरिति ४७ तौवैषम्यहीनावपि मदाज्ञावेदरूपास्सेवतत्राह किमिति साक्षादागतयोरधुनाकिंकार्यंतत् नचाति
ध्यंकृतमेवतत्राह पुंसइति अतिशयितोनुग्रहः पुंसस्त्विति पाठेनुग्रहस्त्विस्यन्वयः ४८ इतिएवंविज्ञापयन् अभिप्रेत्यमुहुर्माल्यावलोकनादिनातन्मतंज्ञात्वाविशेषेण भगवद्योग्यतयारचितंमाल्यमिकामेव दृढम्

नी०६ती०
६५

दद्दौ बहुवचनांतः पाठः क्वचित् ४९ ताभिः साचान्याश्च ताइत्येक विशेषः प्रथमपाठे माल्यं दत्त्वा साष्टांगं प्रणताय प्रपन्नाय भक्ताय ५० तस्मिन्नपीकृष्णे यत्र यतोऽखिलानां देवतानामात्मनि मूलस्वरूपे परां निरुपाधिकां दयां चत्व
र्थे प्रथमं चकारः ५१ इति एतान् प्रार्थितान् वरान्वरोसाबन्यान्कान् ददौ तत्राह श्रियं चेति अन्वयभवर्धिनी वर्धनवर्धः वंशवृद्धिसहितां श्रियमित्यर्थः न क्षीनिष्यति संततिरिति पराशरोक्तेः ततः सहाग्रजो जगाम ५२ इति श्रीमद्भाग
वतदशमस्कंधमध्यगः एकचत्वारिंशकेषस्तोपिणीसारसंग्रहे १ इति भागवते दशमपूर्वार्धे एकचत्वारिंशोऽध्यायः ४१ कूरशारसंभिन्नापतापदमितिवक्रवत्स्तन पुनरियं कंसानुगापिता पान्हत्रीकुब्जोत्तितामुञ्जुचक्रे १ गृहीतान्यगवि
लेपनां चंदनादीनां भाजनानि ययास्तां युवतीं वराननामित्यन्यांगसौष्ठवं व्यज्यते कंसगृहं यातीं साकूततया हसन् पृष्टोरसप्रदः कुब्जायां शृंगारसहचरेषु हास्यमन्यत्रापूतं चरसंदातुमित्यर्थः २ सोपहाससंबोधयति हे वरोरु न केवलं
तावेव वरौ किंतु अंगेन सर्वमेव प्रशस्तमंगं यस्यास्ता दशो त्वकां एतदनुलेपनं कस्य वा ऊहेत्यव्ययं सम्ब्भगे वितर्के साधु सत्यं स्पष्टं वा मात्वज्ञेयेति भावः अंगयोरस्मदाश्रयोर्योग्यमनुलेपनं ३ त्रिवक्रावाराः कुटिस्थानेषु वक्रत्वात् त्रिव
क्रेति नाम यस्याः पुंवद्भावश्चार्षः अनुलेपक्रियायां कंसस्य बहुमता दास्यहमस्मि मया भावितं साधितं अतिप्रियं यद्भारतो प्रियं कामोद्दीपकं तत् अनुलेपनं युवां विना त्वेषु बहुषु श्रेष्ठो यः सोपि कोर्हति हे सुंदरवर्येति मद्भावविशेषस्तस्त्वय्येव
नरामेऽहति भावः ३ रूपमंगसौष्ठवं पेशलत्वं सौकुमार्यं माधुर्यं रसिकता हास्यं चालापः अवलोकितं च तैर्धर्षितं मोहितं चित्तं यस्याः सांद्रं घनं ददौ स्वहस्तेनांगेषु त्वभ्यया मासेत्यर्थो भाति तोषण्यां तयोः हस्ते ददौ ततस्तत्प्रमुखाः सर्वे चंदनलि
प्तांगा बभूवुः तानच्चंदन पर्याप्तिरैश्वर्यशोभेत ५ स्ववर्णेतरः रामकृष्णयोर्वर्णाभ्यामितरैः नीलादिवर्णस्तेन शोभितुशीलस्य तेन संप्राप्तः परभागः शोभातिशयो येन तेनानुरंजितो पत्रभंगीरचनादीना भूषणादिषु सखिभिरनुलिप्तो संधि
रार्षः तुइतिच्छेदो वा रंजितोनुवस्तूतः स्वत एव शुक्लभाते इति भाति ५ कुब्जामतएवत्रिवक्रां तनामध्ये ऋजुवीकर्तुमितिच्व्यंतः पाठः स्वदर्शने अनुषंगिकं फलं दर्शयन् ६ तस्याः प्रपदे पादाग्रद्वयं पद्भ्यामापीड्य हस्तांगुल्यौ मध्यमातर्जन्यौ उ
त्तानेयस्मिन्पाणिना दक्षिणेन वामनतुपवद्धं भूतनमूर्ध्नं चुबुके धृत्वा ध्यात्म देहमुन्नयामास यतोच्युतः लीलाविशेषाच्युतिरहितः अन्यथेच्छामात्रेण तत्संभवात् ७ सार्जन्यत एव समानानि यथायोग्यमानवंत्यंगानि यस्याः तदाह
बृहदिति प्रमदानामुत्तमा भगवदंगसंगयोग्या च बभूव मुकुंदस्पर्शनादिति स्पर्श एवात्र हेतुश्चुबुकग्रहणादेर्विनोदमात्रत्वं यतः सः स्पर्शो मुकुंदस्य चिंतनमात्रात्सारूप्यादिमुक्तिदस्य तस्य कियदेतदिति भावः ५८ असृष्टानेजडविधिना स्याः
कौतायाः कृतंत्रिवक्रात्वं अलके वृत्तिप्रियोक्तौ विदधत् कुब्जा मरुत्तं विधीडुचक्रे ८ ततः स्पर्शनात् रूपगुणयोः महत्वेन संपन्नासती योग्यताप्राप्ता प्रकटीकृतकामा कटाक्षावीक्षणादिना ऽऽह सस्मयं स्मयतीति पाठो ९ हे वीर मन्मंदनम
नेऽभीष्टपूरणे वा समर्थ ममगृहमेहि संगिनो विहाय कथं यायामित्याह यामः स्वमेतेहं च सर्वे इत्यर्थः अन्ये दूर्यास्यामस्तत्राह नेति इह मार्गे वासस्थानानि श्चयेन पुनर्दुष्प्रापत्वात् गृहमेव नेष्यामीत्यर्थः यद्वा तर्हि इत्येको यं सखीना मे को
वानीयतां तत्राह नत्वामिति कथमेवं ते धार्ष्ट्यं तत्राह त्वयेति १० रामस्यापस्यतो नु गानां च पश्यतां रहस्येयाच्यमानः अतस्तस्य तेषां च मुखं वीक्ष्य प्रकर्षेणान्योन्यं संतालक्ष्ये पमुक्त्वे हसन् हस्फुटमुवाच तत्र रामादीन्प्रति एतां वचयामी
ति व्यंजनाय तां प्रति तु प्रतिज्ञाव्यंजनाय ११ आधेर्मनःपीडायाः शामने साधितोर्थोऽत्रागमनप्रयोजनं येन अगृहाणामकृतदाराणां पांथानां च परमाश्रयस्त्वं बहुत्वेन साधारण्यानन्यत्वात्प्यार्पूर्वं वद्धं जनाहवे १२ माध्व्या मधुरया
वणिक्पथे वैणिग्भिः नानाविधैरुपायनैः सद्यः शोभैः तां बूल्वाद्यैः रत्नादिस्रग्भिरगुर्वादिभिश्चार्चितः साग्रजइति नयस्योपलक्षणं प्रथमं यमुनांतिके पुर्यं तेस्थितैर्विप्रैः कृतापूजो का धुनात्वतःस्थितैर्वैश्यैः कृता का १३ वैश्यस्त्रीणांभा
वमाह तदिति आत्मानं देहं देहिनं वा कावयं कृतिकाम इत्येवं नाविदुरित्यर्थः अतः सवेगेन का [illegible] र्यो हासो वल्वयविस्रंसः सस्तगात्रमोटमोटनकं पाद्यैः किंचल्लेख्यवन्मूर्तयो या सांतथा बभूवुः १४ ततइति सार्धकं अच्युतः ज्ञानाद्वै
श्वर्यच्युतिरहितोपि लीलया धनुर्मखशालां पृच्छन् ऐंद्रमिवेति रत्नादिमत्त्वेन चित्रत्वात् बहुत्वाच्च अतोभूतं १५ वार्यस्यर्धकं न्यस्तिस्त रक्षिभिः १६ सलीलं सावहेलं चकाराद्रस्यनिमेषेण त्यस्य च सर्वैरन्वयः न्रणां क्रुद्ध रक्षिणामन्येषा
चासंभावयतां अनादरे षष्ठी मदकरी मतकरी १७ कोटिगुणाढ्यो महतो वंशाज्जातोपि वक्रतरः कठिणः नार्हति पूजां धनुरयमिती भगवान् बभंज तेसहसा ७ नचतन्मृदुत्वं किंतु परमकठिणमित्याशयेनाह धनुषइति उपाधिक्ये
नप्राप्तः १८ आततायिनः सापकाः गृह्यतां जीवन्नेव राज्ञे समर्पणाय ततो बध्यतामिति वदंतः आगेवीमतेतु अस्मद्विषो भगवता गृह्यतामित्यादि १९ तान्विलोक्य क्रुद्धौ चुक्रुधतुः ततस्तान्जघ्नतुः श्चेति वाक्यभेदात्तानिस्य पुनरुक्तं २०
बलं सैन्यं ततस्तस्माद्धनुःशालामुखात् हृष्टौ संतौ पुनरपि पुरिचेरतुः २१ वीर्यं धनुर्ग्रहणादि पराक्रमं तेजः सर्वाभिभव सामर्थ्यं च धार्ष्ट्यं च सौदर्यं चेति द्वंद्वैक्यं विबुधोत्तमौ शिवविदम् २२ आदित्योस्तमिति तदानीं कंसाद्यारब्धप्र
त्या पासह नत्वादिति भावः शाकं दंशाकराव मोचनस्थानं २३ पौरभप्रेमवर्णनमुपसंहरति गोप्य इति मुकुंदस्य विगमे अज्ञं परित्यज्य मथुराप्रस्थाने गोप्यो विरहातुराः सत्यो याश्चाशिषः स्वरूपं भेजा भानारजनी अद्य ध्रुवं तत्र दृशा इत्यादिना
पौराणां कामनीयानर्थान् आशासत अवश्यप्राप्यत्वेन ष्टवत्यः ताकृत्ताः सत्या बभूवुः पुरुषभूषणस्य श्रीकृष्णस्य गात्रशोभां भजतः स्वस्वसंपत्तिकामनया ऐश्वर्यमयो पचारानर्पयतोपीनरान् ब्रह्मादीन्हित्वाउतदैश्वर्यमनाद त
त्यां गात्रलक्ष्मीमपनमाश्रयश्रीः कामयामासेति २४ अवनिक्ते क्षालिते अंघ्रियुगुलयोस्तौ क्षीरेणोपसिच्यते तत्क्षीरमिश्रमन्नमात्रा शाकटस्थाग्निधानीस्थित तोडवं देनिक्षिप्तं सायमात्राशायत कृष्णेकेतिं ज्ञात्वं कंसचिकी
र्षितं प्रातर्मल्लयुद्धादि विधापनेच्छं ज्ञात्वा पिसुखं न्यवसतां २५ कंसस्तिवितियुग्मकं धनुर्भंगादिकं निशाम्य तं चतेच परं केवलं रामकृष्णयोर्विक्रीडितं न तु पराक्रमरूपमिति च निशम्य भीतो दुर्निमित्तान्यपश्यत् २६ दुर्मतिः तदापि
द्रोहानिवृत्तेः उभयतः स्वप्नजागरितेन्नेदन बहूनि बहुविधानि राज्यभंगादि हेतून् नि तथा मृत्योर्दूतास्यभिवकुर्वंति तत्सूचकानि च २७ अदर्शनमिति त्रिकं जलादौ प्रतिरूपे दृश्यमानेऽपि स्वशिरसस्तत्रादर्शने असत्यपि द्वि
तीये नेत्रांतर्धाय के गल्पादौ चंद्रादिज्योतिषां द्वित्वं चद्वयं द्वयोः प्राधान्याय यथेति परेणान्वयी २८ स्वच्छायायां सच्छिद्रतादर्शनं पिहिते कर्णे तः श्रूयमाणो ध्वनिः प्राणघोषस्तस्याश्रवणं वृक्षेषु स्वर्णवर्णाभासः धू
लिकर्दमादौ स्वपदानामनभिव्यक्तिः एतानि जागरसंबंधीनि २९ स्वप्नान्याह स्वप्नइति प्रजागरेऽप्यतिचिंतया कदाचिन्निद्रायां स्वप्नः प्रेतैः परिष्वंगः खरमारुह्य यानं विषभक्षणं नलदमाली जपाकुसुममाली या
यादिति यतश्च ३० स्वप्नजागरितानि तत्संबंधीनि ३१ व्युष्टायां गतप्रायायां अरुणोदय इत्यर्थः तर्हि किमंधकारे एव नेत्याह सूर्ये चेति समुद्रतीरस्थे यदा उदितिष्ठन्निव सूर्यो दृश्यते तदैव एतद्दृश्योदय पूर्वकालेऽ
त्यर्थः मल्लक्रीडात्मकं महोत्सवं मारभे स्वबंधोपायं स्वयमेव चक्रे इत्याश्चर्येणाह हे कौरव्येति ३२ महोत्सवत्वमेवाह आनर्चुरिति अलंचक्रुः रंगं मल्लक्रीडास्थानं पताकाभिर्वस्त्रनिर्मित तोरणैश्च ३३ यथोप
जोषं यथा सुखं तद्विशेषो वेद्यमेव राजमंचेषु चारूढाः सह भृत्यैर्महीभृतः अतः पुराणे मंचाश्च तथान्ये परिकल्पिताः अन्ये च नारमुख्याना मन्येन रयोषितां अक्रूरवसुदेवौ च मंच प्रांते व्यवस्थितौ नागरीयो

राम ६६

षितां मध्ये देवकीपुत्रगर्धिनीति ३४ राजमंचे प्राङ्मुखश्चात्र निर्मुक्तो हेमशृंगसमप्रभः प्रेक्षागारः स कंसस्य चकारोत्यधिकं श्रियेत्याद्युक्तलक्षणे दूयमानहृदयोपलक्षितः ३५ बहीः साधारणेषु तूर्येषु अं ६६
तश्च मञ्चोचितताल्लप्रधानेषु तेषु वाद्यमानेषु उपाध्यायाम स्नाचार्याः ३६ उपतिष्ठं स्याराधयंति कंसमत्र तदुपस्थानं मल्ला रंगस्थानं प्राप्तवंतः चाणूरादय एव किमुत तच्छिष्याः चकारादनुमोदनादिना तदु
त्साहनादिपराः प्राश्निकाख्यास्तेयाः ३७ धनुर्नगादिशोकया पूर्वमप्रविष्टा अतः कंसेन सम्यक् अक्रूरादिप्रेषणेन सादरमाहूताः एतच्चाश्वासनाय समर्पितान्युपायनानि येः ते कृष्णैकप्रियास्त्रापि अतो गजवध
पूर्वकं प्रवेष्टुमिच्छता श्रीकृष्णेनाग्रप्रेषिता इतिज्ञेयं ३८ इति श्रीमद्भागवतदशमस्कंधमध्यगः द्विचत्वारिंशतमोयं तोषिणीसारसंग्रहे १ इति भागवते दशमस्कंधे द्विचत्वारिंशोध्यायः ४२ तनुकुवल्ल
यापीडकंसाद्येः स तनुकुवल्लयापीडं चलितकुवलयापीडं करेण हतवानकं वलयापीडं १ कृतशौचः शुचितामुख्यकारणं स्नानं तदुपलक्षितप्रातराह्निकादिकं च यान्यां ताविति यथा तावित्यर्थः तिति मल्लानां दुंदुभिनां च घोषं श्रुत्वा
द्रष्टुं दिदृक्षा व्याजेन रंगांतिकं ययतुः १ अवधानेन स्थितमपस्यन् ततश्चांबष्ठेन हस्तिपेन चोदितमप्यपस्यन् २ परिकरं बध्वेति कंचुकं विसृज्य युद्धोचितपरिधानं कृत्वा तच्च मध्यबंधनपटेन वेष्टयित्वा प्रान्तं च
मात्लाश्च नैकक्षादि तेन विधाय वल्लयकुंडलादिकं चाश्लथितं कृत्वेत्यर्थः स्वभाववक्रांश्चूर्णकुंतलान् समुत्थ्य गाढं बध्वा दीर्घपाठे आवर्तत्वं कुटिला मलिना मुक्ता दुष्टा नारी तरायकाः अपि स्वीयाः शिरोधार्या युक्तं तेषां
तु बंधनं १ ३ वीप्सा दृढावधानार्थं क्रोधादेव एतावंतं कालं उद्धृता सोढाद्यतु प्रापयामि यामस्य सादनं स्वार्थेण वस्कतस्तु यमेन मनोनिरोधेन साध्यते प्राप्यते तेन मोक्षवत् स्विस्युर्थः ५ वध्मायकृष्ण गृहीनु अंतकोमत्याः
कालस्त्वंतिमित्तं यमः तन्नियंता ५ विगलितो निष्क्रांतः मुष्टिना निहत्यांघ्रिचतुष्टयमध्यगतः सन् तेनाहस्तो भृतः ६ घ्राणमेव घ्राणं तेन दर्शनं तानयस्य पुष्करेण शुंडाग्रेण श्लेषाद्भगवदंगेकमल्लका मल्ली तेन धृतवा
न् सकृष्णः प्रसस्त्रहस्तात् ७ धनुषां पंचविंशतिं तत्प्रमाणं देशं माकृष्य नीतवान् यथा नागं सर्पमिव तं गजं सुपर्ण इव स्वयमिति यद्वा यथायथावद्विच्छिद्य दन चकर्ष ८ पर्यावर्तेति पुच्छग्राहिणं तं गृहीतुं यदा गजो दक्षिणतः
परिवर्तते तदा सव्यतो भ्रामयति सव्यतस्तु परिवर्तने दक्षिणतो भ्रामयं स्तेन सह बभ्राम ९ ततो भ्रमणलीलानेतरं गजमीषद्धत्वा अन्यथा तु मूर्च्छाद्यापत्त्या धावनादिकौतुकासंपत्तेः प्राद्रवन् सम्मतो धावन् तस्य ति
रस्काहतामाभूदिति स्पृश्यमानः १० कथं पातयामास तदाह स इति क्षितिमहन् जानुभ्यां पतित्वा चेरवान् ११ स्वत एवास्यमर्षितः पुनश्च हस्तिपेन प्रेर्यमाणः १२ भगवानपि नरलीलया पाणिना शुंडां प्रगृह्येत्यर्थः १३ हरिरिति सिं
हवत्प्राणहरणात् १४ मृतकमित्यर्धकं दंतयुक्तवामपाणिः अन्यदंतो रामेण गृहीत इति ज्ञेयं वक्ष्यमाणात् आइषद्धारांतः प्रविवेशेत्यर्थः क्षारे पुंजीभूतं पार्षं मलिनं गजं विनाश्य सितो सत्कुल्लं जल्लस्वस्यमृतिस्कंधे तेरदनो य
यावलं कुर्वन् १ १५ प्रवेशकालिकीं शोभामाह अंसेति वामस्कंधे न्यस्तो गजदंतो येन रक्तस्य दानोदकस्य च बिंदुभिः परितश्चित्रित इव प्रादुर्भूतस्वेदकणिकाल्वं कृतं जल्लबिंदुशोभि पद्मवद्वदनं यस्य १६ रंगमध्यप्रवेशो
विशेषमाह ज्ञताविति कतिपयैः सत्ययोभिरेव अन्येषां न देनसह ब्रजनाद्दुष्टवधार्थं प्रकटितबलो रामो सकृष्णेनेः कंसवधार्थं याच्यमानः कृष्णश्चतो दंतवरावेवायुधे ययोः १७ तत्र भगवांस्तत्तद्भिप्रायानुसारेण श्रृं
गारादि सर्वरसालंबनोभूत्वा बभाविस्याह मल्लानामिति मल्लादीनां द्रष्टॄणां मशान्यादिरूपेण विदितः मल्लाद्यभिव्यक्ततत्तद्रसालंबनः साग्रजो रंगं गत इत्यन्वयः तत्र शूरं मन्यानां स्वस्मात्परा भवं भावयतां मल्लानां म
शनितुल्यांगत्वेन हरेः स्फुरणात् क्रोधस्थायीभावमयो रौद्रो व्यज्यते नृणां पौरादीनां नरवरविलासादिदर्शनेन विस्मयस्थाय्यद्भुतः पूज्यादिभिन्नस्त्रीणां स्मरः मदनहेतुमाधुरीविशेषप्रकाशनेन प्रियभावमय रतिजनकस्ते
न तत्स्थायी शृंगारः कृष्णाकारे चेतसि प्राकृतकामस्यासामर्थ्यात् स्वयमेव तद्रूप इत्याह मूर्तिमानिति श्रीदामादिगोपानां स्वजनो न यस्य: तेनासंकुचितनयारकृमदंतादिविषदर्शनजन्य हासस्थायी हास्यः असतां साधू
नेवन्नासंतां क्षितिभुजां राज्ञां श्लेषेण क्षितिमिव भक्षयतामिव दंडकर्तेति तद्धीर्याति त्रायं पस्यतां युद्धोत्साहस्थायी वीररसः पित्रोर्मातापित्रोर्नंदवसुदेवयोर्वा शुश्रुत्स्फूर्त्या तन्मादेवस्फूर्तेर्मल्लादिशोकया शोकस्थायिकरुणः भो
जपतेः कंसस्य साधूषु देवक्यादौ श्रीकृष्णे च मृत्युचिंतनपरतया प्रसिद्धस्य श्लेषेण भोजानां सर्वं गिलानां श्रेष्ठस्य मृत्युस्तेन कृतं यमइवेति भयस्थायी भयानकः अविदुषां विराट् विकल्पश्च पर्याप्तो राजत इति सन्निधानं
दत्वेन विद्वत्संमते तस्मिंश्चिकल्पत्वमननेन लौकिकत्वज्ञानाज्जुगुप्सास्थायि बीभत्सः योगिनां ज्ञानिभक्तानां परतत्त्वं परब्रह्मविग्रहः तेन शांतिस्थायी शांतः यादवानां श्रेष्ठदेवता निजाराध्येति प्रेमात्मक भक्तिस्थायीसप्रेमभ
क्तिकः एतत्क्रमेण संग्रहपद्यं रौद्राद्भुतः शुचिः सविहास्यवीरः सवत्सलः करुणः प्रभयानकबीभत्सो शांतः सप्रेमभक्तिकश्च रसः १ अत्र च रससिद्धांतानुसारेणेव प्रक्रिया अपूर्णो रसस्थायीभावो इत्यादि नामा विभा
वैर्ज्ञानितोनुभावैः प्रत्याय्यमानः संचारिभिरुपचितः पूर्णतां प्राप्तः श्रृंगारादिनामा रसोभिधीयते विभावानुभावव्यभिचारीसंयोगाद्रसनिष्पत्तिरिति भरतसूत्रात् व्यक्तः स तैर्विभावाद्यैः स्थायीभावो रसः स्मृत
इति काव्यप्रकाशोक्तेश्च २ तत्र विशेषेण भावयंती रसमिति विभावाः ते द्विविधाः आलंबनाख्या उद्दीपनाख्याश्च आद्याः पुनराश्रयविषयत्वेन द्विविधाः यथा भक्तिरसे विषयतयालंबनविभावः श्रीकृष्णः
आश्रयतया भक्ताः श्रृंगारादौ च कामिन्यादिः उद्दीपनविभावाश्च श्रीकृष्णकीर्तनस्मरणतुलसीदर्शनादयश्चंद्रिकाश्चंदनादयश्च अनुभावयंति लापयंति रसमित्यनुभावाः तद्द्विविधाः सात्विका आंगिकाश्च स्तंभस्वे
दौ स्वरोमांचः स्वरभंगोथवेपथुः वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्विकाः स्मृताः नृत्यविलुठनगानादय आंगिकाः निर्वेदाद्यास्त्रयस्त्रिंशद्भावास्तु व्यभिचारिणः स्थायिनं वर्धयंतो ये प्रादुः संतितिरोपिच तत्र भक्तिरसे
उदाहरणं स्मरंतः स्मारयंतश्च मिथोघौघहरं हरिं भक्त्या संजातया भक्त्या बिभ्रत्युत्पुलकां तनुं क्वचिद्रुदंत्यच्युतचिंतया क्वचिद्धसंति नंदंति वदंत्यलौकिकाः नृत्यंति गायंत्यनुशीलयंत्यजं भवंति तूष्णीं परमेत्य
निर्वृताः अत्र हरिरालंबनविभावः स्मरणमुद्दीपनः पुलकः सात्विकानुभावः स्मारणनृत्यादिकं चांगिकाः चिंतादयः संचारिणः भक्त्येति प्रेमभक्तिः स्थायीभावः परमेत्य निर्वृता इति तत्परमकाष्ठारूपः पूर्णभ
क्तिरसात्मकं वस्तु प्रकृते तु सर्वरसालंबनं कृष्णः तत्तद्भिप्रायानुरूपा विलासा उद्दीपना मल्लादिषु चानुभावाः संचारिणश्च तत्तद्गुणा ऊह्या इति संक्षेपः १८ मनस्वी शूरोपि उद्विविजे भीतः न्यपेतिहर्षेण १९[?]
विचित्राणि विविधान्यद्भुतानि च वेषादीनि यथा वेषस्तिलकादिः आभरणं कटकादि दृक्षमाणानां मल्लादिदशाविधानां भयाशनित्वादिरूपेण स्वतेजसा यथायथं मनो विक्षिपंतो तथा तथाप्रसायनसमर्थ नाना
वेषधारिणो नटो यथेत्येकस्य नानात्वं न भानीत्रे दृष्टांतो नतु कात्स्न्येन ये २० मल्लासन्नपर्कसा तिरिक्तानां सर्वेषां साधारण्येन प्रेमातिशयमाह निरीक्ष्येति उत्तमेति सौंदर्यादिव्यंजितं मंचस्थिता इति द्रक्षणे कृष्ण

भाग ६- ६६

सम्यक्त्वं उत्कलितानि विकसितानीक्षणान्याननानि च येषां ते तथोराननं वपुः केवलं न तु तत्रभावस्तु इत्यर्थः पशु इति नेत्राणां च षट्कत्वं मुखस्य सौंदर्यामृतपात्रत्वं च व्यंग्यं गोवल्लाननेनो किस्तद्दर्शने प्राधान्यात् २१
अत पिमेव व्यंजयन्नाह पिबंत इति युग्मकेन इवेत्युत्प्रेक्षायां नेत्रविस्तारणादिलिंगेन नेत्राभ्यां पिबंत इव जिह्वाप्रसारणादिलिंगेन लिहंत इव नासोत्फुल्लत्वश्वासोत्तोलनादिलिंगेन ताभ्यां नासयोः प्रवेशयितुमिव
प्रवृत्ताः करचालनादिलिंगेनालिंगनं कुर्वत इव अतस्तत्तदिच्छया बहिस्तत्तदनुकरणादिक्रियायां तत्तत्संभावना २२ इदं धनुर्भंगादिकृतं बकवधादि तत्तदनतिक्रम्य यद्वा योग्यतार्थेऽव्ययीभावः इष्टं धनुर्भं गाद्य
नुरूपमेव कृतं नारायणांशावतारत्वादि तदनुरूपमेव वचनाधिकमित्यर्थः अत एवांशेनेति वक्ष्यते तत्तदपि संदिग्धमिवासीत्तं प्रति तत्तद्दर्शनेनैव निश्चितं जातमित्याह तदिति प्रत्यक्षं च तयोरूपं भगवल्लक्ष
णाकारः गुणाः सौंदर्यशौर्यौद्याः माधुर्यं मनोहरत्वं प्रागल्भ्यं सर्वत्राकुंठत्वं तेन स्मरणं प्रापिताः इवेत्युत्प्रेक्षायां वस्तुतस्तु संदिग्धमेव निश्चितं वेत्यर्थः यद्वा तत्तत्सदा स्मर्यमाणमपि रूपादि दर्शनात्सद्यः स्मारि
ताइवोचुरित्याह तदिति २३ यदूचुस्तदाह षड्भिः एताविति साक्षाद्दर्शनेन न तु शास्त्रया वेशादिना अतः सर्वेष्टदो भविष्य तइति भावः इह मथुरायां वसुदेवस्य वेश्मनीति स्वपक्षपातोऽव्यंग्यः वेश्मनीति तत्रान्यत्र च नि
रासः वागदेवीत्याह अंशेनापलक्षितः नारायणांशभूतो यो वसुदेवस्तस्य गृह इत्यर्थः २४ एवं सामान्यतो भाव्य उक्ता तदवतारत्वस्पष्टयितुं तच्चरितानि वक्ष्यंतः श्रीकृष्णस्य तावदाहुः एष इति षड्भिः किलेति सर्ववाक्ये
रन्वेति एवमेतावंतं २५ गुह्यकः शंखचूडः अन्ये च ते ह्यासुराद्याः २६ सर्पनीनस्तत इति सर्प इति शिरःस्कंदस्येन तद्दमनाच्च कथना २७ प्रथमश्च कार उक्तस्य समुच्चये द्वितीयोऽनुक्तस्य तेन गोविंदाभिषेकादि २८ स्त्रीणां वा
क्यमाह गोप्य इति नित्यं प्रसन्नं सहासं प्रकृष्टमीक्षणं यत्र तत्त्वा अश्रमं अधुनातु गजयुद्धेन श्रांतं यद्वा दर्शनेतरणे वा क्रियाविशेषणं मुदा पश्यंत्यो विविधान्नकामादीनन्यांश्च तापान्नतेरुः २९ करिष्यमाणलीला
मुद्दिशंति वदंतीति अनेन रक्षिता यं वंशोऽतिविश्रुतः सन् श्रियादि लप्स्यते इति वदंति शास्त्रज्ञाः ३० बलदेवस्याहुः अयमिति अप्यर्थे च अग्रजः अतः श्रीमान् तद्वत्सर्वशोभायुक्तः वत्सकः वत्सप्रतिरूपः इव प्रतिरूता
विति कन् तेन तद्वधे दोषो न धेनुकबककवत्सवधेषु कर्तव्यत्वे यत्किंचिज्जनवादेषु तत्त्वज्ञानाभावात् ३१ एवं ब्रुवाणेषु सहितिति हर्षेण तेषामुक्त्यसमाप्तिः जनेष्विति बाहुल्यात्तेषामवार्यत्व मुक्तेः प्रामाण्यं च व्यंग्यं तेन मल्ला
दीनां मात्सर्योदयः अत एवासहमानोऽब्रवीत् समाभाष्य संबोध्य अवाक्यं विरुद्धं वाक्यं ३२ हे नंदसूनो इति तत्सत्सुत्रत्वं रामेति लोकरतिहेतुत्वं च व्यज्यते इति प्रोत्साहनं श्लेषेण तु गोपपुत्रत्वेनाहत्वे रामे पित्र नुल्लेख
नात्तातपितृकत्वं च व्यंग्यं तेनोपहासः बलेन सं मतो सर्वाहितो ततोऽत्र मल्लयुद्धेन क्रीडतमिति भावः अत्रापि विरोधिलक्षणयोपहास एव तत्तात्पर्यं तेनोत्साहनं गोभिः प्रेतः ३३ न च वैमुख्यं युक्तमित्याह प्रियमिति
इति स्मृत्यर्थादित्यर्थः ३४ ननु गोपैरस्माभिस्तत्कथं यतेत तत्राह नित्यमिति वत्सपाला वत्सपालनमारभ्य तथा क्रीडतः ३५ तर्हि गोपैः सह तत्क्रीडा कार्येति तत्राह तस्मादिति राज्ञः प्रियार्थमस्माभिः सह कार्येति भावः ते
न च राज्ञी प्रीते भूतानि प्रसीदेयुः तस्य राजत्वात्तत्प्रजारूपया र्भवितार्भत्यमिति भावः ३६ तदभिनंद्य च तत्रोचितं वचो मात्रमब्रवीत् आज्ञायस्त्वन्य एवेति भावः तत्र को हेतुः नियुद्धमिति ३७ अभिनंदन एवाह
प्रजा इति अस्येव नव्रग्रसेनस्य वनेचरा अपि वयं प्रजाः चाक्रवंतः पुरवासिनः स्तत इत्यर्थः ततो वपमिति राज्ञः प्रियमाज्ञापालनादि करवाम वस्तुतस्तु अस्येत्यनादरे वयमपि च प्रजाः काका नैवेत्यर्थः ये
तोव नेचराः नित्यं स्वेच्छावनविहारिणः अयं त्वाधुनिक इति भावः ततः स्वस्य गोपराजस्येव प्रियं करवाम न त्वोजपतेः तत्कृत्कानां वश्यतो प्राप्य प्रियकरणमेव नोऽस्माकं भक्तेष्वनुग्रह इति ३८ बालत्वेनाल्पबला वयं
बहुलत्ववयस्य गोपापेक्षया तुल्येति बालैरपि न्यूनाधिकबलैर्नेत्यर्थः तत्रापि क्रीडिष्याम एवन हंतुमिच्छामः एवं यथोचितं बाहुयुद्धं स्यात् अधर्मश्च सभ्यान्न स्पृशेत् हे मल्ल वस्तुतश्च हे बाल्ला अशाः तुल्य
बलैः सखिभिर्गोपैरेव न त्वतुल्यैर्युष्माभिः भक्तानामेव मत्समानैश्वर्यात् शेषं पूर्ववत् अथापि भवादृशानामाग्रहवशात्तत्र प्रवर्तामहे ततो शनितुल्यमदंगस्पर्शात्फुवद्धे अस्माकं न दोष इति भावः ३९ येन त्वया
रामेणा चेत्यर्थः द्वयोः स्कंधे गजदंतदर्शनात् द्वाभ्यां हत इत्यनुमीयेव मुक्तिः सहस्रगजानां बलं बिभर्ति सः ४० बलिभिर्माहशैः सह बहुत्वं सर्वमल्लानां क्रमेण युद्ध्यस्व या विक्रमस्सर्वस्वविक्रमं दर्शय ननु गोपा
नयं राजसभायां न क्रीडायोग्यास्तत्राह हे वार्ष्णेय इदमपि वयं जानीम इति भावः ४१ इति श्रीमद्भागवतदशमस्कंधसंश्रितः त्रयश्चत्वारिंशाय षसत्तोपिणी सारसंग्रहे १ इति भागवते त्रयश्चत्वारिंशोऽध्यायः ४३ ॥
श्रीकृष्णं चाणूरः प्राह यदीयं बलमपि चाणूरः वीरस्त्वं भव मल्लः कइहान्यः प्राप्तबलं विभव मल्लः १ मल्लोऽभवेति तन्मल्लो भंक्त्वा तल्लो भवद्द्विरः ब्रह्मस्त्करोऽकरोद्द्वामो मुष्टिकं प्राप्तमुष्टिकं २ चर्चितः निश्चितः स
कल्पो यस्य भगवानिच्छामात्रेण हंतुं समर्थोऽपि चाणूरं मल्लयुद्धक्रीडार्थमाससाद जग्राहेति यावत् मधुसूदन इति युद्धक्रीडया यथाम घुंजघ्ने तथेति भावः ससाद साथ ससाद हेति पाठो १ तमोमया विमो मल्लौ
दर्शनीयो तयोरग्रहे राहुकेतु पुष्पवती रिवदेवगणावृतो १ तामेव मल्लयुद्धक्रीडामाह हस्ताभ्यामिति चतुर्भिः एवंति हस्ताभ्यामित्यत्राप्यन्वेति चकार उक्तसमुच्चये एवमग्रेपि २ तौ कृष्णचाणूराविति पूर्वपद्य
स्यान्वयः हेत्स्ररत्नीकूर्परौ कूर्पराभ्यामेव प्रहतवंतौ अरत्निः कूर्परो हस्ते इत्यादि विश्वः ३ परिभ्रामणं हस्तादिषु गृहीत्वा परितः भ्रामणं विक्षेपो दूरे क्षेपः परिरंभो बाहुभ्यां निःपीडनं अवपातनमधः पातनं
उत्सर्पणं पुरतः कर्षणमित्यर्थः अपसर्पणं पश्चात्सारणं एतैः प्रत्यरुंधता मन्योन्यस्थगितो युद्धमंचक्रतुः [?] लुंडि श्रम् आर्षः ४ उत्थापनं पतितस्य पादादिभिरुच्चाटनं हस्ताभ्यामूर्ध्वं चलनयनं चाल
नं कटादि संलग्नस्य विश्लेषणं स्थापनं पादादिपीडीकरणं आत्मनो देहस्यापकारं कृतवंतो ५ तद्युद्धं बलाबलवत् एकतो बलं अन्यत्राबलं तद्विषयमित्यूचुरित्यर्थः ६ किमूचुस्तदाह महानिति
द्वाभिः बलेतरैर्दे बलवद्बलवतोश्च युद्धं पश्यन्तु राजा सभ्यैर्वारणीयः एते तु राज्ञः पश्यतः स्वयमप्यनुमन्यंते तेनो महानधर्म इत्यर्थः ७ तत्र पंचयति पंचभिः क्वेति वज्रवत्कठिनानि सर्वांगानि ययोस्तौ सं
निन्नो संमिताविति पाठो ८ समाजस्य सभायाः उत्तिष्ठ दुद्रुवेत् तस्मादस्माभिर्नीत्र स्थातुं योग्यमिति भावः ९ तथापीह सभ्यत्वेन प्रविष्टानो महापराध इत्याशयेनाहुः नेति दोषानाह अप्रुवन्निति

राम

६७

विस्तोपि मोनमपल्लापं वा कुर्वन् तथास्वयमत्तोपि विरुद्धं ब्रूवन् किमुत विस्तोपीत्यर्थः १० नन्वेतयोः श्रमादर्शनेन बलवत्त्वान्तोक्तदोष इत्याशंक्य श्रीकृष्णस्य तानश्रमं दर्शयंति बल्लात इति शत्रोः सर्वतो भावः कृष्णस्य श्र
मवारिव्याप्तं मुखाम्बुजं दृश्यतो श्रमश्च्यायं ताहङ्स्निग्धानामेव भासते न सर्वेषामस्मानामशानिरित्याहुः केः श्रमेपि शोभाव्यंजयितुं मंबुजरूपकोक्ता वृष्णुपमामाहुः पद्मेति पूर्वत्राम्बुजपदेनात्र कोशपदेन च तस्मिन् तेन षड्विंका
सित्वं व्यज्यते ११ रामस्य श्रमंता तो ज्ञाते क्रोधतेजश्च दर्शयंति किमिति हासस्य संरंभः निर्भरोदयस्तेन शोभितमिति मल्लन त्ताव्यंजिता १२ अथ का श्च्यैनेश्वर्यं तान मिश्रप्रेमवत्यएतत्स भादिदोषेण मधुपुरीमन हुमन्वाना व्रजं भुवंम
श्रीसंति पुण्या इति चतुर्भिः व्रतविस्मये व्रजभुव एव धन्या न त्वियं महापुर्यपि बहुत्वेन तासां बहूनामपि पुण्यत्वं न त्वस्या एकस्या अपि ताहशीत्वमित्यमित्यर्थः यत्र यासु च्छन्नलिंगेन मनुष्याकारमूर्त्या गूढः अयं श्रीकृष्णाख्यः पुराविनि
त्यनवः पुरुषः अंचति पर्यटति वर्तमानसामीप्ये लट् अन्यत्र तु महतामप्यसौ दुर्लभ इत्याहुः गिरित्रेण शिवेन रमया चार्चितावेव तत्रापि अंघ्रिपद्मयस्य न तु व्रजवासिवद्यथाकामं सेवित इत्यर्थः ननु संप्रत्यत्रापि अंचति तत्राहुः विक्रीडये
ति अत्र प्रतिकूलैः परा भविष्यमाणे उदासीनैः संकीर्णे च श्रीकृष्णमेताह शा विक्रीडितोदया भावान्तात्र तथा क्रीडति भावः तत्र तु सर्वानुकूल्यमित्याहुः वनेति सर्वाभीष्टयुते एकान्ते वृन्दावने चित्राणि नानाविधानि आश्चर्यवहानि
च माल्यानि यस्य उपलक्षणमेतद्वेषान्तराणां तथा गामधुराक्तानादिना पालयन् किंच बलदेवसहितः शक्रशर्वब्रह्ममोहनेन तरूणामपि पुलककरं वेणुं मुहुर्वादयन्निति १३ अहो किं वाच्यं व्रजभुवः मधुपुरीतः पुण्यत्वे यतो न वसरे प
श्यंती व्याल्पपुण्यास्त्यो स्माहशीस्त्यो यत्रत्या गोप्य एव तावदति पुण्या इत्याहुः गोप्य इति तपः भगवदाराधनलक्षणं कतमच्चरन् यस्येदृशानं वाङ्मनसागोचरः फलं यदितरायतत्तद्वयमपि करवामेति भावः यद्वा तपः किमचरन्नपि तु नैव त
पसईहक् फलदानासामर्थ्यात् तत्प्रसादस्यैवायमचिंत्यो महिमेति भावः यस्मादमुष्य श्रीकृष्णस्य रूपं सौंदर्यं हग्भिः पिबंतीति निरंतपानेप्यक्षयित्वेन रूपस्य सुबह्वाधिक्यं दर्शनमात्रात्तयालिंगनादेः के मुत्यं व्यंजितं की दृशं लावण्यस्य का
ति पुंजस्य सारभूतं नैव मन्येत तत्राद् तोचा इत्याहुः नास्ति समं तुल्यं ऊर्ध्वमधिकं च यस्य तदपि नान्येनाभरणादिना सिद्धं किंतु स्वत एव ऐश्वर्यस्य यशसश्च श्रियस्तद्उपलक्षितानां षण्णां भगानामेकांतधाम नित्याश्रयं पाठांतरे ईश्वरस्याप्याश्र
यमित्यर्थः मायोपाधिक ईश्वरोप्येतदंशांशएवेति भावः नित्यं पश्यंतीनेनं चमत्कारस्यानंत त्वमाहुः अनुसवेति ताहशप्रेमाभावादन्येषां दुरापमिति १४ एवं दर्शनवदर्शनेपि तद्रूपं तथैव तासां स्फुरतीत्याहुः या इति दोहनादिषु
एनं पूर्वोक्तरूपं गायंति चात्कदाचित्स्वयं तिष्ठ तात्रव्रजस्त्रिय एव धन्यान वयं ता दृशगानाद्यभावात् अवहननइत्यंत र्ह तण्यर्थेतियः प्रेंखेरवनं आंदोलो दोलनं उक्षणं सेचनादि मार्जनं स्नपनादि उरुक्रमे यच्चित्तं तेनैव यानेस्र
र्वविषयप्राप्तिर्यासां चित्तयाना इति पाठे उरुक्रमं चिंतयंतः कुतः अनुरक्तधियः तत्र लिंगं अश्रुकंठ्य इति १५ तत्र्यादर्शने दर्शनस्य परमावेशाय कल्पत इत्याहुः प्रातरिति गोभिस्तदुपलक्षिते गोपैश्च समं व्रजतो वेणुं क्वणयतो
स्य वेणुं श्रुत्वा अत एव गृहात् तूर्णं निर्गम्य अबलाः प्रेममोहेन देहादिबलहीनाः तेन साकं गंतुमशक्ता वा गोप्यः अत एव पथि स्थिताः सत्यो अस्य सस्मितं मुखं पश्यंति एवं सायं व्रजं प्रविशतश्च तत्रापि गोभिः सममित्यादि सर्वं योज्यं ता
एव भूरिपुण्या इत्यर्थः एवं प्रकर्षेण प्रेमास्त्री भाषमाणास्त्विति अर्हाणनहॅयोश्च्युतेनाहार्थे सप्तमी तासां तथा भाषणं तदैव तस्य शत्रुहननो द्यमश्चयोग्य एवेत्यर्थः यतो हरिः सर्वतापहरणप्रवृत्तः योगेश्वरो भगवानिति तत्र सामर्थ्य
व्यंजकं हरतर्षमेतेति तद्धधविलंबादप्रसन्नं तमुल्लासयति भरतवंश्यत्वात्त्वमपीदृशी युद्धलीलां ज्ञानासीति भावः १७ पुत्रयोः स्नेहेन याः शुक्तयानिकृत्तौ पुत्रयोर्बलमजानंतौ पितरावन्वतप्यतां कथं व्रजेगमिष्यन्तक्रूर
एव प्रथमं नवीक्षितो यथानेवानेष्यदित्यादि पश्चात्तापमकुर्वतां बलमित्यत्र कर्मणि षष्ठ्य भावस्तदर्हमिति निर्देशो स न तस्या अनित्यत्वात् १८ पुनर्युद्धवर्णनमवतारयति तैरिति पूर्वदर्शितदिङ्मात्रैः वीप्सा तेषां वैचित्र्या
पेक्षया १९ भगवतो गात्राणां कूर्परजान्वादीनां प्रहारैः वज्रनिनिष्पेषः चूर्णनं तद्वन्निष्ठुरैः भज्यमानांगः श्लथ आत्रः २० श्येनस्येव वेगो यस्य स चाणूरः भगवंतं वासुदेवमिति मल्लेभ्य द्वच्चदोरास्य व्यंजकं अबाधतं अताड
यत् २१ नेत्यर्धकं स्रग्भिरिवेन नैषत्करमपि सूचितं बहुत्वस्य बल्लीभिरपि स्रग्भिर्गज इवबहुप्रहारैरपि न चल्लेत्किमुतैकेनेति भावः २२ बहुशो बहुवारान् बहुधा चेत्यर्थः तरसा भ्रामणेन गैनो काशः एवमृतं अहो मृतए
वायमिति मिषेण भुवः पृष्ठे उपरि आस्फालयत् २३ विस्रस्तेत्यर्धकं सन्धेति शेषः इंद्रध्वजो नाम महान् स्तंभो ध्वजाद्यलंकृतः पुरुषार्चितः उच्छ्रीयते स यथा पतति तद्वदिति न देहस्य महत्तमस्य २४ अभिमुखं मल्लमुष्ट्या ताडित
वामेण तलेन चपटेनहतः २५ वक्षत्यद्धतो भूमिः स्त्रियेव पातनात् २६ लीलयानायासं च द्रष्ट्या पतो वाममुष्ट्या तत्रापि सावज्ञं हेलयैवेत्यर्थः २६ शलतोशलौ नमनव्याजेन युद्धेच्छया वा युगपदेवादद्या कर्षणायनीचीनम
स्तको पादघातेन विदीर्णसिरस्का वित्यर्थः २७ युद्धे श्रीकृष्णतः अयुद्धे कंसात् प्राणरक्षां कर्तुमिच्छवः २८ आहूतानपि लज्जया स्वयमनागच्छतो बलाहालब्ध संस्कृत्य मल्लरीत्याभिमुखो गृहीत्वा बलौ तौ मल्लगतिं कुर्वंतो पतत्र्य
केसक्रोधविनर्दनायेति त्रियं २९ विप्रमुख्याः साध्वस्वश्यतन्महिमज्ञाने नाकुतोभयाः साधुसाध्विति स्पष्टमेव वदंतः प्रजहर्षुः ३० स्वसेवितू र्याणयवारयन् न तु देवानां वारयितुं शक्तः विघ्नपुराणेतु मल्लयोर्बलक्षयं दृष्ट्वा यु
द्धकालेन एवान्यवारयदित्युक्तौ खेसंगतान्यवाद्यंत देवतूर्याण्यनेकश इत्युक्तं तदेकवाक्यता च मध्ये मल्लजयं दृष्ट्वा पुनः प्रवर्तितानीत्येवं ज्ञेयानिवारणोच्छलं दर्शयति वाक्यं चेति निज्ञात्ता श्रवणार्थमिचेति भावः ३१ नि
युद्धक्रीडायां मल्लहननादुर्वृत्तो युक्तं च दुर्वृत्तत्वं यतो वसुदेवात्मजो निःसारयतेति अपकर्तुमशक्यत्वात् निःसारणं चानयार्वनवासिभिरुचेः स्यादिति गूढो भावः प्रकटस्तु भागिनेयावबध्याविति दुर्मतिं वसुदेवेन
सौहार्दात् अज्ञात्येवमछत्रं पालयतीति बंधितेव न तु हतेत्यर्थः ३२ स दुर्मेधाः पुत्रपरिवर्तनादिकौटिल्यात् देवस्थितिपाठांतरं असत्तमः पुत्रार्पणप्रतिज्ञाहानात् चः समुच्चये पितापीत्यन्वयः वाग्देवीत्वाह दुर्गमंवृत्तं च
रितं ययोः प्रादिभ्यो धातुजस्य स्फुत्तरपदलोपः पुरात् ल्यपलोपे पंचमी पुरमधिकृत्य निःसारयत तापयत गत्यर्थानां ज्ञानार्थत्वात् गोपानां धनं श्रीकृष्णं हरत अत्रैव रक्षत ननु एवं नंदो न दास्यति तत्राह दुःखेन दुखितमतिं
नंदकृष्णमुखेनैव समयबंधादिना प्रतिष्ठं कुरुत दुर्गमबुद्धिर्वसुदेवो गम्यतामाश्रीयतां नास्ति सत्तमो यस्मात् तथोग्रसेनोप्याश्रियतां परमेश्वरपक्षगत्वादिति ३३ कत्थमान इति तर्जनस्य स्वश्लाघायां तासर्याद् ना
स्ति व्ययः श्रमो यस्य स श्रीकृष्णः लघिम्नाशरेण लक्षिततया ३४ मञ्चातः प्रविशंतं अतिभयात्साक्षान्मृत्युत्वेन भातं मनस्वीति निंदायां विन् निंदितमना भीत इत्यर्थः अत एवाशास्त्रपितस्मिन्नसिचर्मणी जग्राह ३५ द
क्षिणं वामं च भागं व्याप्याशु वेगेनाकाशे श्येन वक्ष्मत एवं दुर्ग्रहमप्यग्रहीत् यतो दुःसहोग्रं न सामान्योग्रं तेजः पराक्रमो यस्य गरुडोपि दुर्विषानुसर्पान्हंतिस चासोऽग्रतेजाश्च ३६ मातुः कचग्रहण मुद्दहनोत्स
वे यदाकर्षणं स्वजननी करताभगिन्याः कंसापराधयुगलं तदिदं स्मरन्नुकेशान् ग्रहस्त्वविच्चकर्ष हरिर्म्छं तंत १ तदाह दृष्ट्यामग्रहेति केशेषु दृढं गृहीत्वा केशाकर्षणाद्विगलत् किरीटमस्य तस्योपर्येव

भागवत

६७

६७

पपात यतस्त्वात्मतंत्रः निरंकुशलीलः विश्वाश्रय इति गरिष्ठत्वं व्यज्यते तत्र हेतुः भुवनात्मकमङ्गं नातोयस्येति गर्भोदकशाय्यंशांशेदोर्त्त्या तद्वच्येतु भुजमाविष्कृत्य कंसवधो व्यज्यते तेन कंसस्य स्वशत्रुत्वप्रत्यभिज्ञा पित्रोः
स्वपुत्रत्वप्रत्यभिज्ञा चेति सर्वं ज्ञेयं ३७ उपरिपातादेव मृतं विपस्यत इति न केनापि वारितं यतः सर्वेषां सुखकरमिति भावः हाहेति विस्मये महाशूरस्याप्यवज्ञया वधात् हे नरेंद्रेति हर्षात् ३८ प्रसंगात्कंसमुक्तिमाह स इति
उद्विग्नाविष्ठधीस्तया ददर्श तदेवाधुनास्फुरितं रूपं दुरवापमपि प्राप यं यं वापि स्मरन् भावमित्यादिगीतोक्तेः ३९ उषित्वेकादशां समाव्रजेष्टे ह्यादशो हरिः शिवरात्रिचतुर्दश्यां माघे कृष्णे कंसमुक्तिदः १ मुखवास्यस्योपि यः कं
सः साधुहिंसाविषाविष्ठतः सोद्याग्रे तस्तं गुरुवेगेर्गाघसौ तब्रीत्यां मम्रतामृतः २ बलदेवो निजभ्रातृर्त्तकृस्याकंसहतानथ मन्येतस्य निकाराय तस्य भ्रातॄन् सहावधीत् ३ तदाह तद्भ्रातॄन्स्येति अनुजान्त्रनुगा इति पाठो नि
वैश्यान्त्रानृण्यं तत्कारिणः ४० अतिवेगान् संयतानुद्युक्तान् तथा तद्वत्क्रोधादिप्रकारेणाहन् परिघं तदाकारं गजदंतं ४१ विभूतयस्तदेश्वर्यासक्तसेवका इत्यर्थः ४२ स्त्रियः पत्न्यः सुहृदः पतयः ४३ वीरशय्यायां युद्धभू
स्तत्र सुप्तवत्स्थितान् शोचं चेस्तो विलेपुः शुचः अश्रूणि ४४ धर्मज्ञेत्यादीनि विलापे प्रेमसंबोधनानि तत्रैकवचनं कंसस्त्रीणामेव मुख्यत्वेन तद्वर्णनात् तेलदीयावयं ४५ त्वया पत्या हीना पुरी यं न शोभते इति स्वदृष्ट्याभि
धानं उत्सवोगीतादिर्मंगलं शुभसूचकं गीर्दवीस्याह अनाथस्य कारप्रश्ने पेणेकपद्येन चनाथत्व धर्मज्ञत्वाद्यभावः काद्यानशोभते किमित्यर्थः हे पुरुषेषु बलिवर्देति ४६ तत्र काशिभूतानि सहशोचं चेस्यापि परमार्थ
दृष्ट्याह अनागसामिति द्वाभ्यां उल्वणमुल्कटं ४७ किंचेष कृष्णः प्रभवत्यस्मादपि यं यस्मिन्सञ्चासच तदवध्यायी तदवज्ञातापि किं पुनर्द्रोही क्वचिदिह परत्र च सुखं यथा तथा नैधते किंतु दुःखेन क्षीयत इत्यर्थः
इदं तत्स्वभावनिंदापेक्षया न तु तस्यापि मुक्तिप्रद भगवत्स्वभावदृष्ट्येति ज्ञेयं ४८ आश्वास्य यतः स्वाभाविक्या दयया सासर्वलोकपालकः हरिर्नेशाच कंसनारीविलापाश्च श्रुत्वा सकरुणान्बहून् गर्हमाणस्तथात्मा
नं तस्मिन्न्यादवसंसदि अहो मयाति बाल्येन नवरोषानुवर्तिना वैधव्यं स्त्रीसहस्राणां कंसस्यास्य कृतं कृतमिति स्वयमस्त्राविलेक्षण इत्यादि विष्णुपुराणेपि ४९ बंधनात् बंधनागारं नयन् ते कंसद्रुतेभ्य इत्यर्थः एतच्च
रंगस्थमावेव ओषिद्धिलापसमाश्वासोत्वेन तदनंतरं पुनराकृष्य नीतस्य कंसस्यांतिके विश्रांततीर्थ इति क्रमो ज्ञेयः आस्कस्य सम्यक् स्पृष्ट्वा ५० अद्भुतकर्मदर्शनादिना स्मृततज्जन्मवृत्तांतौ पुत्रमतिं विहाय जगदीश्वरोत्ता
त्वा नालिंगितवंतौ किंतु स्वयं प्रणतौ सुतं वं तौ च स्थितावित्यर्थः विष्णुपुराणे प्रणतिस्तुतिविस्तरोक्तेः ५१ हस्तेनैव हतो हस्ती मल्लाश्च मल्लेंद्रलीलया कंसो धःपातिकर्मायं मान्यधःपाततो हतः १ इति श्रीमद्भागवतदशा
मस्कंधसंश्रयः चतुश्चत्वारिंशकोयं बोधिनीसारसंग्रहे १ इति भागवते दशमे पूर्वार्द्धे चतुश्चत्वारिंशोऽध्यायः ४४ — अथ तत्त्वविदो भगवति संति शुकाद्याहि कोटिशः सुतत्वभाः पुत्रप्रेम दुःसुदुःसहत्वेभ्यमिति सांत्वमिषाद्धरि
र्द्यौ पित्रोः १ तदाह पितराविति उपात्रहीने पुत्रभावमयप्रेम तो हीन तयात्ववद्योर्थः श्रीकृष्णे पारमेश्वर्यज्ञानरूपो याभ्यां तादृशौ वंदनसमये ज्ञात्वा तत्तु मा भूदिति विचार्य जनमोहिनीं जनानां स्वस्वपुत्राद्यासक्ति
रूपायातोमायां निज्जां स्वविषयिकां ततान यात्रीतिरविवेकानां विषयेष्वनपायिनी त्वामनुस्मरतः सा मे हृदयान्मापसर्पत्विति वत् यद्वा स्वीयामसाधारणीं कृपां यथा तत्परः समाप्तो मुक्तिमपि तुच्छां मत्वा स्वस्मिन्पुत्र
भावः प्रसादीकृतस्तां ततान जनानां स्वभक्तानां मोहिनी यस्या दर्शनेन श्रवणेन च भक्ताः प्रेममोहं प्राप्नुवंतीत्यर्थः एतेन तादृशा भावस्य परमपुरुषार्थत्वं व्यंजितं १ पुत्रभावमयप्रेमविस्तारप्रकारं विवृणो
ति उवाचेत्यष्टभिः पितरावेत्युति पूर्वं मोचयित्वा रंगभूमितपुवगृह प्रस्थापितो तावागत्येत्यर्थः कंसादिसंस्कारार्थमन्यान्विनियुज्येति भावः हे अंब तातेत्येवं संबोधनेन प्रीणयन् सादरमुवाचेत्यन्वयः २ हे ताते ति प्राधान्यात् यद्वास्ता
न परस्य बहुपुत्रस्य तस्य स्नेहोत्कंठयमसंभाव्य तज्ज्ञननाय अस्मत्तः अस्मद्धेतोः नित्यमुत्कंठितयोरपि युवयोराचाभ्यां पुत्राभ्यां कृत्वा बाल्याद्यवस्थानुभवसुखानि नाभवन् ३ अस्मोद्दशोयार प्रयोजकयोः पुत्रयोः युष्मत्सुखदत्वे न स्यादि
वकिंतु दैवहीनयोरावयोरेव सुखहानिर्जातेत्याह नेति नाविति कर्तरि ६ षष्ठी पितृगेहस्थत्वमात्रेण विशेषतश्च ताभ्यां लालितत्वेन बालाः यामुदं लभंते सा च न लब्धा ४ युष्मच्छुश्रूषालोपान्नौ धर्मलोपो व्यंजनीत्याह सर्वेति
सर्वेषां पुमर्थानां संभवो यत्र स देहो याभ्यां जनितः पोषितो वा तयोः पित्रोरानृण्यं मर्त्यः शतसंवत्सरमात्रेणायुषा नाप्नोति ५ यः पुत्रः कल्पः समर्थः सन्नपि देहेन धनेन वा पित्रोर्जीविकां न संपादयेत् प्रेत्य लोकांतरे गतं तं स्वस्य त
स्यैव मांसं भक्षयंति यमदूता इति शेषः ६ किंच मात्रादिभरणहीनो विफलजीवन इत्याह मातरमिति वृद्धं कुलवृद्धं अपुष्णन् श्वसन्नपि मृत एव कल्पः समर्थोपि अकल्पस्तु सुकर इत्यर्थः ७ तदेनात्मनो निर्दिशति
तदिति तस्मान्नौ त्वावयोः अकल्पस्य हेतुः कंसादिति ८ शुश्रूषामकुर्वतोस्तदनर्चनं तावत्यमार्त्ये त्वा दैव क्षंतुमर्हथः गूढवासेनास्वाधीनयोः दुर्हृदा कंसेन क्लिष्टयोः कंसादुद्विग्नयोः परतंत्रयोर्दैवहतयोरित्यादि किंचि
दन्ते तोक्तिः पितृत्वेन स्वीकृतयोरनयोः पुत्रभावदार्ढ्यद्वारा जीवनहेतुत्वाच्च विरुद्धा स्त्रीषु नर्मविवाहे च वृत्त्यर्थं प्राणसंकटे इति स्मृत्या वृत्त्यर्थं तदुक्तानानृत ९ अत्र श्रीशुक उवाचेति क्वचित्पाठः मोहितो विस्मारितवात्स
ल्यान्य सर्वो यतः कृपाप्रधान नराकृतिब्रह्मणः मनोहरस्य जगतः प्रेमास्पदस्य सागीः अंकमारोप्य पुत्र हृदयमिति शेषः १० स्नेहपाशेन पाशावच्छेदेन दीर्घेण च प्रेम्णो व्याप्तो अतो विमोहितो किंचिदप्यनुसंधातुमशक्तौ बाष्पकं
ठावतो न किंचिदूचतुश्च किंतु केवलमश्रुधाराभिः सिंचंतावेवस्थितौ तदिदं कृतं नंदाद्यसमक्षं ज्ञेयं देवकीवसुदेवयोरेव पितृत्वं व्यंजनात् ११ नाहं भगवति कृष्णे मे कियदिति ज्ञाने स्वभक्तवात्सल्ये भक्ताय याति
शापं यदुस्तं सेनं चपाधिपं चक्रे १ तदाह एवमिति देवकीसुतः अतो मातामहं मातृप्रेम्णा तस्य पितरमेवेत्यर्थः अनेन मान्यत्वेन पित्रादिसंमत्या च यदुराजत्वयोग्यताप्युक्ता नृपं छत्रसिंहासनादिभाजं राजान
मकरोन्न तु केवलमधिपं यतो भगवान्सर्वेश्वरतया ययातिशापमपि भक्तवात्सल्यानादृतवानिति भावः एतच्च तं बंधनान्मोचय इत्येति ज्ञेयं उग्रसेनं ततो बंधान्मुमोच मधुसूदन इत्यादि विष्णुपुराणोक्तेः १२
अस्मानप्रजाः याद्वान् हे महाराजेति साम्राज्यमभिप्रेतं ननु त्वमेवाज्ञापयतत्राह ययातीति तव तु मदाज्ञयानदोषः किंच भवता भोज्यं यदूनां राज्यं परंपराप्राप्तं नास्माकं वृष्णियादवानामिति भावः १३ सा

राम

६८

न्नाद्येममकाशक्तिस्तत्राह मयीति हरं खिद्यमाना ययातिनृपशापः दुःखेनोय मराज्यार्हो पिसांप्रतं मयि न स्त्येस्थिते देवानाज्ञा पयतु किं न्वेरितिवैष्णवोक्तेः हरं तीति पाठे हरिष्यति १७ सर्वानितियुग्मकं स्वानात्मीयान् ज्ञातय
श्चवेवाह्निकादि संबंधिनश्चतान् दिग्भ्य आनाय्येति शेषः यदवो युदुभेदा भोजाः वृष्ण्यादयः पंच आदिना सात्वतादयः एतत्सप्रभेदा मुख्यतमा ज्ञेयाः १५ समाश्वास्येति पितृवदत्रापि तेषां बांधवत्वादि धीजनकमायाविस्ता
रणमभिप्रेतं विश्वकृदिति असंख्यानां बहुधन गृहाद्युपस्कर वस्त्रादिदानपूर्वकं स्थापनेन दुःशोकमिति भावः नंदगमनोत्तरं रोहिणी व्रजाद्दानेष्यतीति ज्ञेयं १८ ते वासवेन्त मस्थितित्रिभिः शाह कृष्णेति युग्मकं प्रथम
कृष्णरामाभ्यां गतो नष्टः कंसादितापो येषां ततो मथुरावासादिना लब्धमनोरथाः ततः कृष्णरामभुजैः पालिताः ततस्तत्परिकरता प्राप्त्या सर्वार्थसिद्धियुक्ताः ततो वीक्षतइत्यादि लक्षणा रेमिरे इति क्रमेण योज्यं १० १९ मु
खांबुजं सोंदर्यसुधामक्षिभिर्मुहुः प्रतीक्षणं पिबंतः प्रवयसोपि अतियुवानः शारीरेंद्रियबलयुक्ताश्चासन् १९ अथ नंदप्रस्थानं प्रक्रममाणो राज्ञो देवकीसुतः तताया मेवलसन्मुखतां दृष्ट्वा श्रीकृष्णवचनस्वारस्येनैव
स्वेच्छया स्थापयिष्यन्नाह अथेति पादाब्जानां तादृग्रास्वास्थ्यविधानानंतरमित्यर्थः यदुकुलाश्वासनपौरसंमाननाट्यवस्त्रकृत्यानि प्रदर्श्याद्यसायमस्माभिः प्रस्थास्यते सायं च सति प्रातरित्येवं कतिपयदिनान्यतिक्र
म्य तेन चात्र त्यकृत्यानां बहुकालसमापनीयतां व्यंजयित्वेति भावः कदाचिदेकांते नंदसमग्रं पुत्रोचितं नत्यादिनासाद्योपेत्य वात्सल्योचितभावेन परिषज्य चेदं वक्ष्यमाणं तत्पुत्रत्वोचितमब्रवीत् कोसौ तत्राह
यो भगवान् देवकीसुत तत्या भवतां परमाप्तः स एव स्वयं तदनु वेगेण संकर्षणश्चोचतुरिति भवद्भिः रन्यथा नाभिमंतव्यमिति भावः हे राजेंद्रेति राजेंद्राणां भवतो राजकन्यायाः प्रतिताम ह्याः संबंधेन तत्रैव निष्ठा स्ताम
स्माकं तु भिक्षुकाणां यथा रुच्यैवेति भावः २० तथैवाह तु हे पितः हियतः आत्मानमप्यतिक्रम्य पित्रोरात्मजेषु ओरशेषु अत्यधिका प्रीतिस्तस्मादेव युवां स्निग्धाभ्यां भोजनादि [illegible] ना पालितो स्नपनादिना लालितौ च ने
दमाश्चर्यमिति भावः २१ संकर्षणोपि नान्यथा मंतव्य इति श्रीकृष्णस्त्राह सपितेति २२ तथैव सांत्वयति यातेति वयमीति अस्मद्दृयोश्चेति बहुवचनेन कृष्णं युष्मत्सख्यादि संबंधेनैव पित्रादितत्सामान्यानां वसुदेवा
दीनां सुखं विधाय तस्मात् विशेषितजरासंधादि वैरिवधार्थं यादव पांडवादि मेलनाय वसुदेवोरसत्त्वख्यापनपूर्वकं दत्तवत्त्वाद्वधां त तदभीष्टं संपाद्येष्याम इत्यर्थः तदर्थं भवतां यदुवंशोत्पन्नत्वेनोत्तमत्वमात्मव्य
क्षत्रियकन्या अपि परिणेष्यामीत्यभ्युनुज्ञाप्रार्थनं च व्यंजनया आपातसुखं विधायेदानीमेवागमने येषां प्रीतिभंगः स्यात् भवतां तु न कल्पांतरेपि अकृत्रिमसंबंधादिति भावः तथैवाह ज्ञातीन्सोक्षात्सीत्रादीन् द्रष्टुमि
ति एवमत्र वसुदेवतापि मुख्यपितृत्वं नंदे भगवतोभिप्रेतं तत्पक्षे सुहृदामित्युक्ते नंदपक्षे ज्ञातीनीत्युक्तेः स्नेहदुःखितानिति करुणाकुलनयागमिष्यामस्तातश्च नित्यं स्वस्वरूपाविर्भावेन तत्तद्दुःखं दूरीकरिष्याम इति भा
वः व्रजमागत्य श्रीकृष्णस्य नित्यस्थितिश्च दंतवक्रवधांते स्थापयिष्यते नंदस्तु दंतवक्रवधांते आगमनरूपं तदभिप्रायं न तदेवं सम्यक् ज्ञातवान् किंतु क्रमेणेति ज्ञेयं २३ अच्युत इति मत्सूत्रोयं सत्यवाक्यात्कृदा
पिन च्युतः स्यादिति नंदाशयव्यंजना सव्रजं व्रजवासी सहितं व्रजस्थयशोदादीन पितत्त्तसंदेशास्तत्तत्प्रणेश्चेत्यर्थः कुप्यानि शादोहनाद्यर्थं कांस्यादि पात्राणि आदिना यानादीनी व्रजस्य तत्तत्संपत्सत्वेपि दानं प्रीत्या गंध
पुष्पादिवत् तदाह सादरं यथा तथेति अर्हयामास वसुदेवोग्रसेनाद्यैः प्रयोज्यैरित्यर्थः २४ इत्युक्तइत्यस्य पितरित्यादिपद्यत्रयेण व्यवहितेनान्वयः विकल्पइति स्तंभमोहादिकं सूच्यते गोपैः सहेति तेषामपि तथात्वं २५
विचित्रः प्रेमलोभोयं श्रीकृष्णे दृश्यते यतः संवर्धितः पुत्रभावः स्वस्मिन्पित्रोर्द्वयोरपि १ अथानंतरमेव प्राप्तकालत्वात् पुरोधसा गर्गाचार्येण द्विजसंस्कृतिमुपनयनं २६ रुक्मस्य मालाः संतियासां ताः क्षौमवस्त्रैः शो
भिता गाः २७ रामकृष्णयोर्जन्मकाल इति रामजन्मऋक्षत्वापि तथैवादादिति सूच्यते याः पूर्वं मनोदतास्ता एव ताश्च कंसेन हृता अपि राजगोष्ठाद्दानीय दत्ता इत्याह कंसेनेति २८ गर्गात् तद्दीक्षयेत्यर्थः गायत्रमिति प्राजा
पत्य ब्राह्मयोरुपलक्षणं व्रतं ब्रह्मचर्यादि तत्र गायत्रं गायत्रीमध्येतुं त्रिरात्रं ततः प्राजापत्यं वेदारंभपर्यंतं ततो ब्राह्मं तत्समाप्तिपर्यंतं २९ प्रभवावितियुग्मकं प्रभवंति विद्या आभ्यां तौ प्रभवौ अतः सर्वज्ञौ नरचेष्टितै
र्नित्यसिद्धं ज्ञानं छादयंतौ ३० काश्यं काश्यांजातं ३१ यथावत्समित्पाणीत्यादि प्रकारेण प्राप्य गुरावद्भवतिमन्यान् शीक्षयंतौ देवमिव गुरुमुपेतौ सेवितवंतौ आदृतौ सादरौ यद्वा गुरुणा संमानितौ ३२ शुद्धभत्याया अ
नुव्रतयस्ताभ्यां एतच्च श्रीदामोपाख्याने व्यक्तं भावि अखिलान् चतुरोपि वेदान् तत्पाठं च शुद्धये शीक्षा व्याकरणं चांगानि सार्थानि रहस्यत्वेन पश्चादुपनिषदश्च तत्सहितान् ३३ सरहस्यमिति सार्धद्वयकं ततः क्ष
त्रियाणामावश्यकमस्त्रमंत्रादिसहितं धनुर्वेदं एतदादीनी सर्वाणि सार्थान्येव ततः सर्वविद्योपकारकाणि मन्वादि धर्मशास्त्राणि ततो न्यायपथान् वेदार्थनिर्णायक पूर्वमीमांसा सांख्ययोगान् उपनिषदर्थनिर्णा
यकोत्तरमीमांसां च ततो वेदबाह्यनिरासाय केवलयुक्तिमयीमान्वीक्षिकीं तर्कविद्यां एवं राज्यत्वयोग्यतायां राजनीतिं संधिश्च विग्रहो यानमासनं द्वैधमाश्रय इति षड्विधामिति क्रमः कृत् गुरुपदेशमात्रेण ३४
ततः कौतुकविशेषार्थं कलाः षष्टिदिदेक्ष्योत्याहुः अहोरात्रैरिति तावतीश्चतुःषष्टिसंख्याः कलाजगृहतुः वेदादिग्रहणापतदन्य अहोरात्रा ज्ञेयाः यद्वा पूर्वोक्तं सर्वं कलाश्च चतुःषष्ट्याहोरात्रैर्जगृहतुरित्यन्वे
यः सरहस्यं धनुर्वेदं ससंग्रहमधीयतां अहोरात्रैश्चतुःषष्ट्या तदद्भुतमभूद्द्विजेति वैष्णवोक्तेः तत्र किलास्वरूपाणि गानाद्रीक्षामायकत्वं तालरागस्वरज्ञता स्वरादिमेलनज्ञानमिति गीतं तु षड्विधं १ ततं वी
णादिकं तत्र यमानद्धं मुरजादिकं वंशादिकं च सुषिरं कांस्यतालादिकं घनं चतुर्विधमिदं वाद्यं तेयात्रापि षड्विधाः २ गीततालानुगं नृत्यं ३ नाट्का भिनयस्तथा ४।३ चित्रलेखक्रिया नाना ५ तिलके रचना
कृता ६ पूजाप्रकार रचना कुसुमैस्तंदुलैरपि ७।८ पुष्पैः शय्यादिरचना चातुरी पल्लवादिभिः ८ दशनेवसनेंगे च नानारंजनचातुरी ९ पांडवादिसभातुल्य मणिभूबंधनक्रिया १० मंचकादिकनिर्मा
ण ११ जलतोडादिवादनं १२।१३ जलस्तंभो १३ नेकविधाद्भुतदर्शनविदिता १४ माल्यग्रथनकल्पश्च १५ शेखरापीडयोजनं १६।१७ नेपथ्ययोगाः १७ कर्णादे पत्रभंगीविनिर्मितिः १८ सुगंधीकरणं १९
रूपायोजनं २० चेंद्रजालकं २१।१८ धारणं बहुरूपाणां २२ क्रियायां हस्तचापलं २३ नानाभक्ष्यादिपाकाश्च २४ पानकासवयोः २५।१९ सूचीक्रिया २६ सूत्रबद्धपूत्तलीनां विलेखनं २७ कूटवा

गर्धविज्ञानं २८ प्रतिमानांविनिर्मितिः २९।११ उपायादुर्वेचवकुं ३० शीघ्रपुस्तकवाचनं ३१ नाटकाख्यायिकादीनां निर्माणं ज्ञात्वा तापिच ३२।१२ समस्यापूरणं काव्यं ३३ वेत्रबाणादिकल्पनाः ३४ नानासूत्रादिनिर्माणे स्तत्तद्
स्तुविकल्पनाः ३५।१३ तक्षणं ३६ वास्तुविद्याच ३७ रूप्यरत्नपरीक्षणं ३८ ताम्रादेर्हेमकरणं ३९ रत्नरंजनकौशलं ४०।१४ रत्नादिखनिभूज्ञानं ४१ वृक्षायुर्योगवेदिता ४२ मेषादीनां युद्धविधिः ४३ शुकादीनां प्रलाप
नं ४४।१५ रात्रौरुच्चाटनं मेत्रैः ४५ केशमार्जनकौशलं ४६ लुप्ताक्षराणामुष्टिस्थवस्तूनांकथनं यथा ४७।१६ म्लेच्छभाषाशास्त्रगति ४८ देशभाषास्ववाग्मिता ४९ पुष्पशकटिकाद्याख्यक्षुद्रविद्यानिमित्तधीः ५०।१७
निर्माणं मातृकवर्णैः पूजाधारणयंत्रयोः ५१ हीरकादेर्भेद्यस्य द्वेधीकरणकौशलं ५२।१८ परचित्तस्थितार्थस्य श्लोककं ५३ बहुकोशधीः ५४ वेदांगसूत्रबह्वन्यछंदसांलक्षणादिधीः ५५।१९ नानोपायैरेकके
र्मनिर्मितिः ५६ परवंचनं ५७ तूलसूत्रादिवस्त्राणां पहाद्भिन्न प्रदर्शनं ५८।२० द्यूतविद्या ५९ दुरवस्थावृष्यक्रीडाच ६० शैशवी ६१ वैनायकी ६२ वैजयीकी ६३ विद्यावैतालिकीतिच ६४।२१ त्रयोंत्यापैंद्रजालादि
भेदाः स्युरितिभातिमे इतिस्वामीक्रमोद्दिष्टकलानामर्थवर्णनं २२ कृष्णश्चेदश्वंद्रवंशेचतुर्गुणकलोनिशं एकास्यविद्युनाभ्यस्तेचतुराश्च इवाजनिः १ गुर्वीत्यर्थकं छंदयामासतुस्तदनिछुमपीछंकारितवंतौ ३६
प्रभासेमहार्णवेमृतमितिपितृभ्यांसह प्रभासक्षेत्रे गतस्य बालस्य तयाब्धिजले क्रीडतः शंखासुरेण ग्रसनादिति शेयं ३७ तथेति स्वीकृत्येत्यर्थः अथसद्यएव वेलासमुद्रतीरं गत्वा निषदतुरुपविष्टौ निषीदतुरिति
पाठस्त्वार्षः सिंधुरीशोच्चात्वा रत्नाद्यर्हण माजहार ३८ भगवानैश्वर्यप्रदर्शयन्नित्यर्थः प्रकर्षेणाविकृतांगतयादीयतो देवतात्वात तथाशक्तेः इहक्षेत्रे ३९ समुद्रवउवाचेतिक्वचित् नैवेत्यर्थकं ७० नन्वेति पाठांतरं हेदे
वज्ञानन्त्येव मातापनक्रीडापर महान् ममासाध्यः पंचजनोदैत्यस्वहापश्चत् अंतरित्यर्थकं आस्तेइतिशेषः आस्तेनेनास्तीतो नूनं तच्छ्रुत्वासत्वरं प्रभुरित्यर्थमधिकं क्वचित्पठ्यते ७० जत्नमितिश्रुकोक्तिः प्रभुरित्यध्याहा
रः एकवचनात् रथरक्षाद्यर्थतीरे रामंस्थापयित्वाप्रवेशः अर्त्तकं तदस्थीन्यपीत्यर्थः हननमन्वेषणंच यद्यस्थीन्यपि प्राप्स्यामीतदा पुत्रंजीवयिष्यामीति समुद्रप्रतिव्यंजनाय वस्तुतस्तुगुरुपुत्रग्रसनापराधीनं
तेतदंगोत्थंशंखमादाय तु हतवानित्याह तदिति महानपिशंखः स्वच्छयाध्याद्ययोग्यः सूक्ष्मकारःकृत इतिशेयं ७१ गुरुपुत्रंगुरोर्दातुं व्यरत्यस्यन् कस्य जीविते मन्येजघान भगवान् ज्ञानंपंचजनासुरं १ तत्रास्ति
त्वनिश्चययाकृतपुरीत्याच्चदधितांपुरी अत एतागृहीतहलेन रामेण सह शंखप्रध्मानोत्तरं तु तेन शब्देन यमदूतत्रासः यंत्रशस्त्रादिकुंठीभावः असिपत्रविशीर्णता कुंभीपाकस्यशीतलत्वंलोहकंटकादिभंगचेतराणीशो
षादिनारकीणांपापक्षयाद्विमानमारुह्योत्तमपदप्राप्तिरित्यादिपुराणांतरे उक्तं ७२ प्रजासंयमनातिभयंकरकर्माणि ७३ सर्वभूतहृन्निवासमुवाचहेलीलाप्रधान मनुष्याकारहेविदेमा इत्यासमनःशोचकत्वंस्व
चितं लीलामनुष्ययाचिहत्वोरिति पाठांतरं ७४ महाराजेतियथाकर्मशासतंप्रोत्साहयंति निजंप्रारब्धकर्मनिबंधनमवस्य भोग्य यस्य ताहशमपि मदाज्ञानुवर्तश्च सन्तानय सामान्यरूपायाः प्रारब्धभोगावस्यक
त्वमदाज्ञाया इयंविशेषतः स्वमुखेनक्रियमाणा मदाज्ञाबलिष्टेति भावः ७५ तथेत्युक्त्वा तेनयमेनोपानीतं गुरुपुत्रं यादृशोमृतस्तादृशशरीरमेव भस्मवदाज्ञाप्रभावेण निर्मायेत्यर्थः ससर्जबालरूपंचतदुभा
नतदुःकृतवमित्यन्यत्रोक्तेः समुद्राहृतंरत्नादिकंचदत्वा ततः सांदिपनेः पुत्रं तद्रूपवयसं तदा प्रादात्कृष्णः प्रतीतात्मासहरत्नैरुदारधीरितिहरिवंशोक्तेः ७६ वत्सेति स्नेहविशेषादेकस्य श्रीकृष्णस्यैव तथासं
बोधनं गुरोर्निष्क्रयादक्षिणा युष्मद्विधानामपिगुरोःकिमुत युवयोर्गुरोरित्यर्थः ७७ हे वीरौ इदृशोदानेरणेचशूरौ स्वगृहस्वगृहमितिपाठो तदानीं प्रणम्य गच्छेतावाशीर्भिर्नंदयति कीर्तिरिति ७८ गुरुणैवम
नुज्ञातो अनुज्ञातोस्वगुरुणेति पाठो अनिलरंहसा देवगर्जन्मेघवन्निनदोयस्य तेनरथेन अतोदूरात्तेनादं श्रुत्वा सर्वेभिजग्मुरितिशेयं ततः प्रत्युद्यताः सर्वे इत्यादिहरिवंशोक्तेः ७९ सर्वाः पौरजानपद्यश्च
अत्रविशेषाहरिवंशे नंदितूर्याण्यवाद्यंत तुष्टुवुश्चजनार्दनं रथ्याः पताकामालिन्यो राजंतेस्मसमंततः १ मुदिताश्चाप्यगायंत राजमार्गे स्तुगायकाः गोविंदरामौसंप्राप्तौ भ्रातरौलोकविश्रुतौ स्वपरेनिर्भयाः
सर्वे क्रीडंतिसहबांधवैः २ वयांसिसाधुवाक्यानि प्रहृष्टा गोद्विजातयः ३ शिवाश्चवाताप्रववुः विरजस्कादिशोदश यानिलिंगानिलोकस्य बभुःकृतयुगेपुरा तानिसर्वाण्यदृश्यंत पुरीप्राप्तेजनार्दने इ
त्यादि ५० इतिश्रीमद्भागवतदशमस्कंधमध्यगः पंचचत्वारिंशकोयं स्तोषिणीसारसंग्रहः १ इतिभागवते दशमे पंचचत्वारिंशोध्यायः ४५ श्रीकृष्णंतमहं वंदे चित्तनंदघनोपियः भक्तव्रजार्तितो
त्यार्तोऽगमयद्व्रजमुद्धवं १ निरुद्धवंव्रजंज्ञात्वा तदुद्धवविवर्धने स्वोद्धवंप्रेषयामास कृतोभक्तोद्धवो हरिः २ गोपीनोनैकभावानां बह्विनोसांत्वनं चिरात् कृसाध्यमुद्धवोज्ञात्वा पूर्वं पित्रोरसांत्वयत् ३ एवमाव
स्यकंकृत्यं समाप्यायास्येद्रष्टुमेष्याम इत्युक्त्वापि भगवान् व्रजंयत्रजगाम तत्र शत्रुपक्षक्षपणाचेतस इतिवक्ष्यमाणात् दुर्जेयजरासंधजयादिकृत्यशेषःस्वस्यतदुपद्रवशंकयाव्रजंगतोनंदादिप्रेमबद्धोनागच्छे
दितिशंकयावा वसुदेवाद्यननुज्ञाचेति हेतुद्वयं लक्ष्यते तच्छत्रुजयो दुर्गादिमस्त्यांपूर्यामेवस्यांन्नव्रजे इतिविचार्यैवनंदेनापिसाक्षात्संदेशैर्वाव्रजागमनायनप्रार्थितः भगवानपिशत्रून्प्रत्यौदासीन्यव्यंजना
यनूनंदादीन्निकटेआजुहाव तथात्वेयदूनांगोपानांच युगपदुपद्रवःस्यात् किंच युगपदुभयत्रपितृत्वव्यवहारस्तदुचितगोचारणयुद्धादिलीलानामन्योन्यविरोधाद्दुर्घटः अत १ एववयमेवद्रष्टुमे
ष्यामोनतुयूयमत्रागच्छतेति भगवता व्यंजितं ततस्तेचैवं चोत्कंठिता अपिनिकटादपिव्रजान्नंदादयोनागताः पुरे व्रजेच युगपत्स्थितिस्तुनयुक्ता तज्ज्ञानेऐश्वर्यज्ञानेन पुत्रादिभावमयप्रेमहान्या
पत्तेः किंच भक्तानांनित्यसंयोगे प्रेमन्नापनरोचते यथोक्तं धाम यंप्रेम तल्लोभःपरमोहरेः तस्मादतएवकृष्ण वधांतेगंतुमना भगवान्स्वावस्पर्यंतमागमनास्थिता भावंमत्वाविरहाग्निदग्धामाभूवन्
इतिप्रतिज्ञातमागमनंतद्विश्वासास्पदंयथास्यात् स्वीयमहाराजत्वेभवश्रवणेनव्रजागमनागमहनिवृत्तिश्च यथास्यात्तथामाधातुस्वतुल्यंप्रियसखमुद्धवंसंदिश्यप्रेषयामासेतिक्रमप्राप्तोलो

त्वाम ध्याय हृद्येन तु क्तमारत्वते व्यष्टी नामिति सर्वेषामपियादनां प्रवरः संमत इति पाठांतरं मंत्रीगुप्तयुक्तिज्ञानप्रदो मात्स्यविशेष इति विश्वास्यत्वयुक्तिनैपुण्ये आभ्यां विशेषणाभ्यां व्रजजनसांत्वनसामर्थ्यं
किंच कृष्णस्य दयाविशेषविषय इति गुणाढ्यत्वं भगवतात्मीयतया स्वीकृतत्वं च सखा असंकुचितप्रेम्णा दत्तसव्यपदवीकोपि इति गुणरूपादिभिः कृष्णसाम्यं तरहस्योक्तास्पदत्वं चेति गोपीसंदेशयोग्यता बहिरं॰ गत्वा
कदृष्ट्या विशिनष्टि वृहस्पतेः साक्षादेव शिष्यो न तु शिष्याद्द्वारकः नीतिशास्त्रमारभ्य संकर्षणसंप्रदायागतश्रीभागवतपर्यंतस्य तेन ततोधीतत्त्वात् एवं वाग्मित्वमुक्तं सर्वत्र हेतुः बुद्धिसत्तम इति एवं भगवत इव
षड्गुणा व उक्ताः उद्धवो वसुदेवभ्रातुर्देवभागस्य पुत्रो योस्तीति शेषः श्लेषेण साक्षाद्बुद्धो मूर्तिमानुत्सव इत्यर्थः १ तमिति प्रेष्ठं बाल्यमारभ्य प्रीतिकर्तारं भक्तं सेवातत्परं च यः पंचहायनो मात्रे स्याद्युक्तो एकांति
नेत देकापेक्षं विहायपितृदेवादीन् परिनिष्ठां गतो हरौ तद्गाढप्रेमभिः पूर्ण एकांतीति निगद्यते इति वैष्णवोक्तेः तथाभूतं कंचिदेकद्वितीये रहसि आह प्रपन्नानां सकृच्छरणागतानां किमुत तदेकजीवनानां व्रज
जनानामार्तिं हरतिसः तेषामार्तिं हर्तुमिति भावः यतो भगवान् सर्वज्ञ दयादिगुणापारपारावारः गृहीत्वेति इदं द्वारा मुद्रया संदेशश्च तत्र तस्यानुरागज्ञनाय गोप्यत्वेन निकटविवक्षया प्रेमभरोदयस्वभा
वेन च २ गोकुलं मरामयोः न इति पाठं बृहत्त्वं मत्पितृतया भवाद्दृशामपि पितरावित्याशयेन पित्रोर्वियोगदुःखच्छिन्ना प्रीतिमावह सचातुर्येण प्रवाहवतीं कुरु गोपीनां तु मद्वियोगेन यत्र आधिस्तं विशेषण मोचय
२ ग्रंथिवत् हृदि दृढं संलग्नं यस्याजयं आधिमोचनेन भवत्यच्छक्यं न तासां प्रीतिकरणमिति भावः तच्च बहुभिर्मत्संदेशैरेव न तु स्वचातुर्येण द्वित्रैर्वा ते: ३ गोपीनां विशेषतः संदेशद्वाभ्यां विरहज्ञ मूर्छादिविशेषावस्थात्वा
हेतुं वक्तुं प्रथममेकेन साधारणावस्थामाह ता इति मय्येव मनो यासामिति धर्माद्यशेषपुमर्थानादरः मय्येव प्राणाः इंद्रियवर्गो यासामिति देहाद्यनादरः मदर्थे त्यक्ता दैहिकाः पतिपुत्रादयो शनपानादयश्च याभि
रिति इहलोकानादरः अत्र मामेव दयितं प्रेष्ठमात्मानं मनसा गता इत्यर्थः क्वचिदीक्षांतरे ध्रीयते ततः किं तत्राह य इति सामान्यनिर्देशोधिकाराद्यनपेक्षार्थः मत्निमित्तं त्यक्तो लोकधर्मो हि इह परलोक सुखे तत्साधनानि
च येस्तान् चोप्यर्थे तानपि किं पुनः प्राणाद्यनपेक्षिकास्ता इत्यर्थः बिभर्मि पुष्णामि यद्वा ममनोयास्तु किंच मम प्राणरूपाः किंतु गोपीजनः प्राणाधिकप्रियतमो मम सेति पुराणांतरोक्तेः यतो मदर्थे इत्यादि य इत्यादिके मुख्ये
न हेतुः ब्रह्मादिध्येयोप्यहं तान् बिभर्मि अंतर्धारयामि चिंतयामीत्यर्थः किमुत ता इति भावः यद्वा येताभिस्त्यक्ताः सखीदास्यादिलोकाः भोजनादिदेहधर्मा लज्जादिसाध्वीधर्माश्च तानप्यहं बिभर्मि रक्षामि किमुत ता इत्यर्थः ४
तासां विरहाधिज्ञां विशेषावस्थामाह मयीति गोकुलस्त्रियो मद्दर्शनमात्रजीवना स्तत्रापिताः अनिर्वचनीयभावाः प्रेयसां मम तास्य दयाः प्रियेभ्यः प्रियतराणां देहादिजीवात्मपर्यंतानां प्रेष्ठे प्रियतमे मयि जडदूरीस्थ
तां पक्ष्मकृत् दृशामिति तदुक्त्या निमेषव्यवधानेपि महार्तिदे संप्रति दूरस्थे सति स्मरंत्यो दूरस्थत्वं मां वा भावयंत्यो भावानां रसेनैव मुह्यंति मूर्छां प्राप्नुवंति हंत मद्भावनमपि कर्तुं न शक्नुवंतीति भावः वर्तमानप्रयोगे
ण सम्प्रति मोह योः पौनःपुन्यं मोहे हेतुः विरहेति कुंजगतिं गमिता इत्याद्युक्तेस्तथावस्थो दुःखापि त्यक्ताम येति संप्रति तत्र गंतुं लज्जापि मे जायत इति भावः अंगेत्यार्त्या संबोधनं श्लेषेण मदंगतुल्येति प्राप्तसाहनं चेति ५
अथ तासां दशमीं दशां शंकते अस्या यासेन प्राणान् धारयंति निर्गच्छतो प्यवस्थापयंति अतोग्रे धारयितुं न शक्ष्यंतीति भावः कोसावस्या यास इति प्रश्नमाशंक्य लज्जयाह कथंचन केनापि प्रकारेणेति तत्र तस्य मं
दोत्साहतामाशंक्य स्पष्टमाह शीघ्रमागमिष्यतीति ये प्रत्यागमनसंदेशास्तैः बहुत्वं पौनःपुन्यात् संदेशांतराभिप्रायेण वा मे मदीया वल्लव्य इति गोपस्य ममानुरूपा भार्या इति व्यंजना पूर्वमपि पित्रोर्नः प्रीतिमिति स्वस्य
गोपत्वाभिमानो व्यंजितः महात्मिका इति तासामात्मा यदि स्वदेहे भविष्यत्तदा विरहाग्निदग्धो भविष्यदेव तत्स्य स्य तु मयि वर्तमानत्वाज्जीवनमिति भावः प्राय इति कश्चिन्न जीवंति इत्यपि संभाव्यते नः प्रत्यागमननि
श्चीयकसंदेशैः शीघ्रं सांत्वनीया इति भावः यद्यपि सर्वे पि व्रजवासिनस्तदेकजीवनाः सांत्वनार्हाः एषां घोषनिवासिनाम् इत्यादि यद्धामार्थसुहृत्प्रियात्म... सेत्याद्यहो भाग्यमहो भाग्यमित्यादि दुस्त्यजश्चानुरागोस्मिन् स
र्वेषां नो व्रजौकसामित्यादि तस्मान्मच्छरणं गोष्ठमित्यादिवाक्येभ्यः अतएव नो दावक्ष्यति अपि स्मरति नः कृष्णो मातरः सुहृदः सखीन् गोपान्व्रजं चात्मनाथं गावो वृंदावनं गिरिमिति तथापि तेषामनन्येत्वादि
गम्यते श्रीव्रजे खलु त्रिविधः प्रेमा उत्कंठाप्रधानो विश्रंभप्रधानो विवेकशून्यश्च तत्रोत्कंठाप्रधानानां साक्षात्कारेपि परोक्षतावभासः यथा क्षारकाजलविहारे पट्टस्त्रीणां अतउत्कंठाप्रधानप्रेमाणः पित
रो प्रेयस्यश्च वियोगमानिन एवेति तयोस्तासां च सांत्वनमेव सांत्वनं अन्यथा समाधानासंभवात् विश्रंभप्रेमवतां सखिश्रीदामादीनां श्लिष्यति चुंबति जलधरकल्प हरिरुपगत इति तिमिरमनल्पमिति न्या
येन विरहादर्शनादौ तत्स्फूर्त्यादिना मामेकांते मथुरातत्र आगत्य मिलतीति संवदतीत्यादिविश्वासेन संयोगिताभिमाना इति सांत्वनमेव सांत्वनं सांत्वने संदेहापत्तेः विवेकशून्यप्रेम्णां गवादीनां स्वानुभवेनैव संयोगितानि
श्चयः अतएवैषां हर्षो वर्ण्यते वासितार्थेभियुध्यद्भिरित्यादिना उपनंदादीनां तु पित्राद्यंतःपातिसांत्वनं एवं त्रैविध्ये अक्रूर आगतः किंवेत्यादिना कासांचिद्दुःखं गोप्यः समुत्थायेत्यादिना कासांचित्सुखं वक्ष्यमाण
दीनां च सुखं तथा तथा वक्ष्यमाणं तत्र तत्रांतर्भावाभिप्रायेण व्यवस्थापनीयमिति सर्वज्ञस्य सखीनां गमनागमनाभिप्रायेण सांत्वनमिति व्याख्यानं तु सुहृदः सखीनित्यादि नंदप्रश्नस्वारस्याननुगुणं ६ संदेशं
आगमिष्यत्यदीर्घेणेत्याद्यर्थरूपं भवतीनां वियोगो मे इत्यादिवाक्यरूपं च रथमारुह्येति शीघ्रगमनाय प्रकर्षेणाक्रूरवत्मनोरथाचरणादिनाययौ ७ प्राप्त इति षड्कं श्रीमान् श्रीमन्निति पाठे सूर्यसंगच्छ
ति छन्नयानं यस्यति गोपिरंजितरक्तांतत्वेन नंदसंगत्वश्चवानिति व्यंजितं ८ व्रजं वर्णयति पंचभिः वासितार्थे इति पुष्पवतीनां गवामर्थे मिथो युध्यमानैः शुष्मिभिर्मत्तैर्वृषैरनुकल्पितवत्सान्प्रति धावंतीभि
र्वास्रभिर्धेनुभिश्च नादितं ९ विलंघद्भिरुत्पतद्भिः सितैरिति शुभ्राधिक्यं गोदोहशब्दैः सहाभितो रवाः मुंचन्नयं देहीत्यादयो यत्र तं निःस्वनेन च मंडितं १० स्वलंकृताभिर्गोपीभिः प्रेयसीतराभिः मदर्थत्य
क्तदेहिका इत्युक्तेः गोपैश्चालंकृतैर्विराजितं ११ लौकिकीं शोभामुक्त्वा वैदिकीमाह अग्नीति अग्न्यर्कयोर्नित्यहोमोपस्थानाद्यैः अतिथिपितृदेवादीनां पंचमहायज्ञैः विप्रस्य दानमानादिभिरर्चनानि

तदन्वितेरावासैः गृहैः गृहान्तवर्ति घटपादिनिश्चमनोरमं भक्तिसिद्धानां व्रजवासिनां विधिवैकर्याभावेपि संस्कारवशाद्बाल्लोकसंग्रहमेवापीतिज्ञायाद्यकर्मकरणं बोध्यं २२ बहिः प्रदेशं गृहो भामाह सर्वतइति पंचसमूहैः सरोव
रादिगतैः २३ गृहद्वारे आगतं तं श्रुत्वा समीपमागम्य कृष्णस्य भक्तं अतः प्रियं जै हमवस्यवाः कृदेव पूजाधिष्ठानस्थानदत्तेदेना पूजयत् २४ पायसेनो हृष्टान्नेन वा भोजितं ततः शय्यायां संविष्टं कायं प्रसार्य क्षणं विश्रान्तं पादसेवा
हनादिना गतश्रमं ततः सुखोपविष्टं पर्यपृच्छत् २५ श्रीकृष्णविश्लेषदुःखोत्सेकशोकया सहसा तं प्रष्टुमशक्तस्तत्प्रश्नभूमिका रूपेण वसुदेवकुशलं पृच्छदिति कच्चिदिति महाभागेति कृष्णसंनिधानात् वयं तु न भवा
दृशा भाग्यायतस्तेन त्यक्ता इति भावः शूरनंदन इति तत्सितुर्भाग्यं व्यंग्यं आपृष्ठ्यो मुक्तः पित्राद्यैर्युतः सुहृद्भिर्युत इति सामान्यतः कृष्णक्षेमप्रश्नः २६ क्षणं निजद्येश्वर्यार्थं कृष्णप्रस्तावव्यवधानायाह दिष्ट्येति पाप्पानमाह सा
धूनामित्यादि कर्मणि शेषे षष्ठ्यः २७ ततश्च धैर्यं प्रष्टव्यमेव पृच्छति अपीति नंद इति बहुत्वं उपनंदाद्यपेक्षं सुहृदो मातुलादीन् सखीन् श्रीदामादीन् गोपान् साधारणानेकशेषेण गोपीश्च आस्तामेवं विशेषतः सामान्यतो व्रजं
च व्रजस्य तन्नाथत्वे सर्वे पांतन्नाथत्वं सिद्ध्यतीति तस्यैव तद्विशेषणं आस्तां व्रजस्तत्त्यक्तो यासां संगेय च्चारं मततां गास्ता वृंदावनं च स्वयं प्रवर्तितं पूजनं सप्ताहकरेधृतं गोवर्धनं कवाकिं स्मरति मारितेपि कंसे तत्संबधिनो दुरद्यम
भोजां घातार्थं यदूनां सुखवासार्थं च व्यग्रस्यात्मनः स्मरणमपि दुर्घटं किमुतान्येषामिति भावः २८ ननु कृतहो सोसदासमरस्यैवस्याशंक्यस्मरणस्य फलं पृच्छति अपीति गोविंदः गोकुलेंद्र इति आगमनावश्यकता स्वजनानिती क्षणा
वश्यकता आस्तां पौनःपुन्यात् शांत्वनाद्याशाच सकृदपि इक्षितुमपि किमायास्यति जीवनेविरहदुःखं दर्शनं कृष्णमासत्त्वता दुःखं मरणेपुनः कृष्णदर्शनाभावदुःखं चेति तदेतत्सर्वमीक्षणमात्रेण नंक्ष्यतीति भावः आगमनेप्रत्यांतरं व्यंज
यति कर्हीति कदागमनं स्यात् कदा द्रक्ष्याम इत्यर्थः सत्नोपश्चार्षः तद्धस्तिपाठे तर्ह्येव द्रक्ष्यामः इष्टुमेस्याम इत्युक्त्वा स्मार्कं गमनस्यानभिमतत्वात् मुख्यन्निवशोभांस्मरति सुनसमित्यादि २९ स्वाद्यासादिदुःखमविगणय्यानेक मृत्यु
त्यो रक्षणं निजसांत्वनार्थं साधैर्यमिव स्मरन् प्रस्तुतं तेन विदीर्यं नीचीलपति दावाग्नेरित्यादि वाताच्च वर्षाच्च वृषाच्च सर्पाच्च अन्येभ्योपि साक्षान्मृत्युदेवताभ्य इव रक्षितास्तु महानात्मा कारुण्यादिः स्वभावो यस्य ३० एवं सो
धेनमाधुर्यादिप्रभावौ स्मृत्वा तत्रापि चेतोवैयग्र्यं लब्ध्वा एतदेवप्रत्यहिकं निजदुःखमिति निवेदयति स्मरतामिति कृष्णेति तु पवष्ठिकमसस्ते तेन लीलेत्याद्यावप्यन्वयः वीर्याणि प्रभावमयचरितानि लीलेत्यादीनी माधुर्यमयचरि
तानि च लीला पूर्वकं नेत्रैकदेशेन क्षणं स्मितं भाषितं च स्मरतो नद्यवसनीनां भोजनादिक्रियाः शिथिलाः प्रयत्नशून्याः इश्वरेणेव प्रवर्तिता इत्यर्थः क्रियाव्याप्ततयापि स्वस्थता न सिध्यतीति भावः ३१ ननु गृहावस्थाने पुत्रस्मरणमधिकं
स्यादतो गाः पालयंतो वनादौ भ्रमते स्याशंक्यतेनाप्यप्रतीकारमाह सरिदिति उद्देशाः प्रदेशाः तान् वरुणादिभ्यो मोचकस्य तस्य पदचिन्हैर्मुदेव्यात थैवरक्षितैर्भूषितान् अंगं क्रीडान् क्रीडाचिन्हैर्मनोहरान् पश्यतां प्राणिमात्राणां किमुत नः
मनस्तत्स्फूर्तिमयतां याति किं कर्तव्यमिति भावः ३२ माहात्म्यकीर्तनेच्छया पुनः प्रभवान् स्मरति चतुर्भिर्मन्ये इति इह मद्गृहे सुरोत्तमौ नारायणसमौ कालपिसुरागणामर्थाय प्राप्तौ संभावयामि महत्वं गौरं गर्गस्य वचनं यथेति ३३ मत्तेभराज
पतिं च तथा नागायुतबलं अधिपइत्येकत्वं इत्येतातू ३४ तालः यष्टिः हस्तप्रमाणं तत्रयं प्रमाणमस्य तद्धनुः इभराट्यष्टिमिवबभंज एकेनवामेन ३५ येनेति येनयनेत्यर्थः ३६ स्वतएव कृष्णानुरक्तभीस्तत्र च तस्य माधुर्यं प्रभावमय
निजपालनं च मुहुः स्मृत्वा प्रेमविवशो तौ श्रू पूर्णकंठस्तूष्णीं बभूव ३७ पुत्रस्येति सुरोत्तमावित्यादि श्रवणेपि पुत्रभावे एवावेशाद्उक्तः चरितानि वीर्याणि चात्सोदर्यादीनि अश्रूणि अवेसमताद्धिससर्जैव केवलं न तु प्रष्टुं वक्तुं शशा
केत्यर्थः एवं नंदो द्विशेषदक्तः स्तुतस्तनाच्छज्ञातेति सद्योजातबालइवस्नेहाव्यंजितः ३८ तयोः कीदृशप्रेमाणो तौ स्यातामिति पथिचिंत्यमानयोर्नंदयशोदयोरेव मनुनिरंतररागतु क्ष्मातिशयमयं स्नेहं तं च परमं तमपि पूर्णब्रह्मणि कृ
ष्णव्यग्रेनस्यामहिमान्य स्फूर्त्यादिदिनएव स्यात् यतोन्वर्थकोद्धवनामाय मिति ज्ञात्वैव तं भगवान् प्रस्थापितं इति भावः ३९ तत्रप्रथमं भगवन्महिमवर्णनद्वारैव प्रोत्साहयतो सांत्वयितुमिति शेषः तत्त्वाहो मेभाग्यं यदेतद्दर्शनं जातमिति मुदाविष्कारेण ननु तदुःखदद्धादुःखांशाविष्कारेण तथात्वेसांत्वनासंभवात् अतएवायं तत्प्रेमवैय्य
वाह युवामिति द्वाभ्यां इह जगति सर्वेषामेव देहिनां मध्ये श्लाघ्यानां शावाद्या श्लाघ्यतरा वसुदेवाद्यास्तेषामपि श्लाघ्यतमौ युवां हे मानद श्रीकृष्णभक्तौ नीस्व इदृक्तां तेन मान्यता वर्धन यं यां नारायणमहस्रष्टृप्रभृतिनरसमूहस्याश्रयेरवि
लभ्रेष्टे इदृशी पुत्रभावमयी तद्धस्यताकारिणी मतिर्युवाभ्यां कृता स्ति ४० अखिलगुरुत्वं नारायणं चाह एताविति हिएव रामो मुकुंदश्चेस्येतावेव विश्वस्य चादवतारादीनां बीजयोनि निमित्तोपादानरूपो लोके बीजयोनित्वे प्रसिद्धो पुरुष
प्रधानश्चेत्येतावपि इमावेव यतः पुराणावनादिसिद्धौ किंच भूते पु जीवेषु अन्वीय अंतर्यामितया प्रविश्य विलक्षणस्यानिर्धर्मकस्य निर्गुणब्रह्मज्ञानस्यापि इशातेतत्प्रकाशनाप्रकाशनयोः समर्थौ भवतः मदीयं महिमानं च परब्र
ह्मत्वं निश्चितं वेस्यस्य नुग्रहीतं मे इत्युक्तेः इशातेइत्यत्र संधिरार्षः इमाविति पुनरुक्तिरिमावेवेदृशाविति निर्धारणाय ४१ तावताचेतः प्रसत्तिमदृष्ट्वा पुनस्तदेवकृमुख्येन विवृणोति युग्मकेन यस्मिन्निति एकत्वं द्वयोरभेदाभिप्रायेण
जनः कश्चित् अपि जीवः मरणसमयेपि क्षणमपि अशुद्धमपि मनः संकल्पात्मकमपि निवेस्य कथं चिल्लब्ध्वा एवं कृत्वा सद्य एव कर्मवासनां त्यक्त्वा ब्रह्ममयः स्वरूपज्ञानवानर्कवर्णः शुचिर्मूर्तिः सन् आदित्यवर्णं तमसः परस्ता
दिति श्रुतेः परां गति तत्सदयाति ४२ अखिलस्यात्मा च हेतुश्च तस्मिन् यतो नारायणे ननु सः चतुर्भुजस्तत्राह सर्वकारणं यत्तत्त्वं तदेव मर्त्याकारामूर्तिर्यस्य तस्मिन्नराकृतिब्रह्मणि हे महात्मनौ इदृशं भावं नितरां वसुदेवादि
तोप्यधिकं विधत्तां तयोर्युवयोः कतमत्स्वकृत्यमवशिष्टं सर्वं पूर्णमेव किंतु केवलं युष्मत्संतोषणं तस्यैव कृत्यमवशिष्यतइति स्वशाब्दार्थः युवयोस्त्विति पाठे विसएवार्थः ४३ एवं महिमवर्णनेप्यजातशांति प्रस्तुता
त्यातौ वीत्याह आगमीष्यतीति अच्युतसत्यसंकल्पादिना तन्नामा प्रियविधाने हेतुः पित्रोः यथायुवयोस्तत्र पुत्रभावस्तथैव तेनापि पितृत्वेनाभिमतयोः यतो भगवानपि भक्तानां पतिः अभीष्टसुखसंपादकः ४४ ननुत
स्यात्रागमनं न प्रत्येमि तत्राह हत्वेति सातीन्वादद्रष्टुमेष्याम इत्यादि यदाह तत्सत्यं करोति करिष्यति यद्वा ननु तत्रस्थ एव तस्मिन्नतरेणाबांत त्राह हत्वेति पितर्युवाभ्यामित्यादि यदाह तत्तस्मादास्माभिः दृष्टः सन् सत्यं शपथमि
दानीमपि करोतीत्यर्थः ४५ आगमीष्यतीति विलंबमसहमानो प्रत्याह माखिद्यतमिति हे महाभागाविति पुत्रागमनवार्तयातस्याअपिस्वसन्मुखं इदृक्षेपं दृष्ट्वा अधुना द्वयोः संबोधनं भूतानामंतर्हृदि परात्मज्योतिरिवका
ष्टे चाग्निर्ज्योतिरिवां प्रकटः सन् युवयोर्निकटे आस्ते स युवां पश्यत्येव तं च युवामपि मनसा पश्यथ एव चक्षुषापि शीघ्रं द्रक्ष्यथ इति भावः ४६ ननु पुरे प्रियजनत्वाभावात् कथं सोत्रागच्छेत् कथं च तं द्रक्ष्याम इत्याशंक्य
जीवानां प्रियादयः कर्मताश्चतुर्दशाभावाः स्युर्नेत्यस्य तद्वदमीसतीत्याह नहीति त्रिकेण पांडित्यादिगुणहेतो रुत्तमस्तु स्योन कुबुद्धित्वादिदोषान्निद्योन गुणदोषाभावाद्रा सर्वतः समदृष्टेस्योन प्रियाद्याभावेहेतु

अभिमानशून्यस्य समानस्याविकारस्येति आद्यो वा समुच्चये अन्येसं भावनायामपि तन्निरासे अधमः संभावितोपि नेत्यादित्यर्थः ३७ आनुकूल्योत्पादनहेतुका माता पिता सुतादयो न विवाहहेतुका भार्या न उपकाराभपका
रतः आत्मीयपरो न देही भिन्नो जन्मो देहो न विलक्षणदेहस्वीकारात् जन्मैव न कुतो देहः एवं चेति पाठांतरं ३८ शृणु भाशु भद्रो स्यादर्ककर्म न चेति सोपि सदसन्मिश्रयोनिषु देवतिर्यङ्मनुष्यादिषु तदनुकारीरूपेण प्रकटी
भूयसाधूनां सर्वतो रक्षणाय योग्यो भवति ननु संकल्पमात्रेण रक्षणं किं न करोतीति तत्राह क्रीडार्थः लोकवत्तु लीलाकैवल्यमिति न्यायेन क्रीडाप्रयोजनः अयं भावः साधवो हृदयं मह्यं साधूनां हृदयं त्वहं मदन्यत्ते न जा
नंति नाहं तेभ्यो मनागपि अहं सच्चमम प्रियः भक्तानां विनोदार्थं करोमि विविधाः क्रिया इत्याद्युसारात् भक्तसुखमयस्वसुखाय क्रीडन् येयथा मां प्रपद्यंत इति न्यायेन भगवानप्रियादिरहितोपि यथावसरं प्रियादि भावमपि
प्राप्नोति संप्रति च वसुदेवदेवक्यादितोपि युष्मदीयशुद्धवात्सल्यमयप्रेमातिशयात् ततोप्यधिकतया युवां रिरक्षिषुर्युष्मत्प्रेमाकृष्टो युष्मत्सुत्रमेवात्मानं बहु मन्वानो व्रजमागमिष्यत्येवेति ३९ अतः क्रीडापरत्वात् क्रीडयेव
प्राकृतसत्त्वादीन् स्वस्मिन्ननुषक्तिकरोतीत्याह सत्त्वमिति निर्गुणः सत्त्वादिगुणसंसर्गरहितोपि क्रीडन् क्रीडाहेतोः सत्त्वरजस्तम इति गुणानपि भजते स्वीकरोति न च तैराविष्टो भवतीत्याह गुणैः स्वरूपभूतैः ज्ञानादिभिरती
तस्त्वान्तिक्रा[...] तस्तदनाविष्ट इत्यर्थः अत एवाजः जन्मादिविकारशून्यः क्रीडामाह सृजतीत्यादि ४० कथं तर्हि तद्गुणविष्ट इव प्रतीयते तत्राह यथेति भ्रमरिका निजभ्रमणं तत्संस्कारवत्या दृष्ट्या मही भ्राम्यतीव यथा
प्रतीयते एथा च च तस्य कर्तरि सती तत्र चित्ते हं धियाचित्तमेवाहमिति बुध्या आत्मा शुद्धोपि स्वयं कर्तेव स्मृतः जीवैः स्मार्यते प्रतीयत इत्यर्थः तथेश्वरोपि स्वेच्छया द्याविष्टः प्रतीयत इति शेषः ४१ अतः प्रेमवत्त्वेनैव युवयोः
पुत्रोसावितिकथं चिदन्यत्र गतोप्यागमिष्यत्येव लौकिकरीत्या तु तस्मिन्पुत्रत्वं युवाभ्यां न मंतव्यं यतः सर्वात्मकत्वान्न केवलं युवयोरेव पुत्रः किंतु सर्वेषां तत्रापि न पुत्र एवापि तु पित्रादिरपीत्याह युवयोरिति द्वाभ्यां
अयं मद्धिधस्येश्वरः अथवा तस्मात्प्रेमविशेषस्यैव तस्मिन्पुत्रत्वापादकत्वात् युवयोरेवायमात्मजः नैव सर्वेषामात्मजः हि यतः सर्वेषां परमात्मा जनयिता धारयिता कर्मफलदाता चेत्येवंरूपः ४२ तत्र हेतुभूतं सर्वा
त्मकत्वमेव दर्शयति दृष्टमिति दृष्टश्रुतादि सर्वं वस्तु अच्युतात् हिना तद्भिन्नं न तराव वाच्यं तत्तो नैव वक्तव्यमित्यर्थः यतः सर्वपरमार्थभूतः स एव परमात्मभूत इत्यपि पाठः ४३ नंदस्य एवं पुत्रागमनमात्रता
त्पर्यकतया ब्रुवतः उद्धवस्य तत्सांत्वनमात्रतात्पर्यप्रकारतया ब्रुवतः लक्षप्रयोगेण मुहुस्तत्पोक्तिर्व्यज्यते सा तयोः संलापवती निशैव व्यतीता न च नंदस्य शोको व्यतीतो नाप्युद्धवस्य सांत्वनवाक्प्रयोगो विरत इत्य
र्थः कृष्णानुचरस्येति तच्छिक्षिता शेषवाक्चातुर्यस्यापीति भावः ततः प्रातः कृत्यार्थमुद्धवस्य बहिर्गत इति कृतान्हिक इति वक्ष्यमाणत्वात् गोप्य इति इमा विश्रंभप्रधानप्रेमवत्यः निरूप्य प्रज्वाल्य वास्तु
न् देहल्यादीन् अलंकृत्य ४४ दीपैर्हेतुभिर्दीप्तैः रतिप्रकाशैः कांच्यादिस्थितमणिभिर्विरेजुः यद्वा दीपादपि दीप्तैरधिकप्रकाशैर्विरेजुः दीपप्रज्वालनं तु मंगलार्थमेव विराजने हेतुत्वं तेषां राशि रज्जुर्विकर्षत्सु भु
जेषु कंकणानां स्रजो यासां चलंतो नितंबाः स्तनहाराश्च यासां कुंडलत्विषा द्युतः स्फुरंतः त्विषन्तीं कपोला यासां अरुणानि कुंकुमानि यत्र तान्याननानि यासां ताश्च ताश्च ४५ श्रीकृष्णवेशयुक्तानामपि तासां व्रज
व्यवहाररक्षाय भगवता वशोषितसंस्कारात् दधिमंथनावेशात्तत्र च गानं शोभादर्शयन् तन्मंगलमाह उदिति अरविंदेति गाने सौंदर्यप्रधानं व्यंग्यं अंगनानां बहुत्वात्तया ध्वनेर्व्याप्तकता तत्र च यद्धध्वाक्षणदे
श्वराश्वैः मिश्रणं अतो दिवस्पर्शी कंगतः अमंगलं भक्तिराहित्यं इहपरत्र दुःखकर्मवासना श्रुतिर्येन निरस्यते ४६ भगवतीतिकृष्णवार्ता श्रवणभाग्यवद्गृहः प्रवर्तकत्वं व्यंग्यं व्रजौकसो नरा नार्यश्च स दा व्रजस्थित्या त
द्धथापरिचयो व्यंग्यः सौवर्णत्वेनान्यरथवैलक्षण्यं अतः कस्येत्यन्नवन् चोनुक्तसमुच्चये ४७ अथोत्कंठाप्रधानाः काश्चिदाहुः अक्रूर इति सार्धेन कृष्ण एव नीतो नास्माभिरित्यादिः कमललोचन इति सौंदर्यातिशयस्तेन
स्वस्मिंस्तापातिशयस्तस्य तापहारित्वं व्यंग्यं तादृशस्य दृक् विषयाद्बहिरपि नयनमयुक्तं किमुत व्रजाद्बहिः किमुततरां मधुपुरीमिति भावः ४८ तत्कार्यं संभावयंति किमिति स्वर्धेन साधितेन कार्येण पूर्णप्रतस्य पश्चाद्दे
व्येनान्यथात्वं प्राप्तस्य पाठांतरे प्रेतस्यापि निष्कृतौ मांत्रण्यमस्माभिः कृत्वा साधयिष्यतेति किं नूनमस्मन्नाशैः तत्संभोपिंडान् ददातीत्यर्थः स्त्रीणां तादृशोक्ति श्रवणात्स्वस्वगृहादागतानां सर्वासामेवैवं वदंतीनां परस्पर
वदंतीषु षष्ठितु श्रुत्वा प्यश्रुत वस्तु दुःखचरणात् उद्धवेन तदनादरव्यंजनात् अंगात् लक्षाधिका नांतासां व्रजस्य वर्त्मनि गृहे वा समावेशाम् दृष्ट्वा स्थानविशेषमेकांतमन्विष्य गत इत्यर्थः रहस्यपृष्ठं नु प्रविष्टमासन इति
वक्ष्यमाणात् ४९ इति श्रीमद्भागवते दशमस्कंधे मध्यगः षट्चत्वारिंशोध्यायस्तोषिणीसारसंग्रहे १ इति भागवते षट्चत्वारिंशोध्यायः ४६ उद्धवः कृष्णसंदेशोक्तीनां दिव्यविधार्थकैः गोपिकाः सो
त्वयिलाथ स्तुत्वेनत्वाय योपुरी १ तमितियुग्मकं रहसीत्यस्य तृतीयपद्यस्य स्यात्राप्यन्वयः व्रजे श्रेष्ठत्वेन प्रसिद्धा भगवत्प्रेयसीरूपाः स्त्रियो रहसि स्थितं तमुद्धवं वीक्ष्य तं च कृष्णसमानाकारवेषादिनाद्दनु
चरं वीक्ष्य तत्र हेतुः प्रलंबेत्यादि व्रजेपि श्रीकृष्णतुल्यरूपा एनानुचरा इत्यनुमाना तदनुचरत्वेन वितर्क्येत्यर्थः २ अतः स्मविस्मिताः अन्यत्रापि कथमेतादृशोस्तीति शुचिस्मिता इति पाठोपि हास्ये हेतु
र्विस्मय एव ज्ञेयः तदाहुः सुदरं दर्शनं रूपं यस्य अच्युतवदच्युतस्यैव नानाविषेवस्त्रादिभूषणं कुंडलादि च यस्य सोयं कः कुतो वागतः कस्य वेति न दंत्यस्तत्परि व्रभुः न च संकुचिताः यत उत्सुकाः अतो विचार
शून्या इति भावः किंच श्रीकृष्णपदपद्ममेवाश्रयो यस्य यद्वा तत्पदांबुजयोः संवाहनाद्यर्थमाश्रयमुपधीनीभूतं तदात्मीयं तानि र्धार्यतीति भावः २ तं तच्छ्रवनमिति तमुद्धवं रहसि भगवत्प्रेयसीभिन्ना गोचरे स्थि
ते रमापतेः संदेशहरं विज्ञाय स्वयमेव एजोंगत्वेन दत्ते आसने उपविष्टं संतं विनयेन नम्रशिरसः सस्यः पुनश्च व्रीडा च हासः प्रसादश्च तद्युतावलोकनं कुशलप्रश्नादि प्रियवाक्यं च तदाद्यैः पाद्याद्युपचारैः
कृतसत्कृतं संतं मदुद्धवं त्रिक्रमेणान्वयः तत्र रमापतेः संदेशहरत्वेन निश्चयतादृशरहः स्थानागमनोपवेशनादिनान्वयः ३ तथा निश्चये पिदुःखेन स्वसंबंधमपलपंत्य आहुः जानीम इति तादृशाप
रिछदतया व्रजजने समीपागच्छतं त्वां यदुपतेः पार्षदं सेवकं जानीमः अतस्तत्प्रश्नेनालमिति भावः आगमने हेतुः भर्त्रा तव स्वामिना प्रेषित इति स्वयमनागम्यतत्प्रेषणात् तदनादरेपि लोकवाच्यता

भितस्य भर्तुराज्ञा बलात्तवान्नागमनमिति भावः यदुपतेरिति स्वेषु तदनादरे हेतुर्व्यंजकं तच्च पित्रोः प्रियं कर्तुं न स्वप्रेम्णेति च प्रयोजनमपि ज्ञानीम इत्यर्थः ४ अन्यथा तो विना गोव्रजे गोमात्रधनगोपा नासे स्मरणयोग्यम
पि न पस्यामः किमुत प्रियचीकीर्षया त्वां प्रेषयितुं किंतु बंधूनां बंधुषु पित्रादिषु स्नेहानुबंधः सन्यासि ~ नोपि दुःस्त्यजो विस्मर्तुमशक्यस्तेन तु सहसा त्यक्तमिति ततोपि कठिनः स इति भावः ५ अन्येषु तु मैत्री अर्थकृता
प्रार्थनीयार्थो पाधिकी न बंधुषु स्वभाविकी सापि यावानर्थस्तावदेव मैत्र्यास्त्वनुकरणमात्रं अस्मासु तु न च बंधूनां किंतु मिथुनता संबंधः स चास्थिर इति दृष्टांतव्याजेनाहुः पुंभिरिति दृष्टांतस्य दृष्टांतः क्रमान्स्त्रि
ति श्लेषेण शोभनमनस्वीति न तासां तत्र दोषः किंतु लोलत्वात् षट्पदानामेवेति भावः ६ मिथुनसंबंधस्य धर्मप्रधान एव स्थिरो न त्वन्यधर्ममय इत्यर्थान्तरन्यासव्याजेनाहुः निस्वमिति युग्मकेन अकल्यं पाल्य
नासमर्थे ७ रतामनुरतां अतः प्रोषित्रियं जारा इति पुरुषेषु जारपदं दृष्टं तेन स्त्रीषु पुंश्चल्यादिपदं तस्यात्र अयं भावः वयमुत्पतित एव तस्मिन् स्वानुरागं निणश्यतमेव वृद्धं तव त्वयः स पुनरस्मान् जारायमाण एव जात
इति जारा इति स्त्रियमिति बहुत्वैकत्वाभ्यां जारपरायाः स्त्रिया बहुजारत्वमपि स्यादिति स्वेषां तेता वैलक्षण्यं व्यज्यते धनादिरिति गोगीताः सर्वे पुपाचय इति न चिरस्नेहनिर्वाहका इति भावः ८ इति एव मुक्तिप्रकारेण गो
प्रति
प्यस्त्यक्तलौकिका अनाहृतत्वाकसंकोचा बभूवुः हिय स्मात् गोविंदे गोकुलं दे श्लेषेण सर्वेंद्रियव्यापगतानि वागादीनि यासां तत्र कायस्य गतिस्तदर्थकमात्रकर्माचरणात्कायस्य विस्मरणात् काकस्मिन् सति निजप्रेष्ठदूतेत
त्रोप्युद्धवे समायाते सति ९ ततश्च गतलज्जाः सत्यः कैशोरबाल्ययोर्यानि प्रियकर्माणि तानि मुहुः स्मृत्वा गायंत्यो बभूवुः तत्र कैशोरस्य स्मृतिर्निजरसोद्दीपकत्वेन बाल्यस्य त्वाबाल्यस्नेहेन १० तासु कस्याश्चित् तन्मनिं
दिव्योन्मादमयं चित्रजल्पं वक्तुमाह काचिदिति द्वि कापि श्रेष्ठा श्लेषेण कंश्रीकृष्णप्रेमस्फुरखमाचिनोति सा राधिकेत्यर्थः पीतपरागपिंगश्मश्रुं कंचिन्मधुकरं दृष्ट्वा तं च प्रियप्रास्थापितं दूतं कल्पयित्वेदं वक्ष्यमाणं मानभंगीमयं चि
त्रजल्पाख्यं पद्यदशकमब्रवीत् ननु विरहे कुतो मानस्तत्राह स्वप्रस्फूर्त्यां यः प्रियसंगस्तमेव ध्यायंती साक्षात्तदीयतया स्मरंती तत्र चान्यनायिकासंगप्रियं कल्पयित्वेत्यपि ज्ञेयं अन्यथा मानासंभवात् सपत्न्याः कुचवि
लुलितेति वक्ष्यमाणाच्च ११ राधायाः श्रीकृष्णप्रेमपयोधरेरतीव वेल्लस्य प्रियदूतवद्दर्शनमात्रादुद्भूतमहारिभंगभरेः १ गर्वासूयेर्ष्याद्येर्मधुरस्य विचित्रजल्पमयनिनदः गंभीरोजयति तरां यस्यास्तो भंगवतः प्रि
यां वंदे २ तत्र मानिनीत्वमाह मधुपेति श्लेषेण हे मद्यप मद्यपः प्रायोन्यं न वंचयति ततोप्यधिकस्त्वाह कितवः शठः कृष्णः न पारयेहं निरवद्यसंयुज्याभिसाधु का ध्यसमत्यागात् तस्य बंधो तद्वर्णादिसाम्यात्
यद्वा त्वमधुपः समधुपतिरिति नामसाम्यात् मद्यपकितवयोः प्रायः सख्यदर्शनेन कर्मसाम्याच्च तत्र कितवेत्यस्य व्याविष्कारः बंधकपुष्पत्वां स्यानखेषु पतंतं भृंगं प्रसादनाय पादौ गृह्णंतं मत्वाह अंघ्रिमास्पृ
शेति मानधनावयं न त्वद्विधवाक्यप्रसादना इति किमंघ्रिस्पर्शेनेति गर्वः स्पर्शनिषेधे हेतुर्विशेषतश्च श्रूण्णत्वोहित्येकारणात्प्रेक्ष्याह सपत्न्या इदानीं यया रमते तस्याः कुचाभ्यां मर्दिताया श्रीकृष्णवनमा
लातस्याः कुंकुमं येषु तैः श्मश्रुभिरुपलक्षितः श्मश्रुभिः कृत्वा मास्पृशेति वा नइति बहुत्वेस्ववर्गापेक्षया गर्वेणवा तदेवं याभिर्वयं विस्मारिता दूरं त्याजि ताश्च तासामेव मानिनीनां प्रसादं वहतु इतीर्ष्या बहुत्वं
मेकस्यां प्रसादितायामन्यस्यां मानस्तस्यामप्यन्यस्यामित्येवं बहुत्वात् मधुपतिरित्यैश्वर्येण तत्र योग्यता श्लेषेण मध्यस्वामीत्यविचारः सच प्रसादः स्वश्लाघ्यतयातनमन्यमानोपि वैपरीत्या यस्याः दूतो
ह यदुसदस्यपि उपहास्य दूतां गमिष्यंतं कथमसौलौकेव्यक्तः स्यात्तत्राह यस्य दूतोपि त्वमीदृक् व्यक्तं तदीयस्मरत चिन्हधारितः १२ तस्यैकतत्वं दर्शयंती मानेहेतुमाह सकृदिति मधुपतिरिति पूर्वस्मात्कतुपदा
नुषंगः तयात्वत्रेष्ठोद्रेकेण तन्नाम न गृहीतं असौमधुपतिः स्वामसाधारणीं स्वेन दानं विना दुष्प्रापामधरसुधामस्मान्साध्वीः सकृत्पाययित्वा जलादेव पानमाकारयित्वा सद्यस्तत्याज कीदृशी मोहिनी बुद्धिं त्वं त्वरा
यित्वा दुरंतलालसासंपादिनी तथा सुधापायनेदृष्टांतमाभाव्य व्यंजयती त्यागमात्रेतमाह भवादृक्सुमनस इवेति त्वज्जातीयां मधुपस्तत्र तत्रान्यरसप्राप्त्या बुभुक्षाऽभावात् स्वभावात्तास्ताः सुमनसो जीवीकार्थं त्यजतु
मधुपतस्तस्य सुधामयाधरतयान्यरसानपेक्षत्वात्सुमनसामस्माकं त्यागेन दुःखदानमयुक्तमेवेतिच या तस्मिन् कितवे बंधुतानकार्येति भावः नवा दृष्टिस्यैयोपमेयेत्यन्वयः परितो भ्रमणमधुररटनसहत्वं बं
नादिनासोपि नवादृशाय एवेत्यर्थः ननु श्रयत इंदिरस्सकरी त्यापदाजितं तज्जतत्वं कथं निंदसि तत्राह परीति त्वल्लक्ष्मीस्तत्पादपद्मनुसेवते तत्त्वविघ्नः क्षणंविभाव्य अहोज्ञातमयत्याह अपीति संभावनायां ब
तखेदे हि प्रसिद्धो उत्तमश्लोकस्य एव यतस्य जल्पोः प्रत्तोत्तनभाषितानीतेः यद्योत्तमश्लोकानामुक्तिभिर्हृत चेताः सती परिचरतीति ज्ञातमित्यर्थः एवं त्वत्क्षम्या अत्तत्वस्वस्याविदत्त्वं व्यंजितं अत्रासहसुरसान
प्युत्कंठयाविस्मृत्य सवदेवस्थिते १३ सरोषं तयावृत्तेन पाद[illegible] विक्षेपण ततोपसृत्य पुरतो रुवंतं भृंगमस्मत्प्रसादनाय श्रीकृष्णं गायत्यसाविति मत्वाह किमिति षडंघ्रे जातिस्वभावात् गानशीलत्वं यदि गायसि
तदिह दुःखितेव्रजे किमितिगायसि तत्रापि बहु किं गायसि तत्रापि यदूनामधिपतिं किं गायसि संप्रतितत्संबंधाल्या यादवा एनतः वेष्टविधास्यति न तत्स्यक्ता अत्र त्यागोपा इति तत्रैव स्वल्पबहु चागातव्यमिति भा
वः षडंघ्रेइत्यस्य पश्च ८ श्रुतुष्यात् त्वं षट्पद इति सार्धपशुत्वेन परमात्ततया गायसि नविचारादिति व्यंग्यं ननु व्रजेपि तु स्य सर्वाधिकः प्रेमा तत्राह पुराणं बहुशो नुभूतं सकपटमेव तत्प्रेमेति भावः यद्वा
चिरंतन संबंधमिस्यर्थः पूर्वमेव व्रजेतदासीन्नाधुनेति भावः यद्वा पुरेव र्णव्रजस्य सुखरूपं अधुना तु कृषिधात्वर्थसत्तारूपेण वा वशिष्टं न तु कृष्णपदार्थद्विरूपेणेत्यर्थः किंच कुरुवा व्रजेपिमा
ने अस्माकमग्रतः किं गायसि तत्रापि बहु किमित्यादि अग्रहाणां तत्कृतास्मत्यागमारभ्यैव त्यक्त गृहाणां अतस्तत्रत्यातस्त्रेयस्य एव गानस्थानमित्याह विजयेति सर्वं वशीकुरोति स विजयः श्रीकृ
ष्णः स एव सखा त्वद्बंधुस्तस्य सखीनामेवाग्रतस्तत्प्रसंगोस्मत्यागादिपुरस्त्रीवशीकारांतो विजयोगीयतां ततस्ताः इष्टास्तेन संमानिताः यद्वा स्मदुरवस्थावर्णनपूर्वकं तासांसोत्ताग्यवर्णनेन त्वयास्मै
मानिताः सत्यस्त्वेषं विशेषतो दास्यंतीत्यर्थः यतः स्तनालिंगनादिना क्षपिता कुचरुक् यासां ताः खंडितकामपीडा इत्यर्थः इति सकटाक्षमुपहासः १४ भोमातर्भवबांच स्वामनुस्मृत्य कामविकल्ले

रामं
७१

नत्वत्प्रसादनाय प्रेषितोहमित्याशंक्यसासूयं तत्प्रभावानुवादं कृत्वा सेर्ष्येण गर्वेण स्वेषां तद्वरत्वं व्यंजयंती सोत्प्रासमाह दिवीति ऊर्ध्वमध्याधोलोकत्रये याः स्त्रियः ताः कानाम दुरापानकाश्चन य
त्र कृष्णमिष्यते तत्रस्फलभा एवसर्वाः तद्विस्मयव्ययं तस्येत्यर्थः षष्ठी चेयं कर्तरि शेषे यतः कपटेन रुचिरेण हासेन कृ विन्यस्तो यस्य तस्य लक्ष्मीस्तु तत्र तत्रैवानुगच्छतीचरणरजउपास्ते तत्र वयं
का इति सस्मितं सशिरःकंपं वस्तुतो वयमेव स्वस्थाने मत्यजंतस्ततोप्युत्तमा इत्यतारतम्यत्तस्य तस्य प्रसादने नाप्यलमिति भावः किंच तस्योत्तमश्लोकशब्दोपि कृपणपक्षे कृपण एव तस्योत्तमश्लो
कत्वं जल्पंति न तु माहस्यइत्यर्थः इति अक्षेपः ११ कमलबुध्या पुनरुपसृत्य पादमूले रुवंतं तं वीक्ष्य तो देवी मारोपकार्षेः सिरसा ते पादौ नमामि सकृदपि मे विज्ञप्तिं शृण्विति याचमानं मत्वाह
विसृजेति शिरसि पादं चाटुकारैः सहत्यज नोनमनंनेव चाटुकारानपि कुर्वित्यर्थः तथापि नमंतं मत्वाह वेद्मीति मुकुंदादस्माकं गृहादित्यागं प्रदा तस्माद भ्येत्य ततः शिक्षित्वा दौत्ये दूतकर्मभिरे
नुनयचतुरस्य ते सर्वमहं वेद्मि त्वं लक्ष्म्यादिकानज्ञानातु अहं तु विचक्षणाज्ञानाम्येवेत्यर्थः दूत्यैरिति पाठश्राव्यः नोस्वामिनी तेन प्रेष्ठेन सह विग्रहेणालं सकृदपराधं क्षात्वा संधिः कर्तुं युक्तस्तत्रा
ह सकृतइति कृदमार्थं विसृष्टा अपत्यानि पतयश्च अन्ये गृहाद्याश्च सर्वे लोका ज्ञनाः स्वर्गाद्यो वा याभिस्ताः नकृतेउपकृते चेतो यस्य सत्व कृतज्ञो या व्यसृजत् यद्वा स्वकृते आत्मार्थे असमान्विसृष्टा
पत्यादिका अकृतज्ञ कापत्र इताश्च प्राप्तास्तु सतीर्व्यसृजत् नु अहो इदृशोस्मिन्नृकठोरे शठे किं संधेयं संधातुमर्हं अपि तु नैवेत्यर्थः १२ किंच न केवलं तस्य तादृशाचेष्टितादुद्विजेमि किंतु श्यामत्वस्वभा
वादपीति दर्शयितुमर्हं सितवर्णाः पुमांसः प्रायो मलिनस्वभावा एवेति श्रीरामादिनिदर्शनेन व्यंजयंती वर्णस्वभावादिसाम्येन रामाद्यभेदं बुध्याह मृगयुरिति य एको सितो दाशरथि रामरूपी सोपि
मृगयुर्व्याध इव गुप्तो निर्दयश्च सन् कपींद्रं वालिनमविध्यत् अनेन क्ष्यस्यापि लुब्धस्य लक्षणक्रियेव छोरिव धर्मः स्वभावोस्य अकार प्रश्लेषे तद्धर्मरहितोपि इति व्याख्या कठिन इत्यर्थः तथा स्त्रियं तत्रापि का
मया आगतो कामयमाना विश्रवः पुत्री शूर्पनखां विरूपां छिन्नकर्णनासामकृत अस्त्वास क्षत्रियस्तया क्रूरस्वभावः योन्यासितो वामनरूपि स ब्राह्मणतया ब्रह्मचारी तया च शंसादियोग्यापि बलो
धर्मात्मानमपि बलिं तस्य पूजां मत्वा स्वीकृत्यापि विष्टपात् त्रैलोक्यराज्याद धः पाताले क्षिपत् वेष्टयेत् ध्वांक्षवद्य इति पाठे बबंध काको यथा बलिं जग्ध्वा न्यान्काकानाहूय वेष्टयत्यावृणोति तथा
कं तद्वत् तस्मात्तस्यासितमात्रस्य सख्यैर्बुद्धिविधेरपत्वं असितेतितु षष्ठी के पदं यद्यपि रामादिरूपो यं न तथापि तद्वर्णस्वभावसाम्येन ताद्रूप्यस्फूर्त्या स्यापि सख्यैरलमिति भावः कथं तर्हि रामादीनां क
थारूपार्थो मुनिभिरपि न त्यज्यते तत्राह दुस्त्यजइति कोयं मोहनस्वभाव इति न विद्म इति भावः यद्वा न तु नाख्येयं परदूषणमित्याशंक्यान्यायकारितां दृष्ट्वा रोषावेशेन तद्धर्मी स्थातुं न शक्यत इत्याह तदूष
णकथारूपार्थो दुस्त्यजइति १३ तस्य निष्ठुरता किं वाच्या तच्चरितलवमपि शृण्वतो ति निष्ठुरा इत्याह यदीति यस्यानुचरितं भक्तानुकूलं कर्मैव लीला स्वच्छंदक्रीडा तदेव कर्णपीयूषं तस्यापि विप्रुट्
कणिका तस्या अपि सकृददने दूरात्कथंचिदास्वादने तेन निरस्तानि द्वंद्वधर्मा भिक्षुनीभूताचाराः रत्यादयः शीतोष्णादि भोगा वा येस्तथा भूताः संतो विहंगा हंसादिपक्षिणोपि तत्रापि बहव एन सपदि
लीलाश्रवणानंतरमेव गृहस्थतातजननीभार्यादिकुटुंबदीनमपि त्यक्त्वा स्वयमपि दीना बिना द्या गृहादि स्कखं [illegible] ध्वसंत इह वृंदावने समागत्य भिक्षुचर्या प्राणवृत्तिमात्रं चरंति धीरा इति पाठकु
टुंबदुःखेनाक्षुभिताः यद्वा तर्हि कथं मा गातुं निषेधसि तत्राह यदिति इह बहवो विहंगास्वादृशास्तत्मानशीलाः संतो भिक्षाचर्यां चरंति तत्र को वराको भवान् ते च व्रजपतिलीलामेव गायंतोपि न रो
चंते यदुपतिं गायंतं भवान् कथं तरां रोचतां नामेति भावः शेषं प्राग्वत् स्वामिनस्तु स्यात्कहं हद्धर्मा अत एव बाविनष्टा इति कर्मधारयः दीनाइवाकिंचना हंसाइवविवेकचतुराः पारमहंस्यं चरंतीति
स्कतिपक्षार्थमाह १४ ननु देवी प्रथमतः प्रियसंदेशं शृणु ततो विचार्य तुष्णीं वा कुप्यतां वा तत्राह वयमिति वयं जिह्मस्य कितवस्य त्वद्वधोर वृद्ध्यास्तं तं न पारये हमित्यादिके सत्यमिव त्वेदादिसत्य
वाक्यतुल्यमिति श्रद्दधाना निश्चिन्वाना असकृत्तन्नखस्पर्शेन तीव्रस्मरपीडायुताः सत्यएतत् इदं दुःखमेव न तु कदापि कामसुखं दृष्टं इह स्त्रिमः यथा हरिण्यः कुलिकस्य व्याधस्य रुतं गीतं
सत्यमिवानुकूलमेवेति मन्यमानाः तन्नखतुल्यव्याधबाणस्पर्शेनात्स्मररुक्तुल्यरुजः सत्य एतत् अस्मद्दुःखतुल्यं दुःखं प्राप्नुवंति न हेतू उत्तयत्र हेतुः अज्ञा इति पशुस्त्रीणां तासां कथं कृ
ष्णपत्निभिर्युष्माभिः साम्यमित्याशंक्य तासां श्लाघार्थं श्लेषेण स्वसाम्यमाह कृष्णवध्वः कृष्णसारप्रिया इत्यर्थः ततो हे उपमंत्रिन् त्वद्धीस्थितस्या स्योक्त्वार्यतां अमित्रिणः प्रति निषेधे प्रिय
संदेशादन्यवार्ताच्यतां यद्वा हे हास्यप्रधान तं उविद्यापंडित उपहासवार्ता तो न्यवार्तोच्यतां १५ इति सहस्तक्षेपं निवारिते दृष्ट्वय गोचरं प्रदेशं गते त्वं रोनुतापेनापरतमानादिवेगासती
हस्तपादपद्मादि गसोगं ध्यत्तो भेन पुनरागतं ते प्रेयसा पुनः प्रेषितं मत्वाह प्रियसखेति हे प्रियस्य सखे प्रेयसा श्रीकृष्णेन पुनः प्रेषितः अतः पुनरागतो सि किं संमतित्वक्षणेन मो नेन पु
नः प्रेषणं निश्चित्याह तर्हि अंग हे सौम्य [illegible] मे मानानीयः पूज्योसि अतो भवान्किमनुरुंधे प्राप्तुमिच्छति न दुस्त्यय युष्माकं मथुरागमनमेव वृणोमीत्याशंक्य तत्र स युक्तिकं सकाकुप्रश्नमाह
ह नयसीति दुस्त्यजं द्वंद्वं तत्र त्यनारीभिर्मिथुनीभावायनतस्य त्वद्बंधोः पार्श्वं कथं नयसि ननु भवत्सु मनेसर्वास्ता धिकृता [illegible] सत्यमस्मत्पुरतः कास्ता वराकाः किंतु तेनसह वैवतोगतात्लक्ष्मी
स्तं रमयतीति सेर्ष्यमाह सा तस्य वक्षः श्रीः कैस्करवं यथास्यात्तथा रस्यास्ते वसति इदं लक्ष्मीरेवाम वतंसूर्ति तयोः प्रेक्ष्योक्ते अत्रापि सा स्त्रिरेव न तथाप्यसमहज्ज स्वाभाव्येन न तस्यामादर

७१

भा.ग.द.तो.
७१

कृ
कृष्ण

आसीत् तत्र तु संपत्तिमात्रपुरुषार्थतया तदादर इति कथं तत्र याम इति भावः ततो त्रैव तमानयेति गृहन्यायः एवमौत्सुक्यस्य हाच व्यंजिता २० अहो किं किं नया प्रलपितं प्रष्टव्यं तु न पृष्टमित्यं तेसा
र्जवं सगोत्रीयं स दैन्यं सोत्कंठं सबाष्पधारं पृच्छति अपीति प्रश्ने सच पाद त्रयात्मकवाक्य त्रयेन्वेति व्रतभोदूत तत्रार्यपुत्रः रुद्धव्यत्यास्मरति रित्यर्थः इत्यार्जवं मध्ये पूर्योमास्ते धुन्नेति प्रथमप्र
श्नश्चिरकालं संदेशस्याप्यनागमनात् तथा चान्यत्र गमनाश्रवणेपि इदृशप्रश्नो गांभीर्ये गोपहासंव्यनक्ति ननु तत्र सुखमास्त एवेति च दत्रत्यान् किं स्मरतीत्येवं पूर्वपूर्वत्रात्स्योत्तरोत्तरं पृ
च्छति स्मरतीत्यादि स तत्र बिल्वबमानो व्रजे कजीवातुरार्यपुत्रः पितरौ तद्गृहाश्च बहुत्वे तद्वात्सल्येन बाल्यलीलास्कूच गेहत्वमुपेक्ष्य हे सौम्य बंधून् ज्ञातीनुपनंदादीन् यद्वा सौम्याश्चैत बंधवश्चेति
स्मृतियोग्यता गोपान् श्रीदामादीन् सोस्मत्प्राणनाथः क्वचित्तु स्थानेव सरेवानः कथावार्ताः किं गृणीते स्वमुखेन कथयति बहुवचनं कथानां वैविध्यात् बाहुल्याच्च कथामपि पाठे एकामपीत्यर्थः त
त्र योग्यतामाह किंकरीणां बहुधा कृतसेवानां इति दैन्यं अगरुतोपि स्रग्गंधभुजं स्पृष्टिका दानु धास्यति किंकरी करीष्यतीत्यर्थः आर्यपुत्र इत्यकायपि किंकरीत्वप्रार्थनं दैन्यात् तस्या हृद्गृहमा
र्जनीत्यादिवत् स्मृ... इति कार्पण्यात् कदेत्युत्कंठया तत्राप्यनिश्चयेन वेक्ष्यव्य चेति २१ एवं कदाप्यश्रुतचरं तासां प्रेमवचनं श्रुत्वा अथ प्रेमपयोधितरं गोपज्ञात्यनंतरं सोत्वयितुमिदं वक्ष्यमाणं श्रीकृ
ष्णतस्प्रेममहिममयं तासां श्लाघामयं च वचः साक्षादसंभाष्यमाणे राधां प्राव यन्नन्या गोपीरभाषत २२ तदाह पंचभिः अहो इति आश्चर्ये अहद्वृष्टश्रुतमेतदिति भावः स्मनिश्चये यूयमेव पूर्णाः स
र्वोद्रिक्तः श्रीकृष्णप्रेमाख्यः पंचमपुरुषार्थो यासां तथाभूताः अतो भवत्य एव सर्वलोके पूजिताः यासां संबंधि मनः श्रीकृष्णेउक्त प्रेमकारेण लीनं भूतं २३ तदेव केमुत्येनाह दानेति दानाद्यात्मके र
न्यैश्च सांख्ययोगज्ञानादिभिः श्रेयःसाधनैः कृष्णेपि तैः सद्भिः कृष्णे भक्तिः श्रवणादिरुचिमात्रसाध्यते २४ भवतीनां तु परमप्रेमात्मिका भक्तिः किं भक्ताघ्यालोकानां तत्सिक्षणा तु त्वोकभाग्यमेव भक्त्या
घ्यमित्याह भगवतीति अनुत्तमा सर्वतः श्रेष्ठा महाप्रेमलक्षणा भक्तिः प्रवर्तितालोकेषु प्रचारिता एतद्भद्रं ज्ञातमित्यर्थः २५ भक्तिप्रवर्तनरीतिं स्पष्टयति दिष्ट्येति यत् यस्मात् पुत्रादीन् पुत्रादिमन्या
न् अवास्तवधिया परित्यज्य कृष्णाख्यं नराकृतिं ब्रह्म स्वयमवृणीत वास्तवपतित्वेन रूपी ध्वमेतल्लोकानां भद्रं ज्ञातमिति अर्थः भवतीनामीदृशाचरितं दृष्ट्वा श्रुत्वान्येपि तथा प्रवर्तेरन्निति भावः २६ भ
वतीभिः श्रीकृष्णे सर्वात्मभावः सर्वत्रात्मनो हरेः स्फुरणं येन स परमप्रेमाधिकृतः वर्तमानक्तः वक्रीक्रीयत एवेत्यर्थः अतो हे महाभागाः विरहाविशोयं न भुज्यत एव किंतु ममेदृशप्रेममहिदर्शनानुग्रहो म
र्थमेवायं विरहस्फुरतीति मन्य इत्याह विरहेण कृत्रीनुग्रहः कृत इति २७ एवमाश्वासनां किंचिदनस्वास्थ्यं दृष्ट्वा तत्संदेशेनेव सम्यक्स्वास्थ्यं संभाव्याह श्रूयतामिति ननु किं तेन प्रियस्यापि संदेशेन यथे
नतस्राप्तिर्न तत्राह भवतीनां सुखावहः तत्प्राप्तेर्निश्चयात् एतदर्थमेवात्रागतोस्मीत्याह यमिति अनेनान्यथा गोव्रजेतस्येत्यादेरुत्तरं रहस्कर इत्याप्तत्वेन संदेशादानयोग्यत्वं हे भद्राः साध्व्य इति ता
सां संदेशपात्रत्वं २८ श्रीभगवानुवाचेति तदक्षरैरेवाहं वक्ष्यामीति भावः लिपापारोक्ष्यादिति नाहमर्थं वेद्मि यूयमेव विचारयतेति व्यनक्ति तत्र भवतीनां न च वैराग्यप्रायश्रेयोभं वदिहास्फेकेतीनरु
पः प्रथमार्थः आपातप्रतीतः स च रहस्यार्थान्तरगोपनाय लोकरीत्या शोकशंमनाय च नात्यंतिकं विगणय्यस्यपि ते प्रसादभित्युक्तरीत्यात्तानस्य तत्फलस्य च हेयतां मत्प्रेमणः सर्वातिशायितां च ताः स्वा
नुभावेनैव निश्चिन्वंतीति विचार्य भगवता प्रयुक्तः प्रेमप्रभावात्सार्वदिकतत्स्फूर्त्याश्रयो द्वितीयः अथोत्कंठाशांतये नित्यलीलादिवास्तवसिद्धांतमयस्तृतीयः अर्थत्रयावस्तासां तद्रूपदेशप्रभा
वेनैवेति तत्र भवतीनामित्यर्थकं मुख्यवाक्यं भवतीनां मया सह वियोगो नास्तीति हि तयः सर्वात्मना सर्वोपादानेन मयेति प्रथमोर्थः बहिरंतश्च सदा मत्स्फूर्तेः सर्वात्मना सर्वथैवमे वियोगो नास्तीति
द्वितीयः अथ तृतीयः सर्वात्मना सर्वप्रकारेण वियोगो नास्ति किंत्वनेनैकेन मदिच्छयात्र तत्र प्रकटनजन्मादिलीलावताररूपेणायमत्यकात्वियोगः वृंदावनविहारिणान्येनाप्रकटरूपेण तु
संयोग एवेत्यर्थः तथा च तापिनीश्रुतिः गोविंदं सच्चिदानंदविग्रहं वृंदावनसुरभूरुहतलासीनमित्यादि स्कांदे च वत्सैर्वत्सतरीभिश्च सदा क्रीडति माधवः वृंदावनांतरगत इत्यादि ननु
प्रकटेन श्रीकृष्णरूपेणापि कथं वियोगः संभवति न चांतर्न बहिर्यस्येत्याद्यो मृत्स्नभक्षणलीलादावेतस्य गोविंदस्याखिलाधारिणा इति श्रुतोच तद्रूपस्य विभुत्वदर्शनात् न चायमिहे वास्तीस्य
नूभूयमानस्य तेनैव रूपेण सर्वत्रास्थितत्वं न क्वचिद्दृष्टमिति दृष्टांताभावाद्विभुत्वमेव न युक्तिसहमिति वाच्यं श्रुतेस्तु शब्दमूलत्वादिन्यायेन शब्दैकप्रमाणस्यार्थस्य दृष्टांतानपेक्षत्वात् अन्य
था देशकालवस्तुपरिच्छेदशून्यमद्वितीयं ब्रह्मापि दृष्टांताभावान्नश्रुत्या सिध्येत् जगत्यभिन्ननिमित्तोपादानत्वादिकमपि न स्यात् पराभिमतदृष्टांताभावात् किंचैवं यशोदादिकर्मगांजन्मांतरफ
लश्चाद्धादिनापित्रादित्वप्तिरपि न स्यात् अयमिहेवास्ति मत्संमुखादिरित्यनुभूयमानस्य रूपादिविभुत्वस्य सर्वत्रास्थितत्वादि दृष्टांतैः कथंचित् युक्त्यापि संभावयितुं शक्यत्वाच्च स्त्रियः एकदा
६१ वहदित्यादिना षोडशसहस्रविवाहादिषु युगपत्तद्धादर्शनादिति चेन्नैवं अचिंत्यशक्त्या तदिच्छानुसारेणैव सर्वं संभवात् यथा हि सूर्यबिंबः सन्मुखादिस्थितोपि मेघपिहितो न दृश्यते तद्
वद्देशांतरस्थैः पिधानाभावे दृश्यते च न तथा मथुरास्थं भाभज्ञादिस्थानपस्यद्वितिभगवदिच्छयैव पिधानाद्व्रजादिस्थैः सर्वैर्न दृश्यते इति वियोगादिसंभवः इच्छाभिधानेन निजपादपल्लवे

रास ७२

नमित्युक्तेः एवं निश्चित्योक्तमाम नेच्छामेरूपिहितः सर्वभूमिष्ठेरेव नहृदयस्य ते किंतु ब्रह्मादिनांतरे एवेत्यादिकमुक्तं एतेन तद्विग्रहस्य विभुत्वे युगपत्सर्वत्र दर्शनं स्यात् गमनादिक्रियाः स्य शरीरुपादि
गुणश्च तत्र २८ नस्यादिति परास्तं अचिंत्यशक्तिच्छाभ्यां चिन्मयगुणक्रियादिसर्वसंभवादिति दिगिति भाति विस्तरस्तु तोषण्यादौ द्रष्टव्यः २९ तदेवसदृष्टांतमाह यथेति खंवायुसहितोग्निर्जलं मही
ति भूतानि भूतेषु स्वजन्येषु चराचरेषूपादानतयानुगतानि तथाहं च सर्वेष्वित्यर्थः अंतर्यामितयाप्यनुगतिमाह म चेति मनआदीनि सत्वादिगुणाश्च मामाश्रित्यैव प्रवर्त्तंत इति ते वामंतर्या
मीत्याहमित्यर्थः अयं द्वितीयोर्थः यथा भूतानि भूतेषु तथाहमपि न वमनआदीनां गुणानां च तत्रआश्रयोपयस्यवृत्तीनामेवाश्रयोवासन् यतः स्फुरामीत्यर्थः अथ तृतीयः यथा खादीनि पंच
भूतानि देहेषु अप्रकटरूपेण वर्त्तंते तथाहं च तत्रैव वर्त्ते इति कीदृशाकारो वर्त्ते सतत्राह मन इति नवमनआदेरनुरागादिगुणानां चाश्रयः श्यामसुंदरवेणुविलासिरूप एवेत्यर्थः एव
मन्येप्यर्थेत्र यत्क्रमः २९ नन्वेकस्योपादानत्वं मंतर्यामित्वं च दुर्घटं भूतादिनां नोतिकाघंतर्यामित्वाद्दर्शनात्तत्राह आत्मनीति आत्मन्येवाधारे आत्मनानिमित्तेनात्मानमुपादानरूपं भूतरुपेंद्रियरूपेण
गुणजीवरूपेण च सृजामि सृष्ट्वा स्वस्वमर्यादासु स्थापयामि अंते हन्मि च बुद्धींद्रियेतिपाठे भूतानामुपलक्षणं नन्वेकस्यात्मनोधिकरणत्वकर्तृत्वादिकमपि युगपत्कथमित्यादि सर्वशंकासमा
धानार्थमाह आत्ममायेति श्रुतिप्रामाण्यादचिंत्यशक्तिप्रभावेणोक्तं सर्वं घटत इत्यर्थः द्वितीयेन नु त्वमस्मासु स्फुरसि न तु वयं त्वयि अवियोगश्च मिथो मिलनमेव तत्राह आत्मनिस्वचित्तेएवा
त्मनामनसा संकल्पात्मकेनात्मानं भवत्संयोगविलासात्मकं प्रयत्नमेकं सृजे करोमि तं च पालयामि चिरकालं वर्धयामि पुनर्विलासांतरयत्नार्थं तं दूरी करोमि च कीदृशेन मनसा आत्मनो मम या
भवतीषु दयातस्याः प्रभावो यत्र पुनः भूतानियुष्मासु स्थितानि नेत्रादींद्रियाणि रूपादिगुणाश्चात्मानस्तदात्मता प्राप्ता यत्र पाठांतरे बुद्धेरिंद्रियाणां च गुणा इत्यादि तस्मादुभयत्र संयोगस्फूर्ते

त

र्बहिरप्यवियोग इति भावः तृतीये ननु कथमनेकरूपाणां संभवस्तत्राह आत्मनि चिन्मय हरुपे धिष्ठाने स्वयमेवात्मानं सच्चिद्रूपं भूताद्यात्मना देहेंद्रियरूपादिप्रतीति मद्रूपेणाविर्भावयामि त्वी
लापर्यंतं रक्षाम्यंते धापयामि च पाठांतरे बुद्धींद्रियाणि तत्तन्मोल्लकादिसंहितानि गुणारूपादयश्चात्मानः स्वरूपभूता एव न तेभ्योतिकामाप्यिकावा यत्र तेनात्मनास्वरूपेणोत्मानमेव सृजन इति
तत्र तत्र तथा तथा मम प्रकाश एव न विकार इति भावः ३० नन्वेतावंतं कालं त्वां परिच्छिन्नमेव मन्याम हे स्माधुना तु सर्वस्योपादानत्वादंतर्यामित्वाच्च व्यापकेन मया न वियोग इत्युपदिशसी तत्त्वांत
र्यामित्वात्तु सा नमसेनत्वयैवानुभूयते वयं तु परिच्छिन्नदेहरूपा न भवत्संगमनुभवामस्तत्राह आत्मेति भवतीनामात्मापितानमय एव न तु जडभूतमयः यतो सौतत्तद्गुणकार्यानुगतोपि तेभ्यो व्यति
रिक्तत्वाच्छुद्धो निर्विकारः न च तत्प्रत्ययेनानावस्थत्वेनानुभूयमानस्य कुतः शुद्धत्वं तत्राह सुषुप्तेति मायाकार्यमनोवृत्तिभिः सुषुप्त्याद्यवस्थाभिस्तथा प्रतीयते न त्ववस्थत इत्यर्थः तस्मात्ज्ञानरु
पेण व्यापकेन मया ज्ञानरूपस्य स्वात्मनस्तादात्म्यभावनया सुखिन्यो भवत किं वियोगमय दुःखभावनयेति भावः द्वितीये तृतीये र्थे यो मम तादृशाविग्रहरूप आत्मा सतु समाधौ द्रष्टव्यो पि मायया
वृत्तिषु सुषुप्त्यादिषु भवतीभिरीयते नुभूयत एव किंविधः ज्ञानमयश्चिद्घनो नेकविद्या प्रवीणो वा शुद्धो दोषास्पृष्टः विशेषणातिरिक्तः सर्वोत्तम इत्यर्थः गुणान्वयः सर्वगुणशालीति ३१
ननु कुतो मनो वृत्तिभिरेवात्मनो नानावस्थत्वमित्याशंक्य मनोनिरोधे तदभावादिति व्यतिरेकं दर्शयितुं मनोनिरोधं विधत्ते येनेति उत्थितः पुमान् मिथ्याभूतं स्वप्नमिव बाधितानपींद्रियार्थान्
शब्दादीन् येन मनसा ध्यायेत चिंतयति ध्यायंश्च ये नेंद्रियाणि प्रत्यपद्यत प्राप्नोति तन्मनो विनिद्रो नत्वसः सन्नियच्छेदिति द्वितीयेन तु सत्यं साक्षात्कार निभास्त्वत्स्फूर्तिः किंतु सा नसदेति बहिर्व
त्वावियोगस्फूर्तेर्नीशे कउपाय इत्याशंक्य तत्र मनोनिरोधं योगशास्त्रोक्तमुपायमाह येनेति तृतीये ननु तथापि भवतीनां गमने प्रकटेन त्वद्रूपेण वियोगादुःसहः कथमिव कालं क्षिपामे
त्याशंक्य ममागमनं यावत्मनो निरुध्यतामित्याह येनेति ३२ मनोनिरोधं स्तौति एतदंत इति एष मनोनिरोध अंतः समाप्तिः फलं यस्य समाम्नायः तत्तापकं शास्त्रं योगः सांख्यमात्मविवे
कः एतेसामान्यधर्मो त्यागः संन्यासः तपो वनस्य धर्मः दम इंद्रियनिग्रहादिर्ब्रह्मचारीधर्मः सत्यं कर्मसु विवेकशाठ्यादिवर्जनं गृहीधर्मः मार्ग भेदेप्येकत्र पर्यवसाने दृष्टांतः समुद्रांता नद्य
इवेति इदमर्थत्रयेसमं ३३ ननु किमन्यानि नाम्नानात्म विद्ययावंचयसि नवंतु सकलसुभगगुणगणालंकृतेन त्वया सहाविवियोगमेवेच्छामस्तत्राह यद्वीति अन्यार्थ यो स्वेवमवतार्य तदेवमप्रकटरूपेण

रासप ७२

वियोगो नास्त्येव प्रकटरूपेणापि बहिः प्रातीतिक एव सोपि कदाचित्कएव साक्षात्कारनिभायामत्स्फूर्तेरेव प्राचुर्यात् सचेवियोगः केनापि ममदुराग्रहणेवेति व्यंजयन् सहेतुकं स्वाग्रहं दर्शयति यदिति प्रियःअतः
कार्यसेषंहि त्वाः गंतुमोग्यापहं यद्भवतीनां दृश्यमेव दूरे दृग्गोचरत्वेन वर्त्ते न वदृगगोचरत्वेन भवत्कर्तृकसहासकटाक्षेक्षणप्रमधुरालापगाढालिंगनादिसुखास्वादविरहिणमासानं करोमीत्यर्थः
भवतनुस्यस्के नहूरेरूपांतरेण तत्रैवसत्वात्सप्रकटरूपस्यापि विभुत्वाच्चेति भावः ततत्वस्तु मत्कर्तृकं न वहिर्विषयकं यदनुध्यानं तत्काम्यया क्षणं युगशतमिव यासामित्युक्तत्वात् भवत्कर्तृकं ध्यानं वृन्दाम भव
बहिर्विषयकमनुध्यानं मनस्सुदियादितिवाच्छयेत्यर्थः तच्च किमर्थं तत्राह मनसः संनिकर्षेभवतीनांनिध्यायोग्यता तदर्थं तांविना यतोजिन्होम उक्तं च न पारयेहमित्यादि तस्मान्त विनाविप्रलंभे

कृष्ण

७२

नसंभोगः पुष्टिमश्नुते कषायिते हि वस्त्रादौ भूयान् रागोभिवर्धत इति रसशास्त्रोक्तन्यायेन भवद्विषयकरागवर्धनार्थमेवेति भावः ३५ ननु भवतु नाम भवतो भावसिद्धिरस्माकं किमित्यात आशंक्य युष्माकमपि तदाधिक्यमस्तीतीच्छयापीत्या
ह यथेति अतो मिथः प्रेमवर्धनाभिलाषजोयं मे दुराग्रहो युष्माभिः क्षंतव्य इति भावः ३५ तदेवं त्रैधासमाधाने मनोविरोधेपि चतासां मनुत्साहं वितर्क्य तस्य स्वदुराग्रहस्याचिरादेव नाशं व्यंजयन्नाह मयीति अस्मिन्पद्ये गमी
भिच त्रिराबस्यास्म छष प्रयोगो न्याकार व्कदासायते नायमर्थः यत् यतः मयि कृष्णे कृष्णतया प्रसिद्धाकारे तराचोपव्यक्तिकं मनआवेस्य मां कृष्णाकारमेव निरंतरं स्मरंत्यः स्थ तस्मादचिरादेव मां कृष्णाकारं स्वसमी
पग च्यवप्राप्स्यथेव नात्र मे कर्तव्यमिति भावः ननु पुनरप्येवं दुराग्रहस्यात्तत्राह नित्यमिति साहसादेवमकार्षमितः परं न करिष्य इति भावः ३६ एतत्प्रमाण्यायाह याइति अस्मिन्वृंदावने रात्र्यां क्रीडता मया कृष्णरूपेण
त्वष्यरासाः यतो व्रजे आस्थिताः रूढाः ता अपि ममैव गुणस्मरणप्रभावेण मां कृष्णाकारमापुरेव हे कल्याण इति पूर्वं यत्त्वनेन कल्याणदेहे नैव ननु जेहि गुणमयं देहमिति रीत्येति व्यंजितं ३७ एवं सम्यक् श्रुत्वा अर्थत्रय
स्याप्यवबोधात् तेन ज्ञानमयेनापि संदेशेन नगतास्मृतिर्निजभावो चित्तानुसंधानं यासां ताः यतः प्रीताः तस्मिन्स्वाभाविकताहृशप्रेमवत्यः किं च प्रियतमादिष्टमिति सोप्येवमस्मासु निरसनोपदेश इति विभाव्येति
भावइति प्रथमार्थे द्वितीयार्थे तेन प्रेमकृतसाक्षात्कारसूचकेन संदेशेनागतास्मृतिः साक्षात्कारस्मरणं यासां ताः तृतीयेर्थे तेनाप्रकटरूपेण संयोगसूचयता संदेशेनागतास्मृतिर्मे यापरोक्षं तज्जतातीरोहि
तमिति पूर्वोक्तार्थस्य यासां अंत्यार्थहृये अतएव प्रीताः प्राप्तपरमानंदाः तत्र विश्वासहेतुः प्रियतमेति अथ मय्यावेस्य मन इति चतुर्थे प्रकारके णाचिरात्स्वागमनसूचकेन संदेशेन प्राप्ता रासाद्यनुभूततादृशात
दीयस्वविषयकप्रेम्णः स्मृतिर्यासां शेषमंत्यार्थवत् अत्रैवं भगवतो भावः संप्रत्यागमनासंभ आसांत्वन संदेशप्राप्तेश्री घ्रमागमन प्रतिज्ञैव समंजसा तत्र कालविलंबे वैरस्याभावाय विविधार्थसंबंधसंदे
शापियोग्यः तत्रार्थांतरानुसंधाने नापि समाधानं स्यादिति ३८ प्राप्तस्मृतित्वेन किंचिदाश्वस्तानामपि पुनः स्मृतप्रकटरूपतद्विरहाणां चाक्यानि दर्शयितुमाह गोप्य ऊचुरिति मा भून्नः स्खलं तस्य स्खलमेवास्माकं स
र्वमंगलमित्याशिनंदति दिष्ट्येति यदुनामहितः दुःखाघकृत् दुःखदस्य आप्तैः पूर्यां प्राप्तैः यद्गुणिः सह सखी आस्ते एतदेवभद्रं अधुनेति पूर्वमत्र कंसीयैरत्यो न हुदुःखप्रापेति भावः ३९ अत्रवत्त्रूने दपि संगति
रिष्टं स्खलस्थितिप्रकारमेव पृच्छत्यस्त्वितिर्विलास स्फूर्त्या पुरस्त्री स्मरणाज्जातेर्ष्यांकुरा आहुः कच्चिदिति सप्तम्यर्थे षष्ठ्येया नोस्माकं करणीया प्रीतिं कच्चित्पुरयोषित्सु करोति स्निग्धसव्रीडहासेनोदारं च यदीक्षणं तेना
र्चितस्ताभिः गदाग्रज इति यदुसंबंधे शैथिल्यं व्यंजेनया स्वेषु स्नेहशैथिल्यं व्यंग्यं ४० अहो ततः किं प्रष्टव्यमसंदेहएवेत्याहुः कथमिति तासां वाक्यैर्विभ्रमैश्चानुभाजितो मुहुः पूजितः प्रियः प्रेमकतोच कथं नानुबध्येतता
स्वासक्त्यानस्यात्स्यादेवेत्यर्थः ४१ उत्कंठयासहासं पृच्छति अपीति कच्चित्कस्मिंश्चित्प्रस्कृते प्रस्तावे ग्राम्या अपि नः किं स्मरति अहो अन्यप्रस्तावेन स्मरतु पुरस्त्रीणां सन्नाममध्येपि किं स्मरति तत्रापि स्वच्छंदवार्तामध्ये
किं स्मरति हे साध्व्योदिति मिथ्यान वाच्यमिति भावः ४२ नागरीप्राप्यास्मान्चानस्मरतु तारासरात्रीरपि किं स्मरतीत्याहुः ताइति संप्रति दुर्निक्षनिक्षकीतिरस्माभिरीडिता नस्यतव च मनोरमा दिक्ष्याहतोहितः कंसइत्यादिक
था यस्य सत ईश्वरः ताविल्लक्षणा बहुत्वाद्विस्मर्तुमशक्या अपि नित्याः कदाचिदपि किं स्मरति याः कुमुदेकुंदे शशांके णचरम्यवृंदावने तदानीं सर्वतोपि प्रियाभिरस्माभिः सह कणती चरणनूपुराणि यस्यां तस्या मतिमनोह
रायां रासगोष्ठ्यां क्रीडितस्म नागरीत्वात्तेपितादृशी व्यवनीते तादृशीरासकौतुकमति दुर्लभमेवेति स्मरणाव वस्य भावो व्यंजितः ४३ ननु स्मरत्येवेति चेत्तर्हि तस्यागमनमवस्यस्यात्तच्च न प्रतीमइति रासस्मर
णोत्कंठ्य भरेणागमनसंदेशविस्मृत्यैव पृच्छति अपीति दाशार्ह स्वकृत ला पानेन व्यंग्योपि स्वकृतशोकेन तप्तान् स्मान्गात्रैः करस्पर्शनादिभिः संजीवयन्निति तेषाममृतमयत्वं ते विनास्वेषामृत्यु
तत्वंच यथेति दृष्टांतेन संदेशादिना तापपनोदनमशक्यमिति व्यंजितं ४४ नन्वेष्यत्येव तत्राहुः कस्मादिति भोगविशेषापेक्षयावा रोहिण्या इवकंसहत्ये न वागमनसंभवस्तत्त्वं नेति भावः ननु भवद्विरहा
तेत्वा दायास्यति तत्राहुः नरेंद्रेति कांताविशेषपत्नीभास्त्रीतः नन्वत्र सपित्रादि सहृदर्थमेष्यत्येव तत्राहुः सर्वैरिति अधुनात्रत्यापेक्षा नास्ति किं चागच्छन् ततः सर्वैर्जोर्ये तेति भावः ४५ राजकन्याहाहस्य हेतुत्वमाभी
सीकृत्य नेरपक्ष्यमेवानागमनहेतुं सेर्ष्यमाहुः किमिति तत्र हेतुः महान्भूवर्ति सर्वस्त्रियांतिक्रम्यस्थितत्रात्मा चित्तं यस्य यतः श्रियोलक्ष्म्याः पत्युः यतः आप्ताः कामाय थेष्ट विषयायस्य यतश्चकृतात्मनोत्म
ध्येहतेः किं करोत्यर्थः क्रियते न कश्चिदिति कापि कन्या तस्याविवाहायनानेयेत्यू ह्वं प्रति निर्मणायत्रो व्यज्यते स्वेषां श्री तोप्युत्तमत्वश्रीकृष्णोपेक्षणीयत्वेपि चैव मुक्तिर्निर्वेद्यात् ४६ तस्माद घटमानकृष्ण
संगतराशो नास्माना कुल्लयति नेतानेरास्यमेव परं सुखं तत्त्वदुःकरमित्याहुः परमिति हि एवं नैरास्यमेव स्वैरिणीत्वेन तथावर्कुमनर्हाप्याह तन्नैरास्यमेवेस्खमिति ज्ञानतीनामपि नः कृष्णतथाताद्गृशी आ
शा कथमपि त्यक्तुमशक्या स्वैरिण्यपीत्यनेन वयं तु न स्वैरिण्यो मतव्या इति ध्वनितं ४७ तदेवाभिव्यंजयंति कइति उत्तमश्लोको गुणवर्णनमपि यस्य तत्कृतं कां संविदं न पारयेहमित्यादेकांतवार्ता यतः श्री
रेखारूपा भूत्वा निश्छ तोपियस्यांगाद्वक्षसः कदाचिदपि नापयाति ४८ अहो तद्विसारगेसत्याज्ञापि हीयेत ततश्च दुर्घटमित्याहुः सरिदिति युग्मकेन वनोद्देशेति व्रजादि सर्वस्थानसंग्रहः वेणुरवाइहानीगोपैः
क्रियमाणाः आचरिताः सेविताः गोपकृतवेणुरवस्य तत्सेवितत्वज्ञात्येक्यात् पुनःपुनः स्मारयंति हे प्रभो अत्र न्यायकारणत्वमेवसमर्थीभवसीति भावः ४९ नद्गोपस्कृतमिति भवद्विचोपदेशमाह —ज्ञातेरीश्व
रत्वेन स्मर्तुं भिष्यमाणमपि तत्कृतत्वेनेवस्मारयंतीति तान्घनवसरोव्यंजितः ननु तत्र दनुसाधनं त्यक्त्वा तं विस्मरत तत्राहुः श्रीनिकेतैरिति ध्वजादिशोभाश्रयैः त्वल्लग्नैः कोमलपदैः ५० ननु वस्त्रेण नेत्रमाच्छ
त्यबुध्वाम नो नियम्य सर्वं तद्दीयं विस्मृत्यस वि स्मार्यतां तत्राहुः गत्येति सर्वांगचेष्टाभिर्गसकपत्लक्षिताभिः हासादिव्यंजितमानसभावैर्मधुरवाच्चेति कायादित्रयचेष्टाभिर्हृतबुद्धयेस्त्वत्यादकं कथं केना
पायेन विस्मरामस उपायः पुनरन्यः कथ्यतामित्यर्थः ५१ अथास्य दुःखमस्यापदेशो नापगच्छेदित्याहुः वमव्यनाद्धत्योस्थाय मथुरायाभिमुखी भूत्वोच्चैः स्वकांतमेवसंबोधयंत्यः स्वामिना तत्सर्वं गोकुल
रक्षामेव स देन्यरोदवप्रार्थयंते हे कृष्णेति प्रथमं मुख्येनाम्नासंबोधनेन हे नाथेति नाथ हे स्मसते हरे मयापिया च्यमान तस्मान्नप्छरणगोष्ठं मग्नाथमितिसंकल्पानुसारेण व्रजस्यनाथ आर्तिनाशन

हे निर्वोहितताहशसंकल्प अधुना दुःखसागरे मग्नं गोकुलमुद्धर वृजिनार्णवादिति पाठांतरं हे गोविंदेति गोकुलेंद्रस्य तवेदमावश्यकमिति भावः ५२ ततः पुनरपि तासां विरहवैवश्यं दृष्ट्वा कथितैर्नवतीनां वियोगो-
म इत्यादिकै रन्यैश्च संदेशैर्महामंत्ररूपै रिवाव्यपेतो विरहोऽस्थस्तापएव यासां तद्दर्शनेकताशेयाविरहस्य तापेन इत्यर्थः पूर्वीर्ब्ध्य पूजा दुःखेन विहता ज्ञातेति संप्रति विप्रशोषत आतिथ्याचितं पूजयांचक्रुः ननु सं-
देशमात्रात्कथं तापव्यपायस्तत्राह ज्ञात्वेति तत्र प्रथमार्थे आत्मा ज्ञानमयः शुद्ध इत्युक्तलक्षणं स्वात्मानं ज्ञात्वा तं चाधोक्षजं श्रीकृष्णाभिन्नं ज्ञात्वा साक्षात्कृत्य तदैक्यज्ञानात्तापनाश इत्यर्थः द्वितीयेऽर्थे तु यथास्माकं
तत्स्फूर्तिस्तथा तस्याप्यस्मत्स्फूर्तिरिति स्फूर्तावन्योन्य विना भावाद्दर्शनादात्मानं स्वमधोक्षजतादात्म्यापन्नं मत्वेति तृतीये यथा तेन संदिष्टं तथैव श्रीकृष्णं परमात्मानं प्रकटाप्रकटरूपभेदेन निश्चित्येत्यर्थः
मध्याह्वेस्य मन इति चतुर्थपक्षे परमात्मानं श्रीकृष्णं अचिरादुपेष्यंतं निश्चित्येति तत्तत्संदेशानुसारेणार्थः यद्वा सर्वपक्षे पूर्ववत् परमात्मानमधोक्षजं ज्ञात्वा पूजयांचक्रुः अधोक्षजधियानर्चुरित्यर्थः वा
सुदेवधिया चार्चयदिति नंदकृतपूजायां तथोक्तेः ५३ बहिर्विरहानुसंधानेन तासां पुनः पुनः विरहशोकानुवृत्तिं दृष्ट्वा तदपनोदार्थं चिरं तत्रोषित इत्याह उवासेति त्रिभिः विनुदन् पुनः पुनः स्तैः संदेशैरपन-
यन् गोपीनामिति पित्रोरप्यकपलक्षणं अन्यगोकुलस्थजनेनु तत्कीर्त्या कथागानैरमयामासेत्यर्थः ५४ तदेव विवृणोति यावन्त्यायावंतीति ५५ सरिदादिषु तत्क्रीलास्पश्याद्भिः कृष्णसम्यक्स्मारयन् साक्षा-
त्कृतमिव कुर्वन् अन्या हृत्कृसमरणं हितेषु पिष्टपेषणवत् ५६ एवं सर्वव्रजस्य श्रीकृष्णे विलक्षणः प्रेमा तथापि गोपीषु सपरमचमत्कारमय इति दर्शयति दृष्ट्वेत्यादिना गोपीनामेवमादिचरितं दृष्ट्वा कीदृशं
कृष्णावेशेन मनसो विक्लवात् द्वियो मादादिर्यत्र तत् अतिहृष्टः ता गोपीर्नमस्यन् प्रणमन् क्षत्रियस्य स्वस्य वैश्यस्त्रीनमस्कृतिरन्याय्या नेति व्यंजयितुं जगौ नुष्टाव पंचभिः इदं प्रत्यहं तासां पुरतो दूरे वा स्थित्वा गा-
नेत्रेयं ५७ ज्ञानात्सद्भव एवायं सर्वे भागवतोत्तमः गोपीमहात्म्यं येनेयं गोपिगीता प्रकाशिता १ विप्रक्षत्रियाद्यैः स्वसमार्ध्वजातीयाएव न नमस्कार्या न हीनजातीयास्तत्राह एमास्त्रियो वनचरीर्व्यभिचारदुष्टा
इति धर्मतत्त्वज्ञम्मन्यानां मतं निरस्सितु तासां सर्वोत्तमत्वं दर्शयन् प्रथमं भगवति निरतिशयभावमहिम्ना तदाह द्वाभ्यां एता इति एता भगवत्येयस्यः परं केवलं भुवि तनुभृतः सर्वोत्तमतनुधारिण्य इति स्त्री-
त्वादिदृष्ट्यानां मंतव्याः यतो खिलात्मनि श्रीकृष्णे एवं रूढभावाः परम प्रेमवत्यः यत् यं भावमात्रं तद्विशेषवार्ता दूरं तआस्तां भवभियामुमुक्षवो मुनयो मुक्ताश्च वांछंति वयं नित्यसंगिनो भक्तास्यपि वांछामः
ननु प्राप्नुमः अतो नंतस्य कथासु रसो रागो यस्य तस्य ब्रह्मजन्मभिः विप्रसंबंधिसावित्रादि जन्मभिः किं को तिशयः यत्र तत्र जातः स एव सर्वोत्तम इत्यर्थः यद्वा नंतस्य कथासु अरसो विरागो यस्य तस्य चतुर्मुख-
जन्मभिरपि किमित्यर्थः ५८ एवं बहिर्मुखानां मतं निरस्य तदेव साध्यस्वरूपमनुयुंक्ते क्वेमा इति पादेन स्वमतात्प्रच्यावनं निग्रहः अनुयोगो निरस्तस्य तस्य मतस्याविष्करणं यथा नित्यः शब्द इति केनचिदुक्ते
तस्मान्तयुक्त्या निरस्यत मनुयुंक्ते नित्यः शब्द इत्यर्थ इति अत्र निग्रहस्यानुयोगे चेति वैकल्पिकः प्लुतः तद्वदत्र क्वेमा इत्यादिवादिना शंकितं मतं किं ब्रह्मजन्मभिरित्यादियुक्त्या निगृह्य सिद्धांतिवादिनं मनुयुं-
क्ते क्वेमा इत्यादि त्वं चदसित द्व्यनसंभवति यतः कृष्णे आसामेषा निरतिशयरूढभावः क तत्र तदीयं व्यभिचारजात्यादिदोषेणापकर्षापादनमति दूरोझ्झितमित्यर्थः स्तेनः सुरापो मित्रध्रुगित्यादयेन्त्रा
मध्येयश्रवणानुकीर्तनात् विप्राद्द्विषड्गुणयुतात् भक्तिः पुनाति मन्निष्ठान् श्वपाकानपीत्यादेश्च वचनज्ञातातासु कैमुत्येनोत्कर्षसिद्धेः वस्तुतस्तु तासु व्यभिचारशंकैव नास्ति गोपीनां तत्सतीनां चेत्यादि
नाथुकाचार्यैः सिद्धांतितत्वात् अत्राह्वे वेनाप्यखिलात्मनि परमात्मनीति पदाभ्यां तत्सिद्धांतसूचनात् न च तासां भगवतोन्यत्राचारः शंकितुं शक्यः आर्यपथं च हित्वेत्यादिना सतीत्वबोधनात् न च स्त्री-
त्वेदूषणं लक्ष्म्यादेरपि स्त्रीत्वात् न च वनचरीत्वं निंद्यं वनस्यास्य तरूरि भाग्यमिति ब्रह्मणा आसामहो इत्यादिनोद्धवेनापि प्रार्थ्यमानत्वात् अतोत्र पदाभ्यां उत्कृष्टनिकृष्टभूमिकावत्त्व भंगीकृत्य व्याख्या-
नमसंभवि किंतु व्यभिचारदुष्टा इत्यनेन तरं नैतदद्भुतं इत्यर्थः स्वरया कृष्णैकचेष्टयादेरन्वयो बोध्यः नेतद्धृत इति पदत्रयाभावान्न्यूनत्वमेवात्र दोष इति न च वाच्यं इदृशे विषयेन्यूनत्वं न दोष उक्तं काव्यप्रतिप-
त्तिः पूर्वाविरुद्धा प्रतिपत्तिं वा धत्त इति न्यायादिति काव्यप्रकाशोक्तेः तथा च तत्रोदाहरणं तिष्ठेत्कोपवशात्प्रभावपिहिता दीर्घं न सा कुप्यति स्वर्गायोत्पतिता भवेन्मयि पुनर्भावार्द्रमस्या मनः इत्यादि सा प्रिया
कोपवशात्स्वप्रभावेण तर्हि तातिष्ठेदिति न युक्तं यतस्तस्या दीर्घः कोपो नास्ति स्वर्गमुत्पतितुं गता भवेदित्यपि न यतस्तस्या मनोमयी स्वे हार्द्रमित्यादेस्तदर्थादिति न किंचिदसमंजसं एतदेव सदृष्टांतमुपपादयति
नेरार्थेन न्यितिनिश्चये उपयुक्तः सेवितः अगदराजः अमृतं देहमात्रं दिव्यं करोति अमृतादेस्तादृक्सामर्थ्यं प्रदः साक्षात्स्वयमीश्वरस्तु सर्वमपि श्रेयः भजनानुकरणमपि कुर्वतः स्वमजानतोपि कुर्या-
देव किमुत तासां तदीयगुणज्ञानादिमतीनामिति यद्वा मुमुक्षादयो यं यं च महांतएवं कथं तं भावं वांछंत तत्राहुः क्वेमा इति वृंदावनविहारिण्य इयाः स्त्रियः कृष्णविषयेका अव्यभिचारिभक्तितया कस्यां भूर्व-
भूमिकायां स्थिताः व्यभिचारदुष्टा व्यभिचरितभक्तयस्ते वयं मुन्यादयः क्व कस्यामधोभूमौ स्थिताः महदंतरमित्यर्थः यतः परमात्मनि तस्मिन्तेष आसु दृश्यमानो रूढभावः अस्मासु तु न तल्लेशोपीति
भावः शेषं समानं ५९ अस्य तादृशं भगवत्प्रसादमहिमानं विरंच्यादि वंद्य श्रीदेवीतोपि परमोत्तमात्वमासामिति दर्शयन्नाह नायमिति अंगे संक्तायाः श्रियो प्ययमेतावान् प्रसादः मुखनेत्राद्यंगोल्लास उनिश्रितेना
स्ति कीदृश्याः कमलस्येव गंधो रुक्कांतिश्च यासां तासां स्वर्योषितां स्वर्लासमेभिः कांक्षिण इतरीत्यास्वः वैकुंठस्थितानायाषितां भूदेवीलीलादेवी प्रभृतीनां मध्ये नितांतरतेः परमप्रेमवत्या अपि कुतोन्याः स-
र्वाः स्त्रीजातयो दूरत एव परास्ता इत्यर्थः प्रसादमेव दर्शयति रासोत्सवे व्रजसुंदरीणां यो यावान् उदगात् आविर्बभूव व्रजवल्लवीनामिति पाठांतरं कीदृशीनां अस्य श्रीकृष्णस्य भुजदंडाभ्यां स्वस्वकंठस्यापि
विश्लेषस्य भयादिव गाढमालिंगितो यः कंठः तेन कंठालिंगनेनेत्यर्थः लब्धा आशिषो मनोरथा याभिस्तासां ६०

तदेवं सर्वोत्तमानां गोपीनामनुगतिं वाञ्छन् तत्र च तासां पादरज एव साधनं निश्चिन्वन् प्रच्छन्नरजःस्पर्शयोग्यस्थावरत्वं अप्याशास्ते आसामिति अहो इत्ययं दुर्लभत्वात्लसया खेदः गोपीचरणरेणुभाजां गु
ल्मः अप्रकाशस्तृणविशेषस्तत्स्थत्वं भजनीनां मध्ये किमप्यहं स्यां वृक्षाणामन्तरुक्तिरुच्चत्वेन सम्यक् राज्ञां ज्ञोषणासिद्धेः औत्सुक्येन पुनस्तन्माहात्म्यं गायति याइति मुकुन्दस्य मुक्तिप्रदस्य प्रेमदानेतिकृपणस्यापि पद
वीप्राप्त्युपायं दृष्टोक्तं दृढभावं भेजुः श्रुतिभिर्विमृग्यां परमपुरुषार्थतया अन्वेषणीयां किं कृत्वा स्वजनं त्लोकमर्यादां आर्यपथं वेदमर्यादां च तद्देव हित्वा तं तु दुस्त्यजं कैरपीत्यर्थःन्तु मशक्यमित्यर्थः ६० आसां
लाभस्यापि लक्ष्म्यादिष्वप्यदर्शनात् सर्वतोधिकं माहात्म्यमिति गायति याइति या भगवतश्चरणारविंदं प्रपद्य रविंदमित्यपि क्वचित् वैप्रसिद्धं यथा तथा परिरभ्य पतेः स्वजातं च चरणाम्बुरुहं स्तनेषु विन्यस्यादिरी
त्यापरमानुरागेणालिङ्ग्य तापं जहुः एतत्स्वरवादन्योर्थः सर्वस्तापरूपदेवेति तत्स्वर्वतस्यनुरित्यर्थः ताभिः परिरंभे भगवतोऽप्यनुरागं दर्शयति स्तनेषु न्यस्तेत्यादि वार्पितं तत्रसमयवैशिष्ट्यमप्याह
रासोपक्रमसभायां इति त्रैलोक्यलक्ष्म्येकपदं वपुर्दधदिति स्फूर्त्तेः समयांतरादपि परमापूर्वाविर्भावत्वं व्यंजितं कथंभूतं लक्ष्म्याप्यर्चितमेव यत् अजादिभिर्ब्रह्मरुद्राद्यैः राधिकाधिकभक्तैः आप्तकामैरात्मा
रामभक्तैर्योगेश्वरैः सर्वे योगश्रेष्ठैः शुद्धभक्तैरपि आत्मनि मनस्येव यद्ध्यातमर्च्यतेवर्तमानेक्तः सदात्मनीति पाठांतरं ६२ इत्युद्धवेन रचिता गोपिमाहात्म्यबोधिका एषापंचैकगीता पञ्चरत्नान्यहो ध्रुवं ~ प
तस्मा॰दास्तामतिक्रान्तस्य ममासां साक्षान्नमस्कारसाहसं आसामन्यासामपि व्रजस्त्रीणां पादरेणुमेव नमस्कारवाणीति सकंपं गद्गदं वदन् तस्याद्मर्दिता यांभूमौ गीतां तेन नमस्करोति वंदे इति यासां याभि हरिकथा याउद
नं उद्गायतीनामरविंदलोचनमित्यादिप्रकारं पद्यायासां संबंधिहरिकथा॰॰यामहानुभावकर्तृकमुक्तं वेगीनं इदमत्रप्रकरणतात्पर्यं सर्वतः श्रीकृष्णभक्ताः श्रेष्ठास्तत्रापि तल्लीलापरिकराश्च तत्रापि राद्याः तेष्वप्युद्ध
वः त्वं तु भागवते ष्वहं नोद्धवेनाण्वपि मन्यनु इत्यादिदर्शनात् तस्यापीदृशी गोपीप्रेमस्पृहा तास्वत्यंतमादरश्च नेवं भामादिषु दृष्टा घपीति केनसेव्या गोपीचरणा इति ६३ अथकालांतरे एवं चेति समुच्चये गोप्या
दिक्रमेण तांप्रार्थ्य गोपांस्तु आमंत्र्य हे श्रीदामन् तेषामाज्ञानास्तिसंप्रति गच्छाम इति प्रतिगोपं संभाष्य तेषां सांत्वनं संदेशादिकं नोक्तमित्यत्र युक्तिरुक्तैव ६४ रथारोहणानुक्रममाह नमिति निर्गतं रथारोहणार्थं व्रजान्ही
रिनिर्गत्य स्थितं नानेति तत्र नंदादीनां रत्नाहाराद्युपायनं सखीनां वन्यहारादि स्वर्णवर्णगिरिधातवादि च व्रजेश्वर्यास्तु घादिकस्वादु मोदकादि व्रजदेवीनां स्वस्वज्ञापककचूडारत्नादि एवं रामादिष्वपि कल्प्यं ६५
अनुरागेण प्राप्तोचन्नित्युक्तत्वात् प्रकरणौचित्याच्चानुरागप्राधान्येन वक्तुं व्य ऐश्वर्यतत्प्राधान्येनोक्तिरुद्धवस्यैश्वर्यप्रधानं मतमालोच्य तत्रास्य तेस्वदुःखं व्यंजयितुं तदभ्युपगमवादेनैव स्वस्वप्रार्थयंते म
नस इति द्वाभ्यां यदि भवद्भिरसावीश्वरो मन्यते तेन च यदि पूर्ववृत्तप्राप्तिरस्माकं दूरत एवेति सूच्यते तर्हि तत्रैवास्माकं मनआदिवृत्तयस्तदीश्वरत्वोचिताः स्मर्त्तोस्तु सर्वथा तं विनान्यस्फूर्त्तिः तथा च तद्विरहानु
संधानादिकमेव नस्यादिति भावः प्रह्वणं प्रह्वीणं नतिः ६६ कृष्णमइश्वरेति ईश्वररूपेपि कृष्णं एवेत्यर्थः ईश्वरेच्छयेति एथ गीश्वरपदं स्वाभिप्रायानुसारेण अतएवाभ्युपगमवादेन व्याख्यानं समंजसं अन्यथा त
दिष्टयेत्युक्तं स्यात् ६७ एवमध्यायद्वयोक्तं क्रमेण पूजितः नन्वासामहो इत्यादि प्रार्थ्य कथं मथुरामागच्छत्तत्राह कृष्णपालितामिति स्वामंतिके भवत्याप्तिगमनमात्रस्य कमिति भावः ६८ व्रजोकसां तत्पित्रादीनां भ
क्त्युद्रेकं प्रेमातिशयं तत्त्वहचन चेष्टात्मकं त्वद्दर्शनादेव प्रीतिः शोकनिवृत्तिश्च सम्यक् स्यान्नमत्वात्पूर्येण त्वत्संदेशो वै त्वतिप्रायकं प्रथमं कृष्णाय यथावसरं यथायोग्यं सर्वमेवाहोपायनानि चादात् ततोव
सुदेवादिभ्योऽपि भक्त्युद्रेकमाहोपायनानि च ददाविति विषादाद्भद्रकर्माणि छेत्तुं वेदव्रजोकसाः यसादध्रूत्त्रिषु त्तं हस्तोद्धवः सशिवो विधिः १ ६९ इति श्रीमद्भागवत दशमस्कंधसंश्रयः सप्तचत्वारिं

दय

शप्रस्ताविणी सारसंग्रहे १ इति सप्तचत्वारिंशोऽध्यायः ४७ सैरंध्रिमपि संस्वसुमहं शंकोमिनोद्धव किमुत व्रजलोकास्तानिति व्रजजन्मममगोष्ठे १ श्रीसैरंध्रेनमस्तस्मै यदुःखासहमानसः स्वयंमनोग
तोरं तु मसंकाचोरमावतिः २ अथेति सार्धकं भगवान् कृष्णः अथोद्धवागमनानंतरं विज्ञाय तत्कथितं व्रजोकसां सांत्वनादिकं तत्र अतिचित् सैरंध्र्यागृहं ययौ प्रियमिच्छन् मत्प्रीत्यर्थमियमंगरागं ददावतोस्याः प्रि सो
यं कृत्वान्वृणः स्यामिति विचारयन् यतः सर्वात्मा सर्वहितकारी सर्वदर्शी नः सर्वाभिप्रायज्ञः १ महार्हैरनर्घ्यैः गृहोपकरणैराढ्यं कामोपायैस्तदुद्दीपकैर्लेखैः पेयतांबूलाद्यैश्चोपबृंहितं उपस्करान् प्रपंचय
ति मुक्तेत्यादि २ आयांतमेवेक्ष्य दूरतादृष्ट्वेति चिरंतनमार्गदत्तदृष्टित्वादिति भावः हर्षेण सहसोत्थाय यतोजातः संभ्रमः चित्तत्वरा यस्याः यथा यथोचितं सभाजयामास स्वप्रतिज्ञातं अच्युतं ३ तथा समु
द्धवये उद्धवश्च साधु यथा तथा त्यां चर्चितो भुविन्यषीददिति भक्त्या तस्याः प्रीत्यर्थं त्वासने स्पृष्ट्वा महाधनैरत्नादिमयं मंचं गृहांतस्थं तूर्णं विवेश यतो भक्तलोकस्याचरितानि स्वभक्तिमयचेष्टितान्य
नुव्रतस्तत्तरायणलीलः श्लेषेण श्लोकव्यवहारानुसरतः अतोत्लोकानुसरणादिदं रात्रावेति ज्ञेयं ४ आलेपश्चंदनपंकः गंधो धूपाद्यामोदः स्रग्यावदासवः तैः प्रसाधितो योग्यतामापादितो देहो यया सा एत
च्च प्रसाधनमुद्धववाचिकेन तदागमनात्पूर्वमेवेति ज्ञेयं उपसमीपे त्रानेर्जगाम माधवं लक्ष्मीकांतमपि इत्यहो तस्य दीनकृपापारवश्यमिति भावः सव्रीडलीलोत्स्मिते ये प्रुते विभ्रमे रीक्षिते श्चोपलक्षि
ता ५ अनुलेपार्पणलक्षणं पुण्यलेनेति गृह्णंती तेषामीशाया चंदनार्पणभक्तवर्गश्रेष्ठयातयेत्यर्थः ६ तत्रेति छांदसो विभक्तलुक् कामतप्तानां कुचादीनां कामपीडां अनंतचरणेन ततत्रतत्र निहितेन
स्पृष्टेति जिघ्रंती चानंतचरणं एतच्च स्वरस्यं तेन ज्ञेयं तापं तदप्राप्तिजं ७ ईश्वरं स्वतंत्रं कैवल्यनाथं कैवल्यः शुद्धभक्तस्तत्प्रावक्कैवल्यमेकांतभक्तिस्तस्मदानसमर्थमत एव दुष्प्रापमपि अंगरागार्पण
मात्रेणैव उक्तप्रकारेण प्राप्य दुर्भगा एवं कुब्जा त्वदासीत्वलक्षणं तो नाम्ययुक्तापि न तु गोपीवल्लक्ष्मीविजयी गुणयुक्ता अहो आश्चर्यं इदं वक्ष्यमाणं सकदुर्लभं पदमायाचत ८ तदाह सहेति आ
हेति पाठांतरं इह मद्गृहे मया सह रोमस्वतात्वया प्रयोजनमाह रमस्व मयासहेति न तु मे कोहम्निरूत्स्यानि तत्राह नो सह इति अतस्त्वयतत्तत्राह यायोअन्यथा प्राणान्स्पृश्या मीति भावः यतो ह

रामः
७७

प्रेष्ठ प्राणाद्याबल्लेन हे अंबरुहेक्षण सौंदर्यादिगुणै राकृष्ट सर्वेंद्रियेति भावः ८९ कामः सहोष्यतामित्यादिना प्रार्थितः कामोपभोगः स एव वरः आगत्या गत्य रंसे इति संकल्पात्मकस्तं दत्त्वा अलंकारादि ७४
दानेस्ताम्मानयित्वा यतः करुणया सर्वेषां मानदः उद्धवेन सह वागतः एतच्च धर्मनिष्ठस्य तस्य संगेन लोकापवादापत्त्यो पार्थमिव वस्तुकस्य प्रपायेन ऋद्धिमत्सर्वोपकरणसंपन्नं लक्ष्मीसहस्वकोटिनाम
प्याविर्भावनेप्रभोः सैरंध्र्याः स्वीकृतिः सेयं व्यनक्ति परमौकृपां ९० एवं तत्कथां समाप्य लौकिककामी नीवस्त्रनीयमानायास्तस्या निंदितत्वाशंकायां प्रशंसा व्यंजयन्नाह दुराराध्यमिति विदर्भ परिपूर्णसर्वे
श्वरेश्वर सर्वेश्वरेश्वरमिति पाठो अतो दुराराध्यं तादृशमप्याराध्य यामनोगनाखं वस्तुवृणीत स एव कुबुद्धिः तत्र हेतुः असत्वात् तुच्छानित्यानर्थहेतुत्वान्मनोग्राह्यवस्तुनः एषा तु वाङ्मनसागोचरानंद
मूर्तिं भगवंतमेव तथा वृतवतीति परमसुबुद्धिरिवेत्यर्थः ९१ द्वाभ्यां प्रतिश्रुतं यदूहगमनं तत्र कामतप्तायाः भवनं प्रथमं गत्वा अक्रूरगृहमगाद्धरं सफलयन् सः १ तदाह अक्रूरेति सहरामोद्धव इति
आर्षं समन्वितइति प्रतिज्ञातत्वात् दत्तं विना राजकार्यस्वातंत्र्याभावोचित्यात्त्वरामसाहित्यं सर्वत्रानुगत्वान्नित्यवरत्वाच्चोद्धवसाहित्यं किंचिकीर्षयन् हास्तिनपुरप्रस्थापनं कारयितुमिच्छन् अक्रूरप्रि
प्रकाश
यकाम्यया च २ भगवतापाडूनादि सौहृदास्त्रं नोस्त्रथम मक्रूरस्यापि स्वहृद्गत बोज्ञात इत्याह सइति नरवरेषु यादवेषु श्रेष्ठान् आरात् दूरादेव स्वयं विचितात्व्य प्रत्युत्थाय प्रत्युद्गम्य चेति त्रिपश्रुभ
षणसनादिना भ्यनंदत् अभिनंद्य चेति पाठे युग्मकं ३ पश्चाद्देश्वर्यस्फूर्त्या ऽकृष्णरामं च ननाम तथापि तेऽकृष्णादिभिरतिवादित एव नंदितइत्यपि पाठः ४ पादेति युग्मकं आ अपदइति छेदः पादावव
निज्ये तयाभिरसा भपत्स्रास सर्वतो धारयन् अर्हणेन राजनतो बकुलपर्यंतेनाप्यर्वां जरादिभिश्चार्चित्वा ५६ शिरसा नम्य पादसंवाहनोरभ्र तामि शिरसा स्पृष्ठा पादावितिसह विश्रांतयोस्तयोरेकैकं पाद
मित्यर्थः भृजन् संवाहयन् कृष्णरामावुतानत्रायतो ७८ वां युवयोरिदं कुलं उद्धृतं नाना वैभवैः समेधितं च ७ इदं कुलं वामिति किं वा ०प्यं जगदपि युष्मदीयमेवेत्याह युवामिति एकस्य भाग व
तोहि भाविर्भावात् द्वित्वनोक्तिः युवां प्रधानपुरुषौ संतौ जगतो हेतु उपादाननिमित्तकारणे अतो जगन्मयो अतो भवद्भ्यां विना कारणं कार्यं च किंचिन्नास्ति जगदेव युवाभ्यां मुख्यार्थ समभ्यधे चेति भा
वः १८ ननु प्रत्यक्षादिसिद्धमिदं कथं नास्तीति तत्राह आत्मेति हे ब्रह्मन् सर्वाधिष्ठान रजस्त्रादिशक्तिभिरात्मनेवसृष्टमिदं विश्वमनुप्रविश्य प्रवेशा स भवाद नुप्रविश्य वस्थितो भवान् एव श्रुतं प्रत्यक्षे
च गोचरो यत्र तद्यथा स्यात्तथा बहुधा प्रतीयते १९ एकस्य बहुधावभासे सदृष्टांतमाह यथेति योनिषु स्वस्वरूपांतरेणाभिव्यक्तिस्थानेषु मत्स्यादिकारणानि यथा नाना भातिएवं भावनात्म योनिषु स्व
कारणकेषु भूतभौतिकेषु भाति न तु मत्स्यादिवद्विकारीत्याह केवलः शुद्धो निर्विकारः अतश्चात्मतंत्रः स्वतंत्रः २० ननु भवत्वचित्स्वरूपत्वात्यापादानत्वेप्यविकारित्वं आत्मसृष्टमिति सृष्ट्यादिकर्तृ
त्वात्तयाबंध स्तस्यादिति कुतः स्वतंत्रत्वं तत्राह सृजसीति तैर्गुणैः कर्मभिर्वा यतः क्वचकदाचिदपि बंधहेतुरविद्याज्ञानात्मनस्तव नास्येव २१ आस्तां निरुपाधिकस्य तव बंधशंका यतो विद्योपाधेर्ज
वात्मनोपि न वस्तुतो बंध इत्याह देहाद्युपाधेरिति अनिरूपितत्वादनिर्वचनीयत्वात् अबोजन्मतं स्तुत्वो भेदश्चय साक्षात्स्वरूपतो नस्यात् तवेतु यत उपाधिरेव नास्ति अतो बंधो नैव मोक्षश्च नैव नन्द
त्वूरवत्ते मम बंध मोक्षौ त्वया श्रुताव वततः संसारबंधाद्यपि संताव्य ते तत्राह स्यातांयदि ताहृशौ तौ तदा नो स्माकं प्रियवर्गाणां निरंतरं कामएव तौ स्यातां भक्तानां प्रेममय मनोरथ वशा देवता दृशा ली
लास्त्व यि दृश्यंत इत्यर्थः प्रकटैश्वर्ये मयि कथं तेषां तादृशमनोरथस्तत्राह अविवेकः नास्ति विवेकः ऐश्वर्यदर्शनेपि तदनुसंधानं यत्र तादृशे योनि कामइति २२ अतइ दृशां स्वस्वरूपं स्वभक्तिमार्गं च
प्रकाशयंतं वेदपथं रक्षन् तदभिव्यक्तिहेतुं सत्वगुणमपि पुष्णासीत्याह त्वयेति प्रन्होदाद्याश्रितो वेदमार्गो हिरण्यकशिप्वादिभिरिव पीडचेत तदा स्वयमवतीर्य सात्विकस्तोम वर्धनेन वेदपथं पु
ष्णन् भवान् सत्वगुणं बिभर्ति पुष्णाति २३ एवमुपोद्घातानंतरं द्विदिष्ठ्यापापोहतः कंसइत्यादि प्रकृतमनुवर्तयति सइति मुहुरवतीर्य वेदपथप्रवर्तकस्त्वं वसुदेवस्य वेश्मधनं तत्र्येह सर्वथासंग्ना
त
ह्यतल्लक्षणेन नक्तिरुपंतेन हीव्यतिद्योततेस्य यदुश्रेष्ठस्य गृहे स्वांशेन रामेण सहावतीर्णः स्फुरेत रां ज्ञायेराजानस्ते वाम क्षौहिणीज्ञातानां वधेन भूभारमपनेतुं २४ यादवेषु चाहत्ययात्यंतमनुग्र
हीत इत्याह अद्येति हे इज्ञानोवसतयोग्रहा स्तपावनादपि स्फुरेदं भवनादतोपि चभूरिमहाल्म्याः कुतः यस्त्वं यष्ठव्यादेवादयो मूर्तयो यस्य तादृशः यस्य च तव आमनावतार पादसलिलमपि त्रिज
गत्पुनाति सत्वं सर्वजगति गुरुर्महान् पामहसती रेव प्रविष्टः न त्वद्याप्यन्यया दवा गृहानित्यर्थः २५ अतस्त्वमेव सेव्य इत्याह कइति त्वत्तोपरं शरणं कः समीयात् कीदृशान् भक्तः भक्ताव्रेषवतः
सूतनादेरपिस्वपददानात् प्रियोयस्य तस्मात् ऋतगिरः भक्तपालनादिसत्यसंकल्पात् यद्वा भक्तानामेव प्रियाः ते वाम यस्याः तादृगिरा येन सुहृदः उपकारात्मक भजनानपेक्षात् कृतमुपकारं फलवपि
जानाति बहुमन्यते यस्तस्मात् किंच यस्य त्वा भाल्ला भादिनोपचयापचयो न स्तः स भजतः यत्र पुष्पादिनापि सेवमानायसर्वान पितदभीष्टान् कामान् ददाति सुहृदः सोहार्द युक्तायत्वात्मानमपि
ता॰द॰पू॰
ददातितस्मात् त्वत्तः २६ तादृशात्वं पांश्लाघमानस्तदेकनिष्ठतावि घ्नव्याहतिं प्रार्थयते दिष्ट्येति दुरापागतिर्ज्ञानयस्य स इह गृहे नः प्रतीतः प्रत्यक्ष प्राप्तः एतद्दिष्ठ्या अहो नो भाग्यमहिमेत्यर्थः २७
७४
गीर्भिस्त्वं नो गुरुरित्यादिलक्षणाभिः संमोहयन् मूर्छां प्रापयन् इनेति विवेकलोपमात्रेण मूर्छा साहस्यमात्रं न तु विचेतनत्वमपीत्यर्थः श्लाघ्यपदस्य सर्वैरप्यनुषंगः बंधूहितकारी नित्य कृष्ण

दानिस्यमौह्योरक्ष्याः सोऽज्ञनादिना पोष्याः स दुपदे वैरनुकंप्याश्च हि यतो वः पुत्रावयं २९ महत्तमत्वात्त्वास्माकं त्वमेव सेव्य इत्याह त्वद्विधा इति किंपुनर्भवंत इत्यर्थः अर्हा दृश्यास्तेषु सत्तमाः सं
निषेव्या महत्तमा इति पाठांतरं ? श्रेयसां कामैः कामनाभिः बहुत्वेन मुक्तिभक्त्यंतश्रेयसां ग्रहः किंच देवा इति देवेभ्योपि त्वद्विधा निरपेक्षा महत्तमा इति भावः ३० यदि देवाः सेवितुं साक्षात्क्लृप्त्यंते तदपि
न साधुसाम्यं प्रतिरूपास्तु चिरकृत्वा एवेति वदन्प्रसंगात्तीर्थानामप्यपकर्षमाह नहीति अप्राज्ञास्त्वेनग्र अपशाखोवा अन्येषां ग्राभ्यश्चेभ्य इतिवदति नातितेषां प्राशस्त्याभावे हेतुमाह तेइति तानि च ते च ते
इत्येकशेषे क्लीबत्वाभावस्त्वार्षः ३१ विवक्षितमाह सइति साधुत्वेनोक्तमाहात्म्यः नः सुहृदां यादवानां तेषां मध्ये यद्वा सुहृदां ज्ञातीनां नोनाम व्येश्रेष्ठः अतो हे स्वज्ञातीय पांडवानां श्रेयः श्रेयश्चिकीर्षया तत्र ते
कथं तिष्ठंति जिज्ञासार्थं गच्छेति ३२ जिज्ञास्यमर्थं सप्रयोजनमाह पितरीति त्रिभिः राज्ञाऽधर्मत्वेप्यधुना प्राप्तराज्येन ध्रुतराष्ट्रेण श्रुश्रूमति अग्रेतू नमित्याद्धिचल्लोकल्लीत्वानुकरणं ३३ हृपुत्रादुर्योधना
द्यास्तद्वशेन गच्छति यतो दीनधीः स्वद्बुद्धिः तत्सुतैः त्रंधदृकु अंधादीनां साम्यकं बहुदोषोक्तेः ३४ तदधुनेव गच्छत तथा ३५ भगवान्पूर्णोपि हरिर्मनसैव दुष्टसंहारे शक्तोपीश्वरः सर्वेनियंताप्येवं समा
दिश्य रामोद्धवाभ्यां सहेति अक्रूरानुव्रजनं नेति व्यजितं तत्प्रस्थापनत्वरार्थमिति ३६ इति श्रीमद्भागवतदशमस्कंधविवर्तनः अष्टचत्वारिंशकोयं तोषिणीसारसंग्रहे १ इति श्रष्टचत्वारिंशोध्यायः ४८
गत्वा गजाह्वयं पुनरागत्याक्रूरइति शेषः ससुधीः समवर्तन सन्मार्गप्राप्तिर्नरवल्लानुगोधस्य १ सगत्वेति युग्मकं पौरवेंद्राणां यशोव्यंजकैः स्थानस्थान्यादिभिरंकितं सभीष्ममिति तद्विने भीष्मस्य राजसमीपे
स्थितत्वात्तानुषंगिकं दर्शनमित्यर्थः २ बाल्हीकपुत्रः सोमदत्तः भारद्वाजः पांडवोपाध्यायं द्रोणं गौतमः कृपः च गौतमं सगौतममिति पाठो अपरान्शकुन्यादीन् २ सुहृद्दायादवादीनां वार्तां अव्ययं कुशलं ३
कृतं कारणात्त्याव्यंजयति दुष्प्रजस्यासत्पुत्रस्य अल्पधृतेः कर्णादीच्छानुसारी वर्तनशीलस्य ५ तेजइति युग्मकं तेजः प्रभावः ओजः शस्त्रशास्त्रनैपुण्यं बलं शारीरं वीर्यं शौर्यं असहमानैश्चिकीर्षितमितः प
रं कर्तुमिच्छेत्वाक्षागृहादि ५ गरस्य विषस्य दानं भीमाय आदिना जतुगृहनिक्षेपादिकं कृतं अपेशलं मन्यायं सर्वमेव कथयामास किमुत पृथाऽभयत्र समो विदुरोपि ६ भक्तिविशेषशालिन्याः कुंत्या वृत्तमाह इतः स
विस्तरमाह पृथात्विति प्राप्तं स्वगृहे समागते अश्रूणि कलयतः मुंचतः तेइक्षणे यस्याः ७ नोस्मानिति पुत्राद्यपेक्षया नाम यः देवक्याद्याः ८ तत्रैव विशेषं पृच्छति भ्रातेय इति नचासौमे भ्रात्रेयोन्यसा
धारणः किंतु भगवान् तत्र च शरण्यः यतो भक्तवत्सलः पैतृष्वसेयान् स्वस्मरणीयान्स्मपुत्रान्स्मरति किमिति शेषः तदनुक्तिर्बाष्परुद्धकंठत्वं व्यंजयति एवमग्रेपि अंबुरुहेक्षण इति सौंदर्योक्त्यादि
दृष्टाव्यनक्ति विशेषणान्येतानि द्वयोरपि ९ ननु स्मरन्नेव मां प्रेषितवांस्तत्राह सपत्नेति वाक्यैः प्रियवचनैरितितदुच्चनश्रूश्रूषा १० ननुतत्रत्योवस्य कृत्यं विधाया चिरागत्य रक्षणादिना सांत्वयिष्यतीत्यां
शक्यस्वरक्षणेनु तत्रस्थितस्यापि सामर्थ्यमस्तीति व्यंजयंती परमार्त्या साक्षाद्भूतमिवतं संबोध्य सकरुणं त्रिभिः प्रार्थयते कृष्णेति महायोगिन् परमोपाययुक्तेति रक्षणे सामर्थ्यं विश्वात्मन् हे सर्वप्रवर्तकेति
विज्ञापनापेक्षा निरस्ता विश्वस्य भावनपालकेति ज्ञात्वाप्यौदासिन्या नौचित्यं गोविंदेति गोवर्धनोद्धरण व्यंजनं माभावात्सत्यं व्यंग्यं शिशुभिः सहेति शिशुकृष्णे सद्दर्शनाक्षमतयैवैवं प्रार्थयामि सर्वत्र चरणे
चेतीमित्याद्युक्तं नतु स्वकृष्णसहतयेति भावः एतेन विपदः संतु नः शश्वदित्युक्त्या न विरोधः ११ न चैतदर्थमन्यः प्रार्थ्यः सर्वदुःखमूलात्संसारादपि सर्वेषामपि त्वच्चरणस्यैव निस्तारकत्वादित्या
ह नेति अन्यत् ब्रह्मज्ञानमपि नैष्कर्म्यमप्यच्युतभाववर्जितं येन्येरविंदाक्षेत्याद्युक्तेः तत्र हेतुः ईश्वरस्येति मां च योव्यभिचारेण ब्रह्मणो हि प्रतिष्ठाहमित्यादि गीतोक्त महैश्वर्यस्य अतत्र आपवर्गिकात्
मोक्षप्रदात् यद्वा ईश्वरस्य शिवस्यापि भस्मासुरादिभयतो मोक्षदात् १२ स्वेप्सितोचितविशेषणैः प्रणमति शरणं यातिनम इति शुद्धाय धर्मात्मने शरणागतोपेक्षायामधर्मः स्यादिति भावः ब्रह्मणे अपरिच्छि
न्नाय परमात्मने जीवसख्यायेति सर्वत्र सर्वरक्षौचित्यं योगेश्वरायाणिमादियुक्तायेति सर्वार्थपूर्णत्वं योगाय तत्प्रापनात्मने इति ज्ञापनानपेक्षत्वं तुभ्यमिति शेषः अतस्त्वामहं नत्वा शरणं यामीत्यर्थः १३
स्वजनं पित्रादिकं जगदीश्वरं कृष्णं च मुहुः स्मृत्वा यद्वाप्यर्थे चः स्वजनमपि कृष्णं जगदीश्वरतयानुस्मृत्य जगदीश्वरमपि स्वजनतयानुस्मृत्य तत्प्राप्त्या दुःखिता सती प्रारुदत् प्रापितामहीति श्रीकृष्ण
पितृष्वसुः प्रपौत्रत्वेन तस्य भाग्यं सूचयन् हर्षयति अतएवादरेण भवतामिति बहुत्वं १४ पृथयासमं दुःखं सुखं च यस्य सः तस्याः पुत्राणामुत्पत्तिः हेतयो भूभारहर्तुः श्रीकृष्णस्य सहाय्यानि ते १५
पुत्रेषु तद्भाज्यादि विषयेमहाकामो यस्य वधुभिः दुष्टादिभिः सोहृदेनोक्तं यत्तदवदत् १६ प्रथमं सामप्रायमाह भोभो इति भ्रातरीति पांडोः पुत्रेषु सत्सु राजासनेत्वमास्थितइत्युपहासः १७ तथाप्येवं वर्ते
सेत्वं श्रेयो वाप्स्यामीत्याह धर्मेणेति शीलेन सद्वृत्तेन स्वेषु पुत्रपांडवादिषु श्रेयः कुशलं कीर्तिं च १८ तमः इहपरत्र च महादुःखं १९ आत्मजानाल्पेजेषु कथं साम्यं स्यात्तत्राह नेति इहलोके चामुत्रलो
के कर्हिचित्क्वचित्कदाचिदिति पाठो अत्यंतं नित्यं सम्यक् स्थितिर्न तस्मात्तत्रानासक्तिं कृत्वा साम्येन वर्तने धर्मः स्यादिति भावः २० जननमरणयोः सुखदुःखभोगेपि च नकेनापि साहित्यमित्याह एकइति प्रसू
यते प्रसूतो भवति म्रियते प्रमीयते हिंस्यते लीयत इति पाठेप्येष एवार्थः एक एवेति विपद्यपि सहाय्यं कोपि न करोतीति भावः २१ किंच कुशैश्चर्जितवित्तापहारितया सह वसंतोपि पुत्राद्याः शत्रवो ज्ञेया इत्या
ह अधर्मेति धर्मातिक्रमेणनिषिद्धाचारेण चोपार्जितमिति मूढस्य वित्तं संभोजनीया स्वस्य सौख्यावयमिति व्यपदेशैरन्ये पुत्रादयो हरंति जलौकसो मत्स्यस्य जीवनं जलानि तत्सुताइवेति २२ किंच पुष्णातीति
स्वबुध्या स्वीयाइत्यभिमानेन यान्प्राणधनसुतादीन् पुष्णाति ते कृतार्थमप्राप्तभोगं तं प्रहिण्वंति त्यजंति सोऽतादयस्तु जीवंतोपि त्यजंति २३ स्वयं पुनः पापेकपाथेयो नरकं विशतीत्याह स्वयमिति

धर्माद्यर्थानभिज्ञः अतस्तद्धि मुखः असिद्धोपूर्णोभिलाषो यस्य २५ स्वप्नभ्रमायाच मनोरथश्च तत् तेन तुल्यं वीक्ष्य बुद्ध्या मनो नियम्य शांतो लोभाद्युपरतः सन् स्वपरेषु समो भव यद्वा समः सन्
शांतः स्फुरवीभव हे प्रभो एवं कर्तुं समर्थं तं देवराजत्वसिद्धिरपि स्यादाह हे राजन्निति २५ कदापि समानस्यापि तिनिश्चितस्य ज्ञाध्येन प्रभो इत्यस्यान्तरं स्वस्वाच्याभावं वक्तुं तस्तोषार्थमुक्तमभिनंदति तं
यथेति यदाज्ञायेन तथा तदाज्ञायनैव दानपते इति सदुपदेशादानाभिप्रायेण २६ सूनृता प्रिया वाक् दृढदिस्थिरा न भवति कुतश्चले चंचले यतः पुत्रेत्यादि विघुतो सोदामनी स्फुटा मामे घस्तत्र
त्या यथा मेघेनस्थिरा हे सौम्येति क्रोधो न कार्य इति भावः २७ ननु जानतः कथमेवं मोहस्तत्राह इश्वस्येति विधिं विधाने छां विधुनोति अतिक्रामेत् अन्यथान्यप्रकारिकां कृत्वेत्यर्थः स
चाधुनात्रैव रूमाववतीर्ण इति सोत्रासं तन्मतमनुवदन्नाह भूभमेरिति ततोभवद्भिरेव तत्त्रयतीतव्यमिति भावः २८ अस्माभिस्तु स्व तंत्रो सो दूरतो नमस्कार्य एवेत्याह य इति दुर्विमर्श
पथया अवितर्कमार्गया गुणान् कर्माणि तत्फलानि च विभजते विविच्य व्यकारयति ददाति च दुरबोधो विहारः क्रीडा स एव तंत्रे मुख्यं कारणं यस्य तस्य संसारस्चक्रस्य गतिर्यस्मात् अतः
परमेश्वराय वशीकृतसर्वत्त्वेन तन्नमस्ते २९ इति इदं शे वैषम्यापरित्यागलक्षणं स्फुटं हृद्यं पांडवादिति ३० पांडवान् प्रति अंतः क्रौर्यं बहिर्मार्दवाभ्यां विविधं चेष्टितं एतत्सर्वं त्वया बुध्य
तएवेति भावः ३१ इति श्रीमद्भागवत दशमस्कंधे संश्रयः अध्यायऊनपंचाशत् तोषिणी सार संग्रहे ४ इति श्रीभागवते दशमस्कंधे श्रीमद्दनंतोपाध्यायसूनुकाशिनाथोपा
ध्यायकृते तोषिणी सारे एकोनपंचाशत्तमोध्यायः ४९ इदं कारंजवासिनः सरवाशमशेषस्य ज्ञेयं राम पत्र संख्या + हेकोरव्येति + २ राम

श्रीभवानीशंकराभ्यां नमः श्रीरुक्मिणीसमेतं श्रीमद्विठ्ठलविभुं गुरुं स्वभुवः धीवाग्विलासहेतुं श्रितकामदुघांघ्रिसारं वंदे १ जयति तिमानतमोद्याध्वांतध्वंसं सुमंगलं विमलं कृतिनय
नभागधेयं श्रीकृष्णाख्यं परं ब्रह्म २ श्रीशंकरं मौलिसुधाकरं गुरुं शुभां भवांगार्धभवां भवानी विघ्नानदं तं वरदैकदंतं वंदे विधिं वेदनिधिं सरस्वती ३ वंदे श्रीमदनंताभि
धगुरुश्चरणौ सतां मताचरणौ जननीमथोन्नपूर्णां संपूर्णां सद्गुणैर्वंद्यां ४ श्रीमद्भागवते कूर्मो दशमस्कंधदीपकं सद्भक्ततोषिणीसारसंग्रहं स्वामिसंमतं ५ स्फुटार्थव्यक्तये व्या
पि स्वामीपादीयमाहृतं टीकाद्वयेप्यनुक्तं तद्भाति शेषेन चिन्हितं ६ श्रीभागवतनिष्यंदी(?) टीकाद्वितिकारिये श्रीधरस्वामिपादांस्तान् वंदे भक्त्येकदर्शकान् ६ श्रीमद्भागवतं सू
त्रे भाष्यं श्रीस्वामिसत्कृतिः सद्भक्ततोषिणी तत्र सेयं विवरणायते ७ तत्सारसंग्रहं कर्तुं गुरुः श्रीमाधवो मम तत्र मामनुगृह्णंस्तु संतो मंदमतिं जडं ८ गरुत्मतातिसाम्येषु पतंवे(?)
ज शल्लभायितुं ममैतद्धीष्यते क्ष्यंति संतो हासेरतः कृती ९ अथ स्वतःप्रमाणभूतश्रुतिव्याख्यानग्रंथप्रणयनादरं परित्यज्य पदवाक्यप्रमाणपारावारपारीणा विद्वूरिणाः श्री
धरस्वामिप्रमुखाः पौरुषेयपुराणव्याख्यानेषु किमिति प्रवृत्तिरे पौरुषेयाणां भ्रमप्रमादनिर्बंधादिपुरुषदोषसंभवादापादिताप्रामाण्यशंकाकलंकितत्वात् दृश्यते च श्री
वैदैर्मवादिपुराणेषु विष्णुशिवाद्युत्कर्षप्रतिपादननिर्बंधः अत एव परस्परविरोधेन बाधादप्यप्रामाण्यं श्रुतप्रतिपादितयागादिधर्मादिभ्यो भगवच्चरणपरिचरणा
दिधर्मादिश्रेष्ठ्यप्रतिपादितेन श्रुतिविरोधाच्च इत्थमेवमन्वादिस्मृतिविरोधश्चेति न शंकनीयं पुराणानां वेदत्वात् निश्वसितन्यायेन ऋगादिसमकक्षतया श्वरादुत्पन्नत्वात्
तथा च शास्त्रयोनित्वादित्यधिकरणे भाष्योदाहृता बृहदारण्यश्रुतिः अस्य महतो भूतस्य निश्वसितमेवैतद्यदृग्वेदो यजुर्वेदः सामवेदोथर्वांगिरस इतिहासः पुराणं विद्या उ
पनिषद इत्यादि एतेनापौरुषेयत्वं व्याख्यातं प्रमाणेनार्थमवगत परचितत्वाभावोत्यपौरुषेयत्वं सजातीयोच्चारणानपेक्षोच्चारणाविषयत्वं वा तत्रेश्वररचितत्वं ताव
दुक्तश्रुतिसिद्धं नत्वन्यावृतत्वान शक्तिः सर्वज्ञेश्वरः प्रमाणेनार्थमवगत्य पुराणानि रचितवानिति वक्तुं युक्तं न वाप्रतिकल्पं पुराणानुपूर्वी भेदमानमस्तीत्युक्तलक्षणा
नुगतिः न चैवमपि ऋग्सामादाविवात्र वेदत्वेन श्रुतौ व्यवहाराभावान्न वेदत्वमिति शंक्यं ऋग्वेदं भगवोध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पंचमं वे
दानां वेदमित्यादिना छांदोग्ये सनत्कुमाराध्याये बहुशस्तद्दर्शनात् तथेतिहासपुराणयोश्च इतिहासपुराणं च पंचमं वेदमीश्वरः इतिहासपुराणानि पंचमो वेद उच्यते वेदान
ध्यापयामास महाभारतपंचमान् कार्ष्णं च पंचमं वेदं यन्महारतं स्मृतमिति श्रादौ स्कांदे व्यासीकीत्यादिसमाख्याः कर्तृस्मरणानि च शाकल्यतैत्तिरीयेत्यादिवत् प्रव
चनापेक्षाणी यत्तु पौरुषेयत्वानुमाने स्मर्यमाणकर्तृकत्वमुपाधिरिति तत्र कर्तृपदं प्रवक्तृपरं अन्यथा तैत्तिरीयादिसमाख्याद्वारा कर्तृस्मरणे न साधनव्याप्या
पत्तेः चक्रे सात्वतसंहितामित्यादौ श्रीव्यासादिकर्तृत्वस्मरणमपि पूर्वसिद्धपुराणविस्तरस्य सुखग्रहणाय संक्षेपणपूर्वकप्रवचनपरं अन्यथेश्वरादुत्पन्नत्वप्रतिपा
दकश्रुतिविरोधापत्तेः पुरा व्यासादिकृतप्रवचनात्सर्वमेव भवनमित्यर्थक पुराणसमाख्याविरोधाच्च तथा च मात्स्ये कालेनाग्रहणं मत्वा पुराणस्य द्विजोत्तमाः व्यासरूप
महं कृत्वा संहरामि युगे युगे अद्याप्यमर्त्यलोके तु शतकोटिप्रविस्तरं तदर्थोत्र ८ चतुर्लक्षः संक्षेपेण निवेशित इति वेदपुराणेति भेदव्यवहारो गोबलिवर्दन्याये
नन्वैश्वर्यादिसद्भावात् तावता कृतः पुराणानां हि वेदत्वे पित्लौकिकत्वाद्(?) बहुल्यमैश्वर्याभावादिधर्मवत्त्वेनैव प्रवृत्ति नैश्वर्याभावेनेतरयब्राह्मणवत् टीकाकृतां

तच्चतत्रछंदसमोर्प भित्यादिव्याख्यानंच वैदिकस्यैव प्रक्रियया त्र प्रवृत्तिर्नतु प्रक्रांतलोकसाधारणये सार्थकं पुत्रेति प्रयोगदीक्षितोक्तो चतुर्थे स्वामिदूषणे पुराणस्य वेदत्वेनाकु
तवदिति सूत्राप्रसक्तिरिति स्वाम्याशयसत्वेपि तत्सूत्रप्रसंजनं ब्राह्मणो यजेतेत्यादौ परिव्राजकेतरार्थकब्राह्मणशब्दवत्स्वाणि नाछंदस्यादिशब्दाश्च तु वैदार्थकाः अप्रयुक्ता न पुरा
णरूपपंचमवेदार्थका इति व्याख्या नाभिप्रायकं नतु वेदत्वाभावाभिप्रायकं अत एव पुराणेषु वेदत्वप्रत्यभिज्ञापकाः वैदिकप्रयोगाः अगे पुल्लिंगत्वज्ञापका इति ज्ञातनीयं एवं कश्चित्पुराणाः
नास्मृतित्वेन व्यवहारोपि पूर्वोक्तवेदत्वव्यवहाराविरोधात्स्वराद्यभावकृतस्मृतिसादृश्याद्गौणो बोध्यः न च वैपरीत्यं शंक्यं वेदत्वव्यवहारस्य श्रौतत्वेन प्राबल्यात् श्रोतव्य इ
तिनियमेन वैदिकानां पुराणप्राधान्यं निरस्य तदुक्तिस्तु गौणव्यवहारोथ स्मृतित्वाभिमत्याः श्रुत्युक्तवेदत्वाननुसंधानजन्या निर्मूला विधेः पौरुषग्रंथादिव्यावर्त्यांतराणां से
त्वा तेषामप्यन्यथासिध्या न कोपि विधिविरिति वाचस्पत्यादिमुख्यसिद्धांताच्च स्मृतादेः पठने स्त्रीशूद्रयोः श्रवणेधिकारस्तु निषादस्थपतिन्यायेन शूद्रो द्वेष्टि मंत्रपाठा
दौ निषादस्येवाधानं रथकारस्येव च वाचनिकः एतेन पुरुषदोषसंभावनाज्ञाविनमप्रामाण्यं निरस्तं अपौरुषेयत्वस्य समर्थितत्वात् यत्तु परस्परविरोधेन बाधादप्रामाण्य
मिति तन्न उदितानुदितहोमश्रुतिवद्विकल्पाद्यंगीकारेण विरोधपरिहारात् एतेन अन्योन्यनिंदा समाहिता नहि निंदा निंदितुं प्रवर्तते किंतु विधेयं स्तोतुमिति न्यायात् यदपि
श्रुतिविरोधाज्ञावनं तत्राप्यप्रतिसमाधेयविरोधे समुच्चयविकल्पव्याख्यानेनैव परिहारः पुराणस्यापि वेदत्वेन समानबलत्वात् अत एवोत्तरमीमांसायां श्रुतिविरोधेन सांख्यपातं
जल्पगौतमादिस्मृतीनां शैववैष्णवादितंत्राणां चाप्रामाण्यमिव न कचिदपि सूत्रभाष्यकाराभ्यां पुराणानामप्रामाण्यमवादि प्रत्युतेतिहासपुराणाभ्यां वेदार्थमुपबृंहयेदिति वा
क्यमनुसृत्य तत्र तत्र पुराणानुसरणेनैव श्रुत्यर्थो व्यवस्थापितः अत एवोक्तं नारदीये वेदार्थादधिकं मन्ये पुराणार्थं वरानने वेदाः प्रतिष्ठिता देवि पुराणे नात्र संशयः पुराणमन्यथा कृ
त्वा तीर्यग्योनिमवाप्नुयात् सुदांतोपि सुशांतोपि न गतिं प्राप्नुयात्कचित् इति स्कांदे च वेदवन्निश्चलं मन्ये पुराणार्थं द्विजोत्तमाः बिभेत्यल्पश्रुताद्वेदो मामयं चालयिष्यति इतिहासपुराणैस्तु
निश्चलोयं कृतः पुरा यन्न दृष्टं हि वेदेषु दृष्टं तत्स्मृतिषु द्विजाः उभयत्र न दृष्टं हि तत्पुराणैः प्रगीयत इत्यादि नच वेदार्थमुपबृंहयेदित्युक्त्या वेदार्थव्याख्यानभूतत्वं पुराणानामापद्यत इति
तन्मूलकतयैव प्रामाण्यं न वेदत्वेनेति वाच्यं मंत्रब्राह्मणयोर्वेदत्वेपि व्याख्येयव्याख्यानभावदर्शनात् तत्र मंत्रापेक्षया व्याख्यानभूतब्राह्मणस्यैव प्राबल्याच्च व्याकरणादौ व्याख्येयसूत्रापेक्ष
याभाष्यवार्तिकग्रंथयोरेव प्रामाण्यदर्शनाच्च एतेन स्मृतिविरोधपरिहारोपि व्याख्यातः चतुर्वेदार्थव्याख्यानत्वेन साम्ये समुच्चयविकल्पसंभवात् पौरुषेयत्वेन दौर्बल्ये पंचमवेदेन बाधसं
भवात् सर्वत्राप्युत्कर्षापकर्षवर्णनस्य प्ररोचनतात्पर्यकत्वान्न कापि विरोधगंधोपीत्यपि सुगमः पंथाः यच्च श्रुतिमूलकतया प्रामाण्यं पुराणानां न स्वतः इति केश्चिदुक्तं तत्स्मृतित्वाभिमान्य
करदर्शिमतोपपादनमात्रं न तत्त्वकथनमुक्तविरोधादिति दिक् तस्मादृगादिवेदस्य संप्रति दुष्पारत्वात् दुरधिगमार्थत्वाच्च तदर्थनिर्णायकपुराणेतिहासात्मकवेदशब्दत्वा एव विचारणीयः
दृश्यते च श्रीमद्भागवतस्यादरः शंकराचार्यस्वामीचरणप्रभृतयः सनत्सुजातीयादिव्याख्यानप्रवण इत्यलं तत्रापि श्रीमद्भागवतमेव श्रेष्ठतमं सर्ववेदार्थसूत्रलक्षणां मंत्रराजवरां गाय
त्रीमधिकृत्य प्रवृत्तत्वात् तथा च मात्स्ये पुराणदानप्रस्तावे यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः वृत्रासुरवधोपेतं तद्भागवतमिष्यते लिखित्वा तच्च यो दद्याद्धेमसिंहसमन्वितं प्रोष्ठ
पद्यां पौर्णमास्यां स याति परमां गतिमित्यादि एवमग्निपुराणे पुराणांतरेपि ब्राह्मादिवाराहांतानां वेदव्याख्याद्याः पौर्णमास्यां दानकालाः तत्र क्रमप्राप्ताः श्रीभागवतस्य प्रोष्ठपदी हेमसिंहसम
न्वितमिति हेमसिंहासनारूढमित्यर्थः सर्वपुराणचक्रवर्तिरूपत्वादिति टीकाकृतः वस्तुतस्तु नात्र शब्दप्रमाणके पूर्वेर्थे हेतुचिंतया मनः खेदनीयं ब्राह्मवैष्णवादिषु जलधेनुघृ
तधेनुसमन्वितत्वे हेत्वभावात्कथंचित्कल्पनस्याप्रामाणिकत्वात् एतेन श्रीमद्भागवतस्य वैष्णवपुराणत्वेन तद्दाने एकादश्यादिकालो गरुडादिवाहनयोगश्च युक्तो न पौर्णमासी
सिंहादियोग इति कुमतस्फेहः परास्तः शैवत्वे लैंगादौ शिवरात्र्यादिकालस्यादर्शनात् नंद्यादिवाहनयोगस्य

क्वाप्यदर्शनाच्च स्यादेतत् लक्षणमनूद्यैव भागवं दद्यादित्येतावत्येवोक्तेपि भगवताप्रोक्तं भागवतं भगवतः इदं प्रतिपादकं भागवतमिति समाख्ययैव भागवपदार्थनिर्णयः स्यादे
वेति कुतः श्रीभागवतस्य लक्षणोक्तिपूर्वकमत्रवाक्ये तद्दानविधिरिति अत्रोच्यते भागवतं दद्यादित्युक्ते न समाख्यामात्रेण विशेषनिर्णयः एवं चकार भगवान् व्यासः कृपणवत्सल इ
त्युक्त्या भगवद्व्यासप्रणीतपुराणमात्रस्य भागवतत्वापातात् श्रीविष्णुशिवयोर्द्वयोरपि भगवत्त्वेन तत्प्रतिपादकविष्णुपुराणशिवपुराणादीनामपि भागवतत्वापाताच्च तेनेह
नस्य वाक्यान्तरेण विधानात् सर्वशेषान्निर्णये च कृते स्यात् वेदमब्भागवतशब्दयोरेवमपि परस्परातिप्रसंगापरिहाराच्च लक्षणोक्तिपूर्वकं दानविधिरिति प्रथमस्कंधे जन्माद्यस्येति पद्यव्याख्यो
पसंहारे एतेन भागवतं नामान्यदिति न शंकनीयमिति श्रीधरस्वामिपादोक्तो रन्यत् शिवपुराणविष्णुपुराणादिकमेव भागवतं नामेति न शंक्यमित्यर्थ एवमाशयो विद्वद्भिर्विभावनीयः सैवत्सरप्र
दीपघ्नतस्कंदवचने च वैष्णवानां भागवतविचारावश्यकत्वमवगम्यते शतशोथ सहस्रैश्च किमन्यैः शास्त्रसंग्रहैः न यस्य विद्यते गेहे शास्त्रं भागवतं कलौ कथं स वैष्णवो ज्ञेयः शास्त्रं भाग
वतं कलौ गृहे न तिष्ठते यस्य स विप्रः श्वपचाधम इति एवमन्यान्यपि वाक्यानि तत्तत्पुराणतोवगंतव्यानीति सर्वमिति रमणीयं प्रायः प्रतिपदं शक्यव्यंग्यभावार्थरूपतः श्रीभक्तितोषिणीना
मश्रीभागवतटिप्पणी सुविस्तराकारि येस्तान् वंदे भक्तशिरोमणीन् श्रीरुक्मतकृष्णभक्तसर्वोत्कर्षप्रदर्शकान् २ श्रीवासुदेवायनमः श्रीराजोवाचेति श्रीशब्दप्रयोगः श्रीकृष्णली
लारंभप्रेमश्रीयुक्तत्वात् समासांतानित्यत्वान्नखच्च पाठांतरं तु साधारणं वक्तुः प्रहर्षणार्थमुक्तमभिनंदति सार्धकेन कथितः तत्तज्जन्मकथाविस्तरेणाप्युक्तः तत्रापि वंश्यानां पोशादीना
प्रपंचः भवतेस्यादरात् सोमस्य पूर्वनिपातः तद्वंशो श्रीकृष्णावतारेणाभ्यर्हितत्वात् चंद्रसूर्यौ ध्रुवराजचरितं च कथितमित्यानुषंगः पुरुरवः ककुत्स्थादीनां उर्वशीपतित्वेन्द्रारोहादीनां इ
तत्त्वे यदोश्च वंशविस्तारतद्वंशचरितमद्भुतं नितरां सम्यक् कथितमिति संबंधः धर्मशीलस्यत्र धर्मो भक्तिलक्षणः धर्मः प्रोज्झितकैतवेत्यनुसारात् यदोर्भक्तिनिष्ठत्वमेकादशे व्यक्तं मुनि
सत्तमेति मुनिषु सन्नीशाभक्तः सतरः श्रीकृष्णरतः स च मः श्रीकृष्णप्रेमविशेषवान् एवं संबुध्यांकव्येसामर्थ्यं व्यज्यते १ अभीष्टमाह सार्धकेन तत्रेति यदुवंशेशेन बलदेवेन सहावती
र्णस्येति तद्वीर्यशुश्रूषा ध्वन्यते नाहं प्रकाशः सर्वस्येत्युक्त्यासाधारणजनप्रतीत्यंशेनेति श्रीस्वाम्याशयः विष्णोरिति अवतीर्णत्वेपि व्यापकत्वच्युतिरहितस्येत्यर्थः दामबंधनादा
विर्दव्यक्तं प्रभावमयचरितानि शंसस्वेति वत्सोत्कर्षवर्णयेत्यद्भुतत्वं नोस्मान्प्रतीति बहुत्वं तत् शुश्रूषया स्वबहुमानात् स्वसंग्यपेक्षया वा साचक्रुपया विनयेन वा यद्वा नोस्माकं पांडवा
नां यो विष्णुरित्यन्वयः २ ननु सर्वाण्यपि तस्याद्भुतानीति चेत् सर्वा एयेव शंसेत्याह अवतीर्येति अवतारप्रयोजनमुद्दिश्य सर्वेश्वरोपि कृपयाकृतानि पाल्यपीतिसः विश्वस्यात्मा चेतयिता प
रमप्रेमास्पदश्च यानि यावंति कृतवान् तानि सर्वाण्येव कीर्तय विस्तरेण प्रयोजनादिनिर्देशेनेत्यसंभवेपि लालसयोक्तिः ३ लालसामेव व्यनक्ति निवृत्तेति मुक्तेः परमफलत्वबुध्याउ
पसर्वाधिकतयागीयमानत्वादानंदरूपत्वं तत्र मुक्ताः त्वानि भक्त्याश्चेति द्विविधाजीवन्मुक्ताः प्राप्तसालोक्यादयश्चेति तेयाः भवौषधादिति मुमुक्षूणां एवं दुःखनिवर्तकत्वं शब्दमात्रेण
श्रोत्राणि अर्थेन मनांसि चाभितो रमयतीति विषयिणामपि सुखदत्वं एवं फलत्वसाधनत्वात्सर्वसेव्यत्वं अतो गुणानां वात्सल्यादीनां अनुवादः निरंतरापानः पुनिकोवा कथा ततः क
स्तृप्तो विरतो वास्यात् अत्र मुक्तानां तल्लीलानंदेशब्रह्मानंदाद्यधिकतया स्फुरति उच्छलिततया गानत्वेन परिणमतेचेति स्वभावसिद्धत्वेन प्राधान्यात्साधर्म्यं मुमुक्षूणां तथा स्फूर्त्यभावा
दौषधरूपत्वं विषयिषु श्रोत्राद्यभिरामतामात्रमिति शास्त्रेस्मिन् पदार्थवाक्यार्थानां क्रमस्त्रिविधः पूर्वपूर्वन्यूनउत्तरोत्तरन्यूनायाद्दच्छिकन्यूनश्चेति द्वयं केमुत्यविवक्षया अंतेप्रे
मावेशेन क्रमस्यागः अत्र त्रैविध्योक्तिस्तु मुक्तमुमुक्षुत्वाभावेपि समविषदतयाभिरामत्वेपि त्रिनेयुक्तेति विनयात् पुमानिति स्त्रीक्लीबवसरतेत्रापि कतोद्रियश्चविरज्यतां नामे
त्यर्थः पुंस एव प्राधान्याद्वा यद्वा जीवमात्रं इत्यर्थः पशुघ्नात् व्याधात् तस्य विषयित्वेपि हिंसादिक्लेशव्याप्तत्वेन लोकद्वयसुखासिद्धेस्तदभावः व्याधमाजीव मामरेस्य
केः यो विरज्येत सव्याधवत् लोकद्वयसुखभ्रष्ट इति भावः सामान्यतो भगवतः कीर्तनस्येदृशत्वे किमुत श्रीकृष्णस्येति हृदयं ४ अथ त्रिकं निजकुलैकगतेः श्रीकृष्णस्य कथा

मयासहाश्वाव्येत्याशयेनाह पितेति अमरंजयैरित्यतिशौर्यं देवव्रतेतीच्छामृत्युवादिना दुर्जयत्वं सत्त्वाद्यः श्रेष्ठः पाल्लकोयेषामिति तेषामपि दुर्जयत्वं अतो दुस्तरं सैन्यमेव विस्तीर्ण
त्वादिना सागरं यत्प्लवाः प्लवस्तरणसाधनं तच्च न वहित्रवदायासापेक्षं किंतु विलक्षणमेवेत्याह वत्सपदमिव कृत्वेति अनायासेन तरणात् ५ विशेषतो मज्जीवनदत्वश्रीकृष्णमेव
वेत्याह द्रौणीति विप्लुष्टं ब्रह्मास्त्रप्रभावाग्निदग्धमपि इदमिति प्रत्यक्षत्वान्मात्र संशयो न वाजन्मोतरीयमित्यर्थः संतानबीजमिति करुणायां हेतुः स्वस्मिन् तत्सत्त्वे हेतुश्च्यसेव पांडवानां कु
रूणामपि पृथगुक्तिः स्नेह शिष्यापेक्षया ब्राह्मणपरिज्ञानकृत् उभयेषां परिशिष्टे एकबीजत्वोक्त्या दुःस्थानां सम्यक्छेदः प्रकारांतरेण बीजरक्षया परलोकहिताचरणं च ध्वनितं आत्त
चक्र इति स्वप्रतीत्यनुसारेण तेजोविशेषेण गदात्वात्तानात् अत एव प्रथमे उल्कोन्मामयं तेत गदां मुहुरिति सूतोक्तिः इच्छामात्रेण रक्षणसमर्थे सर्वगतेपि चात्तचक्रः कुक्षिंगत
इति च्योक्तिर्देः यातुत्वातिशयव्यंजनाय शरणंगतायाइति मातुस्तु देवकीभक्तत्वेन तद्भक्तिः कुलपरंपरागतेति ध्वनिः मे मातुरिति तत्संबंधात्स्व धन्यताव्यक्तिरिति ज्ञाति चकारान्मातुरंग
च जुगोपेत्यर्थः अतस्त्वत्कथाविरत्यानितरां कृतघ्नतास्यादिति तात्पर्यं ६ ननु मुक्तादीनां भवादृशां च परमफलरूपत्वादुपादेयोपि तद्गुणानुवादस्तद्विमुखदुर्जनानां शंकया गोप्यतइत्याशंक्य
विमुखान्प्रवर्तयन्प्रार्थयते वीर्याणीति कीर्तनादिहीनात् देहिनां अन्तर्यामिपुरुषरूपेणामृतं मरणादिरहितं मधुरं वा स्वलोकं स्वभक्तिं वा चात्मानमितं च ददत् तस्तद्विमुखानां बहिर्देहिनां बा
ह्यकालरूपेण मृत्युं ददतो वीर्याणि वदस्व तान्सर्वान् प्रत्यपि प्रकाशय बहिर्देहिनां मत देहस्यपर्थमिति भावः यद्वा वीर्यविषयमुत्साहमाविष्कुर्विति यत्नार्भकता माशंकिष्ठा इति भावः ना
सनोपसंभाषेति न इः यद्वा हे स्वेति छेदः हे मदेकबंधो मद्धनेति वार्थ इति न त्वात्मनेपदानुपपत्तिः अथवांतर्हृदि स्थिते ध्याते रिति यावत् पुरुषस्य स्वस्य रूपेः परमानंदं बहिः स्थैर्य मादिभिः
कालरूपैर्दुःखं यद्वा बहिरंतश्चामृतं बहिरंतश्च मृत्युं दुःखं वयच्छतइत्यर्थः मायया मनुष्यतया प्रतीतस्य पू[illegible]र्ण ब्रह्मणइत्यर्थः यद्वा तेयाप्यमनुष्यस्य तत्र तत्रैश्वर्यप्रकटनात् यद्वा
मायादंते कृपायां चेति विश्वकोशात् कृपयेत्यर्थः मायास्याच्छांबरीबुध्योरितित्रिकांडशेषात् निद्योडाश्च मायायां नानावस्थायामपि मनुष्यस्य शुकादीनामपि नराकृति ब्रह्मरूपत्वेनैव
स्फुरतः न तु जगत्प्रतीतावि बाधिष्ठानचिन्मात्रत्वेनेति भावः अथवाखिलदेहभाजां नियमं विनैवेत्यर्थः मृत्युमृतत्वं च यच्छतः केषांचिद्देहिकादि मृत्युत्वेन दुर्घटदेहपातानां नी
ष्मादीनां मृत्युं केषांचिच्च भगवद्विरोधित्वेन दुर्लभं मोक्षं कंसादीनाममृतं मोक्षमपि चास्ति तत्रादीनां भक्तिगतिमपि कुर्वतो वीर्याणि स्वच्छंदचरितानि वदेति तत्र हेतुः पुरुषरू
पैः कालरूपैरंतर्बहिः स्थितस्येति ७ तत्र विशेषं पृच्छति रोहिण्याइति चतुर्भिः यः श्रीदेवकीपुत्रेषु संकर्षणाख्ययोक्तः स एव रामो रोहिणीपुत्रत्वेनोक्त इति गर्भे स तत्र कथं योरित्यादिः ८ मुकुंदः
मुक्तिदातेति कंसमुक्तिदाना यत्र वरस्थातुं युक्तो न तु गंतुमिति भावः यद्वा वसुदेवादिभक्तेभ्यः स्वैकदानाय्यान्येभ्यो मुक्तिं ददाति स तत्र्ह स्वक्वा कुतो व्रजंगतः ततोपि तत्रनंदादि प्रेम वशी
व्यस्यादितिभावः मथुरां सत्वा ज्ञातिनीर्यादवैः क्व वा वसति द्वारकालीलाप्रश्नः यद्वा ज्ञातीनूवो इष्टमेघामृत्युत्त्याष्ट हट्टनाख्य पूर्वा वासं त्यक्त्वा गोपैः सह क्व वा वसेति वृंदावन
लीलाप्रश्नः सात्वतां भक्तानां पालक इति तत्सालनार्थं तत्र तत्र वासो चित्यं ९ मधूनां पूर्यां मथुरायां द्वारकायां च वसन्निति तत्रास कालेन्यत्र कृतमपि संगृहीतं कृतवान्ईशो रुद्रः
तीवाति व्याप्नोतीत्यमानुषकर्मसंभावना किं किमित्यवधीत् १० देहं मानुषमिति देहशब्दस्तद्वयवपरः एकदेशी समासप्रत्याख्यानपरे परवल्लिंगसूत्रभाष्ये गजानना दिशब्दे
चतेः ध्यासपष्टत्वात् तथा च विराट् देहावयवं मनुष्यलोकमित्यर्थः एवं च विराड्विदुषां तत्त्वं परं योगिनामिति विराड्शमानुषत्वं निषिध्यपरितत्त्वतयास्थापनेन न विरोधः यद्वा मानु
षशब्दोत्र यादवशब्दवन्मनुवंशप्रादुर्भूततापरः आश्रित्य प्रकाश्येत्यर्थः स्वाश्रयाश्रय इत्युक्तेः यदुपूर्व्यां द्वारकायां मध्वपूर्यामिति पाठः पूर्ववत् ११ अनेन कतिप्रष्टव्यं स्वयमे
व सर्वं कथयेत्याह एतदिति रूपस्य नराकृति ब्रह्मणो विचित्रं चेष्टितं मुने तच्छीलामननशील अनंतत्वात्कथं सर्वलीलाज्ञानं तत्राह सर्वज्ञेति मननं विनैव सर्वं जानतः सद्दामम
न विषयविषयं कं ज्ञानं केमुत्यसिद्धं १२ कथामृतपानविच्छेदविप्रापराधातुतापदुःखं क्षुत्तृड्भ्यां तद्भिः प्राणा निर्यास्यंतीत्याशयेनाह नेति अतिकष्टेनैव सह्या मुनिगलेसर्प

राम

निक्षेपतो नर्थं मल्लत्व षासोदर्यो तत्राप्येषा नशनोक्ष्या तत्रापि विशेषतस्स्कोदमपि यद्वान्यैर्दुस्सहापि राजत्वान्मद्युतरोगं नाम पीत्यादि सर्वदोऽनसर्वथानिषेधार्थः तत्र हेतुः दुःखहरस्य कथेवा ३
मृतं संसृतिविस्मारकत्वान्मादकत्वान्मधुरत्वाच्च पिबंतमपि वर्तमानशत्रापानाविच्छेदः यद्वा पानोद्यतमेव किं पुनः श्रीकृष्णकथां पिबंतं अमृते नस्तु अत्र निरासो नाश्चर्यमिति भावः मुख
स्यांभोजत्वे सौदर्यो मोदादिना तदधिवासेन च पेयगुणोत्कर्षः भक्तमुखेन हरिकथायां माधुर्यातिशयः प्रसिद्धः रूपापूर्णो भोजात्सदासुधास्रुतिवत्पन्मुखाद्धरिकूथास्रवदतिवा ध्वनिः १२
तदुक्त्या प्रीतः श्रीशुकोवक्तुं प्रवक्तत्यस्याह सूतः एवमिति भृगुनंदनेति हर्षात्संबोधनं साधोः परिक्षितः तच्छीलात तत्र बुभुत्सया प्रश्नं निशम्याथ प्रश्नानंतरमेव सोनिर्वचनीयमहात्म्याय
तो वैय्यासकिः वेदव्यासनकर्तृत्वेन सर्ववेदतत्त्वस्यालौकिकः पुत्रः भगवान् उत्पत्तिं प्रलयं चैवेत्युक्तलक्षणात् यद्वा भगवत्कृत्योः तुल्यादरणीयत्वात् साधवो हृदयं मह्यमित्यते दाभिव्यं
जनात् विष्णुनागर्भे प्रविष्टेनास्त्रतेजो रक्षितत्वाद्दत्तं इति भक्तो नामत्वं प्रत्यर्चितमघ्याघयासंमान्य चित्ताकर्षकस्य चरितं किंच कलौ यस्यापंतत् यद्वा कलेर्युगाधिपतेरपि दोषं किं पुनस्तत्रत्यज
नस्य अथवा किं तत्त्वे किं फलं किं साधनमिति यः कलहः स एव तन्नाहोत्यनिश्चयप्रतिबंधकत्वात्कल्मषं तद्धंतीति यद्वा कलिं च कल्मषं च द्वंद्वः खं चेति द्वंद्वः कलिरूपकल्मषजयिनमिति विष्णुरा
तविशेषणं वा नानामतत्वाभिनिविष्टतत्वमुनिसभायां रहस्यं तत्कुतः प्रकाशितं तत्राह भागवतेति भागवता एव भागवतशास्त्रश्रवायस्य अभ्यगान्महदाख्यानं नित्यं विष्णुजनप्रियमित्युक्तेः अ
न्यानपेक्षत्वादिति भावः अथवा भगवते षुश्रेष्ठत्वात्तेषामपि मनःस्वसजातीयेकृतवानिति भावः तदुक्तं प्रह्लादमुद्दिश्य दुःसंगदीनान्यमनः शमंव्यधादिति अत्र पक्षे पुरस्तमार्ग १४
वक्तुमारभते स्फुरन्नापि शुकुडुवाचेत्युक्तिः श्रोतॄणामुक्तार्थविघ्नानामवधापनार्थं क्वचित्तदत्तावस्करे तेषामुत्सुकतया नहि तत्वात एवमन्यत्रापि तत्र शुक इति प्रेमभरेण कीरवन्मधुर
भाषणात् तथा च ब्रह्मवैवर्ते व्यासं प्रति श्रीकृष्णवाक्यं व्यासत्त्वदीयतनयः शुकवन्मनोज्ञं वेदवचो भवतु तच्छुक एव नाम्नेति यद्वा भक्तिव्रजादाविर्भूते तेन भगवता शुकवत् मधुरेव
कुंठीक्षितत्वाच्छुक इति एवमग्रेपि अन्योन्यप्रीतो कथारस इति प्रश्नमभिनंदति द्वाभ्यां सम्यगिति समीचीनं व्यवस्थितं निश्चयो यस्याः राजर्षिषु सत्तमेति वज्झो यं श्रवणेन प्रेमविवशं श
ज्ञानमवधापयितुं तत्तत्स्थाने संबोधनमिति सर्वत्र बोध्यं प्रकरणवशात्तु क्वचिद्विशेषोपि व्याख्यास्यते १५ त्वया स्वात्माशयं तमुनयो हंच पाविता इत्याशयेनाह वासुदेवेति पुन
स्तन्मन्त्रामोक्तिः श्रीकृष्णस्येवोत्कर्षाय कथायामपि प्रश्नः किं पुनस्तत्त्वरूपविषयः प्रश्नोपि त्रीनत्रिविधान् पुरुषानि प्राधान्यात् वक्तारं वक्तृत्वेन स्थापितमात्रं विभुतवक्तुं प्रव
तप्रष्टकं च अस्तु कृष्णमपि अनुषंगतः प्रश्नश्रोतृनपि वक्तुः प्रष्टव्य्येकत्वमनेकात्वानोचित्यात् पादसलिलं गंगाश्रीशालग्रामादितीर्थं वायथान पेक्ष्याधिकारमादौ प्रष्टुः स्थानीय
सत्कारं ततो वक्तुः स्थानीयसिच्यमानं चानुपगतः सेव्यसंगि नापि पुनातीति श्रुतोनु पदितो ध्यातइत्युक्तेः १६ अवतारप्रसिद्धकारणमाह कृष्णमिति द्वाभ्यां स्वभावोक्तिः सदेवमाना

स्य

दिदेत्यलक्षणवस्त्वाहेत्यवल्लं ज्ञातायुतेरित्यपरिमितत्वं अत्रा तेतैसत्त्वत्वं तत्र हेतुः हरीति अयुते भारेणेति वैय्यधिकरण्येनाऽऽतेहेनान्वयः रक्षितारं ब्रह्माणं ययो गतवती यद्वा तं प्रति
शरणं ययौ आश्रितवती १७ गौरितिरूपाजननार्थं तत्रापि खिन्ना दुःखिता करुणं यथा तथा क्रंदंति अश्रुव्यापननयना वितीरतिके स्थिता समवोचत सम्युगुक्तवती स्वमिति पाठे स्वी
यं अत्र विष्णुपुराणे कंसनरकबलिबाणादीनां राजकुलेवतरणं तदसंख्यत्वं सेनाबाहुल्यमति भारं चोक्त्वा क्रियतां तन्महाभाग मम भारावतारणं यथा रसातलं नाहं गच्छेयमतिवि
कलेत्युक्तं १८ अथ सद्य एव स्वर्थकं मेगत्वार्थं च सन्निनयनमिति तस्य भगवत्प्रियत्वेन सायार्थं तिरमिति ननु तत्रत्य भगवत्स्थानं इति दोलत्वं गोलोकाधिष्ठातावासुदेवाख्यः
श्रीकृष्णः सर्वांशी संकर्षणांशः कारणार्णवशायी महतत्त्वस्रष्टा पुरुषः अनिरुद्धांशो गर्भोदकशायी क्षीरोदशायी सर्वांतर्यामि पुरुषश्च प्रद्युम्नांशः हिरण्यगर्भांतर्यामी एतेत्र
योपि वासुदेवांशः इत्यादिके तन्मतप्रक्रिया १९ समाहितः सन् जगतांनाथं विशेषतो देवानां देवपूज्यं वर्षति कामान् आकंपयति क्लेशानिति वृषाकपिं पुरुषं महत्सृष्ट्वा पुरुषाभेदेन क्षी
रशायिनं विष्णुपुरुषसूक्तेन भक्त्या तुष्टाव इति २० गगने समीरितां महदृष्टवक्तृकां गिरं समाधौ अश्रौषीदिति ब्रह्माणापि क्षी

रशायी दर्शनं नेति तस्याप्याशिनः श्रीकृष्णस्य व्रजविहारादिना गोपानां भाग्यातिशयो ध्वन्यते हस्फुटं पौरुषी क्षीरधिशायी पुरुषोत्तमां गां मतः आशु स्तव कोलाहलं त्यक्त्वा शृणुत माचिरमविलं
बितं तथैव क्रियतां हे अमरा इति तदेवामरत्वं सिध्येदिति भावः २१ क्षीरधिशायीवाचं अनुवदति पुरेति एवं च पुरेत्यादिचतुःश्लोकी क्षीरधिशायीवाक्यं न तु ब्रह्मवाक्यं पौरुषीमित्युक्तत्वात् तथा चा
यमर्थः पुंसा यस्याहमंशांशस्तेन वासुदेवेन पुरैव ज्ञातो विज्ञापनायासेनालं भवद्भिरंशैर्निजांशैर्यांशैः सह यदुषु नित्यं तस्यार्षदेषु तत्सुत्र पौत्रादिरूपेण तत्स्वस्त्रीय पांडवादिरूपेणोपजन्य
तां जनित्वा निकटे स्थीयतां एषामेव स्वर्गगमनमधिकारांते च तत्प्राप्तिः यदा वा नो तु तत्पार्षदत्वात् तेन सहैव तल्लोकगमनं ईश्वराणामस्मदादीनामीश्वरः सर्वांशित्वात् अत एव सद्यः क्षप
इतुं शक्तोपि स्वाधीनकालं शक्त्या यथाकालमित्यर्थः उर्व्या भरं हरन् यावत् भुवि प्रकटो वर्तेत इत्यर्थः २२ ईश्वरेश्वरस्यावतारे लीलैवांतरंगप्रयोजनमित्याह वसुदेवेति गृहे इति
जीववदुत्पत्तिनिरासः परः पुरुषः सर्वोत्कृष्टः भगवान् व्यक्तसर्वैश्वर्यः साक्षात्स्वयमेव प्रादुर्भविष्यति अतस्तत्प्रियार्थं सेवया प्रीतिजननार्थं यद्वा तस्य प्रियाः श्रीरुक्मिणीराधाद्याः तासां दास्या
र्थं सम्यगुत्तमरूपादिमत्त्वेन जायंतां यद्वा संभवंतु योग्या भवंत्विति वरदानदर्विकाज्ञा २३ अत एव सहस्रवदनः संकर्षणः अनंतो भविता ज्येष्ठभ्रातृत्वेन भविष्यति वासुदेवं पूर्वोक्तस्य कलेति त स्य
त्रयोग्यता यतोनंतः अपरिछिन्नशक्तिः स्वेन स्वरूपेण तेन श्रीकृष्णेनैव राजत इति तेन विना स्थातुमशक्तः तदाननंत्वात् सर्वपूज्यत्वेन देव इति ननु लक्ष्मणवत्कनिष्ठः कुतो नेति तत्राह हरेरित्यादि म
यीज्येष्ठे सती स्वाधीनतया श्रीराघववत् स्वैरं दुःखमुरीकर्तुं नायं शक्नुयादिति हरेः सुखं कर्तुमिच्छयेत्यर्थः हरेरिति स्नेहेन तन्मनोहरणात् २४ भगवति सर्वशक्तियुतां तदाह ययेति श्रीकृष्ण
स्य मायाख्या शक्तिस्तेनैवादिष्टा सती तदिच्छयैव सम्यक्कृयशोदाप्रमोहनादिकार्यसमर्था भविष्यति जनिष्यते भगवदिच्छां विना भक्तमोहनासंभवात् ननु तज्जन्मनास्माकमपि मोहः स्यात्तत्रा
ह अंशेनेति भगवदंशेन तदिच्छारूपेण युक्ता तदिच्छानुसारेणैव मोहयिष्यतीति भावः २५ इति विद्धरवादेशानुवादरूपेणादिश्य गीर्भिः स्वयमेव धन्यासि अचिरात्तन्मधुरपदे भूषिता भविष्य
सीत्यादिभिः धाम ययाविति स्वपरिवाराणां साक्षात् भगवदवतारवार्तया तोषणाय २६ मथुरायामवतारं वक्ष्यन् तद्धेतुमाह शूरेति द्वाभ्यां मथुरां मथ्यते तु जगत्सर्वं ब्रह्मज्ञानेन येन वा तत्सा
रभूतं यद्यस्यां मथुरा सा निगद्यते इति तापिनीश्रुतिवर्णितरूपं तन्मंडलं श्रुत्यर्थस्तु ब्रह्मज्ञानेनान्वाशब्दात् भक्तियोगेन वा येन सर्वं जगद्बोध्यते तयोर्ज्ञानभक्त्योः सारभूतं प्राप्यं श्रीकृष्णाख्यं यस्यां
सेति हृवरीतन्मध्यस्थामावसन् उपाङ्गवध्यादीतिकर्मत्वं मथुरान् तन्मंडलसंबंधिनः २७ सा तिमाहात्म्या राजधानीति ययातिशापेवि शूरसेनादीनां महाप्रभावत्वेन राजत्वात् अतोहं सुजा
मित्युक्तिः किं वक्तव्यं राजधानीति वैकुंठादधिकासेत्याह यस्यां भगवान् हरिर्मनोहरः कृष्णः संनिहितो नित्यमिति अंतर्धानेन निरस्तं ततो गमनादिकं तु प्रकटरूपाभिप्रायं तदुक्तं स्कांदे वसेर्वसतरी
भिश्च सरामो बाल्ये केवृंदावनांतरगतः सदा क्रीडति माधव इति पाद्मे च अहो मधुपुरी धन्या वैकुंठाच्च गरीयसीति २८ कारागृहेवतारप्रसंगमाह तस्यां त्विति नवोढया देवक्या सह निज
गृहं गंतु २९ उग्राः कंसहंत्री सेना कृष्णप्रमुखरूपा यस्य तस्य सुत इति पितृद्रोहाद्निकटमृत्युत्वं सूचित इह कंसेपि कंसेति पुनरुक्तिर्हिंसार्थकतया निंदार्थं कंसे हिंसार्थकत्वात् रश्मीन् जग्राह
सारथी भूत स्वसुर्देवक्याः प्रियेति स्नेहाधिक्यं एतद्वादि सर्वं तस्य सद्यः स्नेहत्यागेन खलत्वसूचनाय ३० विवाहोत्सवे तादृशं शौर्यं न युक्तमिति वर्णयन् दानमाह युग्मकेन चतुरिति हे
मेति गजादिभिर्यान्वयी त्रिषट्शतामिति रथानां त्रैविध्यात् षट्शतीत्रयं अष्टादशशतरथानित्यर्थः प्रकर्षेण श्रद्धादिना ददौ ३१ समं युगपत् नृत्याधिकं वा सुमंगलं च यथा स्यात्तथा नेदुः
स्वयमेवाद्यंत भाविशुभसूचनार्थं तावद्वाक्यात्कारे ३२ ३ आभाष्य रंकंसेति संबोध्यनलक्षितशरीरं यस्या सावागुवाह शिलापुत्रकस्य शरीरमिति च द्वंद्वोपचारः बाहवेति भावः
वक्ष्यमाणमाहेति वा गर्भो र्भकः गर्भे भ्रूणे भर्के कुक्षावितिविश्वः पुत्रस्य नुक्तिरंगभर्कन्यादर्शने कंसस्यासंदेहाय हंता हनिष्यति वहसे ३४ भर्तर्ग्रहे प्रापयसी वहति र्वेषादिवाहनसा
न्यश्लेषाय अतो हे ० अबुध इत्यवेति स्वमारकवहनात् देवक्याः कंसस्नेह हृष्टावतारशोलिल्याशंका व्यंगेनोणा देवकीतु नायं पामरो हंतुं शक्नुयादिति निश्चिंतवती देवानां आकाशवा ण्य

णीयं ज्ञेया ३५ दस्युक्तमात्र एवनार्थं विचारितवान् नवाकालं प्रतीक्षते स्म यतः खलः दुर्बुद्धिः पापमूर्तित्वादशंकमानश्च भोजानां सर्वस्य कुलस्य दूषकः किं पुनः स्वस्य आरब्धः प्रवृत्तः आदिकर्माणि
त्तः तत्रापि न विषादिना किंतु खड्गपाणिः किंच वस्त्रं गृहीत्वा परावृत्तस्य कचेष्वेवाग्रहीत् ३७ जुगुप्सितेति स्वस्य वधप्रवृत्तेः नृशंसं क्रूरं स्नेहत्यागात् निर्लज्जं तदुत्सवे विकर्मोद्यतत्वात् महाभागेति स्वज
न्मनि हर्षेण देवैरानकदुंदुभिवादनात्स्वस्मिन् भाविभगवदवतारेण शक्यप्रतीकारतां संभवतीति भाव इति स्वामिपादाः सांत्वयन् स्तुत्यादि साममार्गेण बोधयन् यद्वा साम भेदाभ्यां बोधयन् तत्र
साम पंचधा भेदो द्वेधा तदुक्तं संबंधस्यानुपकृत्य भेदो गुणकीर्तनं साम पंचविधं भेदो दृष्टादृष्टभयं वचइति ३८ तत्र पंचविधसाम्ना बोधयति श्लाघ्येति स्त्रियं तत्रापि भगिनी तत्रापि विवाहो
त्सवे कथं हन्यात् हनने शौर्ययशसोर्हानिः स्यात् तत्र श्लाघनीयेति ०गुणकीर्तनं भोजेति संबंधः भगिनीमित्य भेदः कथं हन्यादिति वधनिवृत्त्याय शोलाभः उद्वाहे ति संततिवृद्ध्योपकारः अत्र
वाणी देव्या वसुदेवेनैव वासस्याक्तिशीलत्वेन खलः श्लेषोक्त्या निंद्यते शूरैः श्लाघनीयेषु गुणो गोणः भोजामाहात्स्येत्थमेवैकः पाप इति लोकोक्त्या तेषां यशोवर्धनः स भगिनीमात्रं कथं हन्यादपि
तु कुलं हन्यादिति ३६ मृत्युभयार्थं हंसि चेत्तस्या परिहार्यत्वात्तद्भयेन पापाचरणं न युक्तमित्याह मृत्युरिति जन्मवतां जीवानामिती शंकानिरासः अतएव पुनः प्राणिनामित्युक्तं प्राणी तु चेतनो
जन्मीत्युक्तेः देहे न से हेति भात्वलिखितत्वात् जातस्य हि ध्रुवो मृत्युरित्युक्तेः यत्र यत्काले तरेण्य वस्यं हस्य ते तत्तेनैव सहजातमिति निश्चयं पुंस्त्वादिवदिति भावः कालविलंबार्थं चेष्टा
ह अद्येति विलंबमात्राये दमयुक्तमिति भावः बाढं यद्धयोरपि प्राधान्याय वै प्रसिद्धो वीरेति स्त्रीवधोद्यते वी र त्वं केति व्यंग्यं यद्वा युद्धमात्रे समर्थ न विचार इति ३७ मरणावश्यंभावे पि
देहाभावे भोगासिद्ध्या भोगार्थं देहो रक्ष्यस्तत्राह देह इति पंचत्वमिति पंचभूतारब्धत्वान्नाशावश्यंभावः देहीति देहाद्भिन्नस्य नाशानिरासः देहांतरप्राप्तौ हेतुः कर्मानुग इति अवशः न तत्र
पेक्षेति भावः अनुपश्चात् त्यजत इत्यन्वयः आत्मनेपदमार्षं ३८ अत्र दृष्टांतः व्रजन्निति एकेन पदा तिष्ठन् खुवमाश्रित्य पश्चात् पूर्वतः पुरो निहितेनान्येन गच्छति मनुष्यः तद्वत् अत्र
स्वीकारत्यागाबेकस्मिन्विषयो इत्यन्यो दृष्टांतः तृणेति साहित्तृणांतरमाश्रित्य पूर्वं त्यजति एवं कर्मपथेस्थितो देहीति ३९ देहविषयोः स्वीकारपरित्यागावेवात्मनो जन्ममरणादिति स्वानुभव
न दर्शयितुं तृतीयो दृष्टांतः स्वप्न इति राजादिदर्शनेंद्रादिश्रवणाभ्यामुत्पादितसंस्कारेण मनसा तदेव चिंतयन् इहदृष्टं दृष्टादि तुल्यं राजादिरूपं किमप्यनिर्वाच्यं पश्यति तदेवाहमिति प्रप
द्यते मन्येन्ते च ततो जाग्रद्देहादपगतस्मृतिर्भवति जाग्रत्स्येव दर्शयितुं चतुर्थमाह मनोरथेनव्याप्ता चेतना बुद्धिर्यस्य स यथा दृष्टश्रुताभ्यामित्यादि पूर्ववद्योज्यं एवं कर्मवशाद्देहांतरं प्राप्य पूर्वं
त्यजतीति ४० ननु यत्किंचिद्देहप्राप्तावपीदं राजदेहो दुर्लभत्वाद्रक्ष्यस्तत्राह यत इति फलोन्मुखदैवेन चोदितं विकारमयं मनो मृत्युकाले पंचगुणेषु भूतेषु मायया नानादेहाकारेण रचितेषु
मध्ये यं यं देवादिदेहं प्रति धावति धावच्च यं यमापत्राभिनिवेशेन प्राप्तं भवति तत्रासौ देही जायते ननु मन एव कर्तृत्वाज्जायतां न देह्यात्मेति तत्राह तदेवाहमिति प्रपद्यमानस्तेन सहजायतइ
ति कर्मणो गहनफलत्वात् मृत्योरनिवार्यत्वात्पुन राजत्वप्रापककर्म सहेतुतत्सिद्धये मार्कंडेयवत्किंचित्कालं मृत्युवारणाय वासत्कर्मैव क्रियतां नेदृशं पापमिति भावः ४१ अविद्यामय एव देहाभिनि
वेश इत्याह ज्योतिरिति उदकेषु पार्थिवेषु घटादिषु च प्रतिबिंबितमदः सूर्यादिज्योतिर्वायोर्वेगमनुगतं कंपादियुतं प्रतीयते एवं मायिकेषु गुणेषु देहेषु रागेण प्रविष्टः सोमुह्यति तादात्म्यमाप्नोति ४२
ननु मृत्योरपरिहार्यत्वेनात्मावापि यथा स्याद्देहरक्षार्थं यतसे तथाह न पिस्वरक्षार्थं इत्याशंक्य साम्नोपसंहरन् भेदमाह तस्मादिति देहावेशस्याविद्यकत्वात्पुण्यकर्मणः श्रेयस्त्वान्मृत्योरपरिहार्य
त्वादित्यर्थः तथाविधः मृत्युपरिहाराशक्तोपि परद्रोहं न कुर्यात् अन्विच्छन् हेतोः शतो हेतुश्च्यफलं इहामुत्र च क्षेमार्थमित्यर्थः परत इति द्रुह्यमाणात् तत्संबंधिभ्यो यमाच्चेतीहामुत्र च भय
मिति भेदद्वैविध्यं रुद्धकथारं भेत्तान वैराग्याकार्यनिषेधोक्तिर्बहिर्मुखानां विषयावेशवारणाय ४३ पुनः सामाह एषेति एषा कृपणा भयाद्विग्ना अनुजा भगिनी अतः पुत्रिकोपमा कन्यातुल्या
यद्वा दारुमयी वा चेतनानभिज्ञेत्यर्थः अतः कल्याणी निरपराधामिमामिति दूतीत्वस्यानुवादरूपेत्यान्नान्वादेशातादीन [illegible] तप्रायं वत्समेव त्वाति विप्रेत्यादद्रा
ति यद्वा दीनादपि वत्सम पिरण्हातीति हंतुं नार्हसीति काकार्हस्येवेत्यर्थः ४४ भेदेरिति दृष्टभयस्य द्वैविध्यविवक्षया बहुत्वं पुरुषादान् राक्षसान् अनुसृत इति भक्षकेषु सा

मादिवेप्यर्थमिति विस्मयेन संबोधयति कोरव्येति ४५ कालं समयं मत्स्कं वाचं चयितुं इदं विचिंत्य विचार्य तत्र सद्य एवेदं वक्ष्यमाणमपत्यार्पणमुपायत्वेन निश्चितवानित्यर्थः ४६ ननु खलोय
मपत्यार्पणं नानुमन्यते स्यादित्याशंकां गर्भविचारं दर्शयति मत्स्कृरिति बुद्धिबलयोरुत्कर्षस्तद् वधि असोमत्कार पराधउपेक्षादोषः देहिन इति देह तत्रस्यान्यत्रापत्तेः ४७ निश्चयमाह प्रदाय
त्यर्धकेन अष्टमेतरान् पुत्रान् अष्टमे तु जाते ततो बलिष्ठ एव स्यामित्याशयात् कंसायप्रदेयत्वेन प्रतिज्ञाय कृपणामिति कार्पण्यदर्शनासहिष्णुता नन्वन्यमारणे नान्यजीवनमन्याय्यमि
त्याशंक्येतदार्ढ्याय पुनर्विचारयति सुता इति सार्धकेन तत्राकाशवाण्या कल्पितत्वाशंकया सुता इति सत्यत्वनिश्चयेन विपर्यय इति यदि सुता जायेरन् ततः प्राक् चयद्द्वयमेव नाम्रियेत
त तदा सुतमारणदोषस्यात् यदि तु प्रागयमेव म्रियेत यदि वा सुता न जायेरन् जाता अपि वा कंसस्यैव हंतारः युस्युः तदैतत्पक्षत्रयेणैव न किंचिदन्याय्यं पुत्रदानप्रतिज्ञामात्रे निश्चितास्यामत्
त्कृरिति तत्प्रतिज्ञैव पाक्षिकदोषत्वात् सामर्त्रं नन्वष्टमाद्भिहितो मत्स्कृः कथं प्रथमः स्यात् कथं वा प्रौढकंसस्य वधो निर्दश्य बालात्स्यात्तत्राह गतिरित्यादि गतिरिच्छा बोधनप्रकारो वा दुर्बोधः च
रमाद्यपेक्षया प्रथमादेरप्यष्टमत्वात् अष्टानामपि सहैव मरुद्गणवदुत्पत्तिसंभवाच्च उपस्थितो ज्ञा मल्लस्यवदादीनां निवृत्तो मत्स्कृः निवृत्तोपि न मुच्यादीनां केनादैवापतित इति च
रमपक्षसंभावना ४९ कर्मणो दुस्तर्क्यत्वाच्च तत्संभवं सदृष्टांतमाह अग्नेरिति दावाग्निर्निकटानपि स्यत्वा दूरानपि वृक्षान् गृहान्वा दहति नात्र दृष्टमत् तेन्यं नियामकं एवं जंतोरपि जन्म
मृत्यो हेतुरचिंत्यः ५० स्वस्मिन् दर्शनं ज्ञानं यावत्स्वप्रज्ञावधिरित्यर्थः संभ्रमेति प्रतिभाति ज्ञायः सूचितः पापमपि स्त्कृतिः एवं कं संमानितवान् ५१ प्रसन्नेति महाभागानकदुंदुभिपदाभ्यां
सूतानि प्रायानुसारेण किंदु सरहं तु साध्वनामित्यादि वक्ष्यमाणानुसारेण च विकसितमुखः अदृश्यमानेन हृदोपलक्षितो भाव्यवतारहर्षेण हसन्नथ चाहो मोहमाहात्म्यं यद्देवोक्त
मन्यथा चिकीर्षतीति प्रहसन्नुवाचेत्यर्थः संगतो भाति पुनरब्रवीदिति ५२ हे सोम्येति भवान् ज्ञानमत एव सौम्यः अत्रावसर एव खड्गप्रदर्शनमिति व्यंग्यं पुत्रानिति अकारप्रश्लेष
णायेभ्यस्ते वा भयं भयाभावः उत्थितं निश्चितत्वेन स्थितं तानेवार्पयिष्ये न तु यस्मात् दृष्टमाड्क्यंतमिति नान्ततोक्ति दोषः ५३ तद्वाक्ये सारः उपपत्तिः सत्यत्वं वा तन्मात्रं चेति न तु श्लेषे परमो बु
द्धिमान् सारग्राहीत्येवं प्रशस्य प्रकर्षेण वाद्यादिना विशत् ५४ अथ मंगलार्थः कालेऽपाढत्ते कतिपये काले गत इत्यर्थः युवैव वसुदेवो मद्दिह याप्यागंता जरा इति विद्मु पुराणोक्त्या वार्द्धक्य
भगवदवतारात् सर्वेषां देवानां देवता तत्रैव तत्वं परा प्रकृतिः स्वक्षेत्यादि देवकृतस्तवात् तत्र वसुदेवो विशुद्धसत्त्वं देवकी तत्संपत्तिरूपा ५५ मरीचीपुत्रत्वे कीर्तिमदादिनामानि सुतलतमा
नीय भगवत्कृतानि वा सःकृतप्रतिज्ञः विकलोभीतः ५६ मत्स्येव कथं पुत्रो दत्तोऽत आह किमिति साधूनां सत्यसंधानो पुत्रापेक्षा कथं नेत्याह विदुषां भगवानेव तत्त्वमिति ज्ञानतो कंसान
हन्यादिति तु नेत्याह किमकार्यमिति देवक्याकथं पुत्रस्त्यक्तस्तत्राह दुस्त्यजमिति चित्तेध्ष्तोरर्थैः ५७ समत्वं पुत्रार्पणेन शत्रुमित्रतोल्यं व्यवस्थितं निष्ठां प्रहासः तोषात् राजन्नित्याश्चर्येण ५८
पुत्रयोरिति भार्यातरस्यावृत्तिः ५९ तथेति उक्तेति शेषः असतोमद्भ्यसौहार्दं दृश्यायतः अविजितः अस्थिरः ६० नंदाद्या इति त्रिकं आद्यश्च समुच्चये द्वितीयः केमुत्ये येनंदाद्या गोपा याश्च य
शोदाद्या योषितः वसुदेवाद्या यादवा देवक्याद्याः स्त्रियश्च देवता पार्षदभूताः इति किंवक्तव्यं अमीषां ये दाशीभृत्याद्यास्ते च उभयानंदवसुदेवयोर्ज्ञातिबंधुमित्राण्यपि कंसमनुस्याश्च देव
ताप्राया एवेति प्रायशब्दात्केषांचिद्दैत्यत्वं भगवान् सर्वज्ञत्वात् शीघ्रं भगवदवतारयुक्तिज्ञः षड्गर्भाणां शापोत्पत्तिस्तत्कालज्ञो वा अवतारहेतुस्थापनेन ज्ञगद्धितकरणात्स्वज्यत
म इति वार्थः ६२ ऋषेरिति युग्मकं विशेषेणा पुनरावृत्तिके पुरी तानि निर्गमं सती गमनापेक्षणं लज्जया निवारणशंकया वा मत्वा ज्ञात्वा स्ववधार्थं देवक्या गर्भे आविर्भूते विहंमुच म
त्वा भविष्यत्यपि तत्कः सामीप्यात् यद्वा गर्भे संभूतं संभवो यस्य अजनो विष्णुः स एवायमिति शंकया यद्वाऽजनो तया शंका भयतया ६५ ननु बलान् घ्नन् कथं नोलज्जताता
आह मातरमिति मात्रादीनां यथोत्तरं न्यूनतया के मुत्यमातरमपि किमुत पितरं पितरमपि किमुत भ्रातृन् इत्यादी प्रायश इति तेपि न सर्वे इत्यस्याधामतमत्त्वं ६६ जानन्नि

ति भूतपूर्वं च तं स्मरेति नारदोक्त्या पूर्वजन्मस्मरणात् ६७ यादवाधिपमपि निर्जित्य महत् बलं सामर्थ्यं दैत्यसेनाबलं यस्य भोजादीनां पृथग्युक्तिर्यदुषु प्राधान्यात् ६८ शूरसेनानि
ति माथुरास्तु तदनुज्ञया पूर्वमेवाभुञ्जदिति बोधितं ६९ इति श्रीमद्भागवते दशमस्कन्धे गोचरः अध्यायस्तोषिणीसारसंग्रहे प्रथमोऽगमत् इति तोषिणीसारे प्रथमोऽध्यायः १ यदु
भिर्विरुध्यते त्यक्त विरोधं गर्भाकर्षणादित्वरानिदानभूतं प्रपंचयति प्रलंबेति सार्धत्रयेण तत्राद्येयुग्मं महाशनो घासुरः युतत्वे हेतुर्बलीति २ निविविशुः निभृतं हात्रिक गोपादिवेषेण गु
प्ताः ३ एकदेत्यर्धकं समनुसरंतो यद्वा एव मुख्यभक्ताः अक्रूराद्याः स्वार्थमनुरुंधाना अवतारोत्सवदर्शनापेक्षाः तं पर्युपासत इति स्थितिसार्धकं जातं जातमहन्निति यत्तु तत्संख्यामाह षट्
स्थिति तेहि पुरा मरीचिपुत्रा देवा ब्रह्मापराधेन हिरण्याक्षजकालनेमेर्जातास्तां ब्रह्मोपासकान् ज्ञात्वा हिरण्यकशिपुः शशाप युष्मत्पिता युष्मान्हनिष्यतीति अतो भगवता तत्र जनिताः को
लनेम्यवतारेण कंसेन घातिता इति हरिवंशे उत्तरार्धे हिरण्यकशिपोर्जाता इत्यत्र मुकुले इति शेषः संबंधषष्ठीति वा कल्पभेदेन वा ज्ञेयं एवं च घातनं मुक्तय एवेति व्यक्तमुत्तरार्धे अतो
नोपेक्षा दोषो भगवति ओजसेनेति साक्षान्नामग्रहणमीर्ष्यया वैष्णवं इत्यमीयं धाम सप्तमो गर्भो बभूव आनंदरूपत्वात् हर्षः स्वाभाविकः पूर्ववन्माशशोकयाशोकः ५ विश्वात्मा सर्वांशी
श्रीकृष्णः स्वयमेव तां सम्यक् प्रोत्साहनादिना दिशत्युत्युवं तु ब्रह्मादीन् क्षीरशायीमुखेनेत्यपरेर्थः यद्वा भगवान्न पिता हृदयोपि निरूप्य मायामादिशत् दिशति भक्तवात्सल्यं तदाह निजेति नि
जा वसुदेवादयो नाथा येषां निजेषु भक्तेषु श्रेष्ठानां वा यदूनां भयं ज्ञात्वा ६ गच्छेत्यर्धकानि त्रीणी हे पूज्ये मंगले इत्युत्साहार्थं व्रजगमनयोग्यतार्थं वा गोपति त्वया नादृष्टमाश्चर्यं न
कदापि दृष्टमिति भावः ७ जठरे विद्यमानं गर्भं [illegible]णं मामकं धाम स्याकर्षेपि जीवनसंभावना तत्ता तो जठरात् संनिकृष्य [illegible] लक्षितं सुखपूर्वं च कृष्ट्वा ८ तत्र योजनमाह अथेति अथानंत
रमेवेति त्वरां बोधयति अंशभागेनेति २ अंशेः शक्तिभिर्भजते ऽधितिष्ठति ब्रह्मादीन् यद्वांशेः ज्ञानैश्वर्यादिभिर्भजयति भक्तान् यद्वांशा मत्स्यादय एव भजनीया न तु साक्षात्स्वरूपं यस्य तेन प
रिपूर्णरूपेणेत्येवमादिस्वामिपादैः षोढा व्याख्यातं तत्र प्रथमद्वितीययोर्धर्जार्थः अंशानां भागो भजनं प्रवेशो यत्रेति वा यद्वा अंशानां जीवानां भागेन भागधेयेनेत्यष्टमोप्यर्थः गर्भकर्षादे
योग्यतामाह शुभे मंगले मदाज्ञया त्वं सर्वयोग्या फलं अतोऽवरात्तया नंदादिमोहः यशोदायां भविष्यसीति न यशाः नंदपत्न्यामिया नंदश्च तेभविष्यति इति गूढस्त्वयमर्थः अंशानां ज्ञाने
श्वर्यादीनां भागो भेदस्तेन रूपभेदेनेत्यर्थः तत्रैकेन रूपेण देवक्याः पुत्रतामपरेण यशोदायामपि पुत्रतां प्राप्स्यामि त्वं तु नंदपत्न्यां भविष्यसि किंचित्कालं सत्तामात्रं प्राप्स्यसि न पुत्रीत्वं
काष्ठायथा नंदकरं मनस्त इतिरीत्या देवकीव यशोदापि मां मनसि धारयिष्यति स्वगर्भत्वेनाभिमस्यते च देवक्यामिव तस्यामपि मम मातृत्वानुभव इति तुल्यमेवेति भवः९ स्यात्तत्रावतरणे
द्वयोरपि मयि पुत्रत्वभावनादार्ढ्यापादिस्यते अन्यथा अग्ने रूपभेदाभावेनान्यतरस्याः पुत्रत्वाभावनिश्चयेनानर्थः स्यात् ९ ता प्रतिवरानाह अर्चिष्यतीति त्रिभिः मनुष्या इति कामासक्त
त्वाद्धर्मेऽधिकाराच्च सर्वान् पुत्रादीन् कामयंतेते तेषु श्रेष्ठानामीश्वरी नियंत्री मतोर्चकानां सर्वान् कामवरान् प्रदद्यातीति १० नामेति युग्मकं कुर्वंति करिष्यंति नामभेदः स्थानभेदेन तत्र क्वचिदे
के नाम कुत्रचित् केचिद्वहूनीति तत्र तत्रेति शेषः चकाराः सर्वेषां प्राधान्याय ११ कर्षणफलांतरमाह गर्भेति वैयर्थ्यः संकर्षणादेव प्राहुर्वक्ष्यंति यद्वाधुनापि गर्भतः कर्षणादेव वदंति न
नु प्रलये जगदाकर्षणात् बलवत्तू श्रेयादाधिक्यात् रामेति सुप्सुपेति समासः संबोधनं वा १२ तथेति पुनरोमिति च प्रतिगृह्येत्यादरः गां पृथ्वीं यथादिष्टं तथैवाकरोत् १३ योगमायैव नि
द्रा सर्वबोधहरणात् प्रणीत इति देवक्या दुरवाभावो ब्रजस्थानांतर ज्ञानाद्यभावश्च प्रार्थः अत्र हरिवंशे देवक्याः सप्तमगर्भसंभवोत्तरमपि किंचित्कालं रोहिणी मथुरामवात्सीत् पश्चाद्गोकुलं गता
यां तस्यां सा सप्तमासिको गर्भश्चाकृष्य प्रवेशितः तत्तस्याः पूर्वस्थितो गर्भः श्रुतावन्मासिक एवापसारित इत्युक्तं अहो रेवेदं देवक्या गर्भो विस्रस्तः कंसभयादिति शेषः सप्तमो भोजराजस्य भयाद्रोधो
परोधतः देवक्याः पतितो गर्भ इति लोको वदिष्यतीति विष्णुपुराणात् कंसेनेवोपायेन पातित इति वा अत्र तदनुक्तिः पौरेस्तद्भयाद्यवक्तं तथानुक्तेः १४ विश्वस्यात्मा प्रभुरपि भक्तानामेवाम

भयंकर इत्यपेरन्वयः ॥ सर्वैश्वर्यपूर्णश्चित्ते अस्फुरत् इति धातुसंबंधनिरासः भगवानपि स्वयं चित्सुखाचार्याणामसंमतं पौरुषं धाम मन आविवेशेति संबंध इति तद्व्याख्यानात् १६ धा
नश्रीमूर्तिरूपं तेजो बिभ्रत् ॥ दुरासदः चक्षुराद्यग्राह्यः अजेयश्च बभूव १७ जगतो मूर्तिमन्मंगलं अच्युताः अखंडिता अंशाः ऐश्वर्यादयो यस्य यद्वा न च्युत एकोप्यंशो यस्य तं सर्वांशे
पूर्णं समाहितं सम्यक् सिद्धमेव वैधदीक्षयार्पितं सर्वात्मकमपि आत्मभूतमात्मनि प्रादुर्भूतं प्रकाश सर्वेषामात्मनां जीवानां कं सुखं यस्मात्तं योगिनामिव देवक्या यत्नमनपेक्ष्यात्मना स्व
रूपमेवाविर्भूतं पुत्ररूपेण मनस्येव दधार धारणया ध्यतवतीति गर्भाशये रेतोरूपेण धानं निरस्तं वैधदीक्षयेति स्वाम्युक्तेरयमर्थो भाति यथा कश्चित् सद्गुरुर्द्वादशाक्षरादिदीक्षाकाले
ध्येयां मूर्तिं उपदिश्य छात्रस्य मनसि समादधाति सचाधिकारी तदेव तत्र समाहितो भवति तथेति ननु रेतोरूपेण गर्भाशये धृतस्य मातृभुक्तान्नपरिणामतो वृद्धिः स्यादत्र तु कथं वृद्धिरिति चेत् अत्रैवं
भाति प्रथमतोऽगुष्ठपरिमाणमेवार्पितं समाहिता सति तदुचितोपचारैरुपचराचर ततस्तत्र तनुतनादुपचारार्पणक्लेशमसहमाना सा यथा यथाऽर्हत्वमियेष तथा तथा सौ तत्र ववृधे तदनुसाराच्च
बहिरुदरमपीति मायथेति समाधानं तु न चमत्कारावहं भगवत्तनोर्जडांशामिश्रितशुद्धचिन्मात्रत्वं तंत्र भागवते वाराहे चोक्तं अहेयमनुपादेयं यद्रूपं नित्यमव्ययं स एवापेक्ष्यरूपस्य व्यक्तिमेव
जनार्दनः अगृह्णाद्व्यस्तज्ञ्चेति रुद्रमशमादिकां तनुमिति सर्वे नित्याः शाश्वताश्च देहास्तस्य परात्मनः हेयोपादेयरहिता नैव प्रकृतिजाः क्वचिदिति च १८ सा सर्वजगतो र्नित्यानित्यप्रपंचयोरा
श्रयस्य श्रीकृष्णस्याश्रयत्वं प्राप्तापि नितरां सर्वोल्हादकतया न रेजे किंत्वंतरंगवसुदेवादिब्रह्मादिसहितस्वस्यैवाल्हादकतयेत्यर्थः रुद्धाग्निशिखा खलसरस्वतीच सती स्वतः शोभमानापि आवरकात
भोगानेव तदीया नैव मनआदिश्चोल्हासयतीति यथाशिखाप्रबल्लागृहंदहति सरस्वतीच परवंचनपापेन स्वाधारं नर्थयमपि कं सम्मिस्फ प माद्यव्यंग्य १९ न शोके देवकीं द्रष्टुं कश्चिदयाति तेज
सा जाज्वल्यमानां तां दृष्ट्वा मनांसि क्षोभमाययुरिति विष्णुपुराणोक्तप्रतया भवनेवीरोचयंती अजितः अंतर्कुक्षिस्था यस्यास्तां साक्षात् दृष्टास्वचित्ते आह गुहांहृदयं श्रितः एषविरोचमानो हरिरेव ग
जस्येव ममभीषणाद्दरीश्रितः सिंहयइवायमिति हरिगुहात्रास्य तत्र्यां व्यज्यते २० तस्मिन्हरौ तु छेन मया ह्याकिंकार्यं सामादिकं तु न भवेदित्याहः अयमर्थः तंत्रो देवकार्यप्रधानो विक्रमं न विहितन
हास्यते मां हनिष्यस्येवेत्यर्थः एवं भयेनैव दौरात्म्यस्तंभितं तत्तु विवेकेन नेति स्वतोषाय कल्पयति स्त्रियाइतिसार्धेन अयं स्वदेहरक्षार्थः कीर्त्यादिकं हंति स्त्रियाइत्यादेर्यथोत्तरमवध्यत्वातिशाया
र्थत्वेन कैमुत्यं एवं कीर्त्यादावपि हान्यतिशयः यदर्थं वधस्तज्जीवनमपि न सिध्येदिति भावः २१ ननु कंचित्कालं जीवनमपि फलं तत्राह सइति स एष जीवन्नपि मानएवलोकबहिष्कारसाम्या
त् न्यूनोऽसि तेन हिंसयायोवर्तेत यतः स्तनुमानिनोस्य देहेऽप्र मृते जीवत्यपि यद्वा देहे सति मृते मरणे च सति तं मनुजाधिपरुकुर्वंति अयं ध्रुवमंतमोगामिष्यतीत्यादिवाक्यैरित्यर्थः २२ इति एवं विचा
रसुखं भावयन् भावादतिप्रायात् स्वयमेव सम्यक् स्वत्कगर्भपातयत्नो वै निवृत्तः यतः प्रभुः स्वप्राणरक्षणासमर्थः हरे वैरादिदोषहरस्य हृद्देषानुवृत्तिकतीत ज्जन्मप्रतीक्षमाणो बभूव भयात्कं
स इत्युक्तेपि वैरस्फूर्ति भर्यविषये वैरनियमात् अत्र हरिवंशो विशेषः मासान्वै पौषमासादीन् गणयंतु मम [illegible] स्त्रियः परिणामस्तु गर्भस्य शेषं तत्रास्या महेव यमिति २३ वैरानुबंधमाह आ
सीन इति चिंतयानः अयमद्धुनेवाविर्भूय मां हनिष्यतीति भावयन् हृषीकेशेति सर्वेन्द्रियवृत्तौ स्फूर्त्या हृषीकेशत्वव्यक्तेः २४ तत्र बंधनागारे नारदस्य सनकादिभ्यो [illegible] प्यादित्वं भक्त्या शमत्वात्
हर्षेण सर्वेषामग्रत आगमनाद्वा अनुचरा गंधर्वाद्या ऐडयन् स्वार्थे णिचू ऐडयंत द्वित्वेवाच्येबहुत्वमार्षं यद्वा ब्रह्मागमने मुन्यादीनामप्राधान्यादकर्तृत्वेपि स्तुतो सम प्राधान्यविवक्षया कर्तृ
त्वं तोतैः सहागत्य ततस्तोचते च वृषणं कामवर्षिणं तुष्टुवुरित्यर्थः २५ अवतारे सवप्रत्यक्षा अवतारहेतुं स्मारयंत स्तुवंति सत्यव्रतमिति सत्यममोघं व्रतं सृजनादिरूपं यस्य अमोघा
भगवद्भक्तिरित्यादितप्रतिरूपपोक्तेः यद्वा सकृदेव प्रपन्नाय तवास्मीति च वादिने अभयं सर्वदा दास्ये इति जन्मव्रतं ममेति उक्तलक्षणं व्रतमविहतं यस्य अतो भक्तार्थं त्वयावती
र्णं युक्तमेवेति भावः अमोघत्वे हेतुः सत्यं पूर्वोक्तव्रतं परं श्रेष्ठं प्रियं यस्य ननु तत्तेकृतपीडाकाले अवर्तमानस्य मम कथं सर्वे भक्ता भयदानादिव्रतनिर्वाहस्तत्राह त्रिषु स्वष्वी

६ प्राक्कालस्थितिकालप्रलयकालेषु वर्तमानं तदेतदाहुः सत्यस्य व्यावहारिकसत्यप्रपंचस्य योनिं कारणमिति प्राक्कालिकत्वं तस्मिन्सत्यप्रपंचे निहितं प्रेरकतयास्थितमिति स्थितिकाले ६
सत्वं तस्यैव सत्यस्य पारमार्थिकं सत्यं तन्नाशेप्यनाशादिति लयकालसत्वं किंच सर्वं सत्स्वमित्याहुः ऋतसत्ययोः स्मृतिश्रुत्योः नेत्रं प्रवर्तकं तेवा नेत्रं प्रदर्शकं यस्मात् वेदादिप्रवर्तकत्वात्सर्व
ज्ञत्वं शास्त्रयोनित्वादिति न्यायात् एवं सत्यः कालत्रयेपि वर्तमानः निर्विकारश्चात्मा मूर्तिर्यस्य यद्वा सत्यमव्यभिचारि आत्मनां भक्तानां कमनीयं सुखं यस्मात् तं प्रपन्नाः न यज्ञान्नतः सत्यापना
यावतीर्णं त्वां शरणं प्राप्ता इति २६ किंच यदि प्रपंचस्त्वद्व्यतिरिक्तः स्यात्तर्हि तेन व्यवधानात्कृतं भयादिज्ञानं न स्यात् स तु त्वदतिरिक्तो नेति वक्तुं प्रपंचं वृक्षरूपकेणाहुः एकायन इति असौ सम
ष्टिव्यष्टिदेहप्रपंचः आदिवृक्षः अनादित्वेसति छिद्यमानवृक्षरूपः किंविधः एका प्रकृतिर्बीजं यस्येति द्वे सुखदुःखे फले त्रयो गुणाः मूलानि सुखरूपफले चत्वारो धर्माद्यर्था रसाः पंचेंद्रिया
णि विधा ज्ञानप्रकाराः षट् कोशास्त्वङ्मांसरुधिरमेदोमज्जास्थीनि आत्मानः स्वभावा यस्य सप्त धातवः सप्तावरणानि वा त्वचः मनो बुध्यहंकार पंचभूतानीत्यष्टौ शाखाः नव द्वाराणि अक्षाः को
टराणि दश प्राणाः छदाः द्वौ जीवेश्वरौ खगौ यस्मिन्सः अधिष्ठातृत्वमात्रेण जीवेशसाम्यनिर्देशः विशेषस्तु एकस्तयोः खादति पिप्पलान्नमित्यादौ ज्ञेयः २७ अस्य संसारवृक्षस्य सतः कार्य
स्य त्वमेक एव प्रसूतिः कारणं त्वमेव सन्निधानं लयस्थानं त्वमेवानुग्रहः पालकः अतः प्रपंचस्य त्वद्भिन्नत्वेन मुहुः स्वशब्दस्तदितरव्यावृत्तिदार्ढ्याय ननु ब्रह्माविष्णुरुद्रा एवं कृतास्तत्राह माय
यासंवृतचेतसो विपश्चितो नानान पश्यंति किं त्वेकमेव त्वां पश्यंति यद्वा संवृतचेतसो मायया त्वां नानामूर्तिं पश्यंति विपश्चितस्तु माययेति न पश्यंति किंतु चिदात्मत्वेनेति तन्मूर्तिर्नां सच्चिदानंदघ
नत्वादिति २८ तेषां नानारूपाणां प्रयोजनमाहुः बिभर्षीति भवनो धेकरूप आत्मा श्रीकृष्णस्त्वमेव क्षेमाय पालनाय रूपाणि मूर्तीर्मुहुर्लोके बिभर्षि प्रतिप्रकटयसि सत्वेन सच्चिदानंदघनत्वेनाप
पन्नानि श्रुतियुक्तिसिद्धानि क्षेमार्थत्वे हेतुः सतां सुखकराणि खलानां नाशकानि सत्सात्वेन खलदंडेन च त्वलोकक्षेमसिद्धेः २९ अस्त्ववतारकालिकानां सतां वार्ता अन्यदापि मनोमात्रेण त्वामाश्रयता
मनायासेन संसारदुःखनाशं दानं दावाप्तिश्च ततः गतोन्येषामपि ताहृश्यत्वं भवतीत्याहुः द्वाभ्यां त्वय्यीति एके मुख्या अविवेकिनः अखिलस्य शुद्धस्य सत्वस्याश्रये भवाब्धिपारेण त्वयि समाधिना आ
वेशितचेतसा महत्कृतेन इदं मायामयमित्यनादरे यो नादृतो नरकभागिति श्रियत्रोक्तं परित्यज्य इदमेव महत्सर्वोत्कृष्टमिति कृतेन बहुमानितेन त्वत्पादपोतेन भवाब्धिं तुच्छीकुर्वंति अनायासेनेव
तजनानुनिष्पादिनी तत्कानां मुक्तिरित्यर्थः अंबुजाक्षेति सौंदर्यं चित्तावेशे हेतुः ३० हे द्युमन् स्वप्रकाश त्वत्पादपोत सन्निधिमात्रेण भवाब्धौ वत्सपदमात्रजाते विनैव तत्नौकापेक्षां स्वयम
वअन्येषां विहन्मन्यानां दुस्तरं भीममपि भवाब्धिं सम्यगुत्तीर्य स्थिताः स्वसादनावमत्रैव निधाय तेत्कि मार्गं प्रवर्त्य प्रपारं याताः यतो पारकरुणाः अत्र सर्वत्र हेतुः यतो भवान्सदनुग्रहः तत्कृप
क्षपाति ३१ ननु ज्ञानिनां किं मद्भजनेन मुक्ता एव हि ते तत्राहुः येन्य इति विमुक्तमानिनो मुक्ता वयमिति मन्यमानाः त्वयि अस्तो निरस्तो तावस्तस्माद्भक्तेरभावदशुद्धांतःकरणा बहुपुण्येन परंप
दं मोक्षसंनिहितं सत्कुलश्रवणमननादि ध्यासनादि प्राप्याधःपतंतीति विघ्नैरभिभूयंत इति स्वामिपादाः तत्रारविंदाक्षेति तापहारित्वं तादृशोपित्वय्यनादराद्देवहीनता त्वदृद्धयइतिवक्त
व्यजुहृत्वे तत्कर्मग्रहणाय अथवा प्रथमतः स्वकृत्यभावादशुद्धबुद्धयः तथा ज्ञानमार्गमाश्रित्य विमुक्तमानिनः देहद्वयातिरिक्तात्मानं भावयंतः तेषां श्रमः स्यान्न तु सेवया ते क्लेशाधिक
तरस्तेषामित्युक्तवत्केण जीवन्मुक्तिपदं प्राप्याधःपतंति यद्यनादृतयुष्मदंघ्रयः मायामयमिदं किं तद्भक्त्येवं कृतस्वदनादराः सुः दग्धानामपि कर्मणामचिंत्यशक्तिर्भगवत्साद्वत्सया पुन
र्विशेषात् तथा च वासनाभाष्यस्थ भगवत्परिशिष्टवचनं जीवन्मुक्ता अपि पुनर्बंधनं यांति कर्मभिः यद्यचिंत्यमहाशक्तौ भगवत्यपराधिन इति जीवन्मुक्ताः प्रपद्यंते क्वचित्संसारवासनां
योगिनो न विलिप्यंते कर्मभिर्भगवत्पराः इति च रथयात्राप्रसंगे विष्णुभक्तिचंद्रोदयस्थ पुराणांतरवचनं नानुव्रजति यो मोहाद्व्रजंतं जगदीश्वरं ज्ञानाग्निदग्धकर्मापि स भवेद्ब्रह्मराक्षस इति
मोघज्ञाना विचेतसः राक्षसीमासुरीं चैव इत्यादिगीतोक्तिश्च अनादरेन नरकोपि श्रूयते नयो नादृतो नरकभाग्भिरसत्प्रसंगैरित्यादौ तदेवं सतितथापि चित्तबडिशं शनकैर्वियुक्ते
इत्यादौ योध्यानत्यागः श्रूयते स ब्रह्मकैवल्यप्राप्तानां तत्संस्कारवशाद्वृत्तिशैथिल्यरूपः निद्रासंस्कारवशाद्विषयेषु वृत्तिशैथिल्यवत् यद्यपि तत्र लब्धपदं चित्तमारूढ्य व्योम्नि धारयेत्

दिति ध्यानत्यागपूर्वकं धारणांतरविधानेन तदपि ब्रह्मण्येव निमग्नो मुक्त्यासक्तश्च भवत्वयमित्याशयेन भगवता वंचनैव क्रियते मुक्तिं ददाति कर्हिचित्स्म न भक्तियोगमित्याद्युक्तेः ननु मायामयमित्यनादरेण
त्यागो विधीयत इति न विरोधः ३२ त्वदीयास्तु तत्त्वज्ञानाभावेपि स्वधर्मत्यागेपि कथंचित्स्यातकसंभवेपि नैव पतंतीत्याहुः तथेति न ते परमार्थे अभक्तवदित्यर्थः किंच सर्वथा अथातथेत्यस्य कथंचिदनादृत युष्मद्
भ्रिलेपीत्यर्थः त्वदाश्रिताः क्वचित्कदाचिदपि मार्गादपि किंपुनर्भ्रंश्यात् न पतंति यस्मात्त्वयि प्राप्तदृढप्रेमाणस्त्वयाभितो गुप्ताः संतो विघ्नकर्तृसेनापतीनां मूर्धसु विशेषेण चरंति विघ्नकरणार्थमागता
न्विघ्नेशान् सोपानीकृत्य तत्पदमारोहंतीत्यर्थः भक्तानां विघ्नेष्वनुतापोदयेन भगवतः कृपातिशयोदयात् माधवेति लक्ष्मीकांतत्वेन संपत्सिद्धिरपि यद्वा हे मधुकुलावतीर्णेति कारुण्यं हे प्रभो
इति प्रभुप्रभावस्यैतद्युक्तमेवेति भावः ३३ सतां सुखावहानि रूपाणि बिभर्षि इत्युक्तं तत्प्रकारमाहुः विशुद्धं मायातीतं चित्सुखात्मकं सत्त्वमेव वपुः स्थितौ पालनाय श्रयते यत्र यादृशं युक्तं ता
दृशमेव प्रकटयसि ध्यानेनापि सुखावहत्वमाहुः श्रेयसां कर्मफलादिभक्तिपर्यंताखिलपुरुषार्थानां उपायनमिव सादरं दानं येन यद्वा त्वं श्रेयसः उपायनमाधिक्येनाश्रयरूपं येनावपुषा जनो
वेदाध्ययनं च यज्ञादिकर्माणि च तपश्च समाधिश्च तैश्च तुराश्रमधर्मैस्त्वदर्हणं पूजनं सम्यक् ध्यानादिपूर्वकं इहतेकरोति वपुषोनाश्रयेण यथोक्तसम्यगर्हणासंभवान्न फलं सिध्येदे
वं श्रेयउपायनत्वसिद्धिः ३४ एवं श्लोकपंचकेन भक्तानामेव मोक्षो नान्येषामित्युक्ते तत्र मोक्षस्य ज्ञानैकसाध्यत्वाज्ज्ञानस्य च देहाद्युपाध्यपोहेनैव सिद्धेः किं भक्त्येत्याशंक्य भक्तिं विना न
स्यादेव ज्ञानं उपाधिनिरासस्तु कल्पनामात्रं नाविद्यानिवर्तकमपरोक्षमित्याहुः सत्त्वमिति धातः हे विविधमूर्तिधर इदं सर्वप्रकारकं निजं त्वदीयं विज्ञानं चिद्रूपं सत्त्वात्मकं वपुर्न भवेन्नाविर्भवेच्चेत्त
दा गुणप्रकाशैर्भवानात्मानुमीयत एव न साक्षात्क्रियते कथंभूतं सत्त्वं ज्ञानेन ब्रह्मज्ञानेन यद्विद्यापमार्जनं भेदस्य बाधनं तद्यस्मिन्नाविर्भूते न विद्यते अद्वैतसाक्षात्कारिणामपि सनकादीनां य
स्मिन्दृष्टे दासभाव एवोदेतीत्यर्थः आत्मारामाश्च मुनय इत्याद्युक्तेश्च अनुमानप्रकारमाहुः यस्य नित्यसंबंधी सत्त्वादिर्बुद्ध्यादिर्वा गुणः प्रकाश्यते इति नित्यसंबंध्यरुणोदयेन सूर्योदयस्येवा
नुमानं अथवा येन प्रकाशेन प्रकाशित एव गुणः प्रकाश्यत इति तत्प्रकाशेन फुल्लिंगादिप्रकाशेन वन्ह्यादेरिवानुमानं यद्वा राजसतामसविवेकविज्ञानवतां त्वन्माहात्म्यज्ञानं नैव स्यात् अस्माक
तु त्वत्कृपया सत्त्वोद्रेकवशाद्देवज्ञानमित्याहुः सत्त्वमिति सत्त्वगुण उद्रिक्तो न भवेच्चेत्तर्हि इदं पूर्वोक्तं निजं त्वदीयं विज्ञानं माहात्म्यादिगोचरं विशिष्टं ज्ञानं मार्जनं निवृत्तिमापप्राप्तमेव कीदृशं विज्ञा
नं भक्तानभित् त्वन्माहात्म्यज्ञाननाशकं ननु भवतामपि स्वयमेवाहमवतीर्णो न त्वं ईशादिरिति कथं ज्ञानं ~ तत्राहुः गुणेति गुणस्य श्रीदेवक्यादिप्रभादेः प्रकाशैर्भवानेवेत्यनुमीयते ननु मम शास्त्रे गर्भ
वार्यप्रकाशोस्त्वेनेत्याहुः यस्य तव संबंधादेव येन त्वद्रूपेणैव वा प्रकाशेनायं गुणः प्रकाश्यते पूर्वं संकर्षणादिसमये एवं प्रकाशानानुभवादित्यर्थः यद्वा देवक्या दुर्धर्षत्वादिगुणानां प्रकाशैः प्राक्
दैवैः प्रकाशात इति अयं गुणस्त्वय्येवास्माभिरनुभूत इति भाव इत्यपि भाति ३५ ननु कल्पितनामरूपवतो मम कथमेवं रूपत्वं वर्ण्यते तत्राहुः न नामेति गुणादिभिर्यैस्तव नामरूपे ते नीरूपणीये तत्त्वतो
न्वयेन भवतः तत्र गुणैर्नामरूपे दीनवत्सलादि श्यामसुंदरादि कर्मभिर्गोवर्धनधरादि क्षितित्रितं गारूपादि जन्मभिर्देवकीनंदनादि मत्स्यादि यद्वा गुणाः शास्त्राभ्यासादयः कर्माणि यमनियमादीनि
जन्म सत्कुलोत्पत्त्यादि तैरपि न ज्ञेये यतो मनसा तर्केण वचसा आप्तवाक्येन अनुमेयं न त्वनुभाव्यं वर्त्म गुणादिरूपं प्राप्तिसाधनं यस्य गुणादीनामतिरूप्यत्वात् कृतेते अपि न निरूप्ये
इति भावः तत्र हेतुः तस्य मनआदेः साक्षिणः चिदानंदरूपिणः साक्षिणस्तव गुणादितत्कृतं नामरूपं च तद्रूपमेव तदश्नमसारस्हृदयं वतेदमित्यादे नातिः परं पमयकृवतः स्वरूपं कृष्णमननमेवहि
त्यमित्यादेश्च विरुद्धदनुभावात् यद्यपि न सर्वानुभवसिद्धमिदमथापि क्रियायां कीर्तनध्यानादिरूपायां प्रतीयंति ते नामरूपे यथावदनुभवंति भक्ता भक्त्याहमेकया ग्राह्य इत्यादेः ३६ ननु की
र्तनादिना चित्तदनुभवस्तर्हि सकृत्कीर्तनादिना कुतो नेत्याशंक्य प्रतिबंधकसंसारवासनानिवृत्त्यर्थमावृत्तस्य प्रेक्षणादि इति वदंतो भक्त्यैव मोक्ष इत्युपसंहरंति शृण्वन्निति श्रवणादीनां
विकल्पो ज्ञेयः न समुच्चयः अन्यानपि संस्मारयन् मंगलानि दुःखनाम्नां कानि सुखात्मकानि च क्रियासु लौकिकीष्वपि वर्तमानः त्वत्पादयोराविष्टचित्तो भूत्वा भवाय न कल्पते संसा

८

रवासनारहितो भवतीत्यर्थः यद्वा क्रियासु तल्लीनत्वात् पादयोश्चाविष्टचित्ते त्यादि ३७ विशेषतः श्रीकृष्णावतारमभिनंदति भद्रं ज्ञातमित्यर्थः हे हरे भारहारक अस्याः भारार्तायाः त्वदवतारेण
धन्या याव्यापद इति पादोत्पन्नत्वात्तद्भेदः पादकृताया भुवः कंसादिहेतुको भारस्त्वज्जन्मना अवतारमात्रेण दूरीकृत एवेति विज्ञापनचातुर्यं इदमेकं प्रयोजनं सिद्धमेव किंतु विचित्रक्रीडया अस्मान् भुवं
लोकांश्च कृतार्थान् कुर्वंति मुख्यं प्रयोजनं विज्ञापयंति दिष्ट्यांकितामिति त्वत्पदैरित्यल्पार्थकः द्वापारांतोद्भूतनराचिताकृतित्वात् अन्नुकंपायायावा कः कोमलैरित्यर्थः शोभनैर्ध्वजादिचिन्हितैः रंकि
तामलंकृतां भुवं तवत्वयादेत्युच्छधादिनानुकंपितां द्यां चेति यथायथं संबंधः यद्वा द्वयोरपि विशेषणद्वयं पारिजातहरणादौ पुष्पपरागादिषु पदानामुदयात् ३८ जन्मनेत्युक्तत्वात् जीवत्वं संसार
उक्त इत्यपराधं परिहरंति नेति बत हर्षे हे ईश हे अभय सर्वाश्रये आत्मनि त्वयि आश्रित्य स्थिताया अविद्यामायापरनामधेयात्तयैव भयादयः कृतावर्तते इति मालनमात्रार्थं नायं स्वयं भवता
रोयुक्त इति न भवो यस्मात्तस्य तव भवस्य जन्मनः कारणं क्रीडां विना न तर्कयामास इत्यर्थः तदेवं विनोदस्य स्वरूपसंबंधत्वेनाविद्यकस्य ख्यादिलीलातो विशेषाद्दुश्चिरलीला कृष्णसार इति व
क्ष्यमाणं संगतं ३९ प्राकृतं प्रार्थयंते मत्स्येति नः अस्मान् त्रिभुवनं च यथा भारहरणेन पा॰ सि तथाधुनापाहि अतो भारहरेति भारोपनीत इत्युक्तिभंग्या प्रार्थितेपि न पुनरुक्तिरुक्तंद्या यद्वा
यथा पासि तथैवाधुनापि पास्सि काकाधिकमेव पास्यसीत्यर्थः तदेवाह भारं हरेति पूर्वं त्वया बहूनामपि हिरण्यकशिपुकालनेम्यादीनां पुनर्जन्मना भुवो भारो भवदेवताधुना तथा कुरु तथा तेषां पु
नरावृत्तिर्न स्यादिति ननु दृष्टानां मुक्तिरयोग्ये सारं कार्यासकाकु प्रणमंति यद्वृत्तमेति ४० अन्यालक्ष्या अपि देवक्या दृश्यमाना देवा भगवत्स्तवनेन विस्मितां तां मातरमाश्वासयंति दिष्ट्येति हे अंब हे
तरिति भगवान् मातृत्वेन वंद्यत्वात् अंशेन बलदेवेन सह भगवान् साक्षात्स्वयमेव युवयोः पित्रोर्भवायेति किं वक्तव्यं नोस्माकमेव भवायत कुक्षिंगत इति यद्वा अंशेन मत्स्याद्यैस्त्यादिना योस्मा
कं भवाया भवत्स एव साक्षात् कुक्षिगत एतद्दिव्या मनस्तो धारणेपि कुक्षिगत्वोते द्युतितस्यास्तत्पार्थं कंसदुःश्रेष्ठातो बिभेमि इति चेत्तत्राहुः मुमुक्षोरिति निकटत्वस्याद्देवं चेष्टत इत्यर्थः
यहूनो सर्वेषामेव किं पुनर्युवयोः स्वस्य चेत्यर्थः एवं नित्यमेव देवा तां स्तुवंतीति त्वेयं अदृश्या पुरुषैस्त्रिभिर्देवकी देवतागणाः बिभ्राणं वपुषा दिक्षु तुष्टुवुस्तामहर्निशं इति विष्णुपुराणोक्तेः ४१
पुरुषमिति देवकीहृदयपुरस्थितं पुरुषोत्तमं वा इदं हृस्यंताद्दहितं परब्रह्मात्मकं स्कं तेरविषयमपीत्यर्थः इति देवक्यां जन्मना भारोपनीत इत्यादिप्रकरणं यथावद्दर्शितं स्तुत्येति ब्रह्मताव
र्णनादेवकीगर्भगत्वमधिकमिति भावः ४२ इति श्रीमद्भागवते दशमस्कंधसंश्रयः द्वितीयकोध्याय एष तोषिणीसारसंग्रहे द्वितीयोध्यायः २ अथेति मंगलार्थं यर्ह्येव जनेर्जायमानेव
र्तमानसमीपे भविष्यति लट् उत्सत्ति प्राक्कालमारभ्य इत्यर्थः अजनजन्मर्क्षादि मनःप्रसादांत विशेषणविशिष्टः परमशोभनः सर्वगुणोपेतः कालआसीत् यर्हिच जनार्दने जायमाने तद्
स्पत्तिकाले एवं दुंदुभिनादो दिक मासीत्तदा देवक्यां विष्णुराविरासीदिति सार्धाष्टमश्लोकेनान्वयपि जायमानपदयोर्नान्वयानुपपत्तिः केचित्तु जनार्दने जनपीडके निशीथे जायमाने इ
त्यन्च यंकुर्वंति सर्वेगुणाः ग्रहोच्चस्थित्यादयस्तैरुपेतः तथाच रत्नमाणिक्य नाम्नि ज्योतिर्ग्रंथे उच्चस्थाः शशिभौमचांद्रशनयो लग्नं वृषो लाभगो जीवः सिंहतुलालिषु क्रमगताः पू
षोशनोराहवः नैशीथः समयोष्टमी बुधदिनं ब्रह्मर्क्षमत्र क्षणे श्रीकृष्णाभिधमंबुजेक्षणमभूदाविःपरं ब्रह्म तदिति अन्यत्रापि वृषकन्यातुलाकर्कराशिषु स्फुटमुच्चगाः सोमसौम्यश
निक्षोणीसुतास्तत्र जन्मनि स्थिताः यस्माद्विश्वावसोर्वर्षे जन्म श्रीनंदजन्मनः विश्वस्यैव वसुश्रीमत् बभूवामुष्य तुष्टित इति परमशोभनत्वमेवाह यर्हीत्यादिना अजना श्रीवि
ह्मोर्जन्म यस्य तस्य ब्रह्मणो ऋक्षं रोहिणी यद्वा यर्हि यदा अजनस्य श्रीकृष्णस्य जन्मर्क्षं रोहिण्याख्यमभूत् २ दारंभे एव सर्वगुणोपेतः सर्वशुभयुतश्च कालोभूदित्यन्वयः तदेव
दिशाइत्यादिना दर्शयति इति किंभूतं शांतोग्रदृष्टीत्यादिरहिता ऋक्षाणि अश्विन्यादीनि ग्रहाश्च भौमादयस्तारकाश्च यस्मिन् तत् २ निर्मलानामुडुगणानां उदयो य
स्मिन् तथासीत् मंगलप्रचुराः पुरादयो यस्यां सा २ नदीनां ह्रदानां चोभयेषामपि प्रसन्नजलत्वं जलरुहश्रीकत्वं च बोध्यं भेदेन विशेषणात्किंतु तत्प्राधान्यमात्रेण २

तोग पू॰ ८

कृष्ण

सुखस्पर्शो इति शैत्यं पुण्यं रम्यं गंधं वहतीति सौरभ्यं शुचिर्निर्मल इति वल्ल्यादिसंबंधान्माद्यं चत्राष्ट्येग्नेर्वायुसख्यव्यंजनार्थः तत्र स्वसखे वायौ सती शांता निर्वाणप्राया अपि लौकिकवैदिकाग्नयो दी
प्ता आसन् शांताः प्रदक्षिणाः संत इति वा ४ असुरद्रुहां सर्वप्राणिनां देवानां च भीषणत्वादिना तेषु सर्वेषामेव द्रोहोदयात् कंसादस्तु द्वेषादिकमेवाधिकमभूत् ननु सर्वगुणोपेतत्वादिकमेतावत्पर्यंतं यदुक्तं त
त्क्रियंतं कालमारभ्यासीदित्यपेक्षायामाह अजन इति भगवति जायमाने इति वर्तमानसामीप्ये वर्तमानवद्वेति लट् उत्पत्तेः पूर्वकालमारभ्येत्यर्थः उत्पत्तिपूर्वं प्रथमपक्षे अजने जायमाने यहीति त्रयमितः पूर्वं तत्र सर्वे
त्रयोऽप्यनेदुः स्वयमेव अनाहता दुंदुभयो देवानां प्राणदस्तदा इति हरिवंशोक्तेः ५ मुदेति सर्वत्र तत्तदाचरणे हेतुर्योऽयः अवतारज्ञानाभावेप्याकस्मिकहर्षोदयेन तत्तदाचरणात् तदेतिपाठे सार्धाष्टमस्य नाविरासि
दित्यनेनान्वयः ६ अत्रापि मुदेति पूर्ववत् अन्विताः अन्योन्यं मिलिताः संतः मंद्रं गंभीरं सागरं अनुजलधारा इत्यस्य सुमनांसि मुमुचुरित्यत्राप्यन्वयः मंदं जगर्जुर्जलदाः पुष्पवृष्टिमुचो द्विजेति विष्णुपुराणात् ७
नेदुर्दुंदुभय इत्यादिकं कदेत्यपेक्षामाह निशीथ इति तमसा व्याप्ते अर्धरात्रे जनैर्भक्तैरर्द्यते तथा तस्मिन् जायमाने तत्र काष्ठघ्नण इत्यर्थः तमोव्याप्त इति विशेषणं तत्कालत्यात् तमोनाशने नेंदूपमा सामंजस्या
य तथाप्यभूतोपमेयं निशीथे पूर्णचंद्रोदयादर्शनात् कंसादीनां गर्जनाद्यज्ञानं मायाप्रभावेनं सर्वोकगृहास्क प्राणिन्ह देशा वैकुंठक्षीरनिध्यादिदुर्गमस्थानेषु शेते अक्षभिनो विहरति सः पुष्कलः परिपूर्णः
वैकुंठादिषु स्थितैः सर्वैरंशैः संभूयावतीर्णत्वात् देवरूपभगवतो रूपं यस्यां तस्यां प्राच्यां यथा प्राच्यामिव देवक्यां पूर्णइंदुरिव प्रादुर्बभूव दिगादिदृष्टांतेन सर्वप्रकाशमानस्यापि देवक्यामाविर्भावयोग्य
ता विष्णुपुराणेपि ततोखिलजगत्पद्मबोधायाच्युतभानुना देवकीपूर्वसंध्यायामाविर्भूतं महात्मनेति आविर्भावस्तु कंसवंचनायाष्टममासि गर्भकाले त्वसंपूर्णे अष्टमे मासि ते स्त्रियो देवकी च यशोदा च
सुषुवाते समं तदेति हरिवंशात् ८ तमिति युग्मकं तमद्भुतं बालकं वसुदेव ऐक्षतेत्यन्वयः बालकं स्वल्पाकारतया तत्त्वेन प्रतीयमानं बालानामपि कं यस्मात् बालः को यस्य बाले गोपैः कं यस्य अंबुजा
यतलक्ष्यां ईक्षणे यस्य अब्जा गोजा इति श्रुत्यनुसारेण अंबुजे चंद्रसूर्यौ ईक्षणे यस्य सा द्यर्थांतराणि भांति अद्भुतत्वे हेतुविशेषणानि चतुर्भुजमित्यादीनि उद्यतानि उत्कृष्टानि वा आयुधानि यस्य श्रीव
त्सलक्ष्म यस्य अदं तत्स्वभावं गलेन शोभते सकौस्तुभो यस्य सोदपयोदादपि सोभगं यस्य ९ महार्हाण्युत्कृष्टानि वैडूर्याणि नीलपीतरक्तछविरत्नविशेषा यत्र तस्य कीरीटस्य त्विषा ऊर्ध्वभाग कुंडलयोस्त्विषा
चाधोभागव्याप्ता मितकेशा यद्वा त्विषसा वृतं आपंचे वहलैस्तानां मिरुक्तेः वैडूर्यमिव याः तयोस्त्विषा तया स्यादि उद्दाम निरुद्धदेः कांच्यादिभिर्विशेषतो रोचमानं यद्वा तेरूपलक्षितं स्वत एव रोचमानं स्व
शोचिषेति वक्ष्यमाणत्वात् अत एव घनतमस्यपेक्षतेति गौतमीये गरुडारूढस्त्वाष्ट महिषीवृत तत्त्वब्रह्मादिस्तूयमानत्वान्युक्तानि पित्र्याम दर्शनादत्रानुक्तानि १० स परमभाग्यवान् हरिं स्मृतिमात्र
ण जन्मादिहरं सुतं जातं दृष्ट्वा विस्मयेन विकसितलोचनः सन् तं देवं गवामयुतं अस्मरत् तत्संकल्पितवान् ननु बद्धस्य कथं संकल्पोपि कथं वास्नानं विना दानं तत्राह कृष्णेति उत्सवेन संभ्रमो मन
स्त्वरा ततो विचारास्फूर्तेरिति भावः मुदा आप्लुतो व्याप्तो हर्षः पूर्वकं स्नातो वा ११ अथ सद्य एवैनं परं पुरुषं अवतीर्णं निश्चिस्य अत्र हेतुः कृतधीः ततो नतांगोन्यस्य यद्वा नतशिराः अवधारणे हेत्वं
तरं स्वेति सेनासाधारणेन नयनाद्यालादकेन रोचिषा तद्गृहं प्रकाशयंतं अस्तौत् गतभीः स्तवशापदं द्वारपाः शोध्यंतीति भयरहितः यतः प्रभावमैश्वर्यं वेत्ति सः किं करिष्यंति ते वराकाः कंसो वेति भा
वयन्निति भावः हे भारत भारतवंश्येति पस्य यदुकुल भाग्यभरमिति भावः श्लेषेण भाः श्रीकृष्णकांतिस्तत्र रताः तस्यां गर्भ त एव रतेति १२ पुत्रबुद्धिं परित्यज्य अहो विदितोसीति कथं तदाह भवानयं
तेः परः पुरुष इति ननु तर्हि किं भोश्चर्यवद्वदसि विदित इति मुनयः प्रकृतिभिन्नं पुरुषं विदंत्येव तत्राह साक्षादिति अक्षिजन्यवृत्त्येत्यर्थः ते तु वाक्यजन्यवृत्त्येति ननु परिच्छिन्नो दृश्यश्चाक्षिसन्निकृष्टः
साक्षात्क्रियते किमत्र चित्रं तत्राह केवलेति केवलो निरुपाधिकश्चासावनुभवश्चिद्रूपश्चासावानंदश्च तदेव स्वरूपं यस्य सः किंच सर्वबुद्धिभासकः न त्वेवंभूतो परिच्छिन्नो दृश्यो वा भवति चक्षु
षा साक्षात्कारस्तु महावाक्यानेव वृत्तिव्याप्यत्वमात्रेण फलव्याप्यत्वं तु वाक्यजन्यसाक्षात्कार इवात्रापि नेति तुल्यं स्वयंप्रकाशत्वसाम्यात् न हि फलव्याप्यत्वाभावे वाक्यजन्यवृत्तिविषय
त्वं तत्र अप्रयोजकत्वात् ध्यानदीपोक्तनिर्गुणोपासनाजन्यसाक्षात्कारे व्यभिचारात् गौरवाच्च किंतु स्वयंप्रकाशत्वे तत्त्वप्रकृतेप्यविशिष्टं जडांशासंभिन्नचिद्रूपत्वात् न चात्र विवदितव्यं
एतद्वाक्यप्रामाण्यात् वक्ष्यमाणवाक्यसहस्रात् तापिन्यादिश्रुतिशतात्तच्चेति युक्ततरं भाति इत्थं च एवंभूतोपि त्वं साक्षात् दृशा विदितोसीत्यहो मुन्यादितोपि मम भाग्यमिति भावः १३ अपरि

८ छिन्नत्वमुपपादयन् परिच्छेदप्रापकं देवकीजठरप्रवेशं वारयति सएवेति चतुर्भिः सएव केवलानुभवस्याद्युक्तरूप एव त्वं अतोऽप्रविष्टोऽसंभावितप्रवेशोपि प्रविष्टो भाव्यसे तत्र दृष्टांतः अग्नेस्सृष्टा ८
दौ त्रिगुणात्मकं ब्रह्मांडं सृष्ट्वानुपश्चात्तद्दिकशाखिरूपेण तद्ब्रह्मांडमिवेति यद्यातद्ब्रह्मांडं प्रतिहिनिश्चितं अप्रविष्ट एव ब्रह्मांडस्य जडत्वेन प्रेमाभावात् तत्रोदासीन एवासीत् देवकीजठरे तु प्रेमवशात् प्रवि
ष्ट इव भाव्यसइति अयं भावः न चांतर्न बहिर्यस्य न पूर्वं नापि चापरमिति वक्ष्यमाणरीत्या विभुमपि निर्विशेषमहं भक्तप्रेमवशात्स्वल्पदेशस्थितमिव दर्शयसि तेन चानंदयसि निराकारब्रह्मानुभ
विनापीति श्रुत्यादिप्रसिद्धं तदन्यथानुपपत्त्या मणिमंत्रादिवत्काप्यचिंत्याशक्तिर्निश्चीयते तयैव निजजनप्रेमप्रवर्तितया प्रवेशादिकं पुत्रभावादिकं च संपाद्यते तावतैव तत्पुत्रीभावाय तत्राच
रणवरादिकं निर्बाधमिति १५ ब्रह्मांडे भगवतो मुख्यप्रवेशाभावं महदादिदृष्टांतेनाह यथेति युग्मकेन इमाविकृता भावा महदादयो विराजादिकार्येषु यथा तथा एतद्व्रणोति ते इति तेमहदादयो
यतः पृथक् भूताः संतो नानावीर्याविशिष्टकार्यजननासमर्था अतो विकृतैः षोडशविकारैः सहसन्निपत्य संभूय विराजं जनयंती एवं समुत्पाद्यानुगताः प्रविष्टा इव दृश्यते न पुनः प्रविष्टाः उत्पत्तेः प्रा
गेव कारणतया विद्यमानत्वात् न तेषामिहस्पृष्टे कार्ये पश्चात्संभवः प्रवेशइत्यर्थः १६ हार्यंतीति केतिदिशाति एवं भवानिति अतो देवकीजठरे प्रवेशः प्रेमवशात्वादिगुणशीलस्य तव प्रसादमय एवेत्याह ग्रात्ह्ये
रूपादेयैः प्रार्थ्यैरिति यावत् गुणैः प्रेमवश्यत्वादिभिः सहसन्नपि निसर्गं स्वतंमानोपितद्गुणाग्रहः तेषु गुणेषु आग्रहः पुनः पुनराशक्तिर्यस्य तथाभूतो भवान् तवति तानेव गुणान् जठरप्रवेशादिभिः पुनः पुन
र्व्यंजयसीत्यर्थः कथंभूतैर्गुणैः बुध्यानुभवमेव न तु ब्रह्मांडादिभिरपि प्राप्यं लक्षणं स्वरूपं येषां प्रमाद्यभावे तु नतरां प्रवेशसंभवः त्वद्धिमहस्यापरिच्छिन्नत्वेन बहिरंतर्भावशून्यत्वादिति व्यतिरेकप्रद
र्शनायाह अनावृतत्वाद्बहिरंतरं न ते इति अनावृतत्वे हेतवः सर्वस्येति नहि सर्वस्वरूपस्यान्यदावरकमस्ति सर्वात्मनः तत्त्वावृतो नस्यात्मा भवेत् आत्मवस्तुनः आत्मनास्वयमेववस्तुपरमपुरु
षार्थरूपः स्तस्य अवस्तुनो देशादिपरिच्छेदो न वस्तुन इति आवरणं न घटतइत्यर्थः तस्मात्कार्ये न ते प्रवेशो मुख्योस्ति नतरां ब्रह्मांडे न तमां गर्भे प्रवेशः अतः केवलानुभवानंदरूपत्वमावयोः पुत्रतयाप्र
विष्टोसीत्यहो भाग्यमिति भावः १७ ननु अन्येपि देवाः पांडुप्रभृतीनां पुत्रतया जाता दृश्यंते इति तेपि प्रेमवश्यत्वादिगुणशीलत्वाच्छ्रेष्ठा एवेति कथं युवयोरेव भाग्यातिशयस्तत्राह यइति आत्मनोहस्याः प्रकृ
तिपरिमरूपास्यात् तु भवदीयगुणवदात्मस्वरूपाः इदृशा गुणाः येषां तेषु देवादिषु मध्ये स्वव्यतिरेकतः स्वव्यतिरेकेण अयं देवः सतश्रेष्ठ इति यो व्यवस्यते स मूर्खः यतस्तन्मनीषितं व्यवसितं अनुवादं विना
सेती स्वसिद्धार्थानुवादं विना न स्वप्रधपरं परयापद्दिश्यमानत्वेन प्रमाणवादत्वाभावात् अतः सम्यक् न भवंतीति चकारबलात्तज्ञावृत्तिः यतः स पुमान् रूढैरिभिस्त्यक्तो अपरुषार्थरूपमेवोभवापाद
त्स्वीकृतवान् ददेलेङ् परस्मैपदमार्षं अतो मूर्ख एवेत्यर्थः यद्वा दृस्याद्दर्शनीया रम्या ये गुणास्तेषु मध्ये स्वव्यतिरेकतः स्वरूपभूताधिष्ठाने त्वां विनान्यत्र देवादिषु अयं गुणाः संतीति यो निश्चिनोति सो
बुध इत्यादि शेषं समानं १८ सर्वकारणत्वेन विकारादिदोषराहित्येन च सर्वोत्कृष्टानंतगुणत्वमेवेति स्थापयति त्वत्तइति प्रकृतिश्च प्रतिज्ञादृष्टांतानुपरोधादिति न्यायेनोपादाननिमित्तोभयरूपा
त्त्वत्तो जन्मादीन् श्रुतयो वदंति अत्र विशेषणत्रयेण विरोधमुद्भावयति तत्रो गुणादिति रजआदिगुणसंबंधाभावात्स्वरूपान्यथाभावरूपपरिणामासंभवेन अविक्रीयत्वेन चोपादानत्वानुपपत्तिः
अनीहादिति चेष्टाभावान्निमित्तत्वानुपपत्तिः परिहरति त्वयीति ब्रह्मणि निर्विकारपरमानंदैकरूपे ईश्वरे ईशनाद्यचिंत्यापरिमितशक्तिमतीति चिंतामणय यस्कांतादीनां नानापदार्थोत्पाद
नत्वो हचालनादिकार्यकारित्वेपि निर्विकारत्वदर्शनात् उभयविधश्रुत्यर्थान्यथानुपपत्त्या तत्सिद्धेर्न कोपि विरोधः उपपत्त्यंतरमप्याह त्वदिति जगदाकारेण परिणममाने गुणरूपादानत्व
भाग. मुपचर्यते आध्यासिकसंबंधेन परिणममानगुणाधिष्ठानत्वात् दध्याकारेण परिणतदुग्धाधिष्ठानदुग्धावयववत् कर्तृत्वमपि न कार्यानुकूलचेष्टावत्त्वं चेष्टाया अपि कार्यत्वेन तत्कर्तृत्वानि
८ र्वाहाय चेष्टांतरापेक्षणे अनवस्थानात् किंतु कार्यानुकूलज्ञानवत्त्वं तच्चनित्यज्ञानस्वरूपे त्वय्येवोपपन्नमुभयविधहेतुत्वमिति भावः १९ ननु कथं मत्तोस्य सृष्ट्यादि ब्रह्मादीना
मपि तत्कर्तृत्वाद्दृश्यत्वाह सत्त्वमिति सज्जगज्जन्मनिमित्तोपादानत्वमेवस्वमायया भक्तरूपया शुक्लं शुद्धं मायातत्कार्यस्पर्शरहितं वर्णं सर्वस्य स्वस्वरूपं वर्णो द्विजादौ शुक्लादौ यशोगुणकथा
स्तुच स्तुतौ नानास्त्रियोरुपवेदाक्षरविलेपने इत्यभिधानात् बिभर्षि धारयसि प्रकटयसीत्यर्थः रजोमयत्वेन रक्तः सृष्ट्यादिरागबहुलं ब्रह्मात्मना तमोमयत्वेन कृष्णं अनभिव्यंजि

तत्स्वरूपप्रकाशं रूपमत्मन्ना पुष्प्यासी अतस्त्वमेवस्त्वयादिकर्तेति भावः वर्णं शुक्लादि पद्मानां अत्र न चाक्ष्णः षगुणपरत्वं तमसानां बकादीनामपि शुक्लवर्णत्वात्सात्त्विकानां शुकादीनां श्यामत्वात् रू
द्रस्य स्वेतत्वात् विष्णोः श्यामत्वाच्च किंच श्रीविष्णोर्हरिर्हि निर्गुणः साक्षात्पुरुषः प्रकृतेः पर इत्यादौ निर्गुणरूपत्वमेव वक्ष्यते तस्मात्सच्चिदानंदघनमेव तद्रूपमिति निर्बोधं २० अधुना तुल्यवत् हितार्थं स्व
यमेव मत्पुत्रतां प्राप्तोऽसी अहो लोकभाग्यं किमुत मद्भाग्यमित्याह त्वमिति अस्य दुःखाब्धिमग्नस्य भक्तप्रमुखलोकस्य रिरक्षिषुर्नलोकेति कर्मषष्ठी निषेध्याच्छेषषष्ठी हे विभो अखिलेश्वरेति अवता
रासंभ ना तथाप्यवतीर्णोऽसी तत्रापि मम मत्सं घ धमात्र पुत्रे कारागृहेऽपि अहो कारुण्यमिति भावः अतो राजन्यच्छद्मासुराधिपकोटिर्निर्व्यूह्यमानानि निर्व्यूढा स्तत् घटितास्तत्सहिता इति भावः चमूः नित
रां पुनरावयस्य भावेन हनिष्यसे एव २१ यथा कालनेसर्वोनेव हनिष्यसे तथाप्ययं कंसो महादुष्टत्वाद्दयापि दुष्टचेष्टो युक्तत्वात्सप्रथमं हंतव्य इत्याह अयमिति असभ्यः खलः समर्पितं कथितं अभि
सरति आगच्छन्नेव वर्तते यतउदायुधः सहतिष्ठति स्फुरत्येति भक्तानां देवानां दुःखदस्य स एव वधो युक्त इति भावः २२ अथ पितृस्तवानंतरं तं चिरकांक्षितमेनं दिव्यरूपं आत्मजं
निजोदरादेव जातत्वेन भातं तथा भासनं मम ताविशेषार्थं किंतु प्रसूतिरिस्यननुकरणात् योगनिद्रया भगवत्ता जसा वा पूर्वं बाह्येंद्रियावरणमप्यासीदिति गम्यते अत एवाथवीक्ष्य तत्क्षणे महापुरुष
त्वयेन भगवान् तत्रात्मजत्वदर्शनं भयहेतुः महापुरुषत्वदर्शनं तु स्मिते स्तुतो च महापुरुषत्वदर्शनेपि भयस्थितिः पुत्रस्नेहस्य प्राबल्यं व्यनक्ति २३ देवकीकिंचिद्वित्तापयितुं प्रथमं त्वयि नय
शं केवलावन्नास्तीत्याह रूपमिति अव्यक्तं सर्वागोचरं आद्यं सर्वकारणं तथापि निर्विकारं निरीहं निष्क्रियं ज्योतिश्चिद्रूपं सन्मात्रं निर्विशेषं स्वगतभेदशून्यं त्वादानं देकरसं यत्तत्किमपि कार्यकल्प
निर्गुणं ब्रह्मरूपं वस्तु वेदाः प्राहुः स एव साक्षाज्जगत इव कार्यकारणबिंबप्रतिबिंबभावव्यवधानशून्यः त्वं विष्णुरिति इंद्रियापरोक्षश्चेत्याह अध्यात्मदीप इति बाह्याभ्यंतरकारणानां प्रकाशकतया
प्रत्यक्षो न हृश्यं तयेत्यर्थः स्वामिपादानुसारेण भाति अथवा यत् यस्य रूपं श्रीविग्रहं तत् इदमित्यनिर्वाच्यं अव्यक्तादिरूपं वस्तु प्राहुः स एव साक्षात्त्वमिति तत्राव्यक्तं इंद्रियावेद्यं आद्यं जन्मरहितं ब्र
ह्मव्यापकं ज्योतिः स्वयंप्रकाशं निर्गुणं प्रकृतिकार्यगुणरहितं निर्विकारं वृध्यादिशून्यं सन्मात्रं सद्रूपं नाशशून्यं निर्विशेषं देवत्वादिविशेषधर्मरहितं निरीहं निष्क्रियमिति यतस्त्वं विष्णुर्व्यापकः नचा
तर्नबहिर्यस्येत्यादिवचनात् यद्देशादिभिः सर्वाधारत्वेनानुभूतत्वाच्च किंचाध्यात्मदीपः बुध्यादिप्रकाशकत्वात्परमात्मरूपः यद्वा अधिकृत आत्मा येस्ते अध्यात्मान आत्मारामाः शुकादयस्तेनपि दीपय
सि परमानंदेनोल्लासयसीति ब्रह्मत्वेप्यानंदाधिक्यं दर्शितं एवंभूतस्य तव न भयशंकेति भावः २४ किंच महाप्रलयेपि अवशिष्यमाणस्य कुतो भयमित्याह नष्ट इति लोके चराचरे नष्टे भूतेषु लीने सति तेष
पि भूतेष्वादिभूतं सूक्ष्मभूतपंचकं प्रविष्टेषु तस्मिन् सूक्ष्मभूत तद्रूपे व्यक्ते अव्यक्ते प्रधानं याते कालवेगेनेति सर्वत्रैव हेतुः अशेषसंज्ञः अशेषाः वैकुंठादयः तत्पदार्था सोपि संज्ञा यस्य तद्रूपेणापि यः
स्वयमेवेत्यर्थः यद्वा शिष्यते प्रलयेपि वैकुंठलोकादयस्ते संज्ञायंते येन स एवंभूतो भगवान् एकः शिष्यते नान्यप्रपंच इत्यर्थः २५ कालवेगेनेत्युक्त्या प्राप्तकालस्वातंत्र्यं निरस्यंती ततः स्वतरामभयं तेके
सादिभीतास्वयमपि शरणं यातियइति योयंनिमेषादिर्वत्सरांतः वत्सरावस्थाश्च महीयान् द्विपरार्धभूतः कालः येन च विश्वं चेष्टते परिवर्तते तं कालं हे अव्यक्तबंधो प्रकृतिप्रवर्तक तस्य तव चेष्टामा
हुः भवतः त्वात्वां क्षेमस्याभयस्य सुखात्मनेश्वस्थानं शरणं भजे इत्यनमितीश्वरस्य प्रसन्नभयहरणमात्रं कियदिति भावः २६ तदाश्रितस्य क्षेमप्राप्त्या क्षेमधामत्वं दृढयति मर्त्य इति लोकान् प्रति
पलायन् मरणधर्मी भयाभावेनप्राप स्वच्छः भयरहितः यतोस्मात्सदा त्वन्मर्त्या हा मृत्युः पलायते अकारूपकेण स्वतः पुरुषार्थत्वं हे आद्य सर्वनियंतः यद्वा अद्याधुना त्वयि प्रादुर्भूते सर्वोपि स्वस्थः
शेते शायिष्यंते यतो मृत्युरित्यादि एवं ब्रह्मत्वेन निर्भयत्वमुक्त्वा लयावशेषत्वकालनियंतृत्वमृत्युवारकत्वैस्तत्दृढीकृतं २७ प्रस्तुतं विज्ञापयति सत्वमिति स निर्भयः अतो मत्पुत्री भूतस्त्वं उग्रसेन
तिसाक्षान्नामाग्रहणं द्वेषात् अत एव प्राक्ययत्व असभ्य इत्येवोक्तः राष्ट्रभ्लेषेणोग्रत्वं अर्थतोपि पित्व्यजत्वाद्भयाधि वयं निर्कं ततिसम्भूतं हि बंधुभ्यो भयमुत्थितमिति ज्ञायात् त्राहीति रक्षामेवार्थ
येन तु तं हंतुमिति कृपाजननायेदं न्यायोक्तिः मातृस्वभावतो भयात् तमेतद्गोपयितुं छलेनाह रूपंचेति पौरुषं पुरुषस्यांतर्यामिणो रूपं तत्सहस्राकारं चतुर्भुजत्वात् अत एव विश्वाडंतर्वर्तिषु ध्यानधि

वपुष्ट्वेन प्रसिद्धं द्विभुजं तु शृंगवेणुधरं तु वेत्यादितापिन्यादिश्रुतिषु मुमुक्षुध्येयतयाश्रुतमपि गूढं तया लोकेन प्रसिद्धं गूढं परं ब्रह्म मनुष्यलिंगमिति स्मृतेः मा स्म दृश्या मत्ता नां अयोग्यत्वा
दिति भावः २८ ननु मय्यं तर्हि तेहि गर्भचौर्यापराधेनाति भयं स्यादित्याशंक्य निवेदयति जन्मेति त्वदर्थमेव भयं नात्मार्थमिति भावः मधुसूदनेति क्रूरादस्मादुग्रासंभवस्त्वथाप्यहमधी
रधीरिति भयं कृपादयेन धैर्यलोपात् कंसादिति नामोक्ति हननोत्कंठया २९ तत्रानुमतिं दृष्टांतघ्नानमप्यसहमानाह उपेति चतुर्भुजमलौकिकं नरलोकासदृशं रूपमुपसंहर गोपय
रूपांतरमेव मदिष्टतमं प्रकटयेत्यर्थः तथा सति यत्र कुत्रापि गोपयितुं शक्यमिति भावः विश्वात्मन्सर्वरूपेति तत्र सामर्थ्यं ३० नन्वीदृशेन पुत्रेण ते कीर्तिरेव मा सदृशोपि च मत्कृति
नः स्मः कंसाच्च त्वां मोचयेयमित्याशंक्य मातृभावातिरेकात् तादृशाशात्य प्रतीत्या व्याजांतरेण तत्प्रार्थयते विश्वमिति निशांते सृष्टिस्थितिकाले अनंतब्रह्मांडात्मकं विश्वं यथावका
शं असंकोचतो बिभर्ति महत्स्वस्वरूपेण सोयं गर्भज इति असंभावित्वादुपहास्यत इत्यर्थः रूपांतरं तु तथा प्रख्यातिज्ञानस्यादिति तस्याशाशयः ३१ पित्रोः स्तुत्या तु स्वचतुर्भुजाविर्भावे हेतु
त्वात् तोप्रतिष्ठवन्निव स्नेहविशेषान्मातरमाह त्वमेवेत्यादिना स्वायंभुवमन्वंतरे सती वर्तमाने यद्वा हे सती मुहुस्त्वस्यैव पत्नीत्वात् पूर्वसर्गे प्रथमजन्मनि पृश्निनामासि अयं वसुदेवः
कल्मषं रागादि ३२ वेस्मरणे ततस्तदानीमेवेति ब्रह्मादेशपालकतोक्ता संनियम्येति दमः अतः परमं तपः नानार्थस्य तपेस्तपः परताव्यक्तये तपःशब्दः इत्ते च तपःशब्दे पुनरुक्तिः स्या
दिति तपातेइत्यस्य व्रततांताइत्यर्थः पर्यवस्यति ३३ तप आह वर्षेति युगेन वर्षादीन्कालस्वभावाननु निरंतरं आतपो रविरश्मिः घर्म उष्मा यद्वा आतपः शारदः घर्मो निदाघः प्राणाया
मेन धूताः नाशितास्ततो निःशेषेण ततो वासनायाश्च व्युच्छेदन विशेषेणेति विनिर्धूता मनसः कामादिमलयाभ्यां ३४ उपशांतेन मन्निष्ठेन शोभामन्निष्ठता बुद्धिः स्मृतेः इति शांतिरुक्ता
मतः पुत्रभूतात्कामान्पितृभावाच्चितसुखानि प्रजासर्गे इत्युक्तेः मादृशो वामिति वक्ष्यमाणाच्च ३५ एवंभूतप्यतो भद्रे इतिपाठः भद्रे माथुरक्षेत्रे हे भद्रे इति वार्थः मय्येव न कामांतरं चि
तंयंयोरित्युपरतिः इयुर्गतानि ३६ तेदृतिसार्धकं हे अनघ इति तपश्छिद्राभावः अतो वां युवयोः परितुष्टसन् ननु भक्त्यैव तुष्यसि न तपसा तत्राह तपसा मादर्पितेन तया भक्त्या श्रद्ध
या जातया अनवधा भक्तिस्तया च कारात्पुत्रत्वभावनामय्या प्रेमलक्षणया च हृदि अमुना वपुषा भावितः प्रापितः अतो मुनेव चतुर्भुज श्रीकृष्णाख्यवपुषा प्रादुरासं प्रादुर्भूतः काम
स्य दातुमिच्छया वरदराट् वरदेषु श्रेष्ठः सकृद्वरणेपि पुनः पुनराविर्भावात् तपोधिकस्यात्तेशतराधिकस्य च फलस्य दानाच्च ३७ व्रियतामित्यर्धकं वां युवाभ्यामित्यर्थः कर्तरि शेष
षष्ठी मादृशो मत्सदृशः एव नत्वहमेव लज्जया तथा वरणाशक्तेरिति भावः ३८ न केवलं मत्प्रेम्णा विषयभोग एवानादृतः किंतु मत्प्रसादाद्धस्तप्राप्तो मोक्षोपीत्याह अजुष्टेति असेवितवि
षयाविति दैहिकभोगत्यागेनाहंतास्पदावेशाभावः अनपत्याविति ममतानिरासः अतो मोक्षवरयोग्यता विनिर्धूतमनोमलाविस्मृतेश्च मे मत्त इति मोक्षप्राप्तिसंभावना वरदराडि चा
त्युक्तेश्च तादृशावपि युवां मत्तोपि मोक्षं न वव्राथे तत्र हेतुः मोहितौ देवस्य मम मायया इति मयि पुत्रस्नेहसंपादिकया मम कृपया यद्वा भवत्कर्तृक मद्विषयक पुत्रोचितलालनेच्छारूप
या कृपया मोहितौ इतरस्फूर्त्यभावावित्यर्थः सालोक्यसार्ष्टिसारूप्येत्याद्युक्तेः ३९ ततः फलत्यागाद्वैराग्यादिसाधनादुपरतौ पुत्रीभविष्यन्मदुचितविषयमप्यर्जितवंताविन्याह
गत इति मयि गते सति भोगानपि युवां भुक्तवंतौ यतो युवां प्राप्तमनोरथौ भूतौ अत्र वरमिति कर्मसाधनः ४० अहं तु युवाभ्यां मुक्तिचातुर्येण वंचित इव पश्चाद्विचार्य भव
न्मनोगतमेवाकरवमित्याह अदृष्ट्वेति शीलं सच्चरितं औदार्यं महत्त्वं गुणः कारुण्यादिस्तैरात्मसमं ४१ उपेंद्र इति विख्यातो वामनत्वाच्च वामन इति ख्यातो यो दित्यां क
श्यपाद्दासः सोहमेव तद्रूपयोर्युवयोः पुनरासन्न भूवेति ४२ येन पुरा वराय प्रादुरासं तेनैव वपुषा अथवैकार्थेनैव अहं जातः नतु पुरैवांशेन अतस्तयोर्युवयोरस्मिन्नेव भवेमे व्याहृतं वर

दानरूपं सस्यं ज्ञातं सर्वांशपूर्णमहत्त्वक्षणपुत्रलाभादिति भावः ७३ यदुक्तं रूपं चेदमवेदि तत्राह एतच्चतुर्भुजाकारं यद्रूपदर्शितं तद्वरदानमारभ्य प्राचीनचतुर्भुजाकाराविर्भावैर्वै त्रयस्मरणायैव
न तु प्राधान्यापेक्षया नराकृतिब्रह्मत्वेन ममैव मुख्यत्वात् किं चान्यथा एतदन्यप्रकारेण मर्त्यस्य नरस्य लिंगेन द्विभुजत्वादिना मद्रूपं मम भवो जन्म यत्र तत् मत्प्रादुर्भावविषयकमित्यर्थः जन्य
त इति चित्सुखपाठः उत्पाद्यत इति पाठः ज्ञायत इति क्वचित् अथ तो मुख्योपि द्विभुजाकारः प्रथमं न दर्शित इति भावः मुख्यत्वं चास्य एकोसि प्रथमं ब्रह्मसादद्ध(?) यं शिष्यत इत्यं तद्ब्रह्मवाक्येन चांतर्नेव
हि र्यस्य इत्थं सतां ब्रह्मसुखानुभूत्येत्यादिशुकवाक्ये गोप्यस्तपः इत्यादि पुरस्त्रीवाक्ये यन्मर्त्यलीलौपयिकं इत्युद्धववाक्ये च स्पष्टं ७४ तदेवमपि युवां साधकाविति न मंतव्यं न वामत्या(?) प्तो संदेहः एते हि यादवाः
सर्वे मद्गणा एव भामिनि इति पाद्मवचनात् कर्मबंधनं जन्म वैष्णवानां न विद्यते इत्यादिवचनाच्च ममैव युवयोरपि पुत्रप्रेमविशेषसमयाराधनप्रचारार्थं तत्र तत्रांशेनावतरणमात्रमतो न त्वा(?) प्तो साधनोपक्षाकिं
तु स्वतः सिद्धेवसेत्याह युवामिति स्वरूपेण गुणेन च महत्त्वादयमेव मुख्यं ब्रह्मेति वा सच्चिदानंदं निर्गुणं ब्रह्मेवाविष्कृतं इयं मूर्तिरितिवा यो ब्रह्मभावस्तेन ब्रह्मभावेन पुत्रभावेन वा कृतस्नेहौ संतौ चिंतयंतौ
वस्तु माहात्म्येन भावद्वयस्य तुल्यत्वान्मद्गतिं यास्यथ इति यद्वा वाशब्दः उपमार्थे ब्रह्मभावेनेव पुत्रभावेन चिंतनान्मत्प्राप्तिः सिद्धैवेति अथवा स्वयं पत्न्यपि वा पुत्र इत्याश्वलायनगृह्यसूत्रा
दिवदनुकल्पार्थो वाशब्दः पितरौ नान्वविंदेतां पितरावुपलब्ध्यार्थौ अहो भाग्यमहो भाग्यं इत्थं सतां ब्रह्मसुखानुभूत्या नेमं विरिंचो न भव इत्यादौ ब्रह्मभावादपि पुत्रत्वसखित्वादिभावे मुख्यत्वस्य
सिद्धांतित्वात् तथा च मुख्येन पुत्रभावेन गौणेन ब्रह्मभावेन वा चिंतयंतौ सत्त्वद्वा चिंतयंतौ युवयोरिव मसंभवितथापि यद्येवमपि संभवेत्तदापीत्यर्थः परां गतिं यास्यथ नाधुनिकसाधनोपयोग इति भा
वः तत्र हेतु कृतस्नेहौ कृतः स्वभावतः सिद्धो न तु कर्तव्यः स्नेहः पुत्रभावमयप्रेमा ययोस्ताविति ७५ ततः किं जातमित्यपेक्षायामाह इत्युक्त्वाहरिश्चतुर्भुजो रूपोपसंहतो तूष्णीमासीत् ततः पित्रोः संप
श्यतोरेव नान्यत्र दत्तदृष्ट्योः भगवानात्ममायया स्वबुद्धिसौष्ठवेन स्वेच्छया वा आत्मकृपया वा शिशुर्गविष्कृतशोभावो बभूव प्राकृतगोण्याप्राकृतइवेत्यर्थः यद्वा नागंतुकाकारणतादृग्रूपं व
त्त्वेत्याह प्राकृत इति प्रकृतिस्वभावः प्रकृतिसिद्धमिदं हि महात्मनामित्यादेः स्वभावसिद्ध इवेत्यर्थः प्रातीतिकमांतरं तु बद्धबंधप्राकृतं यथेति दृष्टांतबाधितं नहि वस्तुतः प्राकृतत्वे तदुपमासं
गच्छते तत्तदवस्थतत्तल्लीलोपासकाभीष्टलीलादर्शनाय शिशुभावादि सर्वं स्वभावसिद्धमेवेति भावः बहूनी संति रूपाणि इति गर्गोक्तेः ७६ भगवता प्रचोदित इत्यत्र विशेषाय यदि बिभेषि त
र्हि मां गोकुलं नय यशोदाकन्यामानयेत्येवं हरिवंशादौ ज्ञेयः सुतं समादायेति कोमलवस्त्रास्तृतपेटिकायां सुखं निधाय तां शिरस्याधाय अथवा शनैः शनैः कराभ्यां उत्थाप्य निजोत्संगे निधाय वक्ष
सा श्लिष्यन्निव गृहीत्वेति सपदार्थः समहाभागः स्वयमेव पादनिम ७७ त्वंशात् यदागंतुमैच्छत्तदैवाजापि यामाया सानंदभार्यायां निमित्तभूतयाअजनि ७७ तयेति युग्मकं हृताः प्रत्ययाज्ञानं
तज्जनिकाश्चक्षुरादिवृत्तयो येषां जाग्रतामपि तथाभूतेषु सुप्तेषु द्वारस्थितरक्षकेषु द्वारपालेषु पौरेष्वपि चकेषु सुचिच्छायितेषु चेति मोहनादिकं मायायोग्यमिति तत्कार्यस्येनोक्ता द्वारविवृ
त्यादि भगवद्योग्यमिति तथैवाह द्वारइति बृहत्किंकपाटैर्लोहकीलैः लोहशृंखलैश्च दुरत्यया अपि हिता द्वारो अपि वसुदेवे आगते व्यववर्यंत कर्मकर्तरिल्लङ् गुणआर्षः स्वयमेव विवृता तत्र हेतु
कृष्णमेति संसारबंधमपि कर्षति हरतीति कृष्णमस्त्वद्वाहे कृषिर्भूवाचक इत्यनुसाराच्च सदानंदमूर्तिं वाहके इति वहनादिश्च माभाव आनंदस्य ध्वनितः एवं निमित्ताचमइवेति दृष्टांतात्तदागमा
त्पूर्वमेवाविवृत्तिर्व्यंग्या मंदं गर्जितं यस्य पर्जन्यो मेघः शेषइति समयेस्वसेवासिद्धये अन्वगात् वसुदेवपृष्ठतो गमत् वर्षतां जलदानां च तोयमत्यल्बणं निशि संछाद्यानुययौ शेषः फणेश
नकदुंदुभिमिति विद्धमुपुराणे सचशिरसि तद्दृष्टिवारणं दृष्ट्वा चमत्कृतश्चिंतादिनहाविति ज्ञेयं ७८ शक्रवर्षतीति मायाकृतवृत्तिमपि जनमज्ञात्वा वसुदेवाद्यदर्शनार्थं वर्षतीसतीत्यर्थः व
षेरसकृत्त्वं चतत्कृतशोकया मध्ये मध्ये विच्छेदात् सविच्छेदो निर्जने नेयः यमानुजेति सूचितं भीषणत्वस्पष्टयति गंभीरेति ७ गंभीरस्य तोयौघस्य जवेनोर्मयस्तैः फेनव्याप्ताभयानके
शावर्तशतैर्व्याप्ता नदीति श्लेषेण शब्दवच्च यथा सीतापतेः समुद्रः तथा सा वसुदेवस्य मार्गं ददौ तस्यागमनेपि मार्गदानात् यमुना चातिगंभीरा नानावर्तशताकुला वसुदेवो वहन्नविद्धमु

राम १०

जानुमात्रवहां ययौ इति विष्णुपुराणे ५० उपेत्य समीपं गत्वेति मार्गाज्ञानेपि देवसाहाय्यं द्वाःशादिमोकः पूर्ववत् शिशुं यशोदेति पाठः यशोदां दृष्ट्वा शेषात्र माधुर्यातिशयव्यंजनाच्छिशुमिति निधा
यनिधिमिवन्यस्य तत्कृतामुपादाय कंसवंचनार्थं कन्यात्वेन उपादायतया गृहीत्वा अयं च स्नेहमहिमा यद्भगवदर्थं मायात्वेन ज्ञातायाअपि स्वीकारः मित्रपुत्र्याः कंसतो घातने दोषावहत्वं नेच
गृहान् देवकी दारेषु च गृहान् इति कोशात् यद्वा कारागृहस्य चिंतया मुहुः स्फुरणाद्बहुत्वं ५१ शयनेन्यस्य क्षिप्त्वा न पुनरंके निधानं अग्रेनिष्ठशंकयानादरात् पादयोर्लोहं निगडं प्रतिमुच्य बध्वा पू
र्ववत्कपाटाद्यावृत आस्ते स्म ५२ यशोदा नंदपत्नी पुत्रेण नंदादेः कीर्तिविस्तारिका तथानंदयति तेन पुत्रेण जगदिति सतथा तस्य पत्नी सापि तथाविधेति सूच्यते जातं किंचिदित्येवाबोधि न पुत्रः कन्यां वे
ति तद्विशेषतो वेद यतो योगनिद्रामोहिता परिजनाअपि मोहिता ऊत्याः प्रसूता मोहिते जने इति विष्णुपुराणात् ततः पुत्रं दृष्ट्वातीव जहर्षेत्यपि ज्ञेयं दृष्ट्वा च प्रबुद्धा सा यशोदा जातमात्मजं नीलोत्पल
दलश्यामं ततोत्यर्थमुदं ययाविति तत्रैवोक्तेः ५३ इति श्रीमद्भागवतदशमस्कंधे बद्धर्धनः तृतीयोगमदध्याय स्तोषीणीसारसंग्रहे १ ॥ इति तृतीयोध्यायः ३ ॥ ॥ आवृताः स्वयमेव आलस्य
सामान्येन पुंसकं तज्जात बर्व्वेनिरोदनं गृहपालाः श्लेषेण श्वानइव सा वधानोद्यतास्तत्र तया स्थिताः १ उपव्रज्य अयोग्यात्रपि समीपं गत्वा २ कालोहं तुं समयः यद्वा मेमृत्युरयमिति व्याकुलः ३
त्वातरमिति तेप्रसक्तियोग्यता तदुष्टता च सतीति तद्वैक्लव्येन सानुगततत्वात्रोचित्यं देवी दिष्ट्यास्वसुतोगोपित इत्यंतर्मोदमाना कृपणा करुणमिति पाठः सख्याः पुत्रीनाशशंकया दुःखि
तेत्यर्थः इयं ते पुत्रभार्यास्त्विति लोभजननं अष्टमगर्भेता माशंक्य छेत्तुमुद्यतमाह स्त्रियमिति असमर्थामवध्यां चेत्यर्थः हे कल्याणेति अष्टमगर्भे कन्योत्पत्त्या तव कल्याणं संपन्नमिति
भावः वस्तुतस्तु देवीत्वात्कल्याणरूपा मेतां स्त्रियं हंतुमनर्हमेवत्वामिति ७ ॥ भ्रातरिति स्नेहं जनयति बहवइति निर्दयत्वमुक्तं तेन स्वयमेव शोकमानाह दैवेनेति तव देवमेव दत्तामिति गूढो
पालंभः ॥ ५ ॥ दैन्यकार्पण्याभ्यां पुनराह नान्विति ॥ दीनाकारा ओसात् प्रभो अदेयदानसमर्थ मंदाये पुत्रभाग्यहीनाये चरमां वाधिके न त्वद्भयेन च पुनर्गर्भाशाभावात् ॥ ६ ॥ आत्मजामिति ॥ सखी
पुत्रीत्वात् अतएव दीनदीनवत् दीनसदृशावदित्यर्थः प्रकारे गुणवचनस्येति द्वित्वं मायात्वज्ञानेपि स्नेहस्वभावोयं खलु इति क्रूरे नीचे धमे खलु इति विश्वः ॥ ७ ॥ खलत्वमाह ॥ तामिति ॥ जा
तमात्रोगर्भजत्वादि क्लिन्नां गर्भांबु क्लिन्नामूर्ध्नाजामिति हरिवंशोक्तेः अपोथयत् बलेन चिक्षेप ८ सेति त्रिकं सद्योदेवी दिव्यरूपासेती कंसासुरस्योत्तमांगे पदं दत्वा गतादिवमिति भविष्योत्तरे अ
दृश्येतेति स्वोक्तौ कंसविश्वासार्थं महाभुजत्वेन महाकायत्वं विभीषिकार्थं श्रीविष्णोः देवकीयशोदयोर्मनसि सह प्रविष्टस्येति अनुजात्वसिद्धिः ॥ ९ ॥ १० ॥ ११ ॥ हतयेति हताप्यभविष्यं
चेदित्यर्थः पूर्वशत्रुः पूर्वजन्मनि यः स्वाहतवान् कृपणान् तद्भ्रमेणान्यान् बालान् देवक्यादीश्च १२ नानानामसु स्थानेषु नानानामत्वेन भगवती पूज्याभूत् स्त्रीत्वात्स्वसृत्वाच्च १३
प्राक् देवकी ततस्तं च विमुच्य कारागाराद्दक्षिणं त्यश्च निःसार्य प्रसूतो नभ्रः कन्यायादिव्यरूपेण वाक्ये श्च कथं दैवीवागन्यतेति वा विस्मितो ब्रवीत् १४ अहोशब्दद्वयमार्त्या बत खेदे रा
राक्षसाहि पुरा स्वापत्याद आसन् तत्रैकोरा राक्षसी स्वापत्यादौ दृष्टादेव्या कृपयोक्तेः बालास्युर्जन्मतो वृद्धाः इतः प्रभृति रक्षसामिति १५ त्यक्तकारुण्यः बहुबालवधात् इति धर्मातिक्र
मः लोकातिक्रममाह त्यक्तज्ञातीति अतः खलः मृत्याकान् लोकान् गंता ब्रह्महेति व्यतिरेके दृष्टांतः सको ॥ श्विदपिशेरवादीन् लोकान् गच्छत्यहं तु कानपीत्यर्थः ममत्वं चनंताः अन्याए
वदुर्गत यइति भावः स्वसरिति दैन्यात् श्वसन्निति पाठे जीवन्मृतः १६ नायं ममैवदोषः किं तु देवानामेवेत्याह देवमिति देवसमूहः पाप इति अन्यथा तद्विश्रंभो न स्यादिति भावः १७ हेमहाभा

भाग·द· १०

गौविवेकिनोस्वकृतं भुंजः स्वकर्मभोर्त्रं किंच सर्वे प्राणिनः सदानासते किं त्वल्पकालं तत्राप्येकत्रस्थाने न तत्रापि सहसंभूय नासते यतो दैवाधीनाः १८ सदानासत इत्युक्ते जन्मा
दिकं देहानामेवनात्मन इत्याह भूतानि देहा एव यांति भवंति अपयांति नश्यंति च भुवि तो मानि घटादीनि यथा एतेषु देहेषु जन्मादिभिर्विक्रीयमाणेषु अयं प्रत्यभिज्ञायमानआ
त्मा विपर्ययं जन्मादिविकारं नो प्नोति विक्रीयमाणभोमेषु भूर्यथा एवं विवेके सति नशोकाद्यवकाशः १९ अन्यानात्तु न निवर्तत इत्याह यथेति यथा यथा वदेवमज्ञानत

कृष्ण

आत्मविपर्ययः देहादावात्मबुद्धिः यतो विपर्ययाद्भेदो भवति देहतादात्म्यापत्तेरिदमहंकारास्पदयोर्भेदः यतो भेदात्पुत्रादिदेहैर्योगवियोगश्च ततः संसृतिः सुखदुःखादि एवं यावदज्ञानं सर्वं न निवर्त-
त इत्यर्थः २० तस्मादुक्तविवेकान्नैते तव तनया नापि मया हताः अज्ञानदृष्ट्या तु तव तनया मया व्यापादि तानपि मानुशोच अज्ञानपक्षेपि यतः सर्वो जन्तुर्निश्छन्नपि स्वकृतं कर्म भुंक्ते २१
नन्वेवं ज्ञानन्नपि कुतो मरणाद्बिभेषि कुतो वा तानवधीरित्याशंक्य स्वानुभवादित्याह यावदिति स्वद्रष्टुरात्मनः दृष्ट्यात्मतत्त्वज्ञोपि हतप्रायोस्मि अनतस्तान्हंतास्मि हनिष्यामीत्या-
भिमानं कुरुते तावदभिमानेन कस्यचिद्बध्यो घातकश्च भवति यतोऽतः स्वात्मानुभवरहितः २२ नन्वस्माकमपि स्वानुभवोस्ति इति कथं त्वया ज्ञातमित्याशंक्य साधुत्वं स्मृत्वा प्रार्थ्यते द्व्याह
क्षमध्वमिति बहुत्वं देवक्याद्यपेक्षया यतो भवादृशाः साधवो दीनवत्सलाः भवतीति उक्त्वा तानंतरमेव वदन्नेवाग्रहीदित्यर्थः शालसस्वस्रोरिति द्विसकारपाठः तत्रावाशरीति सकारपक्षे
स्यालः कंसः स्वस्रोरिति द्विवचनानुपपत्त्या अजहल्लक्षणया स्वसृतत्पत्योर्ग्रहणं प्राणशब्दलिंगवत् भ्रात्रापधेयेष्वकया संबंधेन प्राणभृत्तदुपदधातीत्यत्र बहुत्वानुपपत्त्या तद्गणपात्स्य
नेकेष्टकाग्रहणवत् अनुचिन्त्येति द्विरुक्तिनिष्पन्नः सकार इति पक्षे स्यालशब्देन कथंचिद्वसुदेवाभिधाने वसुदेवदेवक्योरित्यर्थः एवमध्यात्मज्ञानादिकमपि भगवद्विमुखानां प्रस्तुत
क्रूरता पापायैव भवतीति प्रकरणतात्पर्यं २३ निगडान्मोहश्वंखलात् क्षांत्वा रोषं च देवकीति पाठः भ्रातुस्तत्रापि समनुतप्तस्य क्षांतत्वाद्दौरात्म्यं सोढ्वा रोषं चकाराच्छोकं तत्याज वसुदेव
स्तु प्रहस्य हस्फुटं तमुवाच वस्तुतस्तु देवक्योः समुच्चयार्थश्चो भाति क्षांतरोषा च देवकीति पाठस्पष्टीकाकृतामसंमतोपि पुस्तकेषु दृश्यते तत्रायमर्थो भाति एकदेशरोषपदार्थे कर्मतया
भ्रातुरन्वयः क्षांतः सोढः भ्रातृविषयको रोषो यया सा व्यसृजत् शोकमित्यध्याहारः यद्वा पारितोषिकं वसु व्यसृजत् देवश्चेति भामेतिवत् पूर्वपदलोपः यद्वा वाचमिति शेषः कंस एवं प्रसन्ना-
भ्यां विशुद्धं प्रतिभाषित इति वक्ष्यमाणादिति २५ एवमेतदिति मयापि इदमेताहं तु मुह्यते त्वयि पूर्वमेवोक्तमिति भावः हे महाभागेति महान् भागो भाग्यं यस्य दुर्गेत्यर्थः यतो हे धियः स्वपरभेदः
२६ ततः किमत आह शोकेति भावैर्भूतैर्निमित्तभूतैः धृतं भावमीश्वरं ते पृथक् दृशो न पश्यंति अहमेव हंता हतश्चेति मन्यंते वस्तुतस्तु ईश्वर एव हंता न देहादि हतश्च देह एव नात्मेत्यर्थः
मिथो घ्नंतमिति अकारप्रश्लेषेण मिथो न घ्नंतं किंतु त्वद्विधान्हंतु साक्षादवतीर्णं तुल्यदृशा नैव पश्यंति इति श्लेषार्थः २७ एवं तदुक्तानुमोदनस्वसिद्धांतनिरूपणाभ्यां विशुद्धमकपटं यथास्या-
त् विश्रब्धमिति पाठांतरं २८ विवेकज्ञानमपि भगवद्विमुखानां हृदि स्थिरं न स्यादिति दर्शयितुं कंसस्य स्वोक्तज्ञानविरुद्धव्यवहारमाह तस्यामिति यावदध्यायसमाप्ति २९ स्वत एव देव-
शत्रवस्तत्रापि कृतामर्षाः ३० भोजेन्द्रराजेन्द्रेति पाठद्वयं इंद्रस्य धर्षयासंबोधनं अद्यैवे अद्यैवे ३१ ननु तर्हि इंद्र वायुर्घोषिताः स्युस्तत्राहुः किमिति ज्याघोषैर्युद्धलीलायां वा कृते ३२ अस्यतः
विध्यतः सतः उत्सृज्य रणं त्यक्त्वा अनेन कदाचित्कंसस्य देवगणजयो विष्णुपुराणोक्तः सूचितः ३३ प्रबद्धांजलि बद्धांजलिर्यैस्तथाभूताः अब्रुवन्निति शेषः ३४ तस्य युद्धधर्ममाहुः नेति
अन्येन सह युद्धोद्योगः आसक्ताः ३५ ननु मद्युद्धधर्मपालनेन न संपन्नजीवना अपि इदानीं जाताभिमानो देवाः पराक्रंस्यंते तत्राहुः किमिति सार्धेन असंयुगे स्त्री पार्श्वादि हरिहरीभ्यां बिभे-
मि इति चेत्तत्राहुः रहो जुषेति क्षीरोदादौ त्वद्भयेन निलीय तिष्ठतीति निंदार्थः सर्वस्यांतर्हृदये प्रविष्टेनेति वास्तवः पुरुषप्रवेशहीनमीश्वा [illegible] भाकोयस्य अतः साम्यात वपुरतो
नागंतव्यमवेति भावः ३६ ननु देवेंद्र आगंता तत्राहुः किमिति ननु ब्रह्मा साहाय्ये भविता तत्राहुः ब्रह्मणेति तापसे विक्रमाभावात तपोव्ययभिया [illegible] किं तेनेति निंदार्थः ईश्व-
रो पित्ता कक्षेमार्थं तपस्यन्न कस्यापि नाशे प्रवर्ततेति वास्तवोर्थो भाति ३७ यद्यप्येवं तथापि नीतिर्नैस्याज्य स्याहुः तथापीति नोपेक्ष्या इति सेनाभिः सह गत्वा पराभूय निरोधव्या इति भा-
वः ननु तर्हि नीता देवाः पालयिष्यते तत्रोपायांतरमाहुः ततइति तेषां देवानां मूलस्य बालकरूपेणावतीर्य गुप्तस्य विघ्नो हिंसने ३८ गुप्तश्चेद्गीत एव किं तेनेन तत्राहुः यथेति महोषधि

रा॰ म॰ ११

प्रभावेणचिकित्सामात्रंकयान्यदृष्टांतमाहुः यथेति नचाल्यतेस्थानादपि किमुतनहन्यतइत्यर्थः ६९ मूलोन्मूलनोपायं साधर्यंच तुर्भिर्विदतोमूलत्वंसकृत्यर्थानुवादेनोपपादयंतस्तद्धननंदृढयंति मूल
मितिहिवेदप्रसिद्धं सचविष्णुर्यत्रधर्मस्तत्रास्ते धर्मस्यमूलंवेदादयः धर्मःअपूर्वंब्रह्मवेदःतपःस्वधर्माचरणंनित्यनैमित्तिकरूपं यज्ञाःकाम्यकर्माणिसदक्षिणाइतिसांगत्वोपलक्षणंतेनधर्ममूलत्वं
अतोविष्णोरहेलानुवृत्त्येपितद्धननंस्यादित्याहुः तस्मादिति सर्वात्मनासर्वयत्नेनहन्मःराजन्निति चकारभावेणसुतरामितिभावः ब्राह्मणहननेहेतवः ब्रह्मेत्यादि तन्नाशोवेदादिनाशात् अन्यथासंभवाच्च गो
घातेहेतुः हविरिति ७० तएतेविष्णोःपरिकरास्तत्रविशेषाअपि भवंतीतिस्पष्टयर्थमनुवदंति विप्राइति तपःस्वधर्मःसत्यवचनमितिसाधारणधर्मः तितिक्षोतानिवृत्तिधर्मोक्तत्वइति प्रवृत्तिप्रधानाइति
भेदः पूर्वानुक्तदमाद्युतिस्तद्वतामपिजिघांसया तन्नूरित्येकत्वंसमाहारात्तिप्रायं छंदसित्वाद्वचनं प्राङ्णोचक्षुरुपधायाइति गुणाभावेजसिवारूपं ७१ एवंसतिदेवांतरहिंसापिदूषणमित्याहुः सही
ति असुरद्विट् गुहाशयइतिदैत्यान्हंतुमत्रावतीर्णोपिनहस्यते अन्यथानजीवेतेवेति भावः ७२ तस्माद्यमर्वोपायइत्युपसंहरंति अयमित्यर्धेन गुप्तत्वाद्व्यालेषपिनप्राप्यः गावस्त्वराज्यापजीविकाः
धर्ममूलत्वंतु तासामपिहिंसयापगच्छेदित्याहुः ऋषीणामिति ७३ स्वतोदुर्मतिःपुनर्दुर्मतिःपुनर्दुर्मंत्रिमंत्रितः हिताहितमितिपाठद्वयं कदनेविषयेरजसाकुपथप्रवृत्तिः तमसासत्पथादर्शनं द्वेषफ
लमाशादिति ७४।।७५।।७६ नमस्कमात्रंकिंतुबहुवोनर्थाइत्याहुः आयुरिति लोकान्धर्मसाध्यान् आशिषोवांछितानि अत्रयथोत्तरंश्रैष्ठ्यं किंबहुनासर्वाण्यपिश्रेयांसि पुंसःसाधितपुरुषार्थस्यापि
अतिक्रमोवाधिकाद्युनादरोपि ७७ इतिश्रीमद्भागवतदशमस्कंधसंस्थितःचतुर्थोध्यायएषोगात्तोषिणीसारसंग्रहे १ इतिचतुर्थोध्यायः ४ एवंद्वारकानयनानंतरभाविनं मथुरावृत्तांतं द्वितीय
दिनावधिकं चतुर्थाध्यायेनोक्त्वापंचमे यशोदाशयनेकृतनिधानाव्यवहितंव्रजेतत्दिनवृत्तं जातकोत्सवं कालांतरभवंनंदस्यमथुरागमनंवसुदेवसंवादादिचवक्तुं प्रथमंजातकोत्सवमाह नंदस्त्वात्म
जउत्पन्नइति तुशब्दोक्तमैश्वर्यज्ञानप्रधानपुत्रवात्सल्यवतोवसुदेवादपिशुद्धवात्सल्यसौभाग्यभरविशेषंनंदस्यव्यंजयति आत्मजइत्यादिना एकोनविंशत्या तस्मिन्भगवति आत्मजेउत्पन्नेइति
तच्छब्दाध्याहारेणान्वयः भगवतिचात्मजत्वपुत्रभावेनात्मनिप्रादुर्भूतत्वमेवनान्यथासंभवति तच्चमनकदुंदुभेः आनंदकरंमनस्तइतिवच्छ्रीनंदयशोदयोरपिगम्यते भक्तिरेवैनंनयति भक्तिरेवैनंदर्श
यतीतिश्रुतेः भक्त्याहमेकयाग्राह्यइत्यादेश्चसततंतन्मस्वरूपभक्तिंविनाबहिस्तत्प्राकट्यासंभवात् ध्रुवादिषुप्रथमंमनस्याविर्भूतस्यैवबहिःप्रादुर्भावदर्शनात् येयथामांप्रपद्यंतेतांस्तथैवभजाम्य
हमित्युक्तदिशाप्राकट्यविशेषायभावनाविशेषस्यावश्यवाच्यत्वात् अनयोर्भक्तिविशेषस्यातेब्रह्मवैवर्तस्पष्टत्वात्च अतएवाहमहामनाइति महद्धित्तोश्रीकृष्णस्यसंभाग्राहकंमनोयस्य उपलक्षणमे
तद्यशोदायाः यशोदाचमहाभागेतिवक्ष्यमाणात् एवमनयोतयोश्चात्मनिजातत्वेतुल्येपितयोर्मनसिप्रादुर्भावश्चतुर्भुजत्वेनानयोर्द्विभुजत्वेनेतिफलवशेनानुमेयं तथोत्पन्नत्वमपिबहिस्तथाप्राक
ट्यमेवनजीववत् तच्चानयोस्तयोश्चाविशिष्टमेव तथापिपुत्रतयोत्पन्नत्वेस्तिविशेषःअनयोःप्रेम्णाःशुद्धपितृभावमयत्वात् तयोस्तुविदितोसीत्यादिना ऐश्वर्यज्ञानाच्छन्नत्वोक्तेः तथाभावंवि
नातुकस्याप्ययंपुत्रः अत्सनासोत्पन्नस्यापिवराहस्यतत्सुतत्वाप्रसिद्धेः उत्तराजठरप्रविष्टस्यापिश्रीकृष्णस्यतत्पुत्रत्वाभावाच्च तयोस्तथाभावाभावात् तस्मात्मुख्यतयानंदस्यैवा
त्मजतयोत्पन्नोयं अतएवप्रागयंवसुदेवस्यक्वचिज्जातस्तवात्मजइतिगर्गोक्तिः तवैवात्मजःवसुदेवस्यतुक्वचिज्जातोनमुख्यइतिभावः ब्राह्मणाच्चपशुपांगजायेतिनंदनंदनप्राप्तिरर्थिता
नायंसुखापइत्यत्रगोपिकासुतइत्युक्तेःश्रुकदेवैः अतएवनंदस्त्वात्मजउत्पन्नइत्येवोक्तंनतुनंदस्यमात्मजंमत्वेति एवंस्थितेचतुर्भुजरूपाच्छादनायदेवक्याप्रार्थितेयशोदाहृदयस्थद्विभुजरू
पस्यतद्रूपाच्छादनपूर्वकंतत्रैवाविर्भावआसीत् सएवानीयवसुदेवेनपुनर्यशोदाशयनेनिहितः सएवचव्रजादौमध्यपूर्यादौविजहार देवकीहृदयस्थचतुर्भुजरूपस्यतुतत्प्रार्थनयांतर्धान
मेवासीदितिप्रेमदृशाविभावनीयं एवंगर्गादिवाक्येनंदयशोदयोरभिमत्यासिद्धांतगत्याचश्रीकृष्णेनंदात्मजत्वंमुख्यमितिस्थितेतदुचितमहोत्सवायविशिनष्टि जातान्हादइत्यादिद्वितीयेनान्वयः
१ जातकर्मरव्यंसंस्कारंतैर्विप्रैःप्रयोज्यकृत्विग्भिःकारयामासतैरित्यत्र वेद इतिपाठांतरं विधिनाविधिवदितिपाठद्वयं अस्यचयथापेक्षं पूर्वैःपरैश्चसर्वैरन्वयः तथेतिचार्थे पितृदेवार्चनंनांदी
श्राद्धंतत्कारयामासेति स्वयमकरणेज्ञातान्हादइत्युक्तमानंदजाड्यमेवहेतुः पाठक्रमादर्थक्रमोबलीयानितिस्वस्त्ययननांदीश्राद्धजातकर्मणांक्रमोभाति २ नियुतेविंशतिलक्षाणि एकं [illegible]

११

शतशतसहस्रमयुतं प्रयुताख्यं लक्षमथ नियुतमिति क्षीरस्वाम्युक्तेः तैतिलग्रहणं सप्तधान्योपलक्षणं अ ९ तत एव सप्तैते स्कन्दमिति भाति अद्रिपरिमाणमुक्तमोदग्राभिर्द्रोणैरिस्कन्दं द्रोणसंख्याच खारी तुरी
यो भागः आढकश्चतुष्कयमिति यावत् अद्रिनिवेशास्क इत्थं निवेश्यामरशैलमग्रे ततस्तु विष्कम्भगिरीन् क्रमेण मेरुर्महात्री हिमवस्तु मध्ये सुवर्णवर्ष त्रयसंयुतः पूर्वे मुक्ता वज्रयुतो याम्ये गोमेदपुष्प
कैः पश्चाज्ज्ञात्मनीलोद्यैः सौम्ये वैडूर्यपद्मरागकैः श्रेष्ठा विद्रुमैः पुरा रिरिस्युः भोनुश्चैते हिरण्मयाः पूर्वे मेघावलीशुक्लैः रजतैर्वस्त्रैस्क दक्षिणे पश्चाच्चित्रैरुत्तरे तु रक्तैरिस्तु चिरं बुधैः एतदेवाह रत्नाद्यै
रिति शातकौम्भैः स्वर्णरसान्तैः वस्त्रैरिति मेरुवर्णसाम्याय प्रादात् पादप्रक्षालनादितन्तुस्रस्थापनादि प्रकर्षेणादात् २ संस्कारैरेव गर्भशुद्धिरिति पुत्रप्रेममयता निश्चय एव परब्रह्मण्यपि संस्कारे हेतुरि
ति दर्शयितुं सदृष्टान्तं तदभिप्रेतमनुवदति कालेनेति कालेन मह्यादि स्नातन जलादि द्रव्याणि स्नानेन देहादि ३ शौचेन क्षालनेन वस्त्रादि संस्कारैर्गर्भादि तपसेन्द्रियादि इज्यया ब्राह्मणादि दानेन धे
नधान्यादि संतुष्ट्या मनोद्रव्यं एवमेतानि द्रव्याणि कालादिभिः शुध्यन्ति आत्मा तु आत्मविद्ययैव आत्मनः श्रीकृष्णस्य विद्याज्ञानं तेनोपासनयेति वा वेन तु परब्रह्मणा पुत्रयाविर्भूयज
गदपि वा वितं तथापि प्रेम्णेव जातादिकृतमिति भावः ४ विप्रसूतादयः सुमङ्गलगिरो बभूवुः तत्र सूताः पौराणिकाः प्रोक्ता मागधा वंशसूचकाः बन्दिनस्त्वमलप्रज्ञाः प्रस्तावसदृशोक्तयः मुहुरिति स
वैरन्वेति हर्षभरेण तत्र तत्रापि ५ संमृष्टानि संसिक्तानि च द्वाराण्यङ्गणानि गृहमध्यानि च यस्मिन्सः संशब्दप्यामन्यदिनतो विशेषः ध्वजाः पताकाश्च स्रजः पुष्पमालाश्च चैलानि वस्त्रखण्डानि
चित्रैर्नानाविधैः रैते भूषितं इत्यध्याहारः ६ गावो वृषाश्च वत्साश्चेति पाठे चकारो महिष्यादिग्रहणार्थो तेन गवादिपूजनेनैव मुख्यं इति भावः हरिद्रातैलेन लिप्ताः चित्रवर्णधातवश्च बर्ह स्रग्जौ वस्त्रा
णि काञ्चनमालाश्च संयेषां तेनथा बभूवुरिति शेषः ७ एवं सामान्यतो नन्दव्रजानुरागमुक्त्वा विशेषतोप्याह महार्हेति सप्तभिः सम्यक् स्वगृहे ध्वजादिमङ्गलप्रवर्त्या ययुः यद्वा सम्यक्त्वमेवाह म
हार्हेति विशेषणाभ्यां महार्हैर्गृहात्सुरक्षितैरपि वस्त्रादिभिर्भूषिताः उपायनैरत्नादिभिर्युताः पाणयो येषां हरा व्रजनप्रेम्णा विराजमानाः यद्वा राजन्ते नानोपायनानि येषु ते पाणयो येषां गोपा इ
ति पशुवदति स्निग्धाः श्लेषेण च गोप्यधिनीमपि तादृशप्रेम्णा यातीति भावः एवमग्रेपि ज्ञेयं ८ गोप्यश्चेति चः समुच्चये तेन गोपाः सुतोद्भवमाकर्ण्येति पूर्वेणान्वयः आसां पश्चाद्गतानां पुरवासात् व्रजय प्य
शः प्रदाया व्रजेश्वर्याः सूतां यत्तिमाकर्ण्यैव प्रमुदिताः आत्मानमभूषयन् आकल्पाः अलङ्काराः ९ कुङ्कुमकिञ्जल्कादपि मुखाब्जेषु भूतिः श्रीर्यासां अनुरागावेशेन शोभातिशयात् बलिभिः रत्नाक्ष
तपात्राद्यैः दिभिः सह पृथुश्रोण्योपि त्वरितं चलत्कुचाद्या इति त्वरातिशयः एवं प्रेमातिशयो व्यञ्जितः १० भक्तिविशेषेण पुनस्ता एव वर्णयति गोप्य इति सुमृष्टानि उज्ज्वलितानि मणिमयकुण्डलानि यासां
अमेकुण्डलचञ्चत्त्यशोभा त्वत्र तु मणिमयत्वादि इति विशेषः निष्कांपदकानि कण्ठेषु यासां ताश्च ताश्च शिखाः धम्मिल्लाग्राणि तेभ्यश्च्युतानि माल्यवर्षाणि यासां च चञ्चलैः कुण्डलैः पयोधरस्थहारैश्च शो
भा यासामिति चलत्कुचद्दस्येन न पुनरुक्तिरिति यद्वा तत्र त्वरातिशयात्तु शोभातिशयादिति भाति नन्दालयं व्रजन्तीः व्रजन्त्यो मार्गे एव विरेजुः किं पुनर्नन्दालये किंच बराङ्गादिशोभा संपत्त्यापि व्रजस्य
एव रेजुः प्रेम्णा शोभातिशयादिति भावः ११ चिरं पाहीति तस्य सार्वकालिकीं स्वसंपत्तिं स्वस्मिन् प्रीतिं संगतिं चाशासत बालकेति आशीशेचिरं यद्वा बालकेपि पाहीत्याशीः प्रेमस्वभावात्
जनेभिः सिञ्चन्त्यो यद्वा अन्योन्यं सिञ्चन्त्यः अजने भगवते मङ्गलगीतं बध्येर कीर्तयन् १२ अवाद्यन्तेत्यादकेरिति शेषः यद्वा व्रजवादित्रेषु वाद्यमानेषु जगति सर्वाण्यपि वादित्राण्यवाद्यन्त विचित्राणि ततान
द्धसुषिरघनावद्धान्तर भेदभिन्नानि तत्र हेतुः महोत्सवे सर्वोत्सवोपरि राजमाने यतः कृष्णे जगच्चित्ताकर्षके पूर्णब्रह्मणि सर्वप्रभो अनन्तमाधुर्यैश्वर्यैरपरिच्छिन्ने व्रजमागते सति हृष्टाः सन्तोन्यो
न्यं दध्यादिभिः सिञ्चन्तो नवनीतैश्चालिम्पन्त । क्षिप्य क्षिपुः दध्यादिपङ्के पातयामासुः १४ नन्द इति सार्धयुग्मकं ते भ्यो गोपेभ्यो गोपीभ्यश्च अन्येभ्यो गायकादयश्च सूतेभ्योपि वस्त्रादि स्वर्णं तेयथोचितं द
दौ स्वत एव दीनात्मा उदारचित्तः तत्र पुत्रजन्मसुखं तु दिव्यैः प्रीतमनाः हृष्टचित्तः तत्रापि महामनाः महान् श्रीकृष्ण एव मनो यस्य न केवलं तावद्देवदद्दौ वा अपि नु तेस्तैः स्वयं प्रार्थितैः कामैर्यथो
चितं जातिविद्याद्यनुरूपं पूजयन् स्रक्चन्दनताम्बूलप्रोत्साहनादिभिः संमानितवांश्च १६ दानादेरुद्देश्यमाह आराधनस्य यार्थः फलं भगवत्तोषस्तस्मै तथा स्वपुत्रस्य[illegible]स्याभ्युदयाय
अनेन श्रीविष्णुः प्रियतां तत्प्रसादेन च मत्पुत्रस्याभ्युदयो भवत्विति संकल्पयन्नित्यर्थः विष्णोराराधनं फलरूपो यो विष्णोः स्वपुत्रस्याभ्युदयः स्वगृहे गुणैश्वर्यप्रकाशस्तस्मै इति

श्लेषार्थः १६ रोहिणी रोहयति जनयति व्रजसुखं तच्छीला अद्यैव स्वनामसाफल्यमिति भावयंतीकिंच महाभागा स्वपुत्रोदयेन श्रीकृष्णोदयेन तयोर्बाल्यलीला नंद भाल्लेन चान्यवसुदेवपत्नी तो देव
कीतश्च परमभाग्यवती त्वदागमनमंगलेनैवायं मे पुत्रो जात इत्येवं नंदाख्यो यो गोपो व्रजराजस्तेन नंदिता गोपा भूपे पीत्यमरः यद्वा नंदेन गोपैश्चाभिनंदिता नंदद त्ते दिव्ये दैवोचिते र्वस्त्रादिभिर्मंडितास
तिव्यचरत् उत्सवोचित नानाव्यापारैरित स्ततो बभ्राम एत दर्थ मेव स्वीयाभिनवबालकः पाल्यके शायितः स्यादिति तस्यात्रानुक्तिरित्यर्थः १७ ननु तदैव सालंकार नियुतद्वय धेन्वादिदानं सर्वेभ्यो
वस्त्रालंकारादिदानं च कथमित्यत्राह तत्त इति हरेरप्रकटरूपस्य निस्यं निवास भूतो यत्रात्मा स्वयं तस्य स्वस्यैव ये गुणास्तैः प्रागेव सर्वसमृद्धिमानासीत्तस्य जन्मारभ्य तु रमाक्रीडं बभूव चिंतामणि
प्रकरसद्मसु कल्पवृक्षलक्षावृतेषु सुरभीरभिपालयंतं लक्ष्मीसहस्रशतसंभ्रमसेव्यमानं गोविंदमादिपुरुषं तमहं भजामीति ब्रह्मसंहितोक्तप्रकारेण नायं श्रियोंग इत्युक्तेर्लक्ष्मीतोपि रमाणां
रमणीयानां गोपीरूपलक्ष्मीणां ताभ्योपि रमण्याः श्रीराधायाश्च तदेवाविर्भावाद्विहारस्थानमभूदित्यर्थः ततआरभ्य सर्वसमृद्धिमानिति किंवा २ च्य यतो रमाणामप्याक्रीडमासीत् यल्लक्ष्मीकटा
क्षात्सर्वसंपत्तिस्तदाक्रीडे किमिवासंभवि यत्र चिंतामणिमंदिरादयोपि गृहलीलायां संतीति भावः इत्थं चात्र रमाक्रीड शब्दः प्रसंगतो भगवत्पत्नीनां गोपीनामप्यवतार सूचनाय अन्यथा सर्वसमृद्धि
मानित्येव सिद्धे पुनरुक्तिः स्यात् रमांतरा क्रीडत्व व्याख्याने तु प्रसिद्धत्यागो प्रसिद्धार्थकल्पना च स्यादित्युक्त व्याख्यैव रमणीयेति दिक् १८ पूर्वमपुत्रेण धनादौ ममत्वाभावात् नंदस्य कं साकृत्यमकिंचनस्ये
व नासीदधुना तु पुत्रमहारत्नप्राप्त्या सर्वतो जातशंकस्तद्रक्षार्थं व्यग्रोदुष्टकंसाश्वासार्थं स्वयमेव मथुरां गत इत्याह गोपानिति वार्षिकं प्रतिवर्षं देयं तत्र साधुस्तं तं श्रावणस्यते दृशोवर्षांतरारंभकत्वात्त्तदे
वदातुमित्यर्थः हे कुरुहेति कुरुकुलांकुरस्य तव रक्षार्थं यथा धर्मोदयोव्यग्रास्तथेति भावः १९ उपश्रुत्य जने भ्यः श्रुत्वा श्रीनंदे सर्वादरात् ततः श्वारद्वारादत्तकरं चत्वात्वा अन्यथा व्यग्रचित्तेनः
सुखगोष्ठ्यसंभवात् भ्रातरं वैश्यकन्यायां शूरपत्नीभ्यां र्दजातत्वेन मातुलपुत्रत्वात् अतएवाग्रे भ्रातरिति मुहुरुक्तिः एवमन्येपि गोपा यादवविशेषा एव वैश्यकन्योद्भवत्वात् परं वैश्यत्वं अतएव स्कं
दे मथुराकांडे रक्षिता यादवाः सर्वे इंद्रवृष्टिनिवारणादिति यादवानां हितार्थाय धृतो गोवर्धनो मयेति च हरिवंशेपि यादवेष्वपि सर्वेषु भवंतो मम बांधवा इति रामवाक्यं अत्र मोचनं वसतिस्थानं
अस्यैव गमने पुत्रवार्तोत्कंठया तद्रक्षार्थं शीघ्रप्रस्थापनेच्छया च २० नंद इत्यध्याहारः सहसैवागतं दृष्ट्वा यद्वा नंदः सहसैवोत्थाय प्रीतः प्रेम्णा विह्वलः कंपादियुतश्च सन् यद्वा सस्वजे ततः प्रेम
विवशश्चासीत् अत्र देहः प्राणमिवेति दृष्टांतेनोपमानसंभावितकिंत्वागमो स्थानादौ वर्णज्येष्ठे वसुदेवे नंदेनानमस्कृतिर्वयसा ज्येष्ठत्वेन साम्यात् भ्रातः प्रवयसं वक्ष्यमाणात् प्रेमविवशत्वाद्वा

२१ अर्थी नंदेन स्ववासागतत्वात् साद्यादिना पूजितः स्वात्मजयोरिति नंदसंगमाहात्म्याद्धुद्धवात्सल्योदयः सूचितः प्रसक्तेति ॰ वक्ष्यमाणार्थस्य पुत्रार्थकत्वात् २२ रहस्यं दूतादितः श्रुत्वा बाह दिष्ट्ये
ति यत्नादि प्रयासैरनुत्पत्तेः प्रजामात्रस्याशायानिवृत्तस्य समपद्यत पुत्रत्वेन संपन्नेत्येति दिष्ट्येति सोयं वाग्देव्याः सिद्धांतः तेन तु धृष्टत्वेनैवोक्तं पुत्रेत्यनुक्त्वा कन्यासाधारण प्रजेत्युक्तेः नंदस्य प्रवय
स्त्वादिकं पुत्रीभूते भगवति स्नेह भरार्थं लोके हि वृद्धस्य बहुयत्नेप्यप्राप्त प्रजस्य निराशस्याकस्माज्जाते पुत्रोत्तमे स्नेहमनिर्वै रोदृश्यते २३ अद्य दिष्ट्या भवानुपलब्ध्य यतः प्रियसंगो दुर्लभः दुर्लभत्वे हे
तुः पुनर्भवो जात इव भवान् यतो मृत्युव्याप्ते भवचक्रे स्थित इति स्वाम्याशयः यद्वा ससारे स्थित भवान् पुत्ररूपेण पुनर्जात इवोपलब्धोदिष्ट्या यतः प्रियमात्रस्य दर्शनं दुर्लभं किमुत पुत्रां नंदयुक्तोस्य
ति यद्वा भवचक्रे द्युपुनर्भवो जन्मैव वर्तमानो मम यतो भवान् दृष्ट इत्यादि २४ हे प्रिय एकत्र सदास्थितिर्न यतश्चित्रकर्मणां स्रोतसः श्रोघेन नीयमानानां प्लवानां तृणादीनां यथैकत्र न स्थितिः २५ अ
धुना यत्रास्से तद्वृहद्वनं तृणसंपद्धिवसेन तत्र तत्र वासात् यद्वाधुना पदस्य पूर्वार्धे सर्वैरन्वयः अधुना पशव्यं पशुभ्यो हितं वाचिदित्यादि पशव्यादि रूपं वने गोपयोदध्यादि प्रभृत गोपीस्तन्यादि

ना पुत्रक्षेममित्याशायेन प्रश्नः २६ उपलालितैर्वर्ततेकच्चित् यद्वा कच्चिदत्कं वंतं तातं मन्वानो भवतीति मम सुत इति पुरेवतत्कर्मश्रवणात् पुरे व वसुदेवस्य व्रजेशुश्रावरोहिणी प्रजातपुत्र
मित्यादि हरिवंशोक्तेः एतयाज्जेन्मे प्रायो ल्पकालांतरित मेव वर्धमानावुभावेतो समानवयसो यथा रामभेता गोव्रजे तस्मिन् नंदगोपत थाकुविंति तत्रैव वसुदेवोक्तेः अतएव एतयोः पु

गपद्धिंगणादिवक्ष्यते २७ मित्रपुत्रादीनामपि पालनाद्भवान् कृतार्थ एव अहं तु स्वपुत्रकलत्रक्लेशेरकृतार्थ एवेत्याह सुहृदो बंधून् प्रजसनुत्भाविताः संपादितो यस्त्विवर्गो पुंसो विहि

२ तःप्रोक्तः अतस्तेषु क्लिश्यमानेषु सत्सु त्रयाणामपि वर्गः सुखाय न कल्प्यते तेषां क्लेशो धर्मस्याप्यनादेयत्वात् साध्वी भार्या सुतः शिशुः रित्यादिस्मृतेः २८ तत्र भवतायत्क्लेशमं दृष्टं तदस्मेव वयं तुल्यदुःखेन
न तदपि वक्तुं शक्याइति व्यंजयन्स्तस्मेनानुशोचति अहो इति द्वाभ्यां २९ सान्त्वयति नूनमिति अदृष्टान्निष्ठामरणं यस्य तदृष्टस्य पुत्राणां च तादृशान्दृष्ट्वा तन्नताइत्यर्थः तर्ह्यनुस्मारितो रेवकरात्त्राह
अदृष्टमेव परमं न नाहेतुर्यस्य एवमदृष्टमात्मनस्तत्वं सुखदुःखसंयोगवियोगादेर्हेतुं यो न वेद स हि स एव न मुह्यति न शोचतीत्यर्थः एवमद्येसंवादो लौकिकरीत्यैव अत्र द्वे ३० नीवाकृत्वयानेदा
नी दुःखभावनीयं भ्रातानामपि वियुक्तानामपि च पुत्राणां कालांतरे दर्शनयोगयोः संभवादित्यादि ज्ञाव्यर्थसूचकेति स्वामिपादाः ३० श्रीवसुदेवः सांत्ववागपि अदृष्टं परमं पुनः पुत्रादिसंयोगद
मित्यवं माविशुभसूचकेति भावयन् स्वागमहेतुमुपदिशति करिवइति बायुष्मान्निः करादत्तो बयं च दृष्टाः अतो बायुष्मान्निर्धनिकत्वेन रव्यातेरिह त्वल्पस्यास्य समीपे चिरं न स्थेयं नात्र स्थेयम
त्पाधनेरिति विहमुपुराणे एवमुक्तोपि स्वसंगस्फुरणाय श्रीघ्रमजिगमिषुमिवाल्लक्ष्य भावयति संतीति ३२ प्रकर्षेण न्यायदर्शनादिनोक्ताः गोकुलं ययुः प्रतस्थिरे ३२ इति श्रीमद्भागवतदशमस्कंधे
मध्यगः समाप्त पंचमोध्यायस्तोषिणीसारसंग्रहे १ पंचमोध्यायः अनिर्देश्यानिर्देश्यहानिध्यामोद्यं वेदिशिशूनिति कंसमंत्री मंत्रं तत्वा वसुदेवेन पंचमांते संत्रस्ता ताश्च गोकुले इ
त्युक्तं श्रुत्वा तीतस्त्वरितो नंदो व्रजं गच्छन् पूतनां राक्षसीं मार्गेऽपतां दृष्ट्वा तन्मस्फूपकारं चमत्कृत्वा विस्मितो भूदिति षष्ठे कथां वक्तुं प्रथमं तयानुभावमाह नंद इति हरिं भयहरं निजदेवं विहमुं पुत्र
कृताल्पार्थं मनसा शरणं जगाम यद्वा नन्दपेति हरिं मनोहरं स्वसुतं पथि चिंतयन् नजाने तत्र किं वृत्तमस्तीति चिंतां कुर्वन् शरणं निजगृहं जगाम त्वरितं गच्छन्नभूत् १ अष्टभिर्व्रजवृत्तं वक्तुं मंत्रि
नि [illegible] श्चितामुनिहिंसां परं परयायमुपायइत्यनंगीकृत्य कंसेन बालहिंसैवानुमतेत्यभिप्रेत्याह कंसेनेति घोराबालहननशीला अतः कंसेन प्रथमं प्रेषिता शिशून् निघ्नतीनुम आर्षः विषस्तनदाने
नसद्योमारयंती आदिना खेदादि २ ननु तर्हि नंदव्रजबालानां का वार्तेति शंकमानमाह नेति स्वकर्मसु यत्ना दिष्वपि तस्या हुण्यार्थापि श्रवणकीर्तनादिनी न कुर्वंति किं पुनः स्वप्रधानानीत्यर्थः सा
त्वती भर्तुरिति भक्तकीर्तनादिनापि रक्षोनाशः किं पुनर्भगवत इत्यर्थः त्वर्थे नु क्तसमुच्चये वा चकारः तत्र हि तत्रैव प्रभवंतीति शेषः भगवद्विमुखानां कंसपक्षीयाणामेव बालास्तद्वारेव भगवताघा
तिताः नत्वव्रजादिस्थिताः सर्वपीति भावः एवं सति साक्षात्तदधिष्ठितेपि तदुष्टागमनं लोकानंदकलीलासंपत्त्यर्थं तच्चित्तोत्या ताश्च यशोदादीनां प्रेमवर्धनायेति बोध्यं २ एकदा रात्राविति परात्रा खेरा
पायनो उपस्योसत्यपि पाठद्वयं खमार्गेणागत्या यतः खेचरी किंच घोरा अतो याषित्वा योषितं करोतीति णिचिल्लोपः आर्षः वरनारीरूपं कृत्वेत्यर्थः सहसा कथं परगृहे प्रविष्टा तत्राह का
मेति न तादृशीषि इदं चित्रमिति भावः ५ तामितियुग्मकं धम्मिल्ले गुंफितपुष्पाणि तं बस्तना क्रांतत्वादि वक्षःशामुदरं यस्याः रम्यवस्त्रा लीलागत्या कंपितयोः कुंडलयोस्त्विषा उद्भ्रसत्कुंतले मंडितमु
खी ५ वल्गुरम्यस्मितं येषु तथाभूता अपांगविसर्गा येषु तैर्वक्षितैः व्रजौकसां मनो हरंती पद्मद्वयं यद्वा मनो हरंती वद्वाचरंती वनितां जनितानुरागां स्त्रियमंभोजयुक्तकरेण चिन्हेन रूपिणीं श्रिय
मिव गतामभुंसत श्रीरत्र जगत्संपत्तिः किंकर्तुं पतिं द्रष्टुमिव कंचित्पुण्यचिन्हयुतं स्वाश्रयत्वेन वरीतुमिव तादृशलक्षणस्य नंदनंदनस्य वतमेवरीतु मेषागच्छतीत्यभिप्रायेण न निवारितेति भावः
अत्र पति शब्दस्य स्वामिपर्यायत्वं धववाचित्वं तु दर्शयिष्यमाणजननीभावविरुद्धं ६ सेति प्रकरणाद्वर्तते बालग्रह इति तद्विशेषणमजहल्लिंगं तत्र व्रजे शिशून् मृगयमाणा यदृच्छया भगवल्ली
लाशक्तिप्रेरणया सहसा नंदगृह एवागत्या विचिन्वती असदंतकमपि बालं अतस्तल्पे आहितं ददर्श न च बिभेति स्मयतस्तं प्रतिप्रतिच्छन्नमहाप्रभावं कमिव भस्मन्याहितमग्निमिव गोपम
नोहरणादिकं लीलाशक्तिवशादेव भगवतो मायाशक्तिवल्लीलानाम्नी शक्तिस्तिस्रः श्रीशक्तिर्भूशक्तिर्लीलाशक्तिरिति नामिका इत्यर्थक पद्मोत्तरखंडे प्रसिद्धा सैव च क्वचित्तुलसीत्वेन वृंदात्वेन च व
र्ण्यते सैवात्र वृंदावनाधिष्ठात्री चेति बोध्यं ७ चराचरात्मा श्रीकृष्णस्तां बालकमारिकां संज्ञेनहं च ज्ञात्वा बाल्यलीलायां लेमुद्रितनेत्र आस तच्च तस्या निजास्यं त बालत्वबोधनाय दुष्टदर्शनाभावा
यवा स्वदृष्टिस्वाभाविकतेजसा तद्धर्षणाभावाय वा यद्वा गर्हितोपि स्त्रीवधआवस्यकत्वान्नेत्रनिमील्यैव कार्य इति मरणतद्विकल्पदर्शनं माभूदिति चाशयः सा च स्वयमनंतं दुष्टानामंतकमपि
बालं मत्वा अबुद्धिविपरीतज्ञानपूर्वं यथा तथा रोपयत् रज्जुधीः सुप्तमुरगं यथा रज्जुबुध्या गृह्णाति तद्वत् ८ ननु जनन्यौ कथं न वारयतां तत्राह तामिति अथ कार्त्स्न्येन भयान्वयी अतिवा

राम १३

मेतिन्चित्स्कृख पाठः वामंवल्गु जनन्याइव चेष्टितं यस्या एवंमू दुश्चर्मकोशः आवरणं यस्य ताहृशखड्गवदंतस्तीक्ष्णां बहिर्मृदुं वरस्त्रीयं विश्वसनीयां च तासहसैवांतरागृ मध्येवीक्ष्यतत्र भयामात्ववत्से

तेनहा विर्भाव प्रति भयाधर्षिते कथमीदृशीनिवार्येति मोहिते सत्यौ जननीजनन्यो स्रुपांसुलुगिति पूर्वसवर्णः निरीक्षमाणे एवातिष्ठतं न वारितवत्यौ ९ घोरा सा तस्मिन् स्थाने इति धार्ष्ट्यं दुर्जेरवीर्यं विषरूपं य **१२**

स्मिन् अतउल्बणस्य रोनापि मारकं स्तनं शिशुमिति पाठः शिशुं श्रीकृष्णं अंकमादायाकृष्येत्यर्थः अतोद्धिकर्मकत्वं ददौ अर्थात्सिन्धावे अथानंतरमेवतत् तेस्तनं प्रपीड्य व्रजबालानामपि वधायागतेय

मितिरोषयुक्तः सन् केवलेविषमपथ्यं सविषजंतोः प्राणाहि न विषं मया इति प्राणात्मता संपादनाय प्राणान्विषेण संमिश्र्य पास्यामीति मत्वेव तस्याः प्राणैः सहा‌ऽपिबत् दंतिन्यादं भेनैव वधोयोग्य इति भावः रोष

श्च प्राणहरणार्थं ततश्च कुठारयुतः सशाखं मध्वाहरदित्यत्र कुठारेण शाखाच्छेदः स्वयं मध्वाहरणमिव रोषण दृष्टान पवित्रान् प्राणानशोषयत्स्वयं तु स्तनं पिबन् तदनुकरणमेवचक्रे एवमग्रेपि रोषश्चाय मापाततएव

परिणामतस्तु कृपेवेत्याह भगवान् कारुण्यादिगुणाव्यभिचारि १० मुंच मुंचेति बदल मित्यपिवारेण अल्तं शब्दैः स्त्वाभावः पुनर्वक्तुमशक्तेः जीवमर्मणि जीवनाश्रये चरणौ भुजौ च मुहुः क्षिपंतिनिःस्विन्नानि सस्वेदानि

गात्राणि यस्याः रोदनमार्तनादः हहर्षे ११ रसाः पातालानि चेलुः प्रतिने दुश्च दिशश्च प्रतिनेदुरेव वज्रेति लोके तद्दूर्ध्वशब्दप्रसिद्धेः १२ घ्राणादायमुखमिति शेषः निजरूपं उलूकपक्षिणी स्वरूपं गोष्ठेलक्षणया समीपदेशे

द्रुमाणामेव चूर्णीभावकथनात् चरणयोः पक्षात्मक भुजयोश्च विक्षेपेण सा स्तनात्खेचरी स्फुरत्स्याच्च न्यपेति एतत्कथमान्हन् पासीति भावः १३ तत्राश्चर्यमाह पतेति म्रियमाणापि न केवलं जीवन्नेव षड्

क्रोशी द्रुमचूर्णित्वं तत्रापितमात्रचूर्णित्वं यत्तद्भुतमासीत् अयं च लीलानुभावइत्याह राजेंद्रेति १४ इषेतित्रिकं गोपागोप्यश्च तस्या रोद्रं उग्रं कलेवरं वीक्ष्य तत्रसुः रौद्रत्वमीषेत्सष्टभिः पदैराह इषालांगलदंडः तु

समाणा उग्राः दंष्ट्रा यत्र तदास्यं यस्मिन् गुहावन्नासिके यत्र स्थलोपलाविवस्तनौ यत्र प्रकीर्णाः रक्ताः केशा यत्र केशस्तनादिमत्वं उलूकपक्षिणः प्रायोनरसाम्यात्स्यादिति भाति १५ पुलिनवदारोहो जघने ताभ्यां भीषणं रौ

द्रं घोरमिति स्वामिव्याख्याने भीषणेति पुनरुक्तिः जंघनयोरतिभीमत्वार्थी उग्रमिति व्याख्याने तु रौद्रं तत्समित्यमरे भयानकांहृदोके नेत्रांकावकाश इति भाति बद्धाः सेतवद्ववभुजाउरु अंघ्रीचयत्र १६ पूर्वं तु तन्निष्ठु

रनादेन तत्र सुरक्षुनाच बालवत्सानेन ताहृक्देहवीक्षणेन च सम्यक् [illegible] त्रस्ताइत्यर्थः सप्रसिद्धो १७ अथबालहरणं ज्ञात्वा यशोदा समीपस्था गोप्या माहितेजनन्यौ स्यता बालमन्वेषितुं विस्मृतामूत दहाद्बालं

गृहीत्वागृहमानिन्युरित्याह बालमिति बाल्याधिकारस्ता सांस्नेहोदयाय बाल्यादकुतोभयं वस्कृतानकुतोपि भयमन्येषामपियस्मात् अतडरसिहास्यावलोक श्रीहस्तपादनर्तनादिना क्रीडंतं सम्भ्रमोविस्मयाह

र्षौवा सम्यक्कमं तौ च्च देहमारुह्याभि मुरवमेव गत्वाजगृहुः यतोगोप्यः श्रीकृष्णे सहजस्नेहः मातृवत्प्रोपायं स्यश्च १८ बालस्येति स्नेहाद्रक्षायोग्यता सममिति तयोः अरिष्टशंकाव्याकुलत्वेन तत्करणाशक्त्या

प्राधान्यात् साहि संशोकशमनायैव सर्वज्ञः बहुर्थामगलार्थश्चास्य सर्वत्र बहिरंतश्चेत्यर्थः आदिनाश्रूपकोणस्पर्शादि १९ सम्यक्त्वमाह गविति ललाटादिद्वादशांगेषु केशवादिद्वादशनामभिः नामयेन र

क्षा चक्रुः तच्चललाटेकेशवं विद्यादिति तिलकविधौप्रसिद्धं एवं परमवैष्णवत्वं व्यज्यते २० सम्भ्रमेणानीच तापवरक्षां कृत्वा किंचित्लब्धाश्वासाः पुनर्न्यासादि सर्वा गोपसंहारेणा कुर्वतेत्याह गोप्य इति

मार्तनिरासः पूर्ववत् संस्पर्श आचमनं आदौ स्वस्मिन् षडंगेषु करद्वये च बीजानि वक्ष्यमाणाजादीश्वरतेकादशनामाद्याक्षराणी स्वानुस्वाराणि नमोंतानि न्यस्य ततो बालस्यापि तथैवाकुर्वत तन्नेत्यं

नाति अं नमो दक्षिणकरतलशुद्धौ मं नमो वामतले यं नम उभयोः करपृष्ठयोः शुद्धौ अं नमो दक्षिणांगुलिसंधौ हं नमो दक्षिणमणिबंधे के नमः कूर्परे ईं नमो दक्षिणबाहौ इं नमो वामांगुलिसंधौ

विं नमो वाममणिबंधे उं नमो वामकूर्परे ईं नमो वामबाहौ तथा अं नमः पादयोः मं नमो जानुनोः यं नमो ऊर्वोः अं नमः कट्योः हं नम उदरे के नमो हृदि ईं नम उरसि इं नमः कंठे विं नमो भुजयोः उं

नमो मुखे ईं नमो मूर्ध्नीति २१ ततः पदैः रक्षां चक्रुरित्याह अव्यादिति अंघ्री जानूनि त्यत्र स्रुपांसुलुक् भुजमित्यत्र स्रुपांसु पइति औड् अम कं शिरः २२ दिक्षु रक्षामाहुः पूर्वे चक्री हरिः गदाधरो

हरिः पश्चात् धनुरासी खिलेदिति शेषः दक्षिपार्श्वे शार्ङ्गी मधुसूदनः वामपार्श्वे सिहस्त अजन इत्यर्थः शंखस्तार्क्ष्यं इत्यत्र अर्ध आद्य च तथा च शंखधर उरुगाय कोणत्र चतुष्कं गरुडारु

ढ उपेंद्र उपरि रित्यर्थः क्षितौ अधः पुरुषः पुरुषोत्तमः २३ एवं बहिरक्षामांतरंगानांताकुर्वंति इंद्रिणीति सार्धकं ० अवत्विति पुनरुक्तिः रक्षावैप्यात्व्यात् एवमग्रेपि २४ परो भगवान् वासुदेवः

आत्मानमहं तास्य दस्येमिवं अंशेनाशरक्षणं स्वयं च स्वस्येत्यन्तत्या पूर्णत्वेवाग्देवी संवादः क्रीडंतमिति सार्धकं गोविंदो गोमध्ये क्रीडापरः माधवो लक्ष्मी संबाध्य पादशेषशायी २५ वैकुंठो वैकुं

ठवासी जयविजयसनकाद्यर्थं पादत्र्यमाधावन् श्रियः पतिः सिंहासनस्थो नारायणः भुंजानं यत्तभूगिति स्यष्टमवोचित्यं भयंकरइति डाकिन्य इति त्रिकं २७ आदिनाड्वोल्लामुखा

दयः २८ बालग्रहाः बालस्यपीडकाः अर्भकग्रहाः स्वयमर्भकरूपाः पिशाचाः तेदाः इतिनपुनरुक्तिः २९ प्रणयबद्धाभिरिति धात्रीतयातत्रतासां सदाक्षिप्तिर्गवद्रक्षाव्यग्रता चोच्यते

भाग.पू.

१३

पाययित्वेति मातृस्नेहस्वभावात् स्तनपाने बालस्यास्थ्यनिश्चयाच्च ३० तावदिति चेद्ध्यं ब्रजं ब्रजदर्शनयोग्यदेशं प्राप्ताः पर्वताकारं दूरत एव विविधकल्पनया दृष्ट्वा ३१ वसुदेवोक्तसंवादेन विस्मिताना
माह नूनमिति वितर्के सर्वं पूर्वं नासीदधुना तु ऋषिः सम्यकुर्वन्तः केषिल्वचित्रं हृष्टमित्याश्रय पक्षांतरमाहुः योगेश्वराइति अंतरुपासनानिष्ठः संपदाभ्यां तत्त्वन्निष्ठास्तेया यतः स एवेत्यादि आ
नवेति तादृशजन्मत्वेन योग्यता यद्वायं पूर्वजन्मनि ऋषियोगेशो वा समासस एवानकदुंदुभिः संजात इति सर्वज्ञत्वात् सोवददिति गोपमतं ३२ नंदादयोंतिकमायांति तावद्व्रजरक्षकैरुपनंदादिभिर्नि
युक्तास्ते तत्कर्मोचिताः व्रजस्थानि रूढ जातयो नितरां मंदहन्न्यून जंशंकनाशंकया ३३ विस्मयांतरमाह दह्यमानस्येति अगरुतोपि सौरभं यस्य तत्र हेतुः कृष्णेन निःशेषं भुक्तः सप्राणः स्तनपाना
त् अतः सपदि धूमाघ्राणकाल एवाहतः पाप्माधूमसेविनामपि सर्वेषां येन स च स च एवं तमव दुच्छिष्ठस्य महिमा भक्त्यार्पित पवित्रवस्तु त्वच्छिष्टस्य किमुतेति भावः ३४ प्रसंगात्के मुतिकेन भक्ति
वैभवमाह पूतनेति युग्मकेन राक्षसी तत्रापि बालघ्नित त्रापि रुधिरमात्राशनेति हत्या बाहुल्यं हरयेत तत्तु दोषहर्त्रे ३५ अंतर्यामिणे कृष्णाय दुष्टानामपि मुक्तिदत्वात् दिगुणैश्चित्ताकर्षकाय तस्मै देषाभा
वेन यत्किंचिद्यच्छन् सतां गतिं श्रीकृष्णमेवाप्नोतीति किमुत तत्रापि श्रद्धया विश्वासेन किमुत तत्रापि भक्त्या किमु तत्रापि श्रीकृष्णस्य स्वस्य वाप्रियं यच्छन् किमुत अतिप्रीत्या प्रियतरं किमुत अतीत
मांप्रीत्या प्रियतमं यच्छन् किंन्तु तत्रापि तन्मातरो यथा यच्छंति तथा यच्छन् किन्तु भोजने मातृणामेवाधिक्यात् यस्या दयो नोपमिताः मातर इति बहुत्वं वत्साहरणाभिप्रायमिति स्वामिपादाः एतेन द्वात्रिंश
त्रिंशतमित दुक्तेरध्यमोक्षणाद् ध्यायत्रयी न स्वामिसंमतेति परास्तं ३६ दुष्टायाः कथं मुक्तिरित्याश्चर्यं तन्न हि महद्दृष्ट्या पराकुर्वन्त्या आश्चर्यांतराय सं[?]तिमेव वर्णयति पद्भ्यामिति युग्मकेन भक्तानामेव
हृद्येव स्थिताभ्यां न साक्षात्कृताभ्यां लोकवंदितैर्ब्रह्मादिभिरपि वंदितुं योग्याभ्यां न तु साक्षात्सेव्याभ्यां सम्यगाक्रम्य न तु अहल्याया इव स्पर्शमात्रं यस्याः स्तनमप्यपिबत् सा स।इति मापेति किमाश्चर्यं मातृ
वेषेणैव तत्सिद्धेः संद्वेषादिव पूतनेत्युक्तेः ३७ अत्र स्वर्गपदं ब्रह्मा भागो लोकपालाः स्वर्वासं मेनिकांक्षिणइतिवत् परमसुखस्वरूप श्रीकृष्णलोकपरं पूतनापि सकुला त्वामेव देवापितेपि न क्ष्यमा
णात् अत एव तद्विशेषणं जननी गतिमिति न जन्युचित गतिरूपं निजलालनाद्यधिकृत धात्रीवर्गप्रवेशमवापेत्याश्चर्यमित्यर्थः त्वे भगति धात्र्युचितामित्युक्तेः गावो मातरश्च जननीगतिमिति कि
मुत यतस्तानित्यं तदीया एव यद्वा किमु गावो यतस्ता अनु मातरो मातृतुल्या एव यशोदा सर्वमूर्धन्मणी त्वान्नोपमिता अत्र क्षीरपदा पूतनाया स्तनमात्रचोषणं ३८ स्वर्गपदार्थं स्पष्टयितुं तद्विशेष
णं जननिगतिं विशिनष्टि पयांसीति युग्मेन कैवल्यादीति यः कामी नां त्रिवर्गदः मुमुक्षूणां तु कैवल्यं निर्विशेषब्रह्मसायुज्यमात्रं ददाति न स्वमूर्तिं न स्वदर्शनमपि भक्तानामपि भगवानैश्वर
रूपेणैव नतु भ्यो न तु पुत्रादिरूपेण तथा देवक्या अपि जन्मनैव पुत्रो न तु तदुचितलालनेनापि सयष यासां गवां मातॄणां च पुत्रस्नेहस्तुतान्यत्वमस्य सर्वं मपिवदिस्यन्यो न्यभावस्य दार्ढ्येन स
वोत्तमत्वं ३९ तासामज्ञानसंभवः संसारो न पुनर्नैव कल्प्येत तासो परिपरमप्रेम भक्तौ समारूढत्वात् संसारस्तत्वे मुक्तानामपि सिद्धानामितिन्यायेन शुद्धभक्तिसंभवात् तदेवाह नित्यम
व श्रीकृष्णेसुते क्षणं कृतभावं कुर्वतीनां यत्र कृष्णस्तत्र नित्यमेवेदृशाभावेन स्थितानां हे राजन्निति भगवज्ज्ञाने सावधानो भवेति भावः एवं जननीगतेरप्रापंचिकत्वात्तद्विशेषितः स्वर्गोप्यप्रापंचिक
एवेति भावः ४० कटस्म शानं व्रजौकसः पूतनावृतांतां स्तुवमन्यत्र गताः श्रीनंदाद्याः अन्ये च ४१ गोपेत्र ज्ञनस्थैः आदिस्तनदानात्तेनाद्यादि शिशोः शिशोर्व स्वस्तिचश्चकत्वाभिस्मयेन वात्सल्या
चिकंप च्वन्यते ४२ तत्रापि नंदवात्सल्यमाह नंद इति परमामतुला मुदं लेभे तत्र हेतवः यतो नाम्नैव नंदः तत्राप्युदारधीः प्रेमार्णवमानसः तत्रापि स्वपुत्रमंकेकृत्वात्तत्रापि प्रोष्यागतः तत्रा
पि मूर्ध्न्याघ्राय यतः प्रोष्यागत इति एतदारभ्येव श्रीकृष्णस्याधोक्षजाख्याभूत् तथा च हरिवंशे अधोनेन शयानेन शकटांतरचारिणा राक्षसी निहता रौद्रा शकुनीवेषधारिणी पूत
ना नाम घोरा सा महाकाया महाबला दृष्ट्वा निहतां तत्र राक्षसीं वनगोचराः पुनर्जातो यमित्याहुः रुक्तस्तस्मादधोक्षज इति ४३ अहोपूतनायामुक्तो किमाश्चर्यं तद्वार्ताश्रवणेनापि स
वोपिकृष्णे रतिमाप्नुयात् इत्याह यइति कश्चिन्मर्त्यः कृष्णस्यार्भकचरितं शृणुयात्स रतिं लभेत इत्यर्थानुसंधानाभावेपि नामादिवद् हस्तस्पर्शान्निरुक्ता अर्थानुसंधाने भगवत्कारुण्यात्तो
चनारुफल शेषं कीदृशमार्भकं पूतनायाः मोक्षः संसारात् फलांतरान्विनिर्गमो येन तत् निशम्यति पाठे योनिचाप्यतिष्ठति स इति व्याख्येयं ४४ अर्तुदैत्यकुलानी शः पूतनायाः शिशु

छलात् स्तन्येना पोत्रानं प्राणैः प्राणाहृतिमकल्पयत् १ इतिस्वामिपादाः अविद्यायाःक्षयादेव लन्योहमितितन्मयी प्रागहंपूतनोकृष्णोराघव स्मादिकामिव १ आरंभएवलीलायावकीधात्रीग
तिप्रदःकृष्णःस्वगुणमाधुर्येनदृमयामासवैष्णवान् ३ इतिश्रीमद्भागवते दशमस्कंधेऽषष्ठः समाप्तिमगमत्षष्ठः तोषिणीसाररसंग्रह इतिषष्ठोध्यायः ६ षष्ठांतेगोविंदेललते रतिमिष्कत्तया
श्रवणादिफलरूपायाः रतेःसिद्धिंबालचरितारंभादेवश्रोत्रास्वयमपितदुद्दीपनमनुभूयजाताह्लादःकथांतरापातन् शंकयापूतनावधानंतरमाविशाकटोच्चाटनतृणावर्तवधविश्वरूपदर्शनादिच
रितानिशुश्रूषुः सामान्यतस्तान्यचरितान्यभिनंदति येनेति भगवानितिपदत्रयेणतत्कर्मणामैश्वर्यवत्त्वंदुःखहरत्वमनोहरत्वे अवश्यसेव्यत्वंच यानिकर्माणिकरोतितानिनःशृण्वतःकर्णसुखानिअ
र्थतोमनःप्रियाणि भवंत्येव प्रभोइतिसर्वशक्तित्वान्तइंद्रियवृत्तंजानासीतिभावः १ श्रोतव्यमाह यदिति तथापियच्छृण्वतःपुरुषमात्रस्यश्रवणादावरतिर्विषयेषुविविधात्तृष्णाचापगच्छति स
त्वस्यचित्तस्यशुध्याकथारसग्रहणसामर्थ्यं श्रीकृष्णप्रेमतद्भक्तसख्यंचैतत्सर्वमचिरादेवभवति तदेवहारंहरेर्मनोहरंचरितंवद यदिअनुगृह्णासि यद्वायदिनपुनर्गोत्तमिच्छसि २ कतमतच्च
रितंतत्राह अथेति अथानंतरमेवनतूपोद्घातादिव्यवधानेन बालचरितमेववदेतिपूर्वानुषंगः यतोद्भुतलीलामाधुरीभिराविर्भावैश्चविस्मयावहं तच्चमनुष्यरूपयैवप्रकटितमित्याह मानु
षमिति अनुरुद्धतोनकुर्वतः २ तदनुमोदमानः क्रमप्राप्तांलीलामाह कदाचिदिति त्रैमासिकवयसि जन्मर्क्षेति नाक्षत्रमासारंभे तत्रैवोत्थानिकं यत्कौतुकं तस्याप्लवेव्याप्तो तत्रांगपरिव
र्तनमितिस्वामिनः बहिर्निष्क्रमणमित्यन्ये तस्मिन्महोत्सवेमिलितस्त्रीणांमध्येवादित्रगीतमात्रैः स्फातिपाठकैः शोभितमभिषेचनं सतीयशोदाचकार स्त्रीप्रधानकर्मत्वादस्याःकर्तृत्वं ४ कृतेम
ज्जनगोरोचनतिलकादियस्य अन्नंतदाद्यमाज्यादिअभीष्टंद्रव्यंच धेनुविशेषणंवा तैःपूजितैःकृतमंगलं संजातानिद्रेअक्षिणीयस्यतंसुकुमारत्वान्निद्राभंगाभियाचशनैःशायितवती ५ औ
त्थानिकेपुत्रोत्सवेऔत्सुक्यं कर्मसांगतार्थवैयग्र्यंतद्वन्मनोयस्याः मनस्विनीउदारा अतःसमागतान् सर्वानेवमाल्याभरणैःपूजयंतिनुमभावश्चार्षः बालानपुत्रपार्श्वेसंस्थाप्यातिजेयं रुदितंनैव
शृणोदेवकारवेपदात्यां किंचिदपिश्रवणंनेति सशापथमिनदृढीकृतं अन्यथासर्वत्यागेनागतस्यात् सचततोपिमातरंमप्राप्यापि तिरुदन्नेवचरणावूर्ध्वंमुहुश्चालितवान् तच्चबाल्यलीला
सोढ्वार्थं शाकटासुरभंजनेइति ब्रह्मांडपुराणोक्त्याशकटाविष्टदैत्यवधार्थंच रोदनंतुस्तनार्थमेव मातुरभिप्रायानुसारीचतानरस्यकत्वाल्लोकवल्लीलाकैवल्याच्च ६ गृहाद्बहिर्महाशकटाधो
बालपर्यंकिकायांशयानस्यास्पल्लोनप्रवालतोमृदुनाएकांघ्रिणाहतं उहननमुद्रयामात्रंतच्चासकृद्भरभराद्भ्रमोचक्रप्रवेशान्निकटप्राप्तेःसंभाव्य अनःशाकटंव्यवर्तततविपरीतमपतत् ध्व
स्तानिनानारसानिकूप्यस्यकांस्यादेर्भांडानि यथास्युस्तथाव्यस्तस्ताचक्राक्षा यत्रविभिन्नःकूबरोयुगंधरोयत्रतच्चतच्चयथातथा देर्त्यांतर्हितस्थितइति तथैवमतइतिज्ञेयं एवंबाल्यभावे
एववामनन्दसिंहादाविवब्रह्मक्षीषणादिविग्रहंविनेवचाशेषैश्वर्यप्रकटनादस्यपूर्णावतारत्वं तथाचविष्णुधर्मेर्जुनोक्तिः तालोच्छ्रितांग्रगुरुभारसारमायामविस्तारवदग्न्यजातः पादाग्रवि
क्षेपविभिन्नभांडंचिक्षेपकोन्यःशकटंयथात्वमिति द्वितीयस्कंधेतोकेनजीवहरणमित्यादोस्पष्टंचेदं ७ यायशोदाद्याश्च औत्थानिकोत्सवागता येचनंदाद्यास्तेशाकटविपर्ययंदृष्ट्वाऽद्भुतदर्शना
कुलाःसंतःतेस्वयमेवकथंपर्यगादित्यूचुरितिशेषः ८ किंदैत्यैर्ग्रहादिनावेत्यनिश्चितमतीन्बालकास्तन्माध्ययीकृष्टमनस्कान्तदेकहृष्ट्यऊचुः एतच्छकटमनेनेतिप्रत्यक्षत्वं संशयोपिनकि
मुताप्रतीतिः ९ तेसर्वज्ञानयोग्याअपि अप्रमेयंतर्कागोचरं बलंनविदुरतोनश्रद्दधिरेच अत्रपुनस्तेषांमतिहेतुंतरं पुत्रभावमयतत्प्रेमानंदमत्ताइत्यर्थः तादृशप्रेम्णःसर्वाच्छादकत्वादि
तिभावः लालत्स्नेहपरिप्लुताःत्वरितःकुंडिनंप्रागादितिबलिभद्रेपितत्प्रसिद्धेः नन्वन्येषामुक्तावपिकथमश्रद्धातत्राह बालभाषितमित्यतोपीति गोपास्तेपिनश्रद्दधिरेकिमुतगोप्यः १० यशोदा
याःस्नेहचेष्टितमाह रुदंतमिति बालग्रहादिभ्यःशंकिताविप्रैःकर्तृभिःरक्षोघ्नसूक्तैःकरणैः ११ विप्रचेष्टितमाह पूर्ववदिति बलिभिःशकैःसपरिकरंयथापूर्वंस्थापितंविप्रादध्यक्षतैःकु
शजलोक्षणैश्चशाकटमानर्चुःहुत्वाग्रहादिहोमंविधाय १२ अधुनाश्रीनंदचेष्टितमाह ४ चतुर्भिःयइतित्रिकं तत्रब्राह्मणश्रैष्ठ्यमाह असूयागुणेषुदोषारोपः ईर्ष्याअक्षांतिः दंतच्च
तुष्कवर्जनाधार्मिकताहिंसादिवर्जनामोक्षपरता सत्यंभगवंतंपरिशीलयंतीति वैष्णवत्वं तेषामितिकर्तरिशेषषष्ठीतैःकृताःप्रयुक्ताःविफलान १३ इतिएवमभिप्रेत्यसामादिमंत्ररूपा

ष्ठैः संस्कृतैरोषधिसुतजलैः कृत्वाद्विजैः कर्तृभिरभितः सेचइत्वा १४ हुत्वाहावयित्वा रसामोदादियुतमन्नमदात् १५ गाव इति सार्धकं गावः गाः प्रादात् अनु भोजनानंतरं प्रायुंजत आ
शिष इत्युत्तरात् १६ ये विप्रा मंत्रविदो युक्ताः भगवद्भक्ताश्च भजंते ये मां स मे युक्ततमो मत इति गीतायाः तैर्या प्रोक्ता आशिषस्तास्तथैव यथावसरं बभूवुरित्यर्थः १७ व्रजे विराजमानो
हं काराच्चिदर्हाभिनावृत्तिं इति चिक्षेप भगवानुपरिस्थमनोध्रुव १ नीरीक्ष्य तोलतां किंत दमूर्तो तो न सा हतः मूर्च्छामूर्तैः ततः प्रेषी ह्यायुरुपं सुदुर्ग्रहं तृणवर्तं तृणावर्तं मुवधीदिति वर्ण्य
ते एकदेति एकाब्दवयः प्राक् उत्संगं कमारूढं मुखचुंबनं स्तनपायनं कराभ्यामुत्तोलनमित्यादिना लालयंती सती लालननाभिज्ञा अत्रास्या एकाकिनीत्वं दासीनां कर्मांतरे नियुक्तत्वात् १८
दैत्यवधार्थं प्रकटितभारेण पीडिता मा सहदैत्यपीडास्या इत्युत्संगादुत्ताराय भगवते वक्षतं भारमज्ञानती सम्भ्रमेण खट्वादे भारासहत्वाशयेन च सकशिपु स्वमावे वोपवेश्य विस्मिता सत्युत्सात
शोकया जगतां महापुरुषमीश्वरं आदध्यौ कर्मसूतदर्थं स्वस्त्ययनादिषु आसनतु दैहिकादिषु यद्धामार्थस्कृत् स्त्रियात्मतनय प्राणाशयास्वत्कृतेति तस्यां कै मुत्यसिद्धेः ऽदरवतश्जगतां भारेति
स्वामिव्याख्याने श्रीविग्रहस्य विभुत्वं व्यज्यते १९ दैत्य इति युग्मकं भास्यारुपत्वेन महाबल्ली दुर्ग्रहः प्रचोदित इति हेतुरुक्त एव अर्भकं संवृत्त गौरवमित्यर्थः अन्याहरणशक्तेः २० रेणुभिराव
ण्वन् मुहुश्च २१ रजसा तत्कृततमसा च भगवद्दर्शनविनाशक रजस्तमोगुणावृत्तयोगी हृदयमिवेति श्लेषोपमा यतो येन रजसा तमसा स्वपार्श्वे न्यस्तं वस्त्वपि स्वयमेव नापश्यत् २२ चान्नाश्च
णोच्य त यतः ८ तदनु संधातुमशक्तः २३ गौरवप्रदर्शनेन स्वनयनमन्याशक्यमिति बोधिताऽपि पुत्रादर्शनमादाकुलत्वात् दस्मरंती शोकादि चकारेत्याह इतीति चक्रसंबंधी पांसुवर्षे सती मार्गमध्य
दृष्ट्वा यतो बाला अतः केवलं पतितास्यपतिकरुणं वज्रसारादि भेदकं यथा तथानुस्मरंत्यशोचद्विललाप यद्वा प्रागशोचत् पश्चात् मूर्छया भुवि पतिता यतो माता हि निश्चयेनेतेति अदर्शनादनिष्ट
संकोसत्तेः २४ वायुना पांसुवेगेन च्छे प्रतिवेशि न्यो गोप्यस्तत्र देवीग हेरुदितमनु वीप्सया श्रुत्वा तत्र गत्वापि श्रीकृष्णमदृष्ट्वा अनुतप्तानुरुदंति इति पाठद्वयं नंदसूनुमिति नंदादीनां रोदने सूचयति
२५ तद्रोदनेऽशक्त्यादयाहतो भगवान् ने भोगमनल्लीलां विहायतं हंतुमुद्यत इत्याह कृष्णं हरंन्ते भोगतोऽपि तदा विष्कृत भारेण भूरिभारभृत् अतः शांतरयो गंतुं नाशक्नोत् २६ गुरुमत्तया गौरवेण तमश्मा
श्मानं अश्मवंतं नलीमणिपर्वतं मन्यमानः अतो हरणाशक्त्या मोक्तुमिच्छन्नपि तेनाश्मनो गलाग्रहीतत्वान्नाशक्नोत् अश्मानमश्मानमिति पाठावन्यपूर्वयोर्भर्नुप वल्लोपो छांदसो अत्ये च अर्णत्रा
ऽनेन वर्णोर्थे न प्रभो च्यते अश्मपदेन च लक्षणादिना पर्वतः अत्र गलग्रहो लौकिकबालवदुश्चैनश्तत्वाङ्कयेनेन २७ गलग्रहणेनैव निश्चेष्टः हस्तादिक्षेपणाशक्तेः बहिर्निस्सृतनेत्रश्च तत एव
व्यक्तार्तनादश्च व्यसुर्मृतः नितरां पृष्ठतः सर्वांगपातमपतत् पूर्वं पृष्ठतनायाः ऽपारतपांसुवेगोयेनेति बृहन्भीहिणे तदर्थल्लाभः पादादिविक्षेपार्तनादैः व्रजजनोऽतिभीत इतीदानीं गलग्रहणे
न न भस्येव मारणं अतएव न भस्सिनयनार्थं तेन स्वस्य हारणमपीति तत्वं २८ शिलायां पशुपालसंमर्दकदमानुद्धवाय गृहांतिक शिलाबद्ध भूव्येव न प्राण्युपरि अतः करालं कठिनमपि विशी
र्णावयवं पुरं यथा स्वान्निश्चेष्टं पतितं शीर्णं च यशोदासमीपे पार्श्वे समेताः सर्वा एव रुदत्यः इतिनु भूरहितः पाठः यतः स्त्रियः स्त्रीत्वेन कोमलस्वभावानां शोकाधिक्यात् त्वानाशार्थं ता सां समी
पे पातनादादौ दर्शनं २९ दृष्टवतीनां चेष्टामाह आदायेत्यर्धेन हस्ताभ्यां गृहीताद्दूलाद्दूरसिल्लंबमानं वृक्षमादाय मात्रे प्रतिहृत्य समर्प्य अत्लाभ्यत्लाजादिना तस्याः भाग्येन विस्मितां त
च्छरीरं च यमुनायां वाहितमिति शेषः ३० विहायसाऽस्मद्गम्या ध्वना पुरुषभक्षकेन नीतमेतास्यक्व पाताच्च मृत्युमुखमिव प्राप्तमपितस्मात्प्रकर्षेण क्षतं मुक्तं गोप्यो यशोदाद्याः आद्यावृत्तिः प्रागताभि
र्लब्धत्वात् पुनर्लब्धेति बकी भयापेक्षया ३१ एवं तेषां स्नेह एव न्यवर्धत न तद्धिरीधीश्वरत्वानं वृत्तमिति व्यंजयं स्तेषामन्योन्यवार्तामाह अहो बतेति अत्यंह हर्षे एष बालत्प्राणः निवृत्तिं मृत्युमभ्य
गात् अभिमुखं प्राप्तः अभिभयरहितं यथास्यात्तथेति वा नाकृतं चेतदित्याहुः हिंस्र इति समत्वेन स्वपरदुःखादिसाम्यदर्शनपुण्येन मुच्यते मुक्त इति नंदमुद्दिश्योक्तं अर्थांतरन्यासोऽत्र तत्र तुहिं
स्यत इत्यर्थः ३२ स्वभाग्यमभिनंदति किमिति तपश्चीर्णमिति पाठः नास्माभिः पूर्तं नवापि देवालयान्नसत्रारामाः इष्टं पंचयज्ञाग्निहोत्रादि दत्तं धनदाना भयदानादि यद्यतः स्तपस्त्रादेः एवं तिसा
दृश्ये परेतइव पुनः बंधून् प्रणयन् जीवयन् समीपमागतः ३३ नंदस्यतुस्त्तैतितरां व्यवर्धतेत्याह दृष्ट्वेति बहुत्वादइत्यन्यान्यपि माथुरलोकप्रसिद्धानि सूचितानि शुकाचार्यैः स्कसप्तादि

नावधित्वा संक्षेपितानि रजस्तमस्वभावं मत्वा मामकं गुरु मानिनं निघ्नन्निजाँल्लुब्धिभममिति तृणावर्तं दुहान्तपि नश्लाघ्यः स्त्रीवधः सोपि नव्यक्तो येन साहतः इत्यतो पाद्भवो भातितृणावर्तो महा
सुरः मुहूर्ते येः परानिष्टशंकाशुष्कोस्वमातरं लीलाशत्त्यासांत्वयितुं स्वप्रभावमदर्शयत् ३४ एकदेति आदाय पर्यंकिकाशायनाङ्कमो क्रीडंतं बालात् गृहीत्वा भाविनी सद्भावयुक्ता तत्रापि पुत्रस्ने
हरसेपरिप्लुता स्वंतमना अतः प्रस्तुतं वस्त्राद्यार्द्रीकरणे नक्षरंतं ३५ युगमकंपीतप्रा० यस्येति कर्तरिक्तः प्रायेण कृतपानस्येत्यर्थः यद्वा पीतं पानं प्रायमीषन्न्यूनं यस्य जननीस्तनपदात्या स्नेह
भरः रुचिरस्मितमिति सौंदर्यमुखं लालयंती लालनजनिता नंदभरालस्येन जृंभमाणस्य जठरे ददर्श जठरे जनन्या इति ब्रह्मलोके इदमिति इदमेव विचित्रं नान्यत् तद्धि मम हस्यविमुत्यादिति भावः ३६
इदं पदार्थं विशिनष्टि स्वमिति नगान्गिरीन् दुहितृः नदीः ३७ वीक्ष्य साक्षात् दृष्ट्वा सहसा अकस्मा द्युगपच्च विश्वमशेषमिति कारणादि संग्रहीतं उत्सातशंकया जातकंपा तदद्दर्शनाय नेत्रे संमी
ल्य अनेन निजात्मा बहिर्नेत्राभ्या मेव विश्वदर्शनं न दिव्य दृष्ट्यपेक्षा किंच श्रीकृष्ण प्रेमानंद लक्ष्म्या दासीकृताः कोश्य न विश्वदर्शनादि शक्तयोपि तस्यां वर्तंत इति बोध्यते किंतु नेत्र निमीलना
दनादरस्तासां तर्क्यते तदुक्तं नारदपांचरात्रे हरिभक्तिमहादेव्याः सर्वा मुक्त्यादिसिद्धयः भुक्तयश्चाद्भुतास्तस्याश्चेटिकावदनुव्रताः इति अनादृता अप्यत्रावसरे स्वदास्यसाफल्यं भावयंत्योपि
स्मयद्वारा तां स्वेश्वरीमुल्लासयितु मनुवर्तंत इति गम्यते मंगति वात्सल्य विस्मयशोभया विशेषतो नेत्र सौंदर्य स्फुरणात् ३८ इति श्रीभागवतदशमस्कंधे सप्तमाध्यायः समाप्तः सप्तमाध्यायस्तोषि
णीसारसंग्रहे ७ इति भागवते दशमस्कंधे तोषिणीसारसंग्रह टीकायां सप्तमोध्यायः ७ अत्र सर्वत्र श्रीनंदयशोदादेवक्यादिरुक्तपदानि भगवद्वाचकतदवयवहस्तादिवाचकपदानि
च सर्वाणि श्रीपदपूर्वाणि निर्देष्टव्यानीति तोषिणीकाराणां मर्यादा तथापि मयालसेन सा प्रायस्येत्के त्वितिक्षंतव्यं सर्वैर्मधाख्यमिद एवं ससुरवध प्रसंगात् व्यवहितमपि तृणावर्तवधमुक्त्वा शकटोच्चाट
नानंतरं नामकरणं तृणावर्तवधोत्तरं मृद्भक्षणविश्वरूपदर्शनलीलाचाष्टमेवक्तुं अयों दोस्यान्तो मेकादशोद्वादशो वा एतत मदिने इत्युक्तेः शततम मदिने कृतं नामकरणमाह गर्गइत्यादिना नो
जना इत्यंतेन राजन्निति पूर्ववल्लीलानंदाविष्टमर्वधापयति सुमहातपा अति धन्यो य तो वसुदेवनंदादान्नीमः १ आनर्च नंद इति शेषः २ पादक्षालनादिना सुखासनोपविष्टं आतिथ्यं मधुपर्को
दि मधुरस्तुतिरूपया गिरा मुनिं नंदाति प्रेत श्रवणाय कृतमौनं पूर्णस्य तत्त्याप्तसमस्तपुरुषार्थस्य ब्रह्मन्निति विदार्थज्ञानेन पूर्णत्वयोग्यता ३ पूर्णश्चेत्कथं धनिनां गृहमागतस्तत्राह महदिति महता
संस्थानादन्यत्र गमनेन स्वार्थं किंतु नंदादीनां कि "कवैदिककर्मिणां ज्ञायादि भरणव्यग्राणां अतो दीनचेतसां क्षणमपि गृहस्य कुमत्रा कुत्रतां मंगल्याय अन्यथा निश्रेयसव्यतिरेकेण कदाचिदपि नघ
टते ४ ज्ञानातिशयं तस्याह ज्योतिषामिति यदतींद्रियज्ञानसाधनं ज्योतिषामहाणाम [illegible]यनं प्रतिपादकं ज्योतिः शास्त्रं तत्कृतवान् साक्षात्प्रणीतं येनो न्यापि पुमान् परावरं पूर्वजन्मवृत्तं अवरं एतज्जन्मभावि
फलं तद्वेदेति बालयोरस्तत्कथयेति भावः ५ विवक्षितमाह त्वमिति हि यतो ब्रह्मविदां श्रेष्ठो महाभागवतत्वात् अतो नामकरणादि संस्कारान् कर्तुमर्हसि एतद्गुरुणा कार्यमिति चेदाह जन्मनाज्ञास्येव किं
पुनर्ज्ञानेनेत्यर्थः ६ अस्फुतसाहि नं नंद प्रति गुप्तमेतत्कार्यमित्याशयेन प्रत्याचक्षाण इवाह यदूनामिति त्रिकं तथापि त्वामत्रागतं कोविंद्यात्तत्राह ख्यातश्चेति सर्वदा सर्वस्यां भुवि त्वमंडले सर्वकाले
ज्ञातः किं तत्राह कृतमिति कंसो मन्येत इत्यर्थः ७ तावे ताच्च यदुपुत्रत्वात्तानपि वसु देवसुतस्तत्रापि देवक्यां जात इति कथं कल्प्यते तत्राह पापमतिरित्यादि ८ किं मया हत इत्यादि कन्या
वचश्रुत्वा देवक्याः अष्टमो गर्भो न स्त्रीभावयोग्य इति निश्चिंतयन् क्वचित् दस्तीति ज्ञात्वा युवयोश्च सख्यं चिंतयन् त्वं ९ हेत्यादि ति संभाव्य अपि ये दिहंतां देवकीपुत्रहननशीलः हंत खेदे वा के
सोमत्संस्कारलिंगेनागतः संज्ञाकः स्यात् तर्हि तत्संस्कारकर्मास्माकं महानेवानयः अन्यायः पस्यात् १० गोव्रजइति एतच्च धनं पश्चाद्रहसीति दिने सपालानां गवां वनेगमनात् द्विजातीनाम
वस्यकार्यं संस्कारमात्रं केवलं स्वस्तिवाचनपूर्वकं कुरु ११ ततो रहसि संस्कारकरणं तदैश्वर्यं तस्य कुतो न संको चस्तत्राह बालयोरिति भक्तमोदार्थं प्रकटितबाल्ययोः लीलानादृशानामपि
मोहिनीति भावः ११ अ मवेइतिसार्धकं अयमित्यादि रंगुल्यानिर्देशः कृष्णदेवस्य देवादीन भवरादीश्च आख्यास्यते स्वयमेव लोके मत्कैतवं ब्याजमात्रं विदुर्त्तीसंयत्वेन मितिशेषः यद्वा नावसूद
बादीनां च अपृथग्भावान्निर्विशेषस्नेहभावाद्युभयकुलस्यापि प्रेमणा स्वस्मिन्नाकर्षणादित्यर्थः इतापीतिहो पाठो नामांतरसूचको वास्तवार्थ रूप सूदहो तत्कानाभारामांश्च विदुः सदाज्ञान
स्येव १२ अपि नासंकर्षणनाम्नान्यापि निरुक्तिः १३ अनुजस्य नामान्याह आसन्निति धारंवारं तनूः गृह्णतोस्य त्रयो वर्णा आसन्निदानीं तु श्याम त्वात् कृष्ण इति नाम भविष्यति अयं कष्णन कृष्ण

योगिविशेषस्ततद्युगोक्तशुक्लादितगवदुपासनया तत्तत्साम्यं प्राप्त इदानीं साक्षाद्वासुदेवोपासनया तद्वर्णो भक्तोत्तमत्वाच्च मुक्तिमनंगीकृत्य मुहुजन्मवानिति नंदो ऽमन्यत वा स्तवार्थस्तु युगे युगेऽत्र
येऽशुक्लाद्यवतारान् प्रकटयति तत्र योयः शुक्लादिरूपावतारः स सर्वोपीदानीं कृष्णतो भवद्रूपता मस्मिन्नेव तत्तां प्राप्तः सर्वांशित्वात् ततश्चैवस्मिन् सर्वाशाकर्षणात् कृष्णोऽसि मुख्यं नाम कृषि
र्भूवाचक इत्यादि निरुक्तिरप्यत्रैव वर्तते इति अहन्नामानं देसर्वात्मवात् प्रणवे वेदा इव कृष्णे सूपेप्य रूपाणी वच कृष्णनाम्नि नामान्तराण्यंतर्भूतानि स कल निगमवल्लीसत्फलं कृष्णनामेति नाम्नो
मुख्यत मत्त्वाम कृष्णाख्यं मे परं तपेतिच प्रभासपुराणोक्तेः १७ प्रागिति वसुदेवस्यास्य च जन्मांतरे एवं पूर्वजन्मन्यपि वसुदेवस्य त देवनाम स्यादिति नंदोऽमन्यत वास्तवस्तु इहैव जन्मनि प्रा
कू कारागृहे वसुदेवाज्जातोऽपि तव तत्मज एवेति पूर्वं सिद्धांतानुसार्यर्थः अन्यथा तवात्मज इति न स्वरसं क्वचिज्जातः कुमारक इति वक्तव्यत्वेन तदुक्तेराधिक्यात् श्रीमानिति श्रीमन्निति पाठे हे पुत्र तो
ग्ययुक्तः अत एव मति ज्ञाता सुदेव इत्याचक्षते १५ यथा शुक्लादिरूपाणि तथा जन्मांतर नामान्यपि बहूनि संति तान्यहं वेद जना न विदुरिति वस्तुतस्तु ज्ञेयो यादिगुणा नुरूपाणि न सिंदिनीकर्मानु ६१
रूपाणि मत्स्यादीनि गुणानुरूपनामा विभक्तवत्सलादिनी कर्मानुरूपाणि जगत्सृष्टागोपाल इत्यादीनि गुणकर्मणामानंत्याद नंतानि तानि तानि लौकिकवत्सतीयमानान्यपि चिदानंदत्वेन तदुपासक
हृदयैकवेद्यत्वान्नि नाहमपि वेद जना अपि न विदुरिति १६ एवं नामान्युक्त्वा तानि श्रुतफलान्याह युष्मा कं श्रेय आधास्यति इकारत्वो पश्चार्थः दुर्गाणि कंसाद्युपद्रवान् १७ पुरा जन्मांतरेऽत्र
प्रकटार्थे तु साधवो देवादस्य वो देसाः अराजके इंद्रस्य पदच्युतौ १८ महाभाग इति सप्तम्यंत हे महाभाग इति यशोदासंबोधनं वा भागा इति पाठांतरं अरयो बाह्या अंतराश्च कामाद्याः मुख्या
र्थे तु विष्णुपक्षरा प्रो देवगणेरुद्धः देवगणान् देसा इवेत्यर्थः १९ नारायणेन सम इति नंदेनावगतं नत एव च मुकुंदेत्यादीनि तन्नामानि तेन गोकुले ख्यापितानि श्रीगोप्या दयो वदंती तिज्ञेयं मुख्यार्थे तु
नारायण एव समो यस्य तत्तुल्यो नारायण इति ततोऽपि स्वांशादंशिनोऽस्याधिक्यं उपमानादुपमेयस्य सर्वसादृश्याभावेन न्यूनत्वसिद्धेः गुणाः करुणादयः बाल्यानाह श्रियेति इहजोपि तत्र आत्मज
इति सुसमाहितो गोपाय यद्वा श्रीकीर्त्यादिभिर्गोपानां राज्ञां गोपालानां वा भवता मयश्च भवि घोषः सुसमाहित स्तत्परः हे नंदेति श्लेषेणाधुनानंदकुर्विति भावः २० स्वगृहं गत इति त गृहं दर्शनविशेषा
स्मृतेः प्रमुदित इति एतदनंतरं निजपुरोहितादिना नीय प्रकटमेव नामकर्मोत्सवः कृत इति बोध्यते २१ गर्गोक्तश्रवणेऽरत्वापि त्रोरानंदपूर्णतां बाललीलाचमत्कारदर्शनेः पूर्णतोच्यते
कालेनेति नामकरणात्किंचित्काले गते सतीत्यर्थः तृणावर्तवधसेवत दुत्तर एवएकहायनस्य कलत्वात् एकदा पाद प्रज्यादर्शनेन रिंगणासंभवात् गोकुलइति तत्र त्याना तात्पर्यं बोधयति एव
मग्रेपि रामो गोकुलरमणः अंशावो ये प्रकाशांते मम ते केशासंज्ञिताः केशावं तस्मान्मामाहुर्मुनिसत्तमेति भारतनिरुक्त्या केशावः प्रकाशमानो रामतोपि कोस्या मनोहर इति भावः पश्चाच्चिर्दे गो
कुलस्थात् तातं गोकुल इति पाठः सत्तात्तं संबोधनं यद्वा तात स्य गोकुल इति विहारस्वाछंद्य २२ मुहुरनुकृष्यसरीसृपं तौ कुटिलंत्रजंतौ अघ्रीस्या दोकमल्लादिरूपका प्रयोग इदतित्र
मस्मृतेः क्वचित्प्रयागस्तद्वाराजनन भनस्यारोहाय गोमुत्रं गोरसादिनिपातजकर्दमेषु बहुचंस्थनं बाल्यत्वात् कथं घोषाः कटिपादभूषणकिंकिण्याः तेषां प्रघोषेण रुचिरं यथा तथा
यद्वा घोषो ब्रजः तेन तत्रत्याः तेषां प्रघोषे रसौ रिंगणाश्चर्यं पश्यतेत्या घुष्वनशब्दे रुचिरं यथास्यात्तथा तन्नादेन हृष्टमनाय योस्तो लोकं कंचिद्यागतं मुग्धवदृहजनं मत्वेवानुसृत्य का
नि ३ चित्सदान्यनुगम्य पश्चाद्वस्याज्ञात्वा प्रभीतवमाजौरतिकमुपेयतुः २३ तदा च तन्मातरौ घृणया कृपयास्तवं तौ पंकएवांगरागस्तेन रुचिरत्वं सुंदरे किं न सुंदरमिति न्यायात् बाल्यभू
षणत्वाच्च तो निजसूतो दोर्भ्यामुपगुह्य अत्र निजनिजेत्यनुत्त्वा निजसूतो विस्मृतयोर्द्वयोर्द्वे प्रत्यपि स्नेह भरो व्यज्यते अतमुकर्षणस्वच्छया कदाचिन्मात्व विपर्ययेणापि पिबतोः स्तनं द
त्वा मुखं नीरीक्ष्य प्रकृष्टे नेत्रं विगिरंच्य इत्यादि वक्ष्यमाणा तत्तदानंदतोऽप्यधिकतमं मोदं प्रापतुः स्मविस्मये मुखमित्येकत्वं स्वस्वत्वात्य मुखापेक्षया कथंभूतं मुखं मुग्धं सुंदरं स्मितं यत्रे
प्रमाणतः सख्यातश्चाल्या दताय त्र तत्वतत्त्वे २४ ततः किंचिद्वयोतिरेके खिलव्रजे पादप्रज्यया विहरंस्यासर्वस्त्रीणामप्यानंदो जनित इत्याह यहीति अंगनानां दर्शनीया बाल
लीलायायोस्तौ अंगनेति तत्र तासामेव प्राधान्यात्तथोजातौ तरावजमध्ये तदवलात्रं गना तांस्यां प्रगृहीतानि पुच्छानि येषां प्राशाद्यात्सागनिरासः तैर्वलैरिति बहुत्वं एकं सत्त्वान्य

राम
१६

महणादेक देवत्रिचतुःपुच्छग्रहणाद्यास्वस्थानेत्राकृष्यमाणो प्रेक्षंस्यो तएवोक्षितं गृहे तत्र स्वच्छतया यद्वा प्रेक्षणार्थं सर्वत्र जेत्ममणेन गृहमेव यातिस्ताः हसंत्यः अकृतत्वात् यद्वा होवलिष्ठवि
ति पदि हसंत्यः वत्सैरण्याकृष्टत्वात् जहृषुः हृष्याबभूवुः २५ ततश्चाधिकवयःप्रकटनेन क्रीडालोलतया मात्रोरपि मनःप्रेमविह्वलं चक्रतुरित्याह शृंगेति यत्र यदा क्रीडापरावतः शृंग्यादीन्दध
र्तुमनिसरंत्यौ शृंग्यादिभिर्वा क्रीडापरौ तदा ते त्यौ निषेद्धुं न शेकाते इति प्रकृतिभावाभावश्चार्षः पतीतिच्च पल्लौ स्वसुतावितिस्वपदेन सदानिषेधतोड ना दाचन्याया योग्यता तज्जन्मतस्तदी
यतया मतस्य गृहस्य कृत्यं चावस्यकमपि कर्तुं न शेकाते अतएव मनसो नवस्थामस्थिरतामलभापतुः एतच्चात्र जननानां तेषां तदर्थकर्मणा चित्तास्थैर्यमपि तत्र नमवादि दुर्लभवात्सल्यास्वभा
वपोषकत्वाच्चत्सुमाधिनिष्ठा तो प्युत्कर्षतो भजति तच्च तत्र स्तनसुत्यादौ तावद्भागादयस्तेनाद्व्यादिकैमुख्यापादकं वच नैर्व्यक्तं अत्र श्रीरामकृष्णयोरन्योन्यासक्त्या शोभा तनरो[?] वेशं पायने
नोक्तः तावन्योन्यं ततो बाल्यौ बाल्यादेवैकतां गतौ एकवेषधरौ कांता वेकशय्यासना[?]शनौ अन्योन्यकिरणाग्रस्तौ चंद्रसूर्यौ विवांबरे रेजतुःपंकदिग्धांगो दृष्टौ कलभकाविव क्वचिद्
सम्प्रति श्यांगो करीषप्रोक्षितौ क्वचित् तौ तत्र पदि धावेतां कुमाराविव पावकौ क्वचिज्जानुभिः दुष्टैः सर्पमाणौ विरेजतुः क्रीडंतौ वत्सशालासु शकृद्दिग्धांगमूर्धजौ तौ तत्र कोल्हहत्तिनोमू
र्धजव्याकुलेक्षणौ रेजतुश्चं[?]द्रवदनौ दारकौ सुकुमारकाविवित्यादि २६ एवमुक्तोट्या युगपदीव वर्णयितुमिच्छुः रिंगणपादव्रज्ययोरादिमादिमभागं वर्णइत्याति मभागं वर्णयति तत्रकालेने
तिरिंगणं तिमभागः अघद्यानि कृघर्षेण मप्रापितानि जानूनि येषु ओजसा जसेति पाठो हे राजन्सुरस्रुषे सर्वस्तेति तल्लीलामाधुरीमद्दिधवत् स्वयाप्यनुभूयते इति भावः २७ एवं साधारण्येन
द्वयोर्लीलामुक्त्वा श्रीकृष्णस्य प्राधान्यं वदन् पादव्रज्यांतिम भागमाह तत्तइति भगवानिति भगवत्तासारमाधुरीप्रकटनपरः रामाद्याकर्षकः कृष्णस्तु सहरामः रमणसाहाय्याद् अत्रे वनिरुक्तिप
र्याप्तिरिति भावः वयस्यैरिति प्रणयविशेषः योगव्यासमवयस्त्वं रूढ्या गुणशील व्यवसायवेषसाम्यं २८ अथ कौतुकविशेषाय गोप्यो मिथः संमत्य श्रीरयशोदागृहे गत्वा चुक्रुशुरिवेत्याह
कृष्णस्येति रुचिरमिति प्रेमकौतुकायेवोच्चुरितिताः शृंग्यादीभ्यः वहितत्वं नुमार्षः यद्वा नित्यं स्वस्थ ण्वत्याश्रपि हस्फुटमूच्चुः किल चुक्रुशुरिव चौर्यादिकृष्णचापल्यं मधुरं तन्मुखोदितं इ
ति श्रीमुनिनापीदं गोपीद्वारैव वर्ण्यते १२९ तत्र प्रथमोपद्रवमाहुः वत्सान्मुचन्निति बहुत्वं वैष्यग्रविशेषाय ननु चारणाय स्तनपायनाय वा खलु स्यात् को नु दोषस्तत्राहुः असमयेअ
दोहनादिकाले नच ज्ञानतः खल्विदं कथमनुक्रोशाथ प्रतिमृहं सत्येवबन्हवो लोकारुधीरनूतत्राहुः क्वचिदिति कृत्संतरव्यग्रतया कोपि रोद्धुं न शक्नुयात् तदेवेत्यर्थः तर्हि कथं न भीषय
ध्वे तत्राहुः क्रोशे भीषणोद्यते सतीसंजातहासः न बिभेति हसित्वा क्रोधमेवापनयतीति भावः वत्तेदमस्त्यं न मन्यकिमर्थं वत्सान्मुंचेत्तत्राह सत्यः स्वानुकरणमाहुः दधिपयोतीति तदर्थं गृहज्ञना
न्यूनयितुं मुंचतीत्यर्थः अहोकठिनास्तहि पूर्वमेव कथं न दत्थ तत्र सस्मितं शानैरिवाहुः स्तेयमेवातिनदत्तं अपिकावोहानिरितस्ततः पतितभांडस्थाल्यंगारसादनेतत्राहुः पर्याद्यर्थं स्थापितं स्वा
दुवातितदप्यपकास्तैरिति अहोचतुराणां वो गोरसमशिक्षितं चातुर्यमभारयेदिति न संभावयामस्तत्राहुः कल्पितैरेरदृढः श्रुतैः स्वेनैव रचितैस्तेयोपायैः अयेयुष्मत्पित्रादीनां भाग्यमिदं यल्ल
पणानामदत्तमपि भुंक्ते तत्कथं नानुमोदध्वे तत्राहुः अहो भोक्ष्यन् तत्सर्वमेवमर्कान्प्रति विभज्य ददाति किंच तेषां फल्लादिलब्धाना मे कोपि नाति तर्हि स्वयमपि नात्ति भांडं चात्तिनत्ति यद्वा सश्रीकृष्ण
स्त्वया बहुभोजितत्वात्स्वयंनात्ति चेत्तर्हि भांडं भिनत्ति तद्दोषमस्मास्वारोपयतीति भावः ननु कथमेवं ज्ञाते पि भांडानि न गोपयथ तत्स्माद्धुयमेवमम बालकं तथा क्रीडयेत्यश्च पलीकृतवत्य
स्तत्राहुः द्रव्यस्याभाले सङ्गृहाय यक्ष्यामीत्येवं यद्वा सग्रहाग्रहस्थाते भ्यः कुपितः तोकान्नूतोकानिरोदइत्वा याति पलायते तोकानिराधादीनि तद्भ्रघुम्नात्रादीनि च तत्तैयानि ३० अहो
किमिदमपूर्वं वदथ स्तेययोगानपि तु शृणु वामतत्राहुः हस्तागेति विधिं हस्तग्राह्योपायं आद्यशब्देन पीठे पीठनिषण्णनालकगत्ते इतिकर्णोमतो तस्कं धारोहादि ततोपि दूरे रक्षितं च तुग
शिक्यस्थभांडेषु अंतर्निहिते दध्यादौ भांडत्वक्षणे रेवनयुनं ज्ञानं यस्य सत्वकुडादिनाछिद्रं रचयति नच भांडं स्फोटयति यतस्तद्वितछिद्रं रचनीतस्या भीष्ट संपादकता युक्तिं च रा
वेत्तीति यद्वा न च मंतव्यममायं बालको द्यापि मुग्ध एवेति यतो तरवनिर्हतंस

ती·टू·द·
१६

१६
कृष्ण

कृत्य धृतं ज्ञानं येन स इत्यादियोज्यं तर्हि तमसि रक्षितं तत्राह ध्वांतेति तत्र स्वांगमेवार्थप्रदीपं रचयति तत्रापि तवायमुपकारो यद्धृतमणिगणत्वं संपादयसि मणिगणानस्मच्छ्रेत्तमःशेषेण शिष्येनापि किंचि
दतो नायमलंकरणीयः धृतान्धैर्यरत्नोपि गोरसचोर इत्युपहसंतिच यदि सत्यं तर्हि तथैव गृहीत्वा कुतो नानीयते तत्राह कालेति यदानयनं न संभवेत्तत्र काले इत्यर्थः कोसौ कालस्तत्राह यर्हीति एवं
गूढद्रव्य ज्ञाने दुर्गगमनच्छिद्रकरणा दिसकलचोरगुणे र्महाचोरतोक्ता ३१ अथ तस्या तिर्यग्दृष्ट्या संक्षेपयंत्यः किमपिहास्याथाहुः एवमित्यर्धेन एवं स्तेयोपायैः विरचितकृतिः कृतकृत्यः सन् चो
र इत्याकुष्टश्चेत्यमेव चोरस्वस्थिता चोरो हं तु गृहस्वामीत्यादि धाष्टर्यान्युपाति जल्पेति यद्वात्रासामुत्तरीयाकर्षादीनि स्वगृहीणी तुल्यानि देशादीनि च धाष्टर्यानि कुरुते उशतीति स्वर्चिते वास्तोग्गृहे महनादीनि पु
रीषोत्सर्गादीनि च कुरुते आगम्यतेति भावः त्वत्समीपे तु स्वप्रतीकः साधुरिवास्ते ततो मातुः स्नेहहर्षमाह इत्थमिति तासांसनर्मप्रेमाक्रोशफलमाह सन्नयेति इत्थं व्याख्यातः अर्थस्तदर्थनीयं प्रागल्भ्यं
यस्याः सा अत्र तत्र त्वंतो तुकादिना प्रहसितं प्रारब्धहासं मुखं यस्याः सा हि एवं नैवेत्यर्थः उपालब्धुमिच्छामपि नाकरोत् किंतु वत्से इदृशीत्वं व्यवहारं कथं करोषीति सल्लालनमुवाचेति भावः ३३ दमेवं निश्चित्य ताभिरा
क्रोशनेकृतयथा मातृ शैथिल्यमनु कृत्याधिकमस्मादूहे चापल्यं विधास्यत्ययमिति जगज्जनु[illegible]मृतिध्वंसी श्रवणस्मृतिकीर्तनाः मत्तमत्तादिरहिता स्मृता ईश्वरविग्रहाइत्यर्थक पुराणांतरात् स्वकृत्सम
श्रुरोमनखके शापिनद्धमित्यादि श्रीरुक्मिणीसिद्धांताच्च नमेहनादि संभवस्तथापि बाललीलासंपत्त्यर्थं तच्चैवदर्शितमितिज्ञेयं ३२ कदाचिद् परांतर्धांतरे उपालभततदातुमहदाश्चर्यमाह दितिवक्तुं तस्य
र्वाकाममपि लीला मनुष्यस्याह एकदेति गोपायंति रक्षंति दीत्या श्रीकृष्णमिति गोपास्ते च ते दारकाश्च ३३ पलायनाशंकयाकरे पुत्रमिति पाठः तेन तस्यात्र योग्यता उपालब्धनिर्भत्स्य ताहृगपराधेता
उनमप्याशंक्य तयेनचपलत्वेनेरीक्षणे अक्षिणी यस्य ते अतो भाषतैव न तु ताडितवती ३४ अदांतालभत्न चपलेगात्र रहएका ते इति रामादि समक्षं भक्षणाशंकेः हि हेतौ तावका इति मिथ्यारोपाभावः एते इति
अपलापासंभवः ननु मातर्नर्भणो वेते वदंतितत्राह नवाग्रजोपीइति अयमिति त्वत्समक्षं नात्र संशयः अग्रजइतिवस्तुदेव नंदयोर्लालितत्वान्नंदेन पुत्रत्वेन पालितत्वाच्च तथा व्यवहारात् ३५ नाहमि
ति बालके लोभिथ्योक्तिर्नदोषः प्रत्युत श्रुकादि साधुगणानंदकत्वाद्गुणः अंबेति ताडनशंकयास्नेहं वर्धयति सर्वेपि मदग्रजोपि नेतभुविशिष्टः किंतु तत्समक्ष एव मुखं पश्यति समग्रलक्षणन तच्चिह्नाभावमनना
त ३६ स श्रीकृष्णमाख्या भगवान्हरिरत एव न व्याहतैस्य च मणिमाद्यैरैश्वर्ययेन किंतु नाहतं सत् पश्यनिकदेशस्थित्वास्वोचितावसरं प्रतीक्षतेकदाचिद्भवंतेच सइत्यर्थः लीलया मनुष्यबालसदृशः यद्वा
क्रीडामनुजा लीला मनुष्या न तु कर्मवशा मायामनुष्या नंदाद्यास्तेषां बालकः बाल्यलीलारसाविष्टो व्यादेहीत्युक्तिमात्रतः मुखाब्जं विकचेद प्रेमातृकोपाभयं मोदयत एतदवसरे तभालिंग्य स्थिता तदैश्व
र्यशक्तिरेव किं स्वप्न इत्यादिशंकोत्सादनद्वारा मातृकोपापनोदनाय सर्वमंतरे वास्तिन बाह्यं किंचिद्भक्षितमिति तद्वचः सत्यापनाय विस्मयद्वारा मातृप्रेमपोषाय च विश्वं दर्शितवतीति ज्ञेयं ३७ सेति युग्मकं तत्र
भगवति तज्जठरांतर्विश्वं ददर्श तद्विवृणोति जगत् जंगमं स्थास्नु स्थावरं खं भुवं लोकं पर्वतद्वीपसमुद्रयुतं भूर्लोकं वायुः प्रवहाख्यः अग्निर्वैद्युतः इंदुतारकाश्च तद्युतं ज्योतिश्चक्रं स्वर्लोकं नभस्वान् गु
णास्त्रय इत्यत्र द्वितीयार्थे प्रथमा वियदेव च वियदपि दद्दर्श स्थूलानीति कानां का वार्ता चादहंकारादिवैकारिकाणि देवाः इंद्रियाणि राजसानि मात्राः शब्दाद्याः तामसाः ३८ तस्मिन् विदारितास्ये सति तस्य
तनावेतद्विचित्रं विश्वं जीवश्च गुणः क्षोभकः कालः परिणामहेतुः स्वभावो जन्महेतुः कर्माशयः तत्संस्कारश्चैते हेतुभिः लिंगानां शरीराणां भेदो यस्मिन् तत्सह एकदेववीक्ष्य तत्र च व्रजं सहात्मानं आत्म
त्वां श्रीकृष्णमयशोदाभ्यां सहितं वीक्ष्य विविधां शंकामकरोत् ४० तामाह किमिति एतद्दर्शनं परितो विलोक्याह नायं स्वप्नः तर्हि किं देवस्य कस्यचिन्माया तथा चेदन्येपि पश्येयुः तर्हि किं वा मदीय एव को
पि बुद्धिमोहोविपर्यासः दर्पणे मुखवत् नैवमपि यतः वृहेमाप्यंतर्दृश्यते अंतर्बहिश्चैकमेव रूपं दृश्यते नबिंबवेपरीत्ये नेत्याशंक्यान्यथा तर्कयति अथोइति अथवा ममामुष्यार्भकस्यापि सतो यः
कश्चन चिंत्यआत्मयोगः स्वीयमैश्वर्यं औत्पत्तिकः स्वाभाविकः ४१ तस्य क्षात्यिपासादिति अथ परमपक्षमप्यसंभाव्य तर्कतरैरपि निश्चयमप्राप्य सर्वतत्प्रतिभासहेतुं नारायणं तं च दुर्ज्ञेयमत्वा प्रण
मति अथोइति चेतः चित्तं कर्मइद्रियंइच्छाहश्च एतैस्तर्का गोचरो जगद्यदाश्रयं यदधिष्ठानं येनेंद्रियप्रवर्तकेन यतो बुद्धिवृत्त्यभिव्यक्तान्नारायणादंजसा साक्षात्प्रतीयेत तस्य पदं प्रपन्नास्मि प्रणतास्मि सदु
र्विभाव्यं अतर्क्यं जगद्धेतुत्वादचिंत्यशक्तिकमित्यर्थः ४२ अथ बाल्यमनुसंधाय निजां पूर्वामवस्थितिमेवद्रढयन्नाह अहमिति पादत्रयेण अस्य व्रजेश्वरस्याखिलवित्तपा अधिष्ठात्री सती जाया
इहां गोगोपाद या मेमदीयाः पुनरंतरमनुसंधाय भीता नारायणं शरणं गच्छति एवं स्वाभाविकेर्थे सत्यपि इत्थं मदीय बालके नानाश्चर्य दर्शन हेतुः कुमतिर्यस्य मायया स नारायण एव मम भक्ति
विमुखायाः शरणमिति प्राय स्तत्कृत्विचिव्यक्त्यपराधेनैव मम स्वाभाविक पूर्वोक्त सर्वविद्यो यमापन्नः स्यादिति भावः ४३ तदेवं तन्निष्ठामेव दृष्ट्वा सोपि परमतुष्टस्तद्वेद्यदृष्ट्वाव्यग्रश्च सन्

तं नावमेव तस्यां पुपोषेत्याह इत्थमिति इत्थं ममासावित्यादिरूपेण विदितं निश्चितं तत्त्वं पादत्रयोक्तं श्रीकृष्णलीलाय आर्थ्येयया तस्यां गोपिकायां मार्तं तया तस्याल इत्यां समेगतिरिति प्रार्थितइश्वरो मायां तद्विष
यां दयामेव व्यतनोत् पूर्वाधिकां विस्तारितवान् यया पुनस्तद्विरोधी दर्शनादि नेवाभूदिति तां विशिनष्टि पुत्रेति पूर्वाधिकपुत्रस्नेहसंपादिकां इरनिष्ठां दयादयो जीववत्सकृति परिणामाने स्यात्राशयेनाह वैष्णवी
वीमिति विष्णोः स्वरूपशक्तिं ४४ ततो नष्टास्मृतिरां तत्र जगदनुसंधानं यस्याः आरोहमंकं आत्मजमिति तज्ञावानुवादः स्नेहेन कलिलं व्याप्तं नष्टस्मृतिस्त्वेदृढयति यथापुरेति ४५ अहो भाग्यवतीयशोदेत्याह त्रय्येति
कर्मकांडरूपयेंद्रादिरूपेण उपनिषद्भिर्ब्रह्मत्वेन पुरुषतया सांख्यैः परमात्मतया योगैः भगवत्त्वप्रतिपादकैः सात्वतैरागमैश्च उपहीनेयत्किंचित् ज्ञायमानं महात्म्यं यस्य तं हरिमात्मजमनन्यत पुत्रभावेन साक्षात्तथात्वालिताव
ती अहो भाग्यमहो भाग्यमिति अत्रेदं विभावनीयं न तावदस्या विश्वदर्शनं श्रीकृष्णस्येश्वरत्वज्ञानहेतुः चतुर्थवितर्कपक्षे ममानेकस्येत्युक्तत्वात् इश्वरस्य यत्तच्छब्दाभ्यां परोक्षनिर्देशात् अन्यथा देवकीवदसौ तमे
वास्तोष्यत् न चेश्वरज्ञानयुक्तमेपुत्रादिभावेन श्रीकृष्णानुभवो पवृष्ट इति प्रकरणार्थः संभवति उत्तरग्रंथविरोधात् उत्तरत्रहि इश्वरज्ञानमस्फुरत्वात्तस्या स्तत्ज्ञानावरणं चानुज्ञोच्य स्तनपानादिकमेव राज्ञा स्तोष्यते
वसुदेवदेवक्योश्च सत्यपि तत्ज्ञाने तद्बाल्यलीलानुभवाभावेन शोचिष्यते कवीनामपि श्रीशुकव्यासादीनामानेकलीलागानमात्रे भाग्यं वक्ष्यते उत्तराध्याये दामबंधनाद्युक्ता नेमं विरिंचिः इत्यादिनेश्वरत्वज्ञानहीनायाः
श्रीयशोदाया बालनवादितोपि भाग्यातिशयवर्णनाच्च किंच राजन्यतिर्गुरुत्वमित्यादो इत्थं सतां ब्रह्मसुखानुभूत्या यस्मिन्नत्र परमानंदमित्यादौ चेदृशाभावस्यैव सर्वतोप्यत्कर्षः श्रूयते तस्माद्दर्शितएवार्थः साधीयानिस्य
ले ४६ तद्भाग्यातिरेण विस्मितस्तयोर्भाग्यहेतुं पृच्छति नंद इति किंकृतमत् एवमीदृशो महानुदयः स्नेहोत्कर्षो यतस्तत् महाभागेति नंदादितोपि स्नेहाधिक्यमभिप्रेति तदाह पपाविति पीतशेषं गदाभृत इत्युक्तत्वात्वत्सबालरूपेणा
न्यासां च स्तनपानेपि देवक्यां मैश्वर्यज्ञानसत्वात् स्त्रोढेव यस्यैक द्विवारं जातत्वाच्च गो गोपीषु तु रूपांतरत्वेन च तादृक्स्नेहाभावाच्चेदृक् भाग्यमिति भावः ४७ किंच पितराविति पितृत्वेन स्यातौ तोलत्व्यवरावपि श्रीकृष्णस्योप
रं काहैं चित्तस्म न भक्तियोगमित्युक्तत्वात् अतिदुर्लभं भक्तियोगस्यापि दातृत्वात् आर्भके हिते अनुपश्चादपि नत्वव्यवं तो मथुरायां बाल्यभावसंवरणात् किं वाच्यं तल्लीलानुभवमहात्म्यं सर्वगुरुत्वोपि यत्कृतेना पिकृतार्थमन्याः परः
परार्द्धकालं गमयंतीत्याह यच्चकवयो ब्रह्मादयः पूर्वपरार्धादिमारभ्याद्यापि गायंति यदद्यापि कलिकालेपि लोकेक देशे गीयमानमपि सर्वेषां लोकानां शामलं भपहंती मद्भक्तियुक्तो भुवनं पुनाति पूयेयत्यंघ्रिरेणुभिरि
त्युक्तेः यद्वा कवय आत्मारामसिरोमणयो भवादृशाः अस्यादिगीतमप्यद्यापि आनंदभरेण यत्र कुत्राप्यकस्मात् इव गायतएववर्तते नतु कथयंतिमात्रं यस्माद्दशादीन लोकस्य शामलं तदंतरायं हंति तद्योयाच्चाविंदत्सच
साच किं श्रेयोकरोदिति पूर्वेणान्वयः ४८ आग्निमाध्याये मुख्यसिद्धांतो वक्ष्यते प्रथमंतावत्किमकरोदिति साधनप्रश्नमनुसृत्य लोकीकरीत्यासिद्धांतं यावदेतदध्यायं वर्णयन् द्रोणादि[illegible] तदंशाभेदेन पूर्ववृत्तमाह द्रोण
इति त्रिभिः आदेशात् मथुरामंडलवासगोपालनवसुदेवसख्यादीन् ४९ सुविज्ञातयोर्मनोहरे भगवति अतो विश्वेश्वरेपि महादेवे परमक्रीडापरे प्रेमलक्षणा भक्तिः स्यात् प्रार्थनायां लिङ् परमेति पुत्रभावमयवा
त्सल्यारव्यस्वाभिप्रेतं विशेषं बोधयति केवलपुत्रत्वप्रार्थने तु कामनांतः पातित्स्यादिति प्रेमप्राधान्येन प्रार्थितं वरांतरमानाहृत्य भक्त्यर्थनेन पूर्वमविभक्तिसत्वं गम्यते प्रार्थनाप्रेम्णा भक्तिस्वभावत्वात् ध्रुवस्य वकु
वेरेएवं नरसुदेवादप्युत्कर्षः इयं चार्थना नकामित्वं नवस्वात्ममात्रफलिके त्याह ययासत्कृत्त्या दृष्टयासस्याकीर्तनादिना चाः न्यापि लोको दुर्गतिं तरेत् अंजइतिपाठे लोके प्रसिद्धया यया न्योपीति शेषः ५० सभगवा
नस्मएवेहेति पाठो सएवत्यभेदविवक्षया ५१ ततस्तयोर्भक्तिवशाद्दन्यस्या पुत्रेपि पुत्रतां प्राप्ते जनेभक्तो रक्षमानेयाच्यमानमात्रेन तुल्यस्य भगवति श्रीकृष्णे भक्तिः पूर्वतोपि नितरामासीत् तथा गोपगोपीष्वपि
श्रीकृष्णविषया भक्तिः नितरामासीत् तेषामपि किंचित्कालं पुत्रीभूतत्वात् गोपगोपीत्यत्र पुमान् स्त्रीयेत्येकशेषाकरणं स्पष्टप्रतिपत्त्यर्थं गावश्च पास्तत्याल्लागोप्यश्चेति वाहं द्वौ भाति ५२ प्रस्तुतसिद्धांतमुपसंहर
ति कृष्ण इति विभुरपि तत्तद्वरं सत्यं कर्तुं ब्रह्मणासामान्येनादिष्टमपि तयोरति प्रेतमिष्टमित्थमेवस्यादिति व्रजे पुत्रतया प्रकटीभूयवसन् निजलीलायां तेषां तयोर्गोप्यादीनां च प्रीतिविशेषं चक्रे स्वेषु नंदादिभक्ते
षु तीर्था या पुत्रभावादि बाल्यलीलया तपैवते षां प्रीतिं कर्तुं व्रजेवसन् ब्रह्मणोवरं सत्यं चक्रे विप्रावेदविदो युक्ता इति ब्रह्मणो महिमानमदर्शयदिति मुख्यसिद्धांतानुसार्यर्थः ५३ इतिश्रीमद्भागवतदशमस्कंधमध्यग
समाप्नोदष्टमाध्यायस्तोषिणी सारसंग्रहे १ इति भागवतेष्टमोध्यायः ८ अथ नवमे यथाभक्तिमतामिहेति भक्त्येकप्राप्यत्वं मुख्यसिद्धांतं वकुचौर्यादिलीलां बहुतरप्रपंचेन वर्णनीयामपि समाप्य तदुपयोगिनी दा
मबंधनलीलोच्यते भक्त्येकमोहनं ब्रह्मनपुत्रीस्यात् तपोध्वरैः नापि ब्रह्मवरैः गोपीगवादीनां वरः कुतु १ एकदेति तृतीयवर्षारंभे कार्तिकेमासि यशोदेति दामोदरत्वेन भगवतः प्रेमवश्यत्वं यशोभर्धनात् नं
देति तस्यापि महात्म्यवर्धिनी सर्वास्वेव दासीषु कर्मांतरे नैमित्तिके योगे नियुक्तासु बहुदधीषु कं दधिनिःतन्निष्ठतया ममंथ तच्चारभ्यया गेनेवेद्याय पुत्रप्रातराशाय च कर्मांतरं चेंद्रयागएव नूनं सर्वासामेवानि
युक्तत्वात् गोपानामपि तत्तेतागतत्वात् कोतुकप्रतिपदि इंद्रयागस्य वक्ष्यमाणत्वात् दामोदरस्य कार्तीककमासोपास्यत्वाच्च १ इहतव सभायां मया गीतानि यानि यानि बाल्यचरितानि कविभिः स्वयं वा तत्क्षणे

रचितानि स्मरंती मंथनवती कालेगानावसरे अगायत चेति मंथनसमुच्चयश्चार्थः २ सौंदर्येण वात्सल्येन च तन्मातृत्वयोग्यतां दर्शयितुं तां वर्णयति क्षौममिति सचित्रं अतसीतंतुस्थं वाल्कं क्षौमा
वितिकोशात् वाल्कत्वं मंथने शुचित्वाय सूत्रेण कांच्या नद्धं वासो बिभ्रतीति नेषसौंदर्यं स्नुतकुचयुगं बिभ्रतीति स्नेहः कुचकंपो मंथनात् पुत्रचरितगानाद्देहजातं कंपं बिभ्रतीति वा सूक्ष्मरिस्यंगसौंद
र्यपल्लक्षणं अस्याः स्ववर्णवर्णत्वं गौतमीयेऽशामत्वं क्रमदीपिकायां चेच्छ्यसौंदर्यमाह रज्ज्विति रज्ज्वोराकर्षणे न श्रमो ययोस्तयोर्भुजयोश्चलंतौ कंकणौ चलंती कुंडले च सस्वेदं मुखं च बिभ्रती केश
वेशाच्चिगलंत्यो मालत्यो यस्याः कब्भावः समासांतानित्यत्वात् क्षौमादि पंच बिभ्रतीति पदच्छेदेन व्याख्या तु निःसारा जातकं स्फुरं यस्मिन् कर्मणि यथा तथेत्यादि केशावहा चे स्पृपेक्ष्या भाति ३
तत्र ममयक्षुधा स्तन्यकामः तां तादृक् स्नेहमूर्तिं जननीमिति भगवतो भावानुवादः अन्यथा गोपिकामिति वदेत् प्रीतिमिति स्तनपानयाचनात् मंथग्रहान्निषेधयंत्या लुपेंत्रा ध्यातदुःस्था यतीति ज्ञेयं रामा
द्यसंगित्वात् ४ साश्मितं पयसः स्वयं स्नुतत्वात् मधुरत्वाच्च स्मितेन गंडयोर्लक्ष्येण पुत्रमुखमीक्षमाणा अतृप्तमपि स्तनौ पाययंत्येव किं न गता तत्राह जवेनेति तथात्वे वेगासिद्धेः वेगहेतुः व्युत्थाने
पिते पयसि तापेनोच्छिद्यमाने तस्य योपि दधिवन्नैवेद्याद्यर्थमर्थं मन्नस्तेयं अन्यथा यन्मामार्थे स्यादुक्तिस्वरसाविरोधेन पयोर्थं भगवत्त्यागानौचित्यापातात् ततश्च क्षणिकत्यागोपियुक्तः पित्रोः पुत्रापातदुः
खं सोऽप्युदर्कसुखहेतोः स्तनपानौषधपानादिदृष्टादृष्टकर्मणि प्रवृत्तेः प्रसिद्धत्वात् अतस्तत्पूर्तिस्त्यागेन गमनमपि परमस्नेहव्यंजकं स्वसंपत्त्यर्थं स्वदुःखसहनस्य स्वात्मप्रेमानुमापकत्ववत् ५
जातकोपेत्यादिना मातृभावितं तत्तद्भावमयबाललीलामाधुर्यं अन्यथा भगवति कोपाद्यसंभवात् ओष्ठस्फुरणादिचेष्टानां केनाप्यदृष्टेः रहस्यैव कृतत्वात्तात्त्विकत्वमवदर्शितं सबाष्प्य
र्थं बालस्वभावकृतमेवाश्रु यस्य यद्वाऽश्रमेषाश्रुः न चान्यदा इव कैतवाश्रुः अतृप्तत्वादिति मुनिर्विनोदात् स्वस्य साक्षितामाह दृषदश्मना शिलापुत्रेणेति निःशब्दभेदार्थं अंतरमंतर्गृहं
गतो रहसि एकांते हैयंगवीनं सद्योनवनीतमभक्षयत् तच्च प्रथममथितादुद्धृत्य स्थापितमिति नैकदधिमंथेत्यनेन विरोधः ६ सशंकं तत्फलं मंथनस्थाने प्रविश्य भिन्नं सहस्य दृष्ट्वा तस्य कोपसंभाव
नया तं गच्चात्सांच्च स्फुतस्यवतत्कर्मेति विलोक्य निश्चित्य तमपश्यंती चापल्यभीत्यपसरणे जहास ७ बिडालादिप्रयपणभयाद्विवर्त्यस्थापितोलूखलमस्तकोपरि स्वस्तिकासनेनोपविष्टं इ
दानीं मथित्वा शिक्ये स्थापितं यत्तदेव चौर्येण शंकिते च पलपश्चात्स्कृतप्लुतः ८ पाककर्माप्यप्रेक्षिग्रहणदर्शनात् स्वताडनासंभावाच्च तन्निग्रहार्थं प्रसमीक्ष्य अपससार यमलार्जुनसंनि
हितपुरोद्वारं प्रति भीतवन्मातृस्नेहस्थानेन तत्त्वतो भयाभावात् सा तु तद्दिने पुरोद्वारं निर्जनं ज्ञात्वान्वधावदेवेत्याह गोपीति योगः समाधिः स्तद्धता मनः साकारनिराकारब्रह्मणीनिलीनं भवितुं क्षण
मपि तपसैकाग्र्येण प्रेरितमपि यं श्रीरूढं नास्पृशदपि तं अनुप्राप्यमानमिवाधावत् अस्त्वस्याः सततं अंकशयनादिसौभाग्यं पलायनकालिकसौभाग्यमपि तु योगीमनसाप्यगम्यमिति भावः ९
अन्वंचमाना अनुगच्छंती बृहच्चलच्छ्रोण्याः तरेणाक्रांत्या ताः स्तब्धा गतिर्यस्याः सा विस्रंसिता केशबंधनात् च्युतैः प्रसूनैरनुगतिर्यस्याः एवं रूपापि स्नेहजवेन परामृष्टत् पृष्ठतो धावती यतो जननी १०
कृतागसमतस्ताडनाभावाय प्रोच्चैरुदंतं अंजंतीं सर्वतः प्रसरंती मषीययोस्ते अक्षिणी पाणिना कषंतं मर्दयंतमिति बालरोदनजातिः पश्चाश्रुनिगमाय मार्जनाय वा तथा तमुद्वीक्षमाणापि पुनस्ताडन
चापल्याभावाय स्वप्रकृतित्वाय च भावयंत्यवागुरत् अभर्त्सयत् इतः प्रभृति नवनीतादिकं किंचिन्न दास्ये गृहांतर्बध्वा धास्ये यथा कुत्रापि गत्वा क्रीडितुं न शक्नोषि क्रीडनकानि बालकादिभ्यः द्रष्टु
मपि न शक्ष्यसीत्यादिवाक्यैः तथाप्युद्यमनेरीप उद्वीक्ष्यमाणेति सयकारपाठे भयनेत्रेण ताद्वीक्ष्यमाणा सत्त्वात् भयनविकलं कंपमानं हस्ते गृहीत्वाक्षणमवागुरत् इत्यर्थः ११ अर्भकमात्रे
वत्सला किमुत तत्रार्भके तद्वीर्यकोविदा तत्र चापलदुर्वारता ह्यभित्ता बहु मेने छेत् किल निश्चये १२ अहो प्रेमबलं यशोदाया इत्याह नचेति पुत्रकेन बंधनं बहिःपरिवृत्तेन दाम्नांतराव
तस्य स्यात् पूर्वापरभाववतश्च पूर्वतोध्वत्वा परितोवष्टनेन स्यात् सत्त्वेदं तत्त्वीत्याह नचांतरिति व्यापकत्वाद्बहिर्नास्ति अतस्तत्प्रतियोग्यांतरं न एवं पूर्वापरे अपि किंच व्यापकेन व्याप्य
स्य बंधः स्यात्तच्च विपरीतमित्याह पूर्वमित्यादि किंच स्वेन स्वस्य बंधासंभव इत्याह जगच्च इति नहि वह्निमर्चिषो दहंति सर्वत्र न अतत्तद्भावदार्ढ्याय अत एव चकारावपि शब्दश्च १३ त
मेव बंधनरूपांतरमित्यर्थः यत्तदोरैकार्थ्यात् यथा प्रकृतबालं तथैव तर्हि कथं बबंध तत्राह मर्त्यलिंगं मनुष्यबालाकारं तर्हि किं बंधनं चांतरित्यादि तत्राह अधोक्षजं इंद्रियज्ञानातीतरूपं
यतो न केनापि व्यज्यत इत्यव्यक्तं अचिंत्यस्वरूपमित्यर्थः अचिंत्याः खलु ये भावा न तांस्तर्केण योजयेत् इति भारतात् श्रुतेस्तु शब्दमूलत्वादिति न्यायात् महांतमहं महांतं विभुमविभुं त्व

लनमज्वलतं सर्वतो मुखमसर्वतो मुखमिति नृसिंहतापिनीश्रुतेः पश्य मे योगमैश्वरमित्यादि गीताभ्यश्चाचिन्त्यानंतशक्तिमयत्वात् घटत एव युगपद्विभुत्वादिकं बालकाकारत्वादिकं चेति भावः अत
एव मात्रं केऽस्थितस्य मुखं वा तर्वि विश्वदर्शनं तर्हि कथं तद्विभुत्वं तस्यां नास्फुरत्तत्राह आत्मजं मत्वा वात्सल्ये न तदाच्छादनात् बंधनं नयेन त्वमनाशंकया तच्चोदरे दाम्ना चैवोदरे बध्वा प्रसवबंधदूलूखल इति हरि
ने शाकेः उलूखलं चेदं पुरोहार पतितमन्यदेवेति ज्ञेयं १४ स्वशापेनलता गस इत्यनेन च बंधनयोग्यताऽपेक्षा नोचितस्यात् द्व्यंगुलोनमिति प्रथमायां रज्वा देवाद् द्व्यंगुलन्यूनत्वादुत्तरासां च बाल्योचित हृदवेत्ता
दर्शनेन तद्विभुताशत्त्या तथैव रक्षणात् किंचिल्लिप्तोपि प्रेमणि वैय्यग्र्यविशेषतदसन्नमल्लपाविशेषात्यां द्वाभ्यामुनत्वे महत्त्वीकरणं न स्यादिति सूचयितुं अत एव दृष्ट्वा परिश्रमं स्वस्त्रमः कृपयासीत्स्वबंधने इ
ति वक्ष्यते अन्यदामसंधानं च मातापुत्रयोर्वृत्तेने रोदने श्रुत्वा गताभिः प्रतिवेशिनीभिः परिहासेन तदर्पणात् १५ यदित्यस्यान्यदित्यनेन पूर्वेणान्वयः य[illegible]द्यस्मादिति वा यद्यदाददत्ततदपि द्व्यंगुलन्यूनमिति
पूर्वान्वयः १६ स्मयंतीनामित्यनादरे षष्ठी कोयं निर्बंधः कथं वा बंधनाप्राप्तिरिति ताः स्मितमनाहस्याभिनिविशेन [illegible] दामानि संधत्यपि आनवत् तद्दिने रोहिणी निमंत्रणायोपनंदादिगृहे निमंत्रिताऽगतास्यादत्य
धानि वारयिष्यंतीति १७ समातुः स्वमातुरिति पाठो मातृदुःखाक्षमतया कृपया दृष्टेपि स्वबंधने आसीत् बालस्वभावज्ञो हठवृत्तः स्यत्का ध्रतायां कृपायां तद्धि कृत्वशक्तो रोदासिन्ये द्विती यथैव रज्वा स्वयमेव ब
द्धोऽभूदन्यास्तु वरिता एवेत्यर्थः १८ ननु सकलकल्याणगुणपूर्णः परमेश्वरो यमिति शिद्धांतविरुद्धं बुभुक्षात् स्यभावः कोपश्चोर्यं भयं पलायनं बल्लाहरणं रोदनमित्यादिकथं वर्ण्यं तदृ्याशंक्याह एवमिति
अंगेति प्रेम्णा हि निश्चये सम्यक् दर्शिता अन्यत्र बंधनपर्यंतं ममता विलासा भावात् स्वतंत्रेण यतः दृढ हमेन स्वयं भगवता तदाह सेश्वरमिदं विश्वं यदधीनं अयं भावः सर्वगुणेषु भक्तानुग्रहो भक्तवश्यता चावश्य
को तदंतरेण गुणांतराणां सुखकराभावेनारोचकत्वा गुणत्वस्यैव हान्यापत्तेः न चान्यैवस्यत्वे ऐश्वर्यहानिः बद्धस्यापि कुबेरपुत्रमोचकत्वादिदर्शनात् तथा चाहं भक्तपराधीनो ह्यस्वतंत्र इव द्विज साधुभिर्ग
स्तहृदयो भक्तैर्भक्तजनप्रिय इत्यादिस्वोक्तेः तत्र भक्तवश्यतादिगुणचक्रवर्तित्वविलसितमिदं इदमेव श्रीकुंतीमपि मुमोह गोप्याददे त्वयीति तदुक्तेरिति दिक् यशोदया न बद्धोयमनंतो दामभिर्गुणैः भक्तवश्यत्वादिगुणैः
अनंतेः स्वैरं बंधिसः । १९ सम्यक्त्वं व्यंजयन् नंदः किमकरोद्ब्रह्मन्निति प्रश्नस्य मुखसिद्धांतमुत्तरं वदन् प्रसादमन्ये भक्ताल्लभंत इदं त्वतीवचित्रमिति सरोमांचमाह नेममित्यादि विरिंच्या भक्तगुरुः ततो वैहमवानोद्दष्टो
 तरुपः श्रीर्नार्यसावक्षोनिवासापि एते विमुक्तिदा अपि भक्तिरूपं प्रसादं लेभिरे एव किंतु गोपीय तत्प्रसादं शापेनापि व कुंशंकनीयं किमपि प्राप इमं विरिंच्या न प्राप न भवः न श्रीरपि प्रापेत्यर्थः यद्वा गोपी यत्प्रापत्
तमिमं ब्रह्मा न भवः श्रीरेते न लेभिरे न लेभिरे इत्यर्थः नञ्त्रयवशेन क्रियाव्यक्तिः एतेन लेभिरे इति न किंतु गोपीयं प्रापत तमिमं न लेभिरे इत्यपि भाति तस्माद्ब्रह्मणो वरेण द्रोणस्य प्राप्तिर्नैसंभवतीति यः स्वयमेवेदमेव प्रार्थ
यत एवं तत्पूरि भाग्यमिह जन्म इत्यादि नेति भावः २० तर्हि कथमस्यास्तादृशी सत्प्राप्तिस्तत्राह नायमिति अयं गोपिकासुतो भगवान् देहीनां देहाभिमानवतां तपआदिभिर्ने सुखापः किंतु महत्संगादि साधनत्रमे
णैव एवं ज्ञानिनां देहातिरिक्तज्ञानवतां आत्मभूतानां तद्विज्ञानवतामपि न सुखापः किंतु तत् भक्तसंगादेव तर्हि केषाऽस्य पेक्षायां तन्निदर्शनव्याजेनाह इहास्मिन्गोपिकासुते भक्तिमतां यथा सुखापः इति ए
तादृशा भक्तिमतामेव तादृशी प्राप्तिर्नान्यथा साधनकोटिभिरपीति भावः अत्र गोपिकासुत इति विशेषणेन गोपिकायाः सुखापः इति किं वाच्यं गोपिकायास्तु सुत एवेति व्यंग्यं ते उपलक्षणं चैतन्नंदादीनां तस्मात् देशप्रे
णाधरयोः पूर्ववन्मुत्तरत्वेन मया क्त तदापातनस्तयोर्लीलामात्रं द्रष्टव्यमिति भावः २१ बद्धस्याप्यैश्वर्यं वक्तुं प्रस्तौति कृष्णस्त्विति गोपी तं बबंध स तु अन्यं मुमोचेति तु शब्दार्थः मातुस्तत्यक्त्वा गमनं तस्यांगणसमी
पस्थत्वात् विशेषतः पीडारोदनादि चेत्कथनीयमिस्कुपदिश्य बालानां रक्षणेऽस्थापनात् उलूखलाकर्षणशक्तिं मत्वागमनाशंकापगमात् यदि शक्तोऽपि गच्छत्वमपि चंचलं वेष्टितेति वेष्टमेवेत दुक्तेः अदृश्चित्व द
दृष्ट्वा विचारितवानित्यर्थः २२ विचारमाह पुरेति २३ * इति श्रीमद्भागवते दशमस्कंधमध्यगः समाप्तानवमोच्यास्त्राविणी सारसंग्रहे ९ इति नवमोध्यायः ९ अथ दशमे यमलार्जुनोन्मूलनं तत्र
स्यदेवाभ्यां श्रीकृष्णस्तुतिं तयोर्वरादिकं चेत्यत्तरलीलां शुश्रूषुर्बद्धस्याप्यव्याहतसार्वज्ञमयीं विचाररूपामांतरलीलां पृच्छति कथ्यतामिति तमोभूतदेवच्छापस्य कारणं कथ्यतां यद्विच्चार्य कृषिकाकृत्सत्या
पन्नाय भगवानगादिति भावः १ रुद्रस्येति युग्मकं कैलासोपवनमध्ये या मंदाकिनी तस्यां तत्स[illegible]मीपे पुष्पिते वने प्रथमं चेरतुः २ वारुणीं क्षीरोदजातां वरुणनिर्मितां वा ३ गंगायामंतर्मध्ये प्रविश्य कथं नु तम
भ्ये अंभोजवनानां राजा यो यत्र स्वव्ययविशेषणत्वात् क्लीबत्वं ४ अपश्यतां क्षीबाणौ मत्तौ समबुध्यत वेवा[illegible]तिन्वान्वयः यदृच्छयागत इति शेषः देवर्षिरिति देवनियंतृत्वं भगवानिति दयालुत्वं अतः शापानुग्रहौ ५
कुत इत्यत आह तमिति नैवेत्येवकारेण देवीनां माग्नहेणापि न पर्यधातां ६ सुरात्मजावपि मदिरा मत्तौ यतः श्रीमदेनांधौ सदसद्दृष्टिहीनाविति शापहेतुः सुरात्मजत्वमनुग्रहहेतुः प्रतिस्वानुग्रहस्य योर्थः
गंति भक्तिः श्रीकृष्णस्पर्शनादिस्तं कर्तुं स्थावरत्वप्रापकं शापं दास्यंनिदं वक्ष्यमाणं जगौ अनः कोपाभावात् गाथारूपेण ऋषेरवोचत् अत्र सामान्यतः शापविषयत्वेदद्दारि वृक्षीभवनं यन्न बालगोपालली
साक्षात्कारादि तत्र तदानीमृषिणा क्रीयमाणस्य तोकेन जीवहरणं यदुलूखलिकाया इत्यादि तल्लीलानां स्वैरागानस्य प्र

वणमेव हेतुर्नैयः ८ श्रीमदांध्यं दृष्ट्वा श्रियं भ्रंशयितुं श्रीमदं निंदति नहीति पंचभिः ज्योष्यान् प्रियान्न्विषयान् सेवमानस्य पुंसः श्रीमदादन्यः सत्कुलविद्यादिजनितो मदः अन्यो वा रजोगुणो हास्यहर्षादिस्तथा बुद्धिभ्रंशकरो नहि
किंतु श्रीमद एवेति तदाह यत्रेति यत्र श्रीमदे कामान्तक्रोधादि ९ इमं जरादिधर्मकं नश्वरं प्रतीक्षणनाशशीलं देहमजरामृत्यु ब्रुवन्निति मन्यमाने ९ नरदेवाख्य देवसंज्ञितमपि तत्कृते तदर्थं यो भूतध्रुक् यतो द्रोहान्निरयः
सकिं स्वार्थ हितं वेद न वेदैवेत्यर्थः १० देहममतापि न घटत इत्याह देह इति निषेक्तुः पितुः मातुः पितुर्माता महस्य वा पुत्रिकाकरणे बलिनो विक्रयार्थं गृह्णतः ११ एवं साधारणं विद्वान् तं भाज्यत्वेन प्रतनाप्ययो यस्यस्यापि
ज्ञानन्को नाम तमात्मेति मत्वा जंतून्हंति असन्तोन्य इति असंतोन्नात्वापि निघ्नंतीत्यर्थः १२ श्रीमदप्रतीकारमाह असत इति परं श्रेष्ठं दारिद्र्यमेव निदानाभावरूपत्वात् यत आत्मौपम्येनेति ततोनद्रक्ष्यतीति भावः १३
दृष्टांतमाह यथेति मुखसक्तोम्यादिलिंगैः सर्वजीवानां सुखदुःखसाम्यगतः प्राप्तः ज्ञानवानिति भावः अविद्धः कंटको यत्रसः १४ दारिद्र्यं मोक्षमपि साधयतीत्याह दारिद्र्य इति चतुर्भिः धनित्वादिगर्वेण स्तंभो नम्रत्वा
भावः स निर्गतो यस्मात् कृच्छ्रमनशनादि यदृच्छयान्नाद्यभावेन स्वभावत एव प्राप्नोति तत्तपः इति गर्वनाशकत्वात् परमिति प्रसिद्धतपोवदर्तिमाना हेतुत्वात् १५ दुष्कर इंद्रियजयोपि स्वत एवेत्याह नित्यमिति भक्ष्यमात्रे
छोः शुष्यंति विषयरसादुपरमंति अतस्तदर्थं हिंसा नेति श्रीमदेव परीत्य १६ ततश्च सत्संगेन कृतार्थतामाह दरिद्रस्येति युज्यंते यत्नं विनैव उ तयोरपि विविक्तसंचारात् सद्भिर्हेतुभिस्तामन्ते विषयकमपि तर्षं तद्दंभा १७
सद्भिर्धनिकानुग्रहार्थं धनिकयोगे यत्नः क्रियतां तत्राह साधूनां सदाचाराणामसद्भिर्धृतासवसेविभिरसदाचारैः किं समचित्तानां धनस्तंभेन गर्वेण विषमदृष्टिभिः किं मुकुंदचरणैषिणामसदाश्रयैर्विषयैर्धिभिः किं
एवं स्वभावविरोधादुपेक्ष्यैरनुग्रहः प्रयोजनं किं स्यान्नैवेत्यर्थः १८ ननु माध्व्या मत्ततासक्षणान्तक्ष्यंतीति तत्राह श्रीमदेति श्रीमदंधपुनः पानानुवृत्त्यास्यादेवेत्यर्थः अजितात्मत्वात्स्त्रैणतासात्तस्यं १९ तमोगुणव्याप्तो
नकेवलं मत्तानेन नग्नो किंतु ममावज्ञाप्यपीत्याह सुदुर्मदाविति अस्यबटोरग्रे नग्नत्वेको दोष इति मदेनेति भावः २० युग्मकं शपति अत इति अतः स्वकर्मदोषादेव अनुग्रहणातिस्यातामिति पादेन द्वाभ्यां एवमी
दृशौ न स्यातां स्मृतिः पूर्वजन्मवृत्तस्य वासुदेवस्य यो मय्यनुग्रहस्तस्मात् तस्य सांनिध्यं लब्ध्वा स्वर्लोकतो देवत्वं पुनर्लब्ध्वालब्धभाक्तीइति भक्तिरसिकानां तद्व्यक्तिर्गिरिकाशीरस्फूर्तेः २२ यादृच्छिकागतत्वं व्यंज
यति गत इति २३ अस्येतिहासस्य भगवत्सुखं तत्वमाह ऋषेरिति ऋषिपदेन वचः सत्यता योग्यता भगवतस्तस्य भागवतमुख्यस्येति पाठो हरिः शापहर्ता रानेरिति शापदे सती मातुरागमनशंकया ततउल्खलपतना
भावश्च एवं रिंगणेनैव गमनं च व्यज्यते यद्विगतांतरगतेनेत्युक्तेः २४ यद्यस्माद्देवर्षिर्मे प्रियतमः तत्तस्मात्तेन महात्मना यद्गीतं तदेव तत्तथा तेनैव तेन प्रकारेण साधनं दास्तजौ साधयिष्यामीत्यर्थः २५ इति विचार्य
तदाज्ञयानुसारेण तीर्यक्त्वे प्राप्तं मात्रपदेन यत्नाभावः २६ तीर्यक्तयात्मानमाकर्षता दाम्नोदरेण उत्कलित उत्पाटितः अंघ्रिबंधो मूलबंधो ययोः नच दामत्रोटनं लीलाशक्त्या दामदार्ढ्यभावात् तद्दाम तस्य
बालस्य प्रभावादभवद्दृढमित्युक्तेः तेनैव यद्विक्रमी तं विक्रमसहस्री कृतं तेनाति वेपोयपुतस्कंधपत्रशाखा ययोस्ताविति तस्यैश्वर्यं परंकेवलं स्वयमवनिः शेषं पततु नत्वन्यस्रतनावदपातयतो बालेनेति
बाल्याच्युतिः दामोदरेणेति माधुर्यं २७ ककुभः प्रतिस्फुरंतौ यद्वातमर्द्दतण्यं तं प्रकाशयंताविसर्थः कुजयोर्वृक्षयोस्थितस्तेजोभिललनादेकजातवेदा इव स्फुरंतौ रुदंतं तदानीमप्युलूखलाकर्षणात् शिरसाप्रण
म्यति दंडप्रणाममुखादिदर्शनासिद्धेः अखिलेति मुन्यनुग्रहादैश्वर्यस्फूर्तेः नच पूर्वजन्मवृत्तस्मरणात्तज्ज्ञानादि यतोखिलेति अनन्यत्वादिति भावः स्वविस्मये २८ अपराधिनोरप्यावयोरनुग्रहउ
चित एवेत्याहतुः हे कृष्णेति हेपरः ब्रह्मन् नामानं दनसंभ्रमेणवा यद्वाजिक्षाकर्षकरुक्मनामस्वभावेन यद्वोलूखलाकर्षणादिक्रीडा च पत्नस्य क्षणंस्थौर्याय महायोगिन्नेनं तेश्वर्यं यतः प्रकृतिद्रष्टुः
पुरुषादपि परः पुरुषः तत्रापि आद्यः स्वयं भगवान् किंच सर्वकारणं त्वमेवेत्याहतुः स्थूलसूक्ष्ममिदं विश्वं ब्रह्मणस्ते रूपं कार्यं विदुः ब्राह्मणा इत्यपि पाठः आवयोस्त्वदीयत्वात्तव वचसवेश्वरत्वादनुग्र
हउचित एवेति भावः २९ नियंता च त्वमेवेत्याहतुः त्वमेक इति देहः असवः आत्मा अहंकार इंद्रियाणि तेषामीश्वरः ननु कालो निमित्तं प्रकृतिरुपादानं प्रकृतेर्जातो महान् विश्वंतयापरिणमते पुरुषः कर्ता
निर्यंता च कितत्राहं तत्राहतुः त्वमेव काल इति सार्धेन यतो भगवानीश्वरो विभुस्त्वमतः कालस्य त्वदंशत्वात् न मुख्यः कालस्त्वमेव ३० महपतपा व्यापकत्वान्मुख्यो महान्प्रकृतिश्च प्रतिज्ञाहष्टा
तानुपेशाद्यादिति न्यायात् सूक्ष्मा दुर्ज्ञेया महत्तप्रकृतिस्त्वमेव नचैवमपि जगतो रजआदिमयत्वेन तवतथात्वमित्याहतुः अरजस त्वत मोमयीति विवर्तवादादिति भावः अध्यक्षो व्यक्त इति पाठो क्षेत्र
स्यविकाराबाल्याद्यवस्थात दनुसंधाता पुरुषो जीवः यद्वा प्रकृत्यधिष्ठाता स्वष्टिहेतुः अतस्त्वमेव सर्वमित्यर्थः ३१ किं चानुग्राहकोपि साक्षाद्दृश्यमानोप्यस्मादृशैर्वशीकर्तुं तत्त्वतो ज्ञातुं वा न शक्यः
सइत्याहतुः गृह्यमानेति गृह्यमानैरनुभूयमानैर्विकारैरेकरूपे प्राकृतैः स्वाभाविकैः गुणैः कारुण्यादिभिर्विशिष्टोपि त्वमग्राह्यः वशीकर्तुं तत्त्वतो ज्ञातुं वा न शक्यः स्वतंत्रत्वात् युगपद्धि मुचमव्य
मत्वादिना दुस्तर्कत्वाच्च तदाहतुः क इति इह गोकुले प्रागप्यप्रकटतयास्थितं शास्त्रैर्नैपुण्यादिगुणैर्युक्तोपि ज्ञातुं कोर्हति वने कोपि यद्वा गुणैर्दामभिरग्राह्योपि गुणसंवृतो बद्धो यस्त्वां विज्ञातुमि

राम
१९

स्यादि ३२ अतो दुर्ज्ञेयत्वात् केवलं प्रणमतः तस्मै पूर्णत्वेन सर्वत्र प्रसिद्धाय तुभ्यं नमः नारायणाख्याय चतुर्व्यूहाद्याय सृष्टिकर्त्रे स्वस्मात् द्योतः प्रकाशो येषां तैर्गुणैरलिंगित स्वच्छन्नो महिमा यस्य क
स्यचिदधिकारिणा निराकारतया स्फुरतः क्रमेणार्थः लीलानुसारी चायमर्थः तस्मै तुभ्यं नंदसुताय भगवते नमः क्वचिद्वसुदेवसुताय च वेधसे द्भुतलीलाकर्त्रे स्वरूपप्रकाशविशेषैर्गुणैर्बाललीलाभि
छन्नमहिम्ने यद्वा त्वस्मभ्यं प्रकाशमाने दाम्नाभिच्छन्नाविभुत्वाय तथापि ब्रह्मण इति ३३ एवमात्मानं च्छादयन्नपि प्राक्स्थमेव यासीत्याहचतुः यस्येति युग्मकं शरीरेषु शरीरीश्विति पाठो शरीरीषु वर्त
माना अप्यशरीरिणस्तद्धर्मरहिता अवतारा अपि ज्ञायंते किं पुनस्त्वमवतारीत्यर्थः ३४ भवाय विभवाय च भुक्तिमुक्त्यर्थं सांप्रतमवतीर्णः अहो भाग्यमिति भावः ३५ इदानीं तत्सेवायां स्वाक्षमतां म
त्वानौ केवलं नामकीर्तननतिभिरेव स्वकल्याणं निश्चिन्वस्य तथा मुहुः प्रणमतः नमइति हे स्वस्तः कल्याणरूप किंच परमाणं शिवादीनां अपि मंगलं यतः शिवः शिवो ह्रदिस्रुक्तेः नमस्तो विश्वमंगल
ति पाठे विश्वस्य मंगलकरत्वं यस्मात् ३६ अथ देवत्वेन तत्र स्थितिमयुक्तां मत्वा पूर्वस्थावरत्व मनुशोचंतावुचतुः अनुजानीहि गंतुमेवेति भावः अनुचरस्य श्रीशिवस्य किंकरो रुद्रस्यानुचरावि
स्रुक्तेः यद्वा नारदस्य अनुग्राहकत्वात् यद्वानुचराणां भक्तानां किंकराविति अनुनिरंतरं जानीहि अथवा तवानुचराणां गोपालानां किंकरावनुजानीहि किंकरोचिते वास्थापय इत्यर्थः ननु दुर्ल
भमिदं तत्राहतुः अनुग्रहादिति नौ आवयो भगवतस्तव दर्शनं अपराधिनोरप्यत्र त्वत्स भादिदं मय्याशास्वहं इति भावः ३७ मुन्यनुग्रहाद्भक्तिरत्र वातस्तत्रैव गच्छतमिति चेत्तर्हि सर्वभक्तिप्रकारं देही
ति प्रार्थयेते वाणीति तव पादयोर्गुणानां वात्सल्यादीनां च अनुनिरंतरं कथने एव ननु योगादिनिरूपणे न इति अस्मदोर्द्वयोरप्येतिद्वित्वं बहुत्वं स्वसंगीनां चिवक्षया वा पादयोरिति भक्त्या ननु तन्मा
त्रविवक्षया श्रवणाविति द्वित्वं साकल्येन प्रवृत्त्यर्थं एवमग्रेपि कथायां गुणकथायां कर्मसु पूजादिषु शिर इति प्राधान्याद्वशिष्टत्वाद्य न तु तन्मात्रं तच्च तव निवासो व्रजस्तत्रस्य जगतः सर्वस्य
प्रणामे भवत्तनूर्तिनां नारदादीनां साक्षाद्भगवद्दर्शनं गृहे सुसंभवाद्भयेन न प्रार्थितं स्पर्शादिकमुपलक्ष्यं ३८ गुह्यकाविति पूर्वे भाग्यवत्त्वे हासे हेतुः स्वयं तु भगवान् ताभ्यामप्रीत्य भगवत्त्वेनैव स्तुतो धन्य
बद्धस्तत्र च दाम्ना तत्राप्युलूखले इति एतौ तु भयान्नहसत इति ज्ञात्वा स्वयमवज्ञहासेति भावः ३९ ज्ञातमेवाऽन्यथाऽपराधी पुरुषा न स्यात् कारुण्यमाह श्रीमद्भ्यां यो रव्यनुग्रहो वाग्भिः स्यात्ता
नेवं यथा पुनः स्त्र्यादि वरदानमयीतिः कृतः कथं मृतः विगतो भ्रंशो यः पातो पराधः कृत नरकरूपो यस्मात् ४० मुक्तमेवैतदित्याह साधूनामिति दर्शी यात्तु त्वं समचित्तानामिस्य परा धामग्रहणं एतौ म
य्यर्पितचित्तानां दर्शनादपि सुतरां संसारबंधो न स्यात् किं पुनस्ताहृशवाग्भिरनुग्रहात् यद्वा कीर्तनादिनापि न स्याद्दर्शनादिना तु सुतरामिति भावः अक्षणोर्बंधस्तामः ळत उदयात् पूर्वमेव न
स्यति दर्शनात् सुतरां यथा तद्वत् ४१ प्राधान्यादेकस्य संबोधनं सादनं स्वगृहं मम रोसंतौ गच्छतं युवयोरीप्सतो मयि प्रेमा जातः अत एव भवनिवर्तकः ४२ बद्धोलूखल इति कौतुकोक्तिः यस्तया
बद्धः सन् देवाः अपि स्तुवंति वंदंते इति किं च ईश्वरो पी दृशोभक्तवश्य इति मुहुः परिक्रमण प्रणामे हेतुः अत्र बहुव्रीहिणोलूखलस्य तदनुगतिस्तया च बंधनीय बंधनाश्रय वै परीत्य कौतुकं व्यज्यते उलू
खलं विशेषणं न तत्पलक्षणं अत एव तस्मात् अपि न स्यादिक्तमिति न मोसुधाम्ने स्फुटदीप्तिधाम्ने इति पाठे तया उपलक्षणया व्यज्यते उलूखलाद्यामंत्रणं तु भान्ते ४३ इति श्रीमद्भागवते दश
मस्कंध वर्तनः समाप्तो दशमोध्यायस्तो षिणी सारसंग्रहे १ इति भागवते दशमोध्यायः १० अथैकादशे वृंदावनप्रवेशं वत्सपालनं वत्सासुरबकासुरवधं च वक्तुं दामबंधनलीलाशेषमाह
षड्भिः गोपा इति निर्घातो निरभ्रगर्जितरूपोत्पातः भयं देवेभ्यः ताभ्यां संदिग्धाः तत्रागंतुं प्रतस्थुः अत एव महा छिन्न त्वात् निकटे या मातुर्निगमने १ मन्याविस्पर्धकं नितरां सप्रफुल्ले पतितौ दद्दशुर्दूरादि
ति शेषः २ बालमुररिति सार्धकं उलूखलकर्षकं बालरूपं पतनकारणं लक्ष्यंतलक्षयितुं शक्यमपि दूरस्थत्वात् सपति तेलक्ष्ण शाखा व्यवहितत्वाच्चैतद्विज्ञाय न द्दष्ट्वा संदिदिहुः तद्दर्शनेन तु तदनिष्टाशंका
कुलतया सा तत्हेतुविचारणा न स्यात् ततोनिकटे आगस्यापि शाखाव्यवहितमदट्टा इदमाश्चर्यं केस्य केन कृतं कुतो वायमुत्पात इत्याकुलाकातरा बभूवुः ३ व्यवहितं तं दर्शयीत्वा बाला आहुर
नेनेति संभ्रमेण पूर्वं वचनात्राक्ते रूप स्यादि ताविति नोचुः कथमित्यपेक्षायामुचुः तीर्यग्गातमित्यादि किंच वृक्षाभ्यां निर्गतौ दिव्यपुरुषावपि दृष्टवंतो वयमिति ४ ते ममतार्द्रचित्ताः नंदादयो न
जगृहुरेव केचित् सूतनादिशाल्भ्यादिव्याप्तिनातर्केण संदिग्धचित्ता बभूवुः स्नेहभराकुलतया तमेवासंदेहाय न पप्रच्छुरितिज्ञेयं ५ नंदवात्सल्यमाह उलूखलमिति तत्कर्षणं स्वस्वास्थ्य मानुषा
पनाय. तथापि विलोक्य सांगप्रत्यंग दृष्ट्वा भीतस्य तस्याललासनाय प्रहसन्मुखः द्वितीयांत पाठः स्मित हासं च बालकमिति विष्णुपुराणसंमतः तस्य हासश्यापितौ पिशंकितस्य तत्प्रसाददर्शनात् एवं यशो
दाया बंधकत्वं नंदस्य विमोचकतया ताद्दशभाग्यत्वं दर्शितं यशोदा प्रेम बद्धस्य नंदप्रेमैव मोचकं बद्ध श्रृंखलया बंधो नहि लोके न भिद्यते ६ पित्रोरिवान्य गोपीनामपि प्रेमवशो हदिति तद्य

भाग. ना
१९

दर्शयन् अतिप्राकृतबाल्यचरितमाह द्वाभ्यां गोपीभिरिति स्तोभितः करतालिकादिना प्रोत्साहितः प्राचोन्नद्धाभिः तद्भगवानपि बालवदिति तत्प्रेमरसादैश्वर्यविस्मृतिः न्यस्यादौ हेतुः काष्ठपुत्रिकावत्तासां वशादिति ७
इदमानयेत्यास्तप्त्रं आनेतुमक्षमो बिभर्तिके वल्लपीठादि उन्मानं प्रस्थादि बाहुक्षेपं भुजावुत्थाप्य पराक्रमदर्शनं न केवलं तासामेव किंतु ज्ञातीनां गोपमात्रस्य प्रीतिमावहन्नीति स्वानां चेत्यपि पाठः तत्र तद्विदां
चेत्युत्तरेणान्वयः ८ तदैश्वर्यमेव विदंति न तु स्वस्य वश्यतां उपलक्षणमेतदन्यासामपि बाललीलानामित्याह व्रजस्येति ९ इत उपरितन दशश्लोकी श्रीस्वाम्यनादृतापि पुस्तकेषु दृश्यमानत्वात् चित्सुखाचार्यै
व्याख्यातत्वाच्च व्याख्यायते अत्र श्लोकक्रमः पाठश्च नानाविधस्तथापि गौडदेशीयक्रमपाठो ध्रियेते तत्र क्रीणीहीतिपदद्वयं बहुषट्स्वमपि क्वचिदुपलभ्यते किं वाच्यं व्रजस्य हर्षदात्वं पुलीदजातीना
मपीत्याह क्रीणीहीति द्वाभ्यां सर्वफलप्रदः सर्वपुरुषार्थदोपि धान्यमेवादाय ययावेव न तु स्वल्पहस्तधृतमत्यल्पमिदमिति विचारितवान् बाललीलत्वात् १० सत्वरगत्या पथ्येव च्युतानि धान्यान्यपि यस्या
तदप्यच्युतस्य करद्वयं विक्रयिण्युकृतस्तेहा फलैर्नानावर्णैत्याद्रत्नाकारैरपूरयत् च्युतधान्यकरेणाप्यच्युतेन सा संपन्ना कृतेत्याह स्वयमुद्धृतैः सर्वरत्नैस्तस्याः फलभांडं पूर्णमिति ११ अथ दामोदरलीलामंतरे
कदिनकृत्यमाह सरिदिति सरित्स्थितिः कृष्णक्रीडाकृष्टचित्तं अथेति कार्त्स्न्ये सर्वैरेव नामभिरित्यर्थः अत्र रोहिणीति कर्तृव्यवहारः यशोदां प्रेषयामासेत्युत्तरात् अत्र रामाकानमपृच्छ्य १२ ततश्चानोपेति यशोदामिति द्व
योरपि तस्या वात्सल्याधिक्या तदाकर्षणसामर्थ्याच्च तदाह पुत्रयोर्वत्सलामिति १३ सातिवत्सला सरामं कृष्णमजोहवीत् पुनःपुनः उच्चैराजुहाव सरित्तीरे नानोपद्रवशंकया स्नपनभोजनाय चेति भावः तत्र हे
त्वेतरं स्नुतस्तनीति अत एवागमस्तनं पिबेति १४ श्रीकृष्ण एव रामादीनाकृष्य क्रीडति तदागमने रामो ध्यास्यतीति धिया प्रथमं श्रीकृष्णमाह्वयति कृष्णेति वीप्सा प्रेम्णा यद्वा हे क्रीडया सर्वबालकाकर्षक किं
चसौंदर्येणापीत्याह अरविंदाक्षेति कृष्णारविंदाक्ष नीलोत्पलनेत्रेति वा स्तनं पिबेति स्तनपानेन तत्प्रेमातिशयस्य पिबतस्तु स्यागे क्रोधातिशय दर्शनेन अनूहुतत्वात् स्नुतस्तनीत्याच्च १५ आह्वानमष्ट एवं त
मिव द्रष्टा राम एवं नन्दनमेनं रमयतीत्याशयेन द्वाभ्यां राममाह्वयति हे राममिति सानुजं इति च अनुजत्वात्वदधीन एव स इति भावः १६ परिविष्टपात्रा व्रजनाथस्त्वां विना न भुंक्ते इत्याह प्रतीक्षत इति आवयोः पित्रा
मित्रार्वा १७ उत्तोप्रत्यपि साधारण्येनाह परेयेति पदाक्रीरुह्यं प्रत्युक्तेः सर्वेवाक्यस्याप्यव्रतिसूचनाय वीप्सावारवेदनमात्रं स्नानस्नपनादिनानिर्मलीकृतान् १८ उपसंहरति इत्थमिति अशेषशेख
रमपि सुतत्वेनानुहूय अत एव क्रीडंतमपि हस्ते गृहीत्वा स्ववाटं स्वगृहस्थानं स्नपनभोजनालंकारादिमंगलं जन्मर्क्षमधेत्युक्तिः सत्यापनायतद्योग्याभ्युदयमेव वा अथ कार्त्स्न्ये १९ वृंदया मंत्रितादेव्या कृष्णा
रतु निजवने तेनात मंत्रिता गोपा महाबहिः मंत्रममंत्रयन् व्रजस्य कार्यहितं २० तत्र तेषु अर्थः प्रयोजनं तत्त्वमुक्तमस्त्वादि उपनंदो नंदराजस्य मंत्री ज्येष्ठभ्राता च गम्यते अत उक्तो योग्यता प्रियवृद्धिति इत्पातेस्तेयार
निष्ठाशंकये वा हे इत्यर्थः सर्वलक्षणयुक्तत्वात् निष्ठायापि नंदाय प्राज्ञेन ज्येष्ठेनेव राज्यं दत्तमिति ज्ञेयं २१ बालानामिति सामान्योक्तिः तस्यासंकोचाय प्रजानामित्यपि पाठः २२ तत्र स्वयमागतं श्रीकृष्णमेके कृत्वा दृष्टा
तयति मुक्त इति राक्षसादिपदैः स्वाप्रतिकार्यत्वं बालक इत्यनेन तु सुतरां कथंचिदिदं कर्मैव निर्धारयति हरेरिति २३ दैत्येन नीतवत्त त्रस्या काशात् तत्रापि विपदंबीनां पक्षिणां संचारस्थानं इत्युक्त्वंता २४ तेत्रा
प्यच्युतेनैव रक्षणमासीत् २५ एवमसकृद्धरिणा रक्षितेपि सर्वदा तेनैव रक्षणीयमित्यस्माकं भजनाभावात् वनमेतस्याज्यमित्याह यावदिति औत्पत्तिकः उत्पातजोरिष्टानर्थः इतःस्थावात् २६ ननु मासमी
क्ष्य परं स्थानं पूर्वमायतनं त्यजेदिति नीतिस्तत्राह वनमिति अस्तीति शेषः वृंदायाः पाद्मकार्तिकमाहात्म्योक्ता पावनमिति सर्वथाक्षेमकरत्वं तदाह पशव्यमित्यादिः पशुभ्यो हितं नवेति बृहद्वनेस्य दानीत
नावासस्य जीर्णत्वं गवादिसंमर्दोच्छिन्नतृणत्वात् सेव्यमिति दुष्टजंत्वभावः पुण्याप एवाद्र्यादयो यत्र अदंतत्वमार्षं हलं ताद्दाप्रवा तत्रोसन्नत्वेन सर्वेषां पुण्यतमत्वादिति भावः अत्र श्रूयंतहि वनं रम्यमित्यादी
नात्र गोवर्धनं चैव भांडीरं च वनस्पतिं कालिंदीं च नदीं रम्यां द्रक्ष्याव श्रूयतः सुखमित्यंतेन हरिवंशोक्तिमुपन्यस्य गोवर्धनादि निवेशादि विभागतन्तु दंतर परिमाणादिकं च तोषिण्यां प्रपंचितं तत्तु दूरस्थानां दुर्बो
धत्वादुपेक्षितं २७ इतः सप्तानां तोषिणी न दृश्यते युक्तेति प्राधान्यान्नंदं प्रत्युक्तिः अग्रत इति मांगलिकत्वात् २८ एकस्मिन्मुख्ये श्रीकृष्ण एव धीर्येषां ते यतः गोपास्ते स्वदनिष्ठाशंकयात स्नापनपराः अंजानः शाकट
समूहान् शाकटाध्यारोपिताः परिच्छदायैः २९ यत्ताः कृतप्रयत्नाः ३० सह पुरोहितास्तन्मंत्रघोषसहिताः ३१ कुलेषु कुचेषु यत्कुंकुमं तेन कांतिर्यासां कृष्णस्य चित्ताकर्षकस्य लीला अतः पश्यादिलज्जां विहाय
जगुः ३२ अंके कृताभ्यां रामकृष्णाभ्यां सह यतः स्तत्कथाश्रवणोत्सुके यत्रतोतत्रैव तत्कथानां विशिष्टघोषात् ३३ व्रजवासं गोकुलस्थानं अर्धचंद्रेति धनुराकारं ज्यास्थाने यमुनेति भावः ३४ त्रयास्माकं वृत्त
वनमाह वृंदावनमिति वनस्य सौंदर्यं गोवर्धनेत्यादि तत्रत्यविशेषाणां उत्तमेति वैकुंठाद्यपेक्षया लोकरमणस्यापि रामस्येति किं वाच्यं तस्याप्याश्रयस्य मायाः संपत्तिदव्याः पत्सरपिन्दे पत्याश्चर्येण ३५ प्र
थमपूतनानाशः ततः शाकटभंजनं नामकर्म घृष्टजानुरिंगणं च ततो वधः १ तृणावर्तस्याथ विश्वदर्शनप्रथमं ततः गोपिभिस्ताभिता सा दिवसपुच्छग्रहस्ततः २ मृत्तिकाभक्षणं तत्र द्वितीये विश्वद

राम्
२०

शैनं दधिक्षीरादिचौर्यंचोलूखलेबंधनंततः ३ सरित्तीरेत्यादिवृंदावनेरम्यप्रवेशनं बृहद्वनस्थलीलानांक्रमोयंतोषिणीमतः ४ अथवृंदावनलीलामुपक्रमते एवमिति कल्लवाक्यैर्मनोहरभाषि
तैः स्वकालेनकौमारेवयसीत्यर्थः ३६ अविदूरेइति नदूरेबाल्यात् नचसमीपेतृणाभावात् स्वैरविहारासिद्धेश्च नानाविधावेणुवेत्रकंदुकाद्याः क्रीडापरिच्छदाः ययोः ३७ क्रीडामाहद्वाभ्यां क्वचिदितिसार्धकं क्व
चिच्छिद्रेशकालेवा तइतएववेणुवादनारंभः क्षेपणैर्यंत्रैर्बिल्वादिक्षिपतः किंकिणीयुक्तैःपादैःक्षिपतस्ताडयतः वत्सपालाएवकंबलादिपिहिता वृषरूपमनुकुर्वंतौ तैः सहस्वयमपि तथैववृषायमाणौन
र्दंतौ तदनुकारिशाप्यानुकुर्वंतौ युयुधातेइत्यर्थः ३९ अन्वीत्यर्धकं रुतैःशब्दैर्जंतून् हंसमयूरादीन् प्राकृतौबालौयथा तथैवचात्रक्रीडाभ्रमणेच मुख्यंवत्सचारणमानुषंगिकं ४० हरिवंशेच पर्णवाद्यंश्रु
तिसुखंवादयतोवराननौ ४ भूस्थातेवनगतौत्रिशीर्षाविवपन्नगौ अरवींदकृतापीडौरज्जुयज्ञोपवीतिनौ इत्यादिनाविशेषयुक्तः त्रिशीर्षाविति वेणीत्रययुतशिरस्कत्वात् इयंक्रीडादीनांतरप्यस्यावि
शेषस्तुवक्ष्यते तमेवकदाचित्कंविशेषमाह कदाचिदित्यादिना स्वकैःप्रियतमैः सहेतिव्यसनस्यापादनेन ततक्रीडासुखविघातकत्वात द्वेष्यत्वंव्यज्यते तेनचवधयोग्यता ४१ वत्सरूपेणवत्सेषुगमनंचपू
तनादिवधेनभयात् आगमनंचकंसाज्ञाहात् संकेतेनरामायदर्शयन् अज्ञानिवसमीपमागमत ४२ अपरपादाभ्यांसहलांगूलंगृहीत्वातं भ्रामयित्वाक्षेपणापियोगिफलपातनार्थंकपित्थाग्रेचिक्षेपमहा
कायभ्रामणेपिस्थानाच्यवनात्च्युतः ४२ सइतिसार्धकं माहाकायइतिमरणेमायापगमात् द्विविचमहोत्सवमाह देवाश्चेति ४३ सर्वलोकानांमुख्यपालकावपि वत्सपालकौभूत्वेति भक्तवात्सल्यं प्रातराशः प्रा
तर्भोज्यंतत्सहितौ ४४ एकदाततोन्यस्मिन् दिनेजलाशयसमीपं ४५ महासत्वमतिस्थूलंप्राणिनंबकवत्स्थिरतयावस्थितं अतःशृंगमिव च्यूतत्वेहेतुः वज्रेति ४६ महान्दुष्टत्वेन वपुषाच निरंबकरूपी
तीक्ष्णतुंडोपिबलवानपिअग्रसदेव नान्यत्कर्तुंशक्तः यतः कृष्णंदुर्वितर्कशक्तिमिति ग्रसनमपितिदिच्छयैवेतिभावः ४७ महात्म्यज्ञात्रापिबकंहंतुंशक्तोपिरामादयोविचेतसः प्रेमाकुलतया ज्ञानक्रि
याशक्तिरहिताः बालस्यापिताहृशत्वं श्रुत्वेतद्भगवान् रामोविपक्षायन्येपाद्यममित्यादोहृत्य ४८ गोपालसूनुमिषिब्रह्मणः पितरमिति कौतुकित्वात्स्मासनंप्रभावात्त्व सम्यक्ग्रसनाशक्तिर्व्यज्यते अक्षतं
सक्षतीकर्तुं अशक्यमपिहंतुमागतः यतोतिरुषेति क्रोधेनविचारापगमात् ४९ तुंडयोश्चंच्वोः पीडयित्वा उशीरं यस्यभूतलेतद्वीरणं कंसेति तद्वारणेनकंसोपिदारितइव सतांगतिरितिरामादिप्राणरक्षणा
त् देवानांतद्वधेनमुदावहइतितस्यदुरंतत्वं वत्सासुरेणनवहितःपश्चाद्ध्वस्ताहतोत्रकिं अतोवहितशक्तेनगिलितोप्यवधीद्बकं ५० हर्षलिंगमाह तदेति मल्लिकादिपुष्पैस्तेषामतिप्रियैरित्यर्थः वाद्यसहितैः
स्तवैःस्तोत्रैः समीडिरेतुष्टुवुः आमभावं [illegible] आर्षः विसिस्मिरे मित्राभ्युदयानंदमयंविस्मयंप्रापुः ५१ बालानांस्नेहविशेषमाह मुक्तमिति अनेनालिंगनेनिवृत्तौचनिर्भरः तंस्वस्थानागतमेवोपलभ्य
प्राप्यततःपरिरभ्यनिर्वृताः तेषांस्वयमगमनंसम्यक्स्वास्थ्यानुदयेनाशोकेः इंद्रियाणामपिस्वस्थानागतेएवप्राणेशक्तत्वं प्रणीयापराण्हेएवपराह्वस्य यद्वापालानांमूर्छा दृष्ट्वादुरवेनगतानेकीकृत्य
जगुः गीतवदुच्चैःकथितवंतः वत्सवधोप्यसुरत्वाप्रतिशइतिसंदेहान्नृहिनेनुक्तोप्यद्येनोक्तइतिज्ञेयं षड्विंशाध्याये गोपैरनुवात् ५२ अतिप्रियंप्रेमयुतंयथास्या तथा आहृतारक्षणादोज्ञातादाहशः औत्सुक्या
देक्षंतरिक्षणान्ननिववृते तेस्म यतःसंदेवात्पनेत्राः अधुनातुप्रेत्येत्यादिद्वयोरपेक्षायां यद्वाप्रेत्यागतंकंचित्तद्बंधुरिव ५३ अहोइतिचतुष्कं इतीतिचतुर्थेनान्वयात् अपिएवमपितेषामेवानिष्टमासीत्
यतःपूर्वंप्रथममागत्यतस्यभयंकृतंतेनतुनकस्यापिपूर्वमपकृतमितिभावः यद्वातेषामपिबकादीनांपुरानेनव्रजपतेसाधवोदस्फ[illegible]पीडिताइत्युक्तत्वात् विप्रियमनिष्टं पूर्वंकृतमासीत् यतोयेभ्योभय
मस्यभवति ५४ पूर्वंविप्रियाचरणाद्वंतुमायात्यथापि एतेबकादयोनाभिभवंति घोरंदर्शनमपियेषांकिमुकृतकर्मातेपि नैवंतेनैवंतेइतिपाठे किंचसद्योप्रियंतेपिस्याहुः जिद्योसयेति एकस्मात्स्वयंस
द्यो बहूनामपिमरणेदृष्टांतः आनाविसादि ५५ साश्चर्यमाहुः अहोइति ब्रह्मविदांभगवान् ब्रह्मकास्त्वेनेत्युक्तत्या भक्तिनिष्ठानामसत्यानसंतिनभवंति अन्वभाविअनुभूतं नंदनेबंधुवात्सल्यात् प्रहस्यम
पिगर्गोक्तंतेषुव्यंतिमितिगम्यते ५६ ५७ कथाःकथामितिपाठे कुर्वंतःकथयंतः किंचरममाणाः सहक्रीडंतश्च भवेसांसारिकानांपदुःखंतन्नाविदन्नाविदुरपि क्षुधार्तांइदमग्रुवन्निति येनतेषांक्षुधा
दिकंतन्नभवसंबंधिकिंतुलीलोपाद्दलकत्वाच्छ्रीन्नामयमेवेतितत्त्वं ५८ अत्रैवंविहारैरिति पद्यंकेचित्पठंति केचित्तत्रसंबंधोक्तिःटीकायांतूभयत्रव्याख्यातं इतिश्रीमद्भागवतदशमस्कंधव
तेनः अगादेकादशोध्यायस्तोषिणीसारसंग्रहे १ इतिभागवतेएकोदशोध्यायः ११ जातिरूपगुणक्रीडानामभिर्निस्यन्हूतनः निस्याश्चर्यश्चसश्रीमद्विठ्ठलोनःप्रसीदतु १ पुनरध्यायत्र
येणकौमारीलीलांदर्शयन् द्वादशेनाध्यायेनाघासुरवधंनीरूपयति यदेतदध्यायत्रयंपूतनालोकबालघ्नीत्यादिश्लोकषट्कंच कश्चिन्नमन्यनेतदेतत्साहसमात्रंसर्वदेशप्रसिद्धत्वात्

भाग-द-
२०

२०

६५

वासनाभाव्यसंबंधोक्तिविद्वत्कामधेनुशुकमनोहरापरमहंसप्रियादिषु सर्वटीकासु व्याख्यातत्वात् स्वामिपादैरपि किंमुगाबोन मातर इत्यादावस्याल्लीलाया दर्शितत्वाच्च न च द्वात्रिंशत्त्रिशतं चेति स्वाम्यु
क्तेर ध्यायत्रयं खंडितं तदेतदेवेति वाच्यं सर्वस्कंधेष्वध्यायसंख्या श्लोकटीकानां सद्भावादध्यायखंडनस्यैवाभावात् द्वात्रिंशच्च त्रयश्च शतानि चेति द्वंद्वैकवद्भावस्याविवक्षितत्वात् अनिर्नैश्चितबहुत्वे
स्यानवस्थानियाकपिंजलाधिकरणन्यायेन त्रित्व एव पर्यवसानात् अन्यथा त्रिशतीति स्यात् न च मुरलितादिनाम्नाभिवाघनिशादिनाम्नो प्रयोगो न दृश्यते इति शंक्यं यन्त्रत्रंजंस्यघाभिदारचनानुवादो
दित्यादौ तत्प्रयोगात् पापनिशादिनाम्नामप्रसिद्धेः न चेयं लीला पुराणांतरादप्रसिद्धा पाद्मोत्तरखंडब्रह्मांडपुराणयोः प्रसिद्धत्वात् श्रीवृंदावनेन तत्लीलास्थानानां प्रसिद्धत्वाच्च तस्मात्किंचिदवद्यं यद्वा भग
वद्भक्तनक्तीनां परममाहा[illegible]त्म्यव्यंजकमे[illegible]तत्प्रकरणमिति सुगोप्यं इत्थानुग्रहे कल्पभ्यानुभवं गोपनायैव के श्चिद्धपल्लव्यते इति ज्ञेयं प्रतिवाक्यं प्रतिश्लोकं प्रतिप्रकरणं त्विह उत्तरोत्तरमाश्चर्यं तद्भक्तैरेव बुध्यते १
बकस्य गल एवाहं गत एकोन कौतुकं अज्ञीगमत्सखीन्वत्सानिति तीवाघासुरोदरे २ कदाचिद्वनाशाय वनेएव प्रथमं भोजनं केतु मनोदधत् इदं छाकुर्वन् कृतसंमंत्रणे वयस्यैः सह इति भावः सम्यक् श्रीमुखादि प्रक्षाल्य
३ न चारुवत्स्ये रूपणचारणादिपूर्वकं त्वरयो श्यायगृहात् निष्क्रम्य प्रबोधयन्निति सखिसंगायशानैर्निर्गमः चारुणे स्वभावः सुखेनतन्निद्रां तंगश्च हरिः स्वयमेव व्रजाद्विनिर्गतो न तु रामेण सह तत्र चलितु मुद्यतस्य दे ति
वत्साधुपदेशेन जनन्यारब्धं शांतिकत्वमेव प्रायो मुख्यारेतुः एतत्सर्वीलायाराम गोचरता संपादनं चेति १ तेनैव साकमिति वेगेन धावनात् यतस्तिधग्धाः रम्याः शिक्यवेत्राद यो येषां सहस्रोपरि संख्यातलक्षकोट्यादिस्तया
न्वितान्वत्सान् इति बाल्लैः पाल्यमानवत्सानामसंख्यत्वं किं पुनर्व्रजस्थतर्णकागोसंगतवत्सावत्सतर्यो वत्सतरागावो वृषाश्च गोपालदेवदशानवर्धमानात्प्रसंख्येया इति महिष्यादयश्च पशवः केन गण्याः एवं गोपागोप्यश्चानंताः
मुदितवृन्देन स्वयं प्रबोधितत्वात् २ असंख्यातैरिति असंख्यसंतसंख्यैरित्यर्थः असंख्यसंज्ञाच क्षीरस्वामिना परार्धपर्यंताष्टादशसंख्या दशगुणोत्तरा ठक्का दर्शिता स्वहतं परार्धसमितं तत्स्वहते हूर्यंतोसंख्यमि
ति स्वहतं स्वेन गुणितमित्यर्थः स्वकान्स्वकान् वत्सानिति शेषः स्ववत्सकानित्यपि पाठः ३ अभर्त्सलीलामाह फलेति सप्तभिः पूर्वं मातृभिर्भूषितानपि फलादिभिरभूषयन् काचमुक्तेति पाठांतरे काचारत्नानुकारिणः ४
ज्ञातान्सतः दूरित श्रियक्षिपुस्तत्रगृहीतुमागतेतत्रत्यकान्यष्ट्यादीन् तेनेतिदूरादेव मतिमुग्धेषु रुदत्सु सत्सु हसंतो दद्युरिति ५ तेषामतिप्रणयमाह यदीतिपंचकं वृंदमापितान्विहाय दूरं नयास्येव यदि वनशोभायाः इक्षा
येदूरंगतस्ताहं तं परिरभ्यरेमिरे स्पृशं प्रापुः ६ वदेस्यपेक्षायामाह केचिदितिचतुर्भिः वेणून्वादयंतः वेणुवादनस्य मध्ये मध्ये इत्यर्थः एवमग्रेपि पद्मासंस्यस्य येमिरे क्रीडांचक्रुः क्रीडामेवाह केचिदित्यादि बहूवुरिति शेषः ७
वेः पक्षिणस्छायाइति ज्ञात्स्यकवचनं तेन समासात् छायाबाहुल्ये इति क्लीवत्वं न साधुततोप्युत्तमं यथास्यात्तथेति पर्वत्रच पररत्रच योज्यं ८ कीशबालान् शाखासु लंबमानान् वानरस्तान्गृहं तानि पद्माव वयोरैक्याद्वानरशि
श्वन् पुच्छादिग्रहणेनाकर्षतस्तैः सह द्रुमानारोहतः तैः सांकदंतदर्शनादिविकाराणां कुर्वंतः पल्वालिषु वृक्षेषु शाखातः शाखामुत्प्लवंतः ९ प्रस्रवेण प्रवाहेण संप्लुताः शयनादिना पूरिताः इति सरितां क्षुद्रत्वं स्वप्रतिच्छायाः
स्वच्छायाः स्वप्रतिबिंबानि बानुकुर्वतः १० अतिविस्मितस्तन्नजिनंदति इत्थमिति एवसतांज्ञानिनां ब्रह्मसुखं तत्सुखं चानु। अतिश्च तयाचित्सुखब्रह्मरूपेण स्फुरति एवं च दास्यादिभक्तिमतां निर्विशेषब्रह्मस्वरूपतोपि
परेणोत्कृष्टेन देवतेन सर्वेशाद्यैश्वर्यादिपूर्णरूपेण स्फुरति यश्च मायाश्रितानां प्रापंचिकानामतिमनोहरनरकुमारतया स्फुरति तेन सह विजहुः विहारमपि कृतवंतः अप्रधानतृतीययाप्रेम्णा वशीकृतत्वं व्यज्य
तेऽत्र तत्सेव्यः एवं त्यः कृतपुण्यपुंजा यतेइति स्तोकोक्तिः वस्तुतस्तु कृतानां भगवत्प्रसादमयानां चारवः पुंजा एव ते इत्यर्थः पुण्यं तु चार्वमित्यमरः ब्रह्मविदां तदनुभवरव भक्तानामतिगौरवेणैव भजनं एतेतु
तेन विज्ञहुर पीति किं वाच्यं भाग्यमिति भावः इदमत्राभिप्रेतं भगवान्सावच्चिदानंदस्वरूपः सर्वैश्वर्य नंद पूर्णः सर्वमनोहरमधुरगुणलीलासुभगश्च परतत्वारव्यः तत्र निर्विशेषज्ञानेन स्वरूपानुभवः भक्त्याख्यगौरवाभि
श्रीप्रीतिमयज्ञानेन ऐश्वर्यानुभवः शुद्धप्रीतिमयज्ञानेनोक्तमाधुर्यानुभवइति ज्ञानिषु शुद्धमधुरतास्फूर्ति नैविद्यत एव दासेष्वपि गौरवेण संकुचिततया यथेष्टं ग्रहणाभावान्नातीवोत्पद्यते सखिषु गौरवासंकुचितत पा
तत्प्रीतेरसंकीर्णत्वेन पूर्णतयाभगवतापि येयथामामिति रीत्यात्तथाविधतयास्वीनामेवरूपगुणलीलामाधुर्याणामसाधारणी स्फूर्तिः किं वाच्यं तेषां स्फूर्ति मात्रं क्षीराब्धाविव श्रीकृष्णमतत्तद्भावमथ्नानि मध्यमाधु
र्यमितोदृष्ट्वा वकत्वं स्वविषयकप्रीतिमाधुर्यतल्लोलुपीभावजनकत्वं च दृश्यते तच्चानंतत्रतत्रातिसर्वेभ्यः कृतपुण्यपुंजत्वं सिद्धं ११ अहो दूरे तावद्दास्तांवशीकृतेनेतेनैषां विहारस्सौभाग्यमहिमा व्रजवासीनां प्राणाम
पि दर्शनमात्र भाग्यमपि महद्भिरप्यन्यैरलभ्यमित्याह यदिति यस्य पादसंबंधी पतितः पांशुरकोपि यद्वायस्य पादयः श्रीडा वृक्षः कदंब भांडीरादिस्तस्यांशुः किरणछटापि बहुभिर्जन्मभिस्तत्रच यमनियमप्रत्याहा
रादिकृच्छ्रे धृतः स्थिरीकृतः आत्मा मनो येः अतो योगिभिः समाधिनिष्ठैरप्यलभ्यः स एव स्वयं भगवान् यदृशोर्विषये सस्वयमप्रार्थित एव नास्थितः स्थिरतया नित्यमस्ति अहो आश्चर्यं तेषां दिष्टं भाग्यं यद्वा दिष्टस्य
महः तेजो विशेषो भाग्यात्सर्वोवा किं वर्ण्यते काक्वा नैवेत्यर्थः १२ अथ पतदिति मुखमाज्ञगामस्तखत्क्रीडनं वीक्षणेन क्षमा यस्य तथा भूतश्चा भूत्कथं भूतं क्रीडनं यत् अंतस्थदयेदेवैः प्रतीक्ष्यते चिंत्यते पीतामृतैर
पिजीविते पृष्ठनिश्रित अम्धतपानमात्रेण नास्यतिकामरत्वं न वा ज्जीवनसाफल्यं किंतु भगवल्लीलात्कारणे नैवेति तद्देवनित्यं चिंत्यत इति भावः १३ इत्थेतिचीकं छद्ममुखान इक्षास इति व्यवस्यानिश्चत्याजगरव

पुच्छत्वात्तेषां रसनाग्राया पथिव्यंशेनेस्यन्वयः॥ कंसेन प्रहितः व्यवसायमाह अयं त्विति ममेति नाम्ना मे दादपो नरुत्तं तयोर्द्वयोः सोदर्ययोः स्थाने यद्वाद्वयोरिति निमित्तसप्तमी तद्वैरग्रहणार्थमित्यर्थः एनं कृष्णं सब
लं पाल्तवत्ससहितं हनिष्यामि १४ तिलापः कृतास्तिलोदकतया कल्पिताः न पश्येत्स्फुटं हेषु प्रजा एवासवो येषां ते १५ योजनप्रमाणेन आयामेन दैर्घ्येण सहितं च तन्महाद्रिवत्पीवरं च व्यात्तं गुहावद्वदनं यत्र अजगरदेवी
तुवस्तु तत्र इत्थमर्थमाहेति भाति कंसानुशिष्टोपि अघासुरोपि कृष्णमुखान्नद्रक्ष्य इति अस्फुरभावविरुद्धं व्यवस्य स्वीयसंसृते मर्त्यसनं नाशास्त दाशाया तगयन्मार्गे दंडवत्स्वरूपमणामसुद्रयात स्थो यतः अस्खलः तद्दृष्टेनेन खल
त्वनाशात् व्यवसायमाह अयं तु बाल एव प्रबलयोरपि मे सोदरयोर्नाशकृत् अतः सन्नन्तमेनमीश्वरं इदमए०नादेशः यद्वा इनं प्रभुं तमेवैनं स्वार्थेणमनयोः प्राप्तिस्थानमहं मपि हनिष्ये प्राप्स्यामि गतत्यर्थस्य
हते प्राप्त्यर्थत्वात् तदा चैते व्रजौकसः तत्सहत्वात् तत्सायुज्यं प्राप्तस्य ममापि सुहृदः कृताः स्युः कथं भूताः व्रजौकसः अयदाः शृणु तावहविधिप्रदाः अस्तिलापः अस्ति तत्त्वं भगवानित्यादिलापः भाषणं तत्कुर्वंति इति णि
जंतात्क्विप् आस्तिकप्रवरा न तु मद्वंश्या सुरा इव शून्यवादिनः नष्टसमाः नष्ट समाः नष्टाः अहष्टाः समाना अपि किमुताधिका येषां ते ननु तत्सायुज्ये स्वदेहपुत्रादिवियोगचिंता तत्कुतो न तत्राह प्राण इति प्राणस्य प्राण
मिति श्रुतेः प्राणे अस्मिन् ज्ञस्ताणिगते प्राप्ते सति देहादिसर्वविषयचिंता नास्यात् किंच प्रजा हिंसकाना मस्माकं धिक् जीवितमित्याशयेनाह एते हि व्रजवासिसद्दृशाः प्राणभूताः सफलजीवनाः यतः प्रजानामसवः प्राणवत्प्रियाः इ
ति मुखव्यादानादिकं च तेषां विस्मयद्वारा हर्षार्थमेवेति व्यंजयतु महाद्भुतमिति १६ अद्भुतत्वमाह धरेति धरायामधरोष्ठो यस्य स तथासीदिति शेषः जलदस्पृक्तरोष्ठो यस्य दर्यो विवानन्नानीतोस्टग्विणी यस्य गिरेः शृंगाणीव दं
ष्ट्रा यस्य ध्वांतवदंतरास्यं यस्य वितताध्ववज्जिह्विका यस्य परुषानिलवत् श्वासेन दववदीक्षणात्स्योष्णोद्गमा तेषु वा उष्मः १७ व्यात्ततुंडस्याजगरं दृष्ट्वा वृन्दावनस्य श्रीः संपदेषेति त्वांग्यामत्वा विपरीतं व्यात्ताजगरतुंडसा
दृश्येनोत्प्रेक्षितवंतः लीलयेति तथोत्प्रेक्षणमपि ते प्राप्ते कालीत्वेत्यर्थः १८ अहो मित्राणि अस्मत्समुत्तरं गदत पुरःस्थितमिदं सत्त्वकूटं सत्त्वा नासनवा तत्राप्यस्मत्संग्रसनाय व्यात्तं यत् व्यात्ततुंडं तद्वदाचरति न वा १९
एतत्पश्यत मनुमोदमानाः केचिदाहुः सत्यमिति युग्मकेन यथार्थमेव यद्यथेदं अर्कं कुरुते रारक्तमिति तत्स्य पूर्वाभिमुखं स्थितिर्गम्यते तं घनमुत्तरोष्ठवत् पश्यत युवत्वा भावत्वार्षः तस्य घनस्य प्रतिछायया अरुणरोधः स्थलमे
धरोष्ठवत्पश्यतेति सर्वत्रान्वेति २० नगोदरे दर्यौ स्रग्विण्यौ अपांप्रांता त्यां प्रस्पर्धेते तुल्ये स्तः तस्य व्याततुंडस्य दंष्ट्राभिः स्पर्धते २१ आस्तृतो दैर्घ्यवान् मार्गः जिह्वा प्रतिगर्जति स्पर्धते एषां शृंगाणां मध्यगतमंधकारं
अंतराननं मुखमध्यं स्पर्धते नीलत्वासाम्यात् २२ इतो दूरे ह्यनं दावाग्निः स्यात्तेनोष्मायं बातः श्वास इव तेन दावेन दग्धसत्त्वानां योदुर्गंधः सोस्मान्विरुत्प्रेक्ष्यमाणस्यास्य सर्पस्यांतर्गतामिषगंधवत्स्फुरति मध्येम
ध्ये पस्यतेति विस्मयाय २३ निविष्टानस्मान् ग्रसिता किं ग्रसिष्यति तथा चेदनेन श्रीकृष्णेन नक्ष्यंती एवमजगरमन्यथोत्प्रेक्ष्येति वदंतो बकारेण रूशत्कमनीयं मुखं वीक्ष्य तवता त्रावहितेन ताव्यमिति नर्मणोच्चैर्हसं
तः सर्पोपसर्पणार्थमिव करताली कृत्वा निर्ययायुर्धीवन् २४ इत्थमतथ्यमिथोऽतज्ज्ञानां भाषितं श्रुत्वा अमदघासस्याजगरतुंडमपि स्वीनामद्भषायत सर्पसदृशावृंदावनश्रीचेने घाऽऽ नासत इति विचिंत्य सर्परूपी राक्ष
सोयमघनामेति च विदित्वा तान्निरोद्धुं यावन्मनो दधे तावत्प्रविष्टा इत्यादिकं च तस्य चास्य लीलावदंतरलीलेव अन्यथा सर्वज्ञस्य सत्यसंकल्पस्य तस्य तत्तदसमवापत्तेः २५ सवत्साः शिशवः प्रविष्टा एव कवलं
न तु रक्षसा गीर्णा गिलिताः जीर्णा इति क्वचित् हतयोः स्वकयोः भ्रातृस्मरतियः स्वेनातोनकारेः श्रीकृष्णस्य प्रवेशं प्रतीक्षमाणेन तेषामसंख्यानां तत्र समावेशो लीलाशक्तेरेव २६ स्वस्यारोहरागिनेः कल्परूपाद्वस्तुतो गृहस्यो
जठराग्निर्घासस्तेन वध्येषां इत्येवमादिरूपान् अपि स्वकाराद्वच्युतान् दूरे गतमात्रान् वीक्ष्य तावत्तेषु घृणार्दितत्वेन दीनान् मत्वा अस्ति नास्तीदिष्टं मतिरित्यत्र व्यक्तिक्रमव्याख्यानादिष्टं प्रमाणानुगामतिरयं तथा चे
द्वकवद्विनंक्ष्यतीत्यादिरूपा तथा तं यत्तत्र प्रवेशनं तेन विस्मितः सदा स्मेरमुखोपि विगतस्मितो विषण्णो नरूव यद्वा मदीयानां नाम निरुध्यमानानामप्येवं फलमिति विस्मयं प्राप्त इत्यर्थः २७ अत्र किं कृत्यं अस्य जीवनं अ
मीषां च विनाशनं द्वयं कथं वै निश्चितं न स्यादिति विचिंत्य तत्रोपायं ज्ञात्वा स्वयमपि खलस्य तुंडमविशत् यतो शेषं खलमरणसद्रक्षणयोः तन्मुखो निजविहारादेरस्य प्रकारं प्रपश्यति अशेषान्वत्सबालकान्वा पश्यन् तेषां
तादृग्वस्थ्या स्नेहाकुलः सन्निति भावः २८ अघादिनया नो घातरिताः यच्च कंसादयो देवा यच्च कौणपाराक्षसाः जन्हुपुरिति चाशेः सद्य एव गत्वा कथनात् २९ तत्तद्धत्त्या क्रोशनं चूर्णिकर्तुमिच्छोस्तस्य गलेत्रादा
वेव वृद्धे गलबिलमावृण्वन् किल तथा स्थूलोबभूव यतो व्ययः न व्ययः कोप्यपच्चयो भक्तानां यस्मात् बालादिरक्षार्थमिति भावः ३० ततो हि तस्माद्वधेनादवनिरुद्धप्राणादीनां मार्गभूतः कंठो यस्यास्ती तस्य नि
र्गतलोचनस्य इतस्ततो लमतश्च तुश्चार्थे कस्थेयं कगंतव्यमिति चिंतयतः निरुद्धांतरंगे देहपूर्णः प्राणाम्नर्गाः स्थितं ब्रह्मरंध्रं निर्भिद्यगतः ३१ तेन प्राणेन सहैव ब्रह्मरंध्रेणवा प्राणेष्विंद्रियेषु क्षणं तदद्दृष्टा म
तत्तुल्यान् स्निग्धामृतदृष्ट्या उत्थाप्य च षट् इत्या मुकुंदः अघासुरस्य मुक्तिं संसारात् सुहृदां चाघासुरात् मुक्तिं ददत् तदनु तेषां पश्चात् इतोव कृतविनोदेन ययौ ३२ भोगस्थितमिति स्वामिमतः पाठः भोगोत्थितमिति
तुस्थलपुस्तकेषु शुद्धसत्त्वमयं महत् प्रकाशवत् स्थूलं ज्योतिर्निर्गतं स्वेमवस्थितं दिक्षुक्रसामित्यनादरेषष्ठी तेषु प्रवेशमनादृत्य तस्मिन्नेवविवेश यद्वा तेषां आश्चर्येण पश्यत्सु दृष्टस्याप्यतीद्रियायामपि मुक्तोर्दर्शना
त् ज्योतिर्मयदेहश्च तत्काल एव प्राप्तः ३३ स्वेकृतः स्वकार्यकृतत्तस्य पूजामकुर्वन् सुरगंधर्वाः विमानारूढाः गणाः श्रीगुरु उदयः ३४ तेषां यानि अद्भुतस्तोत्रादीनि नैकोत्सवात्रनेकोत्सवायमंग

छंदस

लस्य नाम्नः तान् भक्त्यास्वधाम्नः सकाशाद् इति व्रजमसमीपे श्रीभगवतो ब्रह्मा ईशस्य महितन्मुक्तिमहिमानं कृत्वा प्य दृष्टं दृष्ट्वा विस्मयं प्राप ३५ श्रीपादस्य स्पर्शात्सत्कृतार्थो न्वदितिकिं ॰ वाच्यं तस्य मृत देहोपि वकीवत्संसो
रस्यादिप्राप्त्या रम्यतां प्राप्येत्याह राजन्नित्याश्चर्येण आक्रीडगह्वरे क्रीडार्थे महाबिले ३६ ॰ प्रश्नबीजत्वाय प्रहेलिकावदाह एतदिति कौमारं पंचमाब्दांतं पौगंडं दशमावधि कैशोरमापञ्चदशाद्यौवनं तु ततः परमिति
साधारणस्थितिः श्रीव्रजमत्तु कालेन न्यक्तदिशा ॰ पंचमाब्दारंभे पौगंडप्रवेशस्तथाचास्य हरेः कौमारजं कर्म चतुर्थाब्दवृत्तं पौगंडके पंचमेब्दे च हृष्टाश्चुः चास्य हरात्ममोक्षणमिति पाठः किं तत् अत्र हमत्स्या हेतोः अहि
मारेण नात्मना महेः सकाशान्मोक्षणं अयमर्थो ह्यानेन महाव्यालो यत्राहो नंदसूना हतो विचित्ता वयं चेति वीक्ष्यमाणसंगतः प्रसिद्धान् मृत्योरात्मना महश्च संसारलक्षणान्मोक्षणमित्यादिषु स्वामिपादाः ३७ केषांचिदाश्च
र्यं तु हिंदृष्ट्वाह नेतिद्वाभ्यां वधसः सर्वावतारनिदानस्य तत्र च मनुजाभैः नंदकुमारश्चासौ मायीद ॰ यावोस्त स्यविलक्षणस्वभावस्य स्यर्थः एतदद्भुतं न अघोपि च आत्मसाम्यं तत्स्वरूपतां प्राप्येति सात्म्यमिति क्वचित्
न च एदमसंभववतीत्याह यदिति उत्तमाधमविचारशून्यस्वतंत्रदयायाः ॰ रस्य यस्य स्पर्शप्रभावेणैव ध्वस्तपातकः खंडितासुरभयाद्य भावः ३८ यस्यांगमूर्तिस्तस्य प्रतिमाप्रतिकृतिस्तत्रापि केवलं मनोमयी सापिव
ल्लादंतरा हिता सती भागवतीं गतिं प्रह्रादादिभ्यो ददौ स एव साक्षात्स्वमंतर्गतः किं पुनः नित्य यातः स करवानुभूत्यास्वा दत्ता मायाधेन यद्धा नित्यं आत्मीनां जीवानां स्वरवानुभूति यस्मात्स चासो अभितो व्युदस्तमायश्च अजेति
सयुक्ति हर्षसंबोधनं ३९ येनभक्ते न चरितेन निगृहीतं वशीकृतं चेतो यस्य सः ४० कालांतरे कौमारे कृतं सद्यः कालहृष्टं कथं स्यात् तदाह यत्कौमारे हरिणा कृतं तत्पौगंडे कृतमिति कथमस्ट्रूचुः ४१ तत्संत्वप्रकारं महायो
गिन्निति तवाज्ञातं न किंचिदिति भावः ननु गुरुमेतत्तदाह हे गुरो शिष्ये गोप्यं नेति भावः स्वयमेव तर्कयति न्नमिति एतत्तेषां तथा ज्ञानं मायादुर्घटघटनीशक्तिः नान्यथा तन्मायां विना ते षामन्यतो ज्ञमासंभवात् ४२
श्रवणोत्सुक्येन गुरुं प्रोत्साहयति वयमिति बंधुपेक्षया क्षत्रियाधमा अपि इति विनयात्तपुण्यं मनोज्ञं तवापि त्वत्तः हे गुरो त्वच्छिष्यत्वेनैव धन्याः त्वत्तः कृष्णकथामृतपानेन धन्यतराः मुहुः पानेन धन्यतमाः ४३ बा
दरायणिरिति पितृपुत्रयोरन्योन्यतो महात्म्यविशेषः तेन प्रश्नेन शाद्वलजेमनादितत्तद्विशेषैः स्मारितः शाद्वलजेमनादिब्रह्मस्तुति पर्यंतानेतैश्वर्यमाधुरीकः श्रीकृष्णस्तेन हृतारिवलेंद्रियः प्रेमतरेणान्तर्लीनेंद्रियवृत्तिः अयं
प्रत्नमाख्यः प्रमोदानुभवः कंपादिवत्प्रेमविकारविशेषः संस्मारिते तिचित्रसुखपाठः कृष्णात करत्नतालदुंदुभिशंखादिवाद्ययुतकीर्तनघोषप्रयासेन लब्धेंद्रियबहिर्वृत्तिः पुनरिति दर्शमपि वारं वारं ईहशात्वं बोध्यते त
च्यतातेति संबोधनं यन्तत्रेत्यभिज्ञाः तदर्थं स्वातिकेराज्ञातत्तद्वाद्यादिकृष्णकीर्तनसामग्री रक्षितेति प्रसिद्धं शनैरित्यनुमानप्रेमतराक्रांतत्वात् हे भागवतेत्यादि गुरुत्वं श्रोतृयोग्यता चित्सुखीयहितीयांतपाठे प्रतिवचने हेतु वर्ते
र्त्वेयः ४४ इति श्रीभागवतदशमस्कंधगोचरः समातो द्वादशाध्यायस्तोषिणीसारसंग्रहे १२ इति भागवते दशमस्कंधे द्वादशोध्यायः १२ त्रयोदशे राजप्रश्नोत्तरत्वेन ब्रह्मणा पाल्यवत्सानां हरणे स्वयमेव तत्सर्वरूपः स
ना न्नब्दपर्यंतं विजहार तावत्स्वयं तं मोहनाद्याने नेसाधश्चिरिति वक्तुमभिनंदति द्वाभ्यां साध्विति महाभागेति गर्भेपि भगवद्दर्शनात् भागवतोत्तमेति तत्कथैकरसिकत्वात् द्विः संबोधनं प्रेमाविष्टचित्तत्वात् यद्यस्मात्त्वमेव
करोषि १ मुहुः श्रुतमपि नूतनयसी किमुताश्रुतमित्यत आचितमित्याह सतामिति कदाचिदपि रसान्न च्युतः तस्य वार्तेति तस्यानवरसपूर्णत्वं साधु प्रतिक्षणं नव्यवद्भवतीति ॰ यतो यं सारग्राहिणां सतां निसर्गः स्वभावः
तदेकत्वं पदत्वांशे दृष्टांतः विटानां स्त्रियावार्तेव कुत्सितविषयस्याप्यनुरागवशादेवं किमुतानंदघनस्येति भावः यास्मच्युतवार्तैव वार्था येषां तानि ॰ वागादिनीयेषां तथा भूतानामपि २ अवहितइति दुरवगाहत्वं व्यंजयन्
अत्र यद्दसंभवमिव बहुविधमाश्चर्यं मायास्यति तत्त्सर्वं स्वबाधमिति गुरुत्वं इतेति वितर्के एवं तर्कयामइत्यर्थः ३ तथा तेन प्रकारेण अघवदनरूपान्मृत्यो र्वत्सान् पालांश्च ४ भोजनं विधातुं पुलिनं नीत्वेति अहो इति
स्वषां केल्लैः पंक्तिभोजने नियुक्ताः संपत्ति योग्यस्ता मृदुला ॰ वालुका यस्मिन्नित्स्फ प्रवेशानसरवं सरोजैः प्रफुल्लमिव यत्सरस्तस्य गंधेनाकृष्टा अलयः पक्षिणश्च तेषां केडदके ध्वनयः तेषां प्रतिध्वानाय स्मिं श्रुतसदुमेरा
कुलं च एतेन कृपवत्सोगंध्यं भ्रमरादिगीतं स्ववासितादिनलत्वघनवृक्षछायाश्चेति भोजनसामग्री साकल्यं ५ स्फुधार्दिता इति पाठः गोपसंबोधनं यतो दिवारूढं अघतुंडप्रवेशादिना वेलातीता वत्सविशेषणं वा अत
अवरं तु नात्रैव रक्षत शनकैरिति जलपानमंथरत्वात् ६ शाद्वले हरितसूक्ष्मदूर्वामयदेशे इदमग्रेप्यन्वेति शाद्वले जमनं चेति वक्ष्यमाण ॰ तु शिक्यानि अघोर प्रवेशात्पुरस्तादेव वृक्षेस्थापितानि क्रीडासोकार्यो
येति शेयं ७ तदाते विरेजुः कृष्णस्य विश्वकपरितः बहुपंक्तिमंडलैः सहनेरंतर्येणोपविष्टाः श्रीकृष्णाभिमुखमानने एषामतः फुल्लनेत्राः सर्वाभिमुख्यं चाचिंत्यशक्त्यैव छदाः पत्राणि ८ केचिदिति
पुनरुक्त्या प्रत्येकान्वयेन समुच्चयाभावः ९ परीक्षार्थं सर्वैः सर्वे घेवपरिवेषितानां भोज्यानां मध्ये स्वस्वभोज्यानामेव पृथक्करसंगाधादि भेदैः स्वादुताविशेषं स्वस्वभंग्यादीनादर्शयतः सहर्षश्वरा
बुभुजिरे इति भगवानपि तैरेवमिष्टं परीक्ष्य समर्प्यमाणं तथैव बुभुजे इत्यर्थः १० तेभ्योपि भगवतो विशेषमाह बिभ्रदिति सर्वत्र उदरवस्त्रयोर्मध्ये वेणुं वामे इति कक्षपाणि विशेषणं स्निग्धदध्याद
नकवलं तदुचितसंधितलवल्यादिफलानि अंगुलसंधिषु स्वपरितउपविष्टान् सुहृदः स्वर्गलोके स्वर्गवासिजने यत्तभोक्तापि बालवत्केलिर्यस्येत्येवं भूतइत्याश्चर्येण पश्यति सती यज्ञस्य भत्तमद
कृविविधयत्नैर्यत्तु भागमपि नभुंक्ते स्वभोजनमध्ये एव तैः परीक्ष्य दत्तभोज्यादे र्ग्रहणश्लाघनं निंदनं भक्षणमुखभंगीहसनादिर्बाल्येषु क्रीडायस्येति पश्यति सती बुभुजे ११ अच्यु

राम २२

तेऽप्यात्मा मनो येषां ब्रह्मणा नेतुं तत्पेत्तेर्भिता २२ अस्य विश्वस्य नियोपि तत्र्यं सकृष्णः अहमेवैकाकी वत्सानिहैवान्वेष्ये आज्ञाकारान्नात्मान्माविरमत हे मित्राणीति विरामे मम महादुःखमिति भावः कथामा
विरमत वत्सला मा संभवात् यतो ब्रह्मप्रेरकोहमेव वत्सानेष्ये हा विस्मये इसं बोधने यद्वा इहामेइच्छेवेयमिति वास्तविकार्थो भाति २३ इत्युक्त्वा पालनपिनयचिति धियान्वेषणमिषेण यथा वित्यपि भाति अ
स्मवत्सानिति व्रजराजत्वेनान्येषामपि तदीयत्वात् भगवानपि अद्यादो विचिन्वन्नेव सपाणिकवलं एव बत्यामेति पश्यत दयालुतामिति भावः गव्हरसंकटस्थाने २४ अंभोजन्मजनि ब्रह्मतापभवतः
प्रभुः वर्त्तकमघस्यापि मोक्षणं दृष्ट्वा विस्मयं प्राप्तोपि अन्यत् दपि महित्वं द्रष्टुं तदंतरगतः तदवसरे आगतः यद्वा प्राप्तः इच्छिद्रः सन् तस्य वत्सानितः स्थानात् वत्सपाश्चान्यत्र नीत्वा स्वयं तत्र ... रूवः ततश्चान्वेष
णादुपरते तस्मिन् पुनस्तत्रत्यैवांतर्दधाप्परक्षितवानिति तत्रेयं वत्सान् स्तुति नमामि त्येयथापूर्वं सुरवं स्वकमिति वक्ष्यमाणात् ननु ब्रह्मणोपि श्रीकृष्णमपि कथं मोहस्तत्राह मायामोहनतात दुर्त्ता... कस्य स
र्वमोहकवाल्यलीलस्येत्यर्थः १५ वाछिवक्यादी उभावपीति ममवित्तं वो मदन्वेषणाय गताः सुशितसरवीनूबनांतरे स्पर्शिविवत्सानपि १६ ततो ब्रह्मणा कृतं ज्ञातवान् ननु कंचित्कालमज्ञानमन्वेषणं ततो
ज्ञानामिति केनाप्यहृष्टत्वात्तात्त्विकमिव वर्ण्यमानं न संभवतीति चेत् अत्रान्वेषणलीलाभिनिवेशो दृष्ट्वा ज्ञानशक्तिस्तटस्थासीत् तदनुसंधानेच्छायां तु सोपस्थिता ईश्वरशक्तीनां तदिच्छातंत्रत्वादिति तेरुत्कं म
मतु ततः सहसा तदेव सर्वं पाल्यादि मोहनांतर्धायन स्वमहिमदृक्षादिकं ज्ञातवान् यतो विश्ववित् तत्रापि श्रीकृष्णः तथापि त्वं प्रतर्हि त्वा दृष्टुं ब्रह्मणो मोहनाय विचिकाय कापि वत्सान् पाल्तां च्या दृष्टांतर्विपिने तुष्णीं
चासीदिति तेषेण द्वयोरन्वयः रुढियोगभेदाच्च द्वि कृष्णपदं न दोषाय ततो ब्रह्मदेवगते उभयाधिमात्मानं च त्वे इत्यग्रेप्यर्थः अन्वेषणावसानमहक्कागमनासंभवात् अतः सर्वत्रापि आंतरवादं तर्हि त्वात तत्रैवेक्षणं स्थि
तइत्यर्थ इति भाति १७ तन्मात्कृणां स्वपुत्रीयतीनां मुदं कर्तुं चानित्राणामघोदरप्रवेशवदन्यो सा तत्रांकयाताने कांतरक्षितुं चानुषंगिकतया कस्य चाद्भुतमहिमदर्शनेन मुदं कर्तुं एतत्सर्वसाधारणस्य त्वयात्तेषामेवान्वये
न वानस्यादिस्या त्मानमेव वत्सपालरूपेण वर्तमानं चक्रे एवं तदिच्छयैव तेषां मायाश्रमे शायानत्वं नब्रह्ममायासामर्थ्येन तितत्वं त्यते विश्वकृतामपीश्वरोवतारीत्यर्थः १८ तत्प्रपंचयति यावदिति यावत्संख्यानि वत्स
कानां वत्सपानां च तथाल्पकानां वत्सपानुचरबालानां क्रीडाभाजनाणां च वपूंषि यावंति यत्प्रमाणानि करादीनि यत्प्रकाराणि यष्ट्यादीनि यादृशानि शीलादीनि शील स्वभावः गुणाः शिक्षिताः अतिधात्राणीत तन्ता सापि
निवेशो वाभ्याकृतिराकारः निहादीत्यादिना मात्रादिषु व्यवहरणं द्वर्वां चादितेस्मरणादिवेच तावत्सर्वम जएवबभौ यतः सर्वप्रपंचस्वरूपः कथं भूतं सर्वं विष्णुमयं भगवदात्मकं न तु प्रपंचवत् मायामयं सत्यज्ञानानंते
त्यादिवक्ष्यमाणत्वात् तत्रानुरूपं दृष्टांतमाह गिरः पदरूपाया वाक्यरूपाया वा अंगं वर्णपदरूपं यथा पदवाक्यमयं वाक्यादप्रतिरिक्तपदाद्यनन्यरूपगमात् वाक्यास्यदानामत्यंतप्रविभागो न कश्चन अखंडवाचकं वाक्यवि
ज्ञज्यपदकल्पनेत्यादेः शाब्दिकसिद्धांतादितिदिक् १९ एवं सर्वात्मा सन् ब्रजं प्राविशत्तद्दाह स्वयमात्मैव प्रयोजकः आत्मरूपैरेव वत्सपैः प्रयोज्यैरात्मरूपान् गोवत्सान् प्रतिवार्य वनान्निवर्त्य आत्मानं तत्क्रियाकारवेशः क्री
डन्निति २० तत्तदात्मा तत्स्वरूपः प्रविष्टवान् भवत् यद्वा प्रविष्टवान् ततस्तत्तदात्मा तत्तद्गृहं वान् वत्सनिरोधं गोपाह्वानादिव्यापारवान् भवत आत्मायत्तो ध्वनितिरिव्यमरः २१ तन्मातृणां मुख्यप्रकारं वक्तुं स्नेहप्रकारमाह तन्मा
तरो वेणुरवेणत्वरोत्थिताः सत्यः सत्तान्मत्वा परं ब्रह्मैव दोर्भिरुत्थाप्यांकेकृत्वा पूर्वप्रणतानुत्थाप्य सकृ... स्वादुमादकं च स्तन्यमपाययन्तिति श्रीशुकस्तासां भाग्यं श्लाघ्यते त्वरेति निर्भरेति सकृ... आसवमित्यादिकं च पूर्व
तोविशेषस्तापकं २२ ततद्गृहेषु सर्वाभ्यासमाह ततइति यामोत्यप्रहरस्तत्र यो यमाः प्रहरागमनियमस्तेन गृहं गतः शोभनाचरितैः मातृहर्षयन् सायंदिनात्यदंडपट्टकं व्याप्यतानि रुन्मर्दनादिना लालितो बभूव उन्मर्दन
तैलाद्यैः मज्जनः स्नपनं चंदनादिना गलेपः आदिनाबन्य वार्ताशायनादि २३ गवां स्नेहविशेषमाह गावइति परिहृताश्चते संगताश्च तानवकान् स्वकानिति स्वेषामेव निकटे गमने वत्सतरान्वद्धिंगतानपि औधसं त
द्दिने सर्वमेव अत्र सत्वरं मुहुरित्यादि पूर्वतो विशेषः २४ एवं श्लाघितान्योपि ताभ्यो वैलक्षण्यं यशोदायामाह गोगोपीनामिति पूर्ववत् कृष्णेबाल्ये पिवास्मिन्नबालवत्सरूपे मात्रताव आसीत् किंतु स्नेहर्धिकों
विना स्नेहवृद्धिस्ततोप्यधिकेत्यर्थः अनेश्वररूपाच्छादनेपिस्वभावस्यानाच्छाद्यत्वात् पुरेवत् पूर्वं मातरि यशोदायामिवा स्वापि तोकता बाल्यभाव एव नासीत् किं तु मम मायया विना यशोदायां कृष्णोहमिति सत्योक्तिस्तद्
पत्याप्रकाशनं चेति न मायाअसंतु श्रीदामाहं सुदामाहमिति छ प्रोक्तिस्तदुचितरूपांतरप्रकाशनं चेति माय त्यता वद्वैलक्षण्यमित्यर्थः अत्रार्थे आस्वापीत्यस्वारस्यं स्वामिपक्षेतु हरेरपीत्य कृचितं २५ तेभ्योपिय
शोदानंदनेवैलक्षण्यमाह अजेति स्वापत्यत्वेनैव ज्ञातस्वपि अब्दं यावत् वर्धस्नेह एव वृध्यादिना वल्लीशानैर्लीलनक्रमेणयथा कृष्णे तथैव तेषु ववृधे कृष्णे तु अपूर्वं विलक्षणा ववृधे यद्वा यथायथावत् बाल्ता
दिशिक्यपर्यंते षु तेषु तत्तद्योग्यं ववृध एव कृष्णे च पूर्ववदाश्चर्ययुतावृद्धेइत्यर्थः श्रीदामादिषु तत्तच्छीलगुणादेराविर्भावः श्रीकृष्णे तु निरतिशय रूपशीलादिति तु नौ रं प्रेमाधिक्यमिति भावः २६ सवत्सादि
रूपी श्रीकृष्णात्मा आब्दियएवं वत्सादिमिषेणात्मानमेवात्मना पालयन् चिक्रीडे वनेति कुत्रापि केन विरहितमिति भावः २७ वत्सरांते तु रामएवकथंचिद् वुहितवानिति दर्शयन्नाह एकदेति पंचषासु पंचस्
वायद्रूका रात्रिषु ४ हायनस्यापूरणी षवसि व्यास्वित्यर्थः अनिश्चयतोक्तिः प्रेममोहेन अजेइति यौविनापि जन्म तत्सुत्रा रूदि स्यर्थः इदानीं तं प्रति स्वलीलां तस्य बोधनं स्नेहविशेषेण तेदवाबोधनेकारणं तु वक्ष्यते

ततो नंतरं गोवर्धनशिखरे चरंत्यो गावो व्रजसमीपे गोवर्धने ईशाणकोणस्थारिष्टासुरमर्दनकुंडसमीपे चरतो वत्सान् ददृशुः चरंत्य इत्येव तृणमिति शेषः पुनस्तृणमिति तस्मात् शास्यविवक्षा यातदा वेत्रोऽस्त्यपी
त्यर्थः २९ दृष्ट्वाथ दृष्ट्वो चेति पाठे तदैव सगवां कृत्वा पः तेषां स्नेहेनाविष्टः अत एव नस्मृत आत्मा देहादिर्येन सव्रजत्वेनागात् उपव्रजमित्यनुषंगः किंविधः आत्मपान् दुर्गममार्गेण चातिक्रांतः युक्ताभ्यां पद्भ्यां
धावन् ऊर्ध्वपादिवल्लक्ष्यमाणः ककुदि आकुंचितग्रीवः उन्नमिति मुखपुच्छः सर्वतः स्तवस्त्याः आस्रवति आस्रुत इति पाठद्वयेपि स्निग्धो पितु गमावत्स्यार्षः ३० तत्र रामदृष्टं वत्सेषु गवामतिस्नेहव्यंजकं चेष्टितमाह
समिति गोवर्धनस्याधः वत्सवंत्यः पुनः प्रसूता अपि स्वीयसुतुत्वा ओधसं ऊधसि तंव ३१ गोपानामपि तदाह तासां गवां रोधने आयासस्य मोघ्येन वेफल्येन लज्जासहितो रुत्रो धेन दुर्गममार्गेण न्यक्षे
शेन चाभिमुखमेत्य ३२ प्रेमरसो दयांतरा ये सत्यथ्यामासो दातासां दृष्टिपथे वत्सानयनादपराधिनामपि तत्क्षणामीक्षणे नोत्कटो यः प्रेमरसः तस्मिन् निमग्नाशयाः तानपि ताडयितुमागता अपि गतमन्य
वः प्रत्युत जातानुरागाः उद्धृत्यांके गृहीत्वा उद्धृत्येति पाठे दीर्घमार्षः घ्राणेरव घ्राणैर्मुदमापुः प्रेमरसः प्रेमस्फुरवातिशयः अनुरागस्त्वद्भातिशयः ननु गवामिव तेषामपि दूरतः सुतदर्शने स्मरणेनाक्रोध
संभवदिति चेत् तर्हि स्वनतिक्रामंतीर्गाः प्रत्येवमन्युर्व्याख्येयः ३३ कृच्छ्रात् ततो गताः तेषां वियुक्तसुतानां मुहुः स्मृत्वा उद्गताश्रवः प्रणयस इति वृद्धानां विवेकित्वाद् स्वल्पवियोगे मोहासंभवेपीत्यर्थः वृंदैर
पि गोपालनं स्वधर्मत्वात् बालपुत्रस्य नंदस्य प्रतिनिध्यभावात् स्वयं गाः पालयतः संगोचित्याश्च ३४ औत्कंठ्यमतिशयं औत्कंठ्यमिति क्वचित् हेतुमज्ञानेन चिंतयन् ३५ चिंतामाह किमिति द्वाभ्यां व्रा
सुदेवइव तोकेषु स्वापत्येष्वपि गोगोपालक व्रजस्य प्रेमवर्धते एतदद्भुतं युक्त्या तीते किं किंच सात्म नो मत्सहितस्य ममापि तेषु प्रेम कुत इति भावः ३६ अत्र कस्यापि माया एव हेतुः स्यादिति तर्कयति केयमिति इयं
तेषु प्रेमवर्धिनी माया कापि किं लक्षणा कुतश्चायाता केन वा कृता चेत्यर्थः कुत इत्येव विचारयति किं श्रीकृष्ण इव स्वसुतेषु सकलप्रेमवृद्धीछुतत्त्वोसि त्राश्रुपासिते दैवे वा नरे मुनिभिर्वांछिता स्वपुत्रेषु श्री
कृष्णवत्प्रेमवर्धनस्पर्धी गोपानां न संभवेदित्याशंक्यान्य पक्षमाह स्वापत्येष्वपि कृष्णवत्प्रेमवद्ध्या कृष्णप्रेमहान्या तन्माहात्म्यहानायकं सा दितिर्वा कृतावि यद्वा देवानां च मुनीनां च भगवता
सहक्रीडालोभेन पूर्वानंतर्धाप्य स्वयमाविर्भावमयीयं उतासुराणां पूतनावत्सासुरादिवत् दुष्टभावमयीति तयातयातु तेषु कृष्णवत्प्रेम न स्यादित्यत आह प्रायइति तस्य स्ववंचनासंभवात् हे लंतरा
दर्शनाच्च प्रायइति अस्त्विति च संभावनायां लोट् स्यादित्यर्थः विमोहिनी निरनुसंधान प्रेमवर्धिनी विदीर्घकालत्वार्थः ३७ सवयसान् समासांत आर्षः सखीनपि वयुनेन ज्ञानमयेन चक्षुषा वैकुंठं
श्रीकृष्णमेवापश्यत् ३८ एवं कृष्णरूपान् सामान्यतो ज्ञात्वा तं पृष्ट्वा तदुपदेशेन विशेषतो ज्ञातवानित्याह नेति तत्र देवी वत्सादिस्वकृत वितर्कं परिहरति एते वत्सादयो न सुरेशान च ऋषयः तान् तद्धा
प्य स्वयं वत्सादिरूपा जाता इति नेत्यर्थः तेषामीदृशप्रेमास्पदत्वाभासंभवात् इत्थं सतामिति रीत्या तादृक्कृतपुण्यपुंजत्वाभावाच्च असुरत्वपक्षोऽत्र खरवस्त्व संकोचान्नोक्तः किंच वत्सादिभेदा
श्रयेप्यस्मिन्नह हे त्वमेव भासि अत एको पि त्वं पृथक् नानाविधं सर्वं कुतोहरिति निगमात् संक्षेपादृदति स्नेहेन वाक्श्रमो निरस्तः इत्युक्तेन माहात्म्यानां प्रभुणा हेतुनावृतं तद्गतासीत् एवं तस्यानुभ
ख्यात्वे तद
हादेवत तत्त्वज्ञानमिति बोधितं एतावज्ज्ञानं दत्तयात्तु स्वभावस्य मदग्रजस्य तेषां तादृशावस्थासहनं न स्यादिति शंकया तदिच्छयैव ३९ अथ ब्रह्मस्थापितत्वाच्चं तत्कृपयैव ज्ञातवानिति दर्शयि
तुमाह तावदिति गते पि वर्षे इत्यर्थः श्रीघ्रागमनं महाभयात् यत आत्मनो हरेरेव भवतीति सः सकलपालादिसहितं रामस्तु तद्दिने क्रीडानिर्वाहाय रहस्य मुक्त्वान्यत्रापनीतः ४० दृष्ट्वा चातर्कय
दित्याह यावंत इति द्वाभ्यां मायाश्रयमायात लूप ४१ एते मोहिता इतावंतं ते मोहितन्य इतरेत्वात्र कुत्र स्युः ४२ एवं तर्कयन्नमुमोहेत्याह एवमिति समायाविस्तार कोपि आत्मभूः स्वतः सिद्धत्री
नोपि चिरं ध्यात्वापि भगवान्माययेवज्ञातुं नेष्टे ४३ विष्णुं स्वव्यापकमपि विमोहमपि संमोहयन् स्वमायया वत्साद्याच्छादनेन संमोहयितुमिच्छन् एवात्मानं भगवन्मायया विमोहितः न वा भ
गवानिति बोध्यते ४४ तत्रौचित्यमेव महामायाविनि क्षुद्रमायाया आवरकत्वाद्यभावादिति दृष्टांतद्वयेनाह तम्यामिति तमिस्रायां रात्रौ नैहारं हिमप्रभवं तमोवत्तमो यथा तमीनावृणोति
किंतु तत्र लीनं सत्तत्तमः सांद्रीकृत्यते न स्वयमेवावृतं भवति यथा च खद्योतार्चिरहनि अहः स्थितस्वरूपं विषये तत्र स्वरूपार्चिः प्रकाशयितुं न शक्तं किंतु तेनैव प्रतिहतप्रभं सत् ज्ञाप्यते
तद्वन्महति मायां युंजतः पुंसः सा इतरा नीच्चा माया तत्र न किंचित्करोति किंतु आत्मनिश्रयाश्रये प्रदेशे ष्वं तदेव निहंति अत्र्ययमपि वच्छब्दोऽस्ति वत्स्वाय यथा तथैवैवमित्यमरपाठात् एतेन प्रातिपदि
केषु तद्धितस्य वतः पाठो नोचितइत्यादि मनोरमोक्तं प्रत्युक्तं ४५ एवं मोहेन दीने जाते तस्मिन् श्रीकृष्णः स्वमहिमादिदृक्षारूपं तत्तामंहरितवानित्याह तावदिति नवकेन वत्साः पालाश्च सर्वे

राम
२३

यष्टिविषाणादयश्च यस्यं तमज्ञमन्नाद्यस्य तद्दष्टीशाच्छिमनपेक्ष्यब्यहशं तस्वयमेव तद्दृष्टो व्यक्तिः स्तताः कार्मकर्तरिल्नङ् ७६ चतुर्भुजा इति वैकुंठाद्यधिष्ठितरूपेण तस्य दर्शनं ज्ञाप्यते ७७ श्रीवत्सो दक्षिणस्त
नोर्ध्वे रोम्णा मावर्तो लक्ष्मविशेषः तत्र प्रभोयुक्तान्यंगदानि यद्वा श्रीयुक्तं वत्संवक्षो येषां अंगदानि दोःषु येषां रत्नमायानि कंचुवत्रिभाराणि कंकणानि पाणिषु येषां ते च ते च कटकेः पादवल्यैः पारिशेष्यात् ७८
ष्टरिव पुण्यवद्भिर्जनैः प्रतिमादिषु पर्पितैः अतः प्रीत्या स्वयं धृतैः ७९ चंद्रिकावद्विशदं यथा स्यात्तथास्मरैः स्मयमानै हासयुतैरितियावत् सारुणारक्ता येषां गात्रलक्षितैः स्वकार्थानां भक्तपुमार्थानां अ
रुणवित्राद गुणस्थानीयाभ्यां रजःसत्त्वाभ्यामिव स्वस्थ पालकाः इवोत्प्रेक्षायां ५० आत्मा ब्रह्मा तदादिभिश्च राचरैस्ततदधिष्ठातृभिः मूर्तिमद्भिः तद्वक्षणयुक्तैः अर्हाः पूजोपकरणानि एवं सर्वेषां प्रत्येकमेकैक
ब्रह्मांडेश्वरत्वमुक्तं ५१ महिमभि रैश्वर्यरूपैः मायाविद्यादिभिः विभूतिभिः शक्तिभिः ५२ कालस्वभादिभिर्महदादिसहकारिभिश्च तत्स्वभावः परिणामहेतुः संस्कारउद्बोधकः आदिना जात्यादि स्वीति
भगवन्महिमति रस्कृतस्वातंत्र्येरित्यर्थः ५३ एवं सर्वेषां मूर्तिमत्त्वेपि उपास्य मूर्तिनाविशेषमाह सत्येति सत्याः कालस्यापि कल्पकत्वेनाश्रयत्वेन चानित्यत्वासंभवात् कालस्वभावेस्मृत्तेः योयं कालस
स्यैतव्यक्तत्वं वेद्योचेष्टामाहुरित्युक्तेश्च सिद्धातेनित्यस्यैव सत्यत्वात् ज्ञानस्वरूपाश्च स्वप्रकाशत्वेनाजडत्वात् पश्यतोज्ञस्यतत्क्षणात् अदृश्यं नेत्युक्तेः नेत्र चक्षुषापश्यतिरूपमस्य तस्यैष आत्मा वृण
तन्द्रं स्वामीत्यादिभ्यः तेभ्य अनंताश्च परिच्छिन्ना इव भासमाना अप्यचिंत्यशक्त्याविभुत्वात् नचांतर्न बहिर्यस्येत्युक्तेः आनंदरूपाश्च निरुपाधिप्रेमास्पदत्वात् अपूर्वं प्रेमवर्धत इत्युक्तेः तत्रापित
देकमात्राविजातीयसंभेदरहिता तत्रापि च एकरसा सदैकरूपा मूर्तयो येषां ते अस्य च वाक्यस्य पंचमवेदरूपत्वात् सर्ववेदेतिहासानां सारं सारं समुद्धृतमित्युक्त्या सारूपच्चं त्याच्चनन्निर्मलत्वान्य
परस्परशंकावकाशः अतउपनिषदाम्ज्ञानं सदेव हृत्कृच्चक्षुर्येषां तेषामपि हि निष्ठितं नस्पष्टस्पर्शनं योग्य मूरिमहात्म्यं येषां ते शुष्कज्ञानिना मंत्रानधिकारात् ज्ञानिनां चात्मभूता नामित्युक्तेः तथा
भूताः संतो व्यदृश्यतेति ५४ सकृद्युगपदित्यर्थः परब्रह्मणस्सत्यज्ञानादिरूपं तदेकरूपान् तर्हि कथं चक्षुर्विषयत्वमित्याशंक्य विशिनष्टि यस्येति अतः स्वयं प्रकाशत्वात् सर्वप्रकाशकत्वाच्च तदिंद्रि
याणि स्वभासा प्रकाश्य स्वयं प्रकाशते स्मेति भावः एतच्चविदितासीतिश्लोके उपपादितं ५५ तस्यमोहमाह ततइति अतिकुतकेनाश्चर्येण उद्धृत्य दृष्टीः परावृत्य दृष्टिभिः पर्यायेण दृष्ट्वा हंसपृष्ठे निपत्य
तिवा यद्वा खर्पर त्वरपरत्वाद्विसर्गलोपेन प्रथमांत पदच्छेदः उद्धृत्य विचार्यः कोहमित्यनुसंधानरहितमित्यर्थः उद्धृत इति पाठस्तु भितः तेषां धाम्ना प्रभावेण अंतितदंतिकेस्तिमिति सर्वेद्रियाणि श्रेष्ठ
लसंमीवत्सु मप्यशक्तोभूत् कीरीदादिशोभस्य तस्य स्यापमा एदेवी पूरज्ञनाराध्याचतुर्मुखीकृतकप्रतिमेव ५६ एवं मोहमग्नतमज्ञाहास्याह इतीति इरेशो ब्रह्मणी इति पूर्वदृष्टवात्लवत्सादिरू
पमहूतं किं इदं वा किमिति मुह्यतीसती पश्चाद्रुष्टु मप्यनीशेसतिः परमाजः श्रीकृष्णः ज्ञात्वा तन्मोहादिकमवधाय अज्ञानवनिकां अयस्तोकाभिमानी ममैश्वर्यं द्रष्टुमयोग्य इतितस्यापरिमायातिरस्करि
णी अनेन परत्राज्ञात इत्यादि विशेषण विशेषितस्य स्वैभवदर्शनाय पूर्वं ब्रह्मदृष्टितो माया पसारितासीदिति गम्यते अनेनैवास्वरसेन स्वामिपादैर्यया मायया कृतं दर्शितं तामपसार्येति प्रथमार्थः
प्रदर्शयत्युक्तः मायातीतस्य स्वयं प्रकाशमानस्य मायया दर्शनासंभवात् क तस्य मोहइत्यपेक्षायामाह अतर्क्येति तर्कागोचरे निजः असाधारणो महिमा यस्येति मोहहेतुः स्वप्रमितिके स्वप्रका
शेय त्वं केस्करवं तस्मिन्नु चित्सुखरूप तन्मूर्तिवृंदे अतएवाज्ञातः प्रवृत्तेः परत्र परस्मिन् अतएवातन्निरसनमुखेन ब्रह्मकैः श्रुतिशिरोभिर्मितिः ज्ञानं यस्येति दर्शनायोग्यता यद्वा निजमहिमनीत्ये
व विशेष्यकर्मधारयात् चतुर्भुजवृंदस्वरूपे तद्वैतवेइत्यर्थः ५७ अर्वाक् बहिः प्रतिलब्धानि अक्षाणि येन मृतोयथास्वधासकादादिनोत्तिष्ठति तथा तत्कृपया थितइति पूर्वं हंसपृष्ठपतनं बोध्य
ते दृष्टीरष्ट नेत्राणि इदमभतास्यदं विश्वं आत्मना हं तास्पदं ने देहेन सह हति तस्यापि विस्मृतत्वं यद्वा पूर्वं वृंदावनाधिष्ठानक श्रीकृष्णाख्यनिजरूपं मायाजवनिकया छाद्य वैतवांतरं दर्शितवा
न् अत्रयोग्यतां ज्ञात्वा इदमाच्छाद्यतां जवनिकामपसारितवान् ततश्चार्वाक् संप्रति अवतीर्णश्रीकृष्णे प्रतिलब्धाक्षः पुनर्लब्धदृष्टीरिदं श्रीवृंदावनं आत्मना सह व्यचष्टेति ५८ तदेवंवि
वृणोति सपदीतियुग्मकं अनितोदिशः पश्यन् सपद्येववृंदावनमपश्यत् अन्ना नामाजिव्यैर्द्रुमै राकीर्णं समाप्रियं संततानि आसमंतात् प्रियाणि यत्र यद्वा सब्रह्मा मायाः राधारूपायाः लक्ष्म्याः
प्रियं राधावृंदावन इति मात्स्यात् यद्वा मया तमैव लक्ष्म्या सह वर्तत इति समः श्रीकृष्णस्तस्य अस्समय कृप्रियं वृंदावनं गोवर्धनमित्युक्तेः यद्वा मा यायास्तस्याः प्रियः श्रीकृष्णस्तेन सहितं
यद्वा समाना मात्मारामाणा मा प्रियमिति ५९ तल्लक्षणमाह यत्रेति नैसर्गदुर्वैरा अहिनकुलादयः सहैवासन् मृगादयस्तु मित्राणीवासन् अजितस्य योगादिभिर्दृष्ट्य व्यवशास्य भगव
तं आवासेः सदास्थितिः ते नद्रुतं पलायितं रुट् तर्षणादिकं यस्मात् ६० तत्र च परमेष्ठी पुरा पूर्ववदेव ब्रह्म अचष्ट

अपश्यत् किंविधं वृंदावने प्रभु एवं व्रजशिशुत्वं नंदकुमारत्वमेव नाट्यं चमत्कारकारकत्वात् ७ सर्वोत्कृष्टतया बहत् यत्नेन विम्लात् तत्र च ब्रह्मस्थानं दृस्यापि गोणताजननीं ब्रह्मज्ञाद्या पामरमनोहरां भक्तो प्रे
मवशानाम मयीं कामपि लीलां दृष्टवानित्याह अद्वयमित्यादि अद्वयं च वत्सान्विचिन्वन् एकं च सखीन् अगाधबोधं च विचिन्वन् अनंतं च परितो विचिन्वन् परं च शिशुत्वमुद्वहत् ब्रह्म च सपा
णिकवल्लमिति पुरेव स्फुत्तया पुरापि तत्त्वे वान्वेषणं बाध्यते सहसा वज्रगा महत्कलाच ६१ निजधारणतः स्ववाहनात् पृथिव्यामिति पदद्वयेन नमप्रकारः तेन देवत्वाभिमाना पगमो बोध्यते नहि देवा
मुर्वंस्पृशंति कनकेतित द्वपुषद्धष्टं पीतत्वात् चतुर्णां मुकुटानां मस्तेरंध्रियुग्मं स्पृष्टेति चतुर्दिगवस्थितमुखानां कृतार्थत्वाय भूमौ तुष्टिस्वात् ललाटपातनात् ततश्चानंदोदये चुबन्तिव
मुखे वरंघ्रिस्पर्शः आनंदाश्रुजलैरभिषेकमकृतेति स्वारस्यात् अभिषेकमित्यश्रुबाहुल्यं ६२ उत्थायोत्थाय पतन्पुनश्चिरं तास्तत्रासीत् ततः पतने हेतुर्महित्वमित्यादि उत्थाने तु श्रीमुखदि
दृक्षोत्था ६३ शनैरिति प्रेम्णा नतिस्यागासहनात्त्वेनैव ज्ञाद्या पादनाह्वालोचनेनिमज्ज्यति अश्रुधारया दर्शनाशक्तेः अथ नेत्रे स्वेपि द्वयाक्तिस्तदनिमुखं वर्त्यपेक्षया मुकुंद अपराधजालं मो
चूकं डद्वीक्ष्यापराध नयलज्जादीनादिनमत्कंधरः अनेन नमनं विहाय भगवतो वस्थानं समाहितइतियेदनसवेपथुः गद्गदयेति प्रेमसंपत्त्या च स्तोत्रसांगता व्यंजिता इत्थमवाचायं ल्ल
तएउ अस्तौत् बहुलं छंदसि इति ज्ञापो नलुकू लकारो गद्गदभावानुकरणे नैव ६४ इतिश्री मद्भागवत दशमस्कंधमध्यगः अगास्त्रयोदशोध्यायस्तोषिणीसारसंग्रहे १ इतिभागवतदशमे
त्रयोदशोध्यायः १३ यस्य रूपस्यैव मैश्वर्यमाधुर्यं ज्ञातं तद्रूपमेव निजपुरुषार्थत्वेन स्तोतुमुपक्रमते हइडेयेति त्वमेव स्तुतियोग्य इत्यर्थः अतस्त्वां नौमीति प्रवृत्तस्य भगवतः कर्मतयान्व
यः किमर्थं तेतुभ्यं त्वां प्राप्तुं क्रियार्थोपपदस्य च कर्मणीति चतुर्थी ननु निराकारब्रह्मरूपेण मस्तापित्तिरस्यैव तत्राह अभ्रवपुषे तडिदंबरायेति सजलमेघश्यामपीतांबरं त्वां प्राप्तुमित्यर्थः
ननु इस्यान्यपि वैकुंठेश्वरादयस्ते सुलभास्तत्राह गुंजेत्यादि गुंजाभिरवतंसो कर्णभूषणं परितः पिच्छानि यस्य तद्बर्हापीडं च ते लसत् मुखं यस्य वन्याः पत्रपुष्पादिमय्यः स्रजो यस्य वर्णोत्तया
वामपाणौ दध्योदनकवलः वामकक्षे वेत्रविषाणे जठरपटे संधौ वेणुरेतान्येव लक्ष्माणि असाधारणलक्षणानि तैः श्रीः शोभा यस्य मृदुपदे इति बाल्यमभिप्रेतं साक्षात्तदनुक्तिः पितृत्व प्राप्त
त्वादिना गौरवात् वनधातुविचित्रांगत्वादिसंग्रहणं नृत्यंते भीष्टं विशेषणमाह पशुपस्य नंदराजस्याङ्गजाय पुत्राय इत्थं च श्रीबालगोपालरूपं त्वामत्र प्राप्तुं त्वां नौमीति तत्तालसया वरां
तरोक्तिभिया प्रथममेव प्रयोजनमुद्दिष्टं १ ननु ममताहशस्वरूपमनूदितं कथमियस्तुतिरित्याशंक्यसंभ्रमं तत्रानिजसामर्थ्यमाह अस्यापीति अस्य वृंदावनविहारिणः तव यद्वपुर्वा मनादिरवतारस्तस्या
पि महिमानवसितुं कोबुस्याहमपि नेशानशक्नोमि कश्चिदपि नेशो न समर्थश्चासीदिति वा स्वबोधत्वया विशेषणे मदनुग्रहस्य ममस्पष्टः पालनादिना नुग्रहो यस्मात्तस्य किंच स्वेच्छयानाभक्तानां यथायथे
च्छात धाभवतः तर्हि कुतोन्नातुं न शक्यते तत्राह ननुभूतमयस्य अचिंत्यशुद्धसत्त्वात्मकस्य तनुभूतेति क्विसुखपाठे तन्त्वसूक्ष्मं यद्भूतं शुद्धसत्त्वात्मकं तत्स्वरूपस्य अस्य महतो भूतस्येति श्रुतौ भूतपदस्य परमा
त्मनि प्रयोगात् लोकनाथं महद्भूतमिति भारताच्च यदावतारस्येदं तदा कथं साक्षात्तव आत्मसुखानुभूतेरेव स्वसुखानुभवमात्रस्यावतारिणो गुणत्रयातीतस्य महिमानमांतरेण निरुद्धेनापि मनसा को वा ज्ञा
तुं समर्थो भवेत् ननु भूतेति पाठे पदद्वयं त्वर्थेनुशाषः अथवा निश्चितभूतमयस्यापि विराट्रूपस्य तव त्वन्नियम्यस्य वपुषे महि अवसितुं कोपि नेशो तदा साक्षात्तवेव नियम्यानियंतृभेदरहितस्य मद
नुग्रहस्य भक्तेच्छामयस्य चिदानंदमात्रस्य महिम्ना तु कोपि नेशा इति किमु वक्तव्यमित्यर्थः यद्वा अस्य जगतोद्वैतं यद्वपुर्नालधिशायिनारायणाख्यमित्येकपद्यं यद्वा अधुना दर्शितेषु चतुर्भुजेषु वपुरुपे
त षकस्यापि वपुष इति योज्यं शेषं समानं २ अतएव भक्तास्तेज्ञाने श्रमं विहाय त्वदीयवार्तामेव श्रृण्वंतस्त्वां वशीकुर्वतीत्याह ज्ञाने इति त्वदीयसगुणनिर्गुणस्वरूपादिज्ञानार्थं प्रयासमुपास्य ईषद
प्यकृत्वा सद्भिर्मुखरितां स्वत एव प्रकटितां यद्वा अन्यतो नीदिद्वयक्षामादिनियमोन शीला अपि संतः शुकाद्या मुखरिता अति सत्कारः कृतायया आहिताग्न्यादित्वात्परनिपातः तां भवदीयां भवदीयानां वा
वार्तां स्वस्थान एव स्थिताः संनिधिमात्रेण स्वत एव श्रवणं प्राप्तां तन्वादिभिर्नमंतः तत्र तन्वा सत्कारः श्रवणकाले जलिबंधादिः वाचाभिनंदनप्रोत्साहनादिः मनसा चास्तिक्यादिः एवं ये जीवंतिना
न्यत्कुर्वंति तैः प्रायशस्त्रिलोक्यामन्यैरजितोपि त्वंजितः प्राप्तोसीति किं तान श्रमैरित्यर्थः यद्वा भवदीयवार्तां जीवंति उपजीवंति तेदकजीवनं त्येनास्वादयंति तैः तन्वादिभिः कृत्याज्जितो वशीकृतोसित
न्वादिभिरपि साक्षात्प्राप्तो भवसि ननु मनस्यैव तत्र तन्वाप्राप्तिः हस्तीदाना श्रीपादस्पर्शादि वाचाच आह्वानादिना समागमादिः मनसा संकल्पनैव दर्शनादिः यद्वा तन्वादिभिः सहितो जितः तव तन्वादि

राम २८

त्यपितैर्वशीकृतानीत्यर्थः तत्र तनोर्वशीकरणं भक्तपार्श्वे सदास्थित्यादि वाचो भक्तगुणकथनादि मनसस्तच्चिंतनादि सममन्यत ३ तनुतां भक्तिं त्यक्त्वा श्रवणमननादिभिः केचित् ज्ञानाभ्यासिनो हस्य
ते तत्राह श्रेयइति श्रेयसां सर्वेषामेव स्तुतिर्यस्याः इति अवांतरफलत्वेन ज्ञानमपि स्वत एव भवितेति सूचितं ताहृशीमपि गुणलीलादिवार्तादिमयीं भक्तिमुदस्य उच्चैरवहेलया स्वयं तमनाहृत्य केवल २८
स्य भक्तिशून्यस्य बोधस्य लब्धये क्लिश्यंति श्रवणमननाद्यर्थं भितस्ततो गमने यमादिभिश्च श्रमं कुर्वंति तेषां क्लेश एव शिष्यते ते पूतत्वानुग्रहानुदयात् एवं तिचित्तशुद्ध्यादिनिरासः ननु तथापि सिद्धयः स्युरि
नै त्याह नान्यदिति तत्र दृष्टांतो यथा अल्पप्रमाणधान्यं विहाय स्थूलतः कणहीना धान्याभासास्तुषास्तदवघातिनो मूर्खा इत्युपहस्यं तेन किंचित्फलं केवलं हस्तादिखेद एवेति तद्वदित्यर्थः ४ तत्तथैव ज्ञानं नान्य
थेत्यत्र सदाचारं प्रमाणयति पुरेति इह लोके पूर्वे योगिनोपि संतः योगैर्ज्ञानमप्राप्य पश्चात्त्वयि अर्पिता लौकिक्यपीहा चेष्टा यैस्ते त्वदर्पितैर्निजकर्मभिर्लब्धया कथाभारुचिरूपया कथोपनीतया कथयात्वत्स
मीपं प्रापितया कथनीयत्वद्गुणरूपया भक्त्यैव विबुध्यात्मानं ज्ञात्वा जनाः सुखेनैव ते परां गतिं प्रापुः हे भूमन्निति अनंतमहिम्नस्तव भक्तेरेतद्युक्तं हे अच्युतेति त्वत्कृपया कथंचिदपि च्युतिर्नास्तीति भावः त
दुक्तं नच्यवंते तव यद्भक्ता महत्यां प्रलयापदि अतोच्युतः ख्यातो लोकत्रयमेकोविंशमुरव्ययइति ५ यद्यपि भक्त्यैव विबुध्यैतदुक्तं तथाप्यनंतगुणमहोदधेस्तव सम्यक् ज्ञानं न स्यादेव किंतु कस्यचित्किंचिदेव का
रुण्यादिगुणस्य माहात्म्यज्ञानं कस्यचिज्ज्ञानस्य किंचिदेव स्यादित्याह तथापीति तव गुणः कारुण्यादिरेकोपि तस्य महिमा माहात्म्यं संपदस्ताः कश्चिद्देवानामंतरं तरात्मभिः प्रत्याहृतेंद्रियैर्विबोद्धुं ज्ञातुं ६ अर्हति त
द्धि स्वानुभावात् स्वानुभवानुसारेण यथास्वानुभवस्तथैव न सर्वं थेत्यर्थः कथंभूतात् अविक्रियात् अभिलाषांतरशून्यात् स कीदृशोनुभवइत्यपेक्षायामाह अनन्यबोध्यात्मतया आत्मैकज्ञेयरू
पत्वेन अरूपतः रूप्यतइति रूपः अनिरूप्यादित्यर्थः नचान्यथा न स्वानुभवव्यतिरेकेण स्वानुभवं विना कथमपि भगवद्गुणमाहात्म्यं ज्ञातुं नार्हत्येवेति भावः ६ एवं तव गुणानां सर्वेषां माहात्म्यं दुर्ज्ञेयमित्यु
क्तमेव मियतापि न केनचिदपि ज्ञातुं शक्यतइत्याह गुणेति गुणा आत्मानः स्वरूपभूता यस्येति गुणानां प्रकृतिकार्यत्वं तथा च श्रीमत्तर्के गुणैः स्वरूपभूतैस्तु गुण्यसौ हरिरुच्यते नविष्णोर्न च मुक्तानां क्वापि भि
न्नो गुणो मतः विष्णुपुराणेपि सत्त्वादयो न संतीशे यत्र च प्राकृता गुणाः स शुद्धः सर्वशुद्धेभ्यः पुमानाद्यः प्रसीदतु पाद्मोत्तरे सोसौ निर्गुणइत्युक्तः शास्त्रेषु जगदीश्वरः प्राकृतैर्हेयसंयुक्तैर्गुणैर्हेयत्वमुच्य
ते इति एकादशे मां भजंति गुणाः सर्वे निर्गुणं निरपेक्षकं सुहृदं प्रियमात्मानं साम्यासंगादयो गुणाः इत्यत्र अगुणा गुणपरिणामा न भवंति किंतु नित्याइति च स्वामिपादैर्व्याख्यातमिति दिक् यद्वा गुणाना
मात्मा न अश्चेत्तव यितुर्गुणान् प्रकटयतस्ते गुणान् विमातुं एतावन्माहात्म्या इयत्संख्याश्चेति मातुं गणयितुं के ईशिरे न केपीत्यर्थः तत्र हेतुः अस्य जगतः सर्वजीवानां हिताय यावतीर्णस्य तदर्थं प्रकटितगुणस्य अ
यमर्थः यस्य जीवस्य येन यथा हितं स्यात् तथा स स गुणः प्रकटनीयः तत्र जीवानां तत्स्वभावानां च तदवस्थाभेदानां चानंत्यात् गुणानामपरमानंत्यं स्यादिति तत्कृणनापि न स्यादेवेति द्युरतस्तद्दिरोषवार्ता न
नु कालेन निपुणैः किमशक्यं तत्राह स्फकल्पैरिति निपुणैर्बहुजन्मनां कालेन भूपरमाणवोपि तथा खे हिमकणा अपि दिवि भासः किरणपर० माणवोपि गणिता स्युः तेपि भूपांस्वादीनामानंत्येपि ब्रह्मां
डपरिच्छिन्नत्वाच्छेषादिगणयेत् अनंतब्रह्मांडाश्रितरोमकूपस्य तु ते गुणगणं न कथं स्यादिति भावः ७ तस्माद्भक्तिरेव सगच्छतइत्याह तत्तइति सुरमीक्षमाणः कदा भविष्यतीतीक्षमाणः आत्मना कृ न
मर्जितमिस्यवद्यमोग्यवाद्धर्षविषादमभत्वा नासक्तः सेन्नकर्मफलं भुंजान एव न तत्प्रत्यादिना क्लिश्यन् नमोविदधत् इत्युपलक्षणं यत्कौचित् न त्यंतरस्य एवं यो जीवेत् स मुक्तिपदे मुक्तिकेत्यच्च
रणे येनापवर्गाख्यमदत्तबुद्धिर्भजेरवगेंद्रध्वजपादमूलमित्युक्तेः पदे आश्रये दायांत्येतलक्ष्य च यि दायभाक् भवति त्वमेव तस्य दायत्वेन वर्तसे वरावध्याः तुक्तं मुक्तो वैकावार्तेत्यर्थः पुत्रस्य
जीवनव्यतिरेकेण दायप्राप्ताविव भक्तस्य मुक्तो नान्यदुपयुज्यत इति भावः ८ भगवत्यपराधिनां त्वत्कृत्स्नमपि ज्ञानं निष्फलं भवतीत्यत्रात्मानमेव दृष्टांतयन् स्वापराधं क्षमापयितुमुपक्रमते
पश्येति हे ईश मे अनार्यं आर्यस्य भावः सोजन्यं वितत्वं च तद्भावो दौर्जन्यमतः तत्त्वं च पश्यति तस्य स्फुटत्वं व्यज्यते यदहं त्वय्यपि आत्मनस्तव वैभवं माहात्म्यं द्रष्टुं मंक्षु महित्वमित्युक्तेः यद्वात्रा
त्मनः स्वस्य वैभवं द्रष्टुं ऐच्छं इच्छोतिसंबुध्या ईशत्वप्रभो तत्रापि आद्येपि तरीति दौर्जन्य अपि यथा योगसर्वत्र अनंते अमितमहिम्नि परमात्मन्यपीति मद्दत्त्वं मायिनामपि मायिनी मोहके
पि स्वमायां प्रसार्य इति परममद्दत्त्वं ननु मन्माहात्म्यं द्रष्टुं चेत्को दोषस्तत्राह त्वन्माहात्म्यं द्रष्टुं तत्रापि मायाविततत्त्वद्रष्टुं कियानत्कौ वा वराकोहमित्यर्थः अग्ने रुद्धृता ज्वाला ग्नावित्येतिकियत्वेह

राग· २८

ष्टा तः ९ अतो मम तु छत्वाज्जवातीमहत्वाच्च मेक्षमस्व तु च्छत्वमेवाह रजो भुवइत्यादि अजानतइति तमोंशः अज्ञानजगत्कर्तापि हि मदनगाढतमोरूपेण धीभूत नेत्रस्य अतएव त्वत्तः पृथगीशमानिनः हि प्रसि
द्धे त्वमपि जानासीति भावः एषाहं नाथवानिति दासइत्येवमनुकंप्यः तव परमेष्ठिनः किमर्थं दास्यं तत्राह मयि मन्निमित्तं मत्प्रार्थ्यमिति अच्युतेति त्वमेवाच्युतनामा ततः सद्गुदेवप्रपन्नो यमित्यादि भवता ऽघम
त द्य्युतिर्योग्येव ममतु नामत्वाभावाच्युतिरपि स्यादिति भावः १० अहो तु छतमोहं मोहतमं त्वा क्षमापयितुमपि नार्हामि यतस्त्वत्तो ममबहु तरमिति वक्तुं संकर्षणविशेषमहत्तत्त्वं पुरुषत्वेन स्तौति

क्वेति तमः प्रकृतिर्महत्तत्त्वं अहंकारः खं चरो वायुः अग्निर्वाः जलं भूः पृथ्वी एतैः संवेष्टितो योऽण्डघटः घटपदं नश्वरताभिप्रायं तस्मिन्स्वमानेन सप्तवितस्तिः कायो यस्य निकृष्ट पुरुषत्वान्महापुरुषस्य तु नन्वि
तस्तित्वं स्मर्तं सोहं क्व च तमहित्वं महात्म्य किंविधस्य ईदृग्विधानि यानि अविगणितानि अंडानि तेएव परमाणवस्तेषां चर्या भ्रमणं तदर्थं जाता ध्वानी गवाक्षा इव रोमविवराणि सूक्ष्मप्रदेशा यत्र
तस्य त्व अतः स्वीय महत्त्वानुकंपां कर्तुमर्हसीति भावः ११ किं च मातुर्गर्भे क्रियमाणोऽप्यपराधस्त्वयि न घटते तैव यतो स्मत्कृपया जंतो मातृवोदरे विधाय विराजसे इति हिरण्यगर्भोऽतिर्यामि प्रद्युम्न विशेषतया
शिशोः स्तौति उत्क्षेपणमिति गर्भगतस्य पादयोः उत्क्षेपणं किं मातुरपराधाय भवति लोके अस्ति नास्ति व्यपदेशाभ्यां भावाभावशब्दाभ्यां रूषितं अभिहितं यत्तत्सर्वं वस्तु तव कुक्षेरंतः बहिः कियदपि किंचि
न्मात्रमपि किमस्ति नैव किंचिदित्यर्थः अतो ममापि त्वत्कुक्षिगतत्वान्मातृवदपराधो न ग्राह्य इति भावः हे अधोक्षजेति अधःकृतं स्वनियम्यं अक्षजं ज्ञानं येन तादृश इति मदिंद्रियाणां च दुरवलाद
पि न मद्दिमप्यपराधो गृहीतव्य इति भावः कुक्षिशब्देन लिंगसमष्टिहिरण्यगर्भप्रेरकं तद्व्यापकं स्वरूपं उक्तं १२ विशेषतो पितृत्वो मम जन्मसत्वात्सिद्धं तव पुत्रस्येति शार्थेन त्वया क्षेतव्यमित्याशयेन ग
र्भोदकशाय्यनिरूपविशेषस्येन स्तौति जगत्त्रयस्य अंतः सर्वाधो भागस्तत्र यदुदधिसंप्लवोदकं गर्भोदकाख्य एकार्णवः तस्मिन्नारायणस्योदरस्थनाभौ नालं कमलं मम तमिति विश्वः स्वार्थे
ण तस्माद्विशेषण मातृव्यवधानेन विना निर्गतो जातो ब्रह्मा इति यावाकु सातावान्मद्यान् भवति नैनिश्चितं तदाह यत्तो हे किं न विनिर्गतोस्मि अपि तु त्वत्त एवोत्पन्न इत्यर्थः पितरीत्यादिवाच्ये इ
श्वरे इत्युक्ते भगवति पितृदृष्टिमयोग्यां स्वस्य सत्पुत्रत्वायोग्यता या मत्वा १३ ननु तर्हि गर्भोदकशायिनो नारायणस्य पुत्रो न तु ममेति तत्राह नारायणस्त्वमिति त्वं नारायणो नेति का कान्वमेव नारायण इ
त्यर्थः न ह्यंशांशिनो भिन्न इति नारायणरूपेणापि त्वमेव वर्तस इति भावः अत्र नारायणस्त्वदभिन्नः त्वदंशत्वादित्येतत् आभ्यां स्वांतरवदित्यनुमाने विवक्षितं तत्र योऽशः स अंशाद्भिन्न इति कैमुत्यसूच
नया व्याप्तिं व्यंजयति हि प्रसिद्धो अखिलदेहीनां देहाद्युपाधिभिर्विच्छिन्नानां जीवानामात्माच्चात्त्वं रूपं त्वमसि त्वमेव जीवरूपेणापि वर्तसे किं पुनर्जीवेभ्यः शुद्धसत्त्वविग्रह नारायणरूपस्त्वमिति
भावः हे अधीशेति यतस्त्वमधीशः ईशानां संकर्षणादीनां सर्वावताराणामधीश्वरोऽसि त्वं सर्वांशीति भावः अनेन त्वदंशत्वादिति हेतुर्व्यंजितः दृष्टांतायाह त्वमखिललोकसाक्षी सर्वांतर्यामीत
दपि रूपं तवैवेत्यर्थः त्रिधामास्तु त्रीणि रूपाणि स्युः प्रथममन्यद्द्वितीयं त्वंडसंस्थितं तृतीयं सर्वभूतस्थमित्युक्तेः निगमयति नरभूज्जलायनात् नरात् महदादिस्तत्सृष्टुरुद्भूतं यज्जलं दीर्घं त्वमार्षं तदयना
द्यानारायणः स त्वं वाङ्गं भृतिरिति त्वदंशतो नारायणे सिद्ध इत्यर्थः अतस्त्वं वाहंपुत्र इति भावः ननु मायिकजलाश्रितत्वात् एव च आपो नारा इति प्रोक्ता आपो वै नरसूनवः अयनं तस्य ताः पूर्वं ते
न नारायणः स्मृत इति उक्त्या निरुक्तनामकं ममांशः किमु जगदिव मायिकं न हि न हीत्याह तच्चेत् त्वांगस्य सत्यमेवापि स त्वमेव संभवति न मायया मायिकमित्यर्थः अपि संभावनायां स्वाधिकारमनात्नो
च्य टीका हय विलक्षणं यदत्र लिखितं चितद्धार्ष्ट्यं च क्षम्यतां मम १४ संभावनामेवाह तच्चेदिति तत्तव सत्पारमार्थिकं सत्यं वपुः जलस्थं जगच्चेन्मायिकं जलस्थत्वान्मायिकं जगत्तु त्वयैव
त्वेदामया बहिर्दृष्टिना संवत्सरशतं विचिन्वता पितत्र किमिति न दृष्टं पुनश्च बहिर्दृष्टेन सद्यः सपद्येव नोऽव्यदर्शि न दृष्टं किमिति यन्मायिकं तद्धि हि दृश्येव दृश्यते न समाधौ इदं तु समाहितांतरकृत्ये
व दृष्टमिसत्यमेवेति भावः १५ ननु तवास्ति कुक्षेः कियदप्यनंत इत्युक्त्या जगतस्तदंतस्थितत्वात् तदसत्यं त्वं कुतोऽन तत्राह अत्रैवेति समाध्यनुभूते नारायणसत्यत्वं बहिर्दृष्ट्यनुभूते जगति नेति प्राचीन
मदनुभव आस्तां माया भ्रमनाशे भवतावतारे अत्रैवास्मिन्नेव त्वयि तज्जनन्या यशोदायाः अपि अस्य कृत्स्नस्य त्वत्तो बहिः स्फुटं दृश्यमानस्य तथा तवांतर्जठरे च दृश्यमानस्य प्रपंचस्य मायात्वं प्रकटीकृतं अहं मम
सोऽस्मादि तदुक्तेः यद्यप्यहं ममासौ इत्यादिना भापि यन्मायया इत्थसकृतां तज्जेगदृश्यं नरूपावृ मति मे मज्जातासएव मम गतिरित्यर्थः तस्य तत्र निगूढत्वादिति भावः १६ जगतो मायात्वमुपपादयति
यस्य त्वत्तस्तांडस्य कुक्षाविदं सर्वं सात्मन्त्वसाहितं नाति यथा तथा तत्र तांडमिह एतद्रूपत्वं च यत्त्वपि भाति तत्तस्मादतर्क्यमिदं सर्वं मायया विनाऽकिं संभवेन्न संभवत्येवेत्यर्थः तस्माज्जगत् त्वमि
वापारमार्थिकं सत् तव तु अधिष्ठानत्वादपरिच्छिन्नत्वाच्च सत्यत्वमव्याहतमिति भावः १७ आस्तां जनन्यनुभवोऽपीत्याह अद्यैवेति त्वद्दत्तेसाक्षत्वद्रूपं चचतुर्भुज बालवत्सादिकं च विना अस्य
त्वमहि व्यस्तमहितया दर्शितस्य विश्वस्य मायिकत्वं त्वया ममेव तदप्यद्यैव किं सम्यङ्न दर्शितं किं तु दर्शितमेव अथ सर्वमेव तद्दर्शितं विवृणोति एकोसीत्यादिना मया सहाखिलस्तत्वादिभिरूपा
शितास्तावंतश्चतुर्भुजास्त्वमसी जगतित्रसतोड्डानीति प्रागनुक्तमप्यद्यैव दृष्टमस्मद्ये सर्वे दर्शनादयं तयोः स्थितं तत्वेतद्रूपमेव पूर्णं ब्रह्मेत्यपि दर्शितमित्याह ब्रह्माद्वयं शिष्यत इति अद्वयपदेनोत्त
रमीमांसायामाद्यो ऽर्थो व्यवस्थापितं यत्तदद्यैतदेवाध्येत अहोभाग्यमित्यादि वक्ष्यमाणात् १८ तदेवं गुणावतारलीलावतारेष्वपि त्वमेव महत्त्वमित्याह अज्ञानतामिति द्वाभ्यां अनात्मनि

राम
२५

प्रकृतेः स्थितः आत्मा त्वमेव आत्मना स्वात्मन्येव मायां वितत्य सृष्टिस्थितिलयेषु ब्रह्मविष्णुरुद्ररूपेण भासि एषपदे न वर्तमानकालिकः पुरुषाख्यो गुणावतार उच्यते विश्वं पुरुषरूपेण परिपातीत्यु
क्तेः त्वमित्यस्य भासीत्यनेनैवान्वयः न तु यथापाठमेषपदेनेति १९ अजनस्यापि जन्मस्वरूपशक्त्या स्वयमाविर्भावः तस्य भक्तपालनायैवेत्याह असतामिति सदनुग्रहाय योऽसतां दुर्मदनिग्र
हस्तस्मादित्यर्थः प्रभोऽचिंत्यशक्ते २० एवं सर्वमपि निरूप्य कोहं तन्निरूपेणेति मत्वा संभ्रमेणाह को वेत्तीति हे भूमन् हे अपरिच्छिन्न भगवन् सर्वैश्वर्ययुक्त परमात्मन् सर्वांतर्यामिन् योगेश्वर
अचिंत्ययोगप्रभावेति संबोधनैर्दुर्ज्ञेयत्वं भवत ऊतीर्लीलाः अहो विस्मये क्व वा कथं वा कति वा कदा वाऽस्फारयसीति को वेत्ति तत्र हेतुः योगमायास्वरूपशक्तिं विस्तारयन्निति २१ यदेवं त्वमेवेषसर्वं
कारणं तस्मान्मायातः इदमुद्भवत् अपि यन्नस्य च्छेदं त्वय्यवस्थाश्रमाश्रित्येव सदिवावभातीति उपलक्षणमेतत् नित्यमिव सुखमिव चेतनमिव च अधिष्ठानस्य तव गुणैस्तथा तथा भातीत्यर्थः स्व
व्यतिरेके तु असदादिस्वरूपं मिथ्यासुखबोधरूपा च येयं तनुस्तद्रूपत्वाय सच्चिदानंदरूपाय स्वमायाक्लिष्टकारिणे इति तापिनीश्रुतेः अत्र सर्वत्र मायाशब्दो नैकार्थः संभवति सहि नानार्थः क्वचि
न्मिथ्यावस्तुप्रतिभासको मन्त्रादिशिक्षाविशेषो माया यथैंद्रजालिकेषु इयं स्वाश्रयाणामपि भ्रमं करोति अन्येषामपि भ्रमं जनत्वादिना तत्पादिनिवृत्तिः क्वचिद्दुर्घितघटने सत्यस्येव व्यंजिका शक्तिर्मा
या यथा मुन्यादौ भगवति च न चेयं पूर्वतुल्या कर्मादिकल्पितत्वाभावात् तदर्थे सिद्धेः सेयं मुन्यादिषु तपआदिमयी भगवति स्वाभाविकी चिच्छक्तिरूपा परस्य शक्तिर्विविधैव श्रूयते स्वाभा
विकीत्यादिश्रुतेः मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं इति श्रुतेश्च मायाख्या प्रकृतिः स्वभावसिद्धा चिद्रूपा शक्तिर्विद्यात् स्वरूपभूतया पितया भेदकल्पनया तद्वंतं महेश्वरं विद्यादिति तदर्थात्
अज्ञानरूपा अविद्यासमानरूपा विक्षेपशक्तिमती माया तु नात्र वाच्या देवसंभवति बिंबभूतशुद्धचिद्रूपत्वेन एव सर्वेश्वरत्वस्य विवरणाचार्यैः श्रुतिसूत्रभाष्यानुसारेण सिद्धांतितत्वात्
स्पष्टीकृतं चेदं अप्पयदीक्षितैः सिद्धांतलेशसंग्रहे यत्तु मायाप्रतिबिंबो वशीकृतमायः सर्वज्ञ ईश्वर इत्याद्यज्ञानरूपमायोपाधिकत्वं माधवाचार्यैः वर्णितं तन्नु विश्वतैजसप्राज्ञेति व्यष्टिसाम्येन समष्टा
वपि विराड्हिरण्यगर्भेश्वरेत्येवं त्रिविधभूतान्महाविष्णोरतिरिक्तो भौतिकस्रष्टारं हिरण्यगर्भमिव भूतस्रष्टारमीश्वरं तदंशभूतं समष्ट्यज्ञानोपाधिकमंगीकृत्य मंगानातुरीयब्रह्मबोधाय प्रक्रियामात्र
दर्शितं न तु वास्तवं देवेष्वज्ञानसंबंधसद्भावप्रतिपादकं तैरेव स्तवसंहितायां परशिवे पंचमुखतद्विग्रहे च मायातत्कार्यास्पर्शश्चैश्वर्यस्य व्यासात्याद्विप्रमाणावष्टंभेन सिद्धांतितत्वात् तुल्ययुक्त्या महाविष्णा
वपि तथैव सिद्धेः स्वयमेव स्वोक्तिविरुद्धवर्णने भ्रांतत्वापातात् तस्मान्मंदबोधायैव सा प्रक्रिया सापीह क्वचित्क्वचिदाश्रितेति भाति एतेन तदनुसारिणोन्येप्यर्वाचीनाः प्राचीनाश्च सर्वे व्याख्यातारो वेदि
तव्याः तथा च प्रथमस्कंधे त्वमाद्यः पुरुषः साक्षादीश्वरः प्रकृतेः परः मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनीति इयमेव चिच्छक्तिरूपा माया वैकुंठादिविभूतिव्यंजिका तृतीये योगमायाबलेन मुन
यः तद्याविकुंठमित्यत्र चिच्छक्त्याप्रतिस्वामिव्याख्यानात् अज्ञानरूपमायायास्तत्राभावात् न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिताः दर्शयामास तल्लोकं स्वं गोपानां तमसः परं परत्राजा
त इत्याद्येनेकवचनात् तृतीये स्वामिभिश्च सा वा एतस्य संद्रष्टुः सदसदात्मिका माया नामेत्यत्र द्रष्टुर्दृशानुसंधानरूपा माया उक्ता आत्मेच्छानुगतावित्यत्रात्मेच्छारूपापि कालवृत्त्या तु मायया गुणम
य्यामधोक्षजः वीर्यमाधत्तेत्यादौ विक्षेपशक्तिरेव अव्यक्तादिपदवाच्या मायेति व्याख्याता इयमेवापराशक्तिरेषा माया भवतः सर्गस्थित्यंतकारिणीत्यादावप्युक्ता ननु व्यक्तशब्दिता मायापि चि
च्छक्तिर्ब्रह्माभिन्ना चोच्यते ततो योगमायायाः को विशेष इति चेदुच्यते तस्या जडत्वेन चित्संबंधाच्चिच्छक्तित्वं ब्रह्मण्यध्यस्तत्वेन च ब्रह्माभिन्नत्वं अध्यस्तत्वाधिष्ठानाभिन्नं योगमाया तु चिद्रूपा
न ध्यस्ता स्वाभाविकीति दिक् माया वयुनं ज्ञानमिति निघंटौ ज्ञानपर्यायो मायाशब्दः माया दंभे कृपायां चेति विश्वकोशे मायास्याच्छांबरीबुद्ध्योरिति त्रिकांडशेषे च कृपादयोपि तद्वं स्थिते तत्र तत्र
यथायथं मायाशब्दे योजनीय इति संक्षेपः २२ नारायणस्त्वमित्यादिनोपक्रांतमवांतरप्रकरणं श्रीकृष्णमेव उपसंहरति एक इति तस्मात्सपाणिकवलोयं १ त्वमेक एवात्मा सर्वेषां रूलस्वरूप प्रकृतेः परोयमा
त्मा गोपालः कृष्णं वतीर्णोत्त स्म्याहवेदेति तापिनीश्रुतेः आत्मचं साधयति पुरुष इत्यादिना तत्र पुरुषः यो १ सावुत्तमः पुरुषो गोपाल इति श्रुतेः पुराणः ग्रहः पुराणपुरुषो वनचित्रमाल्य इति वक्ष्यमा
णात् सत्यः निर्विकारत्वात् स्वयं ज्योतिः यो ब्रह्माणं विदधाति पूर्वं यो विद्यास्तस्मै गापयति स्म कृष्ण इति श्रुतेः अनंतः न चांतर्न बहिर्यस्येत्युक्तेः आद्यः ईश्वरः परमः कृष्णः सच्चिदानंदविग्रहः अनादि
रादिर्गोविंदः सर्वकारणकारणमिति ब्रह्मसंहितोक्तेः नित्यः नित्यो नित्यानां चेतनश्चेतनानामित्युपक्रम्यते यो सौ गोपरूपः प्रयत्नात्प्रकाशाय इत्यात्मपदमित्यादिश्रुतेः अक्षरः यस्मात्क्षरमतीतोहमिति गी
तोक्तेः अजस्रसुखः कृष्णात्मको नित्यानंदैकरूप इति श्रुतेः निरंजनः विशुद्धज्ञानघनमित्यादिवाक्यात् पूर्णः तेहाचरूपासनमेतस्य गोविंदस्याखिलाधारिणोब्रह्मेति श्रुतेः अद्वयः अद्वितीया
यमहते श्रीकृष्णाय नमो नम इति श्रुतेः मुक्तउपाधितः साक्षात्सुकृतितः पर इति श्रुतेः अमृतः गोविंदान्मृत्युर्बिभेतीति श्रुतेः अजनपादानामन्यान्यहेतुहेतुमद्भावः २३ एतादृशात्मज्ञानेन संसा

२५
दा
त
राम
२५
कृष्ण

रान्मुच्यंत इत्याह एवमिति पूर्वोक्तप्रकारं त्वां श्रीकृष्णं सकलात्मनां सर्वजीवानामपि स्वात्मानं मूलस्वरूपं बिंबभूतं आत्मात्मतयाथ यथोक्तरूपेणैव ये विचक्षते आत्मादितोपि प्रेमास्पदतया अनुभवं
ति केनचिदुपदेष्टा गुरुरेव अर्कः इत्यन्योपदेष्टृदृष्टत्वं ततोलब्धयोसो परंब्रह्म गोपालः इत्यादिका गोपालतापिन्या बा उपनिषत् तदेव सूचक्षुस्तेन तरंती वेतीव शाश्वैः भवाब्धेरन्ततत्वात् त्वय्यंबुजा
क्षेत्यादिरीत्या वत्सपदायमानत्वाच्च २४ ननु जीव एव प्रपंचमूलभूतः तदज्ञानेनैव जातः प्रपंचस्तज्ज्ञानेनैव नश्यति किं भगवज्ज्ञानेनेत्यत आह आत्मानमिति आत्मानं स्वमेवात्मतया मूलस्वरूपत्वेन विज्ञा
नतां त्वां त्वात्मानमेव संतं मूलबिंबतया अविज्ञानतां तेनैव त्वदज्ञानेनैव निखिलं प्रपंचितं जातं तस्मात्कृष्णज्ञानेनैव भूयो महत् दीपितः सा विलासात्तानं लीयते रज्ज्वां सर्पशरीरस्याभ्यासापवादावज्ञानज्ञानेहेतु
कौ यथेति अयमर्थ एकादशे नयोंऽक्षितीयाति निर्वशितस्यादिति श्लोकटीकायाः स्पष्टः २५ अन्यत्तत्वमाह अज्ञानेति अतः अव्यभिचारी नित्यः सः साक्षी यो भावयति चेतयतीति भावः प्रत्यगात्मा तस्माद्दन्यो
मायावच्छिन्नरूपत्वात् ईदृशो नामप्रसिद्धो भवेनबंधस्तन्मोक्षश्च तौ द्वौ अज्ञस्य चिदात्मनि प्रत्यक्स्वरूपविचार्यमाणे नस्तः प्रत्यगात्मत्वनयोः संबंधोस्ति न वेति विचारे क्रियमाणे न संभवत इत्यर्थः तर्हि कथं स्फुर
तस्तत्राह अज्ञानेन न सेत्ता प्रतीतिर्ययोः सा अहन्निर्लिंगसमावायन्यायेन रात्र्यहनीकालत्वच्छिन्नरूपत्वात्तरणेरन्योस्तः तरणौ तु विचार्यमाणे तत्र यथा न संभवत इति २६ यत्तु सकलात्मनामप्यात्मानं बिंबभूतम
पि त्वां सोपाधिका ता तया विचक्षते ते त्वति मूर्खा इत्याह त्वामिति परमात्मानमेव त्वां परं केवलं आत्मानं सोपाधिकजीवात्मसमं मत्वा भवान् पुनर्मुख्य आत्मापि वाहिर्वृंदावने अमृग्यो न मृग्यते किंतु देहांतरे
व मृग्यते अप्यर्थे चः अपुनरिति छेदः अभावे नञ् नानाचेश्यमरात् स्वतंत्रोप्यकोरानिषेधे यद्वा आत्मानं सर्वेषां मूलं शुद्धब्रह्मस्वरूपं त्वा परमनात्मानं मत्वा परं त्वत्तोन्यमेव शुद्धात्मानं मत्वा आत्मकश्चिदन्यो
न वेदिति कल्पयित्वा त्वत्सदनात् तस्माद्वृंदावनाद्बहिरन्यत्र आत्मा मृग्यते अहो विस्मये इयमज्ञजनतायाः अज्ञतेति यदि भवानेवात्मा न स्यादन्य एव स्यात्तदाहमपि स्वचक्षुर्नैव स्थित्वात् अतः समाधास्य नात्रवृंदावने न ससायास्यां
न हि गृहे नष्टं वने मृग्यत इति भावः संधिश्छांदसत्वया प्रगृह्यत्वविकल्पात् ज्ञं मन्यजनताया अज्ञतेति वा यद्वा यज्जीवेश्वरतत्वविदोपि समाध्यादिकं परित्यज्य वृंदावन एव संप्रति श्रीकृष्णं मृगयंते तान्स्तौति प्रथममभक्तोपास
नया परं केवलं त्वां आत्मानं जीवस्वरूपाभिन्नमनुभूय ततः परमात्मानमेव चानुभूय पुनरधुनात्मा सर्वमूलभूतो भवान् बहिश्चक्षुरादिगोचरे मृग्यः संपाद्यते तस्मात् सुजनता विततादृशा इति मृग्यः इत्यत्रात्वाभावश्चार्षः २७
पूर्वत्र हेतुमाह अतर्भवेइति यस्मादंतर्भवेऽस्य जगतो मध्ये संतो भवंतमेव मृगयंति दोषहानेर्गुणैः पूर्णप्राप्तुते षाल्लालसातादृशाश्च भवानेवेति किं कुर्वतः अतस्त्वद्व्यतिरिक्तमन्यदपरितोषेण त्यजंतः ननु व्यवहारस्य
स्य जगतः परमार्थसत्यमधिष्ठाने आरोपितत्वात् आरोपितस्य चाधिष्ठानानतिरेकेण जगद्रूपेपि ममैव ग्रहणमिति किमिति परितोषेण मदन्यस्यागइत्याशंक्य प्रातिभासिकरज्जुसर्पदृष्टांतीकृत्य सतो व्यवहारे
णाह असंतमिति अहिमंतरेण तन्निषेधं विना अतिसंतमपि गुणं रज्जुं किमु यतिप्राप्नुवंतिसंत इति साधारणविवेकिनः पूर्वेषां तद्विशेषाणां परमार्थविवेकिनां दृष्टांतः २८ एवमपरिमितं त्वन्महात्म्यं प्रस्फुटमपि
त्वत्प्रसादेनैव ज्ञायते न त्वन्यथेत्याह अथापीति हे देव प्रकाशमान वृंदावने क्रीडापरेति वा अनुगृहीत एव भगवस्तव महिम्नः तत्वं जानाति हे भगवन्निति वा अन्यः प्रसादहीनः एकोनिःसंगोपि यद्वा आश्रमा
त दिमुख्योपि चिरमपि विचिन्वन्नंदंतर्याग श्रवणमननादि कुर्वन्नपीत्यर्थः २९ ममतु प्रसादेन महिमानं ज्ञात्वोपासनस्य यत्फलं साक्षात्कारः स एव संपन्न इत्येतदेव प्रार्थयति सर्वप्रकरणं कृष्णोपर्यवसाय ६
यन्नाह तदिति यावत्समाप्तिः हे नाथ कामपूरक पारमेष्ठ्यपदप्रापक भाग्यतोपि स एव भूरिः महान् भागो भाग्यं अत्र भवे ब्रह्मदेवजन्मनि अन्यत्र तिर्यक् मध्ये यत्र जन्मतस्मिन्चेति न तत्र ममाग्रहः किंतु त्वज्जनेष्वेव इति
यावाशया त्यामुच्यते येन भाग्येन भवज्जनानामेकः कश्चिदपीति सेवासंभवात्कायेनतो निश्चयः हरिणादीनां तत्सादावल्लेहनादिसेवा दृष्टातिरश्चामिति यद्वा यद्यप्येवं तव महिमाथापीत्वसादाज्ञप्रसादस्य त्वेशोपिपस्मिन्निमुत
पूर्णस्तेन नाथ केन अनुगृहीत एव ज्ञास्यते भवज्जनानामनुचररूप एकोपि यः कश्चिद्भूत्वेति पद्यद्वययोजना ३० ननु सत्यं त्वयापि सेवितुं मृग्यो हि किंतु त्वं ब्रह्मा मज्जनाभ्यां अत्र गोरक्षक एवेति यादवादिष्वेव सत्त्वथापि त्विदानीं केषा
मेव महिमा सर्वश्रेष्ठ इति व्यंजयन्स्वाभिलाषं सूचयति अहो इति अहो शब्दः प्राथम्यं विस्मयातिशयाय अतिधन्याः कृतार्था अतः परमकाष्ठां प्राप्ताः के व्रजे गावो रमण्यश्चेति बहुत्वमन्यत्रैकस्या अपि तथा भाग्ये दौर्लभ्याय
अद्याप्यधनाल्पमिति पाठः अथ सर्वेप्यध्वरा अद्यानातिकालतोद्य पर्यंतं यस्य तव तोषाय न समर्था विहुत्वा देवेत्यर्थः अमृतादिनापि देवायत्र भागोपजीविन स्त्वत्तु यत्र भाग श्चपि न सादरः अहो किमिदंस्तन्यामृतमिति भो
वेः तेन त्वया पीतं स्वयं श्रीमुखेन चोषितं तदप्यतीव तच्च मुदा परमप्रमोदपूर्वकं तत्रापि वत्सवत्सपरूपेण त्वनेकधाभूय परमल्लोभेनेति भावः एवं उत्तरोत्तरं चमत्कारवैशिष्ट्यं बोधयि ३१ न केवलं गोगोपीनामेव इदृशं भाग्यं
किंतु व्रजवासिमात्राणां किंच नाल्पमध्वरा इति कर्मकांडदृष्ट्यैव न च चमत्कारः किंतु ब्रह्मकांडदृष्ट्यापीति पुनरतीव सच्चमत्कारमाह अहोइति अहो आश्चर्यं भाग्यमनिर्वाच्यः प्रसादः विप्रामुहुश्चमत्कारा व ज्ञात क
थं चमत्कारमात्रं व्यंजयसि येषां तत्तान् कथयतत्राह नंदराजव्रजवासिमात्राणां पशुपक्षिपर्यंतानां तदाश्चर्यं भाग्यं चाह परमानंदं यत्र देव ये प्राप्ति त्रबद्धूचित प्रेमकर्तृप्रेमविषयश्च दृस्य जश्चानुरागोस्मिन्त्स
वेषां नोव्रजौकसां नंदतेतनये स्मास्त तेस्याप्यास्ति कः कथमिति वक्ष्यमाणात् आनंदस्य छांदसक्लीबत्वेनानंदब्रह्मेति श्रुतिवाच्यः सूच्यते आनंदरवल्तुसर्वे प्रेमकुर्वंतिन त्वानंदः कुत्रचित् यस्तुत्वानंदेति
प्रेमकर्तासोपि श्रुतिमात्रवेद्यत्वेन परमः अलौकिकः अतः आश्चर्यं भाग्यंच किंच सनातनं कस्यचित् स्फुरानंदोपिन नित्यः येषां तु तादृशोपि नित्यः कथं भूतं ब्रह्म ममानंदतोपि शातेगुणानंदतया प्राच्यापियतेला

राम
२६

चोनिर्वर्तते इत्यादिभिर्वाङ्मनसातीतेनब्रह्मत्वेन ब्रह्मेतिश्रुतिभिर्गीतमपीत्यर्थः एतादृशस्यान्येन मित्रत्वं न कश्चिद्दृष्टमिति भावः नचैतावदेव किंतर्हि अस्त्येतेसोरभ्यादिभिरपि रूपगुणलीलैश्वर्यमा
धुर्यादिभिः पूर्णमपि अथवा परिच्छिन्नमपि इत्याश्चर्यादिकं प्रत्यक्षेप्यस्मिन्निदमित्यनुक्त्वा परोक्षवन्निर्देशः कौतुकाय एवं श्रीकृष्णस्य प्रेमसरस्वं निजाभिलाषं प्रख्यापितः ३२ अजेशोक्त्वा भाग्यमेव केमुत्येन
स्तोतुं कदाचिदागत्य तन्माधुरीं सविनीसैषामेव भाग्यमतिनंदनस्वाक्रियं दृढयति एतासामिति एका अद्वितीयानुपमा येषां भाग्यमहिताः स्तोककस्तावत् तुरीयतः एतत् व्रजेप्रख्यात तत बाघ्रिकमल्लदृषीक
चषकैर्निजचक्षुरादिपानपात्रैः शर्वस्यादिमुख्योयेषां ते दशदिक्पालदेवता वयं पुनःपुनरिहागत्यपिबामः शक्रःशर्व परमेष्ठि पुरोगा इति वक्ष्यमाणात् अतोवयमेवतावद्भूरिभागाः किमुतेते इति भावः कीदृशं अ
मृतासवं स्वादु च मादकं च अमृतास्पृहीना मुक्तास्तेषामपि मादकमिति वा एतेच तत्तदृषीकचषकाश्चैकैकपदांवा ३३ एवं महात्म्यमनुवदन् तज्ज्ञातानतर्हि तत्वा च दध्रिसेवेच्छापि धार्ष्यमेव तिव्यंजयन् अजजनां
घ्रिरजएव बहुमन्यमान्यः प्रार्थयते तदिति तदंघ्रिरजः प्राप्तिप्रतिकूलमुक्त्यादिपंचकमिहेत्यादिपंचभिर्निरस्त तत्रजन्मैव त्वद्भूरिभाग्यमितिमुक्तिर्निरस्ता इहमथुरामंडलेइति श्रेकुंठादि किमपीति सारूप्यादि अटव्या
मितिमथुरानगर्यादि गोकुलेइति मधुवनादि किमपिदूर्वादिमद्गुल्मेणरूपमित्यर्थः तत्रैव नरजोभिः सम्यगभिषेकासिद्धेः एवं ज्ञाते कोत्लामस्तत्राह कतमेति गोकुलवासिनां मध्येकतमस्य यस्यकस्यापि अंघ्रिरजसाभि
षेकोयत्रेति सर्वांगसाफल्यं ननु साक्षात् गोपादिजन्मैव कुतो न प्रार्थ्यते तत्राह यदिति यस्यगोकुलमात्रवासिमात्रस्यनिखिलंजीवितं भगवान्मुकुंद एव एनं विना यज्जनः क्षणमपि जीवितुं नशक्तः तत्रभगवानिति दुः
साध्यत्व मुकुंद इति योमुक्तिमेव ददाति न भक्तिमिति आस्तामन्यो दुःसाध्यत्वं दुर्लभप्रेमत्वं च यस्यतस्यपादरजएव अद्यापित्वय्यवतीर्णे विश्रुतिभिर्मृग्यत एव कतमद्रजः कियन्महिमेति ज्ञातुं इष्यत एव नतु तत्स्वरूपं प्राप्यते
यतो वाच इति श्रुतेः अतो मादृशाज्ञानप्रदश्रुति दुर्लभत्वात् रजस्यपि मम प्रार्थना न युज्यते कुतः प्रेमवशीकृतत्वस्य तादृक् गोपादिजन्मप्रार्थनेति भावः अनेन नंदयशोदयोर्माहात्म्यमतीवेति के मुत्सबोधितं साक्षात्त
दनुक्ति स्तोतुमपि कोहमितिलज्जया सरवायस्कस्वापराधभिल्लज्जाभ्यां नस्कृताः तदाह एनायतुलब्धप्रमोदास्तन्मातरएवोक्ताइतित्तेयं ३४ ननुत्वमेवलब्ध्वं स्तोमीति प्रतिज्ञातमिदानीं त्वंत्ते षामंघ्रिरजो ध्यते किंचत्वा
दृशायाप्येषामंघ्रिरजएव फलत्वेन दास्यतस्ते भ्योवा किं दास्यइत्यपेक्षायामाह एषामितिउत अपिभवानप्येषां कुत्रकिंफलं रातादास्यतीति निश्चेनो विश्वफलात्सर्वफलात्मकात्वत्तः अपरं फलं कुत्राप्यपरत नअपूर्वादिणः
शाता अज्ञानदित्यर्थः मुह्यति निश्चया शंके ननु तद्धोत्मानमेव दास्यतत्राह सतांधात्रीजननी वेषादनुकारादिवेति सोपि हिंसामयदंभ एवनभक्तिरूपइत्यर्थः तेन पापिष्ठापूतनापित्वामेव प्रापिता अतस्तत्समानफलत्वं कथं
युक्तमिति भावः तर्हि तत्संबंधिनामपि दास्यामीतत्राह सकुलाप्राक्तनाधुनिककुलैः सहितापि अघबकयोरस्तु स्वतंत्र एव तत्प्रशंसास्ति एवं चैतेषां तावदेव कथं पर्याप्तंस्यादित्याह यदिति कृतहितकारी प्रियः प्रीतिविष
यः येषांधामादयस्त्वदर्थमेव तवतु तत्तदनेकप्रियजनार्थत्वमित्यर्थः तदेवं तेषूर्णमवांस्तत्प्रत्युपकारासामर्थ्ये नाभूर्ण इवेति तत्पादः किमिव दास्यतीति भवंतमृणीत्वेन परवशं दृष्ट्वा तादृशानि ज्ञाभिलाषसिद्धयेतदंघ्रि
रजएव प्रार्थितइतिभावः तथापूर्वपक्षसंगत्यान्यफलासंभवप्रदर्शनेन तद्वशीकारमयप्रेमैव परमफलत्वमिति सिद्धांतः सूचितः ३५ ननु विगतरागादिदोषाणां संन्यासिनामपि नमत्तः परं किंचिदस्ति कथमेषामपर्या
प्तं तत्राह तावदिति रागो विषयप्रीतिः आदिना हर्षशोकाद्यास्तेनाः तस्कराः तावदेव भवंति तथा गृहमपितावदेव बंधनागारं तावन्मोहोपि पादपृष्ठं शृंखला यावज्जनास्ते तव न भवंति च यान स्वीक्रियंते जाते तु तावकत्वे रागादयस्त्वन्नि
ष्ठामोचकाएवभवंति तत्ररागस्य यापि प्रीतिरविवेकानां विषयेषु अनपायिनी साधनुसारेणतन्निष्ठत्वं गृहस्यतदर्पितत्वेन मोहस्य च तत्प्रेममयत्वेनेति नयतीनां विशेषः भजनं तु भक्तानामधिकं एतेतु भक्ताः शिरोमणयः आत्मारा
मेभ्योपिमहत्तराः ते वंवतइतिनतरां पर्याप्तमिति भावः यद्वा प्रत्युपकारासमर्थमपि कुतः सेवंतेतत्राह हेकृष्णचित्ताकर्षक रागादयः स्वाभाविकाः भोजनेच्छादयः गृहंनिवासस्थानं काप्यचित्कृत्वाच्छिस्मृतिलक्षणोमोहः एतेता
वदेवदुःखदाभवंतियावत्तवदीयाः साक्षात्त्वत्सेविनो न भवंति त्वत्सेवाप्राप्तौ सर्वमपि सुखमयमित्यर्थः जगदानंदिनीतवमोहनलीलेवात्र हेतुः यस्फलभोजनरागादिकं चानुसंधायैव सेवंतइतिभावः ३६ नन्वेतए
वैषांपुत्रादिरूपेण वर्तते तत्राह प्रपंचमिति प्रपन्नायाजनताजनसमूहस्तस्या आनंदसमूहं प्रथयितुमिति न हि कपटपुत्रादिना तादृशं तत्केशरान्तरण्यं संपद्यत इत्यर्थः यद्वा ननु नोमीड्येत्यादौ तत्भूरिभाग्यमित्यादौ
चत्वयामेषांच प्राप्तिर्निजपुरुषार्थतोक्ता सा तदासंभवेद्यदि ममैषांचाप्राप्यत्वं स्यात् तत्तु नरसाधारणलीलादर्शीभिरितिदिति तैरेर्न मन्यते तत्राह प्रपंचमिति प्रपंचास्पृष्टलीलानित्यायोग्यैतैःसह ३७ तल्लिवती
यंप्रपंचंविडंबयसिजन्मादिलीलामनुकरोषि प्रपन्नेति अप्रकटलीलायां नित्यमेभिःसह विहारैः केषांचिदानंदसत्वेपि जन्मादिलीलाभिः सर्वेषां तत्संदोहप्रथनार्थमित्यर्थः ३७ तदेवमस्यापि देववपुष इत्या
दिभिस्तन्महिम्नः पश्येशेत्यादिभिः शास्त्यादीनामहोतिधन्याः इत्यादिभिस्तत्कृतप्रेम्णः एषांघोषेत्यादिना कारुण्यपंचभिस्त्यादिना लीलायाश्चाधिकेतर्कस्य प्रष्टव्यदानीतत्तनीरूपणंपरित्यज्य पूर्वोक्तंतदेभवं जानीमइ
त्यभिमन्यमानानुपहसन्नुपक्रमोक्तमेवनीजाभीष्टत्वेनाभिप्रयन्नुपसंहरति जानंतइति हे प्रभो विचित्रानंतप्रभावतव वैभवं वेदादिभिःश्रुतमपि मेमनसोनगोचरः प्रत्यक्षतो हृष्यादिरूपमपि वपुषश्चक्षुरादि
गोल्लकस्य न अतएव न वाचः तस्मान्मौनमीस्यादोयत्प्रार्थितं तदेवप्रार्थ्य इति भावः ३८ अथदैन्यात्मिकां भक्तिं आविष्कुर्वन् प्रार्थितस्यापितस्यमौनं दृष्ट्वा स्वस्यात्रावस्थानानर्हतां बुध्वागमनानुज्ञां
प्रार्थयते अन्विति हे कृष्ण इंद्रियाकर्षकरूपगुणअनुजानीहीति सर्वत्तेवक्तव्यंसर्वं पुनरुक्तमेवेत्याह सर्वंस्वं वेभवं मदेभवस्त्वमनोगतं मत्मनोममायोग्यतांचेत्यादिकं त्वमेवेत्सिनाहं अतस्त्वदाज्ञांविना

२६

त्वा

नी०ग०
२६

कृष्ण

तृणादिरूपेणापि स्थातुं न शक्नोमीति भावः यद्वा प्रस्तुत बालवत्सादि सर्वं वेत्सि न प्रदर्शनं प्रत्यर्पणं वापेक्षितमिति भावः यतः सर्वदृक् जगतां नाथस्त्वमेवेति ममतास्पदं जगदेतच्छरीरं च तवार्पितमिति ६८ सादरं प्रणमन्न्य
रूपनाम्ना जन्मकर्मनाभिश्च संबोधयति श्रीकृष्णेत्यादि श्रीत्यादरे वृष्ण्यनुभूत तस्य पङ्कजोच्च वृष्णिकुलमंजनं दादिकं उक्त प्रमाणास्य भुवोगज्ञायेत् पत्रमाच्य तस्य पशस्य प्रीतिदानेन हे स्वर्योपम क्ष्माच निर्जरा देवा द्विजाः
पशवो गावश्च एत एव चत्वार उदधयस्तेषां वृद्धिकारितया चन्द्रोपम उद्धर्मः पारवोड धर्मः तेदयत्राणं वै रंतमो हरतीति द्वयोपम क्षितिराक्षसाउद्धधर्म प्रवर्तकाः कंसादयस्तेभ्य उद्धन्ने बहुस्यतीति पुनः सूर्योपमेति प्रतापकीर्त्ते
त्वमेवाव्यज्यते हे स्वयं भगवन् तथा आर्ककं अर्कमारभ्य वैकुंठ पर्यन्तं महत्र पूज्य यद्वा र्हतीत्यर्हन् पूर्वोक्तं भूत मक्तुं तं सर्वं कर्तुं समर्थ अत ६९ आकल्पं कल्पपर्यन्तं ते तुभ्यं नमः यद्वा आकल्पं त्वदीयगुंजा
वतंस बर्हापीडादिकं हस्तकवलादिकं च भूषणमभिव्याप्य तथा आर्क अर्को नाम वृक्षो नर्हे पुष्पत्वादनादरणीयस्तमप्यत्र स्यमभिव्याप्य तत्सहितायेत्यर्थः ७० चिन्मूर्तिं चिद्रूपं चित्स्वरूपं च चिदेकगुणं चित्कबले
द्वेत्रं वंदे ब्रह्मा हायं विधिप्रणुत। रूमानं सर्वथैवापरिच्छिन्नं सर्वव्यापकमेव तथा न स्थितं ततस्त्वयात्रिः परिक्रम्य पादयोर्नत्वाऽभीष्टं सामीप्य याज्ञयायां कृतमोनेन कृष्णेनाभिप्रेतं धाम गतः यतो जगद्धाता अन्यथाविश्वस्य
स्थिसिद्धेः यावदधिकारमवस्थितिरितिन्यायेनाधिकारसमाप्तेः प्रागभिल्लषिता सिद्धश्च ७१ स्वमनुं वत्सवत्सान् ज्ञातमित्य पराधिक्षमादिकं अनुज्ञाप्यकिमिदानीं वत्सान्पालांश्चानयानीति सस्मितं पृष्ट्वा अनुज्ञापनं स्वसार्वज्ञ
क्षमाविनयानुग्रहादिव्यंजकं आनयने च सस्वज्ञानानंतादिस्वरूपैरपि बालवत्सैर्नमेलीलासक्तं किंतु तैरेवेति व्यंजकं प्रागवस्थितान् पूर्वावस्थादियुतान् वत्सान् यथापूर्वं पूर्वावस्थाचेष्टाघनतिक्रमेण स्थिताः सखायो
यत्र तत् स्वकं पूर्वं भोजनस्थानं पुलिनमानिन्ये पुरुराजमंडलेरुपविष्टेषु तेषु सपाणिकवलः स्वयं वत्सैः सहाययाविस्त्यर्थः हरणदिनस्थ महामाक्षणमिवान्यदपितद्दिनस्थं तस्य वंबात तत्र तेते पुनस्माजितं तथैव तत्स्यर्यंतंबा
लरूपेण स्वकृत व्यवहारस्तु पूस्मारितश्चेत्यादिबोध्यं अन्यथामात्रादिभिर्व्यवहारविपर्ययासः स्यादेतत्सर्वं च तन्मा ऽयावेभव मरूच ७२ तथातेषां कालज्ञानमपि माययैवेत्याह एकस्मिन्निति कृष्णमायाहता इति पाठः अधे
यातेपि आत्मनः स्वस्य प्राणेभ्योऽपि कृष्णं मत्तराः विना ऽप्रियविरहेक्षणेनापि बत्राधिकेन भाव्यं तथापीत्यर्थः यद्वा आत्मनः कृष्णस्य मायया हताः प्रतिबद्धाः प्रतिबद्धो हतश्चास्य इत्यमरः मम या मोहितेते क्षे ब्रह्मैव मायातथा
पि भगवतानुमोदितत्वात् भागवती संवृता प्रायो मायास्के मे र्ततुं रितिरामोक्तेः क्षणार्धं पलपंचकं मे निदिनरात्री स्यादि परिवर्तं विनैव कालावस्थितिः प्रतीतेः तदिच्छाशक्तेः कालादिशक्तितोपि बलवत्त्वात् राजन्नित्यद्भूतत्वे
न संबोधनं ७३ कालानुसंधानदृष्टान्तमाह किंकिमिति इह जगति विस्मृतेति तृपुष्पोशास्त्रीवा देहद्वयातिरिक्त तयानुभूतं स्यापि मुहुर्विस्मरणात् ७४ अतः कृष्णश्च त्वायाति वेगेन स्वागतेवत्सानयन पूर्वकं स
खे नागतं एकोपि ग्रासस्त्वां विना ऽस्माभिर्नोभोजि यद्वा त्वया एकोपि कवलः स्वहस्तेएव स्थितोपि न भुक्तः अतइतोस्मिन्मंडले एहि साधु वत्ससंभालनादि वे व्यग्रत्यक्त्वा भुज्यतां ७५ हसन्निति मायामुग्धानां वाक्यश्र
वणात् दुरवोक्ते श्रवणेन हर्षाश्च निवर्त्येत्यपि पाठः दर्शयन्निति तद्दर्शस्य ब्रह्मे कथनाय एवं चतत्त्वमपि भगवता माययाच्छादयसाद्भ मे वरक्षिरतं तेयं ७६ इतिनिजसखसंगतिहर्षभरतोवन्यवेषे गोपीरानंदयन्
व्रजं तं तर्न गामन्त्याह बर्हेति वनधातुचित्रितिपाठः तेन रूचर्णादिनिरासः बर्हादिभिश्चित्रितानि स्वधितान्यंगानि येन सः यद्वा यस्य सः अत्र पक्षे सखिकर्तृकत्वम् संप्राप्तो मोक्षित्रो याविवेणवादिरवः तेन स एव वा उत्सवः यद्वा सचगी
तं तत्स्वादुत्सवश्च ताभ्यामाढ्यः संमृष्टमानी अनुगैर्गीतास्त्रस्वरतालमुच्चैः कीर्तितागस्या वनी अघवधादिकीर्तिर्यस्य गोपीदृशामुत्सवरूपा दृश्ति दर्शनं यस्येति श्रीकृष्णमहर्षेणाधिकानंदास्पदेः ७७ मातृकुलोत्संन्नैर्य
श्गोदारूनुनान्येर्न दस्तन्नेति प्रोक्तं यद्वा संतोषणद्वयोरपि प्रसंसार्थं तथोक्तं यद्वा यशोदायाः पूर्तं ब्रानंदोयः सूनुस्तेन अस्माद्ब्याल्लाद्वयं रक्षिताः ७८ ननु ब्रजौकसां स्वतोकेषु स्नेह नत्योष मन्च हमिति वत्सवत्सपरूप
श्रीकृष्णे स्नेहाधिक्यं कथमुक्तं यतः स्नेहविशेषस्त्रिधा दृश्यते विषयसौंदर्येण ममताविशेषेण वस्तुसत्संबंधविशेषेणच तत्र न प्रथमः यावद्वत्सपस्याद्युक्तत्वात् नद्वितीयः तद्वतुसंबंधाधिक्याभावात् पश्चतृतीयः
प्रद्युम्नागमने रुक्मिण्या श्रुतः सत्यत्र विपरीत एवेति विशेषजिज्ञासया परब्रह्मबोधद्वयवाप्यच्छति ब्रह्मन्निति कृष्णे श्रीदामादिरूपे यद्वा यथा कृष्णे तत्त्व पूर्वं वदति दृष्टान्तीकृते श्रीकृष्णएवाक्षेपः विषयसौंदर्यसत्त्वेपि मम
त्वदेहिसंबंधयोस्ततोप्याधिक्यमित्यभिमानादितिज्ञेयं ७९ परमात्मासौ श्रीकृष्णः प्रतिबिंबरूपात् प्रियादात्मनोपि अधिकप्रियः किमुतात्मीयेभ्यः पुत्रादिविषयेभ्य इति वक्तुमात्मनः स्वतः प्रियत्वमन्येषां तदुपाधि
कमित्याह पंचभिः सर्वेषामिति स्वात्मैवेति देहदेहाविवेकेनाहंतास्पदस्तदुच्यते ममतास्पदव्यवच्छेद विलक्षणात् नृपेति तव प्रजापालनमिति तथैवेति भावः हीति प्रसिद्धौ ८० तदेवव्यतिरेकेणाह तदिति तस्मादेव हेतोः स्व
स्वकात्मनि अहंकारास्पदे ममतास्तन्नीति षष्ठ्यर्थेन व्यवधानान्य न तोचितं राजेन्द्रेति साम्राज्येप्यात्मवत्स्नेहो नेति भावः ८१ अहंकारास्पदे देहेपि प्रेमतारतम्यं दृश्यमानमात्माध्यासतारतम्यमूलकमिति दर्शयितुं
रूपान्तरोदाहरणेनाह देहात्मेति द्वाभ्यां देह एवात्मेति वादिनां तेदेहमनु ये पुत्रादयस्ते तु न तथा प्रियतमाः हि निश्चये तु अर्थे वाः राजन्यसत्तमेति देहात्मवादिनो राजन्या असंतः देहान्यात्मवादिनः संतः ईश्वरवादिनः स
न्तराः त्वं तु कृष्णैकप्रियत्वात्तेषु सत्तम इति ८२ अमुमेव मतमाह देहोपीति आत्मवदविवेकदशायामात्मतया गृहीतो हंतास्पदीभूतो देहः सोपि विवेकेन ममताभाक् च [illegible] र्दसो पूर्ववत्प्रियो न भवति यद्यस्माज्जीर्यति रोगादिपी
डितेस्मिन् विवेकिनां ममतास्पदे देहे जीविताशेति स्थित्वयं देह इति वांछापि अवलीयसी पूर्वापेक्षया स्वल्पा भवति विवेकेनात्मत्वाभिमानापगमे नातिप्रियत्वात्तावात् ८३ वरं देहापत्यादि अचरं गेहादि तदर्थमे
व प्रियमित्यर्थः ८४ एवं देहादिविविक्तजीवात्मनः स्वतः प्रियत्वमुक्त्वा विवक्षितमाह कृष्णमिति सदानंदमूर्तितया कृष्णनामानमेनं नंदनंदनमखिलात्मनां जीवानां आत्मानं मुख्यं स्वरूपं बिंबस्थानीयं परमात्मानमवे

राम २८

हि। तर्हि कथं लोके दृश्यतया भातितत्राह मायया देहीवेति नात्र देहि देहभावः देहदेहीविभागोत्र नेश्वरे विद्यते क्वचिदिवाराव चनात् आत्मारामाणां तत्प्रियजनानां च चिद्व्यतिरिक्तवस्तुसंभेदास्फूर्तेश्च एवं सतिय २८

दस्कुरादीनां तथा भानं तन्मायया पिहितदृष्टित्वादित्यर्थः तथा च गीतासु नाहं प्रकाशः सर्वस्य योगमायासमावृत इति योगमायात्र दुर्घटघटनाकारिकीमपि चिद्विलाससौष्ठवं येनासुरादिषु तथा न भानेमिति तत्र स्वाम्या

शयः योगो मम संकल्पः अभक्ता मां न जानंतीत्येवंरूपस्तद्वशा माया योगमायेति मधुसूदनचरणाः भक्ता नामेव तु चिदानंदैकरसो नरावृतिर्भातीति भावः ५५ न केवलमात्मनामात्माधितु जडानामपि सत्स्वरूपमित्या

ह वस्तुत इति कृष्णस्थास्त्विति पाठः अत्र जगति वस्तुवृत्त्यतः पुंसां स्थावरं जंगमं च सर्वं भगवद्रूपमेव नान्यदिह किंचनास्तीति स्फुरति कथं मत्तः कृष्णं अपरं नास्ति परं यस्मात् सर्वाधिष्ठानं सर्वकारणं चेत्यर्थः ५६

कुत इति तदाह सर्वेषामिति सर्वेषामेव कार्यवस्तूनां भावार्थः सत्तारूपः परमार्थः भवति कार्यो कारणे जायमानमायोपाधिके ब्रह्मणि स्थितः कारणसत्तातिरिक्तकार्यसत्तानभ्युपगमात् तस्यापि भवतः कारणस्य ते

त्पदवाच्यस्य सोपाधिकब्रह्मणोपि सत्तारूपोर्थो भगवान् कृष्णः सोपाधिकस्य निरुपाधिके कल्पितत्वात् श्रीकृष्णस्य च निरुपाधितत्त्वस्य ब्रह्मरूपत्वात् अतः किमतद्वस्तु तस्माच्छ्रीकृष्णादन्यद्वस्तु पारमार्थिकं किं

निरूप्यतां तदेवैकं पारमार्थिकं नान्यत्किमपीत्यर्थः एकस्त्वमात्मेत्यादि ब्रह्मोक्तेः ब्रह्मणो हि प्रतिष्ठाहमिति गीतोक्तेश्चेति तत्रैव श्लोके मधुसूदनस्वामिचरणाः व्याख्यातेच तत्र भाष्यकृद्भिरपि सविकल्पं ब्रह्म तस्य ब्रह्म

णो निर्विकल्पोहमेव नान्यः प्रतिष्ठाश्रय इति एकादशेपि त्वमक्षरं सदसत्तत्परं यदीत्यत्र त्वमक्षरं यत्परं वेदांतेषु श्रूयत इति परं यदक्षरं वेदविदो वदंति तत्त्वमेव नान्यदिति च समनंतरं च परं च धाम परं पदं वेदम

वमिति च भाष्यमुक्त्यात्मनस्य ब्रह्मणोर्थांतरत्वं शंकित्वोक्तं परं चेत्यवमादिकमानंदगिरीयं च एतद्व्याख्यानि मोक्षुकृष्णमुमुक्षुस्वभावं सर्वेषामात्मानमपि संतमवजानंति मां मूढा इत्यादि भाष्योपेतं पद्मद्वयं च हृदि

कृत्वा पंचदशांते श्रीमधुसूदनैरुपसंहृतं वंशीविभूषितकरान्नवनीरदाभात् पीतांबरादरुणबिंबफलाधरोष्ठात् पूर्णेंदुसुंदरमुखादरविंदनेत्रात् कृष्णात्परं किमपि तत्त्वमहं न जाने प्रमाणतोपि निर्णीतं कृष्णम

हात्म्यमद्भुतं न शक्नुवंतिये सोढुं ते मूढा निरयं गताः इतीत्यलं सत्तमेषु तस्माद्युक्तं श्रीकृष्णस्यात्माखीयेभ्यः सर्वेभ्योप्यतिशायी प्रेमास्पदत्वमिति ५७ तस्मात् श्रीकृष्णस्यैव परमार्थत्वात् तत्पदमाश्रयतां तत्पदप्राप्तिरेव

फलं मोक्षस्तु नांतरीयकतया भवन्त्यपि पदाश्रयानंदेन नानुसंधेयः स्यादिति प्रकरणार्थमुपसंहरति समाश्रिता इति पुण्यं पावनं चारु वा यशो येस्य स चासौ मुरारिर्मुरनरकाद्यसुरादिमोक्षदातेत्यर्थः तस्य श्रीकृ

ष्णस्य पदमेव पल्लवः सोकुमार्यादीनामोदप्रदो महोषधिपल्लववत् महाप्रभावश्च स एव प्लवः स्वतःफलरूपस्यान्नानेन तरणोपायमात्रतयापि तातोपस्ते ये समाश्रिता तेषामपि वस्तुस्वभावमहिम्ना परमानंदादेय

न भवांबुधिर्वत्सपदं भवति तरणीयस्तीर्णो वेत्यपि न ज्ञायते अतो न तस्मिन्स्थित्यर्थः किंतु परं पदं वैकुंठं धामैव वैकुंठादिकं पदं स्थानं भवति विपदां यस्य दं जगत् तत्तु तेषां न नस पुनरावर्तत इति श्रुतेः यतो महतां ज्ञा

नसिद्धानां भक्तिसिद्धानां च सर्वेषामेव पदं सायुज्यादिस्थानमिति ज्ञानी नो पि विदेहकैवल्यत्रैव श्रीकृष्णसायुज्यं गच्छतीति श्रुतिसूत्रभाष्यसिद्धांतः सूचितः स्पष्टीकृतं चेदं सिद्धांतलेशसंग्रहे दीक्षितैरित्यपरम्पेत ५८

कौमारकृतं पौगंडे कीर्तितमिति यत्तद्यदष्टोहं तदेतदाख्यातं ५९ ब्रह्मप्रार्थितं सत्यति नवेति संदिहानं केमुत्येनाह एतदिति सुहृद्भिश्चरितं मुग्धेतोन्योन्यसिक्यादिनीत्यादिनोक्तं अघासुरमोक्षः शाद्वले भोजनं

च व्यक्तेतरं जडप्रपंचातीतमिति रूपपदार्थस्य वत्सवत्सपालादिरूपस्य पूर्वत्र चरिता देश्य विशेषणं अत्र पाठे अदड्ढेश्या भावस्यार्थः अजस्यारुर्महानभीष्टवस्त्वं एतत्सर्वं श्रण्वन्गृणन्नरमात्रः स र्वे पुमर्था

नाप्नोति ६० कौमारलीलामुपसंहरति एवमिति तदुपलक्षके रित्यर्थः जहतुः स व तवंतौ व्रज इति सर्वतो व्रजेनोत्कर्षेः निलायनं कश्चिन्नीलीयस्थितोन्येन मृग्यइत्येवंरूपं मर्कटोत्प्लवनादि येषां तैः सेतुबंधैरिति

श्रीरघुनाथलीलानुकरणं बहुत्वं पौनःपुन्यात् एवं यंत्रमयरावणयुद्धाद्यनुकरणमूह्यं ६१ शाब्दमर्थं च संगृह्णन् टीकाद्वयगतं परं गंधकारपदं प्रेप्स्युर्ज्ञेयोस्मि विदुषां पुरः १ इतिश्रीमद्भागवतदशमस्कं

धस्तृषणः चतुर्दशगादध्यायस्तोषिणीसारसंग्रहे १ इति चतुर्दशोध्यायः १४ एवमाचतुर्थवर्षं कौमारलीलामुक्त्वा पंचदे पंचमाष्टादिवृत्तां पौगंडलीलामुपक्रम्य धेनुपालनधेनुकवधविषतोयतो गोपादि.

जीवनान्युच्यंते ततश्चेति त्वर्थः पूर्वं बाल्यदृष्ट्या न संमतो अधुना तु किंचिद्वयोवत्सातिरेकप्रकटनेन पशुपालने नंदादीनां संमतो जातो पालानां संमता इति वा पंडितसंमत इति वत्साविर्भवे जनं यद्वा पशूना

पालानां च संमतो पशूनामेव तत्संगलुब्धानां भगवता विना वने गमनाभावात् स्वधर्मे गोचारणे प्रतिनिधिनापुत्रेण रक्ष्येन दोनिवृत्ता सतात् प्रवयसः सर्वे निवृत्ता इति सवयोभिः सखीभिः समेति एतद्दिनं च शुक्ला

ष्टमी कार्तिके तु स्मृता गोपाष्टमी बुधैः तद्दिनात् वासुदेवो भूद्गोपः पूर्वं तु वत्सप इति पाद्मे उक्तं पदैरिति स्वधर्मत्वेन पादुकाद्यग्रहणात् १ एवं द्वयोरपि गोचारणादिकमुद्दिश्य तत्रापि श्रीकृष्णस्य प्राधान्यं व्यंजयन् अन्यत्रा

तिदेशार्थं प्रथमदिनक्रीडामाह तदित्यादि तत्प्रसिद्धं वृंदावनं माधवस्येति वनस्य सर्वसंपत्तिः श्लेषेण वसंतइव वनोल्लासकः उदीरयन्नुच्चैर्वादयन् तद्वनवर्तिनां स्वप्रवेशज्ञापनेन हर्षणाय स्वयशोगरणादि

रिति तेषां तत्रेममयो हर्षभरः आविशत्प्रीत्या विवेश श्लेषेण पक्षिवृक्षादयः सर्वे श्रीकृष्णाविष्टा जाता इत्यर्थः कुसुमाकारमिति सदापुष्पर्द्धिः पशव्यमिति पालनेनप्रयासाभावः गोपैर्वृतः बलान्वित इति विहारसा

मग्री अतो विहर्तुकाम इति २ अन्यासामग्रीं वर्णयन् विहारारंभमाह तदिति तद्वनं सर्वतो दृष्टिप्रसारणेन दृष्ट्वारं तु मनोभिनिविष्टं च यत्र किंविधं मंजुघोषाय त्वंगमृगपक्षिणस्तैर्व्याप्तं महातो भगवत्कृता

स्तन्मनसा तुल्यं अत्यंतस्वच्छं भगवद्विहारयोग्यं च पयो येषु तानि सरांसि आश्रयत्वेन यस्य तेन वातेन नेति शोर्यः शतपत्रेति सौगंध्यं जुष्टं वनमिति माद्यं भगवानपीति मोहत्वातिशयः ३ तत्र तत्रेति

भाग- २८ द

कृष्ण

न

सर्वत्रैवेत्यर्थः दुरुत्तरेण हेतुना पल्लवश्रियाकरणेन पादयोः स्पर्शाच्छिरसा नमनात् अतो वनानां पतीन् वृक्षश्रेष्ठान् वनस्पतिशब्दश्छत्रिन्यायेन सर्ववृक्षलक्षकः स्मयन्तीति नर्मव्यंजकं कुर्वंतीति गोप्य इति वक्ष्य
माणात् तच्च बाल्यसख्यानां प्राबल्येनाग्रजत्वस्य गौणत्वात् तदाह अग्रजमिवेति अग्रजमपि स्मयन्ति वेति वा अतोग्रजभावाभासरूपवान्नर्मापि स्फूर्तिरीत्येव कृते नन्वेवं रामेणैव तन्नर्म कुतो न कृतं तत्राह अ
द्दिः श्रेष्ठश्चासौ पुरुषश्चेति एतच्च करिष्यमाणक्रीडाकृच्चित्तोल्लासाय इदं सनर्मवचनमपि भगवदुक्तत्वाद्यथार्थमेव ज्ञातं ६ अहो इति संबोधने आश्चर्ये वा अमी स्थावरा अपि पुष्पफलरूपं अर्हणं पूजोपक
रणं स्वस्य शिखाभिः श्लेषेण शिरोभिर्गृहीत्वा तव पादपद्मं नमन्तीति नमस्कुर्वन्तस्तत्र समर्पयंतीत्यर्थः अमरादेनामुक्त्वाश्यतेरप्यर्चितं यद्वा देववरैर्मुक्तैश्चार्चितमित्येकं पदं कथं स्थावराणां ज्ञानं तत्राह तम इति एषाम
ज्ञानेनैव किंतु पश्यतोपि एवं तामसोपहत्यैनाज्ञानाय यतयेः आत्मनः स्वस्य च्छंदावनेतरुजन्मकृतं अंगीकृतं यद्वा आत्मनः स्वस्य च तमसः तदप्राप्तिदुःखं तन्नाशाय येस्तरुजन्मप्राप्तं तथा च तत्कृतिर्नाग्ये त्यत्र ब्रह्मणा प्रा
र्थितं ५ एवमित्यंगुल्या निर्दिशति अखिललोकानां तीर्थं पावनं च यद्वैश्वर्यप्रकाशाने गुरुरूपं वा अनुपथमनुपदमिति पाठे आदिपुरुषेति सर्वेषां तत्सेवकत्वात् भवदीयास्त्वदुक्तास्तेषु मुख्या ये मुनयः त्वन्महात्म्य
मननशीला अन्यत्र विषये मौनशीलाश्च तेषां गणाः संघाः यद्वा ते गणा अनुगा येषां हे निश्वरा इत्यर्थः ते वने गूढं अन्यैरज्ञातमपि यद्वा निलायनक्रीडायां कुंजादौ लीनमपि न जहति यतश्चात्मदैवमिति स्वभा
ग्यमित्यर्थः हे अनघ अपराधा गोविहीन अनघात्मदेवमित्येकं वा पदं षष्ठीतत्पुरुषः कर्मधारयो वा प्रायो वितर्के यद्वा गानान्वेषणानुगत्यादिहेतुभिर्नीरदादिदृष्टैस्ते नालिपुरुनीश्वरत्वमनुमीयत इत्यर्थः निगूढं
त्वां मुनयोप्यलिवेषेण भजंतीति भावः ६ इडयेति स्मित्वाभिमुखी भवंतं मत्तमुखीकरोति मुदेति सर्वोन्वयी वीक्षणसौष्ठवेन प्रेम्णा च गोपीसाम्यं रूढैः श्रुतिसुखदैः निसर्गे इति यदस्तिस्वस्मिंस्तदर्पागता यापर्य
तीति ७ तत्सेवाकर्तृत्वेन स्तुत्वा तत्प्रसादनापि भूम्यादिसहिता स्तौति धन्येति इयं वराहाद्यवतारसौभाग्यानुभविष्यपि अद्य त्वदवतार एव धन्यातिप्रशस्याभूत् आस्तां भूः तृणवीरुधो हारणमध्ये इमास्त्वदधिष्ठाः तृणरूपवी
रुधः इवीद्यल्लता अपि धन्यां यतः त्वत्पादस्पृशः धन्येयमिति द्वयं व्यत्ययेन सर्वत्र योज्यं त्वदित्यत्र व्यत्ययेन षष्ठ्यर्थे पंचमी न तु समासः तेनाग्रेणान्वेति द्रुमा लतानाश्चर्यकारजैरङ्गुलीभिः पल्लवादीनां मार्दवादन्या
नायावतंसार्थं छेदायनास्पृष्टाः नद्याद्रयोपि त्वत्पादस्पृष्टा इति योज्यं गोपीपर्यायद्वयात् महारुरुहस्तारव वक्षोल्लग्ना दर्शयन् श्लेषेणाह गोप्य इति इमाः वक्षोलग्नाः गोप्यः श्यामावश्यारवाः गोपीस्यामाश्चारिवास्यादि
तिवनौषधिवर्गे अमरः भुजयोरंतरेण वक्षसा धन्याः अनेन भाविगोपीभिः सह रामविहारः सूचितः पादसंवाहनादिलतालक्ष्मीरपि यस्मै वक्षसे स्पृहयति केवलं अनेन भगवतः संकर्षणादिभिः श्रिवमाहात्म्यमक्ष्या अपितत्त्व
प्रियाभिरैक्यं भाति ८ एवं सनर्मवर्णनादिप्रकारेण श्रीमद्वृन्दावनं व्याप्य प्रीतः अकर्मधातुभिर्योगे देशा इति कर्मत्वं प्रीतीत्यप्रीतमनस्त्वयोः सामान्यविशेषाभ्यां भेदः गोवर्द्धनः समीपवर्ति सरित्तटेषु पशूंश्चारय
न् गोपैः सह रेमे ९ प्रीतमनस्त्वरतिमाह क्वचिदित्यादिना एवं केचिदित्यादिना एवं केचिद्वेणून्वादयंते इत्यादिना बालानां प्राधान्येन क्रीडोक्ता इह तु श्रीकृष्णस्यैवेति विशेषः क्वचित्कस्मिंश्चित् पथि मदेन पुष्प
रसपानजेन भगवत्संनिध्यनेन वा अंधेषु मत्तेषु अलिषु अतिगानमाधुर्यं अनुव्रतैः प्रीतिपरैः गोपैः अलीनां स्वजातीयस्वरस्य गानेन भगवतस्तदुच्चितस्वरस्य गोपानां तु तत्तत्स्वरवद्भूत्वा व्रितस्यातिमिथो माने
वेय १० कलवाक्यैरिति शुकादय उत्तमजल्पो बोध्यते कोकिलादय इव वल्गु अव्यक्तं कूजति ११ च शब्दो वलिवस्याकर्षणार्थः बर्हिणं नृत्यंतमभिलक्ष्य तदभिमुखान्नृत्यतीत्यर्थः सखीन्हासयन् १२ पशूनिति
श्लेषेण श्रीकृष्णपार्श्वतो दूरगत्वान्निर्बुद्धीन् मेघेति न ह्यर्जितं लक्ष्यते १३ क्वचिदित्यनुवर्तते चकोरादीनुत्कृत्य रौति सत्यानां मध्ये योव्याप्रसिद्धयोः संबंधभीतः तद्वच्चानुरौति १४ आर्यरामे विगतश्रमं करो
ति आदिना वीजनादि १५ मिथो नृत्यादीन्कुर्वतो गोपान्प्रशशंसतुः यद्वा तौ क्वापि नृत्यतः क्वापि गायतः क्वापि मिथो गृहीतहस्तौ क्वापि हसंतौ भवः यद्वा गोपान् हसंतौ अहो इमे गानेन गंधर्ववृत्तिरस्कारिणः न
स्येन विद्याधरविडंबकाः युद्धेन त्रिलोकीजित्वराः इत्यादि परिहासं कुर्वंतौ प्रकर्षेतः शशंसतुः तत्त्वतो महात्म्यख्यापनात् १६ विश्रामक्रीडां वदन् गोपानां भाग्यमाह पल्लवस्य फललक्षणं पुष्पादीनां तल्पं श्वि
ति बहुत्वं तैः स्तैः पृथक्निर्मितत्वात् तेषु तत्तत्प्रीत्यैतत्तदन्यालक्षित एव बहुरूपैः ज्ञात इति ज्ञाप्यते अतएव गाश्चेष्टित इति वक्ष्यते नियुद्धं बाहुयुद्धं तेन श्रमः स्वेदबिंदुकरः तेन कर्शित इव अनेन गोपानां महाद्व
लत्वं दैत्यमारणाद्यावश्यमत्तिस्कृतत्वीलाश्चा त्याह न्नूम इत इव तेषां स्वत्वात्मविस्मरणात् गोपेति एते किंचिच्छ्रेष्ठा ज्ञेयाः स्वाकसाफल्याय योपबर्हणं न रचितं स्यात् किं वा रचितमपि तत्सुखार्थं तेनस्य कोंजेयं १७
केचिदबहुत्वं क्रमेण बहुभिः संवाहनात् शय्याबाहुल्येन तद्बहुत्वाद्वा हतः तत्सेवांतरारुपः प्राप्या ये नित्यहतपाप्मत्वेपि अयमासां पहतपाप्मेति वत तदुक्तिर्वा एतत्पूर्वपरान्वयि सम्यक्कमदमधुरैश्चालने
रवीजयन् १८ तदवसरयोग्यानि मनोज्ञानि चित्ताकर्षकाणि गानैरिति विश्रामावसरत्वात् स्नेहेति तस्य सेवांतरसाधारण्येपि अत्रैवोक्तिः गुणगान एव तत्प्राकट्यात् यद्वा पदद्वयस्य पूर्ववाक्ययोरपि संबंधः १९
अनूक्तलीलां मुहिस्यान् गोपलीलामास्त्रिय त्वं वदन्तु पसंहरति एवमिति रमासेवितपादोपि तत्सुखमनाहत्य एवं वृंदावनविहारे रेमे अलौकिकैश्वरितैः लौकिकं गोपात्मजत्वं विडंबयन्नहीनोपमारूपं कुर्व
न् अलौकिकावं गोपात्मज इत्यर्थः भगवतः कथं पुत्रत्वं तत्राह स्वायेनेदादयस्तेषां मायया कृपया वात्सल्येनेत्यर्थः निगूढा आत्मगतिर्निजैश्वर्यं यस्य अतो ग्राम्यैः समं कश्चिद्ग्राम्या बधुरिव तर्हि ग्राम्य एव
वास्तवेनेत्याह इत्थं मध्येमध्ये प्रकटितसर्वैश्वर्ययुक्तं चेष्टितं मस्य सः २० एवं प्रथमदिनक्रीडयादीनां तरक्रीडामुपलक्ष्यत दातत्र प्रकटितमैश्वर्यं प्रसंगादाह श्रीदामेत्यादिना भगठ्या वृत्त्यर्थं स्तोककृष्णे

राम. २९

तिनाम तच्च्छात्ले कृष्णसाहस्यात् प्रेम्णेति नतु तालफललोभेन न वा दुष्टस्य धार्थं किं तु इष्टप्रार्थनलक्षणप्रेमस्वभावेनैव यद्वा स्वव्याजेन भगवत एव फलभोजनसंपादनेच्छामयेन तच्च प्रभावं
ज्ञात्वैव प्रार्थ्यते २१ हे रामेति रमसे क्रीडसीति निरुक्ते हि मामे कां क्रीडां कुरु यद्वा रमयसीति रामेत्यस्मात् रमयेति रमणं रामः सोस्यास्तीति रामं तेस्मादिति यत्क्रमेण विग्रहः आद्ये भाव प्रमेताद्
र्धेत्याद्युच्च द्वितीये पादे घञ् वीप्सा प्रोत्साहनार्था हे महासत्त्वेति न तवाशक्यमिति भावः हे कृष्ण स्वदानेन सर्वाकर्षक दुष्टनिबर्हणेति बकादिवधं दृष्ट्वा एवं श्रीकृष्ण बलसार्थकत्वं वदतो
महासत्त्वेति राम बलस्यैव फलत्यं दर्शयंतस्तमुत्तेजयंती इतो गोवर्धनात् अविदूरे पूर्वतः क्रोशचतुष्टयांतरे तालानामालिभिः पंक्तिभिर्व्याप्तं तद्देशवर्णने हरिवंशे कृतदेशः समस्निग्धः सुमहान्करुद्गम
स्त्निकः दर्भप्रायस्थलीभूतो लोष्टपाषाणवर्जित इति २२ ततः किमिति चेत्स्वाभिलाषमाहुः फलानीति पतंति पतितानि चेति पक्वत्वं मधुरत्वं बहुत्वं नाशाभाव्यं व्यज्यते इयं कोडांगीषधतुं कृतकालीयदमनानंत
रं वर्षासु नाइपदे ज्ञेया पुराणान्तरात् तत्रैव तालफलपाकाच्च तर्हि सुखमास्ति स्तोन्यानीयं तानि तत्राहुः अवरुद्धानि ननु तं प्रार्थ्यानयत तत्राहुः दुरात्मनेति अतस्त्वं हत्वेमान्यस्माणीति भावः २३ तर्हि त्याकेरपितानिन
काजानीत्स्फके जनयति दिग्भ्यो सृइति अतीवीर्य इति रामं प्रत्युक्तिर्मोलस्य पार्श्व खररूप ध्वगिति कृष्णं प्रत्युक्तिः तस्य रसिकशिरोमणेर्हासाय खररूपधृग गच्छतीनी मे इति द्वयोरन्वये नान्या बाध्यता किंच तातिभिस्त्रिय
त्यंत साहाय्य २४ नेसव्यत इत्यर्धं क्वचिन्न पठ्यते तद्वा तस्मादिति सार्धकं न भिरभक्तपूर्वाणीत्यन्वयः आस्वादितानि अभुक्तानां कथं स्वादुत्वादिज्ञानं तत्राहुः एष इति विष्वचीनः प्रसृतः २६ चतुर्थ्यर्थे षष्ठी कृ
ष्णरामेति मुहुः संबोधनेन वैयग्र्यं श्लेषेणास्माकं लोभो नैवासीत् इध्यादि तु अस्यासुखद्गस्य गंधेन संबंधेनैव सलोभानि चेतांसि एषामिति रामं प्रत्युक्तिः एवं नर्मणा स्वदोषनिरासः अनंगीकारमिवालक्ष्य सप्र
णयरोषमाहुः वांछेत्यादिना २७ प्रभू तेषामहार्यसामर्थ्यं दर्शयंतो २८ बलस्यादौ प्रवेशादिकमादौ प्रार्थितत्वात् तालानिति बहुत्वे संघटितानामपि कंपनात् सम्यक् परितः कंपयन्निति दूरे पतंतु न शिरसीत्येवमर्थं २९
सपर्वतः क्षितितलं परितः कंपयन्नित्यतिवीर्यत्वं ३० बली देवजयेन बलिमानी काशाष्ठं कुत्सितशब्दं आर्षः कादेशः पर्यसरत् हननाय सरं इष्टं परितो बभ्राम ३१ आसाद्य निकटे गत्वा उपक्रोष्टा निकटे काशाष्टं कु
र्वन् ३२ पाणिना पादयोर्गृहीत्वा प्रपदोरिति पाठश्चार्षः पूर्वं प्रहरागीकारः स्वाक्षोभ्यता दर्शनाय तृणराजस्तालः ३३ चकारादपरोपि परमित्येवं बहुलं गः ३४ एवं सन्निकृष्टा भग्ना दूरस्थास्तत्कंपिता इत्याह बाल
स्येति ३५ इदं चलीत्तेव वृतमित्याश्चर्येण वर्ण्यते नत्वैश्वर्यतयेत्याह नैतदिति अचित्रत्वे हेतुः भगवतीत्यादि इदं विश्वं यस्मिन्नोतं ऊर्ध्वतंतुषु पट इव ग्रथितं प्रोतं च तीर्यक् तंतुषु पटवत् सर्वतोनुस्यूतमित्यर्थः
३६ आदौ कृष्णं प्रत्यभिद्रवणं रामवीर्यं दृष्ट्वा तस्यागात् अग्रजप्रेम्णा तस्याग्रगमनाद्वा रामं चेति अनुजस्नेहेन तस्यापि तस्याश्वगमनात् अभिद्रवणं द्वयोरपि प्राधान्याच्च कृतौ हतेति शोकेन क्रोधाद्यतिशयः ३७ नृपेति
हर्षात् राजन्स्वितिसमासांतानित्यत्वात् ३८ रराज गोपानंदकत्वात् भरुः भूमिरुपं तत्तलं तालाधोदेशः यद्वा सुरूपं खलु गिति ङ-सु सुः यद्वा भूरित्यव्ययं किं वा सता तालाग्रैर्दैत्यदेहैरुपलक्षिता भूः फलप्रकरसंकीर्णा यथा
तथा रराज नभस्तलं नभः स्वरूपं तलं स्वरूपाधरयोरिति विश्वः फलतालदेहैः रक्तनीलश्वेतघनसादृश्यं ३९ देवमनुष्यादीनामप्यानंदमाह तयोः क्षितिद्वाभ्यां तदिति वा पाठः समहत् सपरिवारस्याबलस्य लयामार
णात् आदिना महर्षयः नाद्यं गीतनृत्योपलक्षकं ४० मनुष्या इत्यन्येपि नरा इत्यर्थः ४१ एवं प्रसंगेन दिनांतरस्थं धेनुकवधमुक्त्वा प्रथमगोचारणदिनस्थं संध्यालीलामाह षड्भिः कृष्ण इति चित्ताकर्षकः तदा
ह कमलेत्यादि पुण्यश्रवणकीर्तन इति व्रजस्थानां तच्छ्रवणाद्विरहोपशमः स्तावकानां चित्तोल्लासः आवरणशोभामाह स्तूयमान इत्यादिना ४२ अथातिक्रांतबाल्यं तं दृष्ट्वा गोपकुमारीणामनुरागोत्पत्तिमाह तमि
ति द्वाभ्यां कुंतलेषु बद्धानि बर्हाणि वन्यप्रसूनानि च यस्य सः चासौ रुचिरावलोकश्चासौ चारुहासश्च एवमुपरि मध्येतले च मुखशोभोक्ता वेणुवादनं तासां मोहनाय उपगीतेति वेणुक्वणनोपगानत्वेन गीता कीर्ति
र्यस्य अत्रानुपयुक्ततयाच्छलेन व्यवहितत्वाद्गजगोनोक्तः जनसंगतो हि तस्मिन् अग्रजभावोचित्यात् व्रजागमननिर्धारे गोरज उद्धूति वेणुजध्वनिः कीर्तिः गानं च हेतुः अभिगमे हेतुमाह संजातदिदृक्षाः दृशो
यासामिति दृशां दिदृक्षाकर्तृत्वेनोक्तिः स्वातंत्र्यायतेन च गाढानुरागः समेता मिलिताः युगपद्धावनात् अध्वनि उत्थसस्थाने वा पूर्वमेवागत्य स्थितत्वाद्वा ४३ व्रजकुमार्यः दृगवमोचक कृष्णपद्मास्यसारघसो द्रं
मकरंदं मक्षिभिर्भृंगो ऽह्रेः गाः पानपात्रैः आस्वाद्यान्हि यो विरहजस्तापो प्राप्तिज्ञात्वहमा तं जुहुः रात्रितापं तु प्रातर्दर्शनेनेति भावः सव्रीडहासविनयश्च विनयश्चेति द्वयं यत्र तादृशमपांगमोक्षं कटाक्षावलो
करुपं ताभिः कृतां सा कृतिं मानं प्राप्य गोष्ठं तन्निजगृहं विवेश ४४ मात्रोरानंदमाह तयोरिति द्वयोरपि द्वौ प्रतिपुत्रभावभरः यथाकालं शरदादौ प्रदोषादौ च विधेयानुसारेण यथाकामं पुत्रयोः स्वयोश्चेष्टा
नुसारेण आशिषउपभोगान् संपादितवत्यौ यतः पुत्रवत्सले अनेनांकारोपणालिंगनचुंबनादि कुशलप्रश्नसर्वांगनिरीक्षणादि च स्तन्यस्नावादिकं च सूच्यते ४५ आशीर्विधानमेवाह पुरुषकेन ग
ताध्वानति नश्रमः अश्रमः अनश्रमः श्रम एव विगताध्वश्रमावित्यर्थः आदिना केशप्रसाधनादि मज्जनं स्नानं संभ्रमेण कोमलघनांगमर्जनस्यादित्वं यद्वा जलेन च्छलिमपसार्य सुगंधिद्रव्येणोन्मर्दनं
नीवी परिधानवस्त्रं प्रावरा गृहणं च दत्तादिशोभा व्यवधायकत्वात् भूषणानामनुक्तिः म्लानत्वाभावेनापरिवर्तनात् ४६ जननीभ्यामुपहृतं प्राश्य ताम्बूलस्रग्गोष्ठीशिरोघ्राणादिभिः प्रतिलालितौ
व्रजात वर्त्यंतः पुरप्रसादस्तत्सुपतुः तस्मिंश्च भवनश्रेष्ठे रम्यदीपैर्विराजिते इत्यादि पाद्मोक्तेः वरे तिदिव्य पर्यंके संविश्य गात्रप्रसार्येति क्षणं निद्राविलंबेन नर्मगोष्ठीगीतादि व्यज्यते तदाह सुख

२९

प्रकारेणेत्यर्थः ४७ अत्राध्यायसमाप्तिकरणं क्रमप्राप्तं दुरवमपतयात्यक्तो धेनुकवधप्राकृ कालिकी कालीयदमनलीलां स्मृत्वा वेत्स्यात् स्मृतां च तां वक्तुमारभ्यापि किंचिदुक्त्वाध्यायः समापितः पमु
नाद्दोषोन गत इति श्लोकत्रयपूरितो पनिशासाविलोक्य दूषितामिति पद्येन साल्लीलास्सूचिता प्रश्नोदीप्ताब शाख शास्त्रनुविस्तारितेतिहृदयं तथोचोपक्रमतो एवमिति ॥ गाद्यनुकरणादिनेत्यर्थः सर्वे जंजीवनः
कश्चिद्गोचारणार्थं नवषस्य निदाघे रामं विनेति तस्मिन्तेन साहसनिषेधमयमात्तशीघ्रयात्तुहृदप्रवेशो ।निवार्यतेति संभावनयेति भावः ४८ ततः श्रीमुखदर्शनलुब्धानां सर्वेषां कृष्णमेति का गमनो
त् व्रजेश्वर्या अनुशासनाच्च ४९ गावः अनंतरमेव गोपाश्चययुः गावस्तावदातपपीडयात्पीतां विषदोषात्तानात्मपुः गोपास्तु दोषज्ञानं तोपि गवां मृतिं दृष्ट्वा देहजिहासयापपुरिति क्रमोक्तेरा
शयः गावश्च गोपाश्चैते तत्र आगामिनः श्रीकृष्णहस्तिव्यवहिताः कतिचिदेवक्षेयाः तत् हस्यमानानां पानमरणसंभवात् ५० एतदपि लीलाशक्तिवैभवमेवेत्याह दैवेति देवो भगवान्तस्येदं लीला
शक्तिवैभवं तेनहतज्ञानाः उपस्पृश्य किंचिदाचम्य व्यवसन्न इत्यत्रोक्तं दैवमेवहेतुः ५० इक्षयेत्यविलंबः यतः स्वनाथान् अतोमृतवर्षिण्या प्राक्तनानामृतमिव तेषां जीवनं कारुण्यवर्षितुं शीलं यस्याः
यद्वा कारुण्याऽमृतजलवर्षिण्या सम्यग्लान्यादिनीरासेना जीवयत् योगेति यत्प्रसादाद्योगिनां तत्तच्छक्तिरिति भावः ५१ संप्रतीत स्मृतयः प्राप्तस्मृतयः ५२ अन्वमंसत अनुमितवंतः हराज्ञेनेति भवाहृशामेव
दृशां त्वं युज्यत इति भावः ५३ इति श्रीमद्भागवतदशमस्कंधमध्यगः अध्यायोगास्यचंद्रश्लोषिणीसारसंग्रह १ इति दशमे पंचदशोऽध्यायः १५ ननु भगवता गोपादिजीवनमिव तदैव यमुना निर्विषा
कर्तुं युक्ते त्यपेक्षायां विधांतरेण निर्विषा कृतेति वक्तुं फणिफणातांडवं भुजंगीस्तुति तत्प्रसादादि पंचमवर्षस्य निदाघभवं चरितं विस्तरार्हमपि प्रथमतः सकलव्रजजनशोकमयमिति संक्षेप्याह विलोक्येति
कृष्णमामिति वर्णनो नामतश्च अतः सख्यास्तस्या दोषस्यावश्यं प्रतीकार्यत्वं कृष्णमाहिनेति महाविषत्वं कर्षति दुःखानीति कृष्ण इति नद्यास्तत्र स्थानोस्थिरचरणो कालीयस्य च दुःखनाशकत्वं निमुरिति ऐश्वर्ये
दयः १ भगवानपि कथं केन प्रकारेण सर्वे सच बहुयुगानि आवासो यथा तत्रवतितथा यथा आसीत्तत्तथा कथ्यतां हे विप्र विद्याप्रवीण विद्ययायातीति विस्त्वभिस्फोक्ते २ मुनिना दुःखशोकव्याः संक्षेपितमित्यतात्वा
लीलासामान्याभिप्रायेण स्वाभिलाषं दर्शयति ब्रह्मन्निति स्वच्छंदवर्तिनः स्वैरलीलाप्रकाशिनः भूम्नः सर्वातिशायिनः गोपालनीतमर्त्यं तं उदारमहत् इष्टवानाचरितं जुषमाणः यतोऽमृतमिव ३ शुक उवाचे
ति दुरवास्मकमपि तच्छुकवद्यथाश्रुतमेवा नोच्चत्तु विस्तार्येत्यर्थः कालिंद्यां हृद इति तस्या दक्षिणभागे तस्मिन् हृदे इत्यर्थः तस्या प्रवाहस्तु पृथगेव अन्यथा तद्विषजलेन मथुरादिजनविक्रोशापत्तेः अथवास्तं भ
विद्ययाजलस्तंभोऽस्त्येयः श्रूयमाणं पच्यमानं पयायत्र ऊर्ध्वगाः पतंतीति विषस्य दूरगत्वं ४ किंचविप्रुष्मता अंबुकणयुक्तेन विषोदकतरंगस्पृष्टवायुनास्पृष्टाम्रियंते तेऽणवपि पतत्स्वप्सु ज्वलतामिव तेजसा संभ
ताद्याजनं सागरतीरे ऽपि दुरासमित्यादि हरिवंशे विशेषः ५ चंडोकार्यः वेगः शीघ्रप्रसरणं यस्य तद्विषमेव वीर्यं यस्य तं सर्पं तेन कालीयेन हेतुना अवतारः स्वलोकादागमनं यद्वा अवतारा मात्स्यादयो यस्य कृ
दूर्वमिति अमृतमाहतागरुत्मता विश्रमायाधिष्ठितइति सर्पेणैव कोनभुजः आस्फोटय बाहुमाहस्य दृढं बद्धारशाना कटिबंधनवस्त्रं येन ६ पुरुषश्रेष्ठस्य निपातः यद्वा पुरुषस्य भगवतः सारेण बलेन योनिधा
तोऽस्तस्य जवेन भरेण तिवा पाठः संक्षोभितः उरगविषैरुन्नतभ्यां भुराशि यं स्याविशेषणं कषायिताः क्वथिताः भयंकराश्चोर्मयो यस्य पर्यक् परितः धनुःशतं प्रसृतः चतुर्हस्तं धनुर्मतं धीमन्तिसाम्बास्यति अ
नंतबलस्य तस्य तत्कर्म यद्वा नंतरस्य शेषस्य विषादिबलं यस्मात्तस्य तद्विषकिं ७ विहरतः जलवाद्यादि क्रीडां कुर्वतः वरवारणो दिग्गजस्तद्वत् विक्रमस्य भुजदंडाहतोदकघोषं पश्चात्यास्वस्थानाभि भवंचदृष्ट्वा
सर्पः समाजगाम ८ एतादृशमपि दृष्ट्वा भोगेन वेष्टयदित्यपरार्धं दर्शयन् विशिनष्टि प्रेक्षणीयत्वादि पश्यसुकुमारश्च घनवदुज्वलश्च जलविहारात् श्रीवत्सेन संश्लिष्टपीतवस्त्रं यस्य अप्रतिभयत्वात्तं शी
दंतं भुजाकारभोगेन वेष्टयत् ९ सप्रियायेषां तस्य वा प्रिया तेच ते सखायश्चेति सो ह्यादर्श पश्यु पाः अविचार्य चारुप्रेम्णा अर्पिता आत्मनः देहाः सुहृद्दारादयो यैः तत्सहाय्याय कृतसर्वार्पणाः कामालोक दयं भो
गाः कलत्रपदार्थेषां चिद्विषाहकत्वं इतितेषामनन्यापेक्षत्वं अतो मृत्यो दुःखिताः क्रंदंतो वा दुःखेन मुहुः शोचंतं भयं च ताभ्यां मूढधियो नष्टचेतनाः यद्वा भुजाच्छन्नं दृष्ट्वार्ताः नष्टचेष्टं दृष्ट्वा दुःखाद्येर्मूढधि
यननुमीलीतवक्षसवक्त्चेष्टापेतुः हृदधीत्वा तत्स्वदं न प्राविशन् अदृष्टचेष्टत्वं तन्निःसारणाय तस्मिन् दोषप्रदर्शनार्थं १० इवेति लोकोक्तिः रुदंत्यः अश्रूणि मुंचत्यः तस्थिरे तस्थुरितिज्ञोनकेनसंभः गावोह
रिण्याद्युपलक्षणं तदनुक्तीसु दूरतया पश्च्यादागमनात् ११ भुवि कंपादयः दिवि निर्घातादयः आत्मनि वामनेत्रस्फुरणादयः समीपवर्ति भयसूचकाः स्वरूपतोऽपि दारुणा भयंकराः १२ तानिति त्रिकं तानालो
पतं क्य गोकुलानि जगमुरित्यन्वयात् विनेति रामसहाय्यं तस्य व्यसनं तस्यादिति भावः १३ नतविदंतीत्यतद्विदः १४ पशुवृत्तित्वेन पशुस्वभावभाविताः पशुवद्वृत्तिः वात्सल्याशये पामितिवा अतो दीनास्खलंतः
न तश्चेत्यर्थः स्वभाववृत्तयकृष्णदर्शनोत्सुकाः १५ तथा कातरानपि वीक्ष्य स व्रजैकप्रियोऽपि भगवान् प्रियमाधवः मा विद्या च यतः प्रोक्तास्तस्या ईशोऽयतो भवानीति हरिवंशात् सर्वविद्यापतिरपि
छ किंचित्कृतवान् न चापदिष्टवान् किंतु मात्वनीयैस्त्वस्ति स्निग्धः श्याय हसस्वतो नात्र चिंतेति तेषां धैर्यार्थं प्रकटं हसित्वा तूष्णीमासीत् ननु कथं तदा स्वशक्तिर्न व्यंजिता न वा तत्प्रभावः स्प
मुक्तो तत्राह तस्य प्रभावं शक्तिमिच्छावा वेतीति १६ अन्वेषमाणा अन्विच्छ यतो दधितं तत्रापि कृष्णं भगवंतं लक्षयति यानि यद्वा भगवत्प्रभावयुक्तानि पदानि तैः सूचितयापदव्या

राम २१६ इति

मार्गेण १७ विशेषो वेश्यागोपास्तस्य तेकृष्णस्य पश्चाद्धावत्यार्षः अन्येषां पदानां मध्ये मध्ये स्थितानि चिरं प्रस्थितस्य पश्चु पश्चु धावतस्य पदानि यत्नतल्लुप्तानि तत्राम्बुजास्य सर्पणार्थं रक्षितत्वं सर्वे प्रेमास्पदत्वं
काद्याद्यक्षोश्यत्वेन महाप्रभावत्वं चेति हेतवः भगवल्लक्षणैरित्युक्तेः १८ ततः सर्पशरीरवेष्टितं कृष्णं निरीक्ष्य गोपादींश्च तथा दृष्ट्वा आर्ताः परं मोहं प्रापुः तत्र गोपीनां विशेषमाह गोप्य इति नाम्स्यतो भक्ता नायस्मा
त्तस्मिन्नपरिच्छिन्नेवेति ग्रस्तनासं भवेत्यहिनाग्रस्तं तदिच्छातो गेनाक्रान्तेति दुःखेन तप्ताः यतस्ताः सहानुरक्तमनसः स च प्रियात् देहादेः प्रियतरात्मनोपि प्रियतमः तथा तस्य सौहृदेन प्रेम्णा याः स्मिताव
लोकगिरः ताः स्मरन्त्यः प्रियेण विशेषतोतिशयेन हृतं स्वगृहं तादृशीं नयाता सामंदवधिराय माणतां विधाय विच्याविंतत्रैलोक्यं शून्यं ददृशुः २० मातुरवस्थां शोकभरेण किंचिदेव दर्शयन् सर्वासामेव दशा
विशेषमाह ता इति न पतति दुःखकुलत्वेज्ञो यस्मात् तदपत्यमनुलक्ष्य प्रकर्षेण सर्वतोधिकं तत्ताः प्रविष्यामिति पाठ ह्रदं प्रवेष्टुमारब्धां तुल्यव्यथा अपि समनुसम्यक् निरंतरं ध्यत्वाश्रूणि मुंचन्त्यः तास्ताः कृ
तनादि दैवकृतरक्षामयीः बकादिवधरूपाः तच्छोयं मयीश्च व्रजस्य प्रियकथाः व्रजप्रियस्य वा कथाः बहवो दुःखाहताः कोयं वराको नाम पुनः हत्वा धुनेवायास्यतीति सांत्वनार्थं कथयन्त्यः कृष्णार्पितदृशाश्या
सन् पश्चान्मृतकतुल्या आसन् तदुक्तिविशेषो विष्णुपुराणे सर्वा यशोदया सार्धं विशाम त्र महाह्रदे दिवसः को विना सूर्यं विना कृष्णेन को व्रजः यत्र नेंदीवरदलप्रख्य कांतिरयं हरिः उत्फुल्लपंकजदलस्प
ष्टकांतिविलोचनं अपस्यन्त्यो हरिं दीनाः कथं गोष्ठे भविष्यथेतिस्यादि २१ नंदादीन् ह्रदं निःशेषं प्रविशतः सव्रजरक्षार्थं भगवतात्यक्तः एको बहूनां वारणं कथं कुर्यात्तत्राह भगवान् कांश्चित् छलेनापरान् अंतःप्रे
रणयेत्यर्थः यतः कृष्णप्रभाववित् २२ स च मुहूर्तं स्थित्वा रंगवंधादुदतिष्ठत् मुहूर्तं स्थितो हेतुः मर्त्यपदवीयं प्रतिदंडो विधेयस्तस्येदा पोल्लोके प्रदर्शयेत् इति लोकनीतिमनुसरन् उत्थाने हेतुः स्वगोकुल
इत्थं निजोत्थानं विना न जीविष्यतीति प्रकारेण नास्त्यन्या गतिः रक्षको यस्य यद्वा नान्यस्मिन् ह्रदादन्यत्र गतिर्गमनं यस्य तन्निश्चित्य ह्रदप्रवेशमित्यर्थः आमोलुभावत्यार्षः अनन्यो ह्रदैकविषया गतिर्गम
नं चार्थाद्गोकुलस्य वीक्ष्येति वा भाति नीरीक्ष्यतच्चेष्टाति निश्चित्य तत्रापि सस्त्रीकुमारं साकल्येव्ययीभावः चेष्टा एवाह आत्महेतोः दुःखपरां काष्ठां प्राप्तं दुःखित मात्तायतत्राप्यति दुःखिते तत्रापि आत्म
प्राप्यर्थं तत्राप्यात्मदुःखदुःखितामिति क्रमेण दयालुस्वभावस्य तस्य तत्तदसहिष्णुतातिशयव्यक्तयोत्थाने त्वरा व्यज्यते २३ उत्थानप्रकारं दर्शयन्सर्पग्लानिमाह तस्य कृष्णस्य वर्धमानेन वपुषा व्यथित
स्तुट्यन्निवपीडितः आत्मभोगो यस्य आत्मपदेन तादात्म्यव्यंजातिपीडाव्यंजिता वेष्टेन मुमुच्य तं स्यक्त्वा स्वानसाधारणान् फणानुन्नमय्य हरिं निजावासहरणोद्यतं पश्यन् तस्थौ श्वसन् रंध्रेषु विषं यस्य
अंबरीषं भर्जनपात्रं तद्वत्तप्तस्तब्धनेत्रः उल्मुकानि मुखेषु यस्य स च स च २४ हरिश्च क्रीडन् हि क्रीडन्नेव तममुपरितः ससार तद्भ्रमणाय स्वयं बलात् प्रतिमुखं जिह्वाशिखाद्वयेन युगपत्सृक्विणी
द्वयं मुहुर्लिहंतं करालाविषाग्नियुक्ता दृष्टिरस्य गरुडवदुद्धौ तः प्रबलत्वेत्वरायां वा कालीयोपि दंशावसरं प्रतिपदं समीक्षमाणो बलात् मतिरसर्पणक्रीडाकोशलं २५ भ्रमणेनहतबलमपि उन्नतस्कंधं
अतः स्वहस्तेनानम्य पृथु इति रंगयोग्यता तस्य मूर्धसु येरत्ननिकराः ते षां स्पर्शमात्रेण कोमलत्वाद्भ्यरुणं पादाब्जं यस्य कलानामादिगुरुरिति च चलमसृण तच्छिरोनर्तने प्राविण्यं २६ नृत्योत्साहार्थं
तदुपकरणमाह तमिति अवेक्ष्याव्रत्येतिपाठो तदीयाः पार्षदाः मृदंगादिवाद्यैश्चारणाः असेवंत गंधर्वा गीतैः देवास्तद्वच्च पुष्पैः सिद्धाः गंधद्रव्याद्युपहारैः मुनयः पार्षदाश्च नुतिभिः त्रेमानुसं
धानं हर्षेणैवस्यात् प्रीत्या सर्वेषां सर्वत्र प्रवृत्तेर्वा २७ शतमेकानि मुख्यानि शीर्षाणि यस्य अत्र मुख्येस्कंकेर मुख्यान्यान्यपिसंति अन्ये फणासहस्रेकेः क्षीणायुषां मृतप्रायस्यापि नम्रमतः यद्यच्छि
रोननमिति नृत्यच्छले नांघ्रिपातैस्ततमर्द तदा चास्य तो मुखेभ्यः नस्तो नासा रंध्रेभ्यः बहुतरं अस्नक् वमन् २८ पुनरपि पुरुषात् क्रोधेन निःश्वसतः यद्यत्समुन्नमति तत्तत्पदा मुह्नमयन् इहास्मिन् स्वपि
पुष्पैः प्रपूजितः स्व प्रसन्नो दंडव्याजेन दययाव भावहितं कृतवान् यतो भवांस्तकघ्यति कस्यानुभावोस्य न देवविद्महे इत्यादि वक्ष्यमाणात् तस्य तद्भागविषयं बाचित्र भ्रमणादि गतिभेदं तांडवं तेन विरु
गण ज्ञात ज्ञणंत्रं नवा फणानां सहस्रं यस्य नतिवत्ते चरणस्पर्शमहिम्ना दोषहानाच्छुद्धभावास्यस्याच्युतं चराचराणां गुरुं जनकं शिक्षकं चेत्येवमादिरूपं स्मृत्वा सपत्नीभ्यस्तथाश्रुतमनुसंधाय शरणं
जगाम ३० एवं शरणापत्त्या पादाघातं स्यक्त्वा प्रसन्ने तस्य पत्नीभ्यस्ते प्रसादं दर्शयितुं तस्य शिरस्येवस्थिते भगवति तासां प्रपन्नतामाह कृष्णस्येति द्वाभ्यां गते जगंति यस्येति नच्योतर्नचहि यस्येति त्तायनि लिहृ
त्वादुक्तं एवं च पणाच्चूर्णिता वा भावस्तदिच्छावशादेव अवसन्नमाक्रांते पार्ष्णिः पादपृष्ठं आद्यं श्रीकृष्णमुपसेदुः समीपमाजग्मुः आर्तश्लाश्च श्लथवसनादिकाः ३१ सा विग्नं पस्य सत्ताकुया भीतं मु
नायासोताः अयं प्रणामप्रपतोन्य गुणविशेषैः भुवि स्वदेहमध्ये स्थूलपकायं निधाय दंडवन्निपत्य कृपाजननार्थं पुरस्कृता अतीः कृतानां प्राणिमात्राणां पतिं नन्यगतिकतया तत्प्रसादनेन भर्तुः प
च्छमत्त तस्य मोक्षेच्छवः यतः साध्व्यः पतिव्रताः कृष्णभक्ताश्च ३२ प्रमेतावत्कुपितं श्रीकृष्णं दंडानमोदनेन शमयंत्यः स्तुवंती न्याय्य इति तत्र दंडानुमोदनं नमनार्थाः षड्दृशा पंचभिः अस्मि
न् दंडो न्याय्य एव यतः कृतानि किल्बिषाणि गरुडे यमुनावृंदावने प्राणिषु च यचापराधा येन तस्मिन् खलानां साधुद्रोहिणां निग्रहाय तेनैव साधूनामनुग्रहाय च न चैवं वैषम्यमित्याहुः रि रूष्म

भाग० २१६

पोऽरिति नापि नैर्घृण्यमित्याहुः धत्से इति फलत्वकलत्व नाशं मुक्तिसहकत्वं चालोचयन् ३३ इदानीमयं निग्रहः किंत्वनुग्रह एवेत्याहुः अन्विति नोऽस्मान् प्रतिदंडत्वेन दृश्यमानोऽपि अयमनुग्रहः हि यत्कृतः यतः स्तोत्रयाकृतो दंडोऽसतां कल्म
षापह एव स्यात् यस्मात् कल्मषादस्य देहिनो नानादेहवतः संप्रति दंदशूकत्वं जातं इतः परं त्वद्दनुग्रहाज्जीवन्मुक्तत्वेन सर्पत्वाभास एव स्थास्यतीत्यर्थः तस्मात् क्रोधत्वेन प्रतीयमानोऽनुग्रह एवेति यद्वा असतां कल्मषापहोऽपि ते
त्वया दंडो नो कृतः न कृतः अतोऽस्य सर्पस्य अनुग्रहे निमित्ते त्वया समंतमेव भोगवेष्टन स्वीकारात् तथा क्रोधोऽप्यनुग्रहार्थमेव सम्मतोंगीकृतः क्रोधोऽन्नमित फणेषु हर्षेण नृत्याचरणात् ३४ अतस्तस्य पूर्वपुण्य
मभिनंदंति तप इति सुष्ठु तप्तं सौष्ठवमाहुः स्वयं मानहीनेनान्येभ्यो मानदेन तपो मात्रा तोषमस्य भाव्याहुः धर्म इति जनानुकंपयेति अहिंसात्मक इत्यर्थः यतो यान्यासर्वजीवयतीति भूतहिताचरणात् त्वत्तोषद इति भावः ३५
न ८ तपआदि निमित्तोऽप्ययं भाग्योत्कर्षः किं त्वचिंत्यतत्कृपावैभवमित्याहुः कस्येति अस्यापराधिनो यांघ्रिरेणु अधिकारः ब्रह्मादिभिस्तपआदि प्रसाद्या श्रीरपि ललनाकामत्वापि यस्यांघ्रिस्पर्शाधिकारस्य वाछया भो
गान्विहाय तत्तपश्चचरदेव न तु तं प्राप प्राप्तिश्चेत्कारणनिर्णयोपजातः स्यात् तपोत्रपस्याराधनं च श्रीश्चेयं वैकुंठादस्थिता नस्था स्वर्णरेखारूपा च सौंदर्यविशेषात् श्रेयस्यतत्र वा वांछात पश्चरणेपि तयोः पादसं
वाहनादि कृतश्रियांघ्रिकारस्य कालत्रयेपि न लाभः श्रीत्वेन सर्वासामेव्य प्रत्वाभिलाषः प्रादुर्भावभेदेनाभिमानभेदात् यथा वैकुंठादौ संयोगसत्त्वेपि सीतायाः श्रीरामविरहादिव्वेदा वनाधिवासस्य पादरेणुस्पर्शोहे
तुत्वसंभवेपि तस्य फलातः पातेन तत्रापि हस्तनोऽत्वषणेति भावः ३६ आस्तां पादयोर्द्योर्बलहृतरेण नोस्पर्श माहात्म्यमेकं रेणवाश्रयेण प्रभावोपि अनिर्वाच्य इत्याहुः नेति नाकपृष्ठं न वांछंति किमुत सार्वभौमं पारमेष्ठ्यं
न किमु रसाधिपत्यं एवं कर्मफलं कैमुत्येनोक्त्वा योगज्ञानफलं समुच्चयेनाहुः न योगेति यत्तव पादरजः प्रापाः ३७ अन्येर्ब्रह्मादिभिर्दुःखेन प्राप्यं न त्वद्यापि प्राप्तं तदेवैष महापराध्यपि पतः तामसजातिः तत्र क्रोधवशः
तत्रापि स्त्राहिषु श्रेष्ठोऽपि प्राप्तः नाथयतिया च यतीति हे नाथ उदारसाधनसहस्रा तदुर्घटमप्येतत्त्वत्कारुण्यादेवसम्पन्नमिति भावः यस्मादरज इच्छतः सर्वं मे स्त्विति प्रार्थयतः देहाभिमानिनोऽपि प्रत्यक्ष एव विभवः इह
परत्र विभूतिः प्रेमसंपद्वा भवति अयं तु त्वत्सादरं गीकृतफणाविभवैकयोग्य इति भावः ३८ एवं दंडमनुमोद्य ऐश्वर्यादिकं वर्णयंत्यो नमंति नम इति दशभिः भगवते अंतर्यामिने तैश्वर्यनिधये तुभ्यं नमः अतएव सर्वविरोधेः
सर्वाण्यद्भुतानि च त्वयि विराजंत इत्याहुः पुरुषायनराकाराया पि महात्मने व्यापकाय भूतावासाय सर्वभूतान्तस्थितया नियामकयापि भूतरूपाय नियम्यायेत्यर्थः यद्वा जननिवासाय गृहीतजन्मने त्यद्भु
तत्वं जननिवासो देवकीजन्मवाद इति वक्ष्यमाणात् परायस वेतः परत्वेन स्थितायापि परमात्मने सर्वेत्वदिच्छायतिनिरोधः ३९ ज्ञानस्वरूपाय अथ च विज्ञानानां विविधज्ञानानां विधये सत्वं ज्ञानमिति यः सर्व
च तः सर्वविदिति श्रुतेः ब्रह्मणे सजातीयादि भेदरहिताय थाप्यनंतशक्तये अगुणत्वेनाविकाराया प्रियप्रकृतिप्रवर्तकाय स्वयं कृतत्वं ४० कालाय कालस्वरूपायाधापि कालचक्रस्य नाभये आश्रयाय अजितियोगविभा
गात् समासांतः तथापि कालावयवानां क्षत्वादीनां साक्षिणे न तु तत्पुरुषक्षाय विश्वाय विराड्रूपाय च तदुपद्रष्टे विश्वांतर्यामिणे विश्वस्य कर्त्रे विश्वस्य हेतवे सर्वकारकरूपाय च ४१ भूतादीनामात्मने चेतयि
त्रे अथापि गुणान् आच्छादितास्वांशानां जीवानां अनुभूतिस्तत्ववान्येन ४२ अनंताय परमात्मने अथ च सूक्ष्माय कूटस्थाय अविकारायापि विपश्चिते विचित्रवेदग्धीगुरवे नानावादाननुरोधयतीभवतयति
तस्मै यतो वाच्यवाचकयोः अर्थशब्दयोः शक्तिर्यस्मात् ४३ अतः प्रमाणाय भागवतसारं संग्रहा वेदाः तस्य मूलाय आश्रयाय कवये स्वतः सिद्धज्ञानाय अथ च शास्त्रमेव योनिः प्रमाणं यस्य प्रवृत्तिनिवृत्ति शास्त्रं तदुभ
यस्मै निगमाय एवमद्भुताय मुहुर्नमो नमः ४४ किं च चतुर्मूर्तिस्त्वमेवेत्याहुः नम इति रामाय संकर्षणाय शुद्धसत्त्वे भासमानाय वासुदेवाय सात्वतां मुपासकानां सात्वतां ख्यातिदानेन पालकाय एवं च चतु
र्हितये क्षमाय ते नमः यद्वा क्षमाय रामाय च नमः ऽथ निविशिनष्टि वसुदेवसुताय चेति चानंदकुमाराय च प्रागयं वासुदेवस्येति न्यायात् तत्को ब्रजे नास्ति तयोरित्यादौ तथा व्यहाख्यमथुरामधिकृत्य यत्रासौ संसिद्धि
तः कृष्णस्त्रिभिः रामरामयासमावृतः रामानिरुद्धप्रद्युम्नै रुक्मिण्यासहितो विभुरिति तातापि नीशकृत्या भावि प्रादुर्भावित्वात् आहुः प्रद्युम्नायेत्यादि ४५ तत्कान प्रतिगुणानां चिन्मयानां कारुण्यादीनां प्रकाशकाय अभ
क्तान प्रतिगुणैः प्राकृतैः शत्मछादनाय तथापि तेषां जडानां गुणानां वृत्त्या प्रवृत्त्यानुमेयाय कथं गुणप्रवर्तकत्वं तदाहुः गुणद्रष्ट्रे इति वीक्षामात्रेणेत्यर्थः स्वयं तु स्वयं प्रकाशायेति यद्वा एवं यादवसंबंधे पि गोप
संबंध एव श्रेष्ठ इत्याहुः प्रेमवश्यत्वादि गुणानां प्रकाशकाय यतो गुणैर्दामभिरात्मा नंदादयः सीमात्राबहुदामभिर्बंधनात् तथा गुणानां वृक्षोन्मूलनादिलक्षितानां अपर्याप्तानां दाम्नां वा वृत्या वर्तनेन ज्ञेयाय
बंधनदाम्नां द्रष्ट्रे भीत्या विस्मयेन वा मुहुर्दर्शनपराय अथ च स्वेषु वश्येषु तदापि दधिपयश्चौर्ये संविदः संकेता यस्येत्युक्तं त्वं ४६ अव्याकृतः पंचातीता विहारास्य अन्यथा निर्गुणनिष्ठानां लीलारूढत्वेन स्या
त् अथापि सर्वत्र व्याकृत तल्लीलात्वेन प्रसिद्धिर्यस्य हृषीकेशास्त्वमतो वा स्मारामाणाम पींद्रिय प्रवर्तक मुनये आत्मारामाय अथाप्यमौनशीलिने तद्विपरीतगोपलीलाय एवमतर्क्यलीलायेति भावः यद्वा न व्या
कृता व्यक्तचौर्यादिविहारो यस्य तथापि सर्वगोपीभिः व्याकृताव्याख्यातासिद्धिः चौर्यफलं दध्यादिभक्षणमपि यस्य तथापि हे हृषीकेश तासां सर्वेंद्रियवशीकारिन् किं मात्रा गोपिभिर्वा कृतं तदुपालंभादौ मुनये
उपालंभतात्रधापि मानशीलिने स्व प्रतीकोयथास्तु इत्युक्तेः एवं श्लोकद्वये गोपलीलायाः श्लेषोक्तिः प्राकृतत्वेन संकोचादिति ज्ञेयं ४७ अतर्क्यलीलत्वे हेतुः परावराणां तत्त्वज्ञानेन तुत्तेया यथापीदानीस
र्वेषां प्रत्यक्षाय किं च नास्ति विश्वं यत्र तथापि विश्वाय तदेवोपपादयंति द्रष्ट्रे स्य च हेतवे इति इदं त्वत्स्वा इदं जगत ततो भिन्नाय उपादानरूपत्वाद्विश्वरूपाय चेति एवं सर्वविरोधाश्रयत्वेन अचिंत्यैश्वर्यमुक्तं अतः
सर्वविरोधाश्रयत्वाच्चिग्रोत्त्यस्याप्यनुग्रहो युक्त एवेति भावः ४८ एवं दंडानुमोदनेन नमनैश्च प्रसाद्य पंचभिः प्रार्थयंते तत्र कर्माधीनस्वभावानां प्राणिनां कोऽदोषः न त्वेतत्संस्कारो वा बोधकस्येत्याहुः

दशम ३०

कर्तुमर्हं तवाविदिताइति भंगद्यक्षमर्हं पार्थयंत्यस्त्राहुः त्वमिति अनीहः निराभिलाष एव त्वं स्वच्छ्यादीनीहसे करोषी सतः प्रत्नीयेत्नीनस्य साधकत्तत्त्वजनस्य समीक्षया तं दद्रष्टुं स्वद्दिर्मध्ये वतीर्यतं चिरं द्रष्टुं ३०
स्थितिः तादात्म्यनात्लिग्य समीक्षितुं त्वयः सङ्कल्पानोविनोदार्थकरोभिविविधाः क्रियाइतिपाठात् आनुषंगिकं तयान्येषामपि तत्स्यादिति भावः अन्येषामपि स्वच्छ्यादेयुक्तिः अवृतकालेति अनादिकालत
शक्तेति भावः गुणैरुपलक्षितान् प्राक्कर्मसंस्कारान् बोधयन् ईक्षणेहद्ग कालशक्त्या सर्वकर्मोद्बोधादिति भावः ४९ अतस्तस्य तवैव त्रिलोकिस्थाः सर्वा अम्हस्तन्वः क्रीडोपस्काराः तथापि तेषां शान्तास्त
नवः तास्वप्रधुनासतां धर्मपालनेछया ईहतः प्रवर्तमानस्याविर्तुस्थितस्य ते प्रियाः इति तेपदानां संगतिः एवमीदृशादुष्टानुग्रहो नेति कारुण्यमिति स्वकारुण्येनैव क्षमस्वेति भावः ५० अतो विक्षमायुक्तेव त्याहुः अ
पेति भर्त्रीपोष्ट्यास्मित्तुल्येन प्रजापराधः सकृदपि सोढुं युक्तः अतः क्षंतुमर्हसि किंच मूढत्वात् त्वां ज्ञातुं असमर्थस्य यद्वा सकृदपि यो भर्ता तेनापि त्वं तु सर्वज्ञस्मरूनिस्य भर्तेति भावः ५१ किंवाच्यक्षेमतिअ.
नुग्रह एव कार्य इत्याहुः अन्विति भगवन् हे सर्वज्ञेति स्वबैं भवं अस्मद्दैन्यं च जानासीत्यर्थः एतच्चावित्तबने त्याहुः प्राणानिति आस्ता मयैव यं तु स्त्रियो वृत्स्यमनुग्राह्या इत्याहुः स्त्रीणामिति साधुभिः शोच्यानां
यद्वा साधु यथास्यात् तवलत्त्वं सत्याज्यत्यर्थः प्रकर्षेणाक्षततत्वेन दीयतां ५२ तवकीकरीणां यदनुष्ठेयं तत्समादिश यत यतः यदनुष्ठेयं वातवातयानुतिष्ठन् सर्वत्र सर्वस्माद्वा भयात् यद्वा केवल्यमेवा भिप्रेतं ५३ स
त्कृतिमात्र प्रीतः परदुःखकातरो वा भगवान् कुद्दनेः प्रहारैः ५४ हरिं स्वमेदहरं दीनत्वात् आर्तः अतो शक्त्यानपत्नीवत् दंडवन्ननाम प्रकृष्टं दीनानां वक्तुं योग्यमाह अतो त्वत् तस्मिन् स्वदारपारो पोदैन्येनेव ५५ तथैवा
हच तुर्भिः वर्यत्निति इस्त्यासहस्वभावेनैव यतः स्वभावादसति देहादौग्रहः नाथहे ईश्वरेति स्वभावखंडनसामर्थ्यं ५६ तदेव नाह त्वयेतिसार्धेन ननु ब्रह्मणा स्वष्टं तत्राह ध्यातरिति त्वमेतद्रूप इत्यर्थः वी
र्यौजसी देहेन्द्रियशक्ती योनिर्माता बीजं पिता आशयो वासना आकृतिः सरूपं ५७ जन्मनैव क्रूरमन्युर्येषां भगवानीश्वरेति त्वमेव कर्मप्रेरकः वयं कर्मतंत्रा अतो यमपराधः इति भावः अतोन यः स्वयं कथं त्यजा
मः ५८ हियतः तत्र त्वन्मायात्यागे भवानेव कारणं सर्वस्वमायावैभवमस्मद्दैन्यं च जानासीत्यनुग्रहे हेतुः ईश्वर इति निग्रहे यद्वा सर्वनिग्रहानुग्रहयोग्यतां जानासि तद्विधेहीति निग्रहयोग्य अनुग्रहं कुर्वीतिभा ने
वः ५९ अर्थकं इत्याकर्ण्येति अभिप्रायज्ञात्वेत्यर्थः कार्यज्जगद्धितं तदर्थं मानुषः कार्यं लीलातयैव मानुषो न भौतिकदेहैर्निवा यद्वाकाद्रूलणो प्यार्यो मानुषानेदादयोयस्य तेषां स्वार्थमिति भावः ६० हे सर्पेति तत्र
स्थित्य योग्यत्वं यानेन शक्तिश्च अतः स्वात्तात्स्यादिति युक्त इति स्वपदेन तेषां तादृशविषत्वं तदधीनत्वं च ६१ ६२ त्वांप्रतिमम यदनुशासनं नात्र स्थेयमित्यादि पादद्वयात्मकं सर्पोच्चारणमंत्रलक्षणं संध्ययोः कीर्तयन्नयः
स्मरेत ६३ स्नात्वा तर्पयेदिति विषादिदोषापगमः उपोष्य तीर्थोपवासं कृत्वा मां चितयन्न चेत्सर्वैस्त्रिविधैः प्रकर्षेण वासनाराहित्येन मुच्यते ६३ रमणकं संज्ञां यां कन् एतं योजनमात्रमिति द्वीपान्तरं प्रमाणता
उपाश्रितः नाथं निश्चावास इत्यर्थः पादलांछनेपूर्वं नस्थावसरं धुनेव वा प्रसादीकृते ६५ उक्तो मुक्त इति पाठो अद्भुतकर्मणेति निजावास प्राप्तिसौख्यादभयं किंच तत्सर्वं त्वं मान्यत्वं पादलांछनेन पादरे
णुर्तिर्नस्यत्नीः त्वयाच सर्वमहर्षसाफल्यं ब्रह्माद्यलब्ध भगवदनुशासनलाभ स्ताद्दशाम्रतपानं पूजादिकरणं एवं बहिर्दृष्ट्या निग्रहस्यापि अनुग्रहशरं ताधिकत्वे पर्यवसानात् किंचापराधिन्यपि प्रसादः
कोमलेनापि पदा मृद्धेरत्नचूर्णनेलोलफणासुनृत्यगति कत्नाकौतुकं चेति स ५ वं महत्तमेव एवमैश्वर्य प्रकटनादाह भगवतेति नागः कालियः मुदेति प्रसाददर्शनात् सादरं सप्रेमं अर्चनेन तासां स्वहस्ते र्ग
धानुलेपादि व्यज्यते ६५ दिव्येति सार्धकं दिव्यस्यादिविशेषणेः मर्त्यतो वैशिष्ट्यं प्रायस्तेषां संकल्पसिद्धमिदं ६६ जगन्नाथमिति तत्स्तुत्या सर्वत्र जगति मंगलावाप्तिः गरुडध्वजं प्रसाद्येति तार्क्ष्यभयनिव
त्तिः प्रीतः श्रीकृष्णेन्नात प्रीतिः सकलत्रेति तदात्तानुवर्तित्वं हृस्फुटं ६७ सा तादृशादुर्विषाशि निर्विषेति ह्रद दर्शनाति प्राये अंत तज्जलाभिष्ठतायानेद प्रदत्तं लाभिवाभवत् क्रीडायुक्तश्चासौ मानुषाकारश्चेत्य
तथाचनरत्नीलापयिकीस्यादिति भावेनेत्यर्थः ६८ इति श्रीमद्भागवते दशमस्कंधमध्यगः समाप्तः षोडशोऽध्यायः स्तोपीणि सारसंग्रहः इति भागवते दशमे षोडशोऽध्यायः १६ भगवतोऽप्यदयदर्शने
स्व न कृत्स्नस्यस्थ तामाकल्लयस्वस्थसन् नेदाद्यालिंगना द्युतवस्तत्रोपकूलसुप्तानो तेषां द्वादक्षणमित्यादि वक्तव्य शेषकथा मध्ये एव कथा सौष्ठवात् सूर्वव्वत्तं पृच्छति नागेति नागानामालयं न तु गरुडस्येत्यर्थः
तत्रान्ये नागा वसंत्येवेति भावः ननु यद्भयादितिसूचितं मे वत तत्राह कृतमिति वेतिकदाक्षे असमंजसं अप्रियं १ उपेति त्रिकं उपहार्यैः गरुडभक्ष्यैः सर्पेरूपे जने नागानां संबंधि यस्मिन्नितकोनाः गोदीयतेते ताद
शो वानस्पत्यो वनस्पतिमूले देयो बलिः सुपर्णायनिरूपितः हे महाबाहो इति स्व १ का हुजिताः सामंता यथा तेबलिहरंति इति भावः २ तत्र सर्वे नागाः तं स्वस्वभागं प्रतिपच्च दर्शयन्ते सुपर्णायप्रयच्छति गोपीथाय
रक्षणाय यतो महात्मने अपरिच्छिन्नशक्तये ३ विषवीर्योन्मदाविष्टः काद्रवेय इति भौतिकत्वमपि देहेतुरित्यर्थः अतः कद्रुर्थशरूत्याविगणय्य कालियः स्वयं तु स्वयमेव बुभुजे ४ राजन्निति बलिप्रदराजानम
नाग.द.तो त्यो भवदिवादिति भावः यतो भगवान् सर्वशक्तिः ईशापार्षदश्च अतो दुष्टनिग्रहाय महावेगः ५ विषायुधः हरात् फूत्कारैः विषं मुंचन् योद्धुं प्रतिजगाम निकटे तु दशायुधः सन् व्यदशन् करालास्य उग्रो देव हंत्री
३०प्र जिका यस्य प्रसारितानि उग्राणि दृष्ट्या तस्य करालानि नेत्राण्यस्य स चसच्च ५६ तत्क्षोमरिचिः ततौपस्येविशावायण तथाच तार्क्ष्यः कश्यपः सं यकार पाठे गर्गादिः गोत्रापत्य विवक्षयातु गरुत्मान् गरुडस्ता
र्क्ष्य इति तस्य पुत्र इति भावः मधुसूदनेति तदनितिशायः कालियो दुष्टमानो मात्८ गुण इत्याह कद्रूसुतमिति हिरण्येति सौंदर्यं सव्येन सव्यन्ता ७ तस्य गरुडस्यागम्यं मन्येर पिदुरासदं ८ एकदेति कुहम

मोधात् राज्ञे पृथिवीं ग्रासतीत्यर्थः जलचरमिति सर्वेषामेवस्वत्वं भक्ष्यमिति पक्षीलीलस्य तस्याहारत्वेन प्राप्तं अतई क्षितं तथापि मुनिवाक् पाल्येति चेदाह क्षुधित इति क्षुधार्तो नाम भक्ष्यादने प्यदोषस्ततेर्मु
निवाक्यजल्पादिता भक्ष्यत्वस्यादनेपि दोषाभावात् एवं तद्दोषपरिहारः किंतु मुनेरेवसः क्षुधितस्य महतो भक्ष्यादने विघ्नाचरणात् ९ अन्यं मुन्यपराधमाह मीनानिति द्वाभ्यां दीनान् प्रतिकर्तुमशक्तान् मी
नपतौ मत्स्यराजके १० अत्र ह्रदे मत्स्यानिति जलवासिमात्रोपलक्षणं सपार्श्वदोपि अहमिति तपोनिमानः एतेनैव वेदमवापराधेन तस्य तपो भंगाद्यनर्थः फलितः किंच तत्र स्यक्षेमसंकल्पोपि विपरीतो
भूत् जलचराणां तीरवर्तिवृक्षादीनां उपरिगच्छतां खगादीनां च नाशात् अतो मुनिनापि विष्णुरूत्र पूर्वपरमतीत्रिमिर्णं कियदंतरमिति विवेकमत्यानरकतुल्यविषयभोगे नैवतस्यापि निस्तीर्णमिति ११ त
ह्रत्तं कालीयमूलवेद तद्वेषित्वात् निर्भयस्थानमालोच्यैव बलवद्विद्वेषप्रवृत्तेश्च १२ पूर्वकथोपघातं समाप्य प्रकृतकथाशेषमाह ह्रदमित्यादीनायुग्मकं विक्षेपेण निष्क्रांतमिति तत्तद्दत्तवस्त्रगंधा
द्युच्छेदाय जलोपरि पादन्यस्यैवेत्यर्थः जांबुनदं दिव्यस्रग्वर्णं तेनालंकृते १३ उपलभ्य हृष्ट्वा युगपदुत्थानहेतुः लब्धप्राणा इति असव इंद्रियाणि मैत्रेनक्रममाह सार्धेन प्रमोदिति आनंदपूर्णचित्ताः गोपाः
सखायः पुरत एव तीरागमस्थितत्वात् परिरेभिरे १४ त्वचो यशोदादयः क्रमेणागोमतःस्थिताः तत्रादौ यशोदात्राज्ञास्तस्थानगमगामिनीत्वात् तथैव तद्वात्सल्यात् ततो रोहिणी तत्सहचारीत्वात् ततो नंदस्तदनु
गवात्सल्यात् गोप्यो गोपाश्च क्रमेण दंपत्योर्निकटस्थाः ज्ञेयाः पूर्वं संबुद्धीभूयस्थितास्तेपरिरंभादीना ह्रदमं संगत्य लब्धचेष्टात्यासन् आसंछुष्कानगा अपीति पाठः निकटस्था वृक्षा विषेण दग्धा एवं दूरस्था
स्ताः तद्वायुना शुष्काः स्तेपि अंकुरादिविकारं चेष्टा आसन् लब्धमनोरथा इति पाठः स्वाम्यसंमतः कोरवेति कुरु तंतो स्तेवारुः स्त्रतोरक्षा कालिकपीडयोपमामन्ये इति भावः १५ दुःखितव्रजसंगत्यर्थं दत्त्वा वसरेरा
मसंगतिमाभह रामश्च पूर्वं व्रजवासिशोकेनातः शुष्कस्तमालिंग्य लब्धेरुः जहासेति हासे हेतुः सामर्थ्यं वेतीति निजव्रजदुःखप्रदं भोगी नागवेष्टनादृष्टचेष्टत्वप्रदर्शनादिकमिदं भद्रंवृत्तमित्युपालंभपू
र्वकमित्यर्थः गावो वृषा वत्सतरा इति पाठः नगागावो वृषा वत्सा इति पाठेन्येपि सर्वे वृक्षाः १६ दृष्ट्वा ब्राह्मणा किमाह नंदमिति विप्राः गुरवः पुरोहिताश्चेते प्रसिद्धाः दिष्ट्यातवास्माकेंच भाग्यमित्यर्थः अतो
दृष्टः सन् महोत्सवं कुरु इति भावः १७ प्रेम्णा पुनर्यशोदायामिलितमित्याह यशोदेति त्वर्थेचः नंदतो विशेषात् महाभागात्वमाह नष्टेति यतः सती यद्यात तथाभवंति कला धारां मुहुरिति धारायाः सातत्येपि दृ
ष्ट्वस्मरत्याद् दुःखन प्राप्या नंदेन चोद्दमशीत भेदा त्यो नः पुण्यं १८ अनंतरमहतल्लीलामाह तामित्यादि रात्रिमिति ह्रदक्रीडयाबहुनात्क्रमेणाल्लिंगनादिनावसानात् तां सुखमयी यत्र तेन संगमस्तत्रैव
यतः क्षुत्तृड्भ्यां यः श्रमस्तेन दुर्बलाः धेन्वादिगवीसत्त्वेपि तासां विषसंपर्कशोकयाश्रीरुचमायक्षी राद्यनिलंदनात् ततः स्वयमप्यस्वीकारात् क्षुदादिकूलसमीपेन तत्कूले विषजलभयादत एवाग्न्यावरणं २०
तदात प्राप्तो ज्ञाचिवने ग्रीष्मारण्यं शुष्कमित्यर्थः अयं दावरूपी कश्चिद्दस्युरिति केचित् २१ संभ्रांताः निःसारणा यतस्तेतो त्वमंतः दग्धुमुपक्रम्यमाणाः मायाकापट्यं तेन मनुष्यमिवस्थितो नरावृतिर्ब्रह्मैव यद्वा
मायारूपा अथवा मायाः लक्ष्म्याः ईश्वरं स्वामिनमपि मानुषं नरलीलं तत्रापि ह्रदमंत्रजप्राणनाथं अतः शरणं ययुः २२ तदाह कृष्णेति वीप्सा संभ्रमेण महान् भागो भाग्यमस्माकं यस्मादिति दुःखायोग्यता हे
नंतवीर्येति दावशांति शक्यत्वं एषइति शीघ्रत्वं घोरस्य प्रतिकार्यत्वं च बांधवानिति रूपोसत्यर्थं मसनायोग्यत्वार्थं वा एकत्वेतव क्रोदशः सात्रद्वयेरते दाय २३ स्वान् स्वातीन् शोभनं ह्रदःत्वन्निष्ठान् न
कुतोपि भयं यस्मात्स्वविवियोगभयं नाश्नायेति भावः २४ इत्थमनेककाकुत्त्या तं तादृशं तीव्रमपि कारुण्यावेशेनेवापिबत् पानेकथं संभवेत्तत्राह जगदीश्वर इति गोपबालरूपो व्यापिने कथं पपौत त्राह अ
नंततः तत्तनोर्विभुत्वात् संमंततो ह्रस्वत्वस्यर्थः नेदं चित्रं यतोनंतशक्तिःघ्नकृ अतोगोपानांनिवारयितुमपिनावसर इति भावः २५ इतिश्रीमद्भागवतदशमस्कंधमध्यगः गतःसप्तदशोध्यायस्तीर्थीणीसार
संग्रहे १६ति भागवतसप्तदशोध्यायः १७ अष्टादशे ग्रीष्मक्रीडावर्णनपूर्वकं श्रीरामकृतं प्रलंबवधं पूर्वकथासमापयति अथेति अथ प्रातःकाले प्रेम्णा सर्वत आवरणतया वेष्टितो नुगीय
मानश्च गोकुलेति प्राग्गोप्रवेशात् क्रियाविशेषणंवा प्रातर्गोप्रवेशानंचदग्धं तत्प्रदेशं संत्यक्त्वा क्रोशमात्रस्थितत्रजस्य परतश्चारणाय कुमुहूर्तेग ततद्यात्रा परिवर्तनाय वा व्रजंप्रविशंतं श्री
कृष्णं प्रतिगवानुगं तैरनिवार्यत्वाद्वा १ एवं पंचमवर्षे कृतं कालीयदमनमुक्त्वा षष्ठसप्तमस्थो गोचारणादिलीलामाह व्रजइत्यादिना पूर्वोक्तो धेनुकवधोसप्तमारंभ एव ज्ञेयः गोपालैर्न छन्नमा
त्रेयत्र वस्तु तस्तु तयामायया हीनजनरूपयैव अत्रेएवं तामसानां सर्पादीनामप्युत्तमप्रसादाद्दीनाविविधं क्रीडतोः ग्रीष्म इति ग्रीष्मांतरमभवत् जलकेल्यादिना किंचित्प्रियत्वान्नातीवेस्पष्टो २
सच सोपि तद्गुणानां नित्यवसंतसांनिध्यकरत्वं कियदिदं माहात्म्यमित्याह यत्रेति केशीहननात्केशव इति विष्णुपुराणनिरुक्तार्थं तन्नाम श्रीकृष्णः आस्ते नित्यं विहरति वर्तमानप्रयोगो मुनेः स्वो
दात्तनित्यविहारस्फूर्त्यनुसारेण ३ चतुर्भिर्वसंतसाम्यमाह यत्रेति पंचकं तद्वनमविशद्दिस्यन्वयात् यत्र वृंदावने सामान्यात् सर्वमेवस्थानं निर्झरः स्वादुस्तल्लक्षणे निर्ह्रादेन छन्न ध्वनयः

झिल्लयः कठोरध्वनिकीटा यत्र यद्वा यत्र वर्षात्मकेरेण निर्झरस्त्रादेन निवृत्तस्वना झिल्लयस्तैः कं दुःस्वाभावो यत्र यत्र च सीकरैः अंबुकणैः र्जीषाः सिक्ता द्रुमास्तेषां मंडलैः मंडितं मंडनं भवति
नावेक्षः ४ यत्र वने सरिदिति शैत्यं पुष्परेणुमेवहरति न धूलिमिति सौगंध्यमांद्ये निदाघवन्हय कोऽन्या भावो योदवस्तापः अतिशाद्वलेहरित तृणाकीर्णे इत्यन्यो हेतुः ५ शाद्वलत्वे हेतुमाह अगाधे
ति अगाधतोयामाह दिनानीतदर्व्यापिभिरूर्मिभिर्हेतुभिः पुलिनैरुपादानैर्ईद्रवसुरीषं तयस्यास्तस्या भुवः रसं शाद्वलरूपतां च विषवान्तीग्मांशुरपि सूर्यकरान हरेति द्रवसुरीषति गौरादेपा
ठ्येतेन क्लिप शाद्वलितमित्याचार्क्षपि नावेक्षः यत्र च वने सर्वत्रैवेत्यर्थः ६ पञ्चकांतर्गतं वनमिति युग्मकं तद्वनमविशदित्यन्वयः स्वतः श्रीमत् तत्र कुसुमितमित्यादि नेदतं श्चित्राम्लगा क्षिजाः
श्च यत्र कूजंतः कोकिलाः सारसाश्च यत्र ७ क्रीडीष्यन्निति क्रीडाविशेषाय बलो रामस्तेन प्रयोजनविशेषार्थं यतः विशेषतोरणयन्निति क्रीडायां प्रोत्साहनाय अतो गोपैर्गोधनैश्च संवृतः गवान्
पिशापक्रीडोपयोगात् ८ रामकृष्णमादयो गोपा इति तयोरपितद्वीलावेशा गोपस्वाभिमानौ व्यंजितो लीलावेशादिकमाह पुपुधुरित्यादि ९ तत्रैव देशिकयोरिव नटवेषेण श्रीदामादिसभागतया
त्तयाः पूर्व श्रीकृष्णस्य माह कृष्णस्येति अपरे श्रीदामादयः सख्याः अथ कृष्णाः १० अथ रामस्यापि कृत्स्नं व्यंजयन् गोपान प्रशंसति गोपति देवाः कृष्णोपासनादौ आवरणदेवतात्वेन तत्र प्रसिद्धाः य
तो गोपजास्येव छन्नागुणादिभिस्तु स्पष्टाः एवं चेत् कुतो गोपजातित्वं तत्राह गोपालरूपिण इति नित्ययोगइनिः भगवत्प्रियत्वाद्वापरूपेणैव नित्यं भगवंतं सेवमाना इति भावः ११ अथ युद्धकौतुकमा
ह लमणैरन्योन्यहस्तग्रहादिना लंघनैरधोनिपात्यारोहैः क्षेपैः दूरतः प्रक्षेपैः आस्फोटनैर्भुजाघातैः आकर्षणैर्बाहुयुद्धेन काकपक्षाश्च डाया प्रागल्भकेशाः केशागुम्फितवेणीत्रयमिति केचि
त् १२ नियुद्धश्रमानंतरमन्येषांन्नृत्यमाह क्वचिदिति अन्येषु नृत्यत्सु साधुवादिनो नत्तद्गतिं च विशेषतः शंसतुः एवं क्रीडानिर्भरः भक्तत्वाद्देराज्य पूज्येति त्वमेवेदं श्रोतुमर्हः एवं नृत्यरहितगान
मप्यूह्यं १३ अन्याश्चापि विचित्रलीलाः संगृह्णाति क्वचिदिति त्रिकेण बिल्वादिभिर्याः क्रीडास्ताभिः एवं लोकसिद्धाभिरन्याभिश्च क्रीडाभिश्चेरतुरित्यन्वयः कुंभैः कुंभवृक्षफलैः अस्पृश्यत्वे नेत्रबंध
श्च तदाद्यैः मृगखगवच्चेष्टया १४ दर्दुरप्लुतिभिः उपहासकैः हास्यजनकानुकरणाद्यैः स्पंदोलिकादोलालेनने नृपचेष्टा उच्चशीला सिंहासनकौसुमछत्रचामरादिमयी १५ नद्यः प्रद्रयः प्रो०
ण्याद्रिसंघयः वने वृंदावने कानने षु तदंतर्गतकाम्यकादिषु एवं मधुरमधुरालौकिकीं लीलामुक्त्वा रामहाराकृतो सप्तमस्थ निदाघभवामैश्वरीं तामाह पश्चनित्यादीनी तस्मिन्वने तयोजशिषया १७
दाशाहिरिति प्रलंबबकचाणूरेत्यादि यादवकदनमुख्यतया तस्य तस्य वधेन यादवहितापक्षया संख्यं संख्युः कर्ममित्रोचितचेष्टामित्यर्थः १८ तत्र तद्वधनिमित्तं प्राह विहारवित् तत्र सर्वे तोभि
तः १९ परिवृढो नायकौ कृष्णसंघट्टिनः कृष्णपक्षीयाः अपरे श्रीदामादयः २० विविधाः हरिणाक्रीडनं नाम बालक्रीडनकं तथेत्यादि विष्णुपुराणोक्ताः २१ वाह्यमानाः संघारूढाः भांडीरकं संज्ञायाक
च सच्चेह हरिवंशे वर्णितः ददर्श विपुलोद्ग्रशाखिनं शाखिनां वरं स्थितं धरिण्यां मेघाभं निविडं दलसंचयैः नवनाकार विटपं लतापुष्पसमन्वितं कुर्वाणं शुभकर्माणं तिरोवर्षमनातपं न्यग्रोधं पर्वताग्राभं भां
डीरं नाम नामतः इति २२ यर्हि ये ये श्रीदामादयः जयिनो बभूवुः तर्हि तांस्तान् कृष्णादय ऊहुः २३ यो युष्माकं भगवान् सोऽपि रोहिणीसुतमिति तस्य तद्भावाज्ञानं २४ कंसस्य सुरवारिः कृष्णः कृतस्तस्त्रा
ह अविषह्यमिति रामद्वारा मारयितुं रामतेजः आवृत्य स्वतेजस आविष्कारात् अतः कृष्णपक्षे भूत्वा रामं वहन् यतो दानवेषु बलादिना श्रेष्ठः अवह्यतेऽस्मिन्निति अवरोहणं भांडीरस्कंधरूपा मर्यादा ततः परं
दूरमगात् २५ धरणिधरेंद्रो मेरुः तद्वक्त्रा रो यस्य सीमातिक्रमज्ञो ततिभारप्रकटनात् उच्चैः स्कंदे वहन् निजमासूरं वपुरास्थितः पुरटपरिच्छदः स्वर्णालंकारः विद्युद्दीप्तिमानीति भूषणोपमा उडुपावह
तीति रामोपमा यद्युचितस्थानेषु स्थिरा विद्युत् उपरि च चंद्रस्तदा सौम्बुदसाम्यं भेदित्यर्थः २६ अलं वेगेन चरन् प्रदीप्तदृष्टौ यत्र एवंभूते भ्रुकुटितटं यत्र उग्रा दंष्ट्रा यत्र तत्तथा तत्र ज्वलतः केशा यत्र अ
त्रसदिति बाल्यक्रीडावेषेणेति भावः २७ बलः आगतस्मृतिरिव आगता दैत्यवधार्थं स्वावतारइत्येवं स्मृतिर्यस्य वस्तुतो नावृतज्ञानत्वात् लीलावेयमिति भावः अभयम् आत्मनः सार्थे गोपसंघे विहाय हरं
तं रिपुमहन् यद्वा आत्मनः साधामर्थमिव विहायसा नभोमार्गेण हरंतं कः केनकमिव इंद्रः वज्ररंहसा गिरिमिव २८ अपस्मृता पस्मारव्याधिग्रस्त इव महारवमीरयन् २९ बलशालिनेति तत्प्रभृति
बलाभिव्यक्तेः तथा च हरिवंशे बलं तु बलदेवस्य तदा भुवि जना विदुः प्रलंबे निहते दैत्ये इति तत्कपटवेषादिना विस्मिताः ३० आशिषः इत्थं चिरं सानुजः सुखं विहरन्नः पाहीत्यादिकाः अभिप्र
शितः तत्र तत्र तद्दर्हणं प्रशंसार्हं सर्वत्र हेतुः प्रेमेति ३१ देवाश्च प्यानंदिता इत्याह पापे इति जगत्पीडके इत्यर्थः नितरां हते अपुनरावृत्तिमुक्तिप्राप्तेः यच्च प्रलंबखरेत्युपक्रम्य हरिणा निलयं तदि
यमिति द्वितीयस्कंधोक्तेः ३२ इति श्रीमद्भागवत दशमस्कंधसंश्रयः अगादष्टादशोऽध्यायस्तोषिणीसारसंग्रहे १८ इति श्रीभागवते दशमस्कंधे अष्टादशोऽध्यायः १८ ॥ ऊनविंशे
मुंजारण्यप्रविष्टं गोगोपकुलं दग्धुं प्रवृत्तं दावानलं पीत्वा रक्षदिति क्रमप्राप्तामलौकिकीं लीलामाह क्रीडेत्यादिना तेषां ताः असंख्या या भावः अनित्यत्वोत्तमासांता भावः दूरं चारिण्यः

गह्वरं दुर्गमवनं भगवताचारणात् आरणाचेरात्तृणलोभश्चेति ज्ञेयं अन्यथोदरपर्य्याप्तस्तृणस्य च दावेने सर्वत्र सौलभ्येन तदसंभवात् १ न केवलं गाव एव किंतु सर्वेपशव इत्याह अजा इति आसां गतिशैघ्र्या
पेक्षः क्रमः इषीकाटवीं अल्पचर्व्यतृणविशेषारण्यं विविशुः दावेन ग्रीष्मतापेन तर्षिताः अतः क्रंदत्यश्च बभूवुः २ कृष्णरामौ आदिर्येषां ते न तु तौ तद्गुणसंज्ञानपक्षे तु उभावपि वने कृष्णो विचिकाय समं ततः इति व
क्ष्वादिस्नेहव्यंजिका लीलेयमिति ज्ञेयं ३ तासां गवां खुरैर्दंतैः ४ छिन्नैस्तृणैर्गोष्पदैः गोसेवितैर्मार्गैः गोष्पदैः सेविता सेवितप्रमाणेष्टिति स्तृतत्वात् यतो किंतैः खुरादिलांछितैर्गवां मार्गं विविदुः राजीव्यंजीविकास्सा
धनं ५ सम्यगक्षतत्वादिनैकत्रैव प्राप्य सन्न्यवर्तयन् ततस्तृषिताः श्रांताश्चाभवन् ५ गोपचूडामणिनाकृतं गोतोषणमाह ता इति मेघगर्जितं गंभीरया गिरा स्वस्वनाम्नोच्चारणेनाहूताः तन्निन
दं श्रुत्वा प्रहृष्टाः सत्यः प्रतिनेदुः प्रत्युत्तरमिव चक्रुः ६ ततः तदैव यदृच्छयाऽकस्मात् गोपानां नाशहेतुः वनवन्हिः सर्वतः प्रादुरभूत् अयं प्रबलबरवः कश्चिद्दैत्य इत्याहुः सारथिना वायुना उल्मुकैः उल्कासदृशस्फुलिं
गैः ७ वेगेनागच्छं तं उरुत्वद्दुर्वारं च विचार्य प्रपन्नाः दावसमीपादागत्य शरणमागताः भीतत्वे हेतुः सगावः गोसहिताः उपसर्जनत्वाभावः गोपाश्चेति पाठे गावश्च व्याघ्रहं भीरु रुचुरित्यर्थः हरिमिति
तस्येवैश्वर्य्यशोहेष्टांतः मृत्योः संसारात् भयेनार्दिता जना इति सभयात्पक्तो दृष्टांतः वियोगादेव भीता इति भावः यद्वा हरिं दुःखहारकमिति श्रीकृष्णविशेषणमेव मृत्युभीता जनाः यथेत्येव दृष्टांत इति भाति ८ म
हावीर्येति प्रत्नबेनाविषह्यतया दृष्टत्वात् अमोघविक्रमेति दैत्यस्यैकमुष्टिनैव वधात् आमितेत्यपि पाठः प्रपन्नानिति भयस्वभावेन ९ एवं प्रथमं द्वोपार्थ्य प्रभावस्नेहविशेषानुभवेन श्रीकृष्णमेव प्रार्थ
यंते नूनमिति त्वद्बांधवाः त्वत्संबंधमात्रवंतोपि अप्यर्थे चः अवसादितुमवसन्नतः सादो येषां ते तत आचारक्षिपितुमुत दुःखितवदाचरितुमपि नार्हतीति कुतो दावदाहमित्यर्थः हि विशेषेण यं तु त्वदेकनाथाः
किंच त्वत्परायणाः त्वदेकनिष्ठाः अतस्त्वच्चरणं त्यक्तुं क्षमा इति भावः गोपाला नानो गोजीवने नैव जीवनमिति स्वानुभवे स्येवेत्याहुः सर्वधर्मज्ञेति स्वस्य अस्माकं च धर्मस्याभिज्ञेत्यर्थः १० हरिः सर्वदुःखहर्ता
तत्र च भगवान् भक्तवात्सल्यादिगुणशाली तत्रापि बंधूनां स्वैकमित्राणां कातरं वचः श्रुत्वा लोचनानि निमीलयतेति क्रीडाकौतुकेन भावस्त्वयं एते मदेकस्निग्धाः स्वजीवनतोपि मत्क्षेममेवापेक्षंते ऽतो ममाग्निपा
नप्रवृत्तं वीक्ष्य दावाग्निमेव विशियुः अत एषामलक्षित एवपास्यामीति यद्वा तान् शीघ्रं भांडीरं नेतुं तथोक्तं अहो कौतुकिन् लोचननिमीलनेन कथं नाग्निभयं तत्राह माभैष्टेति रक्षामीति भावः ११ तथा एवमस्त्वि
ति उक्तेति शेषः मुखेनाग्निं कथं पीतस्तत्राह योगाधीश इति कृष्णात् गह्वरप्रवेशात् तृट्श्रमादिजनितात् तदेव भांडीरं नीत्वा तानमोचयत् १२ ततोग्निपान भांडीरप्रापणानंतरं नेत्रं तदुत्तेये बाक्षीण्युन्मील्यात्मानं
मोचितं गाश्च मोचिता दृष्ट्वा विस्मिता आसन् न केवलं मोचिताः पुनर्भांडीरं प्रापिताश्च स च भांडीरो मुंजाटव्या उत्तरतः क्रोशपंचके स्थितो ज्ञेयः १३ तथापीत्थं सतो ब्रह्मसुखानुभवस्येत्यादिषु सर्वोर्ध्वश्लाघितमै
त्रीमतां तेषां तदाछादकमैश्वर्यज्ञानं नाभूत् किंतु प्रभावज्ञानमेवेत्याह कृष्णस्येति योगमायया चिच्छक्त्या व्यंजितं योगवीर्यं अपूर्वार्थप्राप्तिसंपादकप्रभावं वीक्ष्य मत्वा तममरं देवविशेषं मेनिरे किंविधं वीर्यं
दावाग्नेः स्वस्य क्षेमकरं शांतात्मको रोतीति णिजंतात्स्य चाय्यजितिभाति यद्वा नास्ति मरो मरणं यस्मात्तं अस्याश्रयेणामृत्युजनित भवविवियोगं न प्राप्स्याम इति भावः १४ जनार्दन इति व्रजजनैः सदा दृष्टुं याच्यत इ
त्यभिप्रायः १५ गोपानां दावाग्निनाशपूर्वकं स्वप्राप्त्यानंदमिव गोपीनामपि विरहाग्निनाशपूर्वकं तं ददाविति नित्यमपि प्रवृत्तकथाप्रसंगादत्रैवाह गोपीनामिति निरतिशय आनंद आसीत् कासां गोपीना
मित्यपेक्षायामाह क्षणमिति जडदृष्टीक्षंतां पक्ष्मकृत् त्रुटिर्युगायते इत्यादियासां वचनं तासां तत्प्रेयसीरूपाणामित्यर्थः यद्वानंदस्य परमत्वमाह क्षणमिति वाङ्मनसागोचरत्वात्स्वरूपेण निर्देशानर्हः क
थंचित्स्मृति योगीमुखेन लक्ष्य इति भावः दर्शन इति तस्मिन्सत्येव तथानंदः तदेव निमेषादिव्यवधाने तु विरहानन्द एवेति भावः क्षणमिति क्लीबत्वमार्षं १६ इति श्रीमद्भागवतदशमस्कंधमङ्गः ऊनविं
शोध्यायेयेषस्तोषिणीसारसंग्रहे १ इति भागवते दशमे एकोनविंशोध्यायः १९ ० वर्षाशरदोः शोभातयोस्तदुचितक्रीडां च वर्णयिष्यन्पूर्वकथाशेषमाह तयोरिति स्त्रीभ्यः स्वमात्रादिभ्यः ताः श्रा
वयितुमित्यर्थः तुमनः कर्मणि चतुर्थी तेन गोपवृद्धेषारव्यानत्वाभावात् गोपवृद्धाश्चेत्युत्तरपद्यं संगच्छते तद्विशेषतस्त्वाचरव्युः १ सर्वेषामपि श्रुतवतां भावमाह गोपवृद्धा इति युवतोपि वृद्धानां च मत्कारा ति
शयेन रसाधिक्यापेक्षया अतो गोप्योपि वृद्धा एव देवेषु प्रवरौ कावपि इति निश्चयाभावः २ ततस्तग्रीष्मस्थाने तत्क्रीडामुत्का क्रमप्राप्तां वर्षाशर[illegible]क्रीडां वक्तुं ग्रीष्मवत्तद्दृत्योः श्रियं वर्णयन् तत्रालंका
राय हेयोपादेयोपमा दर्शयति तत्र इत्यादिना तत्र द्वाविंशारंभादिक्रमेण प्रावृड्वर्णनं सर्वप्राणीनां समुद्भवउत्पत्तिर्तो जीवनं तश्च यस्यां विद्योतमानाः परिधयो दिशो यस्यां विस्फूर्जितं गर्जनासहितं
इत्सारंभतो वर्णनं ज्ञेयं ३ अस्पष्टं चंद्रसूर्यादि ज्योतिर्यत्र यतो विद्युद्विस्फूर्जितसहितैर्निबीडनीलमेघैराछन्नं सत्वादिगुणैराछन्नं जीवाख्यब्रह्मेव विद्युद्विर्जितमेघानां सत्वरजस्तमस्साम्यं ४ प ५
र्जन्यः सूर्यः स्वरश्मिभिः कालेउच्चितसमये अत्र राज्ञोपमा स हि वसूनि आदत्ते समये ददाति च अस्य विश्वस्य प्राणनमाप्यायनकरं जीवनमुदकं रूपात्नवस्त्रं पंजनं दृष्टेकं पमानास्तदाप्याय
नायस्वजीवनमपि त्यजंति तथा मेघास्तडिन्नेत्रे स्तनजनं तद्वाग्वायुभिर्वेपिताः संतो जीवनं मुमुचुः यद्वा चंडश्वासकंपयुक्ता रंतिदेवादिवज्जीवनहेतुं जलं स्वस्य दानात्करुण इवेत्युत्प्रेक्षा ६

३२

तपसाग्नीक्षेण सांतत्यमार्षं देवमीढ्व पर्जन्यासिक्ता वर्षद्र्यसी पुष्टा काम्यं तपोयस्य तस्य तनुर्भोगान् प्राप्य यथेति ७ पाखंडाः तत्शास्त्राणि ८ पर्जन्येन दंष्ट्रवलैव गिरीणां व्यसृजन् नतु ग्रीष्मादाविति विधिपर्यादान
तिक्रमः अन्यथा नोतीति कोसात्तत्वप्रसंगात् यथा नित्यकर्मावसाने आचार्यनिनदं श्रुत्वैव ब्राह्मणा अधीयते नतु स्वतएव पुस्तकनिरीक्षणादिनेत्यत्रापि विध्यनतिक्रमतात्पर्यं जाति ९ कदाचिदु सथवाहि
न्यएव कदाचित् श्रुष्यंत एव चासन् नतु सस्येथगामिन्यः नतु वैकल्पहीनाः स्वतंत्रस्य शास्त्रमननुसरतः पुंसो देहसंपदो द्रव्यसंपच्च यथा १० नीलैः बालतृणैः नीलवर्णा क्वचित्केवद्र गोपैः कीटविशेषैः लोहिता
तत्र तत्र छत्राकैः कृतछाया भूः राज्ञां सेना संपदिव सापि बहुछत्रा पटगृहाद्यैः सत्तद्वर्णाच ११ सस्यसंपद्भिः कृष्यादिहेतुकैः स्तद्भावाभावे मुदं तापं च वैसमुच्चेय यतोमानिनां तदभिमानवतां दैवाधीनं सर्वमित्यज्ञान
तां च श्लेषेण यथा क्षेत्राणि देहा अन्नादि संपद्भिः १२ अत्ती नरुः यथा हरिसेवायां प्रवृत्ताः सद्यएव रुचिरा भवंति साधनावस्थायां तस्याः सुखावह परधर्मरूपत्वात् साध्यावस्थायां परमसुखरूपत्वाच्च तद्वत् १३
कामात्त कामवासना युक्तमिति श्वसनो मरुत्साम्यं गुणैर्विषयैः युज्यत इति सरित्संगति साम्यं वृंदावने त्रावर्तमानस्याप्यब्धे वर्णनं वर्षत्तुस्वभाववर्णनात् १४ नविव्यथिरे न दुःखीता अदृस्यंत किं तु रजआद्य पगमा
दृशांतेन अधोक्षजे एव चेतो येषां ते व्यसनैरोगादिविघ्नैः सुखकृता बहवो नतरायाइत्यर्थः नव्यथंते प्रकृतशोभंत तएव दुःकर्मनाशात् भगवत्स्मरण विशेषोदयाच्च १५ असंस्कृता अक्षुण्णाः नोत्यस्यमाना इत्य
संस्कृतसाम्यं कलिकालेन हतं इति तत्वाद्दसाम्यं १६ कामीन्यः पुंश्चल्यः वेदाध्यादिगुणयुक्तेष्वपि १७ जारहितमपि गुणिनिगर्जितगुणयुक्ते अशोभत गुणव्यतिकरात्मे कप्रपंचे अगुणवान् निर्गुणः पुरुषो यथे
ति १८ स्वभासा स्वचेतन्येन प्रकाशितनाहंकारेण छन्नो जीवो यथा १९ मेघागम एवोत्सवो येषां अतोहृष्टाः प्रत्यनंदन् मेघगर्जितानंतरं नादादिकं चक्रुः यथा वेदमवल्गृहस्थागृहागत वेदमवगीतानंतरं गीतन्ने
त्यादि एवं चातका अप्यहृष्टाः २० तपसाग्नीक्षेण क्षमाः श्रांताश्च पादपानो नात्ममूर्तयः अनेकरूपदेहाः यथा तपसा श्रांतादिना कृशाः श्रांताश्च कामसेवने २१ अशांतानि मुहुः पतंति रोधांसि येषां ते घ्यासारस प्रक्षि
णोन्मूषुः खवात्सु अशांतानि घोराणि अनुपरतानि वा कृत्यानि येषु ते अपि गृह पुत्रविवेकिनः गृहमेव सर्वार्थपदमिति दुष्टा शायाश्च पथा अंगेत्याश्चर्येण २२ द्वैवेंदइति स्वैरत यातिव्यध्यासेतुभंगात् धर्ममर्या
दाभंगं कृत्वा खंडि साम्य २३ अथ सततवर्षानंतरं नुन्नाः प्रेरिताः कालेकाले योग्यसमये भूतेभ्यो नल्लदकुः पुरोहितप्रेरिता राजानो वणिक् श्रेष्ठा वा कामानि २४ प्रावृट्क्रीडां वक्ष्यन् आदौ वनप्रवेशमाह एवमिति य
थावर्णितप्रकारं वर्षिष्ठं समृद्धं २५ षड्भिः क्रीडामाह धेनवइति मंदगामिन्यो पि प्रीत्याहूताः प्रीत्ये वद्रुतं ययुः प्रीतो लिंगं स्नुतस्तनाइति स्तनी रिति पाठे स्तन्यः एवं क्रीडापरिकरत्वेन मिथः प्रेमोक्तं २६ भगवान्वनौ
कसः पुलिंदीः प्रमुदिता ददर्श तथा मधुस्रवाः वनराजीः गिरेः सकाशात् ज्जलधाराश्च तासां नादांश्च आसन्नानि कंदवर्तिनी गुहाश्च दृष्टवान् २७ अभितो वर्षतिसति कदाचिद्वनस्पतिशाखाग्रेर्के कदाचित् गुहायां
चनिर्विशन् २८ ओधवन्ने रुपसमीपे आनीतं परिविष्टमित्यर्थः संभोजनीयैः सहभोज्ययितव्यैः संकर्षतिमिलयति सर्वान् गोपानितितथा तेनान्वितः २९ शाद्वल्लेति युग्मकं चर्वतः रोमंथायमानान् वि
क्षेत्यन्वयः ३० स्वलीलायोग्यत्वार्थं आत्मशक्त्या उपबृंहितां पूजायांचक्रे साधु अमन्यत् ३१ अथ दशभिः शरदं वर्णयति एवमिति प्रावृट्क्रीडाभिर्वसतोरिति शरच्छ्री विशेषे हेतुः विगतान्यभ्राणि यस्यां
स्वच्छाबुभ्यां सो शांतानिलाचेत्यर्थः ३२ शरदा कृत्वा नीराणि नीरजानामुत्पत्त्या सह प्रकृत्यासन् ३३ यथा वृहेमजाता भक्तिरेकैव चतुर्णामाश्रमिणा मशुभं कष्टमयं तत्तद्धर्मानुष्ठानं हरति तानत्कर्माणिकुर्वन्तीत्याद्युक्तेः
तथा शरदप्यकाद्व्योमादेरदृष्टादिकंजहार तत्र ब्रह्मचारिणो गुर्वर्थादर्कुभाहरणादिकष्टं गृहिणो विविक्तवासरुच्यस्यादनेन पुत्रादिसांकर्यं वनस्थस्य मलधारणादिक्लेशं यतीनां कामादिमलक्षालनार्थं यमा
दियोगक्लेशं क्लेशोऽधिकतरस्तेषामित्युक्तत्त्या अव्यक्तासक्तचित्तत्वादिकष्टमपि च भक्तिर्हरति एवं व्योम्नो ष्टमघं भूतानां वृष्टिभिरेकत्रनिवासतां सांकर्यं भुवः पंकमपां मलं चशरदितिबोध्यं ३४ मुक्तकिल्बिषं
संसारहेतुः कर्म येषां अतस्त्यक्ताः पुत्रवित्तलोकैषणा यैः अतएव शांता अक्षुभितचित्ताः ३५ गिरयइति नहि ज्ञानिनो ज्ञानामृतं कर्मविद्यामिवसर्वेनो वितरंति किं तु पात्रेषामू गुण्य दृक्ष्वा रूपयात्केचिदेव एवंगि
रयो निर्मलं तोयं क्वचिन्मुमुचुः न पुनः प्रावृषीव सर्वत्रेति ३६ गाधजलेचरत्वेन क्षयं ज्ञातु योग्या अपि नाविदन् भाविदुः कुटुंबित्वेन तन्नाशं दृष्ट्वापि स्वायुः क्षयमिति ३७ गाधे स्फुरंजले चरंति ते मीना दयः ता
पत्नेभिरे निर्धनः तत्र कृपणः धनार्थोद्यमात्क्लिष्टः तत्रापि कुटुंबी बहुधनापेक्षी तत्राप्यजितेंद्रियः ३८ ममताया बाह्यत्वात् स्वकेनसाम्यं अहंताया आंतरत्वात् दामेन अपक्वतया ३९ आत्मनि मनसि उपरतेत्य
त्तं क्रियेयुर्मुनिरिवनिश्चलां बुः स एव व्युपरतागमः निवृत्तवेदघोषइव तत्क्षमीम भूत् ४० नग्नैः सेतुभिः केदारेभ्यः स्रवंतीरपो दृढैः सेतुभिररक्षन् अग्नेर्व्यभावात् प्राणोरिंद्रियैः निरोधः प्रत्याहारः ४१ प्र
वृत्तानां बाह्यता पंच दोहरत् ज्ञानिनां त्रितापं बोधइव तत्कानां गोपीनां विरहादितापं मुकुंद इव च ४२ चित्तमिव खं रजस्तमोहीनमिव निर्मेघं शास्त्रश्वेव शरत् पूर्वोत्तरमीमांसा निर्णितात्स्तदर्थोइ
व तारका रात्रिज्योतींषि तत्रछपनिषद्भागेन भगवत्तत्त्वमिव चंद्रः अन्यतारा इव कर्मकांडानीत्यर्थः ४३ अखंडेति पूर्णमायां सर्वकला प्राकट्या पेक्षया तः सर्वांशप्राकट्यपरश्रीकृष्णसाम्यं कृष्मि
गृहणयदुषु तेषां प्राधान्यात् ४४ समेत्र अन्यूनाधिके शीतोष्णे यत्र तं इत्यर्थे नकारः हृद्रुमत्त्वात् चेतसो गोप्यश्चेतसा कृष्णमाश्लिष्य यथेत्यर्थः ४५ मृगाः खगाः इत्यार्षं मृग्यः खग्यः स्त्रीवृषैः स्वस्वपु
भिरनिछंत्यापि बलाद नुगम्यमानाः पुष्पिण्यो गर्भिण्या भवन् इच्छरा राधनार्थाः क्रियाः फलसंपादकाः पूर्वं बला दनुगम्यमानाः सकलभोग गर्भा येथेति ४६ वारिजानि वायुरूर्वपुष्पाणि कुमुद हृत्र

कुमुदं विना कुमुदानां रात्रिविकाशित्वादित्थं सामं न प्रेपेति दृष्टं तस्यापि दृष्टान्तो व्यज्यते ४७ आग्रयणैः नवान्नप्राशनार्थैर्यागैः इन्द्रियैरिन्द्रियार्थैरुत्सवैरिन्द्रयागैः इन्द्रमिन्द्रियकाम इत्यस्कत्तोः गोवर्धनोत्सवास्तूर्वेइं
द्रोत्सवस्य शारदस्य व्रजादौ दृष्टत्वाच्च ४८ बभौ आभ्यां रामकृष्णाभ्यां तु नितरां किंविधाभ्यां हरेः कलाशक्तिः ४९ वणिज्ञायतयोन्नृपाः स्नातकाश्च हृष्टाद्दृष्टान्त्यौ व वृष्ट्या रुद्धास्ते निर्गम्यार्थान् वाणिज्यसेव र
चारदिग्जयविवाहाद्यमादीन् प्रपेदिरे वर्षशब्दः कालस्यापि वाचीति आयुषा रुद्धा भक्त्यादिसिद्धाः काले आगते स्वपिंडान् प्राप्तव्यपार्षदादिदेहान् यथेति ४९ इति श्रीमद्भागवते दशमस्कंध
संश्रयः विंशोऽध्यायः समाप्तो यस्तोषिणीसारसंग्रहे १ इति भागवते दशमस्कंधे विंशोऽध्यायः २० अथैकविंशे गोपीभिर्वर्ण्यमानवेणुगीताद्यच्छमशारक्रीडामाह यावत्समाप्ति तत्र युग्मकेन वनवर्णनपूर्व
कं वनप्रवेशं वेणुकूजनं चाह इत्थमिति सगोगोपालको मधुपतिः इत्थं यथा ह्यवर्णितवान् तथावर्ण इत्यान्यविशत् पालकावनमिति पाठः अच्युत इति पाठे वनमिति शेषः वायुना वातं अनुगते १ पु
नः कीदृशं कुसुमितवनराजिषु शुष्मिणो मत्ता भृंगा द्विजाश्च तेषां कुलैर्घुष्टाः सरांसि सरितः पर्वताश्च यत्र तत् मधुपतिर्गोपपतिः श्लेषेण मधोर्वसंतस्यापि पतिरिति वनं शोभातिशयः अवगाह्य प्रवि
श्य सह पशुपालबलः इति गोचारणेन्वेति न तु वेणुवादने चुकूज अस्यंतर्भूतण्यर्थः वादयांचक्रे इत्यर्थः २ तद्व्रजस्त्रियस्तं वेणुगीतमाश्रुत्य अनु पुनः पुनरवर्णयन् यतः स्मरस्योदयो यस्मात्तत् शरल्लक्ष्मीमा
लोच्य ताः समाश्रुष्टं तस्मिन् वेणुविद्यामभ्यस्यति सति तासां स्मरोदीपनं जातमिति भावः अतो व्रजस्त्रियो राधाद्याः मात्रादीनां तच्छ्रवणपि वात्सल्यादरेणोदयात् सखीभ्यो ललितादिभ्यः स्वपदेन सख्याः
सखीभ्योऽन्या वर्ण्यते इति शालीनता किंच परोक्षं अर्थात् तराच्छन्नं सा बहिःस्थं यथा तथेति ३ स्मारोदयक्रममाह तदिति तत्र तथा परोक्षं वर्णयितुं आरब्धवत्योऽपि नाशकन् तथा वर्णयितुं न शक्ताः यतः स्मरावे
शेन क्षोभितमनसः यतः कृष्णचेष्टितं वेणुगीतादि अनुसंदधत्यः ४ यादृशवर्णनात्तासां मनक्षोभादि तद्विवृणोति बर्हेति युग्मकेन नटवरवपुरिति बहुव्रीहिरभेदेऽपि भेदोपचारात् यद्वा नटवपुः बि
भ्रत् शोभाभिः पुष्णन् श्रीकृष्ण इति विशेष्यानुक्तिर्वर्णनाविर्भूतप्रेम्णा उच्चारणाशक्तेः वृन्दावनं प्राविशत् कीदृशं स्वपदैः सर्वतोऽर्कितैः सर्वेषां सुखकरं यद्वा स्वपदयोरमणं परागपत्रादिमयत्वेन
रतिजनकं गोपवृन्दैः गीता कीर्तिः सौंदर्यवैदग्ध्यादिप्रशंसारूपा यस्य तथा बर्हमयआपीडः शिरोभूषणं बिभ्रत् कर्णिकारं पद्माभे पीतपुष्पे वैजयंती पंचवर्णपुष्पमाला ररध्रान्वेणोरिति अतो नूनमधरसु
धेव पूर्णाद्वेणोरुच्छलंती गीतात्मना प्रसर्पतीति भावः रत्नहारादिनवर्णितं वन्यवेषस्यैव मोहनत्वात् ५ वेणुरवं श्रुत्वा इति बर्हापीडेत्युक्तेन वक्ष्यमाणेन च प्रकारेण वर्णयंत्यो भिरेभिरे भावनया
तेन द्यालिंगितवन्त्यः यद्वा तन्मयतयान्योन्यं कृष्णं मत्वा अथवा कीर्तनप्रेम्णान्योन्यमेव ६ गोप्यऊचुरिति स्वाम्यसंमतं अनुवर्णनमाहेत्यवतारणात् यासां बुद्धेत वागर्थो यासामेव प्रसादतः तासां वंदे पा
दरेणून् गोपीनां यद्वशो हरिः १ भावगोपनाय रामसहितं वर्णयंत्य आहुः अक्षण्वतामिति वयं तु चक्षुष्मतामिदमेव फलं विद्मः परमन्यस्त्रियदर्शनमपि फलं न विद्मः इदं किं तत्राहुः सखिभिः सह पशू
ननु पश्चाल्लिखित्वा वनं प्रवेशयतो रामकृष्णयोर्वक्त्रं येर्निपितं तेर्जुष्टं यदिति किंविधं वक्त्रं अनुवेणुं वेणुं वादयन् तथा स्निग्धकटाक्षविसर्गं वयस्यानामिव तथा दर्शनाभावात् न अस्माकं चक्षुः साफल्य
मिति भावः यथा कथमपि तद्दर्शनमेव फलं तथापि वनविहारदर्शनोत्कयादवमुक्तेः प्रेम्णोऽत्र प्रस्तावत्वात् प्रथममिदं तत्येवनिर्देशोतिरहस्यत्वेन सहसा प्रकाशनायोग्यत्वात् एवं गोपनेति भावव्य
क्तिर्यथा व्रजेशसुतयोर्मध्ये अनुज्येष्ठन्तातुः पश्चात्स्थितं वेणुं जुष्टं यद्वा अनु निरंतरं वेणुना जुष्टं वक्त्रं येर्निपीतं अतएवैकवचनं स्वरसः पीतमिति मुखसुधामयचंद्रत्वं कीदृशं अनुरक्तजनानां युष्माकं कट
क्षमोक्षो यस्य तेषामिंद्रियवतामिदं निपातं सर्वेंद्रियसाफल्यं विद्मः नान्यत् यद्वा प्रीत्या जुष्टं दृष्टं यत् इदमेव परं केवलं फलं न विद्मः किं तर्हि अधरामृतपानद्वारा येर्निपीतं ते पाययन्ति पानरूपफलं इदमेव
ति यद्वा दृष्टं यदिदमेव चक्षुः फलं स्यात् न विद्मः स्वर्थेवेत्यपि पाठः येस्तु निपीतं तेषां फलं न वक्तुं शक्यत इति शेषः तत्स्म रणमात्रेण रुद्धकंठतया पूर्णवाक्यवक्तुमशक्नोदित्यस्याः समम् अन्यत् ७ अर्थांतरे
ण भावव्यक्तिमाशंक्य हृद्धावधानेन भावमपलपंत्यो न केवलं वनविहारे गोपानां दर्शनमात्रसुखं किंतु स्वच्छंदनृत्यगीतानुभवसुखमपीत्यहो पुण्यमित्याहुः चूतेति चूतपल्लवबर्हपुष्पगुच्छैः सिरसापी
डः उत्पलकोशः कर्णयोः लीलाब्जं दक्षिणकरे एते मील्लासंयुक्तनीलपीतपरिधानाभ्यां विचित्रवेषौ पशुपालानां सभायां तत्रापि मध्ये कदाचित् गायमानौ गायतो अलमत्यर्थं विरेजतुः नटवरौ रंग
पर्थेति दृष्टान्तेन तयोः स्वच्छंदनृत्यादिगोपानां वाद्यादिपरत्वं च ध्वन्यते गायनं गानेन मानाः दृशायया इति वार्थः यद्वा गानेमानः गर्वः अस्मत्समः युष्मासु को गायकोऽस्ति अत्रागत्य गायत्विति दिरूपयो
मानश्चायं माधुरीविशेषाय अस्मासु तयोस्तादृशस्वच्छंदावस्थानाद्यभावाद्वयं नितरामधन्या इति भावः ८ अस्मत् गोपभाग्यं वेणोर्भाग्यं किं वाच्यमिति दीपितस्मरवेगेन व्यक्ताभावा वेणावधर
स्पृष्टां ताङ्गमारोप्य सेर्ष्याभिलाषमाहुः गोप्य इति अयं नीरसदारुमयः वेणुः रपि किं पुण्यं कृतवान् चयमपि तत्पुण्यार्थं यतामहे इति भावः सविस्मये यद्यस्माद्दामोदरस्य ताद्दशा बालभाव
मारभ्य दृशा भावाल्लब्धं जन्नस्याधरसुधां अतो गोपिकानामस्माकमेव भोग्याश्लेषेणेत दाराय्येव पय आदितिस्तत्स्वदेहादिवगोपयतीनां स्वयमेकल एव भुंक्ते अयमिति पुंस्त्वस्य भोगायोग्यो

पीतिभाव: नन्वत्र चरः सरसो ह्यस्य तेन नस्तु ध्वस्तद्सौ नैव मुंक्ते तत्राहुः अव सिवं रसमात्रं यथा तथा स्कधामृत्वैव द्रवमात्रवशिष्टमित्यर्थः हे गोप्य इति वेणुजन्मैव सुभगं न गोपीजन्मेति भावः यद्वाऽस्म
त्कांतस्य करे हृदये च सदा तिष्ठतो नाम त्र चरः स्कधामपि स्वयं त्र समस्तं मतिं वीनेव तत्त्ववन वशिष्टः स्थितो रसोपि यत्र यथास्यान्निःशेषं भुंक्त इत्यर्थः यद्वा वसिष्टो रसो रागो यत्र रागस्यावशेषमात्रं कदापि विर
मेत् किंतु मुहुर्लक्ष्यत एव यद्वा किं विधां स्कधां गोपीनामवसिष्टरसभूतां तदाशयाऽस्माभिः सर्वरसपरित्यागात् किंच यासां पयसा यं पुष्टतां हृदिन्योपि तस्य तत्स्कधा भोगं दृष्ट्वा तद्धो भाद्विकसितकमलवन
मिषेण रोमांचिता बभूवुः यद्वायद्वशिष्टरसं यस्य वेणोरवशिष्टो उच्छिष्टो यो रसो नादरूपस्तं हृदिन्योपि भुंजते यतो रुच्यत्वचः किंच तरवोपि स्ववंशे वेणो तद्भोगं दृष्ट्वा मधुमिषेणाश्रु मुमुचुः यथाऽऽर्याः
वृद्धाः स्ववंशे भगवत्सेवकं दृष्ट्वा नंदाश्रु मुंचंतीति तद्वत् ईर्ष्यापेक्षे तत्कुले भवता दृशामस्येव को दोषः अतो यं गोप्यः क्वापि संगोप्य रक्षीण इत्यर्थः ९ आस्तां भगवता हस्ते धृतस्य वेणोर्भोग्यवृंदावनस्यापि कि
यद्वर्ण्यमित्याहुः वृंदेति हे सखि भूवः कीर्तिं वैकुंठादपि विशेषेण तनोति यद्यन्नं देवकीसुतस्य पदाब्जात्यां लब्धाः शोभा महिम्नोः संपदो येन तत् देवकीसुतेति प्रागयं वसुदेवस्येत्याद्यनुसारात् यद्वा यशोदैव देवकी
शब्दितात्र द्वे नाम्नी नंदभार्याया यशोदा देवकीत्यपि अत सख्यमभूत्स्यादेवक्या यशोदया इतिवत् हरिवंशपुराणात् किंच गोविंदस्य वेणुमनु तन्नादं श्रुत्वा सगर्जितं नीलमेघं तं मत्वा मत्ताये मयूरास्तेषां नृत्यं प्रे
क्ष्याद्रिसानुषूपरतक्रियाणि त्र न्यानि मयूरभिन्नानि समस्तसत्त्वानि यस्मिन् तत् अन्ये सभासदो जाना इत्यर्थः अथवा श्रीकृष्णो स्वाभाविकप्रीतिमतां वृंदावनमयूराणां संबंधादेवान्ये इत्यनीतनाश्च मयूरास्तत्स
दृशे मेघे प्रीतिमंतो ततः स्वाभाविकप्रीत्यैव तेषां नृत्यादिपूर्ववदर्थः यद्वा गोविंदस्य वेणोर्मनुर्नादात्मको मोहनमंत्रस्तेन मत्तानामित्यादि यद्वा मयूराणां नृत्यं यस्मिन्तत् प्रेक्ष्यादर्शनीया ये सानव इत्यादि यद्वा स्वदर्शने
हृष्टमयूरनृत्यं प्रेक्ष्य हर्षेण यो गोविंदस्य वेणुस्तद्वादनं तमनुसानुषु अवरतानि त्र न्यानि तद्दर्शनातिरिक्तप्रयोजनानि येषां इदृशानि समस्तसत्त्वानि यत्रेति नैवं लोकांतरेतः कीर्त्यंतिशय एव भुव इत्यर्थः १० वृंदाव
नवर्तिपशूनामपि भाग्यमस्माकं नेत्याशयेनाहुः धन्याइति विवेकहीनमतयोप्येता हरिण्यो वनचारिण्यास्तीर्यग्जातयोपि धन्याः कृतार्थाः याः वेणोरणितेनादं त्राकर्ण्य रणितमित्यपि क्वचित् उ
पात्ताः विचित्राः वेषाः बर्हापीडं त्रावतंसादिरूपा येन तं नंदनंदनं प्रतीतिरामानुरक्त्या भावगोपनार्थं किर्व्यज्यते प्रणयावलोकैरिति बहुत्वं तेसरंपराविवक्षया क्रियामयपूजातो विशेषेण रचिता पूजा तावतैव
सर्वोपचारपूर्णा दधुः पुपुषुः सर्वपूजाभ्योधिकां चक्रुः भावमात्रग्राहिणस्तस्य ते रेवसर्वपूजा सं॰ पत्तेः किंच कृष्णसारैः स्वपतिभिः सहैव असमस्वतप्रस्तकसमक्षं तन्न सहेरन्निति व्यंग्यं तेन कृष्णस एव सारङ्पा
देयोये षामिति श्लेषेण च स्वन्यूनता तथास्वभाग्यन्यूनत्वं यद्वा च्चैर्विलोकैस्तदधुर्वंशांचक्रुः तैरेव पूजां प्रीतिसेवामपि चक्रुरिति अतो वयमधन्या एवेति भावः ११ आस्तां कृष्णांतिके चरत्सो हरिण्यः खेचर्यो
पिधन्या इत्याहुः कृष्णमिति हे गोप्य आश्चर्यं शृणुत वनितानामुत्सवो यस्मात्तद्रूपं शीलं च यस्य तं श्रीकृष्णं वीक्ष्य तेन वादितवेणोः विचित्रं स्वगादिरसैः नानो विधं गीतं च श्रुत्वा विमानेषु पतिभिः सह
गछंत्योपीति वृंदावने श्रीकृष्णसंगमाशंसनवस्तथापि देव्यो देवलोकस्थिता अपि कामहतधैर्या मुमुहुः अतो विमानतोवतीर्य तदंतिकमागंतुं न शक्ता इति भावः मोहलिंगमाहुः भ्रस्यत्प्रसूनाः कबराः यासां विग
तानीव्यो यासां तथाविधस्य तस्य दर्शनमप्यनाप्नुवतीरस्मान्धिग् इति भावः अत्राप्याकारगोपनाशक्तिः १२ अथान्यासां गोपीनां वाक्यमाह त्रिभिः गाव इति प्रथमं निजभावविरोधिमात्रादिभाववतीनां गवादी
नां मुक्तिरवहित्थार्थं अप्यर्थे च गावोपि सदानंदमूर्तिमुखप्रवह्वेणुगीतामृतं रक्षणशंकया चाभिते रुन्नमितैः कर्णपुटैः पिबंत्यः सत्यः तथा शावा वत्साश्च स्तनपाने प्रवृत्तास्ततो गीतं श्रुत्वात देवपीय
षंडुन्नतकर्णैः पिबंतः स्नुता गलिताः स्तनपयांसि कवलाश्च मुखे स्थिता येषां ते तस्थुः विस्मृतव्यापारा आसन् स्वविस्मये कथं भूताः आत्मनी मनसि गोविंदस्पृशास्योर्पयंत्यः पश्चाद्दर्शनाशक्तेः दृशा नेत्रेण
श्रूणि कलयंति वर्षंतिताः अश्रुभिर्दृष्ट्या च्छादनान्मनसा पश्यंत्य इत्यर्थः १३ श्रीकृष्णपाल्यमानानां गवां भाग्यमास्तामत्र त्र स्य पक्षिणामपि तन्न वर्ण्यमित्याहुः प्रायइति अस्मिन्वने ये विहगाः ते प्राये
ण मुनयः भवेयुः मयूरादीनां नृत्यादिनोत्तमभक्तसाम्यात्प्रायइति बतविस्मये अंबेति स्त्रीजनकथास्वभावोक्तिः स्वसखीभ्यो न्चवर्णयन्निरूपक्तेः कुतः कृष्णेक्षितं कृष्णकर्तृकं कृष्णकर्मकं वा दर्शनं
पुष्पफलादिव्यवधानं विनायथास्यात् तथा द्रुमभुजानारुह्य रुचिरप्रवालानिति तेषामयं कुरादिविकारो दर्शनव्यवधायक भोगसाधनं च व्युत्पत्ते तथापि कृष्णेक्षिते यथा तथा वेणुगीतं श्रृण्वंति मीलि
तदृशः अर्धमुद्रितनेत्राः प्रेम्णा अलसदृष्टित्वात् मनश्रवणवागींद्रियेभ्यो निर्गताः मुरलीव्यतिरिक्ता वाचो येषां मुनयो हि तद्दर्शनायकर्मफलत्यागेन वेदशाखारूढा प्रवालस्थानीयनिवृत्तकर्माण्युपा
ददानाः श्रीकृष्णगीतमेव शृण्वंत्यतस्तएवैते इति यद्वा प्रायो वितर्के मुनयः आत्मारामाः सनकाद्याः अस्मिन्वने विहगा बभूवुः तत्र प्रयोजनमाहुः कृष्णमेक्षितमपूर्वतया कल्पितं तस्माद्दुदितं गुणप्रकर्षं प्रा
प्तमतः कलयति तत्स्वसमानस्थानप्याकर्षतीति कलं वेणोर्गीतं शृण्वंतीति लिंगमाहुः द्रुमभुजान् वेदशाखाः आरुह्यातिक्रम्यापि निवेशांत्यक्त्वामीलिताः आवृता लीनाहक् देहादिज्ञानं येषां विगतान्ये
षां कृष्णव्यतिरिक्तानां वाक्कथापि किंपुनर्विचारादियेस्ते १४ अथ बहिःस्थां कर्तुमशक्ताः निजभावमचेतनेष्वप्युत्प्रेक्ष्यंते आस्तां सचेतनानां कथा नद्योपि कालिंदीमुख्या दुःखमाचकस्य गीतमुपनि
कययातं श्रुत्वा वर्तैः परिभ्रमैः सूचितनकामेन भग्नो वेगो यासां ताः ऊर्मय एव भुजास्तैः कमलोपहाराः पद्मान्कपहरंत्यः आलिंगनेस्थगितमाच्छादितं यथास्यात्तथा पादद्वयं गृण्हति धारयंति मु

कृष्ण

पारेरिति मुरहंत्रा नारायणेन समभयो यमिति नास्य सेवने पातिव्रत्यभंगदस्याश्रायेन प्रथममावर्तैः। श्छिन्नकमलोपहारस्ततः पादग्रहणं ततो वक्षःपर्यंतं वेष्टयित्वा आलिंगनमिति क्रमः अयं भावः नद्यो वे
णुगीतं श्रुत्वा मोहनेन स्वपत्युर्विगमनत्वरया विस्मृत्येव त्रिशत्वादिद्रववत् गीतेन जलस्तंभात् तेन प्रवृद्धजलाः जलवेगच्छिन्नकमलोपहाराः सत्यः ऊर्मिभिरेव दीर्घैर्बाहुभिर्भुजैः पादग्रहमालिंगनं कुर्वंति
इवेत्युत्प्रेक्षा अतस्ता एव धन्या वयं दुर्भगा एव यतो नतन्नीतश्रवणेन च स्वपतिगृहकूलस्य प्रवाहोपरमः नाप्यस्माकं बहवो दीर्घा वा भुजाः यैरेकमपि पादपद्मं स्तनादौ गाढमालिंगाम इति १५ अथान्ये तन्ने
पिस्वोत्प्रेक्षितसख्यरसवर्णनेन निजरसमाच्छादयंत्य आहुः दृष्ट्वेति त्रिभिर्युग्मकं विशेषः आतप इति तापाधिक्यं सहेति बहुलच्छायापेक्षा अनुपश्चात् गोगोपैरेव दमपहंतुं मेघाकर्षणाय मल्लाररागे
ण वेणुमुच्चैर्वादयंतं उपरि उदितः प्रेम्णा प्रवृद्धः श्यामोम्बुदः कुसुमैः मेघपुष्पं जलमित्यर्थः तस्यावलीभिः पृषतैः सहितेन स्वस्य सज्जलदेहेन सख्युः तापहारत्ववर्णादिसाम्यात् श्रीकृष्णस्य छत्रं विहितवान्
छत्रे च पुष्पवत्त्वं प्रसिद्धं ततोयमेव धन्यो न वयमिति भावः १६ निजभावं स्पष्टीकुर्वंत्यः पुलिंदीनां भाग्यं वर्णयंति पूर्णा इति तास्तु पूर्णाः कृतार्थाः अस्माकं तु कथमपि तत्संबंधो नाभूत् इति भावः पुलिंद्यः शब
रांगना इति ताभ्योपि निकृष्टा वयमिति भावः कथं पूर्णास्तदाहुः प्रथमं दयितास्तनाभ्यां मंडितेन तत्र लिप्तत्वात् ततश्च पादाभ्यां तत्तोस्पृष्टातः उरुगायस्य पादाब्जयो रागेणारुण्येन श्रीर्यस्य पादलग्नस्य तेन कुंकु
मेन तस्य वनेषु चंक्रमणात् तृणेषु लग्नेन अत्र आननेषु कुचेषु च कामतप्ते पुलिंद्यः यतस्तस्य तथाभूतस्य कुंकुमस्य दर्शनेन स्मररुजा रूढतापोयाः संताः कामव्यथां जहुरिति संबंधः तत्र उरुधा गायतीति निजध्येये
सर्व एव हेतुरिति व्यज्यते पदाब्जरागश्रीत्यादिना पादस्पर्शस्पृहा दयितेत्यादि तस्यास्तत्त्वद्भिलासात्मक भाग्यमस्माकं कुतस्त्यमिति तृणेति तज्जन्माप्यस्माकमस्त्विति लिंपंत्य इति अहो भावनरस्तासामिति च आ
धिं जहुरिति अयं तत्संगीव स्तनो प्रभावो यत्साक्षादंगसंगाभावेपि तत्संगिकुंकुमादिसंगेनापि कामाधिं जहुरिति अनुरागातिशया द्योतनं अतस्ता एव पूर्णा इत्यहो दौर्भाग्यं न इति भावः तदिदं तासां वचन
जातमुत्प्रेक्षारूपमिव प्रतीयमानमपि यथार्थमेव गाढभगवद्भावस्य व्यवहितविषयानुभवहेतुत्वात् पद्म महिषीभिरपि कामयामह एतस्य श्रीमत्पादरजःश्रियः कुचकुंकुमगंधाढ्यं मूर्ध्ना वोढुं गदाभृतः
व्रजस्त्रियो यद्वांछंति पुलिंद्यस्तृणवीरुधः इत्यनेनास्यार्थस्यानुवादात् दयिता चेयं राधा वृंदावनेवने इति मात्स्यादिप्रसिद्धा राधैव संगमश्च दिवैव दिवैव पुलिंदीभ्रमणात् लिप्यमानकुंकुमस्यार्द्रत्वावग
मात् च संगमोपि न संभोगरूपः रागप्रसंगे सर्वासां नवसंगमप्रतीतेः किंतु वेणुगीताकृष्टा या मूर्च्छिता या तस्यास्तन्मूर्च्छाशांतये चरणसंजीविनीपल्लवेन वक्षःस्पर्शरूप एवेति गम्यते यदंबुजाक्ष तव पादतलमि
त्यादि रुक्मिस्तु कुमारीणां तत्विकारे एव स्पर्शस्यातिदर्शनादिति तत्त्वबोध्यं १७ अर्थांतरच्छन्नमिवाहुः हंताभ्यां हंतेति हर्षे अयं ह्रयमानोद्रिर्गोवर्धनो दुःखहारकस्य भगवतो दासेषु तत्त्वभावेषु मध्ये श्रेष्ठः तदेव
साधर्म्यद्वारा दर्शयंति यस्माद्रामकृष्णयोश्चरणस्पर्शेन प्रवृद्धो मोदो रोमांचः स्वेदानंदाश्रुस्थानीयतृणाद्यमार्द्रता जलस्त्रावलक्षणा यस्य हरिदासा हिमहतोपि रस्य स्पर्शेन प्रमोदेन किंच यद्यस्मात् गोभिः सखि
गणैश्च सहितयोस्तयोर्मानं पूजां तनोति कैः पानीयैर्जलमध्वादिभिः सूयवसैः शोभनतृणैः कंदोनुराधा ह्दीर्घ आर्षः कंदरैः कंदैर्मूलैश्च यथोदितं अतोयं तेषु वर्यः बलिप्रमुखतुल्यः सर्वस्वात्मसमर्पणात्
यद्वा पानीयं सूयवसं तत्क्षरंतीति तत्स्रवः निर्झराः इति पाठे उपवेशस्थानं अत्र भावांतरव्यंजनं यथा रामो रमणीयो यः कृष्णस्तस्य चरणयोः स्पर्शेन प्रमोदो यस्य यद्वा तच्चरणयोः स्पर्शप्रमोदो यस्मात् अत्र पक्षे
तयोश्चरणयोरित्यर्थः तस्येति वक्तव्ये तयोश्चरणयोरित्यादरात् १८ दृष्टेति चित्रमित्याहुः गा इति गोपकैरिति तत्परिवारत्वेनानुकंपाविषयत्वात् कन् गोपायंति दुःखस्थानात् कृष्णमिति श्लेषेण तेषामेव त
नाम सार्थकं ताहृत्सेवा भाग्यं चेति भावः तैः सह गाः वने वनेन नयतोरिति तत्र तत्र गमने स्वाछंद्यं नत्वस्मत्सन्निधो लोककष्टमिति तयो रामकृष्णयो रस्पष्टमधुरपदैः परमानंदहेतुवेणुनादैः अस्फुटत्वेन के
यसंकेतोक्तिरिति नानाभावोद्दीपनं यद्वा नूपुरकलशब्दयुक्तैः पदैः पादविक्षेपैश्चेति गतिविलासाध्यानं शरीरिषु स्वेगतिमंत तेषाम् अस्पंदनं स्थावरधर्मः तरुणां मेरामकाणामपि तदेवांकुरमिषेण रोमेरा
मांचो युगपदेवेति जंगमधर्मः नियोगा वत्सानां दोहकाले नियमनार्थं गलबंधनरज्जवः अहीतव्यआकर्षणपाशाश्च तैः कृतलक्षणो सौंदर्यगुणेन प्रतीतो गुणैः प्रतीते तु कृतलक्षणा हृतलक्षणा वित्यम
रः मुरो हमीषाद्युपरि गोपवेषत्वेनापोषणेन नियोगवेष्टनेन स्कंधस्थपाशेन च गोपपरिवृढश्रिया विराजमानयोरित्यर्थः हे सख्य इति भवत्योपीदं ज्ञानं त्स्यएवेति भावः आच्छादितो भावश्चायं गोपकै
र्ध्यादिस्तेय वस्करक्षकैः सह नयोर्गाः नयतोर्मध्ये उदारः श्रेष्ठो यः श्रीकृष्णस्तस्य वेणुस्वनैः स्थावरजंगमधर्मव्यत्ययोद्भुत अतो वेणुविद्यया मोहनः किंतव विशेष एवायमिति दूरतः परिहार्यः अन्य
न्यथा निर्योगपाशाभ्यां मनोनिबद्धं स्यादिति मोहन दुःखातिशयो विवक्षितः १९ साकल्येन वर्णनाशक्त्या उपसंहरति एवंविधा इति इदृशो माहिन्यो याः क्रीडास्ता वर्णयंत्यस्तन्मयतां क्रीडाविष्टतां य
युरिति २० इति श्रीमद्भागवतदशमस्कंधमध्यगः अध्यायो दैकविंशस्तोषिणीसारसंग्रहे १ इति भागवते दशमे एकविंशोध्यायः २१ एवं वृंदावनां पूर्वरागशारत्प्रसंगेनोक्त्वा द्वाविंशे हे
मंतप्रसंगेन कुमारीणां पूर्वरागे वस्त्राहरलीलयाह नर्गद्वयं चेदं युवतीर्गोपकन्याश्च रात्रौ संकल्पकालविदित्यादिना हरिवंशोक्तं भगवत्प्रेयसीनां श्रीराधादीनां कथमन्यपतिभिर्विवाहादि
कमिति तुरासप्रसंगे स्पष्टीकरिष्यते अष्टमवर्षे हेमंते प्रथमे मासीति मार्गशीर्षे इत्यर्थः नंदस्य व्रजे याः कुमारिकाः पाठांतरे नंदस्य ये गोपास्तेषां कुमारिकाः सगोत्रसपिंडत्वादिसंबंधहीनाः कन्या

इत्यर्थः बाल्यविवक्षयात्स्यार्थेकन् अर्चनरूपं व्रतं १ व्रतं चिकीर्षूणां बोधाय तत्प्रकारमाह सार्धैस्त्रिभिः तत्राप्लुत्येति युग्मकं अंशसीति हेमंतव्रतं कृष्णं कालिंद्या एव जलां ते कूले अरुणे सूर्यस्य
ते सैकतीं ऋषीं प्रफल्लद्भिः प्रतिमां कृत्वा तत्र देवीमानर्चुः नृपेति कन्यानामप्यनुरागइत्याश्चर्यपस्येतिभावः २ स्फुरभिभिरिति यथा पेक्षं सर्वैर्योज्यं बलिभिर्वस्त्रभूषणनैवेद्यैः प्रवालादिभिरन्यैश्चर्योद्भ्वान
चैः क्रमभंगः श्रीकृष्णहृतमनस्त्वात् ३ कात्यायनीतिसार्धकं हे कात्यायनि तन्मुनिवंस्ये धर्मवर्धिके महामाये सर्वज्ञशक्तिरूपे महायोगिनि दुर्घटघटनासमर्थे अधीश्वरि नत्वं छेष्टा काचिद्देवतेति तासां श्लोको
नंदगोपसुतं नंदराजकुमारं पदद्वयमर्थान्तरशंकावारणाय ननु तत्स्त्राप्रयेतमेव भजध्वं तत्राहुः देवी क्रीडारसाभिज्ञे साक्षात्तत्प्रार्थनेन रसावहमिति भावः मे इत्येकत्वं च पृथक्जपात् इत्येतं मंत्रमिति प्राकूसि
द्ध एवासो श्रीकृष्णलक्षणापतिप्रद्रो मंत्रः महामंत्रेस्मिन्नस्तृतीयपादोभीष्टपतिनाम्नायोज्य इति तानिस्तृतीयपादरूहेन प्रयुक्तः अत्र तासां तन्माधुर्यानुभवाविर्भूते प्रवसिद्धे प्रेमभावे तस्याप्तिहेतौ सत्यपि
कात्यायन्युपासनं तत्प्रेमोल्लासविलसितमेव देवतांतरोपासनादिकं भगवत्प्रेमसाधनमेव प्रेम्णो बचलस्याप्तिरिति भागवतसिद्धांतात् प्रीयते मलया भक्त्या हरिरन्यद्विडंबनमित्याद्युक्तेरिति बोध्यं ४ एवंमास
मिति स्वल्पकालेन सिद्धिः पतिर्भूयादिति श्रीकृष्णपतिप्राप्त्यर्थं करिष्य इत्येवकृत्वा दोसंकल्प्य देवीमानर्चुरित्यर्थः ५ पूर्वं प्रेम्णा विस्मृतमपि व्रतपूर्वांगं स्मरन्नाह उषसीति उषस्कस्नायंति तासामुत्कंठागा
त्रैर्नामभिः स्वैरिति अन्योन्यं हितेच्छा हेतोस्तत्तीयानामभिराकानादुत्थायेत्यर्थः स्वैर्वर्गैः सहेति वा अन्योन्यान्बद्धेति मिथः स्नेहः कृष्णमिति चेतो बद्धचनस्यापि तदेकनिष्ठता उच्चैरिति तदावेशः कालिंद्यामिति दूरग
मनं अन्वहमिति निस्यमकरसत्वं एवं सर्वथा तैदनुरागव्यंजना ६ कदाचिदिति तन्मासांते पौर्णमास्यां पूर्ववदिति बाल्यभावात्सदैव नग्नतया स्नानादि मुदा विहारे हेतुः कृष्णं गायंत्य इति गानानंदे हेमं तज्जले पि
सिताद्यस्फूर्तेर्निजनुः यद्वा मुदेति व्रतपूर्तिदिनत्वात् अतस्ता गायंत्यो निजनुरिति देहानुसंधानेन कृष्णचेतस्त्वदार्ढ्यं एवं मानसवाचिककायिकत्वस्यैकतानत्वं ७ योगीश्वराणामीश्वर इति प्रत्येकता दृक्
मनोरथपूरणसामर्थ्यं तासां कर्मणः सिद्ध्ये फलदानाय वयस्यैर्बालकैरेव सखिभिः ते च परमांतुरंगादामसुदामवसुदामकिंकिणयो ज्ञेयाः तैर्वृत इति हासादिविलासार्थं ८ बालैः सहसत्वरः तत्कृष्णमाग
स्ववासांसि गृहीत्वा नीपमारुह्य तैर्हसद्भिः सह स्वयं प्रहसन् तेन हासेन ज्ञातानुसंधानाः सप्रणयेर्ष्याश्चाब्रुवाणाः प्रतिस्फुटमुवाच बालैरिति तत्खेलनार्थं प्रौढानां तन्निकटसंबंधिनां च परित्यागः ९ परि
हासमेवाह द्वाभ्यां अत्रागत्येति अत्रैव वस्त्रक्षेपपर्याप्तिरिति व्याजेन सांगदर्शनार्थं मध्ये स्वगृह्यतामिति शीघ्रागमनाय तत्प्रोत्साहनं स्वस्योदासीन्येन चौर्यापलापश्च स्वस्वमिति सर्वाभिरेवागत्येति मा
वः ननु तवोक्तौ न प्रतीम इति चेत्तत्राह सत्यमिति ब्रवाणि ब्रूवाणीति पाठो ननु नर्मणा मिथ्या ब्रूयास्तत्राह नो नर्मेति. नन्वेतदपि नर्मैव तत्राह अबला यद्वृयमित्यादि अबलास्तत्रापि तपस्विनीषु नर्मणोऽ
योग्यत्वादिति भावः अनेनापि न मया चोरितं किंत्वन्येनैवेति व्यज्यते श्लेषेण बलाभिर्युष्माभिः किमधुना कर्तुं शक्यत इति च १० ननु सहासोक्तेर्मिथ्यात्वमेव स्फुटं तत्राह नेति मया पूर्वं कदाचिदपि अ
नृतं नोदितं तच्चेमे सहचराः विदुः ननु वत ववयस्यास्त्वादृशा एव तत्राह एकैकशस्त्वागत्य वस्त्रं गृह्णीत यदि पूर्वं पूर्वस्येन दत्तं तदान्यापि नागंतव्य इति भावः प्रथमास्थाने सर्वासां असंमतिर्बिलंबश्च
वेस्यादिति व्यंजनया स्वस्मिन्नृजुत्वं बोधयन् पक्षांतरमाह सहेवेति क्रमध्यमा इति कृशमध्याना चिरस्थीत्यशक्तिः सौंदर्यान्यात्तासां मनः क्षोभयति च ११ गोप्यः स्वत एव प्रेमवश्यः क्ष्वेलितं प
रिहासोक्तिं दृष्ट्वा तु प्रेमरसमग्नाः तत्र व्रीडया अन्योन्यं प्रेक्ष्य जातहासाः १२ एवं ब्रूवतीति मुहुरेवमेव वदति सतीत्यर्थः गवां च तत्समयोचितां विदतीति गोविंद इति वाग्मिता नर्मोत्कृष्टचेतस्त्वेने
वोचुरन्यथा नावक्ष्यन्नित्यर्थः १३ आदौ साम्नाहुः मेति आदौ माशब्दो व्यग्रतया ते त्वंगेति द्वयं सप्रेमास्यौ नंदेति त्वं गोपसुतः वयं गोपकन्यकाः इत्यनयमन्यायं मा कृथाः श्लेषेण व्रजराजस्य
तस्य युवराजस्य न्याय एव युक्त इति यद्वा नंदस्य गोपसुतमिति प्रेत्र धर्ममाचरतस्त्तद्विरुद्धाचरणं न युक्तमिति भावः तत्र च प्रीयं जानीम इत्यप्रियाचरणं न युक्तं व्रजेन्द्रेन वा श्लाघ्यं जानी
म इति निंद्यमेतन्न युक्तं यद्वात्र गैरेव व्रजश्लाघ्य ननु गुणैरित्येकपद्यं दाने हेतुः वेपिताव यमिति यद्वा वेपिताः प्रतीति १४ तानं दर्शयेति श्यामेति दास्यः स्याम ते वमेति निश्चितरूखपाठः ताल्वव्यादि
पाठे दास्यः सत्यः इति एकवाक्यतयान्वयः किंतु भगवान्पृथगनुवदिष्यति ते इति विभक्तिप्रतिरूपकमव्ययं च व्याख्येयं तवोदितं करवामेति निजभावव्यंजनाभेदमाहुः धर्मज्ञेति नग्नस्त्रीदर्शन
वस्त्रचौर्यादि धर्मे न यं व्यज्यते इष्टभयमाहुः नो चेदिति राज्ञे नंदाय ब्रवाम हे कृष्ण १५ तदुक्तांगीकारेणैव उत्तरयति भवत्य इति स्वेति ग्रहणानस्यकत्वं हे शुचिस्मिता इति स्मितेन ज्ञायते शीता
दिपीडा वेनास्ति वेपनं कौतवादिति यद्वा शुचिस्मिताः सत्यः प्रतीच्छत मुखम्लानौ न दास्यामीति भावः एवमुक्त्वा कानिचिद्वस्त्राणि स्वासनीकृत्यान्यानीतस्ततस्यक्तानीत्यर्थः १६ ततस्तदागमहृ
दृष्टेत्यर्थः शीतवेपितास्त्रपि पाणिभ्यां योनिमाछाद्य प्रोत्तरणे हेतुः शीतकर्षिता इति १७ शुद्धभावेन पूर्वमेव प्रसादितः अधुना च आहताः हन हिंसागत्योरिति स्मरणात् आगता वीक्ष्य
प्रीतः सन् पूर्वं कीर्णानि तानि वासांसि निक्षिप्य वृक्षस्कंधे निधाय प्रकर्षेण न्याय निष्ठुरमिवोवाच आगता इत्यर्थो न युक्तः गत्यर्थकहंतेः क्वाप्यप्रयुक्तत्वादिक्लिष्टकाव्याद्वल्प
दर्शिनो ननु वेदादिमहोदधिदर्शिनो तथा चोक्तं पस्पशाह्निके महाभाष्ये सप्तद्वीपा वसुमती त्रयो लोकाश्चत्वारो वेदा इत्युपक्रम्य पुराणं वैद्यकमित्येतावंतं शब्दप्रयोगविषयमनिशम्या प्रयु
इति वचनं साहसमात्रमिति १८ विवस्त्राः सत्यो पोव्यगाहत स्नाता इति यत्तत् एतन्मया हस्यमानं देवस्य वरुणस्य हेलनमेव उपवार्थे ननु बाल्ये को दोषस्तत्राह तत्र प्रायश्चित्तमिवा ध्मल

ह अस्यां हसः पापस्य निवृत्तये नमः कृत्वेत्युक्तेऽप्येकपाणिना न मनोरमं दृष्ट्वा एकहस्तप्रणामश्चेति शास्त्रपाठे नांजलिं बध्वेति तत्राप्यंजलिबंधनमभिप्रेयम्[illegible]ध्नीति अभिप्रायस्तु भिन्न एव ल
ज्जालापवर्जीकारादेतास्पर्यात् अधोवसने परिधानवस्त्रं गृहत्यंता उत्तरीयं तु दधाना एवेति भावः १९ इति दोषतयाच्युते नाभिहितं नग्नतया स्नानं व्रतच्युतिहेतुमत्वेति वस्तुतो बाल्याचारप्राप्तत्वे
नादोषात् व्रतपूर्तिकामास्तस्य व्रतस्याशेषकर्मणोंच साक्षात् कृतं पतित्वेन फलभूतं तमेव नेमुः यतः स एवाबद्यमृक् पापमार्जकः पतित्वादिति तासामभिप्रायः २० वासांसि परिधानोत्तरीयाणि
सर्वाण्येव प्रकर्षेण नीपादवरुह्य प्रेम्णा संबोध्यायच्छत यतः करुणः तत्रापि तेन मानलज्जाछेदानुरागादिमयदशाविशेषेण लब्धमनोरथः देवकीसुत इति राजानं प्रति शुकोक्तिः सुभद्रा
दिहारकसंबंधविशेषणस्मारणेन सुखविशेषाय एवमन्यत्रापि २१ तेनेत्युक्ते तोषहेतुं विवृणोति दृढमिति अत्यर्थं वंचिता यूयं विवस्त्रा इत्यादीनां लज्जयाच त्याजिता अत्रागत्ये
त्याग्रहण प्रस्तोभिताः उपहसिताः सख्यवाणीत्यादिना क्रीडनकाद्वत् पुत्रिकास्ताः कारिता बध्वांजलिमित्यादिना न दोषदृष्ट्या अपश्यन् प्रत्युत प्रियसंगेन निर्वृत्ता बभूवुः २२ परि
वर्ष्य दत्तान्यपि स्त्रियः स्वियान्येव परिचित्य वासांसि परिधाय ततो लज्जातिशयापगमे सति कोन गृहीतचित्ताः उदितकामभावाः अतः प्रेष्ठसंगमाय तदेव रहः पाणिग्रहणाय सज्जा इव वर्त
मानाः अतएव तस्मिन् लज्जायितेक्षणा सत्यः तस्मात्स्थानात् नावाह्वानचेलुः लज्जायितेति लज्जातः पश्चाद्यजं तात्स्पृहित्निष्ठा वितताख्यायमनुभावः यथोक्तं ह्रीमानेर्ष्यादिति यं त्रनोच्यते
स्वविवक्षितं व्यज्यं तच्चेष्टयैवेदं वित्त तं तद्विदुर्बुधाः २३ स्वस्य पादस्पर्शः पत्नीत्वेन सान्निध्यं तदिच्छयानुष्ठितव्रतानां तासां स्वपादस्पर्शमय संकल्पं विज्ञाय भावाभिव्यक्त्यानुरूपया दामो
दरस्तमारभ्य तासु प्रेमवान् अबलाः कन्यात्वादस्वतंत्राः प्रति २४ नो साध्व्यः सद्व्यवसायाः मदेकापेक्षा इत्यर्थः भवतीनां मदर्चनं मद्विषयकपतिभावमयसेवात्मकः संकल्पः मनोरथः ल
ज्जयायुष्माभिरकथितोऽपि मया विदितः सच्चानुमोदितः समतीकृतः अतः सत्यः अव्यभिचारी भवितुं व्यज्यतएव किं मन्त्रवरादिप्रयासैरित्यर्थः २५ युक्तत्वमेवाह न मय्यीति मां सेवमा
नानां स्वाराज्यादिकामापि कामत्वाय न कल्प्यते किंतु मद्भये एव पर्यवस्यति कर्दमप्रवृत्त्यादिषु तथा दृष्टत्वात् किं पुनर्मदेकापेक्षाणां युष्माकमित्यर्थः तेत्र दृष्टांतः धानाभ्रष्टयवाः स्वतएव
नर्जिताः पुनःक्वथिता रंधिताश्च बीजत्वाय न तेन कल्पते प्रायोवितर्के यद्वा मदेकपुरुषार्थानां मद्विषयः कामः फलांतरायनममैव परमफलरूपत्वात् यथा धानाः स्वतो भृष्टाः पुनर्घृतादिना भर्जिताः
गुडादिना क्वथिताश्च बीजत्वाय फलांतरोत्पादनाय न किंतु स्वयमेवास्वाद्या भवंति तद्वत् तथाचतामिरनुभूयोऽयं इतररागविस्मारणेनेत्युणामित्यादि भर्जितेत्यादिएकवचनांतानेष्यत इति चचित्सुखपा
ठः २६ अनीष्टं संपादयति यातावलाव्रजमिति युष्मदभिप्रेतमंगीकृतमिति भावः तर्हि कथं यातेत्युच्यते तत्राह मयेति इमाः आगामिनीः सन्निहिताः रात्रीः मया रंस्यथेति यत् यतः मत्पत्नीत्वमद्विषयं चेहुर्भ
वत्य इति शेषः हे सतीः सत्यः अतएताः पत्यंतरमार्ग्रहेणानंगीकृत वत्य एव एतदन्या एवच परकीयात्वेन वक्ष्यमाणाः युवतीर्गोपकन्याश्चेत्युक्तेः रासानंतरं चासां शीघ्रमिहैव सायुज्यं चेति बोध्यं २७
इति व्रजं यातेत्यादिष्टाः लब्धनिजवांछिताः अतएव देवीपूजामुद्यापनादिकं चानंदाद्विस्मृत्य व्रजं प्राविशन् कृच्छ्रादित्यत्र हेतुः तस्य पादपद्मं ध्यायंत्य एव न तु पश्यंत्यः दर्शनविच्छेदादित्यर्थः यदेत्युक्तिः
पतितावेन गौरवात् लज्जयानमाणां गमनकाले पादमात्रदर्शनाद्वानिःशेषः पुनर्व्रतार्थं यमुनागमनाभावात् २८ प्रसादो गोपकन्यासु प्रोक्तो भिलषितैर्वरैः उच्यते यज्ञपत्नीपत्नीषु प्रसादस्तु प्रसं
गतः १ अथेति लीलांतरारंभेन त्वानंतर्ये सहाग्रजइत्युक्तेः वस्त्रहरणादिनेरामसाहित्याभावात् किंचलीलेयं निदाघकाले निदाघार्कातपे तिग्म इति वक्ष्यमाणात् वृंदावनादूतो दूरं इति काम्यकवने
गाश्चारयित्वा निदाघेन्तर्षार्तानां जलपानार्थं व्रजोचरभागियमुनांगतः तत्र्च मध्याह्ने व्रजादानेयभोज्यवंचनार्थं तदपि यज्ञपत्न्यादिषु अन्नप्रार्थनादिरूपप्रसादकरणार्थमिति विभावनीयं २९
वृंदावनक्रमणप्रकारमाह निदाघेति सातपैः आत्मन इत्युपलक्षणं स्वस्य स्वेषां च छत्रायितान् व्रजवर्तिनो वृक्षान् वीक्ष्याह स्म ३० प्रार्थयितव्यप्राप्तिकाना[illegible]व्यंजनाय द्रुमान् स्तुवन्नाह हे
स्तोकेतियुग्मकं स्तोककृष्णएकः अंशुश्चादयोनवे स्येवं[illegible]क्ष्णप्रेमसेवार्थं तिष्ठति तत्राष्टावष्टदिक्षु देवप्रस्थ उपरि छत्रधारणार्थं वरूथपोथोदेशो नर्मशोधनाद्यर्थः ३[illegible] हे तोक कृष्णादयः
एतान् द्रुमान् महाभागान् पश्य तल्लक्षणमाह परार्थमेवैकांतेन जीवितं येषां तान् तदाह वातादीन् स्वयं सहमानात् अस्माकं वारयंति तपस्विनः स्वयं सहत एव दयालवश्च वार[illegible]यंत्येव एते तु स्व
यं सहंते न्येषां वारयंति चेति महाभागत्वं ३२ न केवलं दुःखवारकाः किंतु सर्वार्थसंपादका इत्याह द्वाभ्यां अहो इति विस्मये उपजीवनं जीविका हेतुः जीविनामिति पाठ ण्यताणिकानिः सुजनस्य कु
पालोः चेत्प्रसिद्धौ ३३ तदेवाह पत्रेति गंधः रसादिभवः निर्यासो घनरसः अस्थिसारो[illegible] तोकाः पल्लवाद्यंकुराः ३४ फलितमाह एतावदिति प्राणादिभिः कृत्वा देहिषु जीवेषु श्रेय एवाचरेदि

ति यत् एतावदेहिनां जन्मसाफल्यं आचरणं सदेतिद्ध्यचित् तत्र प्राणैः प्राणानादरेणोपकारैः धियास दुपायचिंतनादिना वाचा परोपदेशैः एषां समुच्चयो मुख्यः अशक्तौ तूत्तरोत्तरपादानं ३५ तरुमध्यव
र्तिवर्त्मनेति आतपाभावः ३६ स्वच्छाः स्वच्छाः शिवाः आरोग्यकराः ततोनंतरमेव यतो गोपाः पशुसंघैः क्षोभेपिस्वादु अतो यथेष्टं एवं पुनर्जलं विशेषयितुं पुनर्जलं दसार्थकं ३७ उपवने अशोकत
रुमंडिते तथैव वक्ष्यमाणादिति फलाद्यभावव्यंजना तयोः श्रमनुमाय विशेषतः क्षुधार्ताः लषतो बुभुक्षिता विति वक्ष्यमाणात् उपसमीप आगम्यत्यर्थ गोरवाय इदं वक्ष्यमाणं अत्रान्नवस
रे ध्यासमाप्तिरुत्तरलीलाः सम्यक्साक्षणं शुकाचार्याणां स्ततध्यीभावेन कथाविच्छेदादेव मन्यत्रापि ३८ इति श्रीमद्भागवते दशमस्कंधमध्यगः द्वाविंशतितमोध्याय स्तोषणीसारसंग्रहे ॥ १ इ
ति द्वाविंशोध्यायः २२ गोपालैर्याचयित्वान्नमृषिस्त्रीदत्तमानशे स्वयं स्त्रियो नुजग्राह दीक्षितो श्यानुतापतः १ स्पयास्तत्ताद्रुमानस सर्वार्थदा अस्माकं क्षुत्पीडा न पगमात् किंतु मनुष्याए
वातो निर्मनुजे वने आनीतवां स्तूलमेव प्रार्थ्य इत्याशयेन नर्मणेवाहुः रामेति विपक्षाक्षपार्त्या माहावीर्ये ति प्रार्थितेदानसामर्थ्यं दुष्टनिबर्हणेति क्षात् खल्लुवे मनुष्यस्वभावात्त्व्य इति श्रुतेर
स्माकं दुष्टं क्षुद्दुःखं नाशयेति भावः आदौ रामसंबोधनं ज्येष्ठतयात गौरवे श्रीकृष्णस्करवान् एषा दुःसहा वस्तुतद्द्वयमध्ये का क्रीडा १ भगवानपीदमब्रवीत् विप्रभार्यायाः ज्ञातावेकवचनं
ताः प्रतिप्रसीदन्तु अनुगृह्णीतु यतो भक्ता याः तासां भक्त्यूत्सत्तौ हेतुः जगदीश्वर इति ऐश्वर्यप्रकाशनादिति भावः देवकीसूत इत्यपि पाठः आदौ विप्रेषु यानं तु तासां महत्वव्यंजनाय २ देव
यजनं यज्ञवाटं ब्रह्मवादिन इति वेदवादिनः न तु वेद इति व्यंग्यं अत एव स्वर्गेच्छयां सत्रमनुतिष्ठंतीति ३ यदि याचने संकोचस्तत्राविं योर्नाम ख्यापयत न तु पित्रादेरित्याह अस्मदित्यादि त
त्र क्रमविशेषमाह आर्यस्येत्यादि ४ तेषां दोःशीलत्वं विशेषयितुं गोपानां सौशील्यमाह कृतेति ५ भूमिदेवा भक्त्या संबोधनं कृष्णस्येति श्रीकृष्णोक्तक्रमविस्मृतिः संभ्रमात् ६ किमर्थं प्राप्ता
स्तत्राहुः गाश्चारयंताविति अन्नार्थागमनं निरस्तं अत एव गोचारणेन दूरगमनेन च बुभुक्षितौ कुत्रेदानीं तिष्ठतस्तत्राहुः अविदुरे निकटे वर्तमानौ इदं स्ववाक्यप्रामाण्याय रामाच्युतावि
ति विप्रत्वेन क्रमस्मृतिः लोकरमण इति सर्वे गुणात् च्युतिरहित इति तन्माहात्म्यं वो युष्माकमेवान्नं लषत इच्छतः अन्नमिति स्वामिपाठः ओदनमिति पाठो वहूत्रसत्रे स्यत्वात् कथं गंतव्यं तत्रा
हुः यच्छता स्मा स्वर्गयत ओदनं श्रद्धा च वो यदि अस्तीति विनयः सतो प्रदाने चाधर्म इत्याशयेनाहुः हे धर्मवित्तमा इति नमपूर्याचकानुकरणाय स्तात्पर्यर्थः एवमग्रे सत्तमा इत्यपि ७ दीक्षितायो
ध्यात्वा इत्याशंकाः स्वपांडित्यव्यंजनाय निरस्यतः पशुसंस्था जाते त्यनुष्ठानविशेषेण तत्राहुः दीक्षाया इति दीक्षणीयेष्टिमारभ्याग्नीषोमीयपशुसमाप्तेः पूर्वं दुष्यति नान्यत्र ततः परमित्यर्थः
सौत्रामण्या अन्यत्र च न दुष्यति सौत्रामण्यां तु सर्वदा दोष इत्यर्थः समयज्ञात्वा याचाम इति भावः ८ इतीति शुकोक्तिः भगवतोपि कृपायां याचां महाभिमानेन शुश्रुवः आदत्तवंतः अतः सत्रो
धस्तान्निंदति क्षुद्रेति साद्धद्वयेन क्षुद्राशाश्रापि भूरीणि क्लेशबहुलानि कर्माणि येषां यतो बालिशा अल्पप्रज्ञाः भक्त्याल्पश्रमेण पुमर्थसिद्धिमजानंतो वा तथापि वृद्धमानिनः आत्मानं ज्ञान
वृद्धं मन्यंते इति तत्त्वे नाभिघ्नंतीति भावः ९ तेषामज्ञत्वज्ञापनाय तत्त्वं व्याह देशः दिशु गमकेन पृथक्नानाविधं चर्वादिद्रव्यं तंत्रं प्रयोगः ऋतुः त्रिधा रूपः धर्मो द्रव्यं १० देशादिमयत्वे
हेतुः परं ब्रह्मेति अधोक्षजमिंद्रियागोचरमपि कृपया साक्षाद्भूतं तमपि मर्त्यबुध्यानादृत्य न वंनं इत्यर्थः कुतः मर्त्यात्मानः आत्मनाम हांतो वयमिति मन्यमानाः यतो दुःप्रज्ञाः विची
रहिताः ११ ओमिति दास्याम इति न प्रोचुः न दास्याम इत्यपि न अत्यंतावज्ञानात् परंतपेति परं मदन्नलक्षणं शत्रुं त्वमेव नियच्छसीति तथा निजोक्त्यादिकं तच्चेष्टितं चोचुः १२ तौ प्रतिगो
पे रुक्तेपि रामे श्रीकृष्ण नादरज्ञात् क्रोधात् हंसीस्थिते श्रीकृष्णमाहेत्यादि तदिति उपसमीपे आकर्ण्य अनादरदुःखेन ग्लानैरुक्तेः प्रहासे हेतुः भगवानित्यादि अतः कौतुकार्थं या
च्यात ङ्गे हासउचित इति भावः लौकीकीं गतिं न हि कार्यार्थिनो निर्विद्यते याचकः पराभूत एव पुंस्कृ याचिता सिद्धौ स्त्रियो याचनीया इत्यादिकां लोकस्थितिं दर्शयन् १३ पत्नीभ्यो यज्ञ
संबंधीनीभ्यो भार्याभ्यो मामागतमेव ज्ञापयत न च बुभुक्षितं नाप्यन्नयाचनमपि कुरुत यतस्ता वते वनदास्यंति ससंकर्षणमिति बलस्य गौणत्वोक्तिः स्वस्मिन्नेव तासामनुरागत्वा
पनाय ननु विना पत्यनुज्ञां कथं दद्युः द्रष्टानावा पतयो निवारयेयुस्तत्राह स्निग्धा इति मदेकापेक्षाणां नान्यप्रतिबंधादर इति भावः यतो यत्तत्संबंधि चाद्भुह देहेनैव तु संतिष्ठि
यातु मध्ये नोषिता इति १४ अथ स्निग्धेत्यादि भगवदुक्त्यनंतरमेव सदवसरे गमनमाह आसीना इति संभाष्यत्वे खल्लु चेत्र धास्कराय स्यात् अव्यग्रचित्तत्वेन सवेषत्वेन
सद्व्यवहारवचनं च तत्रासीना १५ इति आवश्यकं पादादि निष्पाद्योपवेशनादव्यग्रत्वं कृष्णमाद्यन्नकृताप्राः १५ पि श्रीकृष्णप्रेमपुल्लं कौः स्पृष्ट अन्नं कृता इति सुवे

षः सतीरिति सद्व्यवहारः प्रश्रिता इतिस्य भावात्तासां श्रीकृष्णभक्तस्य श्रवणाद्वा १५ तान्प्रत्यर्थापयति नमो व इति विप्रपत्नीभ्य इति नतियोग्यता कृष्णेन युष्मच्चित्ताकर्षकेण १६ सह हलेगोपालैः सहस्र
हृदमिति पुनरुक्तिर्नैकदेशात्तथा तासामागमनार्थं प्रकर्षेण पात्रादिषु निधाय दीयतां पूर्वं सर्वार्थमन्नयाचना तया मपि द्वयोरेवान्नार्थना अधुना त्वन्नयाचना तौ विनापि अन्नयाचनं तत्रापि रामगोपसहि
तस्येति तत्रापि प्रकर्षेण स्फूर्तिस्तासां भक्तिं दृष्ट्वा १७ तद्दर्शनोत्सुकाः अत एवोपसमीपे आगतं श्रुत्वा तु त्वरयान्नमादाय गमनाय जातसंभ्रमा बभूवुः यतस्तस्य कथया बुभुक्षावार्तया क्षिप्तमानसः १८
चतुरिति युग्मकं भक्ष्यभोज्यलेह्यचोष्यभेदेन चतुर्विधं रससौरभ्यादिबहुगुणयुक्तं भाजनैर्भोजनपात्रैः यद्वा संभ्रमेण पाकपात्रैरेव पत्यादिभिर्वार्यमाणा अपि प्रियं श्रीकृष्णं अभिजग्मुः अप्रति
बंध इव छंदतः सरित्सरिति सरि... तद्वदिति १९ पतिभिरित्यादिकं यथानिकटं ज्ञेयं निषेधश्चान्नं देयं चेत्प्रस्थाप्यतां न तु स्वयं गच्छतेत्येवं गमनस्यैव नान्नस्य भगवता न स्वीकारात् अन्य
थास्वाम्यदत्तमग्नात्त्वस्यादिति दीर्घकालं श्रुतेन श्रवणेन ८८ तत्राशयो याभिरित्यभिसरणे हेतुः २० यमुनेति युग्मकं ददृशुः कृष्णमिति शेषः अशोकेति श्लेषेण तासां तदप्राप्तिशोकहारि
त्वं गोपैस्तत्रस्थितैः रन्ध्रैर्वृतमपि ददृशुः तत्र तस्यैव तेजः प्रागल्भ्यात् सागजमिति रामतेजसोपि तस्मिन्नुपसर्जनत्वं स्त्रिय इति तत्पतीनां मभाग्यं २१ हिरण्यवत्परिधानं यस्य वनमाल्यैर्व
न्यविविधपुष्परचितमाल्यातिरापादलंबिनीभिः बर्हैः प्रवालैश्च मौलिभूषणैः अंगचित्रीकरणे गैरिकादिधातुभिश्च नटवद्वेषो यस्य अनुव्रतस्य स्निग्धस्य सख्युः स्कंधे निहितहस्तं इत
रेण दक्षिणहस्तेन लीलाकमलं भ्रामयंतं कर्णोत्पलयोरलकानां कपोलयोर्मुखाब्जस्य च हासः प्रकाशो भावविशेषो यत्र तं २२ अथ लज्जया नेत्रे पिधाय हृदि कृत्वा तस्मिन् तासां बहिर्वृत्तिर्ल
यपूर्वकं समाधिमाह प्रायइति बहुशः श्रुता ये प्रियतमस्य उदयाः उत्कर्षास्त एव कर्णपूराः कर्णाभरणरूपास्तैः यद्वा उदया नाकर्णेषु पूराः प्रवाहास्ते येषां श्रीकृष्णे निमग्नं मनः स आत्मा मन
तं अथानंतरं सद्य एव लोचनद्वारेण तं मनसि प्रवेश्य मनसैव सुचिरमालिंग्य तापं विजहुः विशोका सुन्नस्तापा गमनानि रस्तः अभिमतयोर्हेतव्यः प्राप्तेस्वापसास्क्षेण परिभ्यत्त्रल्यं प्राप्ये
ज्ञामत्तादिना पयथेति यद्वा अपि परिरंभणीया नीमुखी मतिर्येषां ते प्राज्ञभागवतमालिंग्य यथेति २३ अखिलदृक् द्रष्टा सर्वबुद्धिसाक्षी अतस्तास्तथा प्राप्ता विज्ञायापि तथेत्येतद्विवृणोति त्यक्ताः सर्वा आशा
याभिस्ताः केवलमात्मनः स्वस्य दिदृक्षयेति प्रथमतस्तन्मात्राभिलाषात् प्रहसितेति वचनाच्चातुर्यं २४ वः स्वागतं शुभमागमनं आस्यतां विश्रम्यतां न तश्च किं करवाम इत्यादिस्यतां नोस्माकमिति बहुत्वं साधारण्या
पादाने नो दासिन्यार्थं दिदृक्षयेति दर्शनाज्जाततमिच्छांतरं निरस्यति प्राप्ता इति यत् इदं वउपपन्नं युक्तं २५ तासां स्वसंगतिवांछां वंचयन् युक्तत्वमाह नन्विति आत्मनः सकाशादपि प्रिये परमात्मत्वात् विवेकिनः अतः
स्वार्थदर्शिनः पुरुषार्थसारपरिक्षका यथावद्भक्तिं कुर्वंति यथावत्त्वमाह अद्धा साक्षात् अविशुद्धामित्यर्थः यतः अहेतुकी फलाभिसंधिरहिता अत एवाव्यवहिता निरंतरा संततामिति यावत् इयमेवाव्यभिचारिणी
भक्तिरित्युच्यते २६ आत्मनः सकाशात्परमात्मनः प्रियत्वं साधयति प्राणेति स्वाः ज्ञातयः आत्मा जीवः यस्य परमात्मनो ममसंपर्कादधिष्ठानत्वादिसंबंधात् २७ तत्तस्मात्कृतार्था यूयं देवयजनं यज्ञवाटं गच्छत प्रया
ता तसाध्व्या यजनमिति पाठांतरं कृतार्थाः किमिति यास्यामस्तत्राह पतय इति स्वसत्रं यज्ञमारब्धं युष्माभिः समापयिष्यंति यतो गृहमेधिनः युष्मान्विनाधिकाराभावादित्यर्थः गृहासक्तभावेपि यज्ञसिध्यर्थं देवय
जनमेव यात तथा च पत्यनुग्रहोपि स्यादिति भावः २८ हे विभो बहिरंतर्व्यापक ईदृशं वक्तुमपि कृपार्द्रचित्तो भवांस्तु योग्यो न यतो नृशंसं क्रूरं यद्वा रसाब्धिचंद्रो भवान् नृशंसं नीरसं किंचन निगमं नेमं भक्तः प्रणस्यती
ति करवाम किमिति वा प्रतिज्ञां न सत्पुनरावर्तत इति वेदं वा सत्यं कुरु आदौ भवानित्यनुनयार्थं पश्चात्त्वं कुरुष्वेति प्रेम्णा अत्र ब्राह्मणा नतिक्रमेरुपा मर्यादापि निगमार्थः मत्पात्त्य इत्यर्थो भगवतांगीकृतस्तत्तु तामभिर्ना
नुसहितं पत्यादिपरित्यागो न युक्त इति न वाच्यमित्याहुः तवेत्यादिना सर्वधर्मान्परित्यज्येति रीत्या सर्वं त्यक्त्वा दास्यमेवांगीकृतवत्य इत्यर्थः ऐश्वर्यसौभाग्यश्रीनिवासेन पदा वक्षस्थेऽवज्ञयापि दत्तं दामके
शैर्वोढुं २९ ननु तेषां हितार्थं मद्वाक्येनैव यात तत्राहुः गृह्णन्तीति तन्निषेधो दृढघनादिति भावः अन्ये प्रति वन्द्यादयः हे अरिंदम कामक्रोधादिदमन त्वत्सादाम्न समीपे पतितदेहानां अन्यास्वर्गादिगतिरपि माभू
त् तस्मात्त्वद्दास्यमेव विधेहीति ३० नाभ्यसूयेरन् दोषदृष्टिमपि न कुर्युः लोकाश्च किमुत स्निग्धाः पित्रादय इत्यर्थः कीदृशास्ते ये मया उपेता अनुज्ञाताः मदनुज्ञासामर्थ्येन नासूयेरन्निति भावः प्रत्यक्षं देवा
अप्यदर्शयन्नाह देवा अपीति एवं लङ्प्रयोगस्वारस्यं यद्वा मया सह उपेताः समीपे संगताः वः नासूयेरन् यतो यज्ञकर्मणि तैः प्रत्यक्षीकृता देवा एष्टाः संतोनुमन्वते अनुमंस्यत इत्यर्थः ३१ नन्वसमप्रार्थितस्य
कावार्ता स्यादाशंकायां समाधत्ते नेति प्रास्तनीभिर्युष्माभिर्ममांगसंगो दास्यं न मत्सांनिध्ये सर्वेषां नृणां प्रीतये सुखाय न स्यात् नतरामनुरागाय तत्तस्मात् लोकविद्विष्टत्वान्मन एव मयि युंजाना अचिराद्देहां
ते मामवाप्स्यथेत्यर्थः पित्रादेरिव ब्राह्मणादेर्दास्याचरणं न रत्नीलायामोचितिं नान्देहा ति भावः ३२ अनुसूयवः अदोषदृष्टयः ताभिः स्वाभिरिति पाठो ३३ मामवाप्स्यथेत्युक्तिर्नाश्वासनमात्रं किंतु स
त्येवेति दृष्टांतेनाह तत्रेति तत्र यज्ञवाटे सर्वासां पश्चात्प्रस्थिताबलात् ध्यात्वा कर्मानुबंधनं देहं पतिसंबंधिनमित्यर्थः विजहौ विशदः पुनरावृत्तिनिषेधार्थः प्रेममयेन सिद्धदेहेन तं प्रापेति

तेयं येयेवापिस्मरन्भावं येयथामांप्रपद्यंते इत्याद्युक्तेः ३७ तासां भक्तिंप्रदर्श्य भगवदनुग्रहमाह भगवानिति तत्रैवंज्ञातं भगवान्येवंचक्रे इत्यपेरर्थः तेनैवेति गोपापेक्षया भस्याल्पत्वं तथापिदु
र्तौहेतुः भगवान्निति स्वयमपीति तासांतादृशप्रसादचमत्कारं व्यंजयति यतःप्रभुनिरर्गलानुग्रहः ३५ एतत्सर्वं व्रजजनप्रमोदनायेत्युपसंहरति एवमिति भल्लोकं तद्व्यवहारमनुशीलयन्सदा
आचरन् गोपीनामिति कर्मषष्ठीरूपेणवाच्याकृतैश्चरितैश्चरमयन् तान्रमयितुंरेमेइत्यर्थः ३६ पत्नीनांसंगेन पतीनामपिसद्बुद्धिर्जातेत्याह अथेत्यादियावत्समाप्ति अथेति अनुस्मृतिप्रकारं
माह मनुष्यलीला विस्तारयतोरीश्वर्यार्थाचायत अहन्मतत्कृतागसोवयमित्यनुस्मृत्यमुहुरेतद्यन् ३७ तदानार्योगुरूनिवमत्वा भक्तिहीनमात्मानंव्यनिंदन्नित्याहुः दृष्ट्वेति अनुतप्ताः सं
तोविशेषणस्वाभिमानत्यागादिना गर्हयन् अलौकिकिं लोकदृष्ट्योपेक्षणात् श्रीकृष्णप्राप्त्यासद्योदेहत्यागाच्च ३८ परमात्मन्यपि ये विमुखास्तेषां नोजन्मादिधिक् निवृत्तशोकं सावित्रं दै
क्षमिति त्रिगुणितं जन्म अतएव ब्रह्मचर्यंकुत्सं सहस्रापरंपरां ते पुण्यधिमिति व्यगर्हयन् ३९ योगिनांकर्मयोगिनामच्चोगयोगिनांच भक्तिणां योगत्रयजितास्तुनांसर्वे पांगुरवोपि ४० स्त्रीणांपि क
ष्टावयमिति चाहोचेति अहोइति त्रिभिः यो विघ्नदृष्टिं नतंदुरंतं सर्वबाधकं भावभक्तिंपश्यत भूतनिर्देशस्तासांसद्योगृहाद्यासत्यभावंदृष्ट्वा ४१ अहोइत्युक्तमाश्चर्यं व्यंजयती नासा
मितियुग्मकेन द्विजातिसंस्कारउपनयनादिस्तत्कर्माधिकारहेतुः शौचं सामान्यधर्मः गुरुवासादयः कर्माद्ब्रह्मचारिवनस्थयतिगृहीधर्माः गार्हस्थ्यस्य पश्चाग्निर्देशः श्रेष्ठ्याभिप्रायेण अ
तएवश्रुताइत्युक्तिः ४२ तत्तद्राहित्येपि कृष्णेदृढा बहुनिरोधेनास्माभिरपिछेत्तुमशक्या भक्तिर्जाता योगेश्वरभक्तियोगवंतस्तासामीश्वरे सेव्ये पुनर्व्यतिरेकेण दृढयंति नचेति ४३ दयालु
त्वंश्रीकृष्णेदर्शयति ननुनिश्चितं स्वार्थेअत्यंतानात्मनोयतोगृहेहयागृहस्थैर्नचहितानांनः कर्मणीषष्ठी अस्मान्स्मारयामास भक्तानांगतिरपिकेवलं कारुण्येनैव यद्यस्ता दयालुनोगति
राश्रयः इति अहोआश्चर्यं कारुण्यातन बोधिता अपि नबुद्धवंत इति भावः ४४ ननु गोपवाक्येरन्नमेवायाचत नस्मारयामास तत्राहुः अन्यथा अनुग्रहमयंस्मारणंविनापूर्णकामत्वेपि
गोपनिमित्तमन्नयाचनयुक्तं तत्राहुः कैवल्याद्याशिषामिति विडंबनं दयामात्रेणानुकरणमेवेति ४५ स्मारिता अपिकथं नस्मरथस्म तत्राहुः हित्वेति असत्कृत्वजते स्वात्मनिदोषाश्चांचल्य
गर्वादयस्तेषांत्यागेनयांचेति यांच्यामात्रेण मोहिताअनुमनत्वनंतरोक्तविचारस्फूर्तिरितिभावः ४६ मोहमाहुः देशइतियुग्मकेन यन्मयः यत्स्वरूपः ४७ देशादिमयत्वेहेतुः विष्णुर्व्यापकः यो
गेश्वरेति सर्वसेव्यत्वं यरस्तादिभिरस्माकमपिसेव्य इतिभावः सएवसाक्षाज्जात इतिश्रुतवंतो वयंतथापि ४८ मूढत्वहेतुमायापरमायतंप्रणमेति नमइति त्वमामस्तत्रैवाभिनिवेशप्राप्तुः
आवर्तादिवतततोनिर्गतुमशक्ता इत्यर्थः ४९ ५० अथक्षमयेति सइति अतिक्रममपराधं क्षंतुं योग्यः यतः स्वस्यतस्यैवमाययामोहितचित्तानां अतस्तन्माहात्म्यमजानतां एवमस्माकमे
पराधः स्तनवेदेन तत्तथापिसत्याद्यः सर्वश्रेष्ठोनिरुद्धाक्षानोक्षंतुमर्हति पुरुपोतर्यामीति तत्प्रेरणयाकृतापराधानां क्षंतुमर्हत्येवेतिभावः ५१ अघमपराधं कृतेहेलनं मनुष्यदृष्ट्या
अवज्ञायैस्ते स्वाघक्षमापनाय इच्छुमिछवोपिनचाचलन् यतः कंसाद्भीताः इदविश्वासानुरस्त्यास्वानिलशंकयेत्यर्थः ५२ इतिश्रीमद्भागवतदशमस्कंधसंस्थितः त्रयोविंशोग
गतोध्यायस्तोषिणीसारसंग्रहे १ इतिश्रीभागवतेदशमस्कंधेत्रयोविंशोध्यायः २३ अथेंद्रमखंनिषिध्यगोवर्धनोत्सवप्रवर्तनं गोवर्द्धनपूजाचेयंकार्तिकशुक्लप्रतिपदिप्रवृत्ताप्या
नपूर्णिमायांप्रवृत्तरासक्रीडायाः एवं भाविनीज्ञेया रासलीला यांगोपीभिरनुकृतत्वात् रासश्चवस्त्राहरणलीलानंतरशरदंतराव्यवहितशरदिइमारस्यथक्षपाइत्यव्यवधानोक्तेः
तथाचायंक्रमः अष्टमवर्षस्याश्विने वेणुगीतं कार्तिके गोवर्द्धनोद्धरणं कार्तिकशुक्लैकादश्यां गोविंदाभिषेकः द्वादश्यां वरुणालोकगमनं तत्पूर्णिमायांब्रह्महृदावगाहस्ततो हेमंते वस्त्रा
हरणलीला तत्रैवनिदाघेय यज्ञपत्नीप्रसादः नवमवर्षस्य शारदिरासलीलेति वैपरीत्योक्तिस्तु प्रेमावेशात् भगवानपितत्रैवेति त[illegible]दिंद्रयागयोग्ये गोष्ठनिकटे एवस्थानविशेषेनि
वसंतोगोपा इंद्रयागकृतोद्यमा बभूवुः भगवानपि तत्रैव बलदेवयुतोनिवसन् तद्यागोद्यतान्गोपान् अपश्यत पश्यन्नेवासीत् तत्संभारेर्या गौतरानुष्ठापना यादावेव नव्यवर्जयदित्यर्थः १
ततश्चतस्येंद्रमखस्य तत्फलादेश्चाभिज्ञोपि भगवानपि नम्र एवसन्नपृच्छत् अभिज्ञाने हेतुः सर्वात्मेति प्रश्नेहेतुः सर्वान्पिदर्शयति स्वार्थमिति मत्पित्रादीनां तद्भूरिभाग्यमित्यादिलक्ष
णमहामहीमत्वादिंद्रादेः श्रीमत्तस्य पूजा नममताकिंतुगोवर्द्धनपूजैव बहुमतेति दर्शयितुमिति भावः २ कथ्यतामित्यर्थकं मेमत्स्येसर्वैर्ज्ञायतेमयैवनेति मां प्रत्येव कथ्यतामिति भा
वः वः युष्माकं सर्वेषामेव संभ्रमो वैयग्र्यं श्लेषेण सम्यक् भ्रमएव हृरे स्थातुं योग्या पिउपसमीपे आगतः २ कथासंभ्रमोनभवति मखोयमितिचेत् किमस्यफलं कादेवताकेन

कर्त्ताकरणेन वा साध्यते एद्धि हीति पुनरुक्तिरतिश्रद्धाबोधनाय यतस्तव महान्कोमोदस्यते महोमां प्रीणइतुं ननु बाले त्वयि किंतदुक्त्यातत्राह शुश्रूषवेमस्त्विमिति पुत्रेच्छापूरयितव्येवेति भावः पितरिति पुन
रुक्तिः स्नेहविशेषाय ४ अयं ज्ञो नास्त्येव तथापि सोल्लुंठनमिव पृच्छति तदिदः प्रत्यनादरेणैव स्यादिति संशय्य तूष्णींस्थितं प्रत्याह नेति सार्धेन साध्वज्ञामिति तेषां विकर्मस्वप्रवृत्त्या गोप्यत्वाभावात् साध्वल
क्षणमाभ्रह सर्वात्मनो सर्वत्र परमात्मदृष्टीनां इह जगति स्वःपरइति दृष्ट्यभावात् नमित्रं उदासीनो विद्विट्च येषां तेषां वृत्तं कर्म गोप्यं न किंचिदस्तीत्यर्थः ५ सत्यपि तद्दर्शने गोपयितुं न युक्तमित्याह उदा
सीन इत्यर्धकं उदासीनः शत्रुवद्वर्ज्यः मंत्रभंगभयात् आत्मतुल्यत्वात्सुहृत्तमं त्रेषु न वर्ज्यः तत्राप्यंतरंगः पुत्र एवाहमिति भावः ५ किंच सुहृद्भिः सहविचार्यैकमेकर्तव्यं न गतानुगतिकतयेत्याह ज्ञात्वेति अज्ञा
त्वा दृष्टपरंपरया कर्माणि दृष्टादृष्टफलकृषियागादिनी तत्र विदुषो यथा कर्मफलं तथा नाविदुषः ६ तत्र तेषु कर्मसु … ७ यः क्रियायोगः किं शास्त्रेण विचारितः शास्त्रैकप्रमाणप्राप्तः इति साधु सोपपत्तिकं तावदादौ इदं क
थ्यतां प्रश्नांतरं पश्चात्करिष्ये इत्यर्थः इति अग्रे प्रश्नान्तरेपि प्रौढिव्यंजनया तत्तदभिहितत्वं तेनैव स्वोक्तो विश्वासजननं ७ लोकपरंपराप्राप्त इति सहेतुकमाह पर्जन्यइति वृष्टेर्धारमित्यर्थः भगवानिति
भक्तिविशेषात् आत्ममूर्तयः प्रियामूर्तयः ८ ततः किं तत्राह तमिति तातेति सप्रीणनं स्वोक्तौ श्रद्धार्थं व्ययं गोपा अन्ये च नरा इत्यन्वयः ननु आदित्याज्जायते वृष्टिरित्युक्तेः सूर्यो वृष्टिकर्ता तत्राह मेघाना
पतिमिति मेघरूपाणां सूर्यरश्मीनामपीइप एवेशइत्यर्थः ईश्वरं देवेंद्रत्वात् अन्यथा तयदः स्यादिति भावः यद्वांतर्यामीश्वर दृष्ट्या वयं वेह्मना अपि यज्ञाम इति भावः तद्रेतसा वृष्टिपयसा सिद्धेरिति तेषु स्व
स्वाम्याभावाददोसएव पूज्यइतिभावः यजंत इति प्रथमपुरुष आर्षः एवमग्रेपि यद्वा निजाग्रह परिहारायान्येषां प्राधान्यविवक्षया प्रथमः पुरुषः ९ यज्ञैः कउपकारस्तत्राह तच्छेषेणो पर्जन्येति जीवीका
कल्पयंति धर्मार्थकामाएव फलं तत्सिध्यर्थं एवं दृष्टादृष्टफलत्वं ननु पुरुषप्रयत्नैः त्रिवर्गः सिध्येत तत्राह पुंसामिति देवताप्रासादा कर्मादिसिद्धेः पर्जन्यस्य देवराजत्वादिंद्र उद्यमानो फलसाधक इत्य
र्थः १० व्यतिरेके दोषमाह य इति कामादद्दृष्टविषयात् भयात्क्रिरोधिजनहेतुकात् दृष्टाद्देवताविषयात् वा शब्दात्राध्याहार्यः अत्रैषां त्रिवर्गलिप्सादिकं श्रीकृष्णस्यैकार्थकमिति ज्ञेयं १० नंदवचः प्रामाण्या
य सेवदतामन्येषां चवचः मन्येत्ज्ञनयन्निति कोपजननद्वारा गर्वपर्वतादिंद्रमवतारयितुं पितरमिति आदरविशेषात् केशवो ब्रह्मरुद्रौ वयते व्याप्नोतिस्वमहिम्नेति कस्तत्रवराकइंद्र इति भावः १२ श्रीमत्तस्यम
पित्रादिभ्यः पूजाग्रहणे को नामाधिकारः अतोस्य मदभंगः कार्यइत्याशयेन कर्मवादाश्रयेण देवतानिराकुर्वन् पित्रोक्तपरिहरति कर्मणेति हिल्लीयते प्रमीयत इति पाठो क्षेममभयं त्रिः कर्मपदं द्विरेवकार
श्च कर्महेतुत्वदार्ढ्यार्थः जडात्कर्मणः कथं फलसिद्धिरिति चेत् अशीलितमीमांसानां अक्षेयं यत् श्रुतिसिद्धं कर्मणां फलहेतुत्वे अंतर्गडु देवताः कल्प्यंत इति १३ एतत्साहसभीतानां कर्मपरतंत्रेश्वरवा
दं मतद्वयनिरस्यति अस्तीति स्वचयं कर्मास्ट… प्रज्ञीनां कर्मणां फलरूपी फलदाता भजते अनुसरति कर्मानुसारी फलदानात् व्यतिरेकेणाह नेति १४ अतः कर्मणैव फलसिद्धेः कर्मपरतंत्रा ज्ञागलस्तं
नायमानदेवतायानवृत्त्यमित्याह किमिति प्रजमात्राणां स्वकर्मानुसारीफलं भुंजानानामिंद्रेण किं कर्मणएव भोगहेतुत्वात् तत्रापिन्द्रेण स्वस्वप्राक्तनसंस्कारविहितं कर्मान्यथाकर्तुमनीशेन तेन किं स्व
तानस्यैव कर्मफलहेतुत्वात् तदर्थमपि अंतर्यामि देवतोपयोगो नेति भावः १५ एतद्विवृणोति स्वभावतंत्रइति प्रवृत्तेः संस्काराधीनत्वात् किमंतर्यामिणेति भावः १६ तस्मात्स्वभावोस्य कर्मण एव सर्वेहे
तुत्वात्कर्मैव पूज्यमित्याह देहानिति सार्धेन शत्रुमित्रादिरूपापि कर्मैव एकस्यैव शत्रुमित्रादिरूपतादर्शनात् कर्मज्ञानार्थं गुरुरावश्यकत्वात्पूज्यस्तत्राह गुरुरिति अदृष्टं विनोपदेशात् दृष्टप्राप्तेः फ
लदातृत्वेन पराभिमतईश्वरोपि कर्मानुगतत्वान्नातिरिक्त इत्याह ईश्वर इति १७ स्वभावस्थः संस्कारतएव कर्मारब्धते इति एवं तद्दिसन् स्वकर्मानुतिष्ठन्नसन् कर्मैव पूजयेत् बहुमानयेत् यद्वा कर्मा
जीव्यमेव पूजयेत् नत्वहिरंगदेवादीत्यर्थः तदेवाह अंजसेति वर्तेत आजीव्येत १८ विपक्षे दोषमा अआजीव्येति एवं पदार्थं जीवनोपायवृत्त्या तस्मादन्यस्मात् १९ स्वकर्माजीव्य पुंजोसाधयितुं स्वस्य
गावृत्तितामाह वर्तेतेति द्वाभ्यां वर्तेतेति ब्रह्मणावेदाध्यापनादिना २० कृषिवाणिज्यसहितागोरक्षा वृत्तिर्जीवनं चतुर्थं अनिशमिति गोपत्वात्तत्कृष्यादिकापि वृत्तिरिति भावः २१ ननु गवामपि वृत्तिरिं
द्राधीनेत्याशंक्य नीश्वरसांख्यमताश्रयेणाह सत्वमिति द्वाभ्यां विविधकारणरूपं विश्वं अन्योन्यस्त्रीपुरुषादियोगेन विविधजगद्रूपं सदुत्पद्यते सत्वादीनां स्थित्यादिहेतुत्वं स्वभाव इति ज्ञेयं २२ सर्वतइति
समुद्रशैलादिष्वपि वृष्टिदर्शनात्प्रेक्षावत्कर्तृका वृष्टिरिति भावः सिध्यंति जीवंति महेंद्र इति सोपहासं २३ ननु योगक्षेमार्थं देवतापेक्षा तत्राह नेति वनान्यैवौकांसि एषां ता दृशा ज्ञो त्यैवय अतोनि
त्यं वनशैलवासीनां योगक्षेमालनशैलादिति एवेतिभावः एवं गोवर्धनं समीपवासो व्यज्यते २४ निगमयति तस्मादिति आजीव्यात् गोब्राह्मणानां प्राशुक्तिः सर्वाजीव्यतया सामान्यात् आजीव्यस्यापि
वेनस्यात्रानुक्तिर्देवतात्वाप्रसिद्धेः एवं देवताआराधनात्मको यमखोस्तु यः इत्यद्रिगोद्विजगवामितिवक्ष्यमाणात् तत्रापि शैलो मुख्यः कृष्णस्तन्यतमरूपमित्यादिनात महिमप्रदर्शनात् वृंदावनभू
मो नंदीश्वराद्यनेकाद्रिसत्वेप्यत्राद्रिपदेन गोवर्धनएवतेयः कुलाचलमध्ये गणितत्वात् प्रयोगकल्पनामाह यइतिसार्धैश्चतुर्भिः २५ इंद्रयागाद्यमप्यर्थो विशेषतः संपाद्यत इत्याह पचंता
मितिचतुर्भिः पाकाः पचनीयाः सूपमोक्षं पायसं पयः पक्वं संयावादयो गोधूमविकाराः संयावादीनां पृथगुक्तिः प्राचुर्यापेक्षया सूपपायसयोः शब्दः क्रमः

तोषीणी

राम ३७

दोहस्याधिकः अन्येषां पाठः दोहविशेषो हविर्येषु त्रिरात्रं चैव संदोहं सर्वघोषस्य गृह्यतामिति २६ अंगान्याह हयेनामिति सम्यगिति ब्राह्मणानां होमस्य वा विशेषणं होमप्रधानदेवता गिरिरेवेति भा-
ति अग्नय इति बहुत्वं गार्हपत्यादित्रयापेक्षं बहुगुणं बहुविधमिति पाठो धेनवश्च दक्षिणाश्च २७ अन्येभ्यो ऽपि गीतरेभ्यो विप्रेभ्यः श्वादीनभिव्याप्य यथायोग्यमन्नादि देयं केवलमिंद्रो वर्ज्य इति
भावः गवां गोभ्यः चकारः पूजासंग्रहार्थः बलिर्गन्धादि पूजान्तकूटश्च २८ न च यागं तवेन्द्र दुःखं किं तु सुखमयमेवेदमित्याह स्वल्पमिति भुक्तवंत इत्यत्र प्राक् पश्चादिरूपदाप्रयोगादरिद्रं प्रत्येवं
तद्वचनोचितं स्यात् अत्रैकदेवगवादिप्रदक्षिणविधानं तथापि तत्तत्पूजां ते एवं तेयं पूजां ते कृतेभ्यः स्यात् गोधनानि पुरस्कृत्य गिरिं चक्रुः प्रदक्षिणं इति गिरिप्रादक्षिण्यस्य पृथक् वक्ष्यमाणत्वाच्च भूषणा-
दिकं परोचनार्थं नागकोटिप्रविष्टं नोजनान्सर्वं गवादीन्परिक्रम्य भुक्तवंतो गिरिं प्रदक्षिणं कुरुतेति तात्पर्यं २९ हतालेति यदि मयि स्नेहस्तर्हि क्रियतामिति भावः यदीति पित्रादिषु तथोक्तेर्योग्यत्वात् किंचायं
गवादीनां मम वा मत्त्वं च दयितः हितः स्वहितं त्यक्त्वा मद्धितमेव न वह्निः क्रियते इत्यनूद्य प्रार्थयेति इत्यादि ३० कालस्याप्यात्मना प्रवर्तकेनेंद्रदर्पहानिः स्फुरेति यद्वा कालयति चित्तमाकर्षति सत्त्रा-
त्मा स्वभावो यस्येति तद्वाक्यांगीकारे हेतुः शक्रदर्पः मर्त्यदृष्ट्या स्वस्मिन्ननादरात्मकः कृष्णमर्त्य मित्यादिना प्रकटिष्यमाणस्तस्य येन त्वाहं तु मिथ्या अतो मत्कृत नयन्निह स्फुटं हि दर्पाभावे हितं यस्या-
त इत्थमन्मकरिति ३१ तदेवाह तथा च स्वार्थकं मधुसूदन इति सामर्थ्यं तेन च शक्रकोपाभावः ३२ वाचयित्वेति सार्धद्वयकेन स्वकल्प्य मखव्रतमनूद्य ते कृतमस्तु पूर्वोक्त एव विशेषः तद्द्रव्येण इंद्रमख-
द्रव्येण गिरिद्विजान्प्रति यथायोग्यमुपहृत्य दत्वा आदृताः सादराः ३३ प्रदक्षिणं कथं चक्रुस्तदाह अनांसीति गोप्यश्चारुह्य तत्र गोपीनां विशेषः कृष्णस्य वीर्याणि इंद्रमखभंगं तानि गायंत्यः द्विजास्तदा-
शिषश्च तत्संहिता इति विप्रा अपि आशीर्भिः सपत्नीका इव प्रदक्षिणं चक्रुरिति व्यंग्य ३४ स्वकारितयागस्य श्रेष्ठ्यं स्वस्मिन्विश्वसनीयतां च दर्शयन्स्वयमद्रिदेवतामूर्तिर्बिभ्रत्सर्वानानंदयन् बे-
लिं बुभुजे इत्याह छद्मइति गोपविश्वासजनकं अन्यतममिति अन्येषु भक्तार्थं आविष्कृतरूपेषु अतिशयितं रूपमाकारं बृहत्वात् तदाह बृहद्वपुरिति अतएव प्रचुरमपि बलिं सर्वमेवाभुंक्त ३५ तस्माइ-
त्यर्थकं कृष्ण इत्यनुवर्तते सहेति तेषामप्राधान्यं सर्वेभ्यः कृष्णस्य भक्त्यतिशयं व्यंजयति आत्मनास्वयं आत्मने तस्मै ३५ अहो इति जनानां वचनं सार्धकं रूपी प्रत्यक्षः अनुग्रहं बल्यादानादिना ३६ अभ-
क्तान्हंतीत्याह एष इति अवज्ञानतः एतद्यागमकुर्वत इत्यर्थः मर्त्यान्तत्रापि वनौकसः गृहाद्यावरणशून्यान् इति हननेन सोकार्यं हे वनौकस इति वा कामरूपी सर्पव्याघ्रादिरूपी हि हेतो यतो हंति
अतो नमस्यामः न्यासेमे इति पाठे गोगोपादीन् पीडयति चेत्यर्थः आत्मनो गवां च शर्मणे यद्वा आत्मनो याग गावः पित्रादीनां नमस्कारग्रहणमवतारांतरेण अपुत्रत्वान्न विरुद्धं अद्रिमहे ते गोपा
न प्रसादेशा हरिवंशे अद्यप्रभृति चेज्याहं गोषु चेदस्ति वो दया अहं वः प्रथमो देवः सर्वकामकरः शुभः येच मामाश्रिता गोपा नंदगोपपुरोगमाः एषां प्रीतः प्रयच्छामि गोपानां बहुलं धनं पर्याप्तु
येति विप्राणां गावो वत्ससमाकुला इत्यादि ३७ चास्कृद्दवप्रणादिता इति तदुपदेशानुपक्रमोचितं यथायथावत् सहकृष्णा इति स तद्धि योगसहमानास्तेन सहैव गोवर्द्धने शाणकोणस्थराधा-
कुंडश्रीकुंडोपरि स्थिते व्रजं ययुरित्यर्थः इत्थं देवतानिराकरणेन कर्मप्राधान्यं स्थापितं तस्यायमभिप्रायः योहं कृष्णः परमेश्वरः स एवैषां पुत्रादिरूपोस्मि अतः को नामैषामीश्वरः कोवान्यो दे-
वता प्रवर्तकस्तु मत्प्रेममयः स्वभाव एवस्याज्जीविकापि मदिच्छाधीन सत्वादिगुणैरेव यदि च नरत्नीत्वया देवतास्वीकारस्तर्हि मत्प्रियागोवर्धनादय एव मदादिदोषहीनत्वादुपादेया नि-
ष्प्रादय इति ३८ इति श्रीमद्भागवतदशमस्कंधवर्तनः अध्यायो गाश्चतुर्विंशस्तोषिणीसारसंग्रहे ॥ इति दशमे चतुर्विंशोऽध्यायः २४ स्वमखभंगकुपितेंद्रकृतमहावृष्टितो गोकुल रक्षणा-
र्थं गोवर्धनोद्धरणाद्भुतचरितमाह इंद्र इत्यादिना तदेंद्रः स्वपूजां विहतां बुध्वा यागमध्यमन्यत्र व्ययात् विज्ञाय साक्षात् हस्तात् कृष्णनाथेभ्यस्तत्रापि गोपेभ्यः व्रजवासिभ्यस्तत्रापि नंदादिभ्यः इति
कोपमहातिशयः हस्फुटं स इति पाठे परमदुर्बुद्धिरित्यर्थः १ अंतः प्रलयस्तत्कारिणं अतः सांवर्तकं नाम अप्यर्थे चः यद्वा चाह्वातानां गणप्रकर्षेण गर्वोक्त्या प्रोत्साहनादिना प्रेषयामास उतेग-
हार्थकाप्यर्थः देवोऽपि अहमेवेशा इति गर्व वाचैदं वाक्यं चाहेति २ कानने नौकसामिति निकृष्टत्वं गोपानामित्युक्तत्वं च ममहेलनमिति व कव्ये देवे स्फुटं देवत्वेन मर्त्यात्स्वभा हास्य प्रसि-
द्धिं व्यंजनया यामर्त्यांशेन मर्त्यमाश्रयणायोग्यतार्थं च देवदेवे मयि देवबुद्धिमपि न चक्रुरिति भावः वस्तुतस्तु वनवासेन गोपत्वेन च सात्विकत्वं श्रिया भक्तिलक्ष्म्या मदः स्वर्गोपवर्गानादररूपो
वर्गस्तेन माहात्म्यं सकलं वैद्यत्वं अहो आश्चर्यकरं कृष्णं परब्रह्मापि भक्तवात्सल्यात् मनुष्यरूपं अतस्तमाश्रित्य देवहेलनं च चक्रुरिति युक्तमेवेति ३ अदृढैः क्षय्यफलैः यतः कर्ममयैः अ-
तः एव नाममात्रेण यानावस्तच्चूल्यैः आन्वीक्षिकीमात्मविद्यां हित्वा यथा तितीर्षंति तथा कृष्णमाश्रित्याप्रियं मे चक्रुरित्युत्तरेणान्वयः अयोग्याचरणं शोद्दृष्टांतः यद्वा तथा मोहित्वा कृष्णमा-
श्रयेण नयादिति तितीर्षंति इति वाक्यशेषः क्रोधभरान्योक्तिः तत्वार्थस्तु यथा भक्ताः कर्मभिः सहान्वीक्षिकीं हित्वा केवलं कृष्णमाश्रयेण भवाब्धिं तितीर्षंतीति ४ वाचालं बहुभाषि-
णं देवतादिखंडनेन कर्मस्थापनात् बालिशं शिशुं पंडितमन्यं अतस्तं गोपानि कृष्णा अपि मैत्री लोकीशस्यापि एवं दुर्मदो व्यंजितः स्तब्धः स्त्यर्थस्तु वाचालं पर्याप्तं शास्त्रयोनिं बा-

भाग ३७ कृष्ण

लिङ्गो शिशुवच्चिरामिमानं स्तब्धं वंद्यासावात् अस्तं नास्ति तो यस्मात् पंडितमानिनं ब्रह्मविल्लक्ष्मको मानोस्ति यत्र तमित्यर्थः ४ हंससदानंदं ० परं ब्रह्मन् तथापि मर्त्यं न कवात्सल्यंतम जुष्यतया मा
तमिति ५ एवं गोपानां दोषं तेषु स्वरोषं च व्यञ्जयन् समाह एषामिति श्रिया पश्वादिसंपत्त्या अंतर्मत्तानां कृष्णेन हेतुकर्त्रा अध्मापितः स्फुरितः देहो येषामिति वा स्तब्धमदनिमित्तं श्रीमदं गर्व
चापनयतो मदहेलनप्रश्नवृत्तमाचायन तत्वार्थस्तु नक्तिलक्ष्म्या वलिप्तानां समृद्धानोलिप उपदेहधमनं सतेजस्कीकरणं उज्वलितचित्तानामित्यर्थः नक्तिलक्ष्म्या मदः भुक्तिमुक्तयेना
दरहेतुर्गर्वः स एव स्तंभो नितिश्रन्त्वात् तं धुनुत व्लिहारा सस्यादिसंपच्या चाल्पयतत्त्वादिव्लध्या पश्चून्वा स्तंभयनयत लोगासंपादयंतु इति भावः ६ नीतान्प्रत्याह अहं चेति सोहाख्यार्थं
अनुअनंतरं मेवागमिष्यामि देवैः सह जिघांसया जिगमिषयेति तत्वार्थः ७ यपत्नया पेक्षया बद्धास्ते मुक्तबंधाः संतः आसारैः धारासंपातैः ८ स्तनयित्नुभिः अशनीभिर्गर्जितैः मरुतां समूहैः
प्रेरिताः तत्वानिशार्करा करकाश्च ९ स्थूणास्थंभाः इव स्थूलाः प्लाव्यमानाः सति भूः नादृश्यत न तोन्नतं च स्थलं नादृश्यत १० शीतकंपः शीतार्ता इति सर्वेषां विशेषणं पशून्नामादावुक्तिर्बे
हिस्थत्वात् ततो गोपानां गोप्यपक्षयोर्बहिस्थित्वात् एतस्मात्यति सर्वं गोवर्द्धनोद्धरणादिना व्रजजनप्रेमवर्धनाय श्रीमद्रस्यानर्थहेतुत्वज्ञापनाय च ११ प्रच्छाद्य सेन छादयित्वा पादक
थ भूपाययुः अत्यंतनिकटं प्राप्ताः १२ हे कृष्ण सर्वदुःखाकर्षक आर्त्या वीप्सा हे अस्माकं महाभाग्यरूप नो अस्माकं गोकुलं गवां कुलं यद्वा व्रजं त्रातुं अर्हसि नोस्माश्चेति वा देवाद्विंद्रात् नामा
ग्रहणपापबुध्या देवात्तत्रापि कुपितात् त्रातुं त्वमेव योग्यः यतः प्रभो हे सर्वशक्तियुक्त ननु देवपराभवो नोचित स्तत्राहुः हे भक्तवत्सलेति भक्तार्थं तवाकृत्यं न किंचिदित्यर्थः १३ शिलाव
र्षयुक्तेनातिवातेन निपातेनेति किंचित् अचेतनं मूर्छितप्रायं गोकुलमिति प्रकरणात् विज्ञापनारूपं मेवेंद्रस्य कृतं कृति मेनज्ञातवान् १४ पश्चात्स्वगणमुवाचेत्याह अपेत्यादि पंचकेन
अपगत ऋतुर्यस्मिन् तत् अतिशायितो वातो यस्मिन् तत् शिलाप्रचुरं वर्षं वर्षति करोतीत्यर्थः तपस्तपतीतिवत् अस्माभिरिति बहुत्वं पित्राद्यपेक्षया स्वप्रौढिव्यंजनाय वा नोऽत्राय गोष्ठस्य
तत्वतस्तु निजमद्रस्येव १५ प्रतिकानी ते नत्राति प्रतिविधिं प्रतिकारं स्वसामर्थ्येन साधयिष्यामि तेन च मोहयाकृयमेवलोकेशा इति मानिनां श्रीमदाख्यं तमो हरिष्ये बहुत्वं दंडेनान्येषामपि श्री
मदाख्यादिसाम्राज्येन १६ मदहरणे हेतुमाह नहीति ह्रियतः सुराणामीशोहमिति विस्मयो गर्वैः नोपकल्पते योग्यो न भवति यतः सद्भावः सत्वं तद्युक्तानां अतः श्रीमदेनासतां तेषां मत्तो मा
नभंगो हिताय उपकल्पते १७ यस्मान्मच्छायं योवर्षति तत्र च प्रतिविधिः संप्रत्येवकार्यस्तेन च तन्मोहरणीयं तस्मादहमेवेदं गोष्ठं गोपायिष्यामि किंच सोयं मत्कृ गोपनरूपो मत्कृतः नियमः व्रतं हि य
तः विहितएवेत्यर्थः कीदृशं अहमेव शरणं रक्षिता यस्य किंच मम परिग्रहं कुटुंबं अत्र कृत्ये नापि रक्ष्यमित्यर्थः यद्वा अहमेव परिग्रहः पुत्रधनादि सर्वं यस्य मदेकप्रियमित्यर्थः १८ इत्युक्ते
पि महामेघारं भे एव गिरिसमीपे सर्वानयनेगम्यते एकेनवामेन करेणाच्छित्वा अवलंकथमपि लीलयानायासेन यद्वा कहिहस्तन्यासादि लीलया तथैव प्राचीनमूर्तिदर्शनात् बा
लकोछित्रीं दमिवेति बाल्यानतिक्रमेणेत्यर्थः सेनावना याह विष्णुरिति छत्रमित्यपि पाठः अत्रगिरेरुन्नतादितदिछयाज्ञातमितिज्ञेयं सच्छणः संगता मध्ये गिरिः सव्येन पाणिना गृहत्वाव
गतस्तत्र गृहाकारेण वर्चसा आप्लुतो यं गिरिः पक्षेरिति विद्याधरोरगाः गंधर्वाप्सरसश्चैव वाचोमुंचेत सर्वश इति हरिवंशोक्तेः धारणेनायासप्रदर्शनेन च व्रजजनानां सुखार्थं अन्यथा श्रीकृ
का ष्णैकसुखापेक्षाणां तेषां स्वप्राणादिनाशेनापि महादुःखापत्तेरिति १९ अंबेत्यादौ संबोधनं स्नेहविशेषेण पुत्रदुःखशंकया चिंताकुलायाः सांत्वनाय च ततस्तातेति नंदप्रवेशोसत्येव व्रजजनप्र
वेशात् यथोपजोषं यथासुखं यथा व्रजे वासस्तथैवेति भावः ननु मच्छ्रयोजनविस्तारं तावद्द्विगुणमायतमिति व्रजविस्तारोक्तेः कथं गिरिगर्ते व्रजो मातिस्म मैवंगतेस्य महत्वापादनात्
शैलोत्पाटननभूरेषा महती निर्मिता मया त्रैलोक्यमप्यसहेहं रक्षितुं किंपुनर्व्रजमिति हरिवंशोक्तेः गर्तेपर्वतोत्पाटन भूतां गं गावः धनानि गावश्च धनानि चेति वा २० निपातनं प
तनं स्वार्थेणिच् यद्वा इंद्रादिनापातनं तस्मात् त्रासो वः युष्माभिः कर्तरि षष्ठी कर्तुं योग्यो न हि यतो द्रिधारणेन नरस्त्राणं विहितं मयेति शेषः यद्वा गोवर्द्धनार्चनादिभिर्युष्माभिरित्यर्थः २१
तथाश्रुद्धिभिर्लिलयागिरिधारणेन च भगवता सांत्विते चित्ताः धनानि गवादयः प्रजाः शकटादयः उपजीविनो भृत्यपुरोहितादयः २२ क्षुधादिदुःखं शयनादिसुखापेक्षां च हित्वावि
स्मत्यतेस्तद्वीक्षणैकसुखैर्वः विस्मयेन प्रेम्णा वीक्ष्यमाण इति सुखादित्यागे हेतुः प्रयोजनं च तद्वीक्षणं च तदुत्साहवर्द्धनादिना धारणे सहायमिवाभूदिति विष्णुपुराणे यद्वाहि हेतिश्री
कृष्णैकदैवकंते यं यदास्थानात् २३ योगः स्वाभाविकशक्तिविशेषः निशाम्य दृष्ट्वा संकल्पो गोकुलजिघांसा लक्षणः स्वानुमरुद्गणान्मेघांश्च अनिवारणेनस्वान्निष्फलोपात्ताभियेति भावः २४
निरभ्यस्वमेव दृष्ट्वा उपारतवातवर्षं इति स्वयमेवोक्तेः दर्शनं च यथास्मत्लौकिकवात्सल्य २५ हे गोपा इति भवद्भिर्दिति गवा रक्षा कृता ते श्लेषेण तदेवनदीनाबुकप्राय च
चलच्छज्वलानां भगवत्प्रतापस्य वर्पणमायः शोषणात् अन्यथा प्रलयमेघैः सर्वविप्लुवापत्तेः २६ ततस्तदा वयानंतरं ते भगवद्गीकारेण जितेंद्रास्तदेक जीवनाश्चेत्यर्थः श्री

कटेरुढं उपकरणं घनादि यथा तथास्त्यादयश्च ज्ञानैर्निर्ययुः २७ त्वर्थेऽपिः स्वस्थान एव नान्यत्र पूर्ववदेव नवैपरीत्येन यतः प्रभुः अत एव लीलया भन एव कृतानां अजस्थानादि विष्ठानां च विस्मयानन्द
न्यायं पश्यतां सप्तम्यर्थे षष्ठी २८ भगवतां सर्वेषां संगतिं प्रेमोद्रेकाद्वृत्तभेदेन गायन्निवाह तमिति रक्षार्थं धृत्वादि यद्यपि यं प्रकटितैश्वर्यमपि सर्वे व्रजजना आलिंगनादिति ध्यायथोचितं मिलितवं
तः यतः प्रेमोद्रेकेण निरूढताः पूर्णाः आदिना शीर्वाद मूर्धाघ्राण वामबाहुमर्दन श्रमदुःखाभवप्रश्नादयः सस्नेहं तं यद्वा सस्नेहं यथा तथा सती राशिषः दुद्धानूमधिशिष्यान्न पाल्यस सर्वा च धि
पतिर्भव निज्ञानानन्दये याद्याः २९ पश्चात् स्थितानां मात्रादीनां संगतिमाह यशोदेति बलीनावरइति मूर्ध्नि भवं धनुस्तस्यापि गिरिधारणसामर्थ्यं व्यज्यते तत्रोपलक्षितस्तेन तल्लीला दर्शनोत्सुक
क्येन यद्वागाढालिंगनं व्यज्यते तेन स्नेहातिशयः प्रभावज्ञानं च अतस्तत्कीर्त्यर्थं पूर्वे साहाय्यमपि न चक्रे आशिषः एवमेव चिरं पालयस्व खीभवेत्याद्याः कातरा अधीराः अत एव क्वचित् प्राचीन गिरिधरस्व
तौ मातृत्वान नवनीतादिदानैर्पिञ्छादिभिश्च गिर्यवष्टम्भो दस्यते ३० एवं देवा अपि जलदं पुरिस्याह दिवीतीदाभ्यां तुष्टाहृष्टाः दुर्मदतो कृत्य प्रवृत्तेन्द्रमदभंगेन नाभिनवलीलादर्शनेन च हर्षः हे पार्थिवेति राजा
श्रयेण देशाद्याधिकायेन पेक्षावत् भगवदाश्रयेण नशाक्राने पेक्षा णादि दुष्टं मे युक्तो हर्ष इति भावः ३१ दिवीति पुनरुक्तिरिन्द्रभया भावाद्दिव्यवतेस्तत्तदाचरणबाधनार्था ३२ पूर्ववद्गोष्ठप्रवेशमा
ह ततइति गिरिस्थानात् परिश्रितो व्रजतः स घ्नत गिरिः स्वगोष्ठमिति क्वचित् हरिः शाक्रमदघ्नातिहरः गिरिधारणलीलया सर्वमनोहरश्च गोपिनां सर्वाधिकैस्तरवं ज्ञानमित्याह तथेति हृदिस्पृशः हृ
द्यस्यास्य गायंस्य इति तदेव गीतिकरणशक्तिर्व्यंजिता ३३ ॥ इति श्रीमद्भागवते दशमस्कंधसंश्रयः अध्यायः पंचविंशोयं तोषिणीसारसंग्रहे ॥ इति पंचविंशोध्यायः २५ एवं शक्रपरिभा … श्वकैमे
श्वर्यं दृष्ट्वा गोपवृद्धाः श्रीकामाने देनगर्गोक्तिमाश्राव्य निरसनास्य सर्वस्थितं प्रेमविवृद्धमिति ज्ञापनाय तत्र संगत्रमने एवमित्यादिना एवंविधान्यलौकिकानि नतस्य वीर्येणैश्वर्यं अनुसंदधाति यतस्तत्र
तिस्निग्धत्वेन प्रसिद्धाः अतः सुविस्मिताः संतः समभ्येत्य नत्यादि पूर्ववन्नंदमभिगम्य यद्वा मिथः संभूय प्रेमपर्यवसायि ऊचुः १ यद्रूचुः स्तदाह बालेति अप्यर्थे चकारः वेइति क्वचित् बालकस्यापीत्यर्थः आत्म
नोऽनुयुक्तं निंदायस्मात्तत ग्राम्येषु गो येषु जुसावीति पारोक्ष्योक्तिः स तदाच नंगतेत्येयः २ बालकस्तत्र सप्तवर्षः तत्रापि एकेनैव करेण न परिस्रस्यापि करांतरेण तत्रापि गिरिश्रेष्ठं तत्रापि लीलया कथं बिभर्ति स्थितः योजा
लः सइत्यध्याहृत्यान्वयः पुष्पकरोपमया सौदर्यं अतो लौकिकबालानेति भावः ३ तत्कृतत्वेन पूर्वसंदिग्धानि पूतनावधादीन्यधुना गिरिधारणं दृष्ट्वा तत्कृतान्येवेति निश्चयाहुः तोकेनेति नवतिः अमीलिताक्षेण त्यतिबाल्ये
महोजसः महाबलायाः पानप्रकारस्य दुर्बोधत्वे दृष्टांतः कालेनेति तत्रोर्वयः आयुः कालेन यथापीयते कथमित्यनुवर्तते एवमग्रेपि ४ अनसोऽजः शयानस्य मासस्य मासान् भूतः त्रीन् मासान्व्याप्य ल … सताकस्येत्य
र्थः वृतेकशेषात् मासत्रयप्राप्तमधीष्ट इत्यधिकारे मासाद्वयस्य यत्ख इति यत् त्रैमासिकस्य च पदेतिद्वितीयोक्तिः ऊर्ध्वं चरणो हि न्यतः चाल यतः पादाग्रेण षण्ड्कृतं विपर्यस्तमनः कथमपतत् रुदत इति अतिबाल्यं व्यज्यते ५
यः हस्ताक्षीनः चलितुमपि नशक्त इति भावः स दैत्येन नीयमाणः स्कंधे ग्रहणमात्रेणातुरं कृत्वा कथमहन् ६ ध… चित्… चिदिति अग्रेप्यनुवर्तते बाहुभ्यां तदा ग्राभ्यां करान्यामित्यर्थः गच्छन् रिंगन् ७ सरामो
बालकैर्वृतइति तेषु सत्सु अपि सएवापाद्धर्यं इति शान्यतिशयः ८ मुखतो हंतु … मं बकचेपं अरिंस्वस्य … धं … दोर्भ्यां मुखतोकथमपातयत् अत्र वत्सबकवधलीलाव्यक्तमोक्तिर्व्यामनधा
नुक्तिश्च विस्मयाक्रांतत्वात् ९ लीलयाहत्वा कपित्थानि चेति महावृक्षाग्रे निक्षेपाच्छक्तिविशेषः ९ बलान्वित इति धेनुकवधे पि श्रीकृष्णस्यैव प्राधान्योक्तिर्बलस्यापि बलं ततस्मादेवेति व्यंजनाय क्षेमसर्वो
पभोग्यं १० घातयित्वेतितस्यैव प्रयोजकत्वोक्त्या मुख्यत्वं तत्प्रभावलब्धवशालिनेति तेनैव घातने हेतुः ११ आशीविषतमः अतिक्रूरविषः स चासावहीन्द्रश्च विमर्दसं तं हृदाद्दुद्धास्य १२ किंच दुस्त्यज
श्चेति ते तनयत वैवत नयइति विचारितेपि त्यनुमशक्यः यतः क्रोत्पत्तिकः स्वाभाविकः अहो नवत्वति संदरे तस्मिन्न्तस्मा केतस्याप्यसमा स्वयोग्ये पि जन्मादि न मारस्य कथमिति किमयं सर्वेषामात्मास्यादि
स्केत्रेक्षा मिथो देहदेहिनोरिवेत्यर्थः १३ उक्तमप्यतिविस्मयेन सापिनयमाहुः क्वेति बालत्वमहाद्रिधारणे नत्वद्रिधारणे च बालत्वं नेति एकस्मिन्विधा विरुद्धधर्मद्वयालंशयो जायते किमयंबालः किंचापर
मविलक्षणो देवादिरिति १४ भगवान्वेवायं साक्षादवतीर्ण इति व्यक्तमुक्ते भयगौरवादिना स्नेह भरहानिस्यादिति गर्गेणसाक्षादनुक्ता ऐश्वर्य व्यंजकाक्षराणि तेरेव दशा स्वाभाविक गुणशालिता प्रति
पादकतयानिश्चिते गोपान्बोधयन्नाह श्रूयतामिति गर्गमुखाच्छ्रुततत्प्रभावस्य मम वचः अर्भक इति स्वीयं बालत्वं निश्चयं व्यंजयति यद्वा वो युष्माकं बालके इति स्नेहं वर्धयति परोक्षेप्येन्नमित्युक्तिः हृदि संश्रि
धानात् मे कुमारमिति पुनस्तथैवोक्तिर्निश्चयदार्ढ्याय हृव्यक्तं हृहर्षेवा १५ गर्गोक्तिमेवानाह वर्णा इत्यादिना न विस्मयं इत्यं तेन अत्र पूर्वोक्तैः प्रकटार्थोनुसंधेयः किंतु चरमपद्ये पूर्वं तस्मान्नंदात्मजा
यं ते गोपाय स्वस्माहित इति प्रथमं चतुर्थपादे इत्युतस्मान्नंदकुमारोयमिति प्रथमः पादः तत्कर्मस्वनविस्मय इति चतुर्थ इति वैलक्षण्य … सर्वेषां साधारण्येन ममतायोगो पाइतव्य तायाश्च व्यंजनाय हेनं
दत्वायं कुमारः नंदस्य तत्कुमार इति श्लिष्टोक्तिः नारायणस्यैवास्य कर्मसु विस्मयो न कार्यः आश्चर्यं मत्वा रक्षणऔदासिन्यं न कार्यमिति तासर्वेश्च किंच कर्म स्वित्स्वरूपलक्षणं कृत्वा स्वाभाविकप्रेम　　रुधम

विषयत्वाश्रयत्वयोरपि विस्मयो न कार्य इति व्यंग्यं गर्गवाक्यं तैः पूर्वं ज्ञातमेव बककवधानंतरं तद्वचनात् तथापीदानीं समग्रतया श्राविनमिति विशेषः १६ १७ १८ १९ २० २१ २२ ततश्चारभ्यते नारायणोपम
मेवाहं मन्य इत्याह इतीति मन्ये नर्मामि २३ गर्गस्य गीतं यस्मिन् तेन नंदवचः श्रुत्वा आसीनं नंदं यश्च आह्वानादागतं श्रीकृष्णं च चंदनवस्त्रभूषादिभिरानर्चुः यत्तु गोवर्द्धनोद्धारणं दृष्ट्वा बालक्रीडेयमतुल्या गोपालत्वं
जुगुप्सितं दिव्यं च कर्म भवतः किमेतत्त्वं कथ्यतां सत्यं सत्यं हरेः पादौ शपामो मितविक्रम यथा त्वद्वीर्यमालोक्य मत्वा मन्यामहे नरं देवो वा दानवो वा त्वं यक्षो गंधर्व एव वा इत्यादि साक्षाद्देवा गोपाः श्रीकृ
ष्णमूचुः स च किंचित्प्रणयकुपितः सन् मत्संबंधेन वो गोपाय दि लज्जा न जायते श्लाघ्यो हं वा ततः किं वो विचारेण प्रयोजनं नाहं देवो न गंधर्वो न यक्षो न च दानवः अहं वो बांधवो जातो नातश्चिंत्यमतोन्यथेति प्रस्फ
वाचेति विष्णुपुराणेउक्तं यद्यहं भवतां श्लाघ्यो बांधवो देवसप्रभः परिज्ञानेन किं कार्यं यद्येषोनुग्रहो मम मति आदि हरिवंशेप्युक्तं श्रुत्वोत्कंठ्येन तन्मुखादेव श्रोतुं दर्शयितुं च पश्चात्तेमनोचुरित्यविरोधाय कल्प्य २४
अथ गोवर्द्धनोद्धरणं सपरिकरमनुस्मरन् बाढं प्रियमाणस्तां प्रीतिमेव सर्वपुरुषार्थाधिकामनुभवन् तां च भगवत्प्रीत्यनुगृहीतामेवास्वादवंतीं ज्ञात्वा तां प्रीतिं प्रार्थयते देव इति तत्र देवेव र्षतीति इतिश्च प्रतिकार्य
त्वं तत्रापि यज्ञविप्लवेन यारुष्टं तयेत्यतिशयः स्वरूपतोतिशयमाह वज्रेति परुषवर्षेति पाठो अशनिकरकातीव्रवायुभिः सीदंतः पाल्याः पशवः स्त्रियश्च यस्मिन् तत्रापि आत्मा स्वयमेव शरणं यस्य तत् तत्रा
पि दृक्पातसाक्षाद्दालोक्य अतोनुकंपी भूत्मिम त्वथश्यः एवंरूपावेवस्येपि शोयेमाह उत्स्मयन् किंचित्स्मयन्नेव शैलमुत्पाट्य तत्रापि अबलोबलो लीलापद्मं इव मुत्सिल्लीध्रं यथा एककरेण बिभ्रत् सप्ताहोरात्रान् दध
तगोष्ठमपात् ररक्ष सहर्षमाह महेंद्रमदभिदिति उत्तराध्यायार्थं स्मरति गवामिंद्र इति एवं भूतः श्रीकृष्णो नः प्रियादिस्याशीर्लिंड्‌ श्रुतिश्चात्र भवति जज्ञान एव व्यबाधत स्पृधः प्रापश्यद्वीरो अभिपौंस्यं रणम् अ
वः श्वदद्रिमवसस्यदः सृजदस्तभ्नान्नाकं स्वपस्यया पृथुमिति अस्यार्थः वीरः श्रीकृष्णो जज्ञानो जातमात्र एव स्पृधः स्पर्धमानान् दैत्यान् व्यबाधत पीडितवान् अभिपौंस्यं पौरुषयोग्यं रणं प्रापत्र यत् चकारेति
यावत् किंच नाकं स्वर्गस्थं मेघवातादिचक्रं अवास्तभ्नात् संस्तब्धं निहतं चक्रे कथं तदाह सस्यदः सवेगः सह सेवेत्यर्थः गोवर्धनाद्रिं स्वपस्यया शोभनकर्मेच्छया अवश्च्यत उत्साह्य धृतवान् तं पृथुगवादिरक्ष
णाय महांतं सृजन् कुर्वन् नुम भाव आर्षः यद्वा अस्तृजतस्तब्धवान् अडभावो बहुलं छंदस्यमाङ्योगेपीति स्मृत्वात् २५ इति श्रीमद्भागवत दशमस्कंधसंश्रयः षड्विंशतितमो ध्यायः स्तोषिणी सारसंग्रहे।
इति दशमे पंचविंशोध्यायः २५ सप्तविंशे स्फुरभीद्रकृतं श्रीकृष्णाभिषेकोत्सवं वक्तुं तया गोशागमनं तावदाह गोवर्धन इति गाः वर्धयतीति तस्मिन् इति व्यक्तिनो गवामनिष्टं नाभूत् प्रस्फुतत्क्षणादिसंपत्त्यासमृद्धिरेव
तिव्यज्यते इंद्रस्य सुरभ्या सह गमनं श्रीकृष्णस्य गोप्रियत्वात् ब्रह्मणा चोदितावयमितिवक्ष्यमाणात् ब्रह्मसंमंत्रितः शक्रो गोलोके गत्वा तया सह ब्रह्मा तया गत इति ज्ञेयं चोप्यर्थे कृतागस्त्वादागमनासंभवेप्यनन्य
गतित्वादागत इत्यर्थः एवशब्देन शक्रस्य वाहनादिपरिवारस्यागोबोध्यते ब्रह्मादिदेवमातृणामभिषेकार्थमागतानामपि अतिसंघट्टभिया दूरे स्थितत्वात् सदर्शोपविष्टं गोवर्धनशिलातले तस्योपविष्टस्य
सुखपक्षाभ्यां पक्षिपुंगवः अंतर्धानगतश्छायां चकारोरगभोजन इत्यादि हरिवंशाद्धे १ विविक्त इति अत्रैमक दागमनव्यवहाराभावात् एकांते क्षमापनोचित्याच्च भगवतो नमसि दूरतः शक्रेद्रक्षा
केनापि व्यज्ञेन रहस्यागमनं ज्ञेयं कृतदुरुन्त्याद्यवलोतो ब्रीडितोपि त्वं एकाकी दीनो भूत्वा प्रथमं मिस्त्वे तिस्फुरभिप्रेरणयाउपेत्य किरीटेन पस्पर्शेति दंडवत्प्रणामः अर्कवर्चसेति तस्यादयोजितस्य शोभा कृ
अस्य श्रीकृष्णस्य गोवर्द्धनोद्धरणेन दृष्टः ब्रह्मादिमुखतः श्रुतः अनुभावो येन अमिततेजोस्येति अर्कतुल्यकिरीटादितेजोयुक्तोपीद्रोर्ककोटयधिकतेजसस्तस्याग्रे खद्योत इव जात इति सूच्यते अतः सद्यो नष्टश्र
लोके शोह मिति मदोयस्यसः ३ अपराधिन्यपि स्वस्मिन्नुखप्रसत्त्वा कोपाभावं निश्चित्याश्चर्यतः क्षमयितु मीशस्यास्माकं कोपानघटते वयंतु संसारिणोनित्या पराधिन एवेत्याह विशुद्धेति तव धाम यमूर्तिः वि
शुद्धसत्वं शाडाशारहित स्वप्रकाशरूपमित्यर्थः तपोमयं ज्ञानं प्रचुरं यस्य ज्ञानमयं तपद्तिश्रुतेः शांतं प्रकरूपं यतो ध्वस्तानि अविद्यमानानि विक्षेपावरणहेतू रजस्तमसी कस्कख हेतू प्राकृतसत्वं च यत्र सत्ता
दृयोनसंतीशो यत्र च प्राकृतगुणा इत्यादि विष्णुपुराणात् अतएवायं ते कारुण्यादिगुणानां प्रवाहः परं परमायामयोन विद्यते यतः अहं पान तत्स्वीकारमात्रेणैवानुबध्यते से बध्यते न तु पाधिवशादित्यर्थः ४ अतः
कैमुतिकन्यायेनाह कुतइति यदा गुणा मायामया न भवंति तदा तद्धेतवः मायाहेतुका दोषास्तव कुतः यतः हे ईश मायानियंतः नन्वज्ञकूटागानल्लभरवासहनादिनामधिते दृश्यंते तत्राह दातदिति येवुधर्लिंग
भावाः भक्तानां महात्म्यख्यापकाः तत्कृदत्तजनादात्मकालोभादयस्तेतु न तत्कृता मायाकृताः कुतो न किंतु कृपाकृता इत्यर्थः पत्रंपुष्पं फलं तोयमित्यादेः अस्त्रवंलोभः कृपाकृतः क्रोधस्तु न तथा दुःखकरत्वा
तत्राहुः अथापीति धर्मगुप्त्ये यः खल निग्रहस्तस्मै क्रोधेन कृनो दंडोपि धार्मिकतापादनाय पुत्रे इव कृपाकृत एवेति भावः तथापीति किंचित्त्वमित्यादिवाच्यस्त्वे भगवान्त्रिभतर्शितपरोक्षोक्तिः तेयमोरवादि
ना इच्छा मन्युर्लोभाद्य इति चित्स्फुरवपाठः ५ अतो मद्धितमेव कृतमित्याह पितेति जगतां जनकः उपदेष्टा नियंता चेति दंडहेतवः कालइति दंडसामर्थ्यं अतः कल्याणाय स्वेच्छावतारैः समीहसे लीलास्त
नोषि तवलीलैवमानिनोनामान भूतनमित्यर्थः ६ एतदुपादयति यइति मादृशा अज्ञा अतो जगदीशमानिनस्ते भयकालेपि अभयत्वां वीक्ष्य जगदीशा इति मदं हित्वा हितमाह आर्येति त्वत्कृतरूपं
सन्मार्गं भजंति अतस्त्वल्लीला भक्तानेदायोपि मादृशां खलानामपि शिक्षारूपा भवतीत्यर्थः क्षमापयति प्रभो हे क्षमासमर्थ अथ अतो हेतोः कृतागसोपि मे क्षंतुं योग्योसि यतः स्वन्महात्म्यमविदुषः तत्कुतः

राम ३९

मूढचेतसः विचारहीनस्य यतः ऐश्वर्यमदव्याप्तस्य. यद्वा प्रभावं ज्ञात्वापि कृतागसः कुतः मूढचेतसः विस्मृतप्रभावस्य ऐश्वर्यमत्तस्य किंच दयालोरस्मदारस्यागः क्षणं किं यत् किंतु त्वयि त्वदी
येषु नैवं पुनः स्यात् तथा कुर्वित्याह मैवमिति एवं महागसां जननी अतो सती नन्वैश्वर्यसती कथमेवं मतिर्न स्यात् तत्राह ईशात्वयात था कर्तुं शक्यत इति भावः ८ महानयमपराधः कथं क्षंतव्यस्तत्राह त
वेति हे अधोक्षज ऐन्द्रियकज्ञानागोचरे स्य इत्यतोक्ता इह भुवि स्वयं भाराणां पुनश्च बहूनां भाराणां जन्म येभ्यस्तेषां भवाय नाशाय भक्तानां तु मंगलाय हे देव ममापि पूज्य सेवकस्य मम महापराधो
पिक्षंतव्यमिति भावः सुखमदिति बहुत्वे नक्तसंग्रहाय ९ नमनं नक्षमापयति नम इतिद्वाभ्यां भगवते परेशाय तत्रापि कृष्णाय सर्वैश्वर्याविष्कारेण चित्ताकर्षकाय तुभ्यं नमः पुरुषांतर्यामिणे महात्मने
अपरिछिन्नाय सर्वनिवासाय लीलया तु यदूनां पतये १० यतः स्वेच्छया तत्तद्भक्तसमीपे प्रकटितदेहाय देहानां तत्त्वबोधयन्नाह विशुद्धाः मायातीताः स्वप्रकाशज्ञानरूपा देहा यस्य मायया सर्वस्मै ज
गद्रूपाय यतः सर्वकारणाय अतएव सर्वे स्वतात्मने इति ११ किंचापराधिन्यप्यनुग्रहः सर्वतो महान् विशेष इत्याह मयेति सार्धेन मया स्वयमेव गोष्ठस्य नाशाय स्य कृत्यं आसारवायुभिरिदं चेष्टितं कृतं
यतो मानिना अतएव तीव्रमन्युना हे भगवन् सर्वेशेति मद्दुष्टता ज्ञायत एव किंच्छेन मया विस्ताय मिति भावः १२ हे ईशानियंतः सद्यो दंडकर्तुत्वे समर्थस्त्वं भाप्यनुगृहीतोस्म्येवेत्यर्थः अनुग्रहमाह ध्व
स्तस्तंभः हतोद्यमश्च व्रूतः अतो गुरुं त्वामेव महापराध्यहं शरणं गतः यत ईश्वरं आत्मानं अनन्यगतित्वादि भावः १३ संकीर्तितस्तुतः भगवान् प्रहस्येति अपराधिनि तस्मिन् अनभिनिवेशो व्यज्यते अतएव
प्रहसन्निति १४ इंद्रेण स्वाशाय निवेदिते श्रीकृष्णोपि तथेत्याह मयेति अनुग्रहतैव न तु क्रुध्यता इंद्र श्रिया देवराज्येन नित्यं मुहुर्मत्स्मृतये १५ प्रभुत्वेन संपादाच मदः तेनांधः भक्तान्प्रति गोपाचितयच्छि
पाणित्वाद्दशान्प्रति तु तयैव यथ्यां दंडपाणिमपि न पश्यति अतोयमनुगृहीतुमिच्छामि तस्य संपत्तीर्हरामि त्वां तु संपद्वियोगासहिष्णुं दृष्ट्वा नतादृशमप्यकार्षं किं तु मखभंगमेवेति भावः १६ ननु ममापिता दृशा
मेवानुग्रहं कुरु मयात्रैव स्थीयते तत्राह गम्यतामिति भद्रमस्त्विति भयदानं तत्रगत ऐश्वर्ये णागः स्या देवतत्राह क्रियतामिति स्वशीक्षितमेवाह स्थीयतामिति स्वस्यैव न परस्य तत्रापि युक्तैरप्रमत्तैः भक्तिमद्भि
र्वीतत्रापि निर्मदैः नायं वरदानरूपोनुग्रहः पुनः पारिजातहरणादेः मदादिदर्शनात् किंतु शीक्षारूप इति तत्त्वं १७ अथानंतरमिंद्रे प्रसादं ज्ञात्वा सतानैर्गोभिरुपलक्षिता अभिवंद्य स्कृति एवं कमाह वक्ष्यमाणार्थं
निवेदितवती नेद्यातिकिंचित् किंचोपामंत्र्य संबोधनेरवधानं प्रार्थ्याह निवेदने हेतुः गोपति स्कृतो हेतुः ईश्वरं इंद्रेणानीता तत्सायाः कथं नो वाच तत्राह मनस्विनी धीरचित्ता तस्य सर्वहितकारितां स्वस्यवि
शेषतां निवेदनीयं चालोच्यादौ नोवाचेत्यर्थः १८ गोपत्यनइशात्वेन संबोध्यत्वयानाथेन वयं पूर्णाः इत्याह कृष्णेति गोपत्वव्यंजकं महायोगिन्नणिमादियोगेश्वर विश्वात्मन् विश्वरूप अतोहे विश्वसंभव
तत्कारणविश्वभावनेत्यपि पाठः इतीशात्वं लोके नोध्यमानमात्रेण भवता वयमेव तु सनाथा इति स्वधन्यतोक्ता अच्युतेति नित्यता १९ त्वं नः परमकं दैवं देवता अतो न इंद्रस्त्वमेव भव हे जगत्पते त्वं पीतिभा
वः गवेंद्रत्वेपि द्विजाद्यभ्युदयसिद्धिः गोभ्यो यज्ञाः प्रवर्तंते गोभ्यो देवाः समुत्थिताः इत्यादि गोस्तुक्तात् २० तत्प्रकारं विज्ञापयति इंद्रमिति नः इंद्रं संतमेवाधुना लोकेव्यापनाया भिषेक्ष्यामि नन्वभिषेकोब्रह्मणा क्रि
यते तत्राह ब्रह्मणेति ब्रह्मप्रार्थनापीयमिति भावः ब्रह्मा कुतो नागतस्तत्राह वयमिति गवेंद्रत्वाभिषेके अस्माकमेवाधिकार इति भावः बहुत्वमपराधिनमिंद्रं तदीयांश्च संगृह्णाति तथा चेंद्रस्य महापराधं दृ
ष्ट्वा ब्रह्मणः सांशंकत्वं व्यज्यते ननु गोपस्कृते मयि ब्रह्मप्रेरणाप्यविचार्यैव स्यादित्याशंक्य मास्मान्प्रतारयेत्याह अवतीर्ण इति विश्वात्मन्निति भारापनोदने हेतुः २१ एवमिति युग्मकं उपामंत्र्य स्वीयं इत्यां
गीकाराय प्रार्थ्य भगवता साक्षादकृते स्वीकारे मौनं संमतिलक्षणमिति न्यायेन स्वयमेवाभ्यषिंचत् ऐरावतकरेण रत्नकुंभादिद्वारानीतैः एवं वांछितसर्वतीर्थलाभः गजद्वाराभिषेकविधिश्च संपन्नः २२ दे
वैर्मातृभिश्च गवामिंद्रो गोविंदः एषोदरादित्यासाधुः २३ ततश्च महोत्सवो वृत्त इत्याह तत्रेति त्रिभिः शक्रकुंडमिति गोविंदकुंडमिति च प्रसिद्धे गोवर्धनप्रदेशे आगताः सर्वत्र हेतुः मुदान्विताः इति नारदश्चो
यं पार्षद नारदस्यां गंधर्वे भ्रुवतार रूपा यथा विनितास्कृतो नित्यपार्षद गरुडस्येति तत्त्वं मल्लतकृतो मोक्षाभिलाषपर्यंतं दोषमपहंतीति २४ देवसंघे पुके नव रवव वरुणाद्याः गावो गां भुवं पयोद्भुतामार्द्रामन
यन्नकुर्वत् २५ नानारसौघाः क्षीरादिवाहिन्यः अकृष्टपच्या ओषधयो ब्रीह्याद्या आसन् सद्गुरुकुसंधिवर्जा आर्षैः मणीन् बहिः प्रकटान बिभरुः २६ स्वाभाविक दोषा अपि नष्टा इत्याह कृष्णइति क्रूरा
णि परस्पर हिंसोपेराण्यपि अहिनकुलादीनि विवास सर्वभूगतान्यपि अभिषेककाले मित्राणीवा नवन्नित्यर्थः २७ सः अपराध्यपि स्वीकृतोपचारः गोगोकुलपतिं संतमपि गवेंद्रत्वेन स्वहितार्थमेवा
भिषिच्य तदेवाह गोविंदेनानुज्ञातः सन् पूर्ववत् तदपराधितया त्यक्तोपि पुनर्देवादिभिर्वृतः स्वीकृतो हृत्वा दिवं ययाविति २८ इति श्रीमद्भागवत दशमस्कंधसंश्रितः अध्यायः सप्तविंशो यं तोषिणी सार
संग्रहे १ इति भागवते दशमे सप्तविंशोध्यायः २७ ऐश्वर्यमदस्यानर्थहेतुताप्रदर्शनप्रसंगाद्वरुणस्यापि नंदनयनरूपमपराधं ततो नंदानयनं ततो गोपानां स्वलोकदर्शनं चवकुं तत्प्रस्ताव
माह एकादश्यामित्यादिना निराहारः सम्यक् यथाविधि जागरादिसहितं चाभितो र्चयित्वेति महाभागवतत्वे भक्तेरघैते अनल्पतया भक्त्यर्थं नित्यं याच्यते सदृति कृतार्थस्यापि तस्य तथार्च
नेहेतुः द्वादश्यां पारणाहेतव तनकाले इत्यर्थः तुरेवार्थे अन्येद्युः ह एव सस्कृरिति भावः एवं नंदस्य यमुनास्नाननियमो व्यज्यते १ असुरइति वैष्णवधर्मीत्तत्वं स्वल्पद्वादश्यां पारणाद

तोगन्तो॰ ३९

कृष्ण ३९

श्रीगणेशाय नमः ॥ श्रीपांडुरंगार्पणमस्तु ॥ भुजमाश्रये हं मूढत्वदुःखदमनं भयशोकहर्तृ सच्चित्सुखं विबुधवृंदनुतं वरेण्यं यस्य प्रसादलवभाक्‌ स्वकृतार्थपात्रं १ कतिननिबंधाः स्फुरिय श्रद्धाः कुर्वे यथा करिष्यंति य
१ दुःखुमहाद्युकेचन सत्कृपाचरं तितं हरिं वंदे २ स्वाधिकारमनालोच्य सक्तं तेन सहृद्युग्महं प्रवृत्तं मंथरत्वेन क्षमंतां तद्बुधा मम ३ अजगमनाय भगवतो यो विघ्नः पूर्वं सूचितस्तमिह कथयति जरासंधस्यागमनमथसैन्य
सहितस्य ४ अस्तिरित्यादिना आर्तेर्व्यग्रेन समर्पितुः स्वपितुरिति पाठो १ दुःखितेन तद्व्यंजकरोदनादियुक्तेन २ कंसे शोकः क्रुद्धेममर्षस्ताभ्यां युतः नृपः सम्राट्‌ नृपेति किंचित्‌ अयादवीमित्यत्र अ॰ यः भ्रुव देवतेनादवी दुष्ट
तारतापश्चन्यां महीमितिवाक्‌ देवी वदतीति भाति ३ अक्षौहिणीमितिरिति खबाणाग्निनवव्योमचंद्र १०९३५० संख्याः पदातयः खेंदुषट्‌द्वारपट्‌ ६५६१० संख्याश्वानागरथा अपि खाद्रिनागेंदुदस्रसं
ख्या २१८७० इत्येषाक्षौहिणी समस्तेति न्यरुणत्‌ रुरोध सर्वतो दिशामित्यस्य विशेषो हरिवंशे कालिंगबाल्हिककारुशाद्याः पूर्वपश्चिमदिक्‌द्वारं रुरुधुः रुक्मिविंदानुविंददंतवक्त्रविदुरविविंशबाण हरिश्च
वस्त्रिगर्तप्रमुखा उत्तरद्वारं एकलव्यजयद्रथशाल्यकौरवकेकयाद्याः पूर्वद्वारं चेदिपतिजरासंधाद्या दक्षिणद्वारमिति ५ निरीक्ष्येति युग्मकं निर्मर्यादसागरमिव तस्य बलं सैन्यं तेन तद्बलेन संरुद्धं ५ तस्य दशस्य
कालस्य चानुरूपं स्वावतारप्रयोजनं चिंतयामास किं बलमेव हन्मि न मागधं किं वा समागधं सर्वमित्यचिंतयत्‌ ननु कथं जेष्यामीत्येवाशंकाचिंतायुक्ता तत्राह कारणं सर्वकारणं यत्तत्वं तद्रूप एव मानुषाकारो न तु प्रा
कृतरूप इति ६ एवं विचिंत्य प्रथमपक्षं निरूतवान्‌ तदाह चतुर्भिः तत्राहनिष्यामीति सार्धकं आहितमर्पितं भाररूपं वशानां वशे स्थितानां अत एव पांडवानां भाग्य नागत इति ७ तद्वादितिर्यो अक्षौहिण्यस्ताभिः संख्या
तं मागध इत्यर्धकं बलोद्यमं कर्ता करिष्यति ८ ननु तत एव जरासंधो हंतव्यस्तत्राह एतदिति एतच्छब्दार्थमाह भूभारहरणायेति तारोयं तारोहीति पाठो ९ अन्योपि किमुत सर्वैश्वर्यपूर्णो यं भीयते प्रकाश्यते प्रम
वत उद्भवतः १० एवमिति सार्धकं आकाशादूर्ध्वलोकात्‌ महावैकुंठात्‌ परिच्छेदो ध्वजकवचादि परिकरः ११ आयुधानि हलमुसलधनुर्द्वयगदाचक्राणि यदृच्छया नयनादिप्रयत्नं विनैव दृक्षेत्यर्धकं हृषी
केशः सर्वप्रेरको पि संकर्षणं दृष्ट्वेव सर्वेनाशक्षममपि लीलाकौतुकावेशेन सयुक्तिकं बभाषे १२ पस्यार्थं धेहि त्वमवनरक्षकाय येषां तेषां त्वं तः आत्वमार्ष यद्वा त्वस्मद्वशानां युष्मदस्मदोः साहस्येव तु क्वितिकं
दसवार्तिकात्‌ आ सर्वनाम्न इत्यात्वं यद्वा त्वान्यान वतामपीति भाति यदीतानीति स्वतः सामर्थ्ये प्यंगीकारवस्यकत्वं १३ स्वकृतं निर्णयमाह यानमिति एतत्सैन्यं जहि हे इत्रोति प्रोत्साहनं १४ सैन्यहननमेवा
वश्यकमित्याहार्धकेन त्रयोविंशतिः त्रयोविंशत्यक्षौहिणीकमनीकं सैन्यमित्याख्यायस्यतं तारं १५ इंशितो बहुकवचिनो सैन्यस्याल्पीयस्त्वादाक्षेशो भुवि भ्रमनुर्दिक्षु वेष्टितो स्वैर्निजजनैरायुधैः संपन्नो १५
हरिः शंखध्वानेन शत्रुवीर्यहर्ता दारुकसारथ्युपलक्षितदिव्यरथादिसंपत्तिमान्‌ विष्णुत्रासेनेव पृथुः कंपो भूत्‌ १६ श्रीकृष्णं साक्षात्कालरूपं मत्वा तेन सह युद्धं परिहर्तुमाह तानीति सार्धेन पुरुषाधम यस्मा
त्पुरुषोत्तममिति वास्तवोर्थः बालेनेकेन बालकेनेवेति पाठो रामतोन्यकेन वयस्केनेत्यर्थः १७ गुप्तेनेत्यर्धकं कंसभयेन गोकुलनिवासात्‌ मंद अमंदकुलः हे बंधुहन्‌ अतो धर्मयुद्धादितोपसर वस्तुतस्तु गुप्तेन सर्वो
तरत्वाद्रक्षयेन हे अमंद बध्नातीति बंधुः अविद्यातांहतीति याहि प्राप्नुहि १८ तवेति त्वंचेतिपाठेत्यर्थश्च श्रद्धायुद्धेच्छा यदीति मद्भयान्न भवितेव यदि कथंचित्स्यादित्यर्थः स्थैर्यं धैर्यमिति पाठो नाहिद्वयेनो तवनच
पलायस्वेत्यर्थः जयस्यानैकांतिकतो स्वत्वाह यद्वा मां जहीति वास्तवोर्थस्तु यदि श्रद्धेति क्षुद्रेणमया सह नस्यादेव महाग्येन यदि स्यात्तर्हि धैर्यमुद्वह मां प्रतिप्राप्य त्वदग्नेममाधीरत्वात्‌ चार्थे वा इश्वरोहि
मच्छरच्छिन्नदेहं त्यक्त्वा मत्स्वरूपं प्रदर्शी मां जहि स्वर्गं प्राप्य बलदं गेछेदकरणान्तरकोमाभूत्‌ यद्वा स्वर्गे पि मां प्राप्नुहि स्वर्गे पि त्वामेव प्राप्नुमिच्छामि न विषयानीत्यर्थो भाति १९ युद्धं तं प्रवर्तयितुं व्यकार्थ
माश्रिस्योत्तरमाह नेति न श्लाघते न च त्वद्धरुत्त्याक्षस्यामइत्याह नेति आतुरोवा तादृशो षाकुलस्तत्रापि मरिष्यस्त्वं लत्यस्य च चोनवस्तुबुध्याग्र [illegible] णह्मः कुतः कापं कुर्माः २० अत्रेत्यु कउवाचेतिध्वाचित्‌ जरे
ति माधवो मधुवंशाभवो सैन्यसमूहेनावृतवान्‌ वायुरभ्रैः सूर्यमिव रेणुभिश्चाग्निमिव तस्य दर्शनमात्रमावरणमिति भावः २१ सुपर्णेति तत्तद्ध्वजस्याप्यदर्शने पुरस्यात्तालिके [illegible] गोपवर्युक्तनगृहं हर्म्यमुक्त्वा प्रा
सादगोपुरं चेति द्वैद्वैक्यं तद्वारुद्धा अपि अलक्ष्य यंत्योलक्षणेरप्यतर्क्यं यथः अर्दिताश्चार्पिता इति पाठो मुमुहुः यतः स्त्रियः २२ हरिरिति परसैन्यान्येव पयोमुचो मेघास्तेषां शीलीमुखा बाणास्तेषामस्रं लवणव
र्षणत्रासितं वीक्ष्य व्यस्फूर्जयत्‌ सटंकारमाकृष्य नमितवान्‌ २३ ततः अय यद्वदलातचक्रं ज्वलत्काष्ठं भ्रमणे यथा चक्रवद्दृश्यते तद्वदेव हरिः सर्वत्राहश्यतेतिशेषः किंकुर्वन्‌ विषंगादिषुधेः शारान्‌ गृह्णन्‌
अथानंतरं तत्क्षणमेवतानूर्गुणे संध्रत्‌ तत्क्षणमेव गुणमाकृष्य मुंचन्‌ अथ सितवाणदृगान्‌ रथादीश्चनिघ्नन्‌ २४ निर्भिन्नकुंभानीत्यादिना तत्तद्योग्यस्थाने षुभेदच्छेदादिप्रदर्शनेन विशेषउच्यत इति ननिघ्नन्ति
त्यादिना पुनरुक्तिः स्रुताश्च नायका रथिनश्च २५ संछिद्येति सार्धद्वयकं छिद्यमानानां पदातिगजाश्वानामंगेभ्यः प्रसृतारुधिरनद्यः प्रवर्तिता इत्यनन्वयः भगवतेतिशेषः प्रसीदन्नदीरूपकमाह भुजा एवाहयो यासु
पुरुषशीर्षाणि कच्छपायासु हताद्विपा एव द्वीपानि जत्वानितस्तद्वानि हया एव ग्राहास्तेव्याप्ताः २६ करोरव एव मीना यासु मनुष्यकेशाः शैवलं यासु धनुस्तरंगे रायुधवरुपैर्गुल्मैरप्रकांडवृक्षैः ० श्च व्याप्ताः अ
भूरिका अत्रकाणि तेरवावर्तैर्भयानकाः महामणिप्रवेकाः श्रेष्ठामणय आभरणानि चाश्मनः शर्कराश्च यासु भीरूणां भयावहाः मनस्विनां परस्परं हर्षकरीरानंदप्रदाः २७ विनिघ्नतेति सार्धकं संकर्षणेनापि तद्ब
लेक्षयं प्रणीतं अंग हे राजन्‌ अर्णववत्‌ दुर्गमं भयंकरं च दुरंतपारं दुरितिनिषेधे नास्ति अंतस्तल्लं परो वधिश्च यस्य विक्रमेणागाधं देशतो निरवधिकमित्यर्थः रामकृष्णयोस्तदुक्तं कर्मपरं केवलं विक्रीडि
तंलीलामात्रं ननु पराक्रमः यतो वसुदेवपुत्रयोरपि जगदीशयोः २८ नचैतदाश्चर्यमित्याह स्थितीति स्थितेः प्रथमोक्तिस्तत्साक्षात्लीलात्वात्‌ यइति द्वयोरेक्याभिप्रायेण स्वलीलयैव नसाधनप्रयासैः स्व
पदेन तस्यास्वाक्षुद्धं चित्रमाश्चर्यं हेतुर्न तर्हि किमाश्चर्यमिव वर्ण्यते तत्राह तथापीति मर्त्याननुविधत्तेनुकरोति यस्मादृशास्त्रलौकिककर्माणि नरलीलयैव करोति न त्वैश्वर्याविष्करणेन तस्येत्यर्थः ३० अतोन्यता
दृशांतद्वरितं श्रृण्वित्याह जग्राहेति हतसैन्यं चतमवशिष्टप्राणमात्रं च सिंहः सिंहमिवेति मर्त्यानुविधनयासाम्यं महाबलो महाबलमिति पाठो ३१ अत्यंतापमानार्थं मानुषपाशैरपि बध्यमानं हता

रा. म.
१

बहुशो रातयो येन तमपि तेन हननार्थं रूपाकरं सैन्यं मेलयितुं न्यवारयत् राज्ञा संबंधी चायमतः सापराधमप्येनं मुंचेत्येवं रामाज्ञातवानित्यर्थः २२ स इति युग्मकं लोकनाथाभ्यामिति लोकहितार्थमेनेति भावः वीरसंमतो तो बं
धनेतत्रापि मोचने व्रीडितः बाल्यैः पराजितोहमतः क्षात्रधर्मे न करिष्य तपसैव देहं त्यक्ष्यामीत्येवं कृतसंकल्पः तपोवनमार्गे वारितः २३ राज्ञो युक्तमेव मुरक्तो धर्मीनत्वज्ञया त्याज्यस्तपस्तु वार्धक एवेत्येवं धर्मोपदेशपराणि पदानि येषु
तैः युद्धे कदाचित्पराजयोपि तेन निर्वेदो नोचित इत्यादिभिरिति परे श्रवलौकिकैश्च तत्र स्वकर्मेति लौकिकन्यायोक्तिः बंधतश्चापि बंधनप्राप्त इति पाठो अल्पके महतस्तु पराभवः कर्ममूलक एव न तु वीर्याद्यभावमूल इति न लज्जितव्यमिति २४
हते षितिति त्रिकं बृहद्रथस्य चक्रवर्तिनः सुतो जरासंधो तोभिमानीत यादुः खितमनाः २५ मुकुंदो मागधमोचकः कृष्णोपि प्रस्तुद्यतैः माथुरैरभिसंगम्यमानो विति पूर्वेणान्वयः मथुरामिति शेषः अस्त्रादिभिर्नक्षनमपि सैन्यं यस्य प्र
वीक्त युद्ध प्राविण्यादिति भावः साधुसाध्वीत्यनुमोदितः २६ २७ शंखेति युग्मकं प्रभोतां पुरं प्रविशति सती शंखवाद्ययोने दुः अनेकशः इति सर्वैर्योज्यं २८ कथंभूतां पुरं सिक्तमार्गा वेदघोषेणादितां उत्सवेनासर्वतो बद्धतोरणां २९
निचीयमानो विकीर्यमाणः प्रविवेशेति विपरीणामेनानुषंगः पौरेण युग्मकं वा ३० वीराणां भूषणं गात्रालंकरणं अनेन तं संख्यया भूतत्वेन चानिरूप्यं प्रभूतमहे भवानपेक्षः ३१ तावत्यः त्रयोविंशति संख्याः अक्षौहिण्यः सैन्यं
यस्य सः पुंबद्भाव आर्षः एवमिति रताः दृशं युद्धं तपस्कृद्याम स्योक्तः ३२ कृष्णाय एव क्षयं निन्युः न तु श्रीकृष्णो रामो वा कृष्णेति तस्य संनिधिमात्रात्ते घाते जीवद्धिर्वन्हे रिव ज्वालानामित्यर्थः अरिभिर्मुक्तः यद्वारिभिर्ह
तेषु भगवता मुक्तो यातिस्म ३३ अथ दशसंगना मे भाव्येत मध्येकाले यवनः माथुराणां सहसैव हर्षितो विषयो भूत् प्रेषितः प्रेरित इति पाठो ३४ आत्मतुल्यान्नारदाद्देवश्रुत्वा ३५ मर्त्यानुविधतयाचिंतया दहा इति खेदं वृ
जिनं दुःखं उभयतो यवनाज्जरासंधाच्च ३६ तदाहद्वाभ्यां महाबलः इतोपसर्तुमप्यशक्यमिति भावः अद्यवेत्याद्यनिश्चयोक्तिर्मत्यानुविधत्वाद्देव ३७ आवयोः सगणयोरिति शेषः अस्थानेन यवनेन ते ग्रामवध्यत्व
माश्रयाह अथवेति ३८ अद्यैव विधास्यामः घातयामहे इत्यन्यकर्त्रपेक्षारुद्रवरपालनार्थं ३९ समुद्रस्यांतर्दुर्गं तन्मध्ये द्वादशयोजनं नगरं बहिश्चाष्टदशयोजनं एवं त्रिंशद्योजनं द्वारकापुरं चतुर्हस्तं धनुःप्रोक्तं ध
नुर्द्विसहस्रकः क्रोशः क्रोशौ तु गव्यूतिर्गव्यूतिद्वे तु योजनं ४० कृत्स्नमपि वस्तु अद्भुतं यत्र अचीकरत विश्वकर्मणा कारितवान् ५० कृत्स्नाद्भुतत्वं दर्शयति चतुर्भिः त्वष्टा विश्वकर्मा तदीयं शिल्पविज्ञानं शि
ल्पनैपुण्यं हस्तक्रिया कौशलं च सर्वोत्कृष्टं विभाव्यते अग्रतोरथ्या राजमार्गाः पश्चिमतो वीथ्या उपमार्गाः उभयतश्चत्वराणि गृहांगणानि गृहादिनिर्माणरीतिमनतिक्रम्य निर्मितं ५१ सुशां घ्रं द्रुमालता आश्रयेषु तानि उद्यानो
निउपवनानि च पुष्पफलप्रधानानि तैरन्वितं हेमनः शृंगाणि येषां तैः दिविस्पृग्भिः रत्नच्छेः स्फटिकाद्युपरीतन भूमिका गोपुराणि द्वाराणि च तैर्निमृगं तमिति परेणान्वयः ५२ रजतं च आरकूटं पीतलो हं च तद्विकारैः कोष्ठैर
श्व शाला न शालादिभिः कीदृशैः कोष्ठैः हेमकुंभालंकृतैः तथा रत्नकूटैः पद्मरागादिशिखरैः मरकतमयानि स्थलानि येषु तैर्हेमैः सौवर्णगृहैर्निर्मितं ५३ वास्तोष्पतीनां देवानां गृहैः बलिभिश्चंद्रशालिकाभिः यदुदेवाः श्रेष्ठाः
श्रिकृष्णरामवसुदेवोग्रसेनास्ते पां गृहैः शोभमानं अत्रैवं रचना परितस्तावत्समुद्रः तदभ्यंतरे तीरसकखवि हारार्थं परितश्चत्वराणि तदंतर्दुर्गप्राचीराणि तस्य मध्यमरत्नकूटाः तदुपरि हेमशिखराणि तदुपरि हेमकुंभाः दुर्गं चतु
र्दिक्षु गोपुराणि तदुपरिस्पाटिकाभित्तिमयाट्टालिकाः दुर्गातः पुनश्चत्वराणि तत उद्यानोपवने तत्र वापीकूपादि तदंतः सूत्रास्त्याः तदंतर्यथासंनिधिश्चान्तगृहाद्याः तदंतरग्रे विप्राणां गृहाः पश्चाच्छूद्राणां वामेवैश्या
नां दक्षिणे क्षत्रियाणां मध्येसुधर्मागमेकृत्वा श्रीकृष्णादिचतुर्गृहागृहमध्ये मरकतस्थल्यः उपरिबेलनी हेमकुंभादय इति ५४ सुधर्मामिति युग्मकं पारिजातं च प्राहिणोदिति परिक्षित्संवादात्सूर्येभावित्वादूत
निर्देशः तत्र पक्षे त्यक्तवानित्यर्थः यद्वान्न्यूनगुणं पारिजातमर्पितवान् भौमवधप्रसंगे तु हरिर्मुख्यं तं हृतवानिति ज्ञेयं हरेर्हरये अन्यथा बलाद्धरिष्यतीति विभाव्येति भावः मर्त्यधर्मैः क्षुत्पिपासादिभिः ५५ निधिपतिः
कुबेरः अष्टौ कोशान्निधीन् अन्येपि लोकपाला निजविभूतीः ५६ अन्ये च सिद्धादयो यद्यदाधिपत्यं स्वाधिकारसिद्धये दत्तमासीत्तत्सर्वं प्रत्यर्पयामासुः ५७ योगोचित्येश्वर्यतत्प्रभावेण तदुक्तं पाद्मे सूक्ष्मान् मथु
रायां तु पौरांस्तत्र जनार्दनः उद्धृत्य सहसा रात्रौ द्वारकायां न्यवेशयत् प्रबुद्धास्ते जनाः सर्वे पुत्रदारसमन्विताः हेमहर्म्यतले विष्टा विस्मयं परमं ययुरिति त्वमत्र स्थित्वा पुरं पालय अहं तु मुचुकुंदेन यादवेरवध्यमेनं घात
यिष्यामीति रामेण सह मंत्रः संजातोस्य सर्वज्ञेनं हरिः स्वान् भगवान् हरिरिति पाठो प्रजापालेन मथुरामित्येति पाठो पद्ममालावत्तं नारदोक्तलक्षणापेक्षया निरायुधत्वं पालयन मननार्थं ५८ इति श्रीमद्भागवत दशमस्कं
धसंश्रयः पंचाशोयं गमद्ध्याय स्तोषिणीसारसंग्रहे १ इति भागवते पंचाशोध्यायः ५० गार्ग्यः रूपालेन षंढ त्वमित्युक्तो यदुभिस्तदा हसिते कोपवान् विप्रो महादेवमतोषयत् १ रुद्राद्वरं लब्धवान् स पुत्रं यादव
भीषणं अपुत्रयवनेंद्रेणार्थितो गार्ग्यो वरं स्मृत इत्ते तत्क्षेत्रे कालयवनमजीजनदुतः प्रभुः हरिर्म्लेच्छाद्द्रव गिरं पालनाया पलायत तं विलोक्येति षट्कमिदं पुरद्वाराद्विनिष्क्रांतं उद्गच्छं तं चंद्रमिवेत्यादिना श्रीकृष्णमाधुर्य
वर्णनं स्वप्रेमत एव न तु यवनानुभवाभिप्रायं नाहं प्रकाशः सर्वस्येति गीतोक्तेः तथा सति वैरासंभवाच्च यथा कद्रुमल्लादि प्रियाजनादुग्ध सितादि माधुर्यं नानुमोदंत इति तन्माधुर्यं ग्रहणाभासएवैवं तामसा भगवन्माधुर्यं प
श्यंतोपि न पश्यंतीत्यहो चित्रमिति भावः १ चतुर्बाहुमिति नारदोपदेशानुसारात् तेन तथोपदेशाच्च विलक्षणलिंगेन श्रीप्रनिश्चितोत्स्वयमिति अरुणेक्षणमिति अव्यक्तरागस्त्वरुण इत्यमरः २ प्रमुदितमित्यादिनी मुखार
विंदविशेषणानि सुकपोलशुचिस्मितं सुस्फुरदित्यादि चागसौष्ठवविलासर्वेषाणामुपलक्षणं ३ वासुदेव इति सार्धकं षट्कं वांतरमन्वितं इति एतैर्लक्षणैर्वासुदेव एवायं भवितुमर्हति नान्यः ४ अयं च निरायुधः अतोह
मपि पद्भ्यां चलन्निरायुधमेव योत्स्यामि ५ इति वासुदेव इत्यादिना निरायुध इत्यादिना चोक्तप्रकारेण निश्चित्य पराङ्मुखं प्राद्रवंतमन्वधावन्नित्यन्वयः दुरापमपि जिघृक्षुरित्युपहास्यत्वं ६ हस्तप्राप्तमिवात्मानं पदे
पदे दर्शयता दूरे नीत इति पलायनचातुर्यं ७ तथाप्यप्राप्य वीक्ष्य स्थिरीकर्तुं परुषमिवाह पलायनमिति क्षिपन् कुपालं कुर्वन् वस्तुतस्तु इदं तव पलायनेन न भवति किंतु युद्धकुलेजातस्य यादवावध्यत्वरूपमहेशाव
रं पालयतो विधांतरेण शत्रुपराभवं चिकीर्षतस्तवोचितं संप्रतियोग्यमेवेदमिति क्षिपन् द्रुतं गंतुं प्रेरयन् इत्यर्थो जाति नहतमशुभं भगवत्स्पर्शनसंभाषणादिलाभप्रतिबंधकं दुरितं यस्य मुक्तिप्रतिबंधकं स्वशुभं त द
र्शनादेव नष्टं मल्लेभकंसयवनाकुजपौंड्रकाद्या इत्यादिना तन्मुक्तेरुक्तत्वात् किंतु यथा व्रजेश्वरी पश्चाद्धावंती तं प्राप न त्वयं हतः अशुभत्वात्तेधायनेनं प्रापेति भावः ८ भगवान् गुहां शायी मुचुकुंदप्रभावज्ञत्या

ना ग. ६.३ १

छ. ६ म

दिसर्वतः प्राविशत् प्रविश्य मुचुकुंदशिरःप्रदेशेऽतिष्ठदिति हरिवंशात् सेयं ॥ अन्यमेव ददर्श ननु तत्रैवास्थितं भगवंतं ९ ननु वितर्के तं शयानमच्युतं मत्वा ननु दृष्टचतुर्भुजत्वादिरूपादिलक्षण्यं दृष्ट्वाप्यच्युतं कथममन्यत तत्रा
ह रूढः क्रोध इत्यत तद्विचारः केवलं तताडनादच्युतधियाताडनेऽधिकोपराधः संवृत इत्यतिरूढ इत्युक्त्वं व्यजितं १० शनैरिति बलान्निद्राभंगेन घूर्णिताभ्यामेः ११ यावद्दक्षीतावदेन दृष्टिपातेन संदीप्तो यस्तद्देहजोग्निस्तेन तस्येति
तस्य महापुरुषस्य क्रोधदृष्ट्यैव दग्धोवरस्त्वल्पलक्षणमिति शुकाचार्यमतं वरप्रभावादेव दग्ध इति पराशरादिमतं १२ यवनमर्दयति हि न त्विति स कोनाम किंजातिः किंनामा चेत्यर्थः कस्य वंशः कस्य वीर्यपुत्रः किंजातिः प्रभावोस्य १३
संगरो युद्धं प्रतिज्ञा वा १४ चिरं कतिचिच्चतुर्युगानि १५ गुहं कार्त्तिकेयं सेनापतिं लब्ध्वा दुःखरूपान् १६ कामा विषयाः उद्भिन्नतागता इत्यर्थः १७ अमात्यमंत्रिणोरवांतरभेदः कल्प्यः त्वत्तुल्यकान्तीनाः कालीया इति किं
चित् कालिताः कालेन चालिताः १८ मत्प्रजाः कः कालयेत् तत्राहुः काल इति भगवानिति तच्छक्तित्वेन तद्भेदः ईश्वरो नियंता कालयते न्यत्र नयति किमर्थं तत्राह क्रीडन् तादृश्यैव तत्क्रीडेत्यर्थः पशुपाल इति स्वा
छंदे दृष्टांतः १९ तस्य कैवल्यस्येश्वरः प्रदाता असंख्येभ्यः स्वस्वरूपमोक्षदानेप्यव्ययः २० स्वपंतमिति पद्यं विशीनमसंलग्नं चेतितोविशि तथापि निद्रया देवदत्तयेति वक्ष्यमाणस्वरसादेवं संयोज्यमितीति तर्हि श्री
विष्णुदर्शनमेव भवहराद्दस्त्वत्र्यांतस्य ममतपत्राद्यशक्तेः किंच तद्दर्शनपर्यंतमन्यदर्शनाभावाय निद्रैवास्त्विति तत्राशयं ज्ञात्वा वरं विना तस्य भक्त्येव विष्णुदर्शनं निश्चित्याहुः स्वपंतमिति हरिवंशे तु सुप्तस्य बोधयेद्यो
मामित्यादिना स्पष्टमेव वरप्रार्थनमुक्तं २१ महायशा इति कैवल्यप्रदं विष्णुं श्रुत्वा तद्दर्शने यावन्मथुरां तिके निस्स्वीकारेण यशोविस्तारकः देवैस्तदनुमोदनात्सा निद्रा देवदत्तेति उक्तश्लोकविशानपक्षयोजना त
छ्यन गुहां तु मथुरामंडलस्य दक्षिणसीमायां धवलपुरगिरिमध्ये प्रसिद्धा २२ नभ्यकनिष्ठत्वात् प्रशस्तधिये २३ पलायितेपि यथास्थितेव प्राग्वर्णितत्वेनेति सूचयन् मुचुकुंदभाग्यप्रशंसागर्भं पुनर्वर्णयति तमि
ति चतुष्कोण विराजितमिति शुद्धाभूषणांतरापेक्षया २४ पूर्वोक्तापन्नमात्त्वैव पादेत्वविल्वेन वनमालेति यवनदृष्टतयोक्ता संप्रति मुचुकुंदं प्रति गर्यायनुसारेण पंचवर्णपुष्पमयवैजयंतीत्वेन स्फुरदिति ज्ञेयं २५ अपी
च्यं सुंदरं वयो यस्य २६ तस्य तेजसा धर्षितः सन् दुर्धर्षं प्रवृद्धमपि दुःशंकं तं शनैरेवाप्रक्षत् शंकितः प्रथमं नानावितर्कवानित्यर्थः यतो महाबुद्धिः इवेति वाक्यालंकारे २७ विपिने वने तत्रापि गिरेर्गह्वरे दुष्प्रवेशस्थाने
तत्रापि उरुकंटके संप्राप्तेः तत्रापि पद्मपत्रसदृशाभ्यां पद्भ्यां विचरसीति २८ किमाक्षेपे स्वित् वितर्के तेजस्विनाम् अखिलानां पुंजीभूतं तेजः किमपि तु नेत्यर्थः एतदपेक्षया तेषामत्यल्पत्वादिति भावः एवमग्नेपि भगवान्
महाभूततेजोधिष्ठाताग्निर्देवोपि न त्वयि तनुत्वेन ततोपि श्रेष्ठः सूर्यः स्यादिति वितर्क्योत्पत्वेन खंडयति सूर्य इति तेषामतापहारित्वमनाल्हादित्वं चाशंक्य चंद्रं वितर्क्य खंडयति सोम इति प्रभावेणेंद्रं संभाव्य खंडयति
महेंद्र इति अतोन्यवितर्कमनास्थयाह लोकेति २९ तेभ्य ऊर्ध्वं विविच्याह मन्ये इति पुरुषर्षभं श्रीवासुदेवं गिरिगुहागह्वरे गुहयोर्ध्वांतितमो दुःखं च दीपः सर्वानुभूतत्वेन दृष्टांतितो न योग्यत्वेन ३० नरपुंगवे
ति रूपश्यादिमनुष्यलीलाभिप्रायं अव्यलीकं स्वप्रियं त्वज्जन्मादि शुश्रूषतां व्यलीकं त्वप्रियाकार्यं इति विश्वः वा समुच्चये यदीति विनयोक्तिः ३१ महत्तमे जन्मादिकथनं निर्बंधो नोचितः स्वस्यैवात्मजन्मादि
कथनीयं तत्प्रसंगात् स्वीयमपि कथये इत्याशयेनाह वयमिति बहुत्वं वंशाभिप्रायं क्षत्रबंधो नीच क्षत्रिया इति विनयात् तेषु अहं मुचुकुंद इति प्रोक्तः यौवनाश्वो मांधाता तत्सुतः ३२ अन्यदर्शनाभावादि
कं मुख्यहेतुं विनयेन गोपयन् बाल्यस्य शयने हेतुं वदन् निजकर्माह चिरेति नागर हेत्वकथनं विनयात् ३३ ननु वितर्के स्वस्य भाग्यदशां व्यंजयति अनंतरमिति श्रीमन्निति वा पाठः त्वयैव स्वशत्रुरसानेवं घातित इत्या
ह अमित्रं शास्तीति शासन इति कश्चित् ३४ तव तेजसा हतप्रभावा वयं भूरिद्युम्नमपि न शक्नुमः कुतो वक्तुं प्रष्टुं वेत्यर्थः प्रष्टुमित्यपि पाठः एतावत्तु ज्ञातमित्याह देहीनां ब्रह्मादीनामपि पूज्योसीति यतो हे महाभाग
लोकोत्तरभाग समूह शालीन् ३५ प्रवृद्धं सविलासं हासं कुर्वन् मेघेति स्वभावानुवादः ३६ तानि च सहस्राणि अनुसंख्यातुमपि ३७ कदाचित् कश्चिद्रजांस्यपि विममे विमीमीत तथापि मे जन्मानि न विमिमीत कीदृशा
नि गुणैः कर्मभिश्चाभिधानानि नामानि यत्र ३८ कालेति सार्धकं उपपन्नानि सिद्धानि कर्माणीति गुणनाम्नामुपलक्षणं परमोऽऋषयो वेदाः वेदांता अपीत्यर्थः मत्तः ऋणुधमात्रं न तु तत्त्वतो ज्ञातुमिच्छ ३९ विज्ञो
पित इति सार्धकं आद्ये जन्माह अवतीर्ण इति ४० नामाह वदंतीत्यर्धकेन ननु वसंति भूतानि यत्र स एवमिदं नाम पूर्वं प्रसिद्धमेव सत्यं किंतु प्रवृत्तिनिमित्तविशेषेणाधुनिकमित्येवाह वसुदेवसुतमिति हीति स
त्स्वप्यन्येषु तत्पुत्रेषु मय्येव तत्प्रसिद्धमित्यर्थः ४१ कर्माह कालनेमीति मयेति शेषः ४२ न च तद्वचनार्थमेवात्रागतोस्मि किंतु त्वत्कृपार्थमेवेत्याह स इति प्रचुरं यथा न तथा इष्टं याचितः ४३ हे राजर्षे राजन्नपेक्ष्य
याम्यांत्सर्वा नेवेति भावः प्रपन्नः शरणागतमात्रोपि किंपुनस्त्वादृशो भक्तः न भूय इति तुच्छो वरो न याच्य इति भावः ४४ अथ्या विशोचतुर्युगे भगवानवतरिष्यतीति वृद्धगर्गवाक्यं स्मरन् ४५ दुर्लभत्वञ्च भक्तिरेव व
रणार्हा न तुच्छा कामा इत्याशयेनाभुक्तानां कामासक्तिरूपं संसारं प्रपंचयन् स्तौति विमोहित इत्यादिना योषित्पुरुषश्चेति द्विविधोप्ययं जनः मायया मोहितः अतो नर्थदं कूप पुरुषार्थरूपां त्वद्भक्तिं न पश्यति अतस्त्व
द्भक्तिं न करोति किंतु दुःखानां प्रभवो येषु तेषु गृहसंबंधिषु पुत्रादिषु सक्तो भवति न च दुःखदर्शनेपि निर्विद्यते यतो वंचितः इत्यादिना प्रतारितः सा च माया त्वय्येव वारणीया न तत्र जनानां सामर्थ्यमित्याह त्वदीयये
ति तत्र हेतुः हे ईश मायानियंतः ४६ किंच कामस्फरं श्वादिष्वपि त्वद्भजनं तु न मानुषतनुं विनेति मानुषत्वं लब्ध्वापि त्वामभजन् दुर्मतिरित्याह लब्ध्वेति अत्र कर्मभूमौ अव्यंगं अविकलावयवं केचित्स्वर्गादिष्वप्येव
लब्ध्वा हे अनघ किंचित् भजनेपि सर्वदुःखनिवर्तकं पादारविंदं त्वदीयमिति विपरीणामेन पूर्वानुषंगः अयत्नतो प्रयासेन यद्भजनं तदपि न करोति यतो यथा पशुस्तथैव विवेकहीनमतिः अतो गृहमेवांधकूपस्तत्र पति
तश्च भवति ४७ ममत्वं तत्र विशेष इत्याह ममेति निष्फलत्वे हेतुः हे अजित मद्विधेन भक्तिहीनेनावशालूनेति भक्तिहीनत्वे हेतुः राज्येत्यादि अतो मर्त्ये शरीरे आत्मबुद्धिर्यस्य अत एवेदं मद्यमयालब्धमित्युक्तरीत्या दुरंता
पारा चिंता यस्य दुरवमंते पस्यास्तयास्तत्रादिष्वाप्यासज्जमानस्य ४८ उन्मत्तमदत्वं प्रपंचयति कलेवर इति घटादिसदृशेनात्मनि अगणयन् अनादीयमाणः एवं दुर्मदो भवं भेदश्रुतोक्षरदशातद्व्यासं पृथक्
जनः मुकुंद मुचुकुंदं मां स्वपदैक्यभक्तं कुरु ४९ दुरंतचिंतायाः परिणामं व्यंजयति प्रमत्तमिति उच्चैः प्रमत्तं त्वयि स्वस्वीयमरणदोचानवहितं अतः प्राप्तेषु विषयेषु प्रवृद्धलोभं भोगादनुपरतं अप्राप्तेषु

राम

लोत्तसंतदीप्ता भ्रराकुलं अंतयतिकालरूपेणेत्यंतकस्त्वमिति कालत्रान्त्य तेदोक्तिः सर्वतः समाप्रोषि क्षुधास्त्वग्विणीलेत्तिहानोहि मूषकमिवदष्वांते पि विशेषणानि समानि ५० मरणे चात्यंतं बीभत्सितं कलेवरं स्यादि २
त्याह पुरेति पश्चात्त् नासीत् स एव कलेवरः पुंस्त्वमार्ष तेतवप्रभावेण कालेनाभिपन्नः श्वादिभक्षितो विट्संज्ञः दग्धो भस्मसंज्ञितः अन्यथा कृमिसंज्ञितः ५१ कामिनो जीवनेपि सुखं नास्तीति द्वाभ्यां वदन्
आहेसाम्राज्येपि पराधीनता दुःखमाह निर्जित्येति अविद्यमानसंग्रामः सिंहासनस्थः सर्वैराजभिर्वंदितोपि च मिथुनी तावत्सुखमेव परं येषु योषितां गृहेषु क्रीडामृगाइवेतस्ततोनीयते योबिडिस्तद्दासी
भिरपि ५२ अतितृष्णाकुलस्य भोगावसरो नास्तीति इत्याह करोतीति तपसि अधःशायन ब्रह्मचर्यादौ स निष्ठितत्त्वान्निवृत्तभोगः भोगापेक्षया दाने ईव्यव्ययं कुर्वन् पुनश्च स्वराट् ईद्रः जन्मांतरे प्येवं म
वचक्रवर्त्तिवास्यामिति ५३ एवमष्टश्लोक्या बहिर्मुखानां संसारप्रपंच्य कष्टातन्निवृत्तिः स्यादित्यपेक्षायामाह भवेति भ्रमतः संसरतो जनस्य यर्हि सत्समागमो भवेत्तर्हि तवापवर्गः संसार निवृत्तिः
शीघ्रमेव भवेदित्यर्थः यतः सत्संगमो यर्हि तदेव त्वयि मतिर्जायते रतिरितिवापाठः हे अच्युतेति तत्रत्वमपि नच्युतो भवसीति भावः ननु मत्कृपां विना नसत्संग इति सेवनिदानमस्मृत त्राह संतएव गतिराश्र
यायस्य अहं भक्तपराधीन इत्युक्तेः सदिच्छये वत्वमपि दयसे इति भावः तत्रहेतुः परेषाम परेषां चेशज्ञानादिसाधनानधीने अतो मम मापि गर्गसंगमादेव त्वन्मति र्नवापवर्गदानुस्तवदर्शनं चेति भावः ५४ गर्गसंगा
दारभ्येव च मथित्वदनुग्रहोपलक्षित इत्याह मन्येइति ईशहे दुर्घटघटनापटो राज्यसंबंधस्यापगमो यस्मात्सोनुग्रहस्त्वयेवकृत इति तर्कयामि योनुग्रह एकांतनिष्ठयाऽरण्ये ऽहमि भिरपि प्रार्थ्यते किं पुनर्भारतरवं
हेकदेशपतिभिः तप्रसेवनं प्रनेष्टुमिच्छद्भिः यतः साधुभिर्विवेकिभिः ५५ अतः साक्षात्त्वत्पादचरणादन्यंवरं नकामये कुतः नास्ति किंचन मुक्तिपर्यंतमपि प्रार्थ्यं येषांतैरपि प्रार्थ्यतमात् प्रार्थ्या भक्तिः प्रार्थ्यत
रंदर्शनं प्रार्थ्यतमं साक्षात्पादसेवनं आराध्य प्राप्य अपवर्गो भक्तिः अपवर्गश्च भवति यो सो भगवति अनन्य भक्तियोगलक्षण इति पंचमस्कंधोक्तेः आर्यो विवेकी ५६ रजआदिगुणैरनुबध्यंते ता आ
शिषः फलानि विसृज्य सर्वत इति पादसेवनविरुद्धो मोक्षोपि निरस्तः तस्यापि ज्ञानहेतु सत्वगुणानुबंधनत्वात् सेवायास्तु नैर्गुण्य हेतुकत्वात् मत्सेवायांतु निर्गुणेति भगवदुक्तेः सर्वज्ञ इति पाठांतरं पर
पुरुषं स्वयं भगवंतं त्वा वृष्णाख्य शरणंयामि निर्गुणं प्रकृतिकार्य गुणातीतं भोतजंति गुणाः सर्वे साम्या संगो दयो गुणा इत्युक्तेः यतो निरंजनं उपाधिं विना स्वरूपेणैवैवं रूपतयास्थितं अतएव ज्ञप्तिमात्रं
चिद्घनं अद्वयं सजातीयादि भेदशून्यं यद्वा निरंजनं नितरां भक्तमनोरंजकं गुणान्योगो णान्यो निर्गतं सर्वप्रधानं समाधिकशून्य तीयशून्यमित्यादि सममन्यत ५७ अतो धुना कथमपि मामुपेक्षितुं नार्हसीति स
दैन्यं प्रार्थयते चिरमिति इह संसारे वृजिनैः पापभोगैरार्तः पुण्यभोगस्य येशोकैस्तप्यमानः न विगततृषाः षडमित्रा इंद्रियशत्रवो यस्य अतः कथंचिद्दय्यत्लब्ध्वाचित्तस्थैर्यः हे स्वाश्रयद त्वत्पदाब्जं प्राप्तो
हं नचवा व्यं भक्तिं कुरु ततः पातास्मीति यतस्तस्यामपि प्रवर्त्तकस्त्वमित्याह हे परात्मन् अतः त्वत्पादाब्जे महात्म्यानुरूपं पाहीत्याह अभयं सत्यमशोकं चेति पाहि सर्वकत्वेन पालयेत्यर्थः दैन्ये नाह आ
पन्नमाप ह्यापं हे ईश अत्र त्वमेव समर्थ इति भावः ५८ हे सार्वभौम मे सपि महाराज्ये विमलासंसारवासना शून्या ऊर्जिता रसवित्भावने प्रबला कामैः साम्राज्यादि मोक्षांतैर्न विहता किंतु भक्ता वेवसस्पृहेस्य
र्थः ५९ तत्र त्वलोभनं प्रमादाय विषयाभिमुख्याय नभवतीति विद्धि यत एकांतभक्तानां धीराशीर्भिर्नभिद्यते नासक्ता तइत्यर्थः एतत्प्रदर्शनायैव प्रलोभितोसीति भावः ६० मार्गांतरे तु कामत्यागे यत्नावतामपि प्रभा
दः स्यादित्याह युंजानानामिति उषितं विषयाभिमुखं ६१ इतःपरं त्वक्तत्र स्वमित्याह विचरस्वेति मय्यावेशितमना स्वमतो विहर यतोस्येवेति ६२ एवं तदुणे मत्कृपाकारुण्यात्त्वस्मिंस्ते प्रेमविशेषा
थं तत्स्य शेषावासं दर्शयन्नाह क्षात्रेति तपसामयी चिरेणैकाग्रेण अघं पापवासनां ६३ जन्मन्यनंतरइति तथैवप्रारब्धादिति भावः उपसामीप्येन प्राप्स्यसीत्यर्थः ६४ इतिश्रीमद्भागवतदशमस्कंध
संश्रितः अध्याय एकपंचाशत्तोषिणीसारसंग्रहे १ इतिश्रीमदनंतोपाध्याय सूनु कोशिनाथोपाध्याय विरचिते दशमस्कंध व्याख्याने तोषिणीसारे एकपंचाशत्तमोध्यायः ५१ दुर्वा पक्षितजरासं
धागमं वक्तुं प्रकृतकथाशेषमाह इत्यमिति सनम्यसाष्टांगं मुहुर्नत्वा निश्चक्रामेति भगवन्निर्गमात्पूर्वमेव निष्क्रमणं तदुक्तानुष्ठाने महादरेण शीघ्रात् १ क्षुल्लकान् ह्रस्वान् उन्नतामिति नरनारायणाश्र
मेकलिर्नप्रभवतीति तत्र गंतुमित्यर्थः २ धीरोति विवेकी अतो मुक्तसंशयः अतस्तपसि भगवदेकाग्रचित्तत्त्वे श्रद्धायुतः अतएव चान्यत्रासंगः अतश्च कृष्णमनः समाधिनिष्ठे कृत्वा प्राविशत् ३ तत्र च नर
नारायणयोरालयआश्रमो यत्र तं बदर्याश्रमं मथुरायवनेवेष्टितपुरीयवनवेष्टिता इति पाठे ४ बहुकृत्वो निर्जितोपि च जरासुतो माधवो पुनः प्रागात् मलिना नहि लज्जते पुष्पवतो रविन्दमोग्रासे ५ तदाह नीय
मानेइति ६ रभससमुद्रेकं मनुष्यचेष्टां स्वीकृतवंतौ तथा च विष्णुपुराणे मनुष्यधर्मशीलस्य लीलासाजगतः पतेः अस्त्राण्यनेकरूपाणि यदरातिषुमुंचति मनसैवजगत्सृष्टिं संहारं च करोति यः तस्यारिप
क्षक्षपणे कियानुद्यमविस्तरः कुर्वन् बलवतासंधिं हीनैर्युद्धं करोत्यसौ सामचोपप्रदानं च तथा भेदं प्रदर्शयन् करोति दंडपातं च क्वचिदेव पलायनं मनुष्यदेहिनां चेष्टामित्येवमनुवर्तते इति वस्तुतस्तु स
सैन्यं तमुपेक्ष्य पलायनं रुक्मिणीहरणपराक्रमकौतुकातिशयाय तत्रैव तत्पराभवार्थं तेन तस्याः प्रहर्षणार्थं चेति ज्ञाति ७ त्यागे हेतुः प्रचुरमिति शात्रोर्लीला नतो यस्यार्थः भीरोरपि भीतवत् अति भीतौ यथैर्य
र्थः बहुयोजनं देशं पलायेतां ८ प्रमाणं विदूत्वं बलाढ्यतां च नवेत्तीति अनेकैः सह ध्यष्टो धावनाद् नंतन्निर्विघ्नं द्वारकां नीतमिति ज्ञेयं ९ प्रकर्षेण वर्षन्त्यस्मिन्निति प्रवर्षणसंज्ञमग्निदाहदशकाशून्य
तो॰द॰उ॰तो॰ मिति भावः भगवानिंद्रः १० तयोः पदं पादचिन्हं गिरेरन्यत्र नाधिगम्य ततो गिरिं नीलीनौ ज्ञात्वा ११ दह्यमानं प्रांतभागमात्रं यस्य ततो गिरेः देशं च एकं च यानि योजनानि तावद् दूर्ध्वा सेनासंशोधनं देशास्पर
तोधो भुवि निपेततुः १२ सानुगेनापि रिपुत्वात्लावधानेनापि १३ मथुरायामेव कुतो नो वासस्तत्राह मागध इति ताह्यानीचानां पुण्यदेशवासानभिरुचेरिति भावः १४ श्रीकृष्णविवाहानुवक्तुं श्रीरामवि
२ वाहं नवमस्कंधोक्तं स्मारयति आनर्तेति १५ संपन्नरमणीशीलसंपन्नरमणीविना इन्दुरिवान्तरमणी रमणी रुक्मिणी हरिः १ भगवानिति युग्मकं गोविंदः गां पृथिवीं विंदति नानांविध क्रीडार्थं

कृष्ण

तस्मामवतीर्ण इत्यर्थः स्वयं भगवानतः श्रियो मात्री मातृस्यां सर्वमिति महालक्ष्म्याः पूर्णावतारभूतामित्यर्थः उपयेमे विवाहलीलया निकटे निनाय अपिरुक्तरामविवाहसमुच्चये यद्वा गोविंदो गोकुलेंद्रः गोपीजन
विरहेणातःखिन्न इति भावः तथासनवेदर्भि मुपयेमे यतः श्रियो राधिका नाम्न्यामात्रां मूर्ति विशेषं एवं तामायाः अप्यन्य गोपीमात्रा इतित्तेयं रुक्मिणी द्वारवत्यां तु राधा वृंदावने वने इति केशोरे गोपकन्यास्ता यौवने रा
जकन्यका इति चतुराणां तरात् स्वयं वरस्वयमेव विप्रपन्नप्रेषणेन श्रीकृष्णस्य पतित्वेन वरणं तस्मिन् १६ जरासंधस्य मुख्यत्वेपि शाल्वादित्वोक्ति र्नैष्मीहरणोत्तरं शाल्वेनैव सर्वेषां युद्धे प्रवर्तनमिति हरिवंशोक्तेःता
र्थ्यः कश्यप स्तत्पुत्रो गरुडो देवान् प्रथमध्यस्थ सुधामहरत् तद्वत् १७ राक्षसेनेति राक्षसो युद्धहरणादि लक्षणेन वीरप्रशस्येन योग्येनैवेति भावः इति श्रुतं सामान्यतः पूर्वमेवेत्यर्थः १८ यथोपाहरत्तथा
तत्प्रकारं श्रोतुमिच्छामि १९ श्रवणोत्कंठ्यं व्यनक्ति ब्रह्मन्निति कथात्वेन रससाध्या अपि पुण्यः सर्वधर्महेतुभूताः श्रृण्वन्न को धर्मार्थस्तृप्येत माध्वीर्मधुररसाः अर्थस्यापि फलभूताः श्रृण्वन्न कोर्थकामा
र्थः लोकमलस्य पापाद्यविद्यांतदोषस्यापहंत्रीः श्रृण्वन्न को मोक्षार्थः नित्यनूतनाः नित्यमतिनवानंददाः श्रृण्वन्को भक्त्यर्थः तृप्येत् श्रुतज्ञः उक्तमाहात्म्य यदि वेदेति यद्यबधिरः स्यादिति भावः २० चवश
नना रुचिराननेति पाठो २१ अनंतर इति रुक्मरथादौ सर्वत्र योज्यं तेन रुक्मिण्याः सर्वोत्तुजत्वं सतीति रुक्म्यादिना मसत्वं व्यंजितं २२ श्रीः संपत् रूपादीनामानंदप्रदत्वे पूर्वपूर्वाधिक्यं कविभिगशतरूपेणनि
बद्धत्वात् गृहागतैः सर्वैरेव गीयमानाः सदृशो योग्यं २३ लक्षणानि स्वस्य भगवच्चिन्हवत् लक्ष्मीत्वचिन्हानि ध्वजादीनि पूर्वोक्तानि तानि च दक्षिणवामव्यत्यासेन ज्ञेयानि गुणाः सौकुमार्यसौरभ्यलज्जादयस्ते
षामाश्रयां स्त्रीत्वमार्ष तेषामाश्रयो यस्यामिति वा अतएव सदृशी युद्धहरणादिनो द्वोढुं मनो दधे चिरं चिंतयन्नेव तस्थौ २५ तथाप्यनायासेनाविवाहेकारणमाह बंधूनामिति पित्रादीनामनादरे यक्षी ततः रू
ष्मात् यद्वा तान् बंधून् निवार्य २५ असितापांगीति कातर्येण तन्मालिन्यातिशायात् यद्वा असिते श्रीकृष्णे तन्मार्गे अपांगो यस्याः अतएव विचिंत्येति स्वजन्यादिषु श्रीकृष्ण विनान्यत्र दानेस्वमरणादिकं भावितम
पि तत्त्वात् दुराग्रहेण विफलं स्यात् प्रपन्नजनदुःखासहिष्णो श्रीकृष्णो एव तु तद्ग्राविते सिद्धिकरं स्यादतो लज्जादित्यक्त्वा स्वयमेव योग्या इतः संदेशाश्च प्रेषणीय इति विचार्येत्यर्थः २६ प्रतिहारैरिति बहुत्वं
राणां बहुत्वेन तेषां बाहुल्यात् प्रकर्षेण मार्गप्रदर्शनादिना वेशितः कांचनासने इति घनत्यामेतस्मिन् छोभाधिक्यमुक्तं २७ आत्मानं श्रीकृष्णं देवाय धेति भक्तिर्बोधिता २८ अभिमृशन् शनैर्मर्दयन् यतः
सतां गतिराश्रयस्तन्माहात्म्यवर्धनः २९ हे द्विजवरेष्वपि श्रेष्ठ श्रेष्ठत्वकारणानि पादोन चतुर्भि र्दर्शयन् सर्वेषां कुशलं पृच्छति धर्म इति यत्रादिः द्वादश भागवतानामाधुनिकानां च वृद्धानां संमतः धर्मो वर्ति
तैव किंतु नातिकष्टेन वर्तते किमिति पृच्छत इत्यर्थः ननु सततं नत्यप्राप्त्या कष्टमेव तत्राह सदा संतुष्टेति ३० धर्मस्तुत्यर्थं संतोषमेव वर्ण्याति संतुष्ट इति यदि यर्हीति पाठो तर्ह्येव धर्मो दहीयमानतेत्यर्थः सध
र्म एवास्य ब्राह्मणस्याखिलकामदोग्धा भवति ३१ तदेवान्वयव्यतिरेकाभ्यां दर्शयति असंतुष्ट इति लोकान्नामोति लोकाल्लोकांतरमण्यसक्तः सर्पटति नाप्नोतीति पाठे पुनरावृत्तिशून्यान् महरादीन्नाप्नोति शते मा
सुखमास्ते विज्वरः संतापशून्यः ३२ एवं संतुष्ट्या स्वात्मानमन्यैश्च गुणैः सर्वानपि स्वख्यनम् ममापि पूज्यः स्यादित्याह विप्रानिति स्वलाभैः स्वत एव प्राप्तैर्लाभैस्तेन यद्वा स्वस्य ममत्वाभिमानेन संतुष्टान् साधून् स्वध
र्मनिष्ठान् शांतान् रागादिशून्यान् यद्वा मन्निष्ठान् शमी मन्निष्ठता बुद्धेरिस्यक्तेः विप्रानित्यारभ्य नमेनके मुख्यं योज्यं शिरसा नवाचैव तच्चासकृत् ३३ कच्चिदिति आदिकृच्छ्रता पापगमहेतुं राज्ञानुग्रहं पृच्छतिक
च्चिदिति कुशलमुपद्रवनाशः सहाय्यं च यस्य राज्ञो विषये देशे ३४ यतस्त्थानात् यस्य कार्यस्येच्छया दुर्गसमुद्रं ३५ संपृष्टः प्रष्टव्यार्थोयं परमेष्ठिनाः सर्वे तेन तथापि प्रश्ने हेतुः लीलेति नरलीलाभिव्यी भाम्
र्तिर्यस्य तेन सर्वस्वधर्मसिध्यादिकमागमनहेतुं रुक्मिचेष्टितादिकं चावर्णयत् तत्र श्रीरुक्मिण्युवाचेति इदमपि ब्राह्मण आहेत्यर्थः ३६ श्रीरुक्मिणी सुपर्वप्रततिं भजयत्स्वर्णपत्रमपि दृष्ट्वा सत्स्वमनोदुखयं
सुपर्णश्रितः समुपयातः १ अनया मे सप्तपद्या ज्ञातः सप्तपदी विधिः ध्रुवं भर्तेति बोधायसप्तश्लोक्यार्थ्यते हरिः २ रुक्मिण्या स्वयमेकांते लिखित्वा दत्तपत्रिकां प्रदर्श्य तां वाचयति विप्रो भगवदाज्ञया ३ त
त्र प्रथमं कन्यायाः स्वयं संदेशेऽनुचितायाः अपि लज्जायास्त्यागे हेतुं दुर्वारभावं व्यंजयंत्याह श्रुत्वेति हे भुवनसुंदर शीलेनारूप्या च सर्वाकर्षकत्वोकोत्तरसौंदर्ययुक्त भवगुणान् सर्वस्वनिधानत्वादीन् रूपमंगे
सौष्ठवं कांत्यादि आत्मकं च श्रुत्वा श्रोत्रमात्रेणानुभूयतिष्ठत्या मे चित्तं त्वय्याविशति अन्यानुसंधानराहित्येन निमग्नं भवति अतो पत्रपंत्यक्तलज्जं कुलीनकन्याः कुलानभिमतं पुरुषं मनसापि चिंतयितुं तत्र पंतम
यातु त्रपां हित्वा साक्षादेव प्रार्थ्यते सायं तव रूपगुणस्वभावप्रभाव एव न मे दोष इति भावः यद्वा त्वं भुवनैकसुंदरो न चाहं रूपादिभिः स्वद्योग्यतिलज्जोचित्तेप्यपत्रपमित्यर्थः हे अच्युतेति यतस्त्वमपि तादृशो गुणरूपादि
भिस्तादृशीनामपि चित्ताकर्षणात् कदापि च्युतो न भवसीति भावः स्वस्याकर्षणादौ केमुत्यं व्यंजनाय गुणानां सर्वाकर्षकत्वं व्यंजयंती गुणान् विशिनष्टि श्रृण्वतामिति श्रवणेंद्रिययुक्तमात्राणां करविवरैर्निर्विश्य पुरु
षयत्नाभावेपि शब्दवाहनाभूत्वा स्वत एव तद्बिलद्वारा निःशेषं प्रविश्य बाह्यांगतापमपि हरतः किमुत तत्र मनसि प्रविष्टास्तन्मनस्तापमित्यर्थः एवं शीलेन सुंदरता व्यंजिता आकृत्यां तां व्यंजयंतु रूपमपि विशिनष्टि
दृशामिति दृगींद्रियमात्रयुक्तानां पुंसां दृष्टीनां अखिलार्थस्य सर्वमाधुर्यस्य लाभोनुभवो यस्मिन् तान् गुणान् तच्च रूपं श्रृण्वत्या मम चित्तं त्वय्याविशति कदा साक्षादनुभवामीत्यस्योत्कंठ्येन सदा चिंतयति इतिस
मुदितार्थः अच्युतेति पूर्णस्य मे हि मनाम त्वान मद्ग्रहणं न दोषाय ३७ नन्वेतच्छ्रवणे नान्या हसिष्यंति इत्याशंक्य ताः प्रति सेर्ष्यं तं प्रति सदैन्यं चाह केति हे मुकुंद सर्वदुःखमोचक तथा परमस्वरवद हे नृसिंह सर्वपुरुषश्रे
ष्ठ कुलसदृश अवतीर्णत्वं शीलं दयादानादिवयो नित्यनवनवयौवनोद्रे[illegible]दः द्रविणं संपत् धाम प्रभावः एतैः कुलादिभिः रात्मनेव तु तुल्यं निरुपमं जीवमात्रस्य मनसोभिरमणं यस्मात्तं त्वां का स्त्रीजातिः सामान्यपुरुषे
च्छिलाषशीला पतित्वेन न वृणीत तत्र च कन्या कुलीना महती गुणोदारा धीराचतुरधीश्च धीरत्वमहत्त्वाद्युक्ते राजनराभावे स्वायोग्यतां मत्वा न वृणीतां नामेत्यर्थः तत्रापि काले इति विवाहावस[illegible]रे माद्य
लज्जादिना सर्वनाश एवेति भावः यद्वा महतीत्यादिका का नाम न वृणीत या महत्वाद्युतिमानेन वृणीत सा महत्त्वादिरेव नेत्यर्थः ३८ अथ व्याकुलासती कायात्रयेणोत्तरोत्तरं स्पष्टमेवाह [illegible] तदिति

राम
३

तस्माद् गहे विभो मया भवान् खलु पतित्वेन वृतः भवत इति शेषषष्ठी भवते आत्मा देहः स्वाम्येवार्पितः किमुत देहः अतो त्रागत्य मां भवतो जायां विधेहि आरान्निकटागतश्चैद्यो वीरस्य ते भागं मा मा स्पृशतु अन्यथा ते लज्जा
स्यादित्याह मृगपतेर्बलिं सृगालइवेति हे अंबुजाक्षेति स्वदृष्ट्या मे तापं शमयेति भावः ३९ नन्वेतत्पुण्यैर्विना कथं स्यादित्याशंक्यानेकजन्मसु कृतान्यर्पयंती प्रार्थयते पूर्तेति पूर्तं कूपादि स्मार्तं इष्टमग्नि
होत्रादि श्रौतं दत्तं स्वर्णदानाभयदानादि नियमस्तीर्थव्रतादि व्रतं कृच्छ्रादेकादश्यादि ओदिना श्रवणकीर्तनादि यथोत्तरश्रेष्ठं भगवान् गदाग्रजो यद्याराधितस्तर्हि गदाग्रजो भवानेत्यैत्य भयत्रान्वयः
अन्ये मनुष्या देवा द्यावा यदीति निश्चये ४० अतिनैपुण्येन स्वयमेवोपायमप्याह श्वइति द्वाभ्यां श्वो भाविनी विवाहे प्रथमं गुप्तः केनाप्यलक्षित एव सम्यग्गत्वा ततः प्रविश्य पश्चाद्बृहद्भिः सेनायुक्तैः सेनापति
भिः परिवृतः सन् निर्मथ्येति बलस्याधिक्यं तेन यथा क्षीराब्धिमथनेन पूर्वमामृद्धवानसि तथाधुनापि चैद्यादिबलार्णवं निर्मथ्योद्वहेति भावः वीर्यप्रभावदर्शनमेव वैवाहिकं देयं यस्यास्तां मां अतो नेन रा
क्षसविधिनेवोद्वहेति प्रार्थनादिनिरपेक्षतोक्ता कार्यसिद्धिस्त्वजितत्वादेवेत्याह हे अजितेति ४१ श्वो भाविनीत्यत्र हेतुं विवृण्वती अंतःपुरस्थायास्तव हरणे त्वद्बंधुवधः स्यादिति शंकां निराकरोति अंतरि
ति इति अत्र स्वार्थे कुलदेवयात्रेत्यावश्यकत्वं विवाहपूर्वेद्युरपि कस्मिन्क्षणे यात्रेति दुर्ज्ञेयं तत्राह महतीवाद्याद्युत्सवयुता बहिर्वर्तमानामंबिकामुपगच्छेदिति तत एव मम हरणं कुर्विति भावः ४२ ननुत्वे
मनयोग्यापत्नीति चेत्तत्र मे वयमतो ब्रह्मादिदुर्लभस्त्वं अहं क्षत्रियकन्या तथापि बहुजन्मस्वकृतातोद्यैः प्राणत्यागेनापि त्वत्प्रार्थयिष्य इत्याह यस्येति यस्य भवतोंघ्रिपंकजरजसः स्नपनेन क्षालनेनोदकं महांतो ब्र
ह्माद्याः स्वस्यात्मनोऽज्ञानार्थं वांछंति उमापतिर्ह्यद्यात्तस्य गंगाधरत्वेन तत्पंच्छ्यायाः प्रसिद्धत्वात् तस्यतु तमस्तमोगुणाधिष्ठातृत्वं तन्नाशाय उमायोः पितिरिस्सुमा यथा तस्या भक्तिवशात् आत्मारामेणापि श्रीशिवेन
जन्मांतरेपि यत्नेनोद्वहतया त्वयाप्यहमुद्वाह्येति भावः एवं महत्त्वात्त्वमेव योग्यः पतिरिति रूपचातुर्यसौंदर्येणापीत्याह अंबुजाक्षेति भवदिति पंचम्यालुक् छांदसः तस्य भवतः प्रसादं पत्नीत्वेन स्वीकाररूपं यदि न लभे
य तर्हि प्राणानजस्त्रां हेतुहेतुमतोर्लिङ् इसंभावनायां वा प्राणत्यागप्रकारमाह व्रतेति कृशान्तपा व्रतोपवासाद्यैः कृशानितिकृपार्थं दुःखमरणं बोध्यते एवं शतजन्मभिरपि प्रसीदस्वेतदर्थमित्यर्थः कृशेति पाठांतरं ४३ स
हे गुप्तत्वेन गोपनीयत्वं अन्यथा बंधुषु तस्या लज्जाद्युत्सत्तेः बहुवचनान्तिः शेषोक्तत्वं अत्र यत्कर्तुं करणीयं तद्विमृश्य क्रियतामिति वयं ब्राह्मणा ऋजवः सर्वोपरि बुद्धिस्तवेति भावः हे यदुदेवेति त्वद्बुद्धिब
लाश्रिता एव यादवा इति न तत्रमंत्रणाय विलंबितव्यं किंतु अनंतरमेव क्रियतामित्यर्थः ४४ इति श्रीमद्भागवतदशमस्कंधवर्तिनः द्विपंचाशोऽध्यायस्तोषिणीसारसंग्रहे १ इति द्विपंचाशोऽध्यायः ५२
ततो मित्रप्रतापेन विदर्भविषये रसौ अपांगजीवनदः कृष्णः कोडुकृष्यबलोल्लता १ तुरगाद्यः श्रीकृष्णभाववर्णनप्रकरणं तेद्वार्थः प्रकर्षेण पुलकादिप्रेमविकारेण गृहीत्वा सव्रीडसभावतया प्रकृष्टं हसन् रुक्मिण्युद्वाहेन यदुनामानंद
नः १ साय थामच्चिंत्ता तथाहमपि तल्लक्षणमाह निद्रामपि न लभे कुतोऽन्यभोगं इतोऽप्यवश्यं तां परिणेष्यामीत्याह वेदेति सार्धेन २ अतस्तामानेष्य इत्यर्थः तस्या अभिप्रायमेवैतावत्कालं प्रतीक्ष इति भावः तर्हि मदनागमनेतामुपेक्षेथाः
नेवमितिव्यंजयति मत्परामिति पदद्वयेन यस्यास्तिर्भक्तिर्भगवती स्याद्युक्तैर्मत्परत्वेन सर्वसद्गुणवती निर्दुष्टतद्गुणारूपत्वादिति भावः राजन्येषु पसदान् हीनान् मुहुर्जयेपमानेपि लज्जाद्यभावात् मृधे युद्धे एव नमाययेति भा
वः इज्या हर्षदारुणाछिन्नां जगत्प्राणस्वरूपत्वात् आहरति छादकप्रथमनेस्तामहं तथेत्यर्थः ३ पतनापतितिभिः परीतइति तयासंदिष्टेपि जरासंधाद्यवज्ञया गुप्तः समैत्येत्यनुसर्तुं तस्यालज्जावह मदेशोगोपनाय चाग्रजादीन्
प्रत्यनुक्ते काव्येव प्रस्थितइति वक्तुमाह उद्वाहर्क्षमिति परश्वो रात्रौ विवाहनक्षत्रमिति तस्माद्विप्रात्सर्वज्ञाच्च निश्चित्य मधुसूदनः मधुपलक्षितदैत्यकुलहंता श्लेषेण मधुपः पद्मिनीगेधादृष्टरूवरत्तेत ह्येदिति
व्यंग्यं अस्त्रादिपूर्णतया युज्यतां ह्रसेत्यादिनी च त्वार्यश्च नामानि सेव्येति पाठांतरं पात्रे हरितः पीता नीलाः श्वेतश्चेतं क्रमेण तद्वर्णाः ५ द्विजैतमारोप्यैति आत्मण्यतान्भजनाय तस्याः प्राणरक्षार्थं शीघ्रमेति केप्रेषणाय च पकेति
तस्यां रात्रौ प्रस्थाय प्रातर्विदर्भान्गतादित्यर्थः ६ पुत्रस्य रुक्मिणः स्नेहे नवज्ञातदिष्टामनुगच्छति सः मरणायवनवासायवातद्युदयमंदश्छेति भावः अनेन शिशुपाले राज्ञो नभिरुचिस्पष्टयति कर्माणि पुरालंकारपितृदेवार्चनादी
नी पुरोहिताद्वैरकारयत ७ तान्येवाह चतुर्भिः पुरमितियुग्मकं संमृष्टाः संसिक्ता श्वत्वतर्मार्गा आपणरथ्याद्याश्च यत्र ८ स्रग्गंधमाल्यानि आविभ्रतितेर्विरजवस्त्रभूषितैः स्त्रीपुंसैर्वितुनादिशोभिते गं हे अजुष्टमकारयदिति शे
षः ९ पितृदेवानितियुग्मकं पितरो नांदीमुखाः विप्रांश्च समभ्यर्च्य भोजयित्वा च विधियुक्तं यथा स्यात्तथा न्यायंत्लोक शीतिमनेति क्रम्य च प्रतीत्य च्या स्वस्य कन्यां प्रति मंगलवाचयामासेत्युत्तरेणान्वयः १० कृतं कौतुक... च घोरत्व
मंगलयस्यास्तां अहतं सद्योयंत्रनिर्मुक्तं आहतमित्यपि पाठः भूषणश्रेष्ठैश्च भूषितां ११ अथर्वविदिति तद्वेदमंत्राणां गृहशांत्यादौ प्राचुर्यात् १२ हिरण्यगुडादियुतां स्तिलांस्तिलपर्वतान् १३ सोपहामाह एवमिति भीष्मकवद
वेत्यर्थः भगवत्यति कुलत्वात्तदपि तत्र प्रतिकूलमेव बभूवेति भावः १४ तस्य वरपित्रे च्चेवान्येप्युःसमारंभवैसिष्ट्यमाह मदेति परीता दमघोषइति पूर्वानुषंगः १५ विदर्भाधिपतिरत्र रुक्मी भीष्मकइत्यर्थे तु मुदासहस्रयो
मुदितः स्यात्तथा कल्पिता न्यस्थानेन्य वेश्यादिति योज्यं १६ तत्रेति सार्धकं यत्नाउद्युक्ताः यदीति सार्धकं स्वामीनां योत्स्यामइति प्रद्युम्नसमेतं हरेदिति शंकिताः कन्यां साधितुमिति पूर्वत्रान्वयप्रदर्शनात् १७ १८ श्रुत्वेति युग्मकं
एतद्विपक्षीयेत्यादिवक्ष्यमाणं द्वयं जनेभ्यः श्रुत्वा तत्र पूर्वं तत्तद्देशागतजनात् कृष्णमित्यादि तु तदनुमातुरतः पुरजनात् भार्त्रैः स्नेहपरिप्लुत इति सज्ञातशंकत्वे हेतुः भगवान्सर्वज्ञोपि इत्यैश्वर्यज्ञानस्य बंधुभावप्रेमप्रवाहनिमग्न
ता व्यंजिता अत एव स्वोर्लपदं त्वरितः प्रागादिति पश्चात्प्रस्थितोपि कुंडिनपुरे श्रीकृष्णेन सहैव प्राविशदिति भावः २० २१ श्रीरुक्मिण्याः पूर्वरागं पुनर्वर्णयति भीष्मेति सार्धपंचभिः वरः श्रेष्ठः आरोहः श्रीकृष्णप्राप्तिलक्षणोर्ध्वभू
मिकारोहणं यस्याः हरेः स्वचित्तहरत आत्मानं हरिष्यतश्च प्रत्यापत्तिप्रत्यागमनमद्दक्षां चिंतामाप २२ अहो खदे त्रियामा रात्रिस्तत्राज्ञांतरितः अल्पभाग्यायाः अत्र हेतुः भागधेयस्य घुनापि अत्राल्पराधस्तं विनान्यहेतुं न पश्या
मि २३ सोपीत्यर्धकं यदि द्विजो गमनेस्यात्तदा प्राणरक्षणत्यागयोरेकं निश्चेष्यामीति भावः २३ आर्तिस्वभावेनो भयानागमनेन्यं हेतुमुत्प्रेक्षयति अपीति अनवद्यात्मा काठिन्यादिदोषशून्यचित्तोपि अतः कृतोद्यमोपि नायाया
ति तन्नूनं मयि जुगुप्सितं भार्ष्यादिदोषं दृष्ट्वैव अयं भावः आदौ कृतोद्यमत्वाद्विप्रं न प्रस्थापयत प्रस्थानावसरे च मयि जुगुप्सितमालोच्य प्रत्याख्यातवान तद्भावपि नूनं नायात इति २४ पुनस्तथानवद्यात्मत्वे
न दोषदर्शने हेतुममत्वा स्वाल्पभाग्यत्वमेव हेतुत्स्थापयति दुर्भगाया इति अस्मत्कुलदेव्यपि गौरी विमुखा तदुचित नं जनाभाजात तस्यां वैमुख्यादेव ब्रह्मेशावपि नानुकूलाविति भावः यतो आत्राप्यनु

मंतव्येयमित्याह रुक्माणीति एवं महेशेनापीत्याह गिरिजासतीति पूर्वं दक्षजा भूत्वा पश्चात् गिरिजा बभूवसेति भावः गिरिशेति पाठांतरं २५ गोविंदेन भर्त्रे प्रियवशीकारिणा स्मृतचिंता अतो बाल्याप्येवं चिंतयंती कालज्ञा धुनागमने
हरणावसरेन देवी यात्रोत्तरमिति मत्वा नाश्रुबिंदुव्याप्तनेत्रे चिंतास्तब्धे मीलितवती २६ बध्वा आसन्न विवाहायाः गोविंदस्य गोकुलेंद्रतया गोप्यासक्तस्यापि कृष्णा देर्यथोत्तरं श्रेष्ठ्यं अस्फुरन्निति बहुत्वे नान्वयो युगपत्स्फु
रणाशयेन भाषिणइति पुंस्त्वमार्षं २७ एवं सत्यवद्विजसत्तमस्तो दर्शनं तु सांतं यतः अंतःपुरे भ्रमंती व्यग्रचित्तामित्यर्थः देवी हृषणे द्योतमाने २८ शुचिस्मिताह र्षात् यतः कार्यरूपंच कंदूतलक्षणेशा ततश्चाव्यग्रो
सती श्रामनोगतिं श्रीरुक्मप्रच्छ स काऽस्ते किंवा वदन् दिस्या द्विप्राक्षीत् २९ तस्यै आवेदयत् किमावेदयन्तदाह प्राप्त श्रीकृष्णशास्त्रोस आत्मनस्तस्या उपनयनं प्रति तेनोक्तं यत्सत्यवचनं तामनेन यिष्य इत्यादि तत्र्चरात्रो
सेति ३० तं श्रीकृष्णं ब्राह्मणाय श्रीकृष्ण दर्शननिर्वृता यान्यमोक्षादिकमपि प्रियं नेति पश्यंत्यपि न नाम मां श्रियं येन मंतिते सर्वसंपदामास्पदं नवंती किंपुनर्मयि प्रणतायामित्याशयेन स्व प्रभावसाफल्याय तान
ताप्यपरिहार्यं ८ तदुपव्रूति भाराक्रांतेन प्रणतागीव भूवेत्यर्थो भाति ३१ उद्वाहेति ताभ्यां तथैव स्थापितत्वात् तत्र्चराज्ञा मागधादिराजांतराणामिव तथैवाकारितत्वात् अप्रतः समेत्यतदनुसरणाच्च स्वस्यायोग्यस्या
पिदुहितुरुद्वाहेक्षणायागतावितिहर्षाद्धृी कृष्णमेतां हरिष्यत्येवेति निश्चयं हर्षाच्चोत्तमपूजाद्रव्यैः सत्कार्याभ्ययात् भीष्मकइतिशेषः ३२ तान्यर्हणानि व्यज्य यस्तैः पूजामाह माध्वीति ३३ उपकल्प्यसमर्प्य महाम्.
तिरिति एष श्रीकृष्णएव मामुद्वहेदिति सपरिवारस्यारेव सर्वतोपि विशिष्टमाति यथा मुचितमिति ज्ञानन्नेवेति भावः यथायथावत् ३४ राज्ञामिति कर्मणि शेषे षष्ठी वीर्यं प्रभावः बलं सैन्यं ३५ श्रीकृष्णाभाविस्मृचक्
ज्ञनानुरागं दर्शयति कृष्णमिति त्रिभिः मुखपद्मोच्छलितसौंदर्यमाध्वीकं नेत्ररूपे रंजलिभिरेव प्रपुर्नतु जिव्हयात्ति लिहरिति मधुनः प्राचूर्यमक्षयत्वं च व्यंग्यं ३६ ततश्च सर्वोत्तमयोस्तयोरन्योन्ययोग्यतां दृष्ट्वैवं वदंति स्मे
ति सार्धद्विकेनाह अस्यैवेति संग्रहवाक्यमिदं षडवधारणघटितषड्वाक्यानीतंत्रेण द्विरुच्चारणात् नापरस्येवमेकत्रैवान्यव्यावृत्तिप्रदर्शनेमुपलक्षणार्थं तथाचेरुक्मिणी यदि भार्या भवितुमर्हति तर्ह्यस्यैव नापरस्य १
अस्य भार्या भवितुमर्हा रुक्मिण्येव नापरा २ अस्य रुक्मिणी भार्या भवितुमर्हत्येव न नार्हतीति ३ अपिरेवार्थे भैष्म्याः समुचितः पतिरसावेव नापरः ४ असौ समुचितः पतिर्भैष्म्या एव नापरस्याः ५ भैष्म्या असौ पतिरुचि
तएव नानुचित ६ इत्येवं षड्वाक्यानि संपद्यंते उद्देश्यविधेयभेदात् प्रथमवाक्येहि रुक्मिणीनिष्ठभार्याभवनार्हत्वमुद्दिश्यास्यैवेतीदमेयत्वं विधीयते न्यदीयत्वव्यावर्तनाय द्वितीयेइदमीयभार्याभवनार्हो मुद्दिश्य रुक्मिण्येव
ति विधिः तृतीयेइदमीयरुक्मिणीनिष्ठभार्याभवनमुद्दिश्यार्हत्वविधिरित्याद्यूह्यं नचैवं व्याख्यानेवाक्यभेदोदोषः शाक्यः ग्रहं संमार्ष्टीतिवद्दोषात् तत्र हि ग्रहमुद्दिश्य संमार्गसंस्कारो विधीयते इति ग्रहः प्रधानं संमार्गो गु
णः अतः प्रतिप्रधानं गुणावृत्तिरिति न्यायेन सर्वग्रहं प्रति संमार्गआवृत्यानुष्ठेयइत्येकत्वमविवक्षितं संपद्यते ततश्च व्यक्तिभेदभिन्नेषु ग्रहेषु प्रतिग्रहं संमार्गमनुष्ठाय यद्वाक्यमावर्ततेतेन च न्यायसिद्धावाक्यभेदो दो
षाय एवमत्रोद्देश्यानां भेदात्तत्र तत्र नियमविधानएवादिपदानामावृत्तिर्न दोषायेति अन्योन्ययोग्यतायां हेतुः अनवद्येति इदं द्वयोर्विशेषणं ३७ ततो रागातिशयोदयमाहुः किंचिदिति त्रिलोककृदिति सर्वसामर्थ्यज्ञीनार्थं
तत्स्पष्टं दयालुत्वं च अनुग्रहमेवाहुः गृणहाण्विति अच्युतइति पूर्णत्वं वेदभ्योइतिस्वसंबोधोक्तिः ३८ ननु रुक्मितः कथं न बिभ्युस्तत्राह एवंप्रेमेति कल्याणश्रास्तयापिबद्धाइति तस्याः श्रेष्ठं खल्वात्वं तादर्थ्यं च तदेव चरुक्मिण्य
पि मंगलोपश्रुतिरूपा पौरोक्तिश्च एवंती हर्षप्रकर्षेणाभिकालयमगादित्याहार्थकेनकन्याचेति ३९ तदेव सार्धचतुर्भिर्व्यंजयति पद्भ्यामिति युग्मकं साचतादृशमाहात्म्यापि पद्भ्यामेव ययौ तत्र भवानी भक्तिहेतुमाह द्रष्टुं पा
दपल्लवमिति साक्षाल्लक्ष्म्याः कुतस्तद्भक्तिस्तत्राह अन्विति श्रीकृष्णप्राप्त्युत्कंठावशादितिभावः ४० अनुध्यानलक्षणमाह यतवागिति मातृभिः मात्रा तत्तुल्याभिश्च राजभटैः कृष्णभियारुक्मिणीयुक्तैः अतः शूरैर्वमितैः उद्य
तशास्त्रैश्चेति गोपनेयथोत्तरं श्रैष्ठ्यं ४१ मृदंगेत्यर्धकं जघ्निरे आहता वादिता इत्यर्थः ४१ नानेति युग्मकं नानाविधोपायनैश्च पूजाद्रव्यैश्च सह ४२ गायका गायंतः सूता द्याः स्तवंतश्च वादका वादयंतइति शेषः ४३
पूर्ववत् भवानी भक्तिं विवृणोति आसाद्येति षड्भिः देव्याः सदनं कुकुदादीनां मंडादिघिति पुंवत् यद्वा भवान्विता मित्यादेर्वक्ष्यमाणाद्भ्यादेवानां च सदनं ४४ भवानी भवस्य सहचरी पुंयोगे ङीप् पुंयोगश्च न दांपत्य
रूपएवेति सिद्धांतात् अतएवाह भवस्य पत्नीत तत्कर्तृकत्वानयज्ञादि फल भोक्त्री अतएव नित्यं भवान्विता भवसहिता मेवाभिवंदयन्ति स्येर्थः ४५ ताभिस्तदैव दृष्टोपदिष्टं वंदनमंत्रमाह नमस्येइति स्वःस्वाधीगभूतः शिवेः
सेता नागणेशादिश्च तद्युतामिति भाति स्त्रीकर्मस्वादेवी प्राधान्यं आत्मारामो सौ कथं त्वत्पतिः स्यात्तत्राह तदनुमोदतां ४६ कृष्णः सत्तनं दब्रह्मरूपापीत्यर्थः अयमेव वक्ष्यमाणो प्रच्चारसमर्पणमंत्रोपीति भाति ४६ अद्भि
रिति युग्मकं सलिलगंधाद्यैरंबिकामपूजयत् व्युत्क्रमेणोक्तिः प्रेमसंभ्रमात् स्त्रकुमाल्यथाराबांतरभेदः दीपावलिर्महानीराजनं ४७ तथापि विप्रस्त्रियोपि तैर्द्रव्यैर्लवणादिसौभाग्याष्टकेनापूपाद्यैश्चापूजयत् ४८ शेषांतद्
पनुक्तमाल्यफलादि ४९ मुनिव्रतं मौनं भक्तस्याः दासीलक्षणयासखीवा ५० अथवैरीपराभवाय तस्याः प्रभावो प्राविर्बभूवेति सार्धैस्त्रिभिराह तत्र ताभिति सार्धद्वयकं तां देवस्य श्रीकृष्णस्य मल्लादिपूरज्ञानित्यादिप्रत्यायिकां मायां
मिव धीरमोहिनीं धीराणामप्यतिमोहकरूपप्रत्यायिकांविलोक्य वीरामुमुहुरित्यन्वयः वीरेति पाठांतरं धीरमोहिनीरूपमेव वर्णयति श्यामामित्यादिना श्यामामजातरजस्कां कुतले स्यः शोकितेइव च पल्लेईक्षणयस्यास्तां ५१ द्वि
जादंता एव कुंदमुकुलास्ते अधरद्युतिभिः शोणायमानायस्याः सिंजच्च्यतत् कलाशोभातद्युत्तनूपुरं च तस्य धाम्नादीप्सा तमानेन पदाचलंती तया कृतेन मोहिनीरूपेण योहृच्छयस्तेनार्दिताः ५२ यामिति युग्मकं यात्रामिषेण ह
२५ यएव स्वलावण्यमर्पयंती मस्फुरेन्स्य स्वनर्पयंती मपियांके वलं वीक्ष्य ते देस्यां शान्तपतयः क्षितौ पेतुः सानिकटे प्राप्तान् भुविपतितान् न्यपानेक्षन ततो च्युतं च तदैव ददर्शे स्फत्तरेणान्वयः येपयुःशिश्च पाल्लायपतितापतिकाम्यया स
वैश्यापन्नपतिता नैषि तु स्वर्लभाधिका ५३ चरणावेवाब्जकोशौचलयंती चलपद्मकोशाविति पाठेपि सएवार्थः वामकरांगुलिभिरलकानुत्सार्य भगवतः प्राप्तिं क्रियामुहुरपांगक्षेपेरेव प्रसमीक्षमाणा अच्युतमिति स्वप्रतिज्ञात
श्रूतिराहित्यं किंवातच्चिता दच्युतमिति परिचायनापेक्षा निरस्ता अच्युतं चेत्यत्र अच्युतं सेति पाठे प्रसमीक्षणाबभूवेति सार्धकं योजयित्वा ततश्चैस्त्यवतार्यतस्यै ५ इत्यर्धकं पृथक्योज्यं ५४ भार्ते रथमारुरुक्षंती कालविलंबार्थं
मारस्हायेत ततश्चेष्टमानां न तु सहसा रोहंतीसत्यग्रीक्षमाणानामिति मोहापगमः सूच्यते अनादरे षष्ठी रूपर्णलक्षणं गरुडध्वजमिति कृष्णरथं ज्ञात्वा मयेन शत्रुस्तभो व्यज्यते ५५ शनैरेव ययो निर्गत्यत्वात् परे परैरिति पाठो नशा
मुखाः इतिपाठे असहमानानां मामाक्रोशमाह अहोइति अस्मान् धिक् यतो स्माकमात्त धन्विनां इद्यात धनुष्मतां अपियशो गोपैः नृपैः वयं भूता भारतया पीडका इतिभावः ह्यगे विरलत्वात् रूयमाणेर्महाशोरभैः
इवेति भाति ५७ इति श्रीमद्भागवतदशमस्कंधमध्यगः अध्यायोगात्रिपंचाशत्स्वाबिणीसारसंग्रहे १ इति भा० त्रिपंचाशत्तमोध्यायः ५३

राम॰ ४

कीर्तितन्नुन्नतिरोजोन्नता भगवतार्पिता परा भूतिः जन्मुरस्रगमाला भाव्येघाद्या दुखिताः सदपि १ इतीति अहोधिगस्मान्निस्ये वंवदं तइत्यर्थः आरुत्थेति गजादिभ्यः पतितत्वात् धूतकार्मुका इति उछ्रिताः त्रत्वात् २ स्वान्यसाधारणा

निधन्नं षिटंकारयित्वा २ कोविदा युद्धज्ञा जरासंधाद्याः शाराणां बाहुल्ये यादवानाम चलत्वेच दृष्टांतः मेघा इति ३ तज्ज्ञान भ्रत्वेन भंगुरइव शोभ नोम छ्या यस्याः ४ तस्या नयं दृक्षा प्रहस्य अत यार्धवा वामलोचने इति स्वस्मि ४

न्प्रथमार्पित नेत्रसोदयीनु भवानंदेन मा भैः मा भैषीः तावके स्वदीयैः सैन्यैर्हे तुभिः स्वयमेव मरिष्यति बलमिस्ये केत्वेनाल्पत्वं व्यज्यते ५ स प्रसिद्ध श्वासौ विक्रम श्च ६ तं गदस्य प्राधान्यत्वात् भत्यागिगमनात् चपलत्वात्सुरंस्थि

तान् हयान् पूर्वं ततो गजान् स्थूलत्वात् ततः पूर्णपराजयाय रथानजघ्नुः ६ पेतुरिति युग्मकं सकुंडले त्यादिवीर महत्वव्यंजनाय कोटिश इति परत्रापि संवैर्योज्यं ७ कर भा मणिबंध प्रभृत्यधोभागाः ८ जयकांक्षिभिर्जयकां

क्षिभिरिति पाठो ९ इवेति अप्राप्तदारत्वात् नष्टत्विषमित्यादि क्रमेणोवाचीत्रमेण शल्यपगमः १० मुनींद्र स्तेषां वाक्यैरेवतमुपहसति भो भो इति अत्यार्तमवधापयंति पुरुषेति पुंसइदम योग्यमिति भावः जीवेषु निष्ठ

स्थैर्यं राजन् अन्यान पिरंजयितुं योग्य ११ कुतस्तत्राह यथेति कुहको नर्तकस्तदिछया नृत्यति अयं सर्वोजन इह ते प्रवर्तते दुःखेपि ततः परतंत्र एवस्वातंत्रेस्फुरेव एव प्रवर्ततेति भावः एवमीशा मात्रज्ञानेपि तत्स्व

र्णावतार श्रीकृष्ण वेमुख्या तेषां सर्वं विफलमेवेति तु सविस्तरं तद्विवेकविज्ञानादि दर्शयितुमुनेस्तालयं १२ एवं सर्वैः सहस्यो क्तेदौर्मनस्यत्यागमह द्वाजरासंधः स्वानुभवं प्रदर्शयाह शौरेरिति कृष्णासराजितो न्त्वेवं

यद्वाकर्तरि शेषषष्ठी शौरिणेत्यर्थः परं मंत्वरकं संयुगमहं जितवान् १३ स्वप्रौढिमाह तथापीति द्रावितं संक्षोभितं कालस्य सर्वत्र सौम्यात्प्रियाप्रियकथंतत्राह देवेति कर्मवैचित्र्यादित्यर्थः कालो नयापूर्वो कोश्वरवाद नंगीकार

मतिश्चेति १४ लज्जा दुःखापत्नापोर्य प्रकृतेसर्वं योजयति अधुनेति फल्गुतं त्रैरल्पसन्येः १५ सततः सर्वं तदा श्वासनेयोजयति रिपवइति यदा देवमनुकूलं स्यात्तदाल्मानुकूले काले वयमपि जेष्यामः वयं विजयं चेति पाठो १६

हतशेषाद्वतिबहुवध्योव्यज्यते १७ रुक्मिण्यामात्मयासंगरुक्मीनसहतेपरं रूपणोद्दयेपि स्वेविरूपत्वं ततः स्फुटं १ तदाह रुक्मीति सार्धसप्तदशभिः १८ अमर्षी असहनः अतः संरब्धः क्रुद्धः अत एव सर्वेषु धन्व्यूक्षः एवत्क

महाबाहुरिति बाहुस्थापनेन प्रतिज्ञा व्यज्यते १९ अप्रत्यूह्य अनिवर्त्य २० यतः यत्र कृष्णस्तत्रैव द्वारकादुर्गे चीत्यर्थः नवेदिति काम प्रवेदनेलिङ् युद्धभवनेन छाममेत्यर्थः २१ तत्र्यक्ति मर्थं तदाह अद्येति वस्कतस्तु गोपालस्य

वेदपालकस्य यद्वा गोपालत्वेन तापिन्या दाउपास्यतयोक्तस्य तर्हि कथं जनानां नतदुपासने प्रवृत्तिस्तत्राह सुतरां दुःखेन रूप्रणेवमतिर्ज्ञानं यस्य बाणैर्मम दीयमेववीर्यमदं नेष्येहरिष्ये तत्र तस्य सामर्थ्यमाह येनेति २२ आ

त्मानं श्लाघमानः अतः कुमतिः अतः प्रमाणं तन्माहात्म्ये यतानवेतीति एकेन रथेन सहितः मदेनैकाकितया योद्धुं स्वसैन्यं दूरतस्त्यक्त्येत्यर्थः गोविंद भूव्यवतीर्णं सर्वेशमपीति तस्याबुध्नत्वं २३ अवज्ञयात्मानमनोद्दृश्य यातं शोरेः

एष्टतोजग्मे शराश्चिक्षेपेत्यर्थः तथापि प्रयांतं पुनराह अरे हे शात्रो कुलपांसन कुलदूषक वस्कतस्तु अरे क्षणं शीघ्रदर्शनं यथास्यात्तथा तिष्ठ अरंद्रुतमित्यमरः हे यदूनां कुलपते अंसन हे रिपुहनन चतुर २४ ध्वांक्षः

काको यथा हविर्मुष्णातितद्वत् वस्तुतस्तु ध्वांक्षवत् एकाक्षोध्वांक्षस्त द्विपरीता ने काक्षत्वे पर्यवसानं भूतः सहस्राक्षो हविरिवा मुषित्वा स्वभागत्वान्न्याये नैव लब्ध्वा कुत्रयोसि भयाभावान्न क्वापि किंच हे मंदस्थिर महामा

यातत्रैः कूटान् खलान स्मान् योचयसि पलायना सोत्साहनात् तस्य तव त्वां प्रति मदं दर्पं स्वपराजयेन प्रापयिष्यामि यद्वाहविरिव शुद्धां मे स्वसारं ममुषित्वेति ध्वांक्ष वत्क्षुद्रो हे हरिष्य इति चान्वयः २५ यावदित्यर्धकं अ

त्रैवंभाति मे बाणैर्नेहतो न प्राप्तो यावच्छयीथाः स्वस्थो वर्तेथास्तावद्वारिका बो णेमद्विदारणं मुंच त्यज मा कुरु मद्बाण प्राप्याते व्यस्कुली भावः श्वासं तवीति मेवमां जहीति भावः २५ हस्तद्वयपादद्वय मौलिहृदयांगेषु षड्

विव्याध चतुर्णामश्वानामग्निमपादद्वयं मष्टभिः सूतहस्तद्वयं द्वाभ्यां ध्वजाग्रपताकादंडं त्रिभिः स्थिरछेदेति २६ विव्याधेताडयितुं तान्नचिक्षेप अतस्ताडयितुमिष्ठापि स्वशरौघे धनुरेव विच्छेद २७ पुनरित्यर्धकं अच्युतइत्य

पिपाठः २८ परिघमित्यादावात्तमितिशेषः तोमरानितिपाठे तद्वाहुल्यं शूलशक्तयो ऋषिदाकारभेदः अन्यच्चयद्यदादीत तत्सर्वमच्छिनदितिपाठः २९ अभिमुखमधावत् ३० तिग्ममसिं रुक्मिणंचा ३१ भ्रातुः केनापि दैवेन भ्रार्तितां

प्राप्तस्य भयं लोकापवादात् सतीविदुषी मत्संबंधधारिण्यस्मिन् भगवतोदयैवोचितेति विचारवतीत्यर्थः भगवतस्त्वयं भावः अस्याः प्रार्थनया रक्षितप्राणस्यास्यैतस्यां द्वेषबुद्धिर्नोदयेतेति ३२ हे योगेश्वरेति अतर्क्यैश्व

र्यस्य ते किमयं कर्तुं शक्नुयादिति भावः हे प्रमेयस्वरूप अज्ञेयमिति भावः हे ब्रह्मादिपूज्य किमेतस्यामरवधेमहद्यश इति भावः हे जगत्पालक अतो हंतुं नार्हसीति भावः कल्याणेति सर्वमंगलत्वात्कृतरानाहसि तत्रापि

मे भ्रातरं तु सुतरामेव महाभुज हे वरद हस्त अभयदानमेवोचितमिति भावः ३३ शोकेनावशुष्यन्मुखं यस्याः रुद्धः कंठो यस्याः सा च सा च विक्लव्येन गलिता स्वर्णमाला यस्याः स्तयागृहीतपादः ३४ स श्मश्रुकेशं

स्थाने स्थाने वशिखाः श्मश्रुकेशा यथा स्यात्तथा मुंडयन् तेनैवासिनेति शेषः विरूपमकरोत् सइत्याध्याहारः यद्वास श्रीकृष्णः श्मश्रुकेशमिति द्वंद्वैक्यं उद्धृतं साहसादियुतमपि ३५ कृष्णोत्यर्धकं ददृशुरित्यत्र प्र

वीरा इत्यनुषंगः तथा भूतं हतप्रायमित्यस्यापकर्षः ३६ प्राप्तवैरूप्यं चात्रतो हतकल्पं अपराधि कुलोमोचितस्तत्राह करुणो भगवान् सर्वज्ञश्चेति रुक्मिण्या दुःखं भाविलोलत्वाच्चवेत्तीत्यर्थः कृष्णं तदुपलक्षितां रुक्मिणीं च ३६

अस्माकं वत्संबंधेन प्रतिष्ठावतो वृष्णीनां निंदितं किंतदित्यपेक्षायां नीचैरिवाह वपनमिति नच्चायमल्पोदंड इत्याह वैरूप्यमिति एवं श्रीकृष्णोपालंभे रुक्मिण्या एव सांत्वनमुद्देश्यं तथा रुक्मिणोपि शीक्षार्थं भर्त्सनं स

पृष्टे तद्दुर्दशानुवादात् ३७ एवमुपालंभे पितस्याः शोक न्यासमदृष्ट्वा तामेवाह मेवेति अस्मान् कृष्णादीन् दोषरोपेण मापस्य अतो न स्वयमेवेत्यर्थः ३८ तथा देव्याः शोकं दृष्ट्वा तन्निवृत्त्यै श्रीकृष्णमाक्षिपति बंधु

मल्ल रिति बंधोः सकाशात् किंतु त्याज्य इत्ययं न किंचित्कर्तुमिति भावः ननु बध्यरक्षणेपि दोषस्तत्राह स्वैनैवेत्यादि संकिपुनर्हन्यते नैवेत्यर्थः वैरूप्यकरणमिति हननमेवेति भावः ३९ एवमपि शोकानपगमात्पुनर्दंबीधर्मे

प्रदर्शनेनाह क्षत्रिणामिति येन धर्मेण भ्राताऽपि भ्रातरं हन्यात् ततस्तस्मात् कालेहनाद्धेतो र्घोरतरोपि स धर्म इत्यर्थः ४० पुनरपि श्रीकृष्णं प्रति परुषमाह राज्यस्येति ह्रियतः मानिनएव तत्रापि मदांधा एव क्षिपंतितस्माद

स्माद्धिधानामेतदयुक्तमित्यर्थः ४१ एवं कृष्णं प्रति परुषमुक्तमपि देव्याः शोकात्यागान्नामेव रहस्य गर्भितज्ञानोपदेशेन बोधयन्नालोपसंक्रोधमाह तवेति सर्वभूतेषु मध्ये दुर्हृत्त्वेन प्रतीनां केषांचित् यदभद्रमिच्छसि सुहृत्वे

नाग॰द॰तो॰ ने प्रतीतानां च भद्रं परित्रोषादन्ये षोदासि न्यं कुरु षे सेयं तवाज्ञानामिव विषमा नु बुद्धिः इदं शाविषमबुध्या श्रीकृष्णो परमप्रेमनसिध्येदितिरहस्यं ४२ कुतइत्यत आह आत्मेति श्रीकृष्णप्रेमास्वादवतामन्यत्र सोभूतादिस्फू

र्तिरवमेतिरहस्यं ४२ वस्तुतस्तु भेदो न संभवतीति परमार्थमाह एक इति उपाधिभ्यः परोक्षिन्नस्तस्मादेक एव उपाधीनामेव वैचित्र्येण भेदोनुभूयते नात्मन इति भावः आत्मनोपि भेदानुभवमाशंक्य तस्य सोपाधिक

४ विषयत्वं सदृष्टांतमाह नानेति ज्योतिः सूर्यादिर्यथोदकेषु यथा च नभो घटादिषु इति प्रतिबिंबावच्छेदपक्षद्वयानुरोधेन दृष्टांतद्वयं रहस्यं तु आत्मा श्रीकृष्ण एक एव परः श्रेष्ठः परप्रेमयोग्यः तदज्ञानी भिरेव त कृष्ण

दलाभेनानापित्वं स्वात्वे तु श्वादिरूप आत्मा परइवगृह्यते यथा रवेरलाभे दीपादिज्योतिर्गृह्यते महाकाशालाभे घोदंबर मशकेसस्तु कृत्वातर्नेत्त एवगृह्यत इति ७७ आत्मनि भेदप्रतीतौ कउपाधिरित्यपेक्षायामाह देहइति
प्रव्यंपृथिव्यादि प्राणस्तत्साध्या क्रिया इंद्रियाणी वा रूपादिगुणाश्च तदात्मकः श्रीकृष्णप्रेमविघटकोऽवस्ला वेशो हेतुर्देह एवेतिरहस्यं ७८ नन्वौपाधिकोपि धर्मः सस्त्वो दृष्टो यथा जलेलोष्ठमय मन्यथा तंडुलपाको नस्यादिति चेन्न दद्दत्रोपा
धिसंयोगाभावादित्याह नेति अनेन देहाद्युपाधिना मनः संयोगो नास्य तो वियोगो पिन संयोगाभावे हेतुः असतः असत्वादन्यस्य असत्वे हेतुः तस्यान्यस्य देहेंद्रियादेः प्रसिद्धेः प्रकाशस्य तद्धेत्वो दात्महेतुकत्वादात्मभावस्य त्वत्
क्षण हृत्यत्वादिति यावत् ननु स्थूलदेहधीन्द्रियप्रधानलिंग देहयोः प्रकाश्यप्रकाशकत्वं प्रसिद्धं नात्मनस्तत्राह दृक्रूपयोः प्रकाश्यप्रकाशकत्वेन प्रसिद्धयोरपि यथा रवेः सकाशादेव प्रसिद्धिस्तद्वत् रहस्यार्थस्तु भवत्त्वेवं तव तु श्रीकृ
ष्णशक्तिरूपाया रुक्मण्यादिनासंबंध एवनेत्याह नेति आत्मनस्तव असतः रुक्मादेस्तुच्छत्वा ननु विदर्भाधिपत्वेन प्रसिद्धस्य कथं तुच्छत्वं तत्राह सातच्छक्तिरूपात्वे हेतुर्यत्र तद्रूपत्वात्तस्याः प्रसिद्धेः लक्ष्म्यास्तवदृष्टिप्रभावात्सा प्र
सिद्धिरित्यर्थः रविप्रभावाद्दृक्रूपप्रसिद्धिरिवेति ७६ देहसंबंधाभावादेवनात्मनो जन्मादि इत्याह जन्मेति इंदुकलानामेव जन्मादि नेंदोस्तद्वत् यथा च कलानाशादेव कुहूरिंदुक्षय उच्यते तथास्यात्मनो देहनाशादेवमृ
त्यिव्यवहारः रहस्यार्थे तु तत्कुले जातायाः कथंनयोगवियोगौ तत्राह जन्मेति यदा जीवस्यैव न तदा चिद्रूपायास्तच्छक्तेस्तव किमुतेति भावः ७७ उपाधिसंबंधाभावे कथं भोक्तृत्वादि प्रतीतिरित्याशंक्य स्वप्नदृष्टांतेनाह यथे
ति आत्मानं राजादिरूपेण भोक्तारं फलं भोगं अर्थांतरे नन्वेवं तत्वं चेत्कथं रुक्मिश्रुत्वापि स्वभावं न स्यति तत्राह यथेति अबुधोयं रुक्मी अर्थद्वयमुपसंहरति तस्मादिति आत्मनः शोको निरसता विमोहश्च यस्मात् हे शुचिस्मिते इति
तवलक्ष्मीत्वान्नाज्ञानस्पर्शः लौकिकलीलयैवं व्यवहरसि मयाप्युपदिश्यसे इति भावः ७९ तथैव साप्युक्तवतीत्याह एवमिति प्रतीति विद्यारूपयातयैव सर्वे बोधिता इति तस्या बोधनं प्रतिदानरूपमेवेत्यर्थः ५० प्राणेति सा
र्धकं पूर्ववत् तसैन्यादिः ततो वितथकामः ततोरूपीकरणात्प्राणमात्रावशिष्टीकृतः ततउत्सृष्टः पश्चाद्धीरूपकरणं स्मरन् भोजस्य विदर्भराजस्य तस्य कटः शपथो हेतुर्यत्र तन्नामकं पुरंचक्रे ५१ तत्रापथं दर्शयति अहत्वेति अ
ताला अदुर्मतिं दुःखेन मतिर्ज्ञानं यस्येतिवा यवीयसीं स्वसारमप्रत्यक्षां विघ्निता मत्कृत्वेति वास्तवार्थः ५२ भूमिपान् ते श्रीनिर्जित्येतिजयते र्द्दिकर्म कत्वात्कर्मद्वयं विधिवत् विवाहहोमादि विधिना अविवाहः स्थापितो थमान
तोद्विज राजकैः चित्रं तत्र विवाहं श्रीकृष्णो विदधतुर्मिथः ५३ नास्तिकृष्णादन्यत्र प्रमा येषां ५४ वरयोर्नवरवध्वोः स्वस्त्रादिति वत् ५५ सेति युग्मके उष्णितेरिंद्र के तुभिर्ध्वजविशेषैः क्लृप्तैः लाजांकुरादिमंगलैः ५६ आह
ताः प्रेष्ठायेराजानस्तेषां गजेः परामृष्टाः शुंडाग्रेण धृताः रंभाः पूगाश्चयैस्तैः शोभे तेति शोभा विशेषोगज्जा नामदपि सौम्यताचोक्ता ५७ प्रेष्ठन्दपात प्रायो दर्शयंस्तेषां हर्षमाह कुर्वीति कुरवः भीषपांडवाद्याः विदर्भा इतिरामा
देश्च मुनिजनादिद्वारा विज्ञो ध्यानीता भीष्मक कथकैः शिकादयः यदवोनंदादयोपीत्येके नंदगोपोऽथ गोपालेर्गोपवृद्धैः समागतः स्वल्लंकृताभिर्गोपीभिर्यशोदापि समागतेति पाठात् १ विवाहे तत्प्रयोजनार्थमित स्ततो धावतो बंध्व
नोमध्ये मिथः समेत्य ५८ विस्मयः सतामाकांक्षाया असतो भयस्य च हेतुरिति भावः ५९ विवाहोत्तरं द्वयो योग्यसंगतिं पश्यतां द्वारकावासिनां आनंदमाह द्वारकायामिति श्रियः पतिमिति सांपक्षिते वेति भावः सा च ध्युनामिलितेत्या
हरमयेति अतो महानमोदः ६० इति श्रीमद्भागवतदशमस्कंधमध्यगः चतुःपंचाशत्तमोयं तोषिणी सारसंग्रहे १ इति भागवतदशमे चतुःपंचाशत्तमोध्यायः ५४ आसीत्संगोनेगोनगारिलोकोयमाप्तकामोपि सरति मनोभवविं
जयो रुक्मिण्या संगते कृष्णे १ तुशब्दोभिन्नोपक्रमे वासुदेवस्यांशः प्रद्युम्नरूपो विद्यते यत्र स प्रद्युम्न विभूतिरूप इत्यर्थः कामः इंद्रस्य सेने कादशादिषु प्रसिद्धः प्राकृतकामः रुद्रमन्युना पूर्वं दग्धः अनंगतां विधाय स्वतो देहप्राप्ताव
समर्थः कृतः अतो देहोपपत्त्यै अन्यप्रसंगतो देहप्राप्तये तं वासुदेवांशं प्रद्युम्नमेव प्रत्यपद्यत तमुपास्य तत्सायुज्यं प्रापेत्यर्थः देवलीलायां नित्यापि प्रद्युम्नाविर्भावस्त्रिलोकीयं तर्गत मनुष्यलीलायां रुक्मिण्याजात इति तदाविर्भावे
णैव प्राकृतकामः स देहो जात इति भावः स्वयं पदेन एवमपि कामाख्य जीवस्तस्मादेवाविरासीदिति व्यज्यते अर्थांतरे तु वासुदेवांशो दग्धइत्यादिकं बहु सिद्धांत विरुद्धं स्यादिति ज्ञेयं १ तदेवं यः कृष्णवीर्य समुद्भवः कृष्णांशा विर्भा
वी प्रद्युम्न इति विख्यातश्च तु र्व्यूह प्रसिद्धः स एव वैदर्भ्यां प्रादुर्भूतः प्राकृतकामस्तु तत्सायुज्यादेव जात इति भावः तत्र हेतुः सर्वत इति २ अत्र भगवल्लीलाकौतुकमाह तमित्यादिना यावत्प्राप्ति सकामारितया प्रसिद्धः शंबरस्तस्य
स्वशात्रुं पितारं नारदाच्छ्रुत्वा अनिर्दशं न हत्वेति षष्ठेन्हीत्यर्थो विष्णुपुराणात् कामरूपीति धात्र्यादिरूपः सन्निति भावः भगवतातु ज्ञातत्वैव प्रद्युम्न हस्तेन मारयितुं न निगृहीत इति ३ बल्लवानिति श्रीकृष्णोच्छेयवतादृशास्तु
दयात् सोपि बल्लवानपि ४ तमित्यर्धके ५ तत्तत्रापादर्शनेन मायावती नाम्ना ख्याता येरस्या अर्पयामासुः तस्याः सूदाधिपत्यात् ५ कोयमति सुंदरो नूनं मत्कृते वस्यादिति शंकायुतचेतसे तस्यै तत्त्वं कामोयं तव भर्तेति प्रद्युम्न
वतकृतं तदेना कथयत् तच्छ्रुत्वा तस्याः शंकापनुत्तये अतः सापि स्वपस्य भेदेनैव तमुपासांचक्रे भगवान् प्रद्युम्नोपि तां योग्यां कृत्वा स्वीचकार तस्य मुख्यपत्नी त्वनिरुद्धमातेति ज्ञेयं ६ साचेति युग्मके भर्तृ देहप्राप्तिं प्रतीक्ष
माणा तदर्थं श्रीशिवपरिचरणे स्थिता शंबरेण तं प्रसाद्य याचिता गच्छेतद्गृहे तत्र वै स्यसिद्धिः स्यादिति तेनोक्ता तत्रावासेतिमात्स्ये तथापि यशस्विनी पातिव्रत्यभंगाभावात् इयं मायावती भार्या तेन यस्यास्य ते सती शंबरस्य न भार्येयं
श्रूयतामत्र कारणं रुपवावाद्युपभोगेषु रूपं मायामयं शुभे दर्शयामास दैत्यस्य तस्यैयं मदिरेक्षणेति विष्णुवाक्येः ७ रूपोदनसाधनेतदाधिपत्यं स्नेह धात्रीस्तनपाय नैरसायनैः शीघ्रवर्द्धनादि प्रेमविलासं सद्ददातदेति पाठो
नातिदीर्घेण पोगंड एवेत्यर्थः यतः कृष्णस्य पुत्रः श्रीकृष्ण एवेति भावः वीक्ष्यमाणानामपि किं पुनः सेभाषणादि पराणां विभ्रममुन्मादं ९ पूर्वेतोपि सौंदर्यातिशयं व्यंजयन्नाह पश्येति अत एव प्रीत्योपतस्थेके हासनर्ति
तभ्रूवोपलक्षितैः सोरतेभावैः अंगहेराजन् १० भगवान् सर्वज्ञोपि विपरीतवद्बूचे यतः कार्ष्णिः श्रीकृष्णवदेव प्रकटितनरलीलः मातरित्यादि धात्र्युपदेशमनुसृत्याह नतु मायावतीमतं वास्तवार्थस्तु अतो स्माद्भावात्तवा
न्यथा मातर्भावं वचितिशेषः यतः कामिनीमस्कोतेवत्वेमातृभावमतिक्रम्य यद्वर्तसे तद्यथावदेति ११ धिक्कृता त्वधिकारतुल्या यतोरतिरहं भगवान्कामइति १२ हरणप्रकारं वदंती कोपयति एष इति १३ इमंसंनिहितं
दुर्धर्षं कृष्णेनाकुलीकर्तुं शक्यं यतो माया शतविदं अतो दुर्जयं च वध्यत्वे हेतुः शत्रुमिति वधोपायमाह मायानिरिति १४ अविलंबायाह परीति स्नेहेनाकुलाकतेव्येष्टणा अत आतुरा व्याधितेव ततो दीना दुःखिता अत एव सवे
तःसरोदनं विलपतीत्यर्थः हता शास्त्वेदृष्टांतः गतप्रजाकुररीयथा हारं भावदत्ते रोदिष्येवेति धृतवांशास्त्वेगौरिवेति साहि नष्टेपि वत्से समुत्सुकैवतिष्ठति १५ महात्मनेगंभीरायाव्यंजितस्व प्रभावायेत्यर्थः नाशिनी नाशनीमितिपा
ठो १६ आक्षेपैर्निंदावाक्यैः क्षिप्तरस्तु र्वन् १७ सोधीति सोभीतिपाठो १८ आविध्य भ्रामयित्वा महानादमाधृतिर्यस्य वज्रस्यनिष्पेषो निर्घोषस्तद्वन्निष्ठुरं नादं व्यनदत् अकरोदित्यर्थः उक्तार्थानाम प्रयोगइति न्यायेन नदत्तेः कृत्र
र्धमात्रे पर्यवसानात् १९ नभस्यत्र नदन्नित्यपि पाठः २० त्वर्थैच्यः वैहायसः तिरोभूयाकाशेस्थितः एवंगदावचनैः स्वच्छितं अश्ममयं शिलाप्रचुरं हरिवंशे वृक्षवर्षैः भीषीकृते शिलावर्षं उक्तः २१ बाध्येति युग्मके सत्त्वगुण

नागद-ऊ. नो भी नी ८

राम ५ ५

मयीविद्योप्राप्युक्तेतितिपरेणा— न्वयः २२ गोत्वेकेन्याद्देसामान्यतोनपुंसकानोद्वंद्वः पश्च्यात्मायाविशेषणत्वेनसमस्तानूङीपू वस्तुतस्त्वार्षः पुंवद्भावः रातत्राः अन्याअपीत्यर्थः ताःसर्वाव्यनाशयत् यतः कार्ष्णिः २३ तांश्चाणिजम
श्रूणियत्रततअहरत् दूरीचकार कार्ष्णिरित्यनुषंगः सकीदृशेस्यादिनाहरणेत्वाघवेव्यंग्यं २४ अंबरचारिण्यादेवस्त्वेभावनस्याकाशमार्गेणद्वारकांनीतः २५ श्रीकृष्णांतःपुरेषुश्रेष्ठंश्रीरुक्मिणीसंबंधिगृहं पत्न्यारत्यासह
ह २६ तमितियुग्मकं कृष्णमत्येत्यत्रतत्साद्दृश्यहेतुमाह मेत्त्वेत्यादिसप्तविशेषणैः तांम्रेवर्णोक्षितत्रांतेयस्य २७ हविस्मये २८ इषद्धेत्लक्ष्यंवर्णादिशोभोतः किंचिन्न्यूनत्वेभावनिरीक्षणराहित्यविनयिदृष्टिचादिकं
चतेनार्यकृष्णइत्यवधार्यसमीपंजग्मुः तत्स्पर्शेनस्त्रीरत्नत्वंप्राप्तायारतिस्तत्सहितं २९ तत्रतासुपश्यंतीषुमध्येअस्मरत्सारुप्यंदृष्ट्वानुसंदधे स्वपदेनात्यंतस्नेहविषयतातएवस्तुतस्तानीसती ३० नरवैदूर्यःपुरुषश्रे
ष्ठःकस्यवापुत्रः ३१ नष्टः अदर्शनंगतः अपिजीवतिजीवेत् तस्येवतत्समानवयोरूपएवभवेत् ३२ सारूप्यसम्यक्प्राप्तंतदाह आकृत्येति प्रांशुतादिकया अवयवैःकराद्यंगैः स्वरेतिसमीपगतान्प्रतिमात्रादिप्रश्नात् ३३
अधिकेति स्वस्यजगन्मातृत्वेनसर्वस्यपिसामान्यतःपुत्रप्रीतिर्व्यज्यते ३४ पित्र्वंत्यांसहागमनंप्रायस्तदानीनम्रहृगमनात् तमोनिवर्तकः श्लोकोयस्येतिदेव्याःसंदेहतमोनाशकत्वंव्यंग्यं ३५ स्नात्वापिकथंनोक्तवानिति
देव्यादीनामस्यास्याद तस्तुष्णीमास यंताभजजनेर्याच्यमानस्तेषांसुखदत्लीलः ३६ कृष्णमिति तत्संबंधितयातासांमाहमा ३७ रामस्यपश्चाद्युक्तिः पश्च्यादागमनात् रुक्मिण्यात्रंते उक्तिश्चिरात्लिंगनार्थेनेधुग्रहेनयनार्थेवापश्च्यास्थि
तत्वात् इतिहेतिपुरातनकथापरामर्शार्थकं ३९ रहदि अभजन् श्रीकृष्णमन्त्रोत्यातन्निकटमाजग्मुर्जनौतिकेतुचामरादिपरिकरैरुद्धवादिसाहचर्येणचननतथाम्नातिरितिस्वामिपादानामाशयः वस्तुतस्तुयमित्यत्रप्रतीत्यध्याहार्ये
यविष्टंव्यभजन् दायमित्यत्रयथाद्दष्टुतिवा तथोचयंदृष्ट्वापितृसरूपेश्रीकृष्णातुल्येतस्मिन्नितिजईशाःपरिरितिभावोभावनायासीतथाभूताःसत्यस्तस्यसपत्नीमातरोरहःस्थानमभजन् क्रियानिलिल्युःप्रथमदिवदृनांतरश्चपी
त्यर्थः पुत्रस्यधवत्वावोद्दीपनतायामप्यग्येत्वादत्रेशपदेनकृष्णमननेपीश्वरभावस्येवस्फूर्तिर्नधवभावस्येतिव्यंजितं तत्रहेतुः रूढभावाः श्रीकृष्णेकरतीनांतासांत्रोत्याप्यन्यत्रधवत्वस्फूर्त्यसंभवादितिभावः तदहोनित्त
यनंचित्रंन यतोरमास्पदंश्रीकृष्णस्तस्यबिंबमूर्तिस्तत्प्रतिबिंबपुत्रे यदामार्तणामेवंतदातस्मिन्स्मरेणमात्रेणक्षोभकेकोमरतिपत्नावक्षविषयेप्रत्यक्षेसतिउतत्रापिअन्यनार्योपिकिंरहएवाभजन्नपितुनकिंतुतमेवाभजन् भाव
हावादितिरसेवंतेति अक्षीत्यपि पाठः रहरूढेत्यत्ररेफलोपाद्यार्षं रहऊढेतिपाठांतरं ४० इतिश्रीमद्भागवतदशमस्कंधमध्यगः अध्यायपंचपंचाशस्तोषिणीसारसंग्रहे १ इतिपंचपंचाशोध्यायः ५५ चित्रमक्ष
यतेःपुत्रीमपिनक्षत्रतेजसं ऋक्षेशवदनोन्वूहे श्रीशौरतिपतेःपिता १ प्रद्युम्नजन्मोत्तरंसत्यभामादिविवाहास्तेचप्रद्युम्नप्रत्यागमात्प्रागपि विनोपिकथापर्यवसानायतत्प्रत्यागमनमुच्यतेदानीं वर्ण्यंते तत्रभामाजांबव
त्योर्विवाहंवक्तुंस्यमंतकाख्यानंप्रस्तौति सत्राजितइति अयंकश्चिदकारांतः कश्चित्तोपिस्वप्नयमेवोद्यमंकृष्णामणिनासहदत्तवान् १ कुतःसकाशाद्धभूव २ सखाउपासनासातत्येनसदाहितकारितत्राप्युपासनाविशेषा
द्दीप्तिविशेषवानासीत् सचतदुस्थानविद्ययातुष्टः प्रत्यक्षोविग्रहवान् भूत्वात्तोकोकाशकंस्वकंठस्थंस्यमंतकंनाममणितद्याचनयातस्मैप्रादादित्यादिविशेषोहरिवंशात्ज्ञेयः ३ प्रविष्टोपिसत्राजितोसावितिनपरिचि
तः ४ नरत्नीत्वाकौतुकितयाक्षैःक्रीडतेसूर्योयमितिशंकिताःसंतोकथयन् ५ सूर्योयंश्रीकृष्णमनस्यर्थमायातीतिमत्वोद्विक्ता भत्त्यासंबोधयंति नारायणेत्यादित्रिः हेसर्वजीवाश्रयत्वात्सर्वेश्वरतथापिदुष्टशिक्षार्थं
हेशंखवादिधरेतिस्वरूपेश्वर्योक्तिः हेदामोदरेतिभक्तवश्यत्वं अरविंदाक्षेतिसौंदर्यं गोविंदेतिगोचारणोपलक्षितनन्दोल्लित्वावत्त्वं यदुनंदनेति सएवत्वमिदानीयदूनानंदयितुमत्रसभोयोविराजसीतिभावः ६ अतो
हेजगत्पतेत्वामेवदिदृक्षुः सवितायातिनेषसूर्यःशास्त्राशंक्यतल्लक्षणमाहुः मुष्णान्रश्मिजालेनप्रतिहतानिकुर्वन् यतस्तिग्मरश्मिः ७ नचेदमसंभाव्यमित्याहुः नन्विति निश्च्येय त्रिलोक्यांयविबुधर्षभाब्रह्माद्यास्तेत्व
त्प्राप्त्युपायमेवमृगयंतेप्राप्तिस्तुदूरे अगूढमप्यधुनायदुषुसाक्षात्स्थितंज्ञात्वाअजःत्रयीमयत्वादनादिःसूर्यःहेप्रभोइति अहोत्वदीयानांनोभाग्यमितिभावः ८ बालानामज्ञानांवचनंअसूर्यस्सूर्यबुद्धेःसूर्यागमनमा
त्रसंभावनयाकोलाहलत्वाच्च देवइति देवोपिकश्चिन्नभवतिकिंतुमनुष्यएव तत्रापिसत्राजिदित्यर्थः ज्वलन् द्योतमानःभगवत्कंठस्थकौस्तुभस्पर्द्धयाप्रकाशाननुभवोभगवद्दिच्छयाप्रकाशसंवरणात् ९ स्वेष्ट
देवसूर्यंव्यगृहे विप्रैःप्रयोज्यकर्तृभिःपिठेस्थापितवान् १० दिनेइत्यर्धकं प्रभोहेभत्तैश्वर्यशालीन् त्यांदशानांनतदादरइतिभावः अष्टगुंजोमाषोद्वादशमाषस्तोलश्चतुर्विंशतितोलःशेकष्टश्चत्वारिंशच्छेटकोमणकइतिमा
हाराष्ट्रादिदेशीयस्वर्णरूप्यादिसंबंधिप्राकृतमानप्रसिध्यामरसिंहमतेनषणमणकाःसप्तत्रिंशच्छेकदा अष्टादशतोलाअष्टौमाषाश्चेति भारप्रमाणंस्वामिमतेतुसप्तविंशतिर्मणकाएकत्रिंशच्छेटकास्तोलद्वयमष्टौ
माषाश्चेति ११ मारीनामदिनेदिनेबहुजनमारकोग्रहः अरिष्टमभद्रं अशुभाःदुःखहेतवः मायिनःकपटिनः अर्चितइति अन्यथानिष्टकरइत्यर्थः १२ क्वापिकश्चित्कदाचित् राज्ञेकयोग्यतोसम्यगर्चेनासंभवेनतद
निष्टकरतोचालोच्ययाचितः भगवद्याचाभंगदोषंमविचारयन् स्वयमेवोत्तमंद्रव्यंमहतेर्प्यंपरादरात् तद्याचितेप्यदानेतुपरेनर्थोत्रसूचितः १ एवेतिमुहुर्याचनेप्यदानंप्रतियुष्मदीयएवंयुष्माभिरप्युपभोक्तव्यइ
तिस्वीकारमिषेणवंचनाचव्यज्यते १२ तस्फलमनर्थमाह तमित्यादिना सचभगवद्वंचनार्थंप्रसेनायस्वभ्रात्रेददौ प्रसेनश्चसर्वतोविशंकीसन्प्रछन्नंमणिंकंठेध्वत्वैकाकीवनेमृगयामिषेणाचरत् १३ आ
च्छिद्येति उत्तमधनस्वत्वावोयंमूषकेस्वर्णादिहरणदर्शनात् १५ सोपीत्यर्धकं कुमारस्यसुकुमाराख्यस्य १६ अपश्यन्निति सार्धकं भ्रातरंभ्रातेतिमिथ्यःस्नेहः परितापाशयमाह प्रायइति जनस्तदनुवर्त्येव
नसर्वः १६ उद्धवादिमुखतःश्रुत्वानागरेस्तेरेवजनेरन्वब्रजत् १७ तां१सिंहमृक्षवनाम्नोदरुपरि जनास्तेवत्यपवादविशुद्धिः १८ तथापिसत्रा०जितन्हेपनाद्यर्थं मणिमादातुंबिलंप्रविष्टइत्याह ऋक्षेति ऋक्षसं
बंधित्वात्तमोव्रतत्वाच्चभयानकं अतोबहिर्जनान्वस्थाप्य यतोभगवान्दयादिगुणाब्धिः १९ तत्रबिलेवतस्थेन्वेषणाद्विरम्यावसरंप्रतीक्षतेस्मेत्यर्थः २० नरंतत्राप्यपूर्ववीर्यसौंदर्यादिभिरद्भुतं आगंतुकत्वाद्भयंसो
प्यतयानतिभयाद्धतिः २१ पुरुषंनराकारब्रह्मरूपंतंप्राकृतंमत्वा यतःकुपितःक्रोधेननष्टविचारः २२ द्वंद्वेतियुग्मकं तत्द्वंद्वयुद्धमष्टाविंशाहमासीत् विंशतिपदेतित्लोपश्चार्षः भगवतिस्तील्लाकौतुकाज्जिगीषाज्ञा
बवतीतुब्रत्तितागर्वात् दोर्भिरितिप्रत्येकंभूजद्वयात् मुष्टिभिश्चेति शस्त्रादिक्षयात् २४ मुष्ट्याघातैर्विश्लथान्यंगान्युरूणिसंबंधिस्थानानियस्यश्रांतीवेति श्रीरामेपिताद्दशशक्तिप्राकट्यानुभवान् २५
बलिष्टंतंज्ञात्वापरमशक्तित्वेनस्तौतिजानेइति सर्वभूतानांप्राणेस्थितंप्राणाधीनमिंद्रियसदयदेहबलं रूपंत्वांजाने किंचविश्वंततच्छक्तिव्यापकंपुराणपुरुषंप्रकृतिनियंतारंप्रभविष्णुंतेतोपिमहाप्रभावः
अधीश्वरंसर्वनियंतारं २६ सर्वेत्यादेहेतुः त्वमिति विश्वसृजांविश्वसर्जनादिशक्तिसहितानामपितेषांस्रष्टा विधमुत्येहेतुः यच्चसत् सत्यमुपादानंतत्वं एवंपुराणेत्यादित्रयेक्रमेण हेतुत्रयमाह क
करेण

नागद.ऊ. ५ कृष्ण

लयतां प्रवर्तकानां सर्वेषामपि कालः फलप्रवर्तकः परः ईशो निरतिशयैश्वर्यः व्यष्टिसमष्टिरूपाणां सर्वेषामात्मनामात्मांतर्यामी इति २७ अतो मम इष्टदेवतं रघुनाथोपि त्वमेवेत्याह यस्येति ईषदुद्दीपितेन रोषेण ये
कटाक्षमोक्षाः तैः क्षुभिता ग्राहा मकरा महोरगाश्च यत्र सोऽब्धिर्मार्गं दत्तवान् तत्र च स्वयशोरूपः सेतुर्येन कृतः लंका च तदाहिता यस्येषुच्छिन्नानि रावणादीनां शिरांसि भुवि पेतुः स त्वमेवेति जाने २८ इतीति युग्मकं एवं विज्ञा
तविज्ञानेस्व वैभवेयेन तमृक्षराजानं रज भावः सामासांतानित्यत्वात् कृतयुद्धेपि नात्मसल्या इत्यृक्षतः यतो देवकीसुतो भगवान् २९ अतो युद्धश्रममर्तुं स्वकरेण कृपया सर्वांगेषु स्पृष्टा अरविंदाक्ष इति प्रसन्नदृ
क्षया पश्यन्निति भावः मेघेति शुके तन्नाभीर्यस्य स्योत्कंठ्यं ३० मणीति इदं च कृतं भगवता न प्रतिमृत्तः सविस्तरमुक्तमपि मुनिना पुनरुक्तिभिया संक्षेपितं ३१ स्वामिति मनुष्यरूपत्वेपि तदीयत्वं व्यज्यते तस्य नाना
रूपतया तत्संभवात् कन्यामनूढां जांबवतीं पितृप्रेम्णा तन्नाम्ना ख्याता इयं श्रीरामावतार एव जाता आसीत् तदा च पित्रा प्रदिष्टिताप्येकपत्नीव्रतेन तेनास्वीकृता चिरं तपस्तदेवेदानीं तं प्रापेति पुराणांतरे अत्र मन्ये सहायः
स्यादपि श्रीरेवतीतपः यत्कृशेनोपहस्येत धवाधिकवया इति ३२ जनाः सत्राजितीयाः अतः पुरमेव ययुः नेतु तद्विना दुःखितं चं द्वारकावासी स्वाभाव्यात् ३३ देवीं स्कनयत्रान्वयि सुहृदः सख्यायः ३४ उपलब्धेये अचि
रादेव प्राप्तये ३५ हरिकृदेव्या उपस्थानात् या तान्प्रति आदिष्टादत्ता यो श्रीस्तया सहन्त्राश्री दर्शनकाल एव तेषां प्रादुर्बभूवेत्यर्थः अनयासहोत्त्या तु पदेन चाशिषो हेतुत्वात्तां व्यज्यते ते पांत द्वारा धनं श्रीकृष्णप्रेमवि
लासरूपमेव स्वरूपयेव प्रादुर्भूत इति भावः सिद्धो मणिर्जांबवती प्राप्तिर्जांबवदनुग्रहादिरर्थो यस्य अतः सद्वारः ३६ यदि मत्तो बभ्रुः कथंचित्सुन रागतः स्यात्तर्हि तमुपलभ्येव मम वृष्णीकेत्रीं सर्वेंद्रियचेतनाहेतुमुपलभ्य
न्यसर्वे जातमहोत्सवा आसन् ३७ स भामध्येत तत्र च राज्ञो मुग्रसेनादीनां संनिधौ मणिं सत्राजिताया पर्ययत् यतो भगवान् सर्वैश्वर्यपूर्णः निरपेक्ष इति भावः ३८ व्रीडा च ततः स भातः स्वेनेति भगवत्कृतावमानादिति निरा
सः ३९ सद्दत्यर्धकं एवेत्यन्यचिंतारहित्यं बलवद्विद्वैरेण चिंताकुलो कुत्रदिति शेषः ४० ननु ध्यानमेव सार्धद्वयेनाह कथमिति सार्धकं रजः मलपराधं साधु भद्रं जनः सर्वलोकाः स्वस्मिंश्छापयोगतामाह कृष्णमिति मू
ढं मंदमतिं सर्वत्र हेतुः द्रव्यलुब्धमिति ४१ एवं ध्यात्वा तच्छांत्युपायं निश्चिनोति दास्य इति ननु दुहित्रा कथं तत्प्रसादो येन तच्छांतिः स्यात्तत्राह स्त्रीरत्नमिति पारिबर्हत्वेन रत्नस्य स्यमंतकमणिं तस्यापराधस्य शांतिः अन्य
थान्येन मरणादिनापि न शांतिः ४२ एवमिति कथमित्यादि प्रकारेण कृतनिश्चयः जहार हजहार स इति पाठो श्रीशाय मणिनास सत्राजितउपाहरत् सत्यतामां दुहितरं जितसन्मतिः ४३ सत्यभामावतास सत्यभामो सत्रा
ढाचित्रमत्र किं सुवर्णवृष्टिः सौवर्णततिः संचीयते नरैः १ भामावति गता भामा न चित्रं श्रीमति श्रिया निपत्यते स्त्री सजातिही नेगंतुं तुल्यज्ञते २ तदाह तामिति यथाविध्युपयेमे इति एवं जांबवतीमपि गृहमानीयोपयेम
इति ज्ञेयं बहुभिः कृतवर्मादिभिः ४४ प्रतीच्छामः स्वीकुर्मः नयमिति रामाद्यपेक्षया अस्माकं कोपि न प्रतीच्छेदित्यर्थः रूपेति निजजनान्पालयेति कदाख्यः फलेति मणिनादृष्टमदृष्टं वायस्फलं तदस्माकमपि त्वदंत
रंगत्वात्स्यादिति वाक्यार्थः व्यंग्यस्तु तवापुत्रत्वात्त्वद्धनमस्मदीयमेवेति ४५ इति श्रीमद्भागवतदशमस्कंधमध्यगः षट्पंचाशत्तमोध्यायः घसतोषिणी सारसंग्रहे १ इति षट्पंचाशोध्यायः ५६ २ भगवान्त्वयत्रा
श्रे द्रहुर्येश्रोराहकेतुर्जं पिधानं हिर्वारितवान् स्यमंतकसुदर्शनात् १ सद्यक्रूरं मणेः पात्रं संकल्प्याक्रूररामयुक् उपामंत्र्य कुरून्गंतुं सर्गो मोगात्ततोच्युतः २ इति श्रिस्वामिपद्यार्थो न सत्राजितमारणे मंत्रिते सहतेनेति ह्यन्यथा दुर्य
शोदृढं ३ श्रीकृष्णमीशात्तं भगफल्लं स्पष्टयितुमाह विज्ञातार्थ इति पांडवानां तु गृहदाहेि लाध्वनानिर्गता इत्ययो विज्ञातो येन यतो गोविंदः सर्वेंद्रियेशः कुंतीं च दग्धां श्रुत्वा कुल्यकरणं कुलोचितव्यवहारार्थः १ स विदुरं कृपं तद्दिने
तस्य कृपगृहेगमनात् भीष्मादिभिः सह तुल्यं दुःखं दुःखानुकरणमात्रं पांडवनिर्गमस्तु विदुरवद्ययोः हस्पष्टं २ शतधन्वानं तस्य देसोंशत्वेन दुःशीलत्वात् गृह्णीत त्वया ३ जीवतः सत्राजितः कथं मणिर्गृह्यते तत्राचतुः येइ
ति अस्मभ्यमिति बहुत्वे शतधन्वापेक्षं संप्रति श्रुत्येति पूर्वमेभिर्याचितापि नादायि ततो मिथ्याभिशापदोषात्स्तवबलवद्वैरेण शरणार्थिना तेनैतेभ्यः प्रतिश्रुतेति तेयेतेनेन बहुत्रियाचनमात्रस्य पूर्वत्रोक्तत्वेन नाविरोधः
कन्यारत्नमिति स्वाभिलाषवत्त्वं तदप्राप्त्या धिग्व्यंग्यः विगर्हीतिमहाधीः भ्रातरं मृतं प्रसेनं कुतो नानुगच्छेत् हन्यतामिति भावः भगवद्भक्तस्याप्यक्रूरस्य इत्थमुक्ति व्रजजनकोपेन मतिव्यासात् कृतवर्मणश्च कंससंगेदा
दोतु यो श्रीकृष्णमिथ्याभिशापादेव सत्राजिते क्रुद्धाभ्यां ताभ्यामेवमुक्तमित्यपरे ४ असत्तमः यदुवंशपांसत्वेपि रकं सादिवदस्तू स्वभावः पापः मतिभेदनात् मलीभूत पापवासनः अतः क्षीणायुः अतः सुतमप्यवधीत् ५ स्त्रीणामि
त्यनादरे षष्ठी कंदने रोदने ६ वीक्ष्येति तदुपश्रुत्य तत्रगमनात् शुचार्त्त केन व्याप्ता मुखंतीस्निहेन पितृदोषादिकमविचारयंती ७ तैले प्रास्य ने भगवतापि जिजीविषया यद्वा भगवतः शोकक्रोधजननाय तस्य दर्शनार्थं
पूर्वमेव ज्ञातोर्थः स्वयां चाभंगफलं येन ८ ईश्वरावपि वियोगे रोदनादिकं मनुष्यधर्ममनुसरन्त्य परममिति श्वशुरस्य सुप्तस्य धनार्थं चौरेण वधात् लोके लज्जावहत्वाच्च १ आरेभे तस्य कृतवर्मादि सहायं भ्रात्वा स्व
बंधुमेत्य नाद्युद्यमं कृतवान् ततो क्रूरादि भक्तप्रेमवशात्त्वविद्रा व्यैकाकिनमेव हतवानित्युख्यं १० प्राणस्येव प्राप्तुमिच्छयानतु यशोधर्मादेः आदौ कृतवर्मणो याचनं सेनाध्यक्षत्वात् अक्रूरस्य सहायत्वे संशयाच्च ११ अहं
तु प्रतिकूलं न कुर्यामित्यर्थः वृजिनमपराधं १२ अपीतो मृतः १३ पार्ष्णिग्राहं सहायं १४ श्रीरामस्य श्रीकृष्णात् नवविवक्षयेकत्वेनाह यइतित्रिभिः लीलया नायासेन यस्य चेष्टामीहामभिप्रायं केपि न विदुः य
स्याज्ञया मायया मोहिताः अत्र संधिरार्षः तस्मादेतामपि चेष्टां को जानीयादिति भावः १५ इहापि प्रभावो हस्यतामित्याह यइति जन्मादिलीलयासपहायनः अतो बालः आविष्कृतबाल्याकारः तथापि ब्रीडोलं श्रीलामयं
गुरुतरमिति भावः एकेन वामेनैव पाणिना तत्रापि लीलयैव यदधार १६ अद्भुतकर्मणे तस्मै नमः यतः कृष्णाय नराकृति ब्रह्मणे भगवते सर्वैश्वर्यवते अंतश्शून्याय अनादये कूटस्थाय निर्विकाराय यद्वा रैवतकादि
शिखरविहारिणे आत्मने तर्यामिणे साष्टांगं प्रणमन्पुनराह नम इति १७ महामणिमिति सत्तमेन धार्यतो अतो क्रूरेन्यासरूपेण धृत्वा पलायत १८ गुरुश्वशुरस्तं हंतारं १९ शतयोजनं गत्वा ततः पतितं विसृज्य
अन्वद्रवत् रथं त्यक्त्वा धावत् तथैव नीरमार्गात् रुषा चौरवत्तुरुहननक्रोधेनेति चोरस्य पलाइतस्याप्यनुद्रवणं न्याय्यमिति भावः २० अतोतो धावतः भगवानिति पाठः सर्वज्ञोपि प्रियजनप्रेममयरूपाः रामा
गतो नानीय मणिं वृत्तमपृष्टेव चाव वीदिति भावः व्यचिनोत् मृगयामास एतच्च रामवंचनाय अयमाशयः स्वभक्तो क्रूरे दुःसंगदुःकर्मप्रेरणदर्शनात्किंचित्कालं तस्यागरूपत्रासनेच्छाभक्तत्वात्मणिदुर्लभ
च भगवत आसीत् तावन्मात्रशासनं विकर्मप्रेरकाय मणिदाने चाग्रजानानुमन्यते इति मान्नासीदेवायमक्रूरश्च मणिं गृहीत्वा पलायनं ततश्च सर्वस्वसंकल्पितं भविष्यतीति २१ अग्रजातिकमेत्य कृथाहत इति चौरे

राम ६

मिथ्येवोक्तमिति भावः शतधन्वानिहतो मे क मणिर्नेहित त्र कुत्र तेनोक्तः पृष्टं न मया किमिति दंच्युतरुषेतिल्लपितं नुविंतोस्यात् १२२ नन्वमित्यादिकोपवाक्यं कस्मिंश्चिदक्रूर एवेति भावः अन्वेषणं निच्छ २२ सर्वज्ञोपि मद्वंचनायैवंव्य
वहरति स्वयं च मणिन्यासास्पदं ज्ञात्वापि नानीनीयति ततः पुनर्लोकापवादपात्रं स्यान्मयानु तदसह्हि घुना नात्र स्थेयामिति स्यन्निप्रेत्य कोपं व्यनक्ति अहमिति यदुनंदनः यदुपुरीं गंतुमर्होपीति भावः २४ अकस्मात् दृष्ट्वा अहर्ण्यं वै अ
र्हणीयमिति पाठो २५ उवासेति सार्धकं कतिचित्समाः वत्सरान् प्रासंगिकमाह ततइति काले श्रीकृष्णातोरुषित्वे कांतागतत्वान्निज्ञावसरे धार्तराष्ट्र इति दुर्मंत्रेण पित्रा प्रेरित इति भावः २६ भीमामप्यवंचयदित्याह केशाव
इति प्राह इरधावनादिप्रकर्षयुतमाह यतः प्रीयायाः प्रियकृत् २७ हतस्येति चोरेण शस्त्रतो हते विहितायास्ता अपीति भावः २८ यादवत्वाच्चहन्यदिति पूर्वं विरुद्धश्चोतद्धं श्रूत्वा तु विशेषतस्तस्तो द्वारकायाः सकाशात्कृ
पतुः यतः शतधन्वनः प्रयोजको तत्राक्रूरः श्रीकृष्णानुमतेन गतः कृतवर्मात्व क्रूरमयं प्रदर्शयेदिति भियोपेक्षितः इति ज्ञेयं सर्वज्ञवंचनासंभवादिति २९ तदेवं श्रीवाराणस्यां दानपतिनाम्ना मणियुतेक्रूरे रुक्मवेदिकमहाध्वरया
जिनी निवसति सती श्रीकृष्णेनैव प्रेषितोक्रूर इति जनापवादे च पुनरकृतेसत्यभामारामादीनामप्यविश्वासे तन्निरासायाक्रूरमाहूय श्रीकृष्णावक्ष्यमाणरीत्यावाचेति तत्वतो कृतसंगोप्य केचन ऋषयो भगवतारिष्टानि स्वेच्छ
योङ्गाव्याक्रूरापगममहल्लकान्यरिष्टानीति स्वयंकृष्णमुखतश्च ख्यापितं तदानयनहेतुमेव तात्त्विकमिव वर्णयंति तेनाधुनिकोमान्समीदिति गोपि- तमुद्घाटयितुमनुवदति अक्रूर इति अरिष्टा इति पाठे तु स्त्वमार्ष त्वकंपादयः
त्यर्थः तापाश्चासन् ३० उद्घाटयति इतीति एके वेशोपायनादय एवं यदुपदिशंति तस्माक्रूरस्व मुक्तं श्रीकृष्णमाहात्म्यमविस्मृत्यैवोपदिशंति महत्सूक्तस्वोक्तविस्मरणासंभवात्किंतु भगवतास्वाभिप्रेतं संगोप्य यदर्थमरिष्टान्य
ङ्गाविताभि तमेव तस्याशयं ख्यापयितुं तथा वर्णयंतीत्यर्थः अक्रूरापगमएवारिष्टदर्शने हेतुरित्येव तात्त्विकं कुतो न तत्राह मुनीति एकस्यापि मुनेर्निवासे एकस्याप्यरिष्टस्य दर्शनं न घटेत किंपुनर्मुनीनां सर्वेषां निवासस्य भगव
तो निवासे सति बह्वरिष्टदर्शनं तस्मादक्रूरानयनव्याजायभगवतैवोत्थापितान्यरिष्टानि इत्येव तात्त्विकमित्यर्थो युग्मकस्य भाति ३१ कथं कृष्णमुखतः ख्यापितं भगवता यदेके नुसरंति स्मेत्यपेक्षायां तद्वर्णयति सपादद्वयेन देवइ
त्यादित्रिकं इदेकाशिदेशे प्रवर्षतीसती ३२ तत्रेति ततोत्रारिष्टानि तदपगममहल्लकानीत्यर्थः ३३ एकवचोजनेषु तद्युष्यमाणं श्रुत्वा इहैतावत्कार्यमात्रे मदिच्छायाः कारणत्वेन मदिच्छाकृतापगमश्चैत्स्कृतयं नियतं नकिंतु
मदिच्छैवेति मत्वा मनसि विभाव्य ३४ प्राह इत्युक्तं प्रकर्षं विवृणोति पूजयित्वेति प्रियाः कथाः वसुदेवाद्यानुकूल्यायकंसातिके स्थितिदं तद्धार्यं अजगमनस्वदर्शनानंदकं समंत्रव्यंजनादिरूपाः सांप्रतिकवियोग
खेदादिरूपाश्च विज्ञाताखिलश्चासौ चित्तज्ञश्च मणिमादायागमनं तेन निस्पृहत्वं चशात्वेति भावः स्मयः स्वस्य मणिज्ञानव्यंजनाय ३५ श्रीमान् सर्वसंपत्तिमान् दुरपन्हव इति भावः किंच पूर्वमेव सर्वेषां नो विदितः ३६
अन्येषां ग्रहणेधिकारनिरासायाह सत्रेति अनपत्यत्वादिति कन्यांतरमपि निरस्तं अपःपिंडाश्च दत्वाऋणं चापाकृत्य शेषितं शिष्टं दायं दुहितुः सुतागणिः पुरितिशास्त्र पत्नी दुहितरश्चैवेति स्मरणपितस्तत्सोनो
सहमरणात्तस्य भामायाश्च निरपेक्षत्वात्सुताइत्युक्तं ३७ तथापीत्यर्धकं हिएव आस्तांमात्रं न तेस्तु स्वमिति भावः एतेन रामादितर्कितानसमै दानेच्छाद्विता ३८ किंचितिसार्धकं दर्शयस्वमात्रं यतो मामग्रजो
पि मणिं प्रतिमणि मंयीनास्तीति न विश्वमिति तस्यरोक्षं तशांतधन्ववधमणिविचयनादिति भावः इदं मणिप्रदर्शनाय तदुद्योजनमात्रं नतु रामस्य तथा भाव परंशांतधन्वना कस्मिंश्चित्पुरुषेन्यस्त इति तदुक्तेः सम्यगि
ति दानयज्ञादिनात्वय्यप्याशंकत इति भावः शांतिमन्योन्यकलहोपरतिं मणिसत्वेलिंगमन्यच्छिन्नाइत्यादि श्रीरामश्चेतः पूर्वं मिथिलातः समानीत इति हरिवंशे आत्मश्चोवशातानीतः श्वफल्केति महतः पुत्रत्वेन स
लक्षत्वेर विप्रतमतोवासश्छन्नं ४० रजः अभिशापं स्वेच्छयैवायं मणिमपनीतवान् एच्छतैनं सर्वमित्याद्युक्तिभिः समकृत्या अन्ये दुर्धर इत्यादि विषेणार्पयत् ततः प्रारब्धस्य क्रूरस्तं मणिं कंठे बध्य विचचारेति हरिवंशे ४१
श्रीकृष्णस्य कर्तुमकर्तुं शक्तस्य सर्वव्यापकस्येमामद्भुतां कथां दुःखहं श्रीभक्तिवर्धनादिमंगलकरीं श्रवणानंतरं स्मरेद्वा सद्दुःकीर्तिनमल्लं दुरितं चहित्वा शांतिं श्रीकृष्णनिष्ठां प्राप्नोति ४२ इति श्रीमद्भागवद्दशम
स्कंधः संश्रयः अध्यायसप्तपंचाशस्तोषिणीसारसंग्रहे १ इति श्रीभागवते उत्तरार्धे सप्तपंचाशोध्यायः ५७ कालिंद्याद्याः पंचस्त्रीरक्षिप्रमुखपंचकरणानां सूर्यादिदेवतानां शक्तीमूर्तीऊवाह किमुभग
वान् १ भानुभक्तसुता सांमो भार्यामुद्वीक्ष्य भास्वरां ततोतिभास्वरांभास्वत्सूतां मत्वोढवान् किमु २ प्रासंगिकसमाप्यैवं विवाहान्प्रकृतान्ब्रुवन् औद्धाकालिंद्युद्वहनं तत्प्रसंगं च भाषते ३ एकदेसादिना प्रतीतान्
सर्वत्र पुनरागतत्वेन विख्यातान् युयुधानः सात्यकिः तस्य मुखैः सैनैः तस्य मुख्यत्वं पांडवप्रियत्वात् १ अखिलेश्वरमपि गृहएवसहसागतं दृष्ट्वा मुकुंददर्शनादेव सर्वदुःखतोविमोच्यानंदप्रदं ५ अनोहर्षी
दुन्तसुः यतः पृथायाः भक्तायाः पुत्राः वीरा इत्यस्थाने शेषविशेषः प्राणा इंद्रियगोत्तकानि मुख्यप्राणमिव २ एनःस्तदप्राप्तिदुःखवशमेव वीक्ष्य मुदं प्राप्ताः किंपुनः सानुरागस्मितं ततत् ३ तदेवमुभयेपि स्व
स्वाचितं विसृष्टस्य पुनः सावधानास्तच्चक्षुरित्याह युधीति फाल्गुणं समवयसं परिरभ्य स्थितः कनिष्ठाभ्यां यमाभ्यां वंदितो बहुत्व वादित इति क्वचित् रोहिण्यां श्रीकृष्णः फाल्गुन्यामर्जुनोजात इति सप्ताष्टदिनैः
श्रीकृष्णान्येष्वेपि सख्यात्समत्वेव्यवहारः ४ परमेशाजासनतोपि श्रेष्ठं तदुपवेशनार्थमेव निर्माय स्थापिते कृष्णाद्रौपदी कृष्णाकृष्णमिति सनामत्वेन मैत्रीव्यंग्या नवहुभार्यासत्यप्यनिंदिता पार्थैर्नवमचिरं
परीणीता तथैव कृष्णवदेव नंदितोवंदित इति पाठो परितः समीपे आसत उपविष्टाः ६ पतिनिकटे स्थिता द्रौपद्युतस्तन्मिलनं तत्रैवोक्तं मथकुंत्यंतःपुरे प्रविष्टस्य तत्र स्थितयाकुंत्या मिलनमाह पृथामिति कृतमसाव
हं नमस्कृत्य शामीस्यतिवादनं येनहार्दप्रेमतेनार्द्रसजल्ले दृशौ यस्याःस्तया लिंगितः पितृष्वसारमतः परिपृष्ट्वा बांधवाःस्वदेवादयो यं सः ७ क्लेशांस्मरंतीतत्र च क्लेशानामपायो यस्मात्ता दृशं मनसि दर्शनं यस्य ता
दृशा तं स्मरंति प्रेमवैवश्येन रुद्धः कंठो यस्यास्तथा सती तमाह ८ त्वयैवास्माकं कुशलमित्याह तदेवेति नोस्मान् ज्ञातीन् स्मरतात्वयः यदा भ्राता क्रूरः प्रेषितः ९ ज्ञातीनित्युक्तत्त्या प्राप्तं मोहं वारयति नेति विश्व
स्य सुहृत् हितकारी आत्मा च तस्य ते स्वपरभ्रांतिर्न संभवति तथापि कारुण्यादिगुणमयत्वेन भावयतां हृदितथैव प्रकटः सन् मुहुः क्लेशान्नाशयसि १० एवं मात्रोक्ते भक्तवात्सल्यं श्रुत्वा स्वयं दीनत्वमवलं
ब्य दीनवात्सल्यं वर्णयन्नाह किमिति यस्मान्नो दृष्टं स्वमस्माभिरीश्वरसे इत्यर्थः बुध्यर्थत्वाद्वर्तमानोक्तः कुमेघसां भक्तिहीनानां दुर्दर्शी इति त्वद्दीनवात्सल्येनैव दृष्ट इति भावः यस्माद्धीश्वर हे स्वतंत्रे तं यद्वा अधि

गोदीनां नामस्य स्मार्कं पालक ११ विभुः प्रभुरिति पाठो सुखमवसादिति शेषः १२ कालिंदीदर्शनप्रकारमाह एकदेति युग्मकं खांडवदाहोत्तरकाले तदैव गांडीवत्वा भात् १३ विपिनं बृहदिति पाठः विपीनं वनमिति पाठे
एवं भाति वनं व्यालादिसहितत्वेपि तस्य निवासयोग्यं यतः सवीरहा तएव विहर्तुं मविशत् वनं नपुंसकं नदिनिवासालयकानने १४ शरभाः अष्टापदाः खङ्गा गंडकाः १५ एतेषु मेध्यास्तान् राज्ञे युधिष्ठिरं याजयितुं नि
अमेध्यास्तु व्याल व्याघ्रादयः परस्मिन् हकत्वाद्धताइति भावः १६ महारथा वित्यक्त्वाच्चरथारोहात् दूरतो दर्शनं चरंतीं रथघोषं श्रुत्वा स्वगोपनायान्यत्र प्रसर्पंती यद्वाचरंतीं तपइति शेषः कन्यये मोनइच्छाविति भावः
चारुदर्शनं रूपं यस्याः सा तां १७ चारुदर्शनात्वव्यंजनायविशिनष्टि वरेस्यादिना प्रमदोत्तमां सर्वथा सुंदरीं कृष्णेन प्रेषितः सन्नेवनतु स्वयं तत्कामेन १८ का देवीमनुष्यादिषु कतमा कस्य पुत्री कुतः स्थानादागता किं कर्तु
मिच्छसि कन्यामनूढां मतः पतिमिच्छंतीं मन्ये कन्यामित्यत्र सर्वमिति क्वचित् शोभने हे गुणवती अत्र स्त्रश्रोणि वरारोहामित्यादौ रुद्धयासो दर्पस्येव प्रतीतिर्नेतु योगेन भाव विरुद्धावयवार्थस्य यथा भगिनीपदे स्वसृमात्रा
र्थस्येति शेषं १९ मदभीष्टास्फुर न्यान्यमिति ज्ञात्वा सहसेव स्वेष्टमाह अहमित्यादिना देवस्येति देव्यस्मीति भावः वरेण्यं श्रेष्ठमतस्तमेव पतिमिच्छंती २० श्रियः सर्वसंपदो निकेतनं वीर हे धर्मेश्वरेति नान्यकामोच्चमिच्छसीति
भावः सुदुर्लभोपि दीनवात्सल्यात्स्वीकरोतीत्याह तुष्यतामिति सविष्णुर्यतो भगवान् कारुण्यादिगुणकः अतएव मुकुंदो दुःखमोचकः किंच्चानाथानां शरणं यमुनेयं खलु द्विविधमूर्त्या वर्तते तत्र साक्षाद्रूपेण भगवत्पत्नी आभास
रूपेण समुद्रपत्नीति २१ तत्स्वेष्टं ज्ञात्वा युक्तोनामाह कालिंदीति यमुनाहं कालिंदीति सम्यक् तदेकपर्याय तयाख्याता जलेस्वप्रवाहमध्येवसामि किं जलेचरवन्नेत्याह निर्मितइति रविदेवेनस्वजलेएवनिर्मितेगृहइति प
रमदिव्यत्वं तथापि गृहे मोहं नेत्याह यावदिति न मे भक्तः प्रणश्यतीति प्रतिज्ञातश्रुति श्रुन्यस्य दर्शनं यावदिति तत्कर्तृकांगीकारपर्यंतमेवेति भावः २२ आदावेवतद्विधान् २३ प्रसंगादेतत्पूर्वभवे चरित्रमाह यदेति चतु
र्भिः अत्रायं क्रमः पूर्वं नगररचनं ततः खांडवदाहः ततः सभाकरणं ततः कालिंदीलाभ इति यदैव पार्थैः संदिष्टः श्रीकृष्णस्तदैव तेषां देवशिल्पिना नगरमकारयदिति पार्थवाग्वश्यत्वं २४ नितरां चिरं सुखेवसन् भगवानप्यनु
नस्यसारथिरास २५ अक्षयौ बाणपूर्णौ २६ खांडवदाहक बन्हेर्मोचितो भगवता तस्य सख्ये र्जुनाय यस्मिन्निति सामान्येन पुंसकं जलस्थलं हरूस्थलज्ञानं यत्र तादृस्यां यस्यां सभायां भ्रमआसीत २७ एवं पूर्ववृत्तमुक्त्वा कालिं
द्यानयनोत्तरवृत्तमाह सइति तेन धर्मराजेन पूर्वं मुहुर्जिगमिषन्नपि कुल्लशोनानुज्ञातत्वान्नययावधुना तु कालिंदीविवाहाद्यावश्यकमालोच्य सम्यगनुज्ञातो ययौ सुहृद्भिरर्जुनाद्यैः २८ स पुण्येविवाहो कृतो नक्षत्रे चेति द्वं
द्वैक्यं तत्रापि ऊर्जिते रविचंद्रताराबलयुते परममंगल्लोपि इति लोकशिक्षार्थं तत्तदपेक्ष इति भावः २९ हाभ्यामित्र विंदाविवाहमाह विंदेति अवंतीराज्ञो स्वयंवरे पिन्यषेधत्तौ ३० पितृष्वसुरिति यदुवंशोत्पत्कन्या ह्याहस्याचा
रप्राप्तत्वान्न दोषः ३१ षष्ठं विवाहमाह नग्नजिदिति भगवद्धर्मपरो योध्यायामासीत् सत्यानाम्नी पितृनाम्ना नाग्नजितिस्यपिख्याता देवीद्योतमाना ३२ सचतां भगवते दित्सन्नपि जरासंधादिभयादुपायमकल्पयद्दित्याह
नेति गोवृषान् वृषश्रेष्ठान् वीरगंधमप्यमहमानात् खलान स्वरस्वभावान् ३३ भक्तानां पतिपाल्लकः तन्मनोरथान् पूरयितुमिति भावः ३४ प्रथममासनादिना पूजयन् पुनश्च महताद्रव्येण शास्त्ररीत्या पूजयन्तं प्रति
नंदितवान् ३५ एवं सदसिवृतमुक्तो नर्गृहमानीते श्रीकृष्णेमोवृत ०माह वरमीति अभिमतं सर्वेषां संमतं स्वेष्टं चरमयापतित्वेनाश्रितमतः सर्वगुणपूर्णमित्यर्थः अंतःपुरागतं दृष्ट्वा संकल्पयामास संकल्पमेवाह भूयादिति म
मामत्ता आशिषो यं पतिरेव सत्याः करोतु अनलइति पाठे इष्टदेवताग्नेनार्चितो ग्निः सत्याः करोतु यदितस्त्वज्ञानियमो रक्षितः स्यादित्यर्थः ३६ अर्चितं पुनरर्चितं तुं सतमेवमाह नग्नजिदिति शेषः अल्पकः अल्पतो प्यल्पः ३७
तस्य माहात्म्यं वर्णयन्नतोषणा संभवमेवापपादयति यदिति इ पस्ये त्राई पस्याय इति पाठो पालनेच्छया अदधत् अदधादिति सर्वोचवानित्वे केन साधनेन ममाधमस्य तुष्येत् तन्न संभवयामीत्यर्थः अत्र स भगवानिति प्रत्य
क्षपिपरोक्षोक्ति गौरवात् ३८ कृतस्त्रिया र्पितस्या प्यासनस्य परिग्रहो येन निजाभिलपितत्वाभादिति भावः ३९ क्षत्रियोचितप्रार्थना चातुर्येणाह नरेंद्रेति निजधर्मेति बल्लाकृरणमेव तस्य श्लाघ्यमिति भावः सौहृदइच्छया
सुखसंबंधार्थं यद्यात वयत् मयि सौहृदं प्रेम तेन यामदिच्छा तयाव्ष बंधनं तच्छुल्कं विभाव्यगुरुर्नर्मणाह नहीति वयंक्षत्रियाः ४० गुणानामेकस्थानस्य यस्य तवांगेवसति गुणावशीकृतेत्यर्थः ४१ अस्माभिरिति ब
हुत्वेज्ञात्यपेक्षं कन्यावरतायोग्यस्य तव प्राप्तीच्छया या पुंसां बलपरीक्षा परीक्ष्ययेति पाठे वरपरीक्षार्थं या बलपरीक्षा तदर्थमित्यर्थः हे भक्तानां पालकेति तेनः समयं पालयेति भावः ४२ एवं स्वदत्तं पंपरि हृत्य समय
माह सप्तेति एते इति तेन सह वृषावासं गत्वा निर्दिशति दुर्दांता अशिक्षिताः दुरवग्रहाः अनिग्राह्याः यत एते तर्जंग प्रापिताः एतान्योनिगृण्हाति तस्य कन्या देयेति समय इति शेषः ४३ यत् यदि इमे वृषा निगृहीताः स्युस्त
र्हिं वरो मत इति असंदेहे संदेहवचनं अथवा यत् यस्मात् त्वयैव निगृहीताः स्युरेव तस्मादनेन यत्नेन भवानेव वरोभिमतः पूर्वमेवनिर्धारितः तस्मिं मम सभन्मनोरथं पूरयेति भावः ४४ आकर्ण्येततः स्मितत्वेति त्रिंय प्रभुः गोप
लीला त्यासादिव तन्नसमर्थः आभानं श्रीमूर्तिं सप्तधाकृत्वा प्रकाशयित्वा बहुपोषितांसं तोगेष्वेवं बहुघा कृत्वा योग्यः स्यामिति सत्यां प्रतिव्यंजयितुमिति भावः अकृत्येति छेदो वा सप्तधा न कृत्वापीत्यर्थः यतः प्रभुः ४५
दारुमयान् तत्रापि दामबद्धान् द्वितीयस्कंधे येच प्रलंबेत्यत्रोक्ता स सप्तोक्षमुक्तिस्तत्स्पर्शप्रभावाद्धतेत्वो ध्या ४६ अकस्मात्ता हृशा स्वभाग्यफलोदयाद्विस्मितः ४७ दुहितुः प्रियमिष्टं पतिंतत्त्व्ध्वा प्राप्तं दृष्ट्वा ४८ परमो
त्सवमाह शंखेति शोभनानि वासांसि स्रजश्च येषां ते च ते कुंडलाद्यलंकृताश्च नरस्त्रुः ४९ शतेति युग्मकं धेनवानवप्रसूता गावइति सवत्सत्वं धेनूनामादावुक्तिः श्रीकृष्णस्याधिकतोष दत्वात् गजादिभ्यः पूर्वं युवती
नामुक्ति दीस्यादिनीतरं गत्वा तदल्पसंख्यत्वाच्च निष्कमात्रोक्तिः प्राधान्यात् ५० नागादिस्यादौ ज्ञातानिकल्प ५१ आवृत्तोकृत्वा स्नेहेन विशेषतो बहिरण्यश्रुणाक्लिन्नं हृदयं यस्य ५२ स्वस्व देशाश्रुत्वा गत्य रुरुधुस्तदापि यदुभि
र्भग्नवीर्याबभूवुः के ते ये पुरावृषैर्भग्नवीर्याआसन् ५३ तथापि शार्ङ्गतानस्येतःक्षिपतः व्यद्रावयदर्जुन इति मध्येमध्येतस्य हारकागमइति व्यज्यते ५४ उपागत्येति राज्ञां विद्रावणेन प्रवृत्त इति भावः ५५ सप्तमं विवाहमा
ह श्रुतेति श्रुतकीर्तिर्नाम अपरा श्रीकृष्णपितृष्वसा तस्यैतां भद्रानाम्नीं कैकयदेशाजां ५६ अष्टममाह सुतामिति स्वयंवरे इति मत्स्ययंत्रे श्रीकृष्णेन विद्धेपि दुष्टा राजानो मद्राधिपसुताहर्तुं वत एव मतमिदं नतु कन्याया
इति ततो राक्षसा स्वयंवरो विकारित इति कल्प्य तेन कुरुक्षेत्रयात्राकथया नविरोधः ५७ तौ मंश्रीवराहतो रुग्मांजातंयदाह मुष्टतानाथत्वया सूकर मूर्तिना तत्स्पर्शसंभवः पुत्रस्तदायमप्यजायतेति विष्णुपुराणो
क्तेः निरोधात् तं पुरात् ५८ इति श्रीमद्भागवतदशमस्कंधमध्यगः अष्टपंचाशत्तमोयं तोषिणीसारसंग्रहे १ इति श्रीमदनंतोपाध्यायकाशिनाथोपाध्यायविरचिते तोषिणीसारे अष्टपंचाशत्तमोध्यायः ५८

अवतीर्णः कृष्णश्चंद्रो ऽकूराजकलादवत् षट्कसहस्रज्ञायाख्यायत्कल्लानां मरीचयः १ श्रीवराहात्मजं भौमं हत्वा संस्थाप्य तत्सुतं पुत्रोपि भव्यो दुष्टश्चेत् द्विषट्पाल्य इति बोधितं २ येन भौमेन कर्त्रा चाद्येन हेतुना
ताः षोडशसहस्रस्त्रियो निरुद्धाः स च भौमो येन प्रकारेण हतः एतत्सर्वं तद्विक्रमरूपमाचक्ष्व शार्ङ्गेति संप्रति शार्ङ्गसंबंधि श्रवणे मे स्पृहेति भावः १ इंद्रेणेति सार्धद्वयकं इंद्रेण स्वयं द्वारकामागतेन हृतच्छत्रं यस्य
वारुणच्छत्रहरणेपि देवैर्दत्वा देवमुकुटं हृतं कुंडलं यस्याः सा बंधुरदितिर्माता यस्य तेन हृतममराद्रेर्मंदरस्य स्थानं मणिगं मणिपर्वताख्यं यस्य तेन भौमचेष्टितं छत्रहरणादि तापितो ऽष्टांगप्रणामपूर्वकमित्यर्थः
यया च आनम्य किरीटेत्यादि वक्ष्यमाणात् २ सभार्य इति नारदानीतपारिजातैककुसुमे रुक्मिण्यै दत्ते कुपितां सत्यभामां सांत्वयता श्रीकृष्णेन तुभ्यं पारिजातमेव दास्यामीति रहसि प्रतिश्रुतं तत्र मया सार्धमित्यपु
द्दुसंकटेन तां पारिजातं स्वयमुद्यम्यानीतवतीति रुक्मिण्यादिषु व्यंजयित्वा तद्धरणकौतुकप्रदर्शनपूर्वकं तस्या एव पारिजातदानार्थं तां नीतवान् किंच मद्विनोद एवायं न तु युद्धोद्यम इति नरकादिषु वहेलाव्यंजना
र्थं चेति ज्ञेयं गिरिदुर्गादिभिरुपलक्षितं अतः स्मृतिमात्रागतगरुडमारूढः प्राग्ज्योतिषपुरं भौमनगरं ययौ अथेंद्रोपि स्वपुरं ययावितिज्ञेयं आरुह्यैरावतं नागं शक्रोपि त्रिदशालयं ततो जगाम मैत्रेय पश्यतां
रक्षो कसामिति विष्णुपुराणोक्तेः स्पर्शमात्रेण छेदक नानाशस्त्रघटितदुर्गाणि अनिलदुर्गः कुलालचक्रवद्भ्रमन्वायुः दुर्गं क्रमोवक्ष्यमाण तेदेन क्रमात् ज्ञेयः ३ निःशेषं बिभेद संजहार चक्रेण दीप्तेन ४ यंत्राणि प्रा
कारन्यस्तानि गुर्व्येति नेदने नायासः यतो गदाधरः गदाविद्याप्रावीण्येनैतन्नामा ५ जलदुर्गनिर्भेदनपूर्वकथामाह पांचजन्येति सार्धपंचभिः असरेण्वेवाशनिध्वनिवत् भीषणं शयानो महदाविष्टत्वात् ६
युद्धादिकौतुकं गायन्निव दीर्घं छंदमाह त्रिशूलेति दुर्निरीक्ष्यत्वे हेतुः युगांतेति उल्बणो भीषणो यतोग्निसन्निव हरिमभ्यद्रवत् यद्वा ताक्ष्र्यसुतमेवाभ्यद्रवत् तद्वस्ववधायैवेत्याह यथेति ७ आविध्याभ्रातोल्य
निरस्यक्षिप्त्वा समहानाद इत्यर्थः अंतरं पाताल ८ गरुत्मति आपतद्वत् तस्मै श्रीकृष्णाय गदां व्यक्षिपत् ९ गदयागदाग्रजइत्यनुप्रासार्थं देवरक्षितादिमात्रगणपक्षेणाविस्तारण व्यंजनार्थं च पंचापीति चक्रेणेतिपा
ठो १० इंद्रतेजसा वज्रेण आतुरा शोककर्विक्लवाः प्रतिक्रियार्थममर्षजुषः क्रोधवंतः ११ तानेवाह नामेति नाम्नांक्ति नाम्नैव गुणताप्यनार्थं पीठं पीठनामानं १२ प्रायुंजतेत्यर्धकं आसाद्याजितं ऋष्टिः खड्गभेदः १३
कूर्दं समूहं छिन्नानि शिरः प्रादीनि येषां १२ तथानिरस्तानुक्तप्रकारेण लीलया हतान् दुर्गाद्यारोहणेन वीक्ष्य नरक इति जातमात्रेण नरशिरसा मुखेन ग्रहणात् नामा पयोधिप्रभवैरैरावतकुलजैः गजैः सह निरक्रा
मत् पुरान्निर्क्रांतः १४ स भार्य इत्युक्ति तेन क्रुद्धः सन्निति भावः शातघ्नी शक्तिं च अपि युगपदपि १५ विचित्रा वाजाः पत्राणि येषामिति वेगवत्वं बाणैर्नि कृत्ता बाहुकादयो विग्रहा देहाश्च यस्य तद्वैव यदा विव्यधुस्तत्क्षणे ए
व १६ यानीति सार्धकं शस्त्राणि खड्गादीनि अस्त्राणि शरादिमयानि च यानि प्रयुक्तानि तत्प्राप्तेः पूर्वमेव सैन्यं हत्वा तान्यपि चिच्छेद तत्राप्येकैकं शस्त्रादित्रिभिः शरैरित्याश्चर्येण हे कुरूद्वह इति गजानिति एते च योधैरना
रूढा राजवाहकाज्ञेयाः १७ गरुत्मतेति केचिद्धताः केचिद्भग्नाः इत्यर्थः युधिष्ठित इति निर्भयत्वे १८ किंचिद्विद्रावितं किंचिच्छ्यार्दितं हतं सैन्यमिति पूर्वत्र गजपदेनाश्ववारादीनामुपलक्षणात् यतः ययाशक्त्या १९
गरुडस्कंधात्कंपते नाचलत् गरुडे वितथोद्यमः सन् २० अपाहरत् यतो हरिः २१ शिरो बत भो लोकदृष्टीः रंजयामास यतः पतितं दृष्ट्वा चेन हर्षादिति भावः कुंडलादियुतत्त्वात् समुज्ज्वलत् उज्ज्वलमिति क्वचित्
हाहेति निंदायां पापिष्ठोयमासीदित्यर्थः साध्विति भद्रं जातमित्यर्थः ऊचुरिति शेषः इंद्राय स्तकमाल्यैः श्छादयंत स्तुष्टुवुः २२ स्फुरदृज्ज्वलन्दरखचितरत्नैर्मास्वरे वैजयंती पंचवर्णा तत्सहितया वनमालया पादलंबि
न्या पत्रपुष्पमय्या सह महामणिं मंदरशिखरं २३ प्रणता नतमस्तका प्रांजलिश्च सती तत्कियन्त्रा याबुध्या तुष्टाव विश्वेशमतोब्रह्माद्यैरर्चितं २४ देवानां ब्रह्माद्यास्तेषां पालक अतो दुष्टवधार्थं शंखादिधर
न कानां तेषामेवेच्छया प्रकटितमत्स्यादिरूपाय हे परमात्मन् सद्धुध्यादिप्रवर्तक २५ कुंतीदृष्टमंत्रेण सौंदर्यं वर्णयंती नमस्यति नम इति पंकजाकारा नाभिर्यस्य पंकजानां माला अस्तीयस्य ध्यायतां पंकजवे
तापहरे प्रसन्ने नेत्रे यस्य पंकजवत्कोमलौ पद्माद्यंकितौ वा घ्रीयस्य २६ ईदृक्सौंदर्यादिकं युक्तमेवेत्याह नम इति भगवते सर्वगुणप्रकटनपराय यतो वसुदेवनंदनाय अत एव स्वमहिम्ना जगत्व्यापकाय
किंच पुरुषाणां नीजानामयं पुमर्थलाभ स्तस्यादिबीजाय न च तदर्थे चिंतापेक्षा यतः पूर्णेति २७ तवैवेतदैश्वर्यमित्याह अजायेति स्वयमजायास्य विश्वस्य जनयित्रे च तत्र क्रमेण हेतू ब्रह्मणे इत्यादि ब्रह
त्वादजत्वमनंतशक्तित्वाज्जनयितृत्वमित्यर्थः ननु पित्राद्याजनयितारस्तेषां च भूतानि तेषामप्यदृष्टद्वारा जीवास्तत्राह परेत्यादि पित्राद्यात्मकत्वात्त्वमेव जनयितेत्यर्थः २८ गुणा विश्वोत्पत्त्यादिहेतवस्तेच
प्रधानस्यैव कर्ता च पुरुषः कालो निमित्तं किमत्राहमिति न वाच्यं यतस्त्वमित्यादि त्वमेवैत्वमेवेत्यर्थः प्रभोविचित्रस्त्वष्टौ समर्थ असंवृतः स्रष्ट्यादिकर्मभिरव्यापृतः हे जगत्स तेस्वभावतएवतत्सालक रजः
आदित्वमेव विभिन्नर्षिकालाद्याश्च न त्वद्भिन्नत्वं तु परः सर्वातिरिक्तः अतस्त्वमेव जनयितेत्यर्थः २९ ननु तत्तद्रूपो व्यतिरिक्तश्चेति व्याहतं तत्राह अहमिति अहं तन्मात्राणीति देवा मन इति इंद्रियाणीति त्रिवि
धाहंकारकार्याणि कर्ताहंकारः इत्ययमद्वितीयेपि त्वयि भ्रमः भ्रमे यथा रुप्यादि शुक्त्यादितो नातिरिक्तं शुक्त्यादिस्तु ततोतिरिक्ता अन्यथा रूप्यादिबाधे तद्बाधापत्ते स्तद्वदिति भावः तस्मात्सर्वमेव तु छनते
कोपस्य विषयः किंतु कृपाया एवेति तात्पर्यं ३० प्रार्थयते तस्येति त्वया हतस्य नरकस्यात्मजोयं भगवदत्तो नाम तर्हि दुष्टजत्वाद्वध्य एव तत्राह उपेति तव पादपद्मप्रतिशरणं प्रापितः हे प्रपन्नार्तिहरेति पितृमर
णादिदुःखं च संहरेति भावः किंचाकुतश्चिद्भयमेनं विधेहीत्याह कुरुष्वेति ननु तथात्वे पितृवत् दुष्टः स्यात्तत्राह अखिलेति ३१ वाग्भिरेवार्थितः प्रमादितः ताभिरेव सर्वोपचारमजनात् अभयं दत्वा मक
लानां देवपन्नगादीनामृद्धयो यत्र शक्रवरुणकुबेराद्यधिकसंपत्तिमदिति अर्थः ३२ शताधिकषोडशसहस्राणीति विष्णुपुराणे राजभ्य इति देवसिद्धासुरादीनामुपलक्षणं ३३ अभीष्टं चिरवांछितं सकृदु
र्लभमपि देवेन प्राचीनतत्कृतिरूपेण प्रापितं पतित्वेन वव्रिरे पतिं वव्रुः महाबाहुमेकवेणीधराः स्त्रियः व्रतोपवासतत्पराः कांक्षंतः कृष्णदर्शनमिति विष्णुपुराणे ३४ कथं वव्रिरे तदाह भूयादिति ३५ त्रि
विकामिः प्रस्थापयामास सुमृष्टेति सुस्नाताविरजोंबराश्च कृत्स्नेत्यर्थः द्रविणं रत्नादिकं यावत्तेनार्जितं तत्सर्वं ३६ चतुःषष्टिं चेति चकारादन्यपि विंशति सहस्रमिता गजा द्विगुणाः करेण बोद्धितीय

चकारादेकविंशतिलक्षणमण्डपाश्चेत्यादि हरिवंशादितोऽत्तेयं वारुणं छत्रं नानापक्षिमृग-गज-वराहादिपशुगणाकीर्णं नानाद्रुमव्याप्तमर्कभास्वरं मणिपर्वतं च गरुडोपरि निधाय दिवं ययाविति तत्रैवोक्तं ३७ चादिंद्राय छ
त्रं त्रिदशेन्द्रे द्रोणेति सर्वैस्त्रिदशैश्चेति भावः सदेवैरर्चितः कृष्णमा इत्यादि पराशरोक्तेः सप्रियः सत्यभामायुतः ३८ भार्ययाचोदित इत्यत्र विशेषो विष्णुपुराणे ददर्श च सुगंधाढ्यं मंजरीपुष्पधारणं मथ्यमाने तेजातं जातरूपमयत्वचं पा
रिजातं गन्त्वाथ केशवः केशिसूदनः तं दृष्ट्वा प्राह गोविंदं सत्यभामा द्विजोत्तम कस्मान्न द्वारकामेष नीयते कृष्ण पादपः न मे जाम्बवती तादृक् अभीष्टा न च रुक्मिणी सत्ये यथा त्वमित्युक्तं त्वया कृष्णासकृत् प्रियं सत्यं तद्यदि गोविंद नोप
चारकृतं वचः ततस्तु पारिजातोयं मम निष्कुटभूषणं बिभ्रती पारिजातस्य केशपक्षेण मंजरीं सपत्नीनामहं मध्ये शोभेयमिति कामय इति निर्जित्येति धुतरूरपि भगवदिच्छानुसारी फलदोयदिद्रलषितमपि तस्थि … समरे विजि
यं व्यतरत्तु पारिजातोयं ३९ पारिजातमाहात्म्यमाह अन्वगुरित्यादि तत्सान्निध्ये पूर्वजातिस्मरत्वं तत्पुष्पाणां व्योजनत्रये गंध इत्यादि विष्णुपुराणे हरिवंशे च नानाविधगानश्रवणे संकल्पितगंधप्राप्तिरित्युक्तं श्रीकृष्णे
च्छया कदाचिद्द्वारकां सर्वां प्रच्छादयति भारत कदाचिद्धस्तमात्रश्च भवत्संगुष्टसंनिभ इत्याद्युक्तं मणिपर्वतं च द्वारकामानीतवानिति च तत्रैवोक्तं नानागानश्रवणे वं कल्पितगंधादिनिखिलफलत्वं प्रियदुष्प्र्याः प्रतिसदनं कृ
तरो वा श्रीहरेर्नंदद्विप्राः ४० संग्रामे निर्जित्येत्यत्र स्वमनोरथसाधकेनापि श्रीकृष्णेनेंद्रस्य संग्राम उक्तः स च श्रीमद्विज्ञंभित इत्याह ययाचे इति अच्युतं अर्थसाधनं ययाच इति द्विकर्मकत्वं महानपींद्रो विग्रहं करोति आ
श्चर्यं धिक् तत्कृतं तमोमोहं च धिक् ४१ यथायथावदिति प्रतिग्रहं देवक्यादि युगपत्सान्निध्यं व्यज्यते यावत्यस्त्रियस्तावंतीरूपाणि धरति प्रकाशयतीत्यर्थः न तु विग्रहभेदः चित्रं बतैतदेकेन वपुषा युगपत्पृथक् गृहेषु
द्व्यष्टसाहस्रं स्त्रियएक उदावहदिति वक्ष्यमाणात् यत अव्ययः सर्वत्र परिपूर्णः ४२ तदेव दर्शयन्नाह गृहेष्विति तासां गृहेष्वनपायि स्थितः सन्नूरमाभिः स्वरूपशक्तिभूतलक्ष्मीरूपाभिरेमे भगवानिति एवानुषंगः अतो नात्मा
रामता-हानिरिति भावः निजो न तु प्राकृतो यः कामस्तासु प्रेमविशेषस्तेन संप्लुतः यद्वा स्वानंदपूर्णः निरस्तसाम्यमतिशयश्च येस्तेषु गृहेषु वैकुंठतोपि श्रेष्ठेष्वित्यर्थः अतएवात्र बह्वीभिरमाभिः रतिस्तत्रत्यैकयैव अतः कर्थ
कृत् अचिंत्यशक्तिमयः अतो युगपत्सर्वत्रानपायित्वमिति भावः गृहाश्रमोचितव्यवहारान्कुर्वन्निति तदविरुद्धावसरेन पायित्वं व्यज्यते अतएव प्रथमस्कंधादिषु वियोगोपि श्रूयते प्रभारवंडे … नी चंद्रिका कांते
त्यादीनि षोडश मुख्यराज्ञीनामान्यनुक्रम्य चंद्ररूपी मतः कृष्णः कलारूपास्तु ताः स्मृताः षोडशैव कलायास्तु गोपीरूपा वराननेत्ये एकैकशस्ताः संभिन्नाः सहस्रेण पृथक् पृथगित्युक्त्या तासां स्वरूपशक्तित्वं स्फुटीकृतं गोपीरूपारा
ज्ञीरूपा इत्यर्थः ४३ रमायाः पूर्णलक्ष्मीरूपाया रुक्मिण्याः पतिं ब्रह्मादयोपि यस्य पदवीमपि किंपुनस्तं न विदुरपि कुतोल्पभेरन् ताः रमांशाभूताः अतः पतिं स्वातंत्र्येण लब्ध्वा यद्वा यासां पदवीं ब्रह्मादयोपि न विदुः स्ताः सततं वृधमा
नयामुदा क्रमेणादिताः अनुरागयुतो हासश्चावलोकश्च नवस्तु वर्कोनित्यनूतः संगमश्च तत्कृतो विचित्रजल्पश्च लज्जा च ताः भेजुः ४४ विश्रमणं संवाहनं केशानां प्रसारः प्रसाधनं प्रत्येकं … शत वस्योपि स्वयं विभादी
त्यविदधुः ४५ इति श्रीमद्भागवतदशमस्कंधमध्यगा४ अध्यायो नवपंचाशत्तोषिणीसारसंग्रहे १ इति श्रीमदनंतोपाध्यायकृत् काशिनाथोपाध्यायविरचिते एकोनषष्ठितमोध्यायः ५९ स दुर्लभं प्रेमकल्लोयद
त्र श्रीमुकुंदयोः स्के दुर्लभो नाम वादः स्थिरातत्त्वमतिर्यतः १ हहेः प्रेमकल्लिक्रीडा मनिरुद्धविवाहतः परामपि स्त्रीविलासः प्रसंगात्प्राहतामिह कर्हिचिदित्यादिना स्वतल्पस्थ तस्यां गृहे तस्या एव पर्यंके स्थितं तथा परिचरणे हेतुः ज
गतः सर्वस्मादपि गुरुं महत्तमं पतिं स्वास्पर प्रेमास्पदं च सखीभिः सह नाना परिचर्यामकरोत् पश्चाच्च व्यजनेन स्वयमेव पर्यचरत १ जगद्गुरुत्वं दर्शयति य इति तुः प्रसिद्धौ ईश्वरः प्रभुरित्यादि नियंता पुरुषावतारः सन् हि एवसस्व
स्वयं भगवानेव जन्मलीलया प्रादुर्भूतः २ तदा च प्रेमकल्लिर्जात इति वक्तुं सामग्रीस्तयोः प्रेमदर्शयंस्तदुद्दीपनसामग्री दर्शयितुं त्रिभिः गृहं मध्येन शय्यां च वर्णयति तस्मिन्निति चतुर्भिः प्रसिद्धमुख्यांतःपुरे राज्ञां मुक्तादा
मविलंबाः संति यत्र तेन वितानेन विशेषतो राजिते इत्यत्रैव सर्वत्र तीयांतानामन्वयः ३ द्वारादिबद्धैर्मल्लिकामालाभिः स्थाने स्थाने विकीर्णैः पुष्पैश्च चंद्रमसो रुणैर्भिरिति उद्यन्मात्रता व्यज्यते तेन क्रीडेयं प्रदोषांते ज्ञेया ४
वनेति सर्वासां पट्टस्त्रीणां गृहेषु पूर्वभिद्रेण गौणपारिजातानां प्रस्थापनात् मुख्यः पारिजातस्त्वेक एव स एव चेंद्रं जित्वा नीतः उद्यानेति पुष्पांतरामोदवत्त्वं ५ ईदृशे तं गृहे यश्चंद्रशालागणस्थः पर्यंकस्तत्रस्थं कशिपुवरे क्षी
रफेनकल्पे आसीनं रुक्मिण्याः प्रेम वर्णयति उपेति सार्धेन उपतस्थे इत्यादेर्मुहुरुक्तिस्तादृक्सेवालिप्सां व्यंजयति ६ व्यजनेनेत्युक्तं तत्प्रकारमाह वालेति व्यजनं चामरं ७ तच्छोभास्फूर्त्या प्रेमनिमग्नस्तस्या रहः शोभाम
पि वर्णयति सेति द्वयेन अच्युतसमीपे क्वणयती मणिनूपुरवलयकांचिसिंजितैः शब्दायमाना सा रेजे स्वस्मिंस्तत्प्रेमवर्धनाय शोभामाविष्कृतवतीत्यतो मणिनूपुराभ्यामुपलक्षिता अंगुलीयादीनि व्यजनं च हस्ताग्रे यु
स्याः वस्त्रांतेनाच्छन्नयोः कुचयोः संबंधी कुंकुमेन रंजितानां हाराणां भासा तथा नितंबे धृतया अमूल्यया कांच्या चोपलक्षिता ८ तामिति रूपिणी वैकुंठादिस्थितलक्ष्मीतोप्यधिकरूपशालिनी प्रशंसायामिनिः तत्र हेतुः ली
लयाधृता विस्मापनं स्वस्य च सा द्युक्तसौंदर्या तनुर्येन तस्यान्तरूपं तत्सौंदर्ययोग्यं रूपं यस्याः अलकैः कुंडलाभ्यां पदकात्लिवृतकंठेन च चतुर्दिक्षु शोभिते वक्त्रे उल्लसंती स्मितसुधा यस्यास्तामनन्यगतिमपि आखेदेता
दृक् वक्तुमयोग्यामपि बभाष इत्यर्थः यतो हरिर्नर्मादिना तस्या धैर्ये हरः अतएव वक्तव्यं नर्मणा स्मयमानः ९ तत्रं स्ववरणे हेतुमज्ञातमिव पृच्छन्नाह त्रिकेण राजपुत्रीति रूपगुणादिसंपत्तिः अतो लोकपालानामिवैश्वर्य
येषां ते महाप्रभावैरारोधे रूपादिभिरूर्जितैश्च हरिवंशोक्ते स्वयंवरोद्यमे ईप्सिता १० प्राप्तान् स्वयमेव गृहागतान् तत्र चार्थिनस्तत्रापि स्मरमदशालिनः भ्रात्रापित्रापि च ये द्वाय दत्तापि एवं तास्त्यागायोग्यान पिहित्वा स्वस्य
तेषां च असदृशान्तोस्मान्यादवान् कस्मात्त्वमस्यादिरूपेणांगी चकर्थ परीक्षार्थं लिडुक्तिस्तथैव कृतत्वात् न्यथाह मप्यवारयिष्यमिति भावः ११ असदृशत्वे हेतुः राजभ्य इति तेभ्यः पावयंतु स्वक्तराजासनाः प्राय इति उग्र
सेनादीनां तदंगीकारात् हे सुभ्रू इति तद्भ्रवणात्तस्या भ्रू कौटिल्ये दृष्टा स्फूर्ति पूर्वकमुपालंभः एवमग्रेपि १२ तत्रोत्तरमलब्ध्वा स्त्रीमात्रस्य मादृशा भाजनमयुक्तमित्याह अस्पष्टेति परस्त्री शेवाद्यैर्वैदिकाचारैश्च न स्प
ष्टं प्रवृत्तेर्निवृत्तेर्वा वर्त्म येषां अलोकपथं अस्त्री पुत्राद्यपेक्षां पदवी मार्गमनुसृताः प्रायो बाहुल्ये काश्चिद्यन्तसीदंति तत्तासामेव गुण इति भावः १३ किंच मद्भजनमाचारविरुद्धमित्याह निष्किंचना इति सर्वत्रोदासीन्यान्ना
स्ति किंचन येषां निष्किंचनजनानां प्रियास्ते वा प्रिया येषां शश्वदित्यतयान्वयी वयं मत्प्रमुखाः अतस्तेषु मुख्यं मां न भजंति प्राय इति आढ्यत्वेप्येतर्हि रक्ता भजंत्येवेति भावः १४ सर्वेषामप्ययुक्तमित्याह ययोरिति आ
तम समं परस्परानुरूपं जन्म जातिः ऐश्वर्यसहितवृत्ताकृतिः रूपं भवउत्पत्तिर्वय इति यावत् तयोरेव युज्यत इति शेषः मैत्री चेति दृष्टांतार्थं चोप्यर्थे वा व्यतिरेकेण दृढयति नेति क्वचिद्देशकाले वा १५ उपसंहरति

राम
८

वेद भ्रशिति एततत्पूर्वोक्तं सर्वं नदीर्घा समीक्षा विचारो यस्याः हे वेद भ्रशिति दूरदेशे गत्वा क्रिसुत्य एव श्रवणमिति भावः न च भिक्षुत्योद्धनादिदाना द्वदान्यत्व गुणस्यादिति यतो मुधात्वा दत्रीभ्य एव धनादित्ता भेनेत्यर्थः १६
परिहासत्वं स्फुटीकरणायाह अथेति इदानीमपीत्यर्थः सत्या उक्तमात्राशिषः कामान् १७ तर्हि किमित्यानीता हतत्राह चेद्येति द्वाभ्यां तत्वाग्र ऊद्देश्येति वर्तमानसामीप्ये लट् तस्य मारित्वात् १८ ते च मदंधत्वादेव द्विषं
तिन मतत्र दोष इत्याह तेषामिति तेजो हत्वा गर्वापनयनायेवानीतासीनो द्रोढुमिति भावः १९ नानावैभववतो नेकस्त्रीपरिग्रहस्य च कुतो निष्किंचनत्वादित्यत्राह उदासीना इति न क्वाप्यासक्ताः न चास्मीयेष्वपि स्याह नेति
यतस्त्वामिति गहयोरिति देहगेहे साम्या देहत्वं प्रयुज्यैकशेषः ज्योतिःप्रदीपादि तद्वदक्रिया आस्महे साक्षिमात्रतया वर्तामहे वस्तुत इदं मंतर्याम्यपेक्षया जीवसंबंधि देहाद्यपि प्रेस्योक्तं २० वल्लभामिति प्रियभार्यायां
रुद्रि स्त्रीवत्स्यात्मविशेषणत्वे प्यन्नहल्लिंगत्वं वृतं इ वो प्रेक्षायां वस्तुतस्तूदासीत्वमेव मन्यमाना इति भावः तस्या दर्पमामादिव दहं प्रणयकोपमभ्यंजयामीत्ययं कदापि मयि नो दासीनः स्यादित्यभिमानं हतितथा सन्
प्रणयकोपयोर्द्वि इक्षायालूक्ष्मीमास तथा च मुखं च प्रेमसंरंभेत्यादि वक्ष्यति केचिद विश्लेषाद्धेतोर्वल्लभतो राधामिव स्वं मान्यमानां तदपराधहेतुर्दर्पघ्न इत्याहुः २१ ततः श्यास्याद्दाक्षिण्यमय प्रेमस्वान्त मानस्योदयः किं
तु परिहास व्यंजने पि चिंता याए वेत्याह इतीति एतद्वचः तदातादृक् केलिकाले ब्रह्मादीनां पालकस्यात्मनस्तु प्रीयस्यापीति परुषोक्त्यनर्हता देवी सर्वास्फुमुख्यापि अप्रियमित्यसत्यं च अश्रुतपूर्वमिति दुस्तर्क्यत्वं त्याग
शंकया भीतात् हृत्कंपोत्त्या भयातिशयः दुरंता दारुणां हृखेदे २२ चिंतालक्षणमाह पदेति स्रुज्जातेनेति ष्ठलितखने घ योग्यता एवं कुं कमालित्तेजनमालिन्यपि ज्ञेया इति दुरंतचिंतात्वं २३ स्वभावतः कौतुकपरोयं पुत्राद्युत्प
त्यादिना त्यागो प्यसंभवीति कथं तया न विचारितं तत्राह तस्या इति अप्रियश्रवणाद्दुःखं त्यागशंकया भयं शोको नुतापस्तैर्विनष्टा बुद्धिर्यस्याः अतो विचाराभाव इति भावः श्लथहस्तयतो हस्तादिति हस्तकाल्कर्यादयेन व
त्तयान्यपि पेतुरिति भावः देहश्च पपात यतः चेतनापि नष्टेत्याह विक्लवेति प्रविकीर्येति मोहातिशयः रंभेवेति पातातिशयः २४ हास्यं परिहासस्तत्र प्रौढिरेनां सरलप्रेमाणमपि क्षोभयामीति गर्वस्तमजानेत्या विचारयि
तुमशक्त्यायाः सरलप्रेमत्वात् वाम्यमयप्रेमाभावात् समहाकौतुक्यपि २५ अनुकंपामेवाह पर्यंकादिति त्रिभिः उत्थाप्य भूमितः स्वांके निवेश्य उत्थापना श्लेषवक्त्रमार्जनाद्यर्थे चतुर्भुजः सम्रूत्य बध्वा २६ प्रसृज्येति यु
गमकं सांत्वने हेतुः सतां समात्राणां शरणं किमुत स्याइत्याह अनन्यविषयो तादृशे सांत्वने हेतुः रूपया रूपायां हेतुः रूपणां दुःखदीनां अत्र हेतुः हास्येति अत्रापि हेतुः अतदर्हां सरलस्वभावत्वात् तादृशारवेदने कथं
सांत्वनं तत्राह सांत्वज्ञः सांत्वज्ञतां विवृणोति प्रसृज्येति अश्रूणि कल्पयतः क्षरतस्ते शुचा अश्रुभिः यतः प्रभुः सर्वत्र समर्थः २७ २८ मामेति युग्मकं मां दोषदृष्ट्या मापश्य यतो जाने इति तर्हि कुतस्ताहगुक्तं तत्राह त्व
द्वचः श्रोतुमिच्छतेति तथापि मिथ्या वचनं तेनयुक्तं तत्राह क्ष्वेल्यानर्मणेवोक्तं नर्मस्कृतघ्योग्यमिति भावः हे स्कंदरांगि २९ प्रेमसंरंभे त्यत्रार्थस्फुतीयाल्लोपस्तेन कटैत्यादिकयोरप्यन्वयः प्रेमकोपनं कोपितः अधरो यत्र
कटैः कटाक्षैराक्षेपाद्वक्रो नेत्रौ ता यत्र कुटिलं कृतटं यत्र तन्मुखं वचश्च येता दृशं ३० कल्पहे किंकौतुकं स्फुखं वा तत्राह अयं हीति लाभः फलस्फुखं यामः प्रहरोपि प्रियये ति त्वयेवेत द्युज्यते नान्यथेति भावः हे भीवर्शत
मी
अतः शंकां वहसीति भावः हे भानीति कोपमुत्पादयितुमारोपयति अयमभिप्रायः इयं खलु सरलप्रेमवती परमगंभीर्यवती च यस्यां कोपजननेत्रात्त्वेरूप्यादिकमपि कारणं न प्राभूत् तस्यामस्यां मदभिष्टः प्रणयकोपविलासः
कथमिव संपद्येतेति विचिंत्याह मेव मद्विश्लेषरूपं खमेव चास्याः सर्वस्वमिति तद्रूपतिरस्कारेणैव कोपः संभवेत् ततोपि कोपाना विर्भावे मद्विश्लेषभयेन तु स्यादेव स इति निश्चीत्य राजपुत्री प्सितेत्यादि भगवानुक्तवान् त
स्मादनेन परिहासेन कोपविलासादि दर्शनमेव मुख्यं भगवदभीष्टं दर्पनाशनं तु न मुख्यं तथा च स्वयमेवोक्तं मामावेद भीरुत्यादि वक्ष्यति च साध्व्येतद्धोतुकामैरित्यादि ३१ वेद भीरु तादृशाप्रेम्णा विदभीदागतादृश पुरुषोत्त
मरूचे भगवत्स्फुस्निग्धस्मितादिना शोभमानं मुखं सव्रीडहासेत्यादि लक्षणापांगेनेक्षमाणा तत्र व्रीडापूर्वहास्यप्रौढ्यज्ञानात् हासः संप्रति हास्यप्रौढिज्ञानात् व्रीडा साहित्ये नहासेमंदत्वसौंदर्यादि हासेन रुचिरैः स्निग्धैः
प्रेमार्द्रैः अंजनतैलाभ्यक्तो वा यो पांगः हे भारत श्रीकृष्ण लीलाभिः संभ्रतः अत्रासमत्वं राजभ्यो भयं दुर्गाश्रयणं बलवद्द्वेषः अराजत्वं अस्पष्टाचारत्वं अलौकिकाचारत्वं योषिदवसादः निष्किंचनत्वं निष्किंचप्रियत्वं आढ्या
भजनीयत्वं विवाहानौचित्यं गुणहीनता मुधाश्लाघितत्व मौदासिन्यमकामुकत्वमिति षोडश स्वदोषा अनृत्वादीर्घदर्शित्वे भैष्मीदोषौ राज्ञां गुणाश्च भगवतोक्ता स्तत्र दोषपरवाक्यानि सर्वोत्कर्षपरतया व्याचक्षाणा प्रतिवक्ति ३२
तत्र प्रथममसाम्यं यदुक्तं तत्सत्यमेवेत्याह नन्विति भगवतः सदृशी नाहमिति यद्भवानाह एतत् एवं सत्यमेवेत्यर्थः वे स्फुटं ननु निश्चितं कुतः विभुम्नः अनंतगुणसौंदर्यादिपूर्णस्य हे अरविंदतोपि विशिष्टलोचनेति त्व
देकांगसौंदर्येणापि नाहं सदृशीति भावः यतः स्वे स्वरूपे महिम्नीरतो भगवान् षड्गुणस्तमआदयः त्रयः प्रकृतिः स्वरूपं यस्याः सा हं क्व तथात्रयाणां ब्रह्मादीनाम धीशो नियंता उपास्यः क्वेति गुणावतारविद्धैरपि रूपमनियम्य
त्वमुक्तं अहं तु अस्तेर्बहिर्मुखैर्गृहीताः पादा वैभवादिरूपा अंशा यस्याः यद्वेंद्रादिभिरुपासितचरणा साहं क्वेति स्वरूपेणैश्वर्येण च महदेवांतरमिति भावः अस्याः स्वतः परशक्तित्वेपि मायाशक्तित्वेनोक्तिर्दैन्येन वास्तवस्व
यार्थः स्वरूपभूतत्वेपि शक्तित्वेन शक्तिमतस्त्वत्तो गौणी प्रकृतिर्यस्याः साहं क्व तथा त्र्याधीशः सर्वोपास्यस्त्वमहं तु यथावत्तत्त्वमाहात्म्याज्ञात एवागृहीतानुपासितो तव पादो यया साहं क्वेति अथ दैन्यं विनापि वास्त
वार्थे एवमुत्तरं ननु इति पृथक् पदं एवमेतन्नेत्यन्वयो भाति यत एवं भूतो भगवान् क्व कुत्रान्यत्र वर्तते किंतु सर्वेदाम माश्रयत्वेनैव अहं च कुत्रान्यत्र किंतु सर्वेदात्वदाश्रितत्वेनैव वर्ते गुणाभाव क्वापि ऐश्वर्यादय एव
प्रकृतिः स्वरूपं यस्याः अतो नास्ति ज्ञः पंडितो येभ्यस्तैः श्रितचरणेति एवं चकाम समत्वं घटत इति भावः ३४ राजभ्य इति यदुक्तं तद्द्रोण्येव वक्ष्यासंभवतीत्याह सत्यमिति शब्दादिगुणा एव राजंत इति राजानस्तेभ्यो भ
ना॰ द॰ उ॰ तो॰
८
यादिवीत हृदये अगाधत्वात् समुद्रे त्वं भवान् शेते तर्यामिरूपेण प्रकाशत इति गोण्यासत्यमेवोक्तं यतः हेउरुक्रमेति अतो महापराक्रमस्य तव चैद्यादिराजभया भावान्मुख्यार्थासंभव इति भावः अंतर्यामित्वे
हेतुः उपेत्यादि चेतन्यघन आत्मात्वमिति अतश्चितघनस्य कल्पितगुणेभ्यो वस्तुतो भयासंभवादिवस्फक्ते यच्च बलवद्भिरित्याद्युक्तं तन्मुख्ययेवक्ष्यासत्यमित्याह कुत्सितेंद्रियगणयुक्तैर्जीवैर्नित्यमेव कृतवि
रोधस्त्वं तेषु तवाप्रत्ययात् अतः संप्रत्यपि तादृशै राजभिर्बलवद्भिरपि विरोधयपकर्तुं योग्य इत्यर्थः कुत्सितेंद्रियेषु त्वदीयरुपादीनां यथावत्स्फूर्त्यभावादरुच्यादिमयत्वं तेषामपि दोषो युक्त एवेति भावः यद्वा

रुक्म

जीवात्मा यथा गुणेभ्यः स्वावरकेभ्यः स्वप्नजाग्रद्विषयेभ्यो भयादिव अंतरामयकोशे सुप्तिप्रलययोः शेते वस्तुतस्तु स्वरूपानंदार्थी तथा त्वं रजस्तमोगुणमयेभ्यो राजभ्यो भयादिव समुद्रे श्वेतद्वीपाद्वै द्वारकायां च नित्यं शेषे
वसमि वस्तुतस्तु तद्भक्तेभ्यस्तदविघ्नित सुखार्थमेवेति त्वं तु सोपमया योज्यं अत्र पक्षे शेत इति प्रथमपुरुषः साधुः। यदुक्तं त्यक्तनृपासनानि तन्नत्राह त्वत्सेवकैरेव नृपाणां पदमासनं गादं तमप्येवेति निश्चित्य दूरतस्त्यक्ते कि
पुनर्वाच्यं त्वया त्यक्तमिति ३५ अस्पष्टाचारत्वमत्लौकिकाचारत्वं च युक्तमेवेत्याह चदिति मुनीनां वर्त्मचेष्टितमस्फुटं स्वाछादनाद्यर्थचेष्टितं नरेणाव्वनमतो नराकारैः पशुभिर्दुर्बोधं किं पुनस्तव वर्त्मा स्फूटमिति यस्माद्येभवं तम
नुवर्तते तेषामीहितमत्लौकिकमिवत्लौकिकस्येप्यत्लौकिकवद्दृश्यते अथो किं वाच्यमपरिच्छिन्नमहिम्न स्तेषामीश्वरस्य तवेहितमत्लौकिकमित्यर्थः ३६ कोविदवसादस्योत्तरं संरंभेण वक्तुं योग्यत्वात्तत्प्रसंगेन यद्वांछयेति श्लोकेव
क्ष्यति निष्किंचनादस्यस्य योग्यमर्थं योजयति निष्किंचन इति निर्निषेधे यतो यद्व्यतिरिक्तं किंचिन्नास्ति तत एव निष्किंचनस्त्वं न तु दरिद्रतात्लक्षणे नासंभवादित्याह यस्मा इति अन्यतो बलिभुजोपि ब्रह्माद्या यस्मै बलिं हरंति
तस्य सर्वेश्वरस्य ते दारिद्र्यमसंभवतीति भावः आढ्यान भजंतीति सत्यमेवेत्याह नेति आढ्यतयांधा ज्ञानदृष्टिहीनास्ते एवाढ्या अंतकं कालरूपं यद्वा अंते मरणेकं स्मरणादिना सुखं यस्मात्तमपि न विंदंति अतो सुकर्तपः स्वप्राणा
नेव तर्पयंती न त्वां भजंतीत्यर्थः निष्किंचनजनप्रियाः इत्यस्य समासद्वयेनाप्यर्थं योजयति प्रेष्ठ इति बलिभुजामपि ब्रह्मादीनां भवानेव प्रेष्ठो न बलयस्तद्दातारो वा तदस्तु मे नाथेत्याद्युक्तेः ते चाढ्या अपि नाथाः प्रस्तुतनि
ष्किंचनाएव विषयरागाभावात् अतस्ते एव भजंतीति तव प्रेष्ठाश्चेति व्युत्क्रमेणोत्तरं ये बलिभुजो न त्वां विंदंति ते अंधाश्च सात्वपश्चेति व्यतिरेकोक्तिसंगत्यर्थं ३७ बलिभुजां भवानेव प्रेष्ठ इत्यत्र हेतुं वदंति ययोरात्मसमामित्याद्य
त्वं मनोचिस्यं प्रतिवक्ति त्वमेव इति समस्ताः पुमर्थाः धर्माद्यास्त्वद्भक्तिभेदा अतस्त्वं प्राचुर्यवान् यतः फलात्मा परमानंदरूपः रसो वै रसः एतस्यैवानंदस्येत्यादिश्रुतेः अत्र हेतुः यदिति कृतस्त्वं देहिकं देहाद्यभिमतिं लोकद्वयं मोक्षादि
कं सर्वं विसृजंति अतस्त एवाकिंचना भवान्नेव तत्प्रेष्ठ इति युक्तमेवेति भावः हे विभो तवैश्वरत्वेपीति भावः समाजः सेव्यसेवकत्वलक्षणः स्वजंधास्तेषां ते रेव सहोचितः संत्राप्तानान्ये र्नैकैरपि अन्योन्यंतरयोरतस्तत्कृतसु
खदुःखिनोर्यः समाजः स भवतो नोचित इति ३८ भिक्षुभिर्मुधा श्लाघितत्वं प्रत्याह त्वमिति भस्तदंडेतिति भिक्षुपदव्याख्यानं मुनिभिरित्यात्मारामत्वं ते वर्णितत्वेन गुणानां यथार्थत्वं मुधेत्यस्य परिहारः आत्मेति यदर्थं सर्वं
प्रियं तस्य जगतामात्मनस्ते वर्णनं न व्यथेति भावः किंचात्मद इति स्वदोषद्वयं परिहरति इतिज्ञात्वेव मेमया वृतोसीत्यन्यत्र परिहारः हित्वेत्यदीर्घदर्शित्वपरिहारः भवतो भ्रुवः सकाशादुदीरितो यः कालवेगः तेन ध्वस्तमनोरथा
न् अब्जभवमपि किं पुनर्नाकपातीन्द्राद्यान् हित्वेति समुद्रमथनवृत्तं स्मृत्वोक्तं अन्ये चैद्याद्यास्तव कौ राकास्तान् हित्वेति कुतो वक्तव्यमित्यर्थः ३९ एवं स्वाशाने परिहृत्यान्यराजगुणवर्णनोद्दीपककोपावेशेन तस्मिन्नेवाज्ञानमापाद
यति जाड्यमिति सिंहः पशून्विद्राव्य स्वबलिं यथाहरति तथा शार्ङ्गधनुनादेनैव मागधादीन्विद्राव्य मां स्वभागत्वाज्जहर्थ तस्य तव राजभ्यो भयात् समुद्रशरणं प्रपन्न इति यद्वचस्तज्जाड्यं जडकर्मं मंदोचितं न घटत इत्यर्थः
गदाग्रजेति त्वदनुजेनैव विद्राव्यास्ते किमुत त्वयेति भावः ४० कोपावेशेनैवावसादनं परिहर्तुं योग्यमितीहेव परिहरंती मां भजंतः सर्वे पिक्लिस्यंतीति यदथोदुक्तं तदपि मदमेवेत्याह यदिति यस्य तव वांछया राज्यमिंद्रादिस्पृ
हणीयमपि विसृज्यन्पत्रिरोधार्यात्रपि वेननात पृथुभरतययातिगयाद्याय वनं विविशुः ते के पि तस्यानंतानंदत्वेन तैर्निश्चितस्य तव पदवीमास्थिता इह जगति किं नु सीदंति न क्लिश्यंत्येव किं त्वनंतानंदभाजो भवं
तीत्यर्थः ४१ अथात्मनोनुरूपमित्युक्तं तत्प्रत्याह कान्यमिति सद्भिरात्मारामैरपि वर्णितं ज्ञानानां तापस्य वर्गो वर्जनं यस्मात् तल्लक्ष्म्याः सर्वसंपत्तेराश्रयमेवं मुक्तमुमुक्षुविषयिसेव्यत्वं अत एव सर्वगुणालयस्त्वं अनेन गुणे
र्हीना इति प्रत्युक्तं तस्य तव पादसरोजगंधमाघ्राय युक्तमहिमवतया हरतो प्यन्नृभयतमविगणय्य त्यक्त्वा कान्यं श्रयेत न सेवेतेत्यर्थः अन्यस्य दोषमाह मर्त्यैश्चासावासमंतात्सदा उरुभयं यस्य स च तं उपलक्षणमे
तदसन्मुरवरितत्वादेः ननु वैरोन्यमाश्रयंते तत्राह अर्थैति तामुरुर्वीएवेति भावः ४२ तमुक्तमाहात्म्यमतोनुरूपं भजन योग्यमभजं श्लेषेण सच्चिदानंदाहमनुरूपं सच्चिदानंदं त्वामभजमिति जगतामीश्वरे पि त्वामेव स
विष्ट इति वदंति प्रेमभरदैन्येन स्वस्य लीलामानुषीत्वेपि कर्ममानुषीत्वं मत्वा प्रार्थयते स्यादिति स्तुतिभिर्विविधजन्मभिरितस्ततो भ्रमत्याः यद्वा गतिभिस्तव नानाचेष्टाभिः श्रुतिभिरिति पाठे लक्ष्मीप्रियत्वबोधकैस्तस्या
मप्यनासत्या घाख्यापकैश्चागमे यद्वा रामाद्यवतारे सीतात्यागादिश्रवणे रत्र गोपीत्यागादिश्रवणे रीदृशोक्तिश्रवणे वा भ्रमंत्याः शंकाकुलायाः योद्विर्भजंतमनुयाति आत्मसात्करोति अन्ते उक्तविविधभ्रमस्तस्यना
शो यस्मात्सः गीर्दैव्यावुतवनानावतारैरीति भिन्नेमंत्या भवद्वन्नानारूपप्रकटनेन त्वया सह क्रीडंत्याः पाठांतरे तत्तदवतारश्रुतस्वरूपैः अन्तापवर्गः सच्चिद्रूपो योद्विरित्यर्थो व्यज्यते ४३ ये च राजपुत्री प्सिता भू
पेरिस्यादिना राज्ञां गुणा वर्णितास्तत्र सेर्ष्यं सत्रापांगुलिमाह तस्या इति हे अच्युत अव्यभिचारिगुण नान्येषु व्यभिचारिगुणा इति भावः दोषानप्याह स्त्रीणामिति खरा इव पादताडिता अपि स्त्रियमनुगंतारः व
षा इव तत्कारवाहकाः श्वान इव तदाज्ञावत्राः मार्जारा इव तदुच्छिष्टभोजिनः तस्या इव तदाज्ञाप्रतीक्ष कान्तपास्तस्याद्दुर्दैवायाः पतयः स्युः मृडादीनामपि मनोहरा कथा यस्याः कर्णपथं न गच्छेत् ४४ अत्यंत विभासि
तास्ति त्वदीयानां नो मनसापि न संबंधार्हा इत्याह त्वगिति विशेषणद्वयेन जीवच्छवत्वमेव दर्शयति त्वगादिभिः पिनद्धं अन्यथा मक्षिकाकाकादिकोटिभिर्व्याप्तं स्यादिति शवात्को भेद इति भावः सच्चिदानंदविग्रहस्य
तव पादपद्ममध्वास्वाद अश्रून्याम्रूढा च या स्त्री सा कांतोयमिति मतिमती सती भजति अयं भावः अनुरूपमभजमित्युक्तेः सच्चिदानंददेहाहं त्वय्येव रमे या तु त्वगित्याद्युक्तलक्षणदेहा सापि त्वदनुभवाभावे एवता
दृशीं मते त्वदनुभवे तु जातेन स्वदेहेपि तज्जुगुप्सोदयात् किं बहुना दधति सकृन्मनस्त्वयि य आत्मनि नित्यसुखेन पुनरुपासते पुरुषसारहरा वसथानित्युक्त्या वयं सर्वा अपि प्राकृतेषु स्वपरिवारादिषु त्वदनुकू
लेष्वपि न सज्जामः किमुत तद्विरोधिषु चैद्यादिष्विति ४५ उदासीना वयमित्याद्युक्तं प्रत्याह अस्त्विति मय्यपि नास्ति शायवती दृष्टिरस्य किंचात्मन्येव रतस्य निरपेक्षस्यापि चरणानुरागो ममास्तु स एव मे महाँल्लाभ इति
भावः किं चास्मरतोप्यस्य विश्वस्य वृद्धये उपात्तरजसोति मात्रातिशयायेन तथासन् यर्हि मां प्रकृतिरूपामीक्षसे इति स्वरूपशक्तित्वेपि दैन्येन प्रकृत्यभेदोक्तिः तदेव नः परमोनुग्रहः यद्वा मयि चरतस्य यतानतिरिक्तोह
कं स्वरूपशक्तिस्त्वात्मन्यभिन्नदृष्टेः अस्य रजसानुरागस्य वृद्धये स्वयमुपात्तरागातिमात्रः सन् यन्मामीक्षसे तत्परमानुकंपारूपमेव तच्छ्रि रूपमाह शेभ्यस्त्वदेकशरणभक्तजनेभ्यश्चान्यत्र मोदासीना वयमित्यादि वा

क्यप्रवृत्तिरिति भावः ४६ किंच त्वदुक्तं सर्वसाधारस्त्रीविषयं तच्च युक्तमेवेत्याह नैवेति द्वाभ्यां अलीकं निर्विषयं न मन्ये असतीविषयत्वात् हियतः सत्यसतीरुपास्य स्त्रीषु मध्ये साध्वि ज्ञातिश्चेत्यन्याया अपि क्वचिदेकत्रैव पुंसि रतिः
स्यात् यथा यावायाः काशिराजकन्यायाः शाल्वएव रतिः ४७ पुंश्चल्यास्तु व्यूढाया अपीत्यादि अहं तु परम साध्वी सर्वज्ञेन त्वया स्वीकारादित्याह ब्रुभइति विभर्ति तिन संभाव्यते यतो लोकद्वयत्वत्वएव तां चिन्वन् तत्रेति ४७ अनेनाथा
त्मनो नूरुपमित्यादि प्रस्तुतं ४८ हे साध्वी हे राजपुत्रीति गुणैश्वर्ये व्यंग्ये अतइदमेवश्रोतुकामैर्नो मयाभिःपरिहसितासि अन्यास्थ प्रकारविशेषेण व्याख्यातवतीहि असंदेह ४९ अत्र तु स्थेनापि मयाकिं तदेयमित्याह यानि
ति हे नित्यमंगल्ल मयि निष्काम भक्त्या या अतएवाकामाय प्रेममात्रविलासाय यानि छसि ते सत्येव नामिनीक्षमयि तु पूर्वं श्रोधानुवाहः कामिनीतिपाठे त्वद्विषयकामवती मयि ५० तस्याएकांतभक्तिमतिनंदति उपेति नर्मश्लेषं वा म
केयः क्षोभ्यमाणाया अपि प्रेमधीर्नापकर्षं प्राप्ता बद्धत्वे वाश्लिष्टेत्यर्थः अयं प्रेमा रव्या भावया पकः सर्वथा ध्वंसहितं सत्यपि ध्वंसकारणे यद्भावबंधनं यूनोः स प्रेमा परिकीर्तितइत्युक्तेः अनघे हे अपरा प्रागल्भाहिणी मदपरा धाक्षं
तव्य इति भावः ५१ स्वस्मिन् पतिभावमयतद्भक्तिं स्तुत्वा येन्ये पुरुषाः स्त्रियश्च अन्योन्यदांपत्यकामनया मां भजंति तन्निंदाद्वयमाह येइति भजनहेतुः कामावि छिन्नं चित्तादिति अपवर्गः प्रेमभक्तिस्तद्दातारं मोहिताएवते एवमेवोक्तं प
चमस्कंधे स्त्रियो व्रतैः स्त्वो हृषीकेश्वरं स्वतो ह्याराध्यत्लोके पतिमाशासतेन्यमित्यादिश्लोकत्रयेण ५२ हे मानिनि त्यागात्राकपापरप्रेमा स्पदं मय्यपीष्यावति अपवर्गयुक्ताः संपदो यस्मिन्निति मध्यमपदलोपी समासः यद्वा भक्तिपु
क्तिरुपासंपद्यस्मात्तं मां प्राप्य प्रसाद्य संपदो विषयानेवेच्छति नूनु संपदं पतिं मां ते मंदभाग्या अप्रशस्त भक्ताः यतो ये संपद्वांछकास्ते निरयेनिकृष्टयोनावपि स्युः तत्र हेतुः विषयवांछकानां तृष्णा नरकोपि शोभनो भिरुच्यः
सुपापश्च अनिरयस्यापि मात्रात्मकत्वाद्विषयात्मकत्वादित्यर्थः ५३ तस्मात्त्वयामयि असकृत्सदासो भव मोचनी श्रवणादिना सर्वेषामेव सर्वदुःखमोचिकानुवृत्तिः कृता एतत् भद्रं ज्ञातं तस्चेतच्छ्रवणादिना सर्वमुक्तिः
स्यात्तत्राह खलैर्गुर्वादिवंचकैः सुदुष्कराकरोतेः क्रियासामान्यार्थकत्वाद्दुर्बोधादिरुपापीत्यर्थः मन्निष्ठत्वाभावात् दुष्टा आशीर्यस्याः यतइंद्रियतर्पणपरायाः अतो निकृतिं जुषः वंचनपरायाः स्त्रियाः स्तरां सुदुष्करा हे
गृहेश्वरीत्वमेवाह तुत्वदधीनइति भावः ५४ किंच संतिनिष्काम प्रेमणा मयि वर्तमानाबकपः किंतुत्वादृशी न क्वापीत्याह नेति गृहेषु स्वे षु अन्यद्वपि वा रहस्यं हरति प्रापयति सः रहो वह इति क्वचित् उपस्थिताः सत्यः कथायस्य
मद्वातीश्रवणमात्रेणैवेत्यर्थः मानः पूजा हेतद्भवति ५५ किंच त्वात्विति बंधुवात्सल्येन तत्तदसत्त्वता अनिरुद्धविवाहकृतसत्रायांत स्यत्वात् तु वर्धमिति तदानीं तदनौचित्यं तदाकालांतरे च मुहुः समुत्थं दुःखमस्माभिः सह
वियोगशंकयासहिष्णुः श्रुतोनाब्रवीच्च तेत्वया जिता वशीकृता वयमिति मदीयाश्चेत्यर्थः अनेनानिरुद्धविवाहानंतर्यमस्य बोध्यं ५६ पुनः पूर्वानुरागवैशिष्ट्यस्मृत्याह द्वतइति आत्मत्वेन भक्तमाप्यर्थं ततो मयि चि
रायति विप्रातिथ्यसंदेशाश्रवणादिनाकिंचिद्विलंबमानेपतत् पित्रादियुतमपि विश्वं शून्यं मत्वात्यस्मै समर्पणायोग्यमिदमंगमजिहासः त्यक्तुमैच्छः जह्यामसूनिति पूर्वोक्तेः तत्तवकर्मत्वय्येवतिष्ठत् न प्रतिकर्तुं शु
क्यमित्यर्थः किंतु केवलं साधुसाध्वीत्यनुमोदामहे ५७ एवमेत्यन्येपि विलासाः ऊहनीयाः रमयास्वरूपशक्तित्वेन रतियोग्यया तयासार्धं तनर्मगोष्ठिभिः रमक्रीडालाभेनैश्वर्यं गौणं कृत्वा नरलोकानुकरणकृतेन
यद्वास्वलीलाति विडंबितं तिरस्कृतं कुर्वन् ५८ अथातो हेतोः विभ्रुरेकएव सर्वाणि गृहाणि व्याप्नुवन् लौकिकवैदिकधर्मान् आस्थित आचरत् यतो लोकगुरुः तद्धर्मप्रवर्तकः ५९ इतिश्रीमद्भागवते दश
मस्कंधसंश्रयः अभूत् षाष्ठितमोध्यायस्तोषिणीसारसंग्रहे १ इति भागवतदशमे उत्तरार्धे षष्टितमोध्यायः ६० अक्षत नयाप्यनेकत्वलक्षतनयवान् हरिः संख्यरुचिरगुणःसंख्यावन्नयगुणः संख्यावहगुण
सुपुत्रपौत्रश्च १ भगवान् पुत्रपौत्रादीन् स्वदृष्टिभिरयोजयत् कुमुद्वतीभिर्निजांशुभिरिव चंद्रांनिजोदये २ तदेतद्वर्णयितुमाह एकैकशइति स्वरमास्या बल्ला नास्ति तं बिना बल्लगतिर्यासांताः भार्या इत्यर्थः सर्वा या स्वस्मिन् संपत्त
यापितुरन्यूनात् १ एकस्यतावतीषु तावत्पुत्रजननासंभवानां परिहरन् प्रसंगात्तासु स्वतत्तासक्तिं दर्शयति गृहादिति राजादिपुत्र्यः सतादिप्रवेशाद्गस्यस्व गृहएवस्थितं ततो गृहान्नाधिकांतरं गृहगमनरहितं श्रीकृ
ष्णवीक्ष्यात्मानं श्रीकृष्णस्य प्रियतमं मेनिरे प्रत्येकमिति शेषः आत्मानं स्वं स्वमिति पाठो तस्य तत्वं सर्वगृहावस्थानरुपं न विदंति ताः २ न चैवं तस्यातिकामुकत्वं किंतु प्रेमवशत्वमेवेति वदन् तासां मोहमाह चार्विति द्वाभ्यां
जनितानुरागाः स्त्रियः स्त्रीजाति येर्विचित्रमैः विविधैर्बहुभिर्विलासैः भगवतो मनो विशेषणं जेतुं वशीकर्तुं सम्यगशक्नुवन् किंतु यावान् स्तत्प्रेमांशास्तावदेव तादृशविलासव्यंजने हेतुः अब्जकोशवद्दर्शनं चायतानि बाहु
नेत्राणि च सप्रेमणा हासरसेन वीक्षितानि च चारुभिः भगवतएते वल्गुजल्पैश्च सम्यक् प्रेमणा कामेन च मोहितासीति अत्र दूर्वे मुखं पश्यंति ततोलज्जानम्रमुखस्य बाहुं बाहुदर्शनाभ्रूलिंगनेप्सया पुनर्मुखे वी
क्ष्यमाणामिथोनेत्रमिलनं ३ ततः सप्रेमहासादिकं क्रमेण व्यक्तं विभ्रमन्तः सर्वपरिपूर्णस्य निरपेक्षस्य तेनो न कामुकत्वं किंतु भक्तानां तासां प्रेमवशत्वमेवेति भावः तथा च तापिनी श्रुतिः विद्यामयाहि यः सकर्षेवि
षयीभवति योहि कामेन कामान् कामयते स कामी भवति योहि वेत्त्व कामेन सो कामीत्यादि ३ तदेव विवृणोति स्मायेति करणैः कामशास्त्रप्रसिद्धैः रूपायैर्यस्य मनो विशेषेण क्षोभयितुं षोडशसहस्रमपि पत्न्यो
नशेकुः तेषां रूपकं अनंगबाणरूपैरिति बाणानां विशेषणं स्मायेत्यादि गूढहसितयुक्तो वलोकत्त्वैः करदाक्षस्तेन सूचितो भावो भिप्रायस्तेन मनोहारिणा भ्रूमंडलेन प्रहिता मुक्ताश्च ते सौरतमंत्रशौंडाः स्फुरतसंबोधी
रहस्याः ते जिताश्च तैः बाणपदेन भ्रूलोधनुष्टं मंडलेति न स्याकृष्टत्वं बाणा अपि मंत्राभिर्मंत्रितादुःसहा भवंतीति स्पष्टं अत्र यच्छब्दस्य वाक्यशेषे निर्देशात् तच्छब्दानपेक्षयेवान्वयः यच्छब्दोपयुक्ते रवाक्यैः तत्सदनन्त्यपेक्षक्ष इत्योक्तं कारिके सिद्धां
तात् ४ तासां ब्रह्मादिदुर्गमं भजनमाह इत्थमिति रमापतिं रुक्मिणीकांतं अनुरागेण हासो वलोकश्च नवसंगमोत्सुक्यं चेते आद्यायस्मिन् कर्माणि यथा स्यात्तथा भेजुः नवेत्यौत्सुक्येन तथा प्रतीतेः ५ किंच प्रत्युद्गमादि निस्तस्य दास्यं विदधुः
प्रसारप्रसाद्येतिपाठो ६ प्रस्तुतमाह तासामिभति दशदशपुत्रायासां तासां मध्ये ष्टौ महिष्यः पुरोक्तास्तासामेव पुत्राव क्ष्येति विस्तरभियेति भावः ७ चार्विति युग्मकं वीर्यवत्त्वे सर्वेषां विशेषणं अतस्तत्तत्समुच्चयार्थं प्रायश्च शब्दस्तथेतिच
१२ः चारुगुप्तस्यानुजः देशमइत्येकादशानुभावेन दशास्यां पुत्राना धेहीतिश्रुत्युक्तसंख्यादरः एवमग्रेपि व्याख्येयं हरेरिति मनोहरत्वं तेन पुत्राणां तादृशत्वं यथा बीजं तथांकुर इतिन्यायात् अतः सर्वत्र चारुपदं एवमग्रे भानुपदम
पि अतएव पितुर्नन्यूनाइति भानुरितिसार्धकं द्रविणोद्रविड इतिपाठो पितृसंमताहि एव मौसलेतां सां बस्य तथा चेष्टितं तु भगवदिच्छयैवेति भावः ११ नाग्नजीति कालिंदी पुत्रयोर्वृषइत्येकनाम त्वं केनचिदपरिहार्यं निमित्तेन स्यात्
मातृणामादि विशेषणे व्यवहारसिद्धिः एवं वीरादीनं श्रीमान्निति विशेषणं १२ भद्रो नामैकत्वएकः अवरः कनीयान् १३ पुत्रान् सूता इति पाठो सहस्रोजसी तां ते कृतं सह एवायमितिअर्थः १४ यथ नोबकन्न इति पाठो महीशामहास्री

रितिप्राग्रे पतेमिविंदो॥ लक्ष्मणा: मित्रविंदे वशी व्याख्या नाम्नी द्रौपदी प्रश्ने हे त्रैव्ये मित्रविंदे इति स्वामिव्याख्यात् विष्णुपुराणाच्च १५ सत्यकोनाया: दशभद्राया: १६ दीप्तीत्यर्धकं रोहिणीषोडशसहस्रस्त्रीषु मुख्या तत्कृतानां
मुक्तिरन्यासामुपलक्षणार्थं १७ राजन्निति आश्चर्येण तोजकटे इति द्वारकायां पुनः प्रत्यागत्य तत्र कंचित्कालं प्रद्युम्नोवासात् १८ एषां श्रीकृष्णपुत्राणां पुत्राः पौत्राश्च कोटिशः अत्र हेतुतया कृष्णपत्नीबाहुल्यमुच्यते मातर इ
ति १९ कथमिति सार्धकं यो हं तुरं प्रमीक्षते सकथं प्रादात् वैवाहिकं विवाहमिनिर्त्तं २० ननु भगवद्विष्ट्यमिति सामान्यतात्रायतो तद्विशेषस्तु दुर्ज्ञेयस्तत्राह अनागतमिति इंद्रियायोग्यं दूरस्थं च कुड्यादिव्यवहितं च
योगिन इति भवाहशाभक्तास्तु भगवत्संबंध्यपि विदुरिति भावः २१ यद्यपि कृष्णावमानितस्तथापि वैरमनुस्मरन् अपि रुक्मिण्याः स्नेहेन ददौ २२ किंच परराजवंचनार्थं कृतस्वयंवरेपि रुक्मवत्या कृतः सन् राज्ञो
निजस्त्य तोजहार वरणे हेतुः अन्यत्रानंगोपि अत्रांगयुतः पूर्णरूप इति अत्र श्लोकयोर्व्युत्क्रमेण स्वामिव्याख्यानं तु स्वयंवरणस्य मुख्यताज्ञापनार्थं २३ सर्वासामेकैका कन्या तासां विवाहोपलक्षणार्थं ज्येष्ठकन्योवि
वाहमाह रुक्मिण्या इति बलीत्यन्वर्थनाम सर्वगुणोपलक्षणार्थं विशालेति पित्रुखी त्वाद्धन्यता २४ सेहित्रा यतिसार्धकं हरेः हरौ बद्धवैरोपि तत् योनं विवाहमधर्मं द्विषदन्नेन भोक्तव्यं द्विषतं नैव भोजयेदिति शास्त्रं सं
बंधस्य लोकविरुद्धत्वे नान्याय्यत्वं ज्ञानन्नप्यदात् २५ श्रीकृष्णो कौटिल्यस्य फलं वक्तुमाह तस्मिन्निति उद्ययेउत्सवे रुक्मिण्या आदावुक्तिः भ्रात्रा त्वगृहगमने तस्याः प्रयोजकत्वात् सा बलस्य तु प्रद्युम्नेन पुरस्कृतत्वात् २६ तस्मि
न्निवृत्ते इति सार्धकं अनक्षज्ञ इत्यादौ निंदार्थः स्पष्टः वाग्देवीमते त्वेवं भाति अनक्षः अतींद्रियः स चासौ ज्ञः सर्वज्ञश्च परस्य चक्षुरित्यादिश्रुतेः एवमपि तद्व्यसने स्वस्वरूपे तेषामिंद्रियाणां व्यसनं विस्तारणं प्रकाशनं से
द्रियइवज्ञात इत्यर्थः अतएव मक्षैः सर्वेंद्रियैर्विषयीकुर्वतीति २७ इतीत्यर्धकं सभायामाहूय क्रीडितवान् स्वर्णरत्नादिकं संनिधाप्येति हरिवंशे २८ शतमिति सार्धकं निष्काणां शतादिक्रमेण प्रहसमाह दंतानिति नाम्नो
दंतश्च क्रोधपतः प्रसिद्ध हत्वाय स्त्र पराधक्रमः २९ ग्लहमग्रहात् दैयत्वेन स्थापितवान् ३० रुषात्वति शायेन रक्ताक्षः सन् न्युर्बुदं दशकोटिग्लहं ३१ रामो धर्मेण न्यायेन जितवान् छलमाश्रितो रुक्मिमया जितमि
त्यादि प्राहेति शेषः ३२ माक्षिकाणां नृपाणां दुर्जनत्वेन मौनं ज्ञात्वा काशवाण्यब्रवीदित्याह तदेति धर्मतो यदिदं च नं ग्लहस्थापनादिवाक्यं तेनेव जितः रुक्मी तु तदपलापादिमृषा वदति तत्र्यक्तवपोक्ता यं ग्लहः सत्यं नमये
षोनुमोदितः एवं त्वयाचेद्विजितं न मया विजितं कथमिति विष्णुपुराणे व्यक्तं तत्राकाशवाणीच अनुक्तापि वचः किंचित्कृतं भवति कर्मणेति संकर्षणसद्यः सर्वसंहर्तुं समर्थमिति भावः ३४ नूयमिति श्रीकृष्णाद्यपेक्ष   २३
या वाग्देवीमते तु गवां वेदादीनां पालका यूयं सात्विके वने एव निवसतो ध्यानादिविषयभवथ अक्षकोविदा द्यूतसभासु ये कोविदा स्तेषां ध्यानादिविषयानतु भवथ यतोक्षादिभिः श्रीमत्ताः एव दिव्यंति न तु भवतुल्या
भवद्भक्ता अपीत्यर्थः तस्मादेवं क्रीडनलीलातत्वेन वयं जानीमः इति भावः ३५ राजभिः प्रयोज्यकर्तृभिः नृमणसंसदि मंगलसभायां ३६ पदे पादविरंन्यासे इति भीत्या पलायनं तथाप्यपातयत् यत्कुपः क्रोधे हेतुः प
इति ३७ अन्ये चेराजानः परिघार्दिता भीताः संतः पलायिता इत्यर्थः ३८ रुक्मिणी दुष्टतया प्रसिद्धे इति साध्वकेरी चित्यं शाल इत्यसाध्वकेः तथापि तन्नोवाच साध्विस्यक्तो देव्या असाध्वक्तो रामस्य चस्वाचषयकस्नेहस्यते
गोना शस्तकृयात् यद्वा भंगः कौटिल्यं प्रणयकोप इत्यर्थः यद्वा तयोर्मियी दृशस्नेहतरंगा अहं कथमेवं वदामीति भयमिव भयं लज्जेत्यर्थः एवं भंगहरणात् हरिः येन विरूपमात्रकरणे श्रीकृष्णः परुषमुक्तस्तेनैव रामेण तद्वध
इति कौतुकादाह हे राजन्निति ३९ सूर्ययानवोढ्यासह अभ्युदयदुष्टव धाद्यखिलार्थसिद्धो हेतुः मधुसूदनाश्रय इति तत्संमत्येव रामेण रुक्मी हतः स च तेन वरमिषान्मधुदैत्य इव हतमिषादेवेति च व्यज्यते ४० पावद
ति वैरुक्मी रुक्मिणो रामतस्तेतेः युज्यते स्नेहयशनाशरतस्यार्थे न नावपि १ इति श्रीमद्भागवतदशमस्कंधसंगतः येकषष्ठितमोध्यायस्तोषिणीसारसंग्रहे १ इति येकषष्ठितमोध्यायः ६१ अनिरुद्धोपि निरुद्धः स
हस्रकरबलिस्कृतेन नोचित्रं कररहितसैंहिकेयः सहस्रकरमावृणोति निजसमये १ अत्र राजोवाच बाणस्यत्यादिसार्धकं येन वामनरूपायेत्यादि सार्धं पद द्वयं च न सर्वसंमतमिति व्याख्यातं बाण इति महात्मनः
भगवद्भक्तस्यापीति बाणस्याभक्तत्वे तेन भक्तबलिसंगतोपि दुर्वारभगवद्द्वेषहेतुदोषवत्त्वं च व्यज्यते तद्दोषस्य श्रीशिवाराधनेनापि दुर्निवारतां शिवएवस्य जोकावके तोच दर्शयितुमाह सहस्रेति मृडति भक्तिमयस्तोड
वादिनास्तवयतितं १ कारुण्यातिशयादसौ तं दुर्जनमपि स्वीकरोतीति स्नेत्याशयेन विशिनष्टि भगवानित्यादिना वरेणकरणेन वशायामासेत्यर्थः वरमेवाह सबाणस्तं पुरपालतयावव्रे २ तत्र प्रस्तावविशेषमाह सहस्या
दिना पार्श्वस्थपरिवारैः सह सदातस्तुरवासिने प्रथमांतोवा पाठः अर्कवर्णनेति तादृशमहासंपत्यापि दुर्मद इति भावः अतएव सम्यक् संघष्यस्पृशान् इति तत्कृत्केरपिरजस्तमोमयीत्वं ३ नमने हेतुः हे महादेवेति किंच लो
कानां गुरुं प्रार्थनं च नमनप्रयोजनेर्व्यंजयति पुंसामिति काम पूरमतो मरात्रिपं कल्पतरुपमं त्वां ४ वरमपि सगर्वेतयैव व्यंजयति दोरिति हाभ्यां केवलभास्वरत्वे हेतुः त्रिलोक्यामिति त्वदिति त्वया तु युद्धासंभवाक्का
रायेवेत्यर्थः ५ न च तद्वैफल्यमेव दुःखमित्याह कंडूत्येति दुःसहयुद्धस्पृहया भरितैर्भुजैः रदीश्चूर्णयन्न यामगच्छं हे आद्यश्रेष्ठ अतस्त्वमेव युद्धयोग्य इति मया सह युध्यस्वेति भावः एवं राजसादीनां देवतारा
धनमप्यपराधायैव संपद्यत इति दर्शितं राजसतामसे भक्ते हरिद्विषं तं शिवः प्रसन्नोपि कुरुते सहस्रं दोषं बाणासुर इहनिदर्शनं व्यक्तं ६ भगवान् भूतभविष्यत्तत्त्रा हेतिशेषः मायूरध्वजः स्वयमेव यदा भ
ज्येत हे मूढ स्वामीष्टज्ञानशून्य अधिकेनेति वक्तव्यमत्समेनेस्यक्तिः सावतैवतत्तोषात् यद्वा मया त्वक्ष्म्यासह वर्तत इति समः कृष्णः मदीयेन श्रीकृष्णेनेत्यर्थः यद्वा ममसमं सर्वं सर्वस्वं यः कृष्णस्तेनेति ७
कुमतिः कुत्सितविचारः अतो मूढस्तता स्ववीर्यस्य नशानं नाशो यस्मात्तं तपादिष्टमर्थं प्रतीक्षमाणो विवेशा यतः कुधी दुर्व्यवसायः तदेव ध्वजश्च भग्न इति विष्णुपुराणादौ ८ श्रीशिवादिष्टसंग्रामप्रसंगमा
ह तस्येति कन्याकुमारी अनिरुद्धेन कांतेन पार्वत्या पतित्वेनादिष्टेन पार्वतीशंभुना क्रीडंती दृष्ट्वा तत्स्पृहां कुर्वंती मृषा मन्त्रात्यमपि रस्यसे इति पार्वत्योक्तेकदा केनेत्यपेक्षावती पुनः पार्वत्याह वैशाखशु
क्लद्वादश्यां त्वया सरतिं पराकरिष्यतीति स तेभर्तेत्यादि विष्णुपुराणे ९ तत्र स्वप्न एव तं कांतमपश्यंती उत्तस्थौ विक्लवा रतिश्रांता अतो व्रडिता एवमनिरुद्धस्य साक्षाद्गमनं व्यज्यते उत्तरत्र चित्रलेखया
नयनादिकं च नरलीलाव्यंजनायैवेति ज्ञेयं १० ततः किं वृत्तं तदाह बाणस्येति चशब्दस्त्वर्थे न तु कुमार्योपपत्पादिति समुच्चयार्थः ऊषेति दीर्घादिः कचिद् ह्रस्वादिरपि ११ कन्यायसे कासीक्

राम १०

क्तेः यदुक्तं कान्तेति तत्राह हस्तग्राहं भर्तारं १२ हृदयंगम इत्यनुक्तेऽपि यौवनादि संगृह्णाति १३ आधारं अधरसंबंधि १४ मत्त्विति वित्रिलोकीमध्ये भाव्यते सौंदर्यमिति तया अनुसंधीयते चेत्तदा तमानेष्ये अत आदित्राचित्राणि दर्शय १५ श्रा
मत्वादिलक्षणेन कथिते पत्नलिखने स्वशक्तिव्यंजनाय १६ अनुज्ञेऽपि इति युग्मकं प्रद्युम्नं विलिखितं वीक्ष्य श्वशुरत्वात्त्वा नाविकत्वात्तेन लज्जिता १७ अनिरुद्धं तु विलिखितं वीक्ष्य भावविशेषोदयस्त्रीविशेषेण योऽमुखी सती १८ योगिनी
नारदतः प्राप्तविद्या विशेषवती एतच्च हरिवंशे स्पष्टं रुद्रपालितामिति अतश्च भगवदिच्छया तीरिरमयिषोरनिरुद्धस्येच्छया च तत्र सर्वमिति भावः १९ शोणितपुरं नीत्वा प्रियं वल्लभं २० हर्षेण विकसितमाननमपि यस्या साकारगुप्त
शक्तेति भावः २१ परार्ध्येति युग्मकं पानभोजनेः पेयभोज्यभक्ष्यं चर्व्यं एतैर्याः शुश्रूषा तयार्चितः २२ प्रवृद्धस्नेहो यस्या यस्यां वा तया पहृतं मनो यस्य सः प्रेममोहित इत्यर्थः २३ आप्रीतामति हृष्टां अत एव दुरवच्छेदे राच्छदनानि हेतु
भिः इति चिन्हैः स्खलित कन्या नियमतया लक्षयांचक्रुर्न तद इति शेषः २४ भटा अन्तःपुरचराः वृद्धाः कुमार्याविरुद्धं चेष्टितं २५ स्वापराधं परिहरंतश्चाहुः अनपायिभिरिति प्रसादरहितैः पुरुषैः दुःप्रेक्षाया अपि पाठांतरे दृष्ट्या प्रेष्या
सखी यस्यास्तस्याः पुंभिर्दूषणं न प्रत्यक्षीकर्तुं न शक्नुमः २६ प्राप्तः प्रकर्षेण गूढत्वेनागतः २७ यदुश्रेष्ठत्वं युग्मकेनाह कामेति प्रद्युम्नाज्जातं सुंदरत्वमेवाह श्याममित्यादि २८ निर्भयत्वमाह दिव्यंतमिति अभितोऽन्तं मणयो मंगल
या अंगसंगेन कुचकुंकुमं यस्यां तां स्रजं मधुस्त्रावि मल्लिकापुष्पग्रथितां वा ... कोर्मध्ये दधानं तस्य बाणस्याग्रेऽपि आसीनमेव न तु भयादिनोत्थितं तत्सौंदर्यनिर्भयत्वादिना विस्मितः २९ शस्त्रपाणिभिनिकटस्थैर्वीरैः माधवोनि
रुद्धः मौर्वमुरुलौहविशेषः तस्य विकारो अयोगुणा भाव आर्षः व्यवस्थितः उत्साहादिना तदवज्ञापूर्वकं स्थितः ३० उपायाभवनात् ३१ बलीति भगवतो युद्धादिलीलाविशेषच्छया तदानीं बलविपर्ययादिति ज्ञेयं चतुर्व्यूहे तुरीयतत्त्वरूप
स्य तस्य ततः पराभवासंभवात् तथा च विष्णुधर्मोत्तरे वटपत्रपुटे त्वया दृष्टः क इति वज्रेण पृष्टो मार्कंडेय उवाच कल्पक्षये न विज्ञातः स मायामोहितेन वै कल्पक्षये व्यतीते तु तदेव प्रपितामहात् अनिरुद्धं विजानामि पितरं ते जगत्स
तिमित्युक्तं उत्तरतापिन्यां तु अकारार्थो राम उकारार्थः प्रद्युम्नो मकारार्थोऽनिरुद्धोऽर्धमात्रात्मकः कृष्ण इत्येवं प्रणवार्थत्वमप्युक्तं नागपाशैरिति साक्षाद्युद्धासंभवात् तस्या मंत्रिवचनाभ्यामायया सर्पास्त्रैर्बबंधेत्यर्थः मायया युयुधे तेन स
तदा मंत्रिचोदित इति पराशरोक्तेः भिन्नाम्यश्रु त्वेति कन्यागाराद्बहिर्यूथात् भिन्नाम्येति वा पाठः नागैर्वा वेष्टितं दृष्ट्वा उषा प्राद्युम्निमानुरेति हरिवंशात् अश्रुणां कलाबिंदुधाराययोस्ते अक्षिणी यस्याः अरोदिषि दरोत्सीदिति पाठा
वार्षो अरोदीदित्यर्थः ३२ इति श्रीभागवते दशमस्कंधे मध्यगः द्वियुक्षष्टितमोऽध्यायः तोषिणीसारसंग्रहे १ इति भागवते काशिनाथोपाध्यायेन विरचिते तोषिणीसारे द्विषष्टितमोऽध्यायः ६२ स्मरजनकस्मरहरयो
र्मुकुंदभवयोः कृपदर्शमाधवयोः नामत एव विरोधं भजतोरत्यमरयोः समरः १ श्रीवक्षः श्रीकंठो बहुमुखस्कंदगणविनायकाधीशो गिरिधरगिरिशौ युयुधाते बाणमुक्तिभेदपरौ २ प्रथमस्य शब्दस्यैवार्थे द्वितीयो दासादिसमुच्चये
विशेषेणातीयुर्मार्गमासारं भो रूदित्यर्थः वेशाखशुक्लद्वादश्यां सूत्तरं सप्तरात्रौ ते निरुद्धानयनं सप्तरात्रेण ते भीरु दर्शयिष्यामि हप्रियमिति हरिवंशात् इत्थं च षण्मासात्य याज्ञ्यत्वो रइत्युक्तं सोपास्यर्थः ? तत्तस्यानिरुद्धस्य क
र्मैच युद्धादिकं उपसमीपे कर्णे गुरुत्वेन कथनात् प्रकर्षेण ययुः रुद्रं देवतात्वेन भयाभावात् ३ युग्मकं राम रुद्रं याः रनुगामिनः तत्र प्रद्युम्न इत्यादीनां पाठतः क्रमः नंदाद्याः पार्षदा यादवविशेषाः ३ समंतान्नैरंतर्येण ४ भज्य
मानेति समाहार द्वंद्वगर्भः कर्मधारयः अदात्ता उपरिगृहाः अग्निमुखं निर्ययौ पुरात् ५ बाणार्थे बाणार्थमिति पाठो अनेन दुःसंगफलं व्यज्यते भगवान् श्रीरुद्रमात्मपराभवं जानन्नपीत्यर्थः तन्महत्त्वं दर्शयितुमिति भावः राम
रुद्रं भ्यां युयुधे ६ संकुलमतो द्भुतमत एव रोमांचकरं ७ बल्लस्य कुंभांड कूपकर्णाभ्यां सह ८ ब्रह्मादीनां यथोत्तरं न्यूनता ९ शंकरेति युग्मकं १० प्रेतमात्रिति भूतमात्रिति पाठे गौर्यादिमातृतो भिन्ना भूतमातर इत्यर्थः तेन रु
तप्रमथैस्तेन न पौनरुक्त्यं द्रावयामास एव न त्वबधीत् शिवानुचरत्वादित्यर्थः ११ दिव्यानि ब्रह्मास्त्रादीनि पृथग्संगा कीर्णं पृथग्विधानीति पाठांतरं १२ ब्रह्मास्त्रस्य कृते ब्रह्मास्त्रं प्रायुंक्तेति पूर्वानुषंगः नैजं नारायणास्त्रं १३ जृंभा

यतो

युक्तं सं तं मोहयित्वा गरुडादीनां यथोत्तरं हूरस्थघातकत्वं १४ प्रद्युम्नादीनां जयमाह स्कंद इति द्वाभ्यां शिखिना वाहनमयूरेण १५ कुंभांडेति एवं सांबेनापि बाणपुत्रो जित इति ज्ञेयं १६ तस्य बल्लसैन्यं १७ रणे दुरभिमानः १८
युगपच्छिदेत चशर संधानकालं एवं भगवान् तत्तत्संहारात्कृति १९ तस्य बाणस्य मातेति तपसा शिवपुत्रत्वं प्राप्तस्य तस्य माता माता कोटराख्या पार्वत्याः काचिन्मूर्तिरंतर्धाने विद्यया श्रीकृष्णमोक्षदत्तपथे स्थित्वा बाणं र
क्षेति हरिवंशे विष्णुपुराणे तु मंत्रमयी दैत्यकुलदेवतेत्युक्तं क्वचित्कोटवीति पाठः रिरक्षयारिरक्षयिषया २० ततइत्यर्धकं अनिरीक्षन् तीर्यङ्मुखो बभूव बाणश्च इत्यर्धकं २१ विद्राविते भूतगणे इति ज्वरागमनहेतुतया
शिवयुद्धाख्या कृतनयकथानुवादः ज्वरोऽभ्यधावत् योद्धुमिति शेषः त्रिशिरा इति नवलोचनत्वं षड्भुजत्वं निद्रोज्जृंभणादिमत्त्वविशेषो हरिवंशे २२ अथ सस्य एव नारायणो देव इति तेनोशीनरस्पष्ट्यादि क्रीडाकर्ता यस्तस्य
युग्ममपि क्रीडेवेति भावः ज्वरं शीतज्वरं २३ माहेश्वर इत्यर्धकं अर्दितः अतोऽस्फुटत्वतरं शापं कुर्वन् युयुधे इति शेषः २४ अन्यत्र ब्रह्मादिलोकेषु अभयमलब्ध्वेति तस्य तत्र तत्र पलायने वैष्णवज्वरस्य च तदनुयानं दु
र्वीसंस्प्रतीव चक्रस्येति व्यज्यते अतो भीतो रक्षणार्थे इसन् प्रणतात्मा निबद्धांजलिर्यस्य प्रयतीति पाठे संयतांजलिः हृषीकेशमिति तेनैव प्रेरित इति भावः २५ श्रीशिवोप्यनेन तत्रैव भिन्नोऽहं च स्वज्वरेण तापित इति पूर्ण
भगवत्त्वं बुद्ध्वा शरण्यत्वं स्तुत्यतां च व्यंजयन् नमति नमामीति त्वां अनंतशक्तिं नमामि कुतः परेशं ब्रह्मादीनां अत्र हेतुः सर्वस्यात्मानं चेतयितारं अत्रापि हेतुः केवलं शुद्धं ज्ञप्तिमात्रं चैतन्यघनं शुद्धचैतन्यादेव स्व
धिष्ठानभूतात्सर्वेषां जीवानां जडानां च प्रवृत्तिः सौषास्माद्वातः पवते भीषोदेति सूर्य इत्यादिश्रुतेः अतोऽनंतशक्तित्वं ब्रह्मादीशत्वं च युक्तमेवेति भावः एवं चेतयितृत्वेन परेशत्वाद्यधिष्ठानत्वादिहेतुत्वादप्याह विश्वेति
नन्वेवं ब्रह्मप्रसिद्धं नाहं तत्राह यत् ब्रह्म तदेव त्वमिति ननु ब्रह्म निर्विशेषमहं तु विग्रहरूपस्त्वात्सविशेषस्तत्राह ब्रह्मलिंगं विभ्रहोयस्यतं शुद्धं ब्रह्मैवेतद्रूपेण प्रकाशत इति भावः यद्वा ब्रह्मणा तापिन्यादिरूपवेदेन लिंग्यसे
तथात्वेन व्यज्यसे यस्तमित्यर्थः यतः प्रशांतं सर्वविक्रियारहितं प्रकृष्टस्फुरद्रूपमिति वा २६ एवं सर्वाश्रयत्वेऽपि ज्ञप्तिमात्रतया तत्तद्दोषास्पृष्टत्वं विवृण्वन् शरणं याति काल इति कालः क्षोभकः कर्मनिमित्तं तद्वैफला
नुरूपं दैवं स्वभावस्तत्संस्कारः जीवस्तद्वान् द्रव्यं सूक्ष्मभूतानि क्षेत्रमविद्या प्राणः सूत्रमात्मा अहंकारः विकार एकादशेंद्रियस्थूलभूताख्यः षोडशकः तत्संघातो देहः एतस्य च बीजरोहवद्बीजांकुरवत्प्रवाहः देहादबीजरूपं कर्म ततो
कुरो देहो मुहुरवमिति प्रवाहः एषा त्वन्मायाएतेत वबहिरंगशक्तेरेव विलासा इत्यर्थः तस्याति निषेधोपोहो यस्मिंस्तं त्वां प्रपद्ये शरणत्वेनाश्रये २७ एवमहं निर्दोषश्चेत्कथं काश्चित्तु हंसि तत्राह नानेति लीलया क्रीडया

भागद ३ १०

हेतुनोपपन्नेर्योग्यैर्नानाभावैर्नाकान्बिभराणि प्रति रूपान् हनानि सर्वविचित्राणि प्रायेण इंद्रादिदेवान् मुन्यादिसाधून् आबिभर्षि यत एते लोकानां सेतवो मर्यादापालकाः तथा मार्गान् दैत्यान् संहरसि यतोऽयमव
तारः एतदर्थमित्याह अंगेति भक्तायाः पृथिव्याः अतो भक्तानुग्रह मयत्वाद्दुष्टसहिंसादिकोऽपि तवमहागुण एवेति भावः २८ एवं शरणं गत्वा तन्निमित्तमाह तप्त इति ज्वररूपेण तव तेजसा शांतमपि दुर्जनात्म कृष्ण

१०

स्यगंतेन उत्तणमुद्धृतं दुर्जनेन स्यन्तवयुक्तपवतापइतिचेत्राह तावदिति तापः सर्वोपि किंपुनर्ज्वरमात्रकृतः नो सेवेरन्निति त्वामाश्रयतां नोचितो यमिति भावः असेवने हेतुः आशाभिः पुत्रादीषणाभिर्बद्धा इति यद्वा त्रा
यात्वस्य दैवविषयिण्या युक्ताः संतो नो सेवेरन्निति २९ हे त्रिशिरः व्येतु अपयातु स्मरस्यपि किंपुनः कृणूयात्कीर्तये द्वा तस्यापि त्वं तत्त्वतो न यं न भवेत् किंपुन मत्प्रपन्नस्य तव मज्ज्वरान्न भयमिति ३० क्षमादिगुणाद्च्युतं त्वा
णस्त्विति ज्वरादिपराभवेपीति भावः रथं नंदीश्वरसारथिकं माहेश्वरमिति विष्णुपुराणे जनार्दनं दुर्जनपीडकं ३१ न्टपरसुरराजः नानायुधधरोपि चक्रायुधेपि बाणान् मुमोच यतः परमक्रुद्धः एवं निर्बुद्धित्वेन ऽस
त्राह हे च्युतेति ३२ पश्चान्नानास्त्राण्यस्यतः सतः अस्त्रमोचनारंभ एव चाहुं श्छिद्देति शेषं यतो भगवान् क्षुरनेमिना क्ष्णानेमयः प्रांता यस्येति छेदे शोध्यमनायासश्च ३३ उपभज्यबाणत्राणार्थं शरणागतोभ्रूत्वामि
हापराधीबाणः कुतोनोपेक्षितस्तत्राह भक्तानुकंपीति यदर्थं भगवतापि युयुधे बद्धकानुकंपयेदमुचितमेवेति भावः चक्रायुधमिति तेन बाणवधशंकयेति भावः अस्तोदिति वोच्चे ताषतेः स्तुतिः स्वरूपवर्णनेयशत्रया
स्तताबस्यशक्तिव्यंजनाय भगवान् प्रागेव गतेति शेषं ३४ तत्र प्रथमं तावन्निर्गुणं तत्स्वरूपमहिमानं व्यंजयन्नाह त्वमिति त्वं हि त्वमेव परं तत्वं नाम कथं तर्हि परिच्छिन्नत्वं हस्यत्वं च तत्राह ब्रह्म ज्योतिः सर्वप्रका
शकं च अत्र मानमाह वाङ्मये ब्रह्मणि वेदे रहस्यत्वेनोक्तं गोविंदस्याखिलाधारिण इति चेतनश्चेतनानामिति च तापिनीश्रुतेः तर्हि कथं केश्चिद्दशुद्धइव गृह्यते तत्राह यं त्वां शुद्धात्मानः केवलं शुद्धं पश्यंति शुद्धत्वेद
ष्टांतः आकाशमिवेति ३५ आसां निर्गुणस्याऽतोतिकस्यास्य ब्रह्ममूर्तेस्त वज्ञानं त्वदधिष्ठितो विराड्विग्रहोपि दुर्ज्ञान इत्याशयेनाह नाभिरिति युग्मकेन यस्य नभ आदयो नाभ्यादयवयवाः स भगवान् लोके भुवने रूपा
स्यतया संपाद्यमानः पुरुष इत्यन्वयः अर्को दृक् अहं शिव आत्मा अहंकारः इंद्रादयो लोकपाला भुजेति ३६ यच्छष्टावृत्तिः स्पष्टार्था प्रजापतिर्विसर्गो मेढ्रं ३७ ननु वां मह तस्य मम कथं प्रपंचे प्राकट्यं तत्राह तवेति हे नि
त्यवैकुंठाधिष्ठान अवतारः अपूर्ववत् प्रपंचे प्राकट्यं जगतो जीवमात्रस्य भवाय त्लोकद्वयश्रेयसे अतो वयं सर्वे लोकपालास्त्वया पालिताः सप्तापिलोकान्विशेषेण त्वद्भक्तिविस्तारणादीना पालयाम इति ३८ नन्व
द्वयमभयीशाएवेति किमुच्यते भवतानुभाविता इति तत्राह त्वमिति त्वमेवैक ईशः सर्वेश्वरः कुतः आद्यः पुरुषः यतः स्वतः पूर्णः विराड्हिरण्यगर्भो मायोपाधिकेभ्यः परः शुद्धः यद्वावास्कदेवाख्यश्चतुर्थो व्यूहः अत एवाद्वितीयः
निरुपाधिकत्वात्स्वकर्षेणाद्येशानां त्वदंतःपातित्वाच्च अतोन्येषां हेतुः स्वयं हेतुरहितः नच प्रकाशनेपि हेतुः यतः स्वदृक् स्वयंप्रकाशः अथापि स्वदृकत्वेपि प्रकाशकत्वानुपमर्दनेन स्वर्थः स्वेषु भक्तेषु मायया रूपयात
ष्टामकादिकत्वोदिगुणस्य सिध्यर्थं यथाविकारं तत्तन्मनोभावानुसारेण प्रतीतो भवसि ३९ एवं स्वेषु रूपांतरं त्वमपि सर्वत्र साक्षान्न तनोषि किंतु प्राकृतादिषु भक्तेषु गुर्वादिद्वारा परोक्षेणेत्यतो मेषु साक्षादेवेति भावानुसा
रेणोक्तं विवरणायाह यथेति स्वयाछायया मेघलक्षणया ऽपिहितश्छादितएव सूर्यो छायाया मेघं रूपाणि घटादींश्च प्रकाशयति चाल्कदाचिदनाच्छादितएव एवं गुणेन स्वकीयगौणरूपेण गुर्वादिना छन्नः सन् तद्वा
रेवेत्यर्थः गुणान् स्वकारुण्यादीन् गुणिनश्च कारुण्यादिकर्तृन् गुर्वादीन् प्रकाशयसी केषुचित्तु साक्षादेवात्मानं प्रदीपयसि प्रकाशयसि तथासः तत्र हेतुः हे भूमन् अपरिच्छिन्नमाहात्म्येति ४० एवं निर्गुणं तन्महिमानं व्यंज्य प्र
स्तुतं बाणार्थं क्षमापनं पंचभिर्निवेदयन् ईदृशात्वन्महिमज्ञानाभावादयमसुर्धृतइति नाश्चर्यं प्रायः सर्वस्यैव त्वन्मायामोहितत्वादित्याशयेनाह यदिति पुत्रादिषु प्रसक्ताः दुःखार्णवे ऽन्मज्जंति देवादियोनिषु निमज्जं
तितीर्यगादिषु ४१ तत्र त्वयास्वभक्तियोग्यतां प्रापितोपि त्वद्विमुख ईदृशः शोच्य एवेत्याह देवेति देवेन त्वयैव दत्तमिमं भक्तियोग्यं नृदेहं य इदं मत्वयाविजितेद्रियुतं भ्रूलोकं मूल्लोकं लब्ध्वापीति ४२ तत्र चाद्यधुनामयेव
त गुरुणा प्रकाशितं त्वं त्वां यस्त्यजेत्सोतिशोच्य इत्याह य इति आत्मानं प्रियादिरूपेण प्रकाशितमपीति भावः विपर्ययाविपरीता अनात्मा प्रियानीश्वरा इंद्रियार्थाः पुत्रादयस्तदर्थं मर्त्योप्यमृतं त्यजे त्यजेन्निति पाठो ४३
यद्रूर्णाश्रपि वयं भजामस्तस्य तवा भजनेई दृशस्यैव हानिरित्याह अहमिति विबुधादेवर्षयो मुनयोत्र ब्रह्मर्षयः अमलात्मानाशिआशयो येषां ते आत्मारामाश्चेत्यर्थः परमात्मानमतः प्रष्टमीश्वरमपि ४४ अतइदमेव प्रार्थ
यामह इति वदन् बाणाग्रहेपि हेतुतया विशेषणानि न्यस्यति तमिति भजन योग्यं त्वां भजामः समं यतः प्रशांतरागद्वेषश्च किंच सुहृत् बुद्धिप्रवर्तकः परमात्मा देवमीश्वरश्च तं नचान्यो भजनीयोस्तीत्याह अनन्य स्व
समानान्यरहितं एकमसमानान्यश्च त्वं जतो जगतामात्मानं केतमधिष्ठानं च भवेषु जन्मजन्मसु अपवर्गाय भक्तियोगप्राप्तये हे देव भक्तेषु क्रीडापरं ४५ एवं स्वाभीष्टं प्रार्थ्य स्वभक्तबाणानुपेक्षां प्रार्थयते अय
मिति इष्टः स्वद्भ्रूतिमयन्न स्यवाद्यसानिध्येन तव प्रीतिविषयः दयितः प्रह्लादादिसंबंधेन दयाविषयश्च अतो मामनुवर्तितुं प्राप्तः अत एव च त्वदनुग्रहं मत्वा मुष्मा अभयं दत्तं भवतो भवता दैत्यपतो प्रह्लादे यथा
तदनुसारेणापीति युष्मादिना सापराधं स्वमत्योक्तं ४६ हे भगवन् सर्वत्रेति अस्मिन्मदनुपेक्षां स्वेन सह मम युष्मादिकुतुके छामस्य मद मशमनादिकं च त्वात्वेव त्वयेदं सर्वं व्यवसितमिति भावः नः प्रतिपत् स्वप्रियमाथतलो
रवामेव बहूत्वं रामाद्यपेक्षया मदीयं यं प्रत्यास्थ तेनापि कर्तव्यमेवेति भावः मम तु न तुओत्स्य पेक्षापियतो भवतेति व्यवसितं बुध्या निश्चितं साध्विति व्यवसितादप्याधिक्यार्थं ४७ मम वध्यस्त्वयं सर्वथाने
त्याह अवध्य इति अस्करोप्ययमवध्यः यतो वैरोचनस्य बल्लेर्वंशस्य पुत्रः वैरोचनाति क्वचित् किंच प्रहरादायेति अन्वयः स्वज्ञातीयएव तेन च कीबकाद्यास्करादिव धोनापुक्तः ४८ किंतु दर्पेति दोःसहस्रमि
त्याधुक्ते हेतोर्दर्पस्यनाशायेव ४९ अनुगृह्णाति चत्वारइति अस्करोपि पार्षदमुख्यः अजरेति भुजछेदव्यथायाः सद्यः शांतिः नकुतश्चित् भयइति संस्तेरप्यभयाज्जीवन्मुक्तिः उग्रपुरधानुचरं दुर्दं
दमपिनिज्ञस्कदर्शनेनैव बहुदोषमपि सुरूपं करोति सदयश्चतुर्भुजो भगवान् १ पुमर्थश्चतुरो दातु श्रीवैकुंठाच्चतुर्भुजान् महीध्यन्बाणराजोपि मन्ये भाति चतुर्भुजः २ ५० सबाणः बध्वा उषयासह सम्य
क् बहूपस्कर युतत्वेन समीपेआनयत् ५१ उपस्करमेवाह अक्षेति रुद्रेण बाणादिदुःखरुत् द्रावकेणानुव्रजनादिना नंदितः ५२ सल्ढकः उत्सितमार्गभृषित मार्ग भूषितमार्गेति पाठो ५३ अत्र युद्धं श्रीकृष्णपरा
जयो नेति नाश्चर्यं यत एतत्सर्वत्यापि न कस्यचित्पराजय इत्याह य इति स्मरेदपि किमुत कीर्तयेच्छृणुयद्वा प्रातरुत्थाय इति स्नानापेक्षो निरस्ता वाह्यांतरारिभ्यो भक्तिविघ्नेभ्यश्च पराभवो न ५५ इति श्रीमद्भागवतद
शमस्कंधमध्यगः त्रयः षष्ठितमोध्यायस्तोषिणीसारसंग्रहे १ इति भागवते दशमे उत्तरार्धे काशिनाथ पाध्याय विरचिते तोषिणीसारे त्रिषष्ठितमोध्यायः ६३ अत्रास्याब्रह्मस्व दतमथ षष्ठं हु तं बहुत धापि पत
तिस्म समुद्धारः स्वकरेध्यत एवकृष्णेन १ ब्रह्मार्थः श्रुतिभिः श्चाव्यानस्पृशेया मनसापि च बलात्स्पृष्टस्य तत्त्वस्य स्यात्स्वदेहत्व भ्रमात्क्षुधीः २ एवं श्रीशिवजयोदिनाव्यक्तमैश्वर्यमुक्त्वा प्रसंगादन्यदप्याह एक

देति अनेन क्रमो निरस्तः तेनोचित्यादि यंलीलाप्रद्युम्नादीनां यौवनारं त एवानिरुद्धजन्मतः प्राग् स्वाकुमारत्वाद्ध प्रयोगस्तु क्रीडासक्तत्वात् कुमारबाहुल्याच्च सांबस्यादावुक्तिः प्रद्युम्नस्य शंबरगृहादचिरा
गतत्वेनाग्रगामित्वाभावात् १ तत्रोपवने तृषितास्ते तोजलं विचिन्वतः सत्त्वं जीवं अद्भुतं महाकायत्वात् २ तं च कृकलासं वीक्ष्य विस्मयान्विताः कृपया युताश्च संतः चेतसो मनसा इति पाठो ३ यत्नमेवाह चर्म
भिरिति चर्मभस्त्रिस्तंतुमयैश्च पाशैर्नाशक्नुवन् यतो नेकाम्ननाविच्छत यौवनाः समुद्धर्तुं नमुद्धर्तुमिति पाठो ४ सकृष्णो रविंदाक्षस्तच्छ्रवणाद्विस्मयेन फुल्लदृष्टिः संस्तत्रागत्य वीक्ष्य च वामेन तत्रापि लीलये वो
ज्जहार यतो विश्वपालको भगवानिति ५ नामातासादिनापिजनोद्धारात् उत्तमश्लोकः श्लोको यशो यस्य तस्य करेण स्पृष्टः स्पर्शनमात्रेणेत्यर्थः स्वगर्देवो बभूव तथापि श्रेष्ठ्य विवक्षयाह संतप्तेति चामीक
रस्वर्णं तद्वद्वारुर्वर्णो स्याद्भूता भूषणवसनस्रजो यस्येति तुल्यवर्ण इति क्वचित् ६ प्रपच्छेत्यर्धकं मुकुंदस्तन्मोचकः ७ हे महाभाग यतो वरेण्यरूपः अतएव देवश्रेष्ठं मन्ये नूनं तर्के वा शोके हीनिश्चये अत
दहत्वे हेतुः हेकृतद्वेति ८ आत्मानमित्यर्धकं त्वत त्वे विविदिषतां नइति कर्मणि षष्ठि अत्र स्थानेनो स्मान्प्रतियत् यदि वक्तुं योग्यमिति गुह्यस्यापि वप्रकाशनेच्छा ८ स्मप्रसिद्धो देवत्वे पिराज्जेति प्रागवस्थामारोप्य आनंद
मूर्तिना नेतमूर्तिनेति पाठो करवचनत्वविभूत्वं वा तद्दिग्मरहेरात्रानुभूतमिति भावः अतएव माधवं लक्ष्मीकांतस्त्वे नज्ञातं तं दंडवत्प्रणम्याह किरीटेनोपलक्षित इति शोभाविशेषः नवमस्कंधोक्त श्राद्धदेवपुत्रादिक्ष्वा
कुत्रावुन्नगादन्योयं नृगइक्ष्वाकुतनयोत्तेयः नरेंद्र एवं न देवोत्तमः दानिष्विति निजदानत्वस्य सूचनमीदृशस्याप्यल्पपापेनेदृशीगतिरिति ख्यापनाय कर्णमस्पृशामीषदपि श्रुतः स्याः यदीति संदेहे तत्र हेतुमाह प्रजा
इति राजाधिराज लीलत्वाद्वंदीमुखतः श्रवणसंभवः सर्वेश्वरत्वाच्च मादृशाल्पजनश्रवणासंभव इति भावः १० नतु श्रुतो भवसि इदृशादशानिदानं तु न वेद्मीत त्राह किन्विति नाथ हे परमेश्वर अतः सर्वभूता
नामात्मनो बुद्धेः साक्षिणः नत्वचिरकालेन विस्मृतं तत्राह कालेनेति ११ तावतीरिति विप्रापराधस्य तावद्धानेनाप्यनिवार्यत्वं व्यज्यते स्मप्रसिद्धं नात्र संभावनेति भावः १२ एवं गवामानंत्य मुक्ता गुणादिकमाह
पयस्विनीरिति शीलं स्वामिवश्यत्वादि रूपं पुष्ट्यादि सौंदर्यं गुणः सदाक्षीरत्वादिः कपिलाश्च वाराहे कृष्णवर्णकपिलास्वेत पिंगलाद्रूपपिंगलादि भेदेन दशविधा उक्ताः विशेषणानां यथोत्तरश्रेष्ठ्य व्यंजकत्वं अ
लंकारानाह हेमेति सवत्सा इति नवप्रसूतत्वं व्यज्यते अहं ददाविति पुनरुक्तिस्तन्निश्चयाय अपरोक्षे पिल्लिडुक्ते दानसमये हर्षभरेण दृशी दत्ता इति नात्ताशिषमिति भावः १३ पात्रसाद्गुण्यमाह स्वलमिति मये
वकुंडत्वाद्यैर्भूषितेभ्यः ऋतान्यसंभिकानि ह्यादशाव्रतानि येषां तानि च भारते धर्मश्च सत्यं च दमस्तपश्च अमात्सर्यं ह्रीस्तितिक्षानसूया यज्ञश्च दानं च धृतिश्च तेच व्रतानि वेद्यादशब्राह्मणस्येति तपसा संध्योपास
नादिस्वधर्मेण श्रुताः ख्याताश्चते ब्राह्मणिवे देवदान्या अध्यापनशीलाश्च ते संतो निरपेक्षाश्चतेभ्यः युवभ्यो धर्माचरणदक्षेभ्यः प्रादां भक्तिपूर्वकमहं १४ न केवलं गा एवादां किंतु गाइति गावोत्र वृषाः आयतना
नि गृहाणि परिच्छदाश्छत्राद्याः रथानित्यं ते प्रादामिति पूर्वानुषंगः पूर्तकूपारामादिकं चरितं कृतं १५ एवं वर्तमानस्य मम संकटमापन्नं श्रुण्वीत्याह कस्यचिदिति द्विजमुख्यस्य प्रतिग्रहनिवृत्तस्य गोभ्रष्टाच्यु
ता गोसंघे मिलिता अविदुषा तस्यैयमिति अजानता १६ दत्तवानित्यस्माद्धेतोः १७ स्वार्थस्य स्वाभिमानमात्रस्य साधको प्रातिग्राही दातेत्याह स्वामीतु हर्तेति भ्रमो व्याकुलत्वं १८ तदोभावपि प्रार्थितो कृष्णपा
गतो कृष्णगतेनचे इति पाठो कथं प्रार्थितौ तदाह गवामिति सार्धेन १९ कृष्णमाह पतंतमिति यद्वा कृष्णासापाद्धेतोः पतंतं २० नैवेनैव अपाक्रमतां गास्यक्त्वालक्षं गवी प्रतिग्रह बलात्कार भयेन अपसृतः यल्लक्षं
त्वयोक्तमन्यदप्ययुक्तं तदपीमां विना नेच्छामीत्युक्त्वा गां त्यक्त्वा ययौ २१ अंते रेमितस्यायुषः समाप्ते र्मरणावकाशे सति तत्र यमालये ममेनेव पृष्ट इति गौरवं प्रश्ने हेतुः देवेत्यादि यमादिपूज्य यतो जगत्पतेः जगत्सा
त्वनार्थत्वयैव धर्माधिकारे नियुक्तत्वादिति भावः २२ अशुभं गोहरणजं पापं उताहो अथवा पूर्वं शुभं पुण्यं लोकस्य स्वर्गादरंतेन पश्यामीत्यंतः प्रश्नः २३ हे देव यमपूर्वं पापं भुंज इति मयोक्ते स यमः पतेति प्राह
तावत्तत्क्षणमेव पतन् कृकलासमिति तत्पापस्य तादृशफलत्वात् रामायणादौ तु विप्रयोस्तथा शापउक्तिः २४ स्मृतिर्मयेति शेषः अद्यापि स रट देहे ततो देवदेहेपि यतो ब्रह्मण्यस्येत्यादि दासस्य दानादि सर्वकर्मा
र्पणेन तवैदास्य भक्तिप्राप्तस्य अतस्त्वद्दर्शनेच्छोः सर्वकर्मार्पणे हेतुः हे केशवेति को ब्रह्मा तत्सहितईशो रुद्रः अंते रौले नविद्यते यस्येति सर्वेशत्वादिति भावः यक्षा गुसाक्षितया ब्रह्मण्यश्च बलत्ये आत्मपर्यं तद्
ना हृदान्यश्चयः स्वं तस्य तत्र दासइव दोसस्त्वदीय ब्रह्मण्यत्व वदान्यत्वानुकारी तावतैव भवद्दर्शनकांक्षी च तस्य तदनुकरणादि प्रभावादेव स्मृतिर्न ध्वस्ता प्रत्युत त्वद्दर्शनं च जातमिति अयं भावः नाहमंबरीषा
दिवत्वत्परिचर्यानिष्ठो मुख्यो दासस्तथात्वे विप्रशापादिनापीदृशा दुर्दशानसंभवेत् तथापि त्वत्कारुण्याद् देवत्वं दृशीनं जातमतस्त्वदनुवर्तित्वमपि भविष्यतीति २५ दुर्लभं भवद्दर्शनं लब्धमिति स्वभाग्यमभिनं
दति सइति परमदुर्लभः विभो हे व्यापक परआत्मा अतएव यो गेश्वरैरपि उपनिषद्दशा मले हृदि विभाव्य श्चित्यरूपं कथं केन प्रकारेण मम क्षपथश्च क्षुविषयो सित न्नवे श्रीत्यर्थः यतः विभूत्वाद् दासत्वा
द्वैद्रियजन्मनाविषयो यः स साक्षात्स्यात्काक्कानेवेत्यर्थः तत्रापि पुरुदुःखेन नोपबुद्धेः स्यात् का क्वानतरां तत्रापि मे मम मा धमस्य स्यान्नेतमामीत्यर्थः किंतु यस्य भवापवर्ग उपस्थितस्तेनेवानु दृश्यादृष्ट स दृशो
भवसिद्धिरूपतया अविषयत्वात् तस्मान्मम संसारिणः कथं दर्शनं जातं तं स्वकारुण्यादि प्रकारं त्वमेव वेत्सीति भावः २६ दर्शनप्रभावाज्जात भक्तिरनुज्ञां याचयन् नामकीर्तनप्रियत्वेन तन्नामभिरेव संबोध
यन् प्रार्थयं तं देवेति युग्मकेन प्राप्तदेवत्वानामपि पूज्येति स्वप्रार्थनीयत्वं ननु त्वादृशैः स्मरत नाथः प्रार्थ्यः स्तत्राह हे जगन्मात्रस्य नाथेति तथापि सत्यलोकादिगतानां महतामेवाहं प्रार्थ्यस्तत्राह गोविंदेति
संप्रतिगोष्ठचिन्नामेव विहारस्थानत्वेन विंदतीति संप्रति ते न्योपि वयं त्वत्प्रियत्वेन महांत इति भावः नन्वत्रापि मम भक्ता एव प्रिया स्तत्राह हे पुरुषोत्तम पुरुषश्रेष्ठो चितो तेदयालुता मात्तोच्य प्रार्थये नतु स्वभक्ति
मिति भावः किंच हे नारायण सर्वजीवाश्रय हृषीकेश ईदृशा प्रार्थना प्रेरकस्त्वमेवेति भावः न रूपाकरत्वेन पुण्यकीर्ते अच्युत हे दीनपालना च्युतिरहित अव्यय अनंत भक्ता तीष्टदानेपि परिपूर्ण २७ एव
त्व वर्णितो भगवान्नाहस्यां तत्राह हे कृष्णेति कृष्णस्तु भगवान्स्वयमिति प्रसिद्धमिति भावः अतएव विभो सर्वेश यत्र क्वापि देवादिलोके स्थितस्यापि मे मनस्त्वत्पदं विषयो यस्य तथा भूतमस्त्विति प्रार्थयेद्रत्य
र्थः २८ ननु नस्त्वत्रेव तिष्ठ तत्राह नम इति सर्वेषां भावश्चेष्टा यस्मात् तस्मै त्वत्प्रेरणया यामीति भावः प्रेरकत्वे हेतुः ब्रह्मणे सर्वव्यापकाय व्यापकत्वमात्राकथं प्रेरकता तत्राह अनंतेति किंच वासुदेवाय
सर्वचित्ताधिष्ठात्रे अतो योगानां कर्मज्ञानादीनां प्रवर्तकाय एवंभूताय कृष्णाय तुभ्यं नमो नमः द्विरुक्तिर्नेत्यन्तु द्धेकालदानमित्यर्थः यद्वा सर्वोत्पादकायाविकाराय मामाशक्तिमतेएवं भूतायापि नराकृतिब्रह्म

ऐश्वर्यं देवकीदर्शितवान् तां दुर्घटघटनाशक्तीं न्यस्येतेन मोनमः मुहुर्नमनमात्रे योग्यं न तु निकटे स्थातुं योग्यो हमिति भावः २९ पश्यतां मामाश्चर्येण पश्यस्व ३० भगवाननपि विप्रापराधफलं दर्शनेनाह यतो देवकीसुतः
स्वीकृतनरलीलः तत्रापि ब्रह्मण्यदेवः सर्वधर्मप्रवर्तकश्च स्वतः सुविनीततया दवव्याजेनान्यान् शिक्षयितुमित्यर्थः ३१ मन्नागत्यमपि ब्रह्मस्वं चौर्यादिना भुक्तं मग्नितोपि पियातितेजाः पापद्यपरि त्याज्यं तपायोगादिना
लस्तस्यापि दुर्जरं मानिनां तापआदिश्ययान्नामिति भावः ३२ ब्रह्मस्वं विषतोपि विषं इत्याह नेति हालाहलं विषमारकत्वोव्यभिचारी हि एव ब्रह्मस्वं मेव ३३ अतारमेव न संसर्गिणं न च संसर्गिसंसर्गि मारकत्वात् दग्नि
नापीत्याह वह्निरिति ब्रह्मस्वारणिजः पापाग्निः कुलं पुत्रपौत्रादि समूलं पित्रादिसहितं वह्निस्तु मूलानिःशेषं पर्यत्यहि प्रकर्षेण शाम्यति च नाय मौषदपीति भावः ३४ कियद्दहतीति तदाह ब्रह्मस्वमिति दुरनुज्ञा
तं यथावदननुज्ञातं शिशुरूपं आत्मानं पितृपौत्रांश्च प्रसह्य हठात् राजादिबलात् भुक्त्वेति ३५ तस्माद्धि राजानो ब्रह्मस्वं वांछति निरयमेव वांछति ते राजश्रीमदेन नात्मपातं पश्यंति यतः साधुबालित्रा अति क्रूरवीः रा
जत्वकृष्या इति पाठे राजभ्रष्टस्यादपश्च ३६ निरयमाह गृण्हतीतियुग्मकेन रुदतां सतां गृण्हतीत्यादिकं नरककालसंख्यादर्शनार्थं रोदनाभावेपि नरकावश्यंभावात् ३७ कुंभीपाके पुत्रास्वांतरं तेदन्निन्नेषु प्रतिनर
कं तावतोब्दान् ३८ ब्रह्मिहरणे तु कुंभीपाकभोगानंतरं महति दुर्गतिरित्याह स्वेति जायते पुनःपुनर्भूत्वा तत्रैव वर्तवतीत्यर्थः ३९ तज्ज्ञाहीर्षयापि दुर्गतिरित्यन्ये पांतयार्थे स्वयं भीतइवाह नेति मे मदर्थं मत्संबंधीनान
नन्वतु यत्तु बलच्छलादिनापि कोद्यापीह जनमन्यत्पापुषः शत्रुपराजिता राज्याद्भ्रष्टाश्च अन्यत्र च सर्पाभवंति नरान्न पाइति पाठे ४० दुत्यततं हंतुमिच्छतापि हे मामकाइति यद्यस्युति ते मदीयानेति भावः घ्नंतं ताड
यंतं ४१ स च नमस्कारो मन्तेयेव कार्य इत्याह यथेति विप्रान् जातो बहुत्वं तज्जातीन् सर्वानपि यूयं च यूयमपि ४२ न केवलं भीत्यर्थमयमर्थवादः किंतु प्रत्यक्षमित्याह ब्राह्मणार्थमिति एनं प्रत्यक्षं ४३ विशेषेण
प्रत्यक्षदर्शनेन श्रावयित्वा धर्मशीक्षया सर्वलोकानां पावनः पावयितुमित्यर्थः अतो द्वारकोकस इति गिरितोपदेशोर्जुनेवदुपलक्षणमात्रं ४४ इति श्रीमद्भागवतदशमस्कंधसंश्रयः चतुःषष्टितमोध्यायः स्तोविणी
सारसंग्रहे १ इति काशीनाथोपाध्यायविरचिते स्तोबिणीसारे चतुष्षष्टितमोध्यायः ६४ श्रीरामालिंगनेनेव मोदते व्रजबालकाः अपि योषा व्रजइति चित्रमत्राविभातिमे १ अथ राज्ञस्तत्तल्लीलानंदसेविनोपि सहसानु व्र
तव्रजव्याकुललास्मृत्यातप्यमानं मनोविज्ञाय सर्वज्ञो मुनिः पुनर्व्रजाश्वासनकथामापातयेति बलेत्यादिना बलभद्र इति भगवानिति च श्लाघार्थं शुद्धपितृत्वादिमयप्रेम्णा शोभनं हृत् येषां तान्नंदादीन् दिदृक्षुः सन् ययौ य
तः सदैव तद्दर्शनोत्कंठः तदानु श्रीकृष्णेनानुज्ञात इति ज्ञेयं कृष्णस्य संदेशैरिति वक्ष्यमाणात् सहैव स्वगमने छये तावत्कालं नानुज्ञातो नंदादिप्रेमबंधात् तत्रैव तिष्ठेदिति शंकितवस्तु दवाद्यनुज्ञामप्राप्याधुनानुज्ञात इत्यूह्यं
अतएव स्वागमसंदेशगोपनायैकाकी प्रस्थापिताः जगामेको व्रजमिति हरिवंशोक्तेः प्रकर्षेणातस्तत्स्वभाविता त्वान्नापवेषधारणादिनायोवन्येन रमणीयेन वेषेणालंकृतः प्रहृष्टितितत्रैवोक्तेः १ तत्प्रभावभावितत्वं दर्शयि
ति परीत्यादिना परितः सर्वांगसंगं गाढमालिंगितः यतश्चिरोत्कंठैः पितराविति तस्य तयोश्च तथैव भावात् गोपीभिर्मर्त्यवयस्याभिर्वृद्धाभिरपि पितराव भिवाद्यास्थिता रामस्ताभ्यां परिषिक्त आशीर्भिरभिनंदितश्च २ चिरं
पाहीत्यायुर्बलवीर्याद्याशीर्व्यग्या जगदीश्वरः सन्नि … स्याशीरंते दाशार्हीतियादवसंबंधं व्यंज्य सानुज इति श्रीकृष्णस्य तदधीनत्वं व्यंजनयासं प्रतितयोः स्वेषां दासीन्यं व्यंजितं तत्त्वनुचितमित्याह नइति यथा यो
दवान्पासी तथास्मानपि पाहीत्यर्थः ३ ततो भोगतेर्मिलनमाह गोपैरित्यर्धकेन गोपवृद्धांश्च विधिवदभिवंद्य यविष्ठैश्चाभिवंदितो बभूव ४ यथेति सार्धद्वयकं अथ द्वितीयदिने गोपालान् वयस्यादीन् समुपत्य
तत्तद्गृहाद्दोस्वयं गमनेन मिलित्वा तत्राप्याप्तनो वयस्याद्यनुरूपेण हास्यहस्तग्रहवंदनाद्यैः समुपेत्य स्वकृतोपचारैर्विश्रांततत्रैवोपाहाराद्यनंतरं सुखासिनं च परित आगत्योपविष्टा ते बंधुयादवेष्वनामयं पप्रच्छुः त
त्रवयस्याहास्यहस्तग्रहाभ्यां यथासख्यमन्ये भ्रातृपितृपुत्रवर्गादिसंबंधानुरूपं वदनाद्यैरित्यर्थः ५ पृष्टाश्चेति अनंतरं ते च तेन पृष्टा इत्यर्थ पप्रच्छुस्ते पृष्टाश्चेत्यत्र विशेषः प्रेमेत्यादि अत्र हेतुः कृष्ण इत्यादि स
दानंदरूपे कमलपत्राक्षे स्कंदरे तापहरे च यद्धामार्थसुहृत्प्रियेत्याद्युक्तरीत्या पूर्वमेव तदर्पितसर्वविषयाः संप्रति तु श्रीकृष्णाविजयसुखाद्यर्थं विप्रादिष्वर्पितानि राधांसि सर्वभोग्यद्रव्याणि यैस्ते तथाभूता इत्य
र्थः तेषां कृष्णे तथाभावं दृष्ट्वा रामस्यापि तन्मदर्शीघ्रमिति भावः ६ तत्र गोपकर्तृकप्रश्नं विवृण्वन् कृष्णज्ञानां प्रश्नमाह कच्चिदिति वयस्यानां प्रश्नः कच्चित्स्मरतेति अतो रामेति पुनरुक्तिः सूयमिति श्रीकृष्णाद्यपेक्षया स
रसकृते मिलित्वा स्मरतेत्यर्थः विष्णुपुराणे तु विवाहात्प्रागेव कालयवनवधार्थं तो मथुरामागतो तद्वधे वृत्ते श्रीकृष्णो द्वारकां गतो राममात्रं व्रजमित्युक्तं तत्कल्पभेदेन व्यवस्थाप्यं ७ पितृतुल्यानां प्रश्नः दिष्ट्येति का
श्चिन्निहत्य कांश्चिन्निर्जित्य च दुर्गमाश्रिता एतदपि भद्रमस्मद्भाग्येनेत्यर्थः अत्र विशेषो हरिवंशे श्रीकृष्णोत्कंठाव्यंजकत्वामपि दृष्ट्वा कृतार्थो वयमित्यादि गोपवाक्यं श्रुत्वा प्रस्तुवाच तत्रारामः सर्वास्तानभितः स्थिता
न् यादवेष्वपि सर्वेषु भवंतो मम बांधवाः इहावयोर्गतं बाल्यमिह चैवावयोरतं भवद्भिर्वर्धिताश्चैव यास्यामो विक्रियां कथं गृहेषु भवतां भुक्तं गावश्च परिरक्षिताः आस्माकं बांधवाः सर्वे भवंतो बहुसौहृदा इत्यादि तत्राव
योरिति श्रीकृष्णवदहमपि युष्मद्बाल इति तत्साम्यं व्यंजयति यादवेष्वपि तेषां बांधवत्वाधिक्ये हेतुः बहुसौहृदा इति अस्माभिस्त्यक्त्वा गतेपि यूयं स्थिरपितृभावादयस्तेषां तु न तथा भावो न तिष्ठेदिति भावः ८ गोप्यः श्री
कृष्णप्रेयस्यं उद्धवेन रहस्यकत्रैव प्राप्ता इति ज्ञेयं विरहेपि हसंत्य इत्यस्मात् व्यंजकं श्रीकृष्णमुपहसंत्य इत्यर्थः उत्कंठामयोन्मादेन पतिज्येष्ठमपि पप्रच्छुः रामदर्शने सादराः कृतनमनादिकाः यद्वा रामसंदर्शनेना
दृताः श्रीकृष्णागमनाद्दोविश्वस्ता इति भावः स्वस्यागमनतमुपहसंत्योपि प्रेमस्वभावात्तत्सुखमेवकं पुरुषार्थास्तत्सुखमेव पृच्छंति कच्चिदिति पुष्पान्विना कथं तत्सुखं तत्राहुः पुरस्त्रीति ९ तस्य सुखमेव नः पुमर्थस्तथा
पितृस्मरणीयत्वमवश्यमपेक्ष्यमित्याशयेनाहुः कच्चिदिति चार्संत्राये शोकव्यंजकः अनुकूलाः सेवा स्मरत इति पुनरुक्तिरार्त्या वाक्ययक्षे महाभुज इत्यालिंगनोत्कंठा बंधून् अस्मरत्तु पितरं वा किं स्मरत्येव मु
तेरोत्तरं श्रेष्ठेन व्याख्येयं स्नेहापश्चादुक्तिः दैन्यात् १० नोवध्वः सदास्मरत्येवेति चिन्त्वानान्यगत्यस्मत्त्यागेन सौहृदलक्षणादर्शनादित्याहुः मातरमिति सार्धकेन दुस्त्यजान्यपि मात्रादीन् मात्रादीनां यथोत्तरं स्निग्ध
रा
त्वान् नत्यं त्वार्तत्यः पतीनोन्नत्यं तु तेषु तासां स्नेहाभावात् नहि भैत्स्य नेन सर्वासां वनमेव प्रायो वासो गम्यते अग्रहाणामपि त्वमरं प्रस्फस्केश्च दाशार्हेति यदुकुलोद्भवोपि त्वमागतः स तु नंदनंदनोपि नागत
इति भावः प्रभो इति कं स्मोइमं तस्यानयं कृष्ण ईदृशो को निर्लज्जा भावेमति भावः नो वत्सा दुष्ठवधार्थं गतो चिरादेवागतेति चन्त्वसंभाव्यत इत्याहुः संम्यकृत्य णवच्छिन्नं सौहृदमस्मत्प्रेमशृंखला येन ११ न
नु तादृशो तस्मिन्नस्माभिः सौहार्द किमिति कृते तत्र तदुक्त्या माहितत्वादित्याहुः कथमिति तादृशं शपथादियुतं नपारयेहमित्यादिरूपं । स्त्रीभिः कोमलं तत्स्वभावाभिः १२ अहो वन्या वयं निर्बुद्धित्वात

रास १२ दुक्तो विश्वासिन्यः स्मः पुरस्त्रियस्तु कथं विश्वसंतीति प्रेमार्त्या आहुः कथमिति नु विस्मये कुतो गरणं हंती श्रद्दधते अपि तु नैव कुतः अस्थिरचित्तस्य अत एव कृतं सौहार्दं हंति तस्यैव स्मरणे जातमित्यर्थः विचित्राः कथाः १२
कथयतः सन्तोषः संदरस्मिता वलोकः तेन स्तभितस्मरातुराः कामोद्रेकवित्रतया हतविचारत्वादित्यर्थः १३ अथोद्दिक्तशोकदत्तप्राः अन्योन्यमाहुः किमिति तस्य वार्तया किं प्रयोजनं प्रस्तुत दुःखमेवेत्यर्थः हे गो
प्यः कोमलज्जुस्वभावाः तर्हि शोकार्ताः किंकरवामेत आहुः कथा इति गाढशोकप्रहाराणामपि नैव महौषधिरिति न्यायात् तं विना कालो नयास्यतीति नचेत्याहुः यातीति तथैवेति तेन विनास्माकमपि कालो
यास्यत्येवेत्यर्थः नत्वद्यापि तद्विरहेणास्मासु काचिन्न्यूनतेति भावः १४ इति एवं मंदत्वादिगुणैः प्रकृष्टं हसितादिकं स्मरंत्यः चार्विति क्रियाविशेषणतया प्रहसनादिरोदनांत रसप्रक्रियास्तु योज्यं हसितादौ नाय
थोन्तरं स्मरणेन रोदकत्वे श्रेष्ठत्वं शोरेः संप्रति श्वशुरवंद्यत्वाभिमानिनः इति मुनेः सप्रणयेर्ष्योक्तिः १५ भगवान् सर्वथा सर्वेर्ष्योपि संकर्षणस्तदग्रजतया गौरवविषयोपि नानाविधसांत्वनोपायपंडितोपि
कृष्णस्य संदेशैरेव साधकतमैः सांत्वयामास यतः स्तासां हृदयंगमैः हृदयं प्रविश्य द्रावकैस्तत्र हेतुः ताइति कश्चिन्नस्तइत्यादितद्वचनैरेव व्यंजितश्रीकृष्णविषयकमहाप्रेमाण एकादशाच रामेण सार्धमित्या
दिना भगवता स्वयं वर्णितानुरागा इत्यर्थः तत्र रामस्यानुनयाः प्रथमसश्लाघं तन्निवेदनमाकर्ण्यतां मुनिजानुज्ञानुकंपावर्णनात् ततस्तदागमनविलंबहेतुनानोपद्रवसूचना ततः सशपथं तदानयनप्रतिज्ञा
ततो युष्माकमीदृशरोदनादि श्रुत्वा स बहुतरं दुःखं प्राप्स्यतीत्येवमादिरूपा ऊह्याः कृष्णस्य संदेशास्तु संदेशैः सा मम धुरे प्रेमगर्वैरगर्वितेरित्यादिना पराशरेणोक्ताः तत्र सा मम धुरस्वं न पारयेहं निरवद्यसं
युज्यामित्यादिरीति कस्तु इति पूर्वकाचिरान्मामुपेष्यथेत्येवंविधाश्वासनेन रुचिरस्वप्रेमगर्तत्वे यत्त्वहं भवतीनां नो वै इत्यादिलक्षणे अगर्वितत्वं तद्धः प्रतियातु साधुनेत्यादिप्रकारं एवं संदेशप्रेषणे
न भगवता रामे सरव्याशाएवताः प्रतिदर्शितो नत्वग्रजत्वोशास्तासां दशामीदृशां रक्षितुमिति ज्ञेयं १६ एवं श्रीकृष्णप्रियाः सांत्वयित्वा या गोप्यां तरेण भुंजयारिति श्रीकृष्णपरिहासेन सूचितभावितदंगसंगाः
शोरवचूडवधप्रसंगेन च श्रीकृष्णप्रेयसीसंवलितततयोक्ता याश्च श्रीकृष्णाक्रीडासमयेति बालाः श्रीरामसंगार्थं रक्षितकौमारास्ता गोपीः कृष्णस्यानुमते स्थित इतिरीत्या तत्प्रार्थनया तत्कामपूरणेन सांत्व
यामासेत्याह द्वाविति आदिना मधुं चैत्रं माधवं वैशाखं चान्वाचये मुख्यतया चिरसंकृद्धिदृक्षयेवा वात्सीदानुषंगिकतया गोपीनां मनंतरोक्तानां इति चावहन्नित्यर्थः राम इति रमणयोग्यता भगवानित्यनेन
कामुक्षपास्विति रात्रिषु स्वप्रेयसीनां रतिमावहत् दिनेषु तु कृष्णप्रेयसीः सांत्वयन्निति भावः १७ तिंइ मेववर्णयति पूर्णेति पूर्णचंद्रस्य ज्योत्स्नाभिरुज्ज्वलेति तदिच्छया तद्धने सदा पूर्णचंद्रोदय उक्तः कौमा
सविस्यस्यात्राप्यन्वयोचित्यात् कुमुदिनीगंधयुतवायुना सेवितं १८ वारुणी वरुणकन्या देवी मदिराधिष्ठात्री सेवकदंबकोटरात् धारारूपेण पातंतीति निषिद्धवारुणीभिन्नत्वं व्यज्यते १९ बलइति बलाविभ्रांतोवाच्य
ज्यते २० हलायुधः स्कंधन्यस्तहल इति भावः तत्प्रयोजनं चाग्रेव्यक्तं २१ स्रग्वीति सार्धकं आपीडादिरूपेणानेकमालावान् वनमालया पंचवर्णया लक्षितः स्मितयुक्तमुखं भोज मिति मुखे हास्यं बिंदुरिति भा
वः स्वेद एव प्रालेयं हिमकणास्तेन भूषितं २२ मत्तोयमिति बुध्या निजं वाक्यमनादृत्यानागतामापगां निजमित्यत्र नेतीति पाठे एषा नेतीति कुपित इत्यध्याहारेण योज्यं निचकर्षयतो बलः अपि तेजो निधेः कन्या
पत्नी रत्नाकरस्य या सा कृष्णतत्र कागोप्या बलेराभेकृते नुक्ति २३ पापइति युग्मकं कामचारिणी स्वैरिणी वस्तुतस्तु पापे निमित्ते लोकानां पापनाशार्थं स्वेच्छया बहुधागामिनीमित्यर्थः २४ चकितांकपिता उवाच
ति इयं समुद्रपत्नी छायारूपा कालिंदी ज्ञेया प्रत्यक्षवाच्यार्णववत्वेमित्यादि हरिवंशोक्तेः भगवत्पत्नीत्वेन पूर्वमुक्ता तु देवतारूपा मुख्या कालिंदी २५ राम हे जगद्रमण मां पीडयितुं नार्हसीति भावः वीप्सा तया
तु महाबाहो बलिष्ठ विक्रमं प्रभावं यस्य तव एकांशेन शेषाख्येन जगति पृथिवी किमर्थं हे जगतः पते जगद्रक्षार्थमिति भावः २६ परं भावं महासंकर्षणत्वरूपं एतच्च ज्ञानास्त्येवेत्याह भगवान् हे सर्वज्ञेति अत्र हेतुः विश्वा
मन्नितिति आज्ञालंघिनीं कुतो मुंचेयं तत्राह प्रपन्नां प्रपन्नेच त्वत्कृपायुक्तेवेत्याह भक्तेति २७ आश्वासनपूर्वकममुंचदिति मोचनेन इराकृष्टिः सूच्यते तथा च पराशरः यत्रास्ते बलदेवोसौ प्रावयामा
सतद्वनमिति जलेन तत्रागतं नदीताः गंध्यगाहत २८ कांतिर्महासंकर्षणस्य पत्नी लक्ष्म्याश्च शाविशेषः विष्णुपुराणे दौलक्ष्मीरित्युक्तिरंशेनाभेदोपचारात् २९ आमुच्य कंठे निधाय तन्निःपत्स्यं दत्तादिना ३०
मोचितापि सा श्रीरामप्रीत्या तथैवाद्यापि वहतीत्याह अद्यापीति कृष्टेन हलखातेन वर्त्मना लक्षिता तेन स्वावस्थाविशेषेण वीर्यं सूचयंती इवेति रामप्रीतिरेव तथावस्थाने मुख्या हेतुरिति भावः यतरं नंतवीर्यस्ये
ति हि प्रसिद्धो कि मनेन तत्र किंचित् तापन्नेति भावः ३१ एकैकेवेति प्रतिरात्रिनवनवमाधुर्योदयात् अत्र गमनसमये श्रीरामः श्रीकृष्णवधूनां स्वप्रियाणां च निःसलीलानुभावनादिनानेन सांत्वनं कृतवान्
इति गम्यते तदर्थमेवागतत्वादतिकोमलमानसतया विरहेणातिदुःखितानां त्यागेनागमनासहनाच्च तथा च हरिवंशे द्वारकागतस्य तस्य श्रीकृष्णप्रत्युत्तरं सर्वेषां कुशलं कृष्णापृष्ठां कुशलमिच्छसीत्यादि इदं
सामान्यतः प्रत्युत्तरं सतोपविष्टत्वात् विशेषतस्त्वेकांते गोपीविषयमप्यूदितिज्ञेयं ३२ इति श्रीमद्भागवतदशमस्कंधमध्यगः पंचषष्ठितमोध्यायस्तोषिणीसारसंग्रहे १ इति पंचषष्ठितमोध्यायः ६५
कृत्रिमे वासुदेवत्वेन पौंड्रो बालोपदेशाज्जे इति प्रख्यापयन् मूढं पौंड्रकं हतवान् हरिः १ श्रीरामे व्रजंगते द्वारकायां वृत्तकौतुकविशेषं स्पष्टत्वाह नंदेति वासुदेव ईश्वरोहमिति संदिश्येत्यर्थः यस्माद्दत्तः स्ववत् श्रीकृष्णा
पि वासुदेवस्त्वं कृत्रिमे मन्वान इति भावः हेन्दपेति कौतुकात् १ अत्रत्वंदूतप्रेषणं च विवृणोति द्वाभ्यां त्वमिति सर्वांतर्यामी सर्वेश्वरो जगत्पतिर्यः स एव त्वमवतीर्ण इति बालैरज्ञैः प्रोत्साहितः २ नकेवलं तेमेने किंतु दू
तं च प्राहिणोत् इति अतिमंदत्वकौतुकात् पुनरुक्तिः किंच नव्यक्तं वर्त्मापि यस्य तस्मै तत्तत्वाज्ञानेनेति भावः बालैर्नदपत्वेन कल्पितः कश्चिदबुधो बालाय थेत्यर्थः ३ दूतस्त्विति तु पदेन दूतस्य ततोप्यज्ञत्वं तदाह द्वार
नागडतो कामल्लोकिक श्रीमती महानुभावयुतसत्तायां प्रभुं सर्वज्ञं कृष्णं सदानंदरूपं कमलपत्राक्षं सौदार्येणापि सर्वोल्लष्ठमब्रवीदिति ४ एक एव वासुदेवो न चापरः स च भूतानामनुकंपार्थमवतीर्णोहमेव न त्वं स से
न्यराजादि बहुवचात् अतो वासुदेवपुत्रत्वमपि रुद्ध्य भाग्निथ्या संज्ञां त्यज यद्वा भूतानामनुकंपार्थं त्यज अन्यथावयोर्युद्धं बहुवचः स्यादिति भावः ५ किंच यानीति आधिक्षेपार्थः स्पष्टः वास्तवस्तु नचाहं भूता
१२ नामनुकंपार्थं वासुदेवोवतीर्णः यस्मादपरः श्रेष्ठः किंत्वेकस्त्वमेवावतीर्णः अतस्त्वया मयि मिथ्याभिधाता त्यज त्याजयेत्यर्थः त्याज इष्यभिधानं मे इत्यादिप्रतिवचनात् तथा मोद्धयाद्धेतोर्यान्यस्मच्चिन्हानि अ
स्माभिः स्वस्मिन्नुक्षणतया कल्पितानि चक्रादीनि तद्रूपाणि च निस्त्यमे न धरसि अतस्तानी त्यक्त्वा मयि प्रक्षिप्य शरणं मुक्तिं दत्वा तदाश्रयः सन्माभेहि स्विकुवरित्यर्थः शस्त्रमोचनेन कारोषि चेन्मम युद्धं देहीति ६ कृष्ण

कस्य नमात श्लाघनं ७ सख्यानामुख्यहारेणेत्तरं मिथोद्वृतं प्रतिचयाकथा तदनंतरं तत्र स्वदादिष्ठमस्य स्वाङ्गं करिष्याम्येवेत्याह उ... सूत्रस्येति येश्चिन्ह्ने रालीयत्वेन मन्यमानैः श्लाघसे तानि स्वयि प्रश्ने स्यामीत्य
र्थः ८ किंतु मोराण रणमेहीति यदादिश्वं तद्भगवेयं श्रुनामेव संपत्स्यत इत्याह मुखमिति ततृ श्लाघापरं मुखं प्रस्त्यादि... नाह्मिघ्यशापियसे वयस्तीक्ष्णतुंडाः पक्षिपक्षिविशेषाः तवितेतितत्ज्ञतेत्व न विषयसी
त्यर्थः ९ तदाक्षमंतमाक्षेपमिति पाठो काशीमुपतस्तमीपे जगाम काशीकरुषदेशयोः प्रायो नेह्यात् १० महारथो महायोद्धा ११ तस्येत्यर्धकं पाष्णिग्राहः पृष्ठतोरक्षकः १२ अक्षौहिणीभिरिति सार्धद्वयकं
शैरवादि भिश्च्यंतुर्षु भजेषु कस्त्वात्तं बीरवद्रुत्राङ्गं ... त्या नक्ष्मि श्रीवत्सेन चोपलक्षितं आदिपदात्स्पष्टं चतुर्भुजत्वादिकं माहादेवचरेणेति पाठे १३ गरुडः कृत्रिमो ध्वजे यस्य अमोल्य मुकुटाख्यमाभरणं य
स्य १४ आत्मनस्तुल्यमात्मनातुल्यमिति पाठे कृत्रिममिति श्रीवत्सकौस्तुभादीनां भगवत्स्य कृत्रिमत्वं व्यज्यते १५ अरय इति प्रहारेनेहुर्ये १६ कुंभस्थितिः अस्य प्राहरन्तेन कुंभस्तु गजादिचतुरंगबलं
तु शामाईयत्तसंजहार पथकुप्रजाचतुर्विधं हृतवान् १७ विशेषतश्च कृतमाह आयोधनमिति रणस्थाने अरिणा चक्रेणचितं व्याप्तं कल्पोतरुद्रस्य क्रीडास्थानमिवान्येषां मुत्वणं तयंकरं १८ अथार्दे
नानंतरमिति व्यवधानापगमे सतीति भावः नोभो इस्कपहासोदवं नवानित्यपि यएहत तत्स्थानित्वदुक्तानितुच्य मुत्स्यज्ञामि १९ स्वाजयिष्यइति धातूनामनेकार्थत्वप्रयोगानामपि प्रयोगसत्वात्यजेस्यस्य तथा प्रयोग
संभवाहुत वाक्यानुसारेणेव करीष्यामीति भावः अद्याशावसरे अद्यतिपाठे नास्तिज्ञेयस्मादित्युपहासः २० गिरेः श्रिशोयथेति २१ अनिलस्य दस्यके तोपमा २२ मत्सरिण भगवदुत्कर्षासहने विधिजश्चन्द्रके
दैवेश्च २३ मत्सरावेशादपि मुक्तिमाह सइति विध्वाणो नुकुर्वाणस्तत्सारूप्यं प्राप्तस्यर्थः यतो नित्यमित्यादि पेशस्काशीस्त कीटवदिति भावः २४ मथमंक्तिमिति ततो वक्रमिति विनाव्यकस्यवेति संज्ञायं कृतवं
तः जनाः साधारणाः २५ हाहतास्मइति शेषः २६ तत्कृतस्तस्तोपि दुर्लुद्धिरित्याह सुदक्षिण इत्यादिना युग्मकं सुदक्षिण नामा संस्थाविधिमुत्तरक्रियां अपचितिं निष्कृतिं २७ आत्मना संघाय बुध्या व्यवस्य सु
दक्षिणः सुतशेडदारः समाधिनेकाग्रमनसा २८ अविमुक्तो विमुक्ताख्य क्षेत्रं धीशाः सप्तम्यंतो वा पाठः वरमहाकृणीत्यत्तवान् वधोपायमेवत्ततत्वधमिति कुतः कर्णवदुद्धिर्त्वं ज्ञाप्यज्यते २९ दक्षिणा
तियुग्मकांतः सार्धकं ऋत्विजमिव स्वामिप्रतकारिणं अब्रह्मण्येइति ब्रह्मण्येतु श्रीकृष्णप्रयोजयितृणां हत्वा तब्रह्मत्वचे सामितिन्यायेन ब्रह्मण्येपि नष्टनाशमेव करिष्यतीति श्रीरुद्राशयः ब्राह्मणानांत
स्मिन्ममनादिश्रवणान्तस्य ब्रह्मण्यत्वमिति सुदक्षिणाशयः वस्तुतस्तु सर्वोराघ्यो भगवान् क्वचिद्ब्राह्मणानामाराध्यतया क्वचिद्दाराध्यतयापि च यल्लीलायते तत्रेत्यः स्वस्मिन्कृदुर्लभ प्रेम दानायेति ब्राह्मणानां
परमहितमेवाचरतीति न ब्रह्मण्यताव्यभिचार इति शेयं ३० अभिचरन् व्यभिचारकर्मकुर्वन् व्रतीत्वहीतनियमः ३१ युग्मकं तत्र इति कर्मसमाप्त्यनंतरं तीषणत्वदिशाइत्यं तेन दर्शयति तपत्तोमत्र च्छिरवाग्नि
कुणिचयस्य अंगारोहारिणी नेत्राण्यस्य ३२ दग्धामिरुग्रत्वद्दंष्ट्रैश्च कूरमास्यं यस्य यः ३३ ततश्च पञ्च्याम्मिति कृतैः प्रथमैः दिशः प्रदहन् ३४ वनेति गम्यस्थानां नावादिना नासाधिक्यं व्यंग्यं ३५ पुरं प्रद
ग्धुं समीपागतवन्हेस्त्रीहीत्यार्थं यद्यावात्रे तेवाचर रक्षकवदाचरणेप्याणिः शाम्येदिति भावः यतो हे त्रिलोकेश ३६ जनानां पौराणां नयार्तिं वाक्यं श्रुत्वा स्वानां यादवानां ... रवहेलया हसित्वा अवितामस्मी
त्याश्वासनार्थं स्वप्रभावं व्यंजयति ३७ महेश्वरस्येमां तादृशानि प्रायसमेतां ज्ञात्वा पार्श्वस्फूर्तिमत्वेन स्थितं ३८ अथादज्ञानंतरमेव रोदसीच प्रकाशायदिति शेषः अथकारर्तेना पीडयन् मुकुंदेति तद्ध्याना
मुक्तिप्राप्तिं व्यंजयति ३९ अर्दितोग्निः किंकृतवानूतदाह कृत्येति युग्मकं अभिचर्यतेनेनेत्यभिचारो मारणः कृत्यानलः सरथांगपाणिर्यस्य तस्य ऋत्विग्भिः जनैश्च सहितं तं स्फ दक्षिणो दक्षिणाग्निः मधिन्हो
करवाक्यतः सेवमानोपि दरोप्यहृत् विधिकोन्यथयेत्तुमान् १ ७० चक्रस्याह्वादिसहितां समदहत अट्टामंचाः शालिनी शालामिति पाठे ७१ सुदर्शनं स्फरवदस्यं सदिति भावः ७२ किं वाच्यं स्वपरहितं च काशी
श्रावयिता मुच्यत इति श्रोतापि मुच्यते इति वाचापार्थः ७३ इति श्रीमद्भागवतदशमस्कंधसंश्रयः षट्युक्पष्ठितमोध्यायस्तोषिणीसारसंग्रहे १७३ इति षष्ठिषष्ठितमः ६६ कुलात्रितानुपश्चाच्यते मानवा
न् प्लवगः स्वयं दृष्टे तद्भूतं रामोनचोत्तनरकप्रियं १ प्लावयति नैकविद्यदितं निपूनवगो नवानुधोस्वपरं एवं प्रख्यापयितुं पूनवगद्विविदबलाचचीन्तूते २ प्रक्रांतरामचरितमध्ये पौड्रकवधादि निरूपणं द्विविदवधादि रामच
रित प्राग्भाविज्ञेयं रामानुपौंड्रकवधादि कृष्णचरितप्रस्तावेन राममत्तीलीलावर्णनसमाप्तेन शंकया रामलीलामेव पृच्छति श्रुत्वइति प्रभुः सर्वशक्तिपरिपूर्णो रामो यदन्यत् कृतवानू तद्रामस्य कर्म श्रोतुमिच्छामि अत्र हेतु
रद्भुतकर्मत्वं अत्र चानंतत्वं अत्राप्यप्रमेयत्वं ५ सुग्रीवसंगिनोपि दुर्बुद्धित्वे हेतुं व्यंजयति एवं दुःसंगस्यातिदुष्टत्वं हरिणा निरोधे हेतुत्वं व्यज्यते सुग्रीवसचिव इति मंत्रबलं मैंदभ्रातृत्वेन वीर्याधिक्यं ३ सरयुनेर
कुस्य ह्वारकांनिकटवर्ति राष्ट्रं विप्लवरूपमपचितिमान्द्यण्यलक्षणां पूजां पुरादीनां यथोत्तरं न्यूनत्वेन दाहे कैमुत्यं ३ किंच क्वचित्कदाचित्सद्विदिः ४ वेलायां कूलेस्थितानिति शेषः कूलानिति पाठे अश्रो आद्यत्र ५
वेनानि कानाहवनीयादीन् ६ यो वितश्चेत्स्यन्वयः अप्यघातयदिचे ७ नीप्रकुर्वन्पीडयन् ८ तत्रतिर्युग्मकं यदुषतिमिति वेनवं रामक्रीडारसिकमिति सुरिवत्वे पुष्करेति वन्ध्यवषेवे दग्ध्यं सुदर्शनीयेति सौंदर्य ९
गायंतमिति वेदग्धीविलासः मदतिस्वाभाविकविलासः पीत्वेति गानादावतिशयः विभ्राजमानमिति तेजस्वित्वं १० एकतारवामारुह्य तत्समीपस्थान् बहुद्रुमान् कंपयन् आत्मानं बहृतया पराक्रमितयाच दर्शय
न् ११ हास्यप्रियत्वे हेतुः ज्ञातीतितरुण्य इतिच बलेति तस्माकृया भावः १२ सम्यकुन्नाना विधं मुखं तदादिभिर्निरीक्षितो निरीक्षमाणमनादृत्य १३ तमित्यर्धकं १४ कोपयन् कोपयितुं हसन् १५ योषितां वासांस्याकृष्य
पाटितवानित्यर्थः कदर्थीकृत्य खत्नयित्वा निप्रचक्रे एवमपकृतवान् यतो मदेमाविनीतः मदहेतुः बलवानिति १६ तदुपद्रुतान् दृष्टानुसेधायं १७ शालं वृक्षं पाणिनैकेनोत्साद्य १८ प्रतिजग्राह स्वीकृतवान्
अचलीयथेति प्रहारस्य वैफल्यं तेद्विविदं १९ मस्तिष्कं मस्तकावयवविशेषः नानुचितयन्नगणयन् २० तरुक्षे २१ ततइत्यर्धकं २२ नगवतेति कंचित्कालं रामस्य तत्प्रहारप्रतिकारमात्रलीलापरत्वं व्यज्यते २३
ततो वृक्षात्तावेसति २४ शिलानामप्यभावेसति बाहुमुष्टीकृत्य दृढबद्धकरांगुलीकृत्वा रुरुजस्ताडयामास २५ दोर्भ्यां तद्धस्तमुष्टिभ्यामेव जत्रौ कंठबाहुमूले अभ्यर्दयादित्याड भाव आर्षः २६ टंकाः सनेयाः पाषाणमया ज
लाधाराः तत्साहनैः २७ साधुसाध्विति चाप्यध्यासीत् सुरादिसिद्धाः श्रेष्ठास्तेषां क्रमेण आनंद तत्सिद्धिस्मय द्योतकं जयशब्दादिकं ज्ञेयं २८ जगतो व्यतिकरं नाशमावहतीति जगतामितिसा... कारुण्यादिव्यंग्यते नगु
हादिषु द्विविदरूढलोकमोचनं ज्ञेयं २९ इति श्रीमद्भागवतदशमस्कंधमध्यगः सप्तषष्ठितमोध्यायस्तोषिणीसारसंग्रहे १ इति भागवते ६-काशीनाथपाध्यायविरचिते तोषिणीसारे सप्तषष्ठितमोध्यायः ६७

राम्
१३

चित्रे हरिशिशुः सांबो निरुद्धो वीरकुंजरैः । मोचितो हलहस्तेन गजाह्वयविकर्षणात् १ हतो यदेव प्रद्युम्नः शंबरेणात्मघातिना । मासेस्मिन्नेव सांबस्तु जांबवत्यामजायत ॥ इति हरिवंशोक्त्या प्रद्युम्नसमवयस्कात्सांबविवाहं
पूर्ववृत्तमपि रामविक्रमप्रसंगादत्राह दुर्योधनेत्यादिना स्वामिपादैस्तु यथाश्रुतक्रममनुसृत्य प्रद्युम्नजन्मोत्तरं जांबवतीविवाह इति प्रागुक्तं तत्रोक्तवाक्यं कल्पभेदेन योज्यमित्याशयो ज्ञेयः जांबवत्याः सुत इति त
स्याः सौंदर्यव्यंजनया तस्मिन् पितृप्रेमाधिक्यं व्यंग्यं एवं सुंदरपुत्रार्थं प्रार्थितपत्न्या तथा श्रिता शिवमाराध्य लब्धत्वात्प्रेमापि अत एव सस्नेहं जांबवत्या सह सदा वर्तत इति सांबः अत एव तत्र तत्र जांबवतीसुत इति वि
शेषणं श्रूयते १ अर्भको० यद् दुर्विनीतः पित्रादिभिरसीक्षितः कदर्थीकृत्या वगणय्य अकामां तद्धरणेच्छारहितां २ बद्धमितं न तु हतं जामातृत्वसिद्धेर्वचनमेव भीष्मादिसंमतेश्च बंधहेतुः दुर्विनीतमिति स्वाकीर्तिभिये
तिभावः नोस्माकं मही दत्तामस्माभिरित्यर्थः ज्ञेयं ३ रामं याति वस्याभविष्यति प्राणा इंद्रियाणि प्राणायामादिना दमिता वश्या यथेति ४ शलादयस्त्रयः सोमदत्तपुत्राः यज्ञकेतुर्भूरिश्रवाः कुरुवृद्धो भीष्मस्तदनुमोदनं ते
षां मानभंजनार्थं ५ प्रकर्षेण सज्यतया गृहीत्वा ६ कर्णाग्रणीर्येषां ते ७ अतिविद्धो पविद्ध इति पाठौ कुरुश्रेष्ठेति तेषामधमत्वं श्रेष्ठ इति भावः यद्विति बाल्याद्धान्यतिरामाद्यैः शस्त्रेषु विनियोजित इत्युक्ते
तन्माहात्म्यं व्यंग्यं स्वतोपि श्रीचिंत्यस्यासार्वभौम्यं ८ विस्फूर्जयेति युग्मकं कर्णादीन् भीष्मसहितान् तावद्भिः षड्भिः ९ तत्र पंचयति चतुर्भिरिति विप्राज्ञया तत्कर्म तेश्लाघितवंतः १० कथं च तदुस्तदाह चत्वार इ
ति ११ स्वस्य दुर्योधनस्य वान्योन्याद्या येति शेषः अचिंत्यार्भ इत्युक्त्वा दनिरुद्धवदेतदपि श्रीकृष्णच्छायैवेति स्वैये १२ उग्रसेनेन प्रेरिता न तु भगवता ज्येष्ठसंनिधौ स्वपुत्रार्थं स्वयमुद्यम्यमानो चित्यात् अगजानाशयज्ञानाच्च १३
सांत्वयिष्येति युग्मकं यतः कलिनेच्छदतः सांत्वयित्वा जगाम कलहास्थं कलिदोषापहः यद्वा कलं दुर्योधनस्याभिमानमल्लमेव हंति, न तु मपि हंतुमिच्छति करुणत्वादिति भावः १४ कुलवृद्धैरुद्धवाद्यैः १५ बुभुत्सयापि प्राय
जिज्ञासया १६ तरांगं प्रतीति राजत्वाससर्वदुर्बुद्धिमत्वाच्च १७ विधिवदभिवंद्य पांडवानुक्तिः सद्देहप्रस्थवासात् दुर्योधनस्येति च कारा निकर्षे अन्नर्हमपि लोकरीत्येवेति भावः १८ सुहृत्तममुपकारिणं दुर्योधनस्य गदादि
सीक्षणात् तमुद्धवं सत्कृत्योपायनहस्ताय युः १८ ये भीष्मादयस्तैर्वृद्धा अपि प्रणेमुरित्यर्थः १९ क्षेममारोग्यं चान्योन्यं पृष्ट्वा श्रुत्वास्थितेषु अविकुर्वन्निर्भयं २० आज्ञापनयोग्यतामाह क्षितीशेशाद् इति यतः प्रभुरिंद्रादी
नामप्याज्ञापकः राजत्वमात्रं शापरुद्धं न तु राजा द्याज्ञापकत्वमिति युक्तिर्व्यज्यते २१ यदोह्य मित्युग्रसेनवाक्यं अधर्मेणेति छेदः तदप्यकार्हेन सहे किंतु तं तावद्धत्वा नीयापयतेति वाक्यशेषानुक्तिश्च तावदुक्तायैवं तेषां
दुर्वचने प्रवृत्तत्वात् २२ प्रभावोत्साहसत्त्वेरुन्नद्धमुग्धं खलं आत्मनः शक्तेरनुरूपं कालगस्यागतिः दुरत्यया दुर्लंघ्या गत्येति षोडर्चा देशाः इत्याद्विलोपः यद्वा कालगत्या हेतुना दुरत्ययोपानत् पादरक्षा शिरआरो
ढुमिच्छति हीना अस्मानात्तापयंतीति इति भावः २४ चतुर्भिरस्यैव प्रपंचः एत इति योनेन यथाया विवाहेन संबंधं प्रापिताः २५ किंच चामरे चामररूपे व्यजने अस्मदनाभग्नहेणोपभुंजत इत्यर्थः २६ दाद् तृणामस्माकं
प्रतिकूलेरत्नं अतः परमपहरिष्याम इत्यर्थः अमृतं क्षीरे भिसः सुः उपचिता वृद्धिं प्राप्ताः २७ अर्जुनस्य स्वपक्ष्यत्वाभावेपि युक्तिः स्वगौरवार्थं अवरुंधीत गृह्णीयात् २८ सतुल्यजन्मनां बंधुभिश्चोपोलक्षितया श्री
योत्कटमदाः दुर्वाच्यं परुषं असभ्याः साधुव्यतिरिक्ताः भीष्मादयस्तत्रैव स्थिता इत्यर्थः ऋषभा इति ऋषभेति पाठे २९ दोः शीलत्वंशो धावे श्रादिकं अच्युतः सर्वशक्तिपूर्णः कोपादेव मुहुः प्रहसन् सहसन्निति क्वचित् ३०
हे एवं दंड एव प्रशामयति न सामादि ३१ शनैः सांत्वयिष्यवेति सांत्वनायासः ३२ ये मां तं मां इति पाठे दुर्भाषान् दुर्वाच्यशब्दान् ३३ ननु त्वमप्ययुक्तमेवाबोचस्तत्राह नेति किल्वेति किमित्यर्थे अपि तु विभूराज्ञापयितुं स
मर्थ एवेत्यर्थः ३४ अहो धृष्टाः यादवसामान्यादिक्षेपो किंभिः श्रीकृष्णमप्यधिक्षिपंतीति कुपित आह सकृधर्मस्यादि त्रिभिः अमरांध्रिप इति तदर्थं मिंद्रादमरजयो व्यंग्यः किलेति शिरश्चलयन्नुपहसति सुतरामेवं त
दर्हण इति भावः ३५ श्रीः पूर्णा विभोवरूपा रुक्मिणी अतो दिव्या नामस्यतानामीश्वरी तत्र कारा द्यादिश्रीरित्यर्थः ३६ ब्रह्मादिभिर्लक्षणचोपास्यत्वं विशेषतो दर्शयति यस्येति अंघ्रिपरजः एकमपि कथंचित्प्राप्त
मोली युक्ते रुत्तमांगे ७तं सर्वोपासित गंगादितीर्थस्य तीर्थत्वहेतुं किंच ब्रह्मा भवः श्रीश्चाहमपि उद्वहेम यस्य कलायाः कलांशांशावयं अस्य नृपासनं क्वकुत्रापि नास्तीति क्रोधोपहासः यद्वा क्व अतिनिकृष्टमेवेति ग
वः ३७ नन्वन्ययादवानुद्दिश्योक्तं न श्रीकृष्णं तत्रसोपहासमाह तुंजत इति दत्तमेव भुवः खंडमेव न सर्वेन्द्रत्वं यादवसामान्योक्त्या स्मानपि दिश्योक्तं इति क्रोधोद्रेकादाह उपेति ३८ मद्यादिमत्तानामिवैश्वर्येण हतवि
चाराणां मतोमानिनां मत एवोन्मर्यादाः कर्कशाश्च गिरः स्वयमनुशासिता सन्तीति अन्यथानुशासितृहान्या सर्वेप्युष्ट खलाः स्युरिति भावः ३९ अतोद्यैव करिष्यामि इति एवं वदन् ४० प्राकारमूलप्रविष्टेन हलाग्रे
णोत्खाय गंगायां विचकर्ष पातयितुमारभत शत्रून् संहरिष्यन् ४१ जलेति युग्मकं आघूर्णं चंचलं तत्र पतत् पश्चाद्वाकृष्यमाणं दृष्ट्वा ४२ जिजीविषव इति सर्वाभिमानापगमः प्रभुमितीश्वरबुध्या शरणं जग्मुरि
त्यर्थः यद्वा सांबविशेषणं प्रभूभावेन पुरस्कृत्येत्यर्थः पुरस्कारश्चैतयोरप्यनिष्टं स्यादिति व्यंजनाय कोपापशांतिहेतुं तदपेक्षितार्पणाय च ४३ कथं जग्मुस्तदाह रामेति हे जगत्सृजः रवदवीप्सा संभ्रमात् ननु खलानां न
सुखदस्तत्राहुः अखिलेति सर्वस्यापि त्वमेव गतिरिति भावः अत्र हेतुरधीश्वरेति नोस्माकमपराधं मितिशेषः महापराधिनो क्षमार्हास्तत्राहुः मूढानामतः कुबुद्धीनां हतविचाराणां अत स्वस्य भावमविदुषां अतोस्म
दपराधो नग्राह्य इति भावः ४४ महत्त्वं पुरुषाणां दैनाधीरत्वेमवाहुः स्थीतीति स्थितो राशाद्बुक्तिः संप्रति पालनं प्रतिपालनापेक्षया निजाश्रयो निराश्रय इति पाठे नानान्यापेक्ष इत्यर्थः न च स्त्र्यादिनादिनापितेप्रयो
जनमित्याहुः लोकानिति लोकवत्तुलीलाकैवल्यमिति न्यायात् क्रीडता त्वयाय थानियुक्तास्तथैव प्रवर्त्तायमिति क्षंतुमेवार्हसीति भावः ४५ निजमूर्त्ति विशेषेण रूपया भूधारणाच्च पालनमेवोचितं इत्याहुः त्व
मिति अपरिच्छिन्नत्वादनंतसंज्ञक अतः सहस्रमूर्धत्वेप्येकेनमूर्ध्ना इदं सर्वाधारं बिभर्षि नैमित्तिकप्रलये च स्वविग्रहे निरुद्धं संस्थापितं विश्वं येन तथा सन् गर्भोदकशायिरूपेण शेषे ४६ अतः कोपोपि
ते विश्वपालनायैवेत्याहुः कोप इति ते खलु तद्विलेति पाठे स्थित्यर्थं पालने तत्परः अतो द्वेषामत्सराच्च न कोपः तत्सरेति पाठे सं बुद्धिः यतश्च सत्त्वगुणं पुष्णातः ४७ तथापि पुरकर्षणात्यागं दृष्ट्वा भीता मुहुः
संबोधनैः प्रणमंतः शरणं यांति नम इति नमने हेतुः सर्वभूतानामंतर्यामिन् यतः सर्वशक्तिधर सर्वेंद्रियप्रवर्तक यतो व्ययसर्वैश्वर्यपूर्णविश्वकर्मन् जगत्स्रष्टः एवं शरणगमनयोग्यता ४८ वेपमानमयनं
पुरं येषां तैः अतः संविग्नैः प्रसन्नस्य मत्तकोपः तपः प्राकारमूलात्कृत्तनिष्काशितवानितिलेय ४९ दुहितीति युग्मकं तुरंगमांश्च द्वादशायुतानि ५० तावद्दाने हेतुः दुहित्रिति दुहितुरनादरो माभूदिति मत्त्येति भावः ५१
नागवानैश्वर्यपूर्णोपि स्त्रीकृत्य कुतः सात्वतर्षभः यदुकुलप्राप्त्यर्थमिति भावः सुहृद्भिः कौरवैः ५२ प्रकर्षेण मंगलवाद्यादिना विष्टः बंधून् श्रीकृष्णवसुदेवादीन् ततो यदुपुंगवानामुग्रसेनादीन्

१३

प्रतिश्रान्तं स सतायां यज्ञमध्यं तत्र अतः स्वचेष्टितमेव प्राधान्येन तद्गुरूक्तिं तु कांचिदेवेत्यर्थः ५२ अहो महाप्रभावः श्रीरामस्येति सहर्षमाह अद्यापीति अद्य इति चेति पाठो अनुनिरंतरं दृश्यते ५७ इति श्रीमद्भागवत
दशमस्कंधव्याख्यायां अष्टषष्टितमोध्यायः सारसंग्रहे १ इति अष्टषष्टितमोध्यायः ६८ पश्यताद्भुतपांडित्यममीषां तोषिणीकृतां स्वामिनो मौनिनो यत्र भवतां तत्र वामितां १ दामंत्यघनलीलादेविष्टु
ष्टं भगवतो नोः उक्तं मुनिः स्पष्टयते तदत्राभ्याससिद्धये २ षोडशसहस्रपरिमितगृहे ध्वनुगतो विभिन्न इव भगवान् बहुविधमुकुरेषु महामणिरिव शिश्रु ते विरेजुश्चित्रं ३ ख्याता निर्जरलोके त्रयो विवाहाः पु
रे त्र शोभि गृहे शास्तान् सहस्रशास्तान हो पुराणात्मनः शृणुमः ४ नरकवधसमनंतरमेव षोडशसहस्रान् विवाहान् कृत्वा नारदागमनं प्रसक्तानुप्रसक्तचरितवर्णनासक्तया तत्रानुक्तं तदिदानीं प्रस्तौति नर
कमित्यादिना नितरां संसेन्यं हतमिति प्रहर्षः एकेन बह्वीनामुद्वाहमिति विस्मयश्च सूचितः सर्वत्तत्या तत्त्वज्ञानं संभवे पिश्कत्वेति तयोः सर्वतो गीयमानत्वेन हर्षाद्याधिक्यं ततस्तस्यैव भवं चैद्दिदृक्षुरत्नत् समप्रसि
द्धमेतत् १ विस्मयमेव प्राधान्येन दर्शयन् तस्य द्वारकागमनं पुरीशोभां चाह चित्रमित्यादि पंचकेन एको ह्यथ्य एकस्मिन् हस्त्रीरुद्वावहत् परीणीतवानेतद्विचित्रं नन्वत्र शोभमितोप्यधिका विवाहास्तत्राह युग
पदिति ननु योगिनामिव कायव्यूहेन योगपद्यमपि स्यात्तत्राह एकेन वपुषेति एकगृहे तावती स्त्रीरुद्दिस्य संकल्पाद्यंगानां तंत्रेणानुष्ठानादपि योगपद्यं स्कुव्चं तत्राह गृहेषु पृथगिति अतश्चित्रम
चिंत्यशक्तिके वे भवमवेतदिति भावः २ इति एवं विभाव्य द्रष्टुं तद्वैभवमुत्सुकः द्वारकामेव सार्धत्रयेण वर्णयन् बाह्यशोभामाह पुष्पितेति पुष्पितेषूपवनेषूद्यानेषु च यानि पक्षिणां भृंगाणां च कुलानि
तेषां नादः संजातो यत्र ३ इंदीवरं नीलं अंभोजं विविधवर्णं कल्हारं सौगंधिकं कुमुदं श्वेतं उत्पलं रक्तं तैर्व्याप्तेषु कूजितं कारितं कूजनं ४ अतः शोभामाह प्रासादेति द्वाभ्यां महामारकतैः प्रकाश्यं
तैः स्वर्णरत्नमयाः परिकरा येषु ५ विभक्ताः असंकीर्णा रथ्याराजमार्गपंथानो येषु तैः अश्वादिशालाः स्वस्वसभाश्च सुगंधजलैः शिक्तमार्गादिकां अंगणानि गृहबाह्यानि वीथयो गृहांतश्चत्वराणि
देहल्यो गृहद्वारवेदिकाः प्रचलंत्यः पताका येषु ते ध्वजैर्निरस्तातपं ६ तस्यामिति षट्कं श्रियः शोभाः संपदश्च तद्युक्तं द्विजप्रेष्ठैर्लोकपालैरर्चितं हरेरंतःपुरं विवेश तत्र चैकतमं भवनं विवेशेति द्वयोरन्व
यः ७ कीदृशमंतःपुरं शौरेः पत्नीनां षोडशभिः गृहसहस्रैः सम्यगलंकृतं महत् भवनं सर्वश्रेष्ठाया रुक्मिण्या इत्यर्थः ८ तदेवैकतमं वर्णयति विष्टब्धमिति चतुर्भिः विद्रुमस्तंभैर्विष्टब्धं वैडूर्यमयैः फलकोत्तमैः
स्तंभमूर्धस्थैः राच्छादनैः इंद्रनीलमयकुड्यैश्चोपलक्षितं न हता मालिन्यं प्राप्ता च्छिद् यस्यास्तस्यैंद्रनीलभूमिकया लक्षितं ९ वितानैरिति द्वयमिथोन्वितं वितानादिरलंकृतमिति अन्वयात् मुक्तादामभिर्विविधलंबाः
संति येषु तैः मन्यूत्तमभूषिते रासनादैश्च स्वच्छा निर्मितैः १० पुंभिर्दासैः ११ भवनोर्ध्वशोभामाह रत्नेति रत्नदीपानां गृहांतेपि स्थितिर्बोध्या अनेन रात्रावेव मुनेरागमनं व्यंजितं तदेव तस्य युगपत्प्रतिगृ
हस्थितिः स्यादिति मुन्याशयात् रत्नदीपसद्भावान्निश्चयपि शिखंडिनः स्यादि अक्षैर्गवाक्षैः ईक्ष्यसमीक्ष्य घनायमिति त्वातिर्येभांते एवमन्यस्त्रीगृहाण्यपि ज्ञेयानि १२ तस्मिन् भवने तुल्यगुणादिकेन दासीसहस्र
णयुतयापि गृहेश्वर्या रुक्मिण्या स्वयमेव चामररूपव्यजनेन सर्वांगेषु विजयंत्या सहितं यदुपतिं ददर्श यतो विप्रः सहसांतःपुरप्रवेशार्हः १३ तं सहसागतं सन्निधौ निरीक्ष्य श्रियो रुक्मिण्याः पर्यंकतः आ
नम्य पादस्पर्शादिना नत्वा तत्र हेतुः सकलेति स्वेस्वीये आसने उपवेशयामास १४ अभित्तद्भिस्त्वैः दधारेत्यर्थः कथंभूतः यस्य चरणशौचं सर्वतीर्थात्मकं तादृशोपि अत एव जगत्पूज्यतमोपि हि हतो धर्म
भृतां पतित्वादेवमकरोदित्यर्थः यतश्च ब्रह्मण्यदेव इति यत्तद्गुणकृतं नाम तत्तस्यैव युक्तं समंजसं ब्रह्मण्यता स्वाभाव्या चेत्यर्थः १५ विधिवत्पूजनविज्ञत्वे हेतुः पुराण आद्यऋषिर्मंत्रप्रवर्तक इत्यर्थः किं च ना
रायणो नरसखः धर्मविधिप्रवर्तनाय तद्रूपेणावतीर्णः नारायणऋषेरपि श्रीकृष्णप्रवेशात् प्रायेण भेदोक्तिरियं तदुक्तं चतुर्थे ताविमौ वै भगवतो हरेरंशाविहागतौ भारव्ययाय च भुवः कृष्णौ यदुकुरूद्वहाविति
तावंशेनोक्तौ द्वहतौ कृष्णौ कर्म भूतो आगतौ प्रविष्टौ वेताविस्यर्थः नन्वेवं नारायणत्वे तस्य साक्षाद्गुरुणा तेन तस्य पूजनं न योग्यं तत्राह उदितेनेति क्षत्रियं प्रति ब्राह्मणपूजोक्तेः राविष्टूत क्षत्रियत्वलीलायां योग्यमेवेति भा
वः अतो मितया सत्यया अमृतमिष्टया प्रियया च वाण्या स्तुत्वा प्राह प्रार्थयामास प्रार्थनमाह हे प्रभो विप्रत्वेनास्मत्स्वामिन् हे इति पृथक्छेदः अतः किंकरवाम तदाज्ञापयेति भगवते इति गौरवाय ऐश्वर्य
वैतमनुष्यानपेक्षं किंकरवामेति निजवैभवैतस्य तादृशस्याप्यैश्वर्यं बुद्धिं दृष्टो पालन्तव्यं जनाय च १६ भगवता स्वस्याहर्णमयुक्तं मत्वा तत्संभावयन्नाह नैवेति अखिलनाथे पि त्वयि महाकरुणेपि सर्वत्र मै
त्रीयथार्हसत्कारः खलेषु दंडश्च नैवाद्भुतमसंभावितं सामान्ये नपुंसकमेकत्वं च कुतः जगतो धारणाय पालनाय च निःश्रेयसाय भक्त्यादिमंगलाय मोक्षाय च तवायं स्वेच्छावतार इति वयं स्फुटं सम्यक् विद्मः
अतः खलदमइव सत्सत्कारोपि युक्तइति भावः १७ यदुक्तं प्रभो किंकरवामेति तत्राह दृष्टमिति भक्तजनतायाः पर्यवसानफलरूपं यद्दासर्वजनानां तापस्य वर्जनं यस्मात् किं च ब्रह्मादिभिर्ज्ञानसिंधुभिरपि दुर्ल
भतया हृदि स्मरणीयं सर्वेषामेव संसारकूपात्तरणाय वश्याश्रयणीयमंघ्रियुग्मं दृष्टं महो मे भाग्यमिति भावः एतद्भाग्यस्थैर्यं दुर्लभं मत्वा प्रार्थयते यथैतस्याहं श्वरामि चरेयं तथानुगृहाणेति ध्यानमपि स्वद
नुगृहैकसाध्यमित्यर्थः किं च यथा स्मृतिर्मे त्वत्पादानुसंधानं स्यात्तथानुगृहाणेति १८ अन्यत्समीपं भासागृहं योगमायाचित्रं वेत्यादिना तर्कितचिंत्यशक्तिः १९ तत्रापि श्रीकृष्णं ददर्शेति शेषः साहाय्यार्थं स्थापि
तेनोद्धवेन च चहयपद्योः प्राधान्याय सहायस्यापि प्रतिद्वंद्विसमत्वात् पूजितो भगवता २० पृष्टइति सार्धकं कदेत्यादि क्रियत इत्यादिनं च पृष्टः प्रश्नपूर्वकमुक्तः इति शेषस्य कुर्वित्यंते प्यन्वयः २१ सल्लिति अत्र च
अपश्यत् अत्र सर्वत्र पूर्ववत् पूजादिकं ज्ञेयं इत्यर्थं धर्मकामेष्विति वक्ष्यमाणात् शिश्नून् स्नातानिति स्नातान् शिशून् इति पाठो २२ तत इति सार्धत्रयोदशकं तत्र तस्य राज्ञां वागमने पि योगी दृष्ट्वा मनोजवत्वेपि
च वक्ष्यमाणं नानासमयलीला दर्शने योगमाययैव युगपत्कालवैचित्र्यात् अन्यथा विस्मयो न स्यात् तत्र मज्जनाय स्यादि प्रोतलइला २३ तं जानमिति मध्याह्नस्य लीला क्वापि केषुचित् ब्रह्म गायत्री
काचौयतं यमनं यत्र यथा तथा इदं कालत्रयस्य २४ विविधगत्या चरंतं गदति तत्सहितमिति भावः इति पूर्वाह्नस्य २५ शयानं वंदिभिः स्तूयमानमिति रात्रिशेषस्य उद्धवादिभिरिति प्रतिगृहमु
द्धवादिभेदः २६ वारमुख्या वेश्या अबला महिष्य तदावृतं इति प्रायो मध्याह्नस्य २७ मंगलानि स्तुत्वा नि पुण्यगीतानि वा इस्य पराह्नस्य २८ पूर्वार्धेन त्रिवर्गपरतामुक्त्वा मोक्षपरतामाह

ध्यायंतमिति २९ गुरून्गर्गवसुदेवादीन् कामैरभीष्टपदार्थैः भोगैरुपभोगैः सपर्यया शुश्रूषया इति मध्याह्नस्य कुर्वंतं कर्तुमारभमाणं चान्येष्वेति चान्यत्रेति पाठो सतां पांडवादीनां शिवं कथं स्या
दितिविचारयंतं इतिप्रायः सायाह्नस्य एवमग्रेपि समयाऽन्वेयाः ३० पुत्राणामिति मध्ये युग्मकं काले योग्ये समये विधिनोपयापनं विवाहं पुत्रसदृशैर्दारैः पुत्राणां कल्पयंतं क्वचिद्गृहेषु कन्यानां तत्सदृ
शैर्वरैः कल्पयंतं ३१ प्रस्थानं दुहितृजामात्रादीनां तद्गृहं प्रतिनयनं उपानयनं स्वगृहेषु पुनरानयनं यं तेर्महोत्सवान्कल्पयंतं योगेश्वरेशस्य येषां यान् महोत्सवान्वीक्ष्य सर्वे विस्मयं चक्रुस्तथाहृ
तान्कल्पयंतं ननु षोडशसहस्रविवाहाद्व्यवहितोत्तरं नारदागमनमित्युक्तं तत्कथं पुत्रविवाहादीनां संभवः इति चेदत्रैवं भाति अष्टपदमहिषीपुत्राद्यपि प्रायं युग्मके योज्यं यद्वा युगपत्कान्तत्वे चित्र्या
दिवदिदमपि योगमायाकल्पितमिति ३२ क्रतुभि र्यजनं होमात्मकैः पूजयंतं पूर्तारव्यतया संपादयंतं ३३ सेचवंस्सिंधुदेशोद्भवं ततस्तस्यामृगयायां ३४ योगेशं सर्वेषामपि प्रकृतीनां मतपुरस्थानां चापि प्रा
यजिज्ञासया अव्यक्तलिंगमाकारांतरेण छन्नतयाचरंतं एवमन्यत्र दृष्टमपूर्वं यद्वा एतावद्दृष्ट्वा मोहेनाग्रे दर्शनान्निवृत्तः ३५ उवाच तदस्यगृहे तत्र तत्रोचित लीलां छन्नवेषादिकं च वीक्ष्य प्रहासः इव
तिसंकोचेन हाससंवरणात् ३६ तदेवं विनोदमयीं सर्वां लीलां दृष्ट्वा महासुखं लब्ध्वापि देवाद्युपासनादि धर्माचरणं दृष्ट्वा ततः खिन्नः खेदं भंग्यंतरेण व्यंजयन्नाह विदामेति द्वाभ्यां तव योगमाया एता अचिंत्य
शक्तिविभूतिर्विदाम वेदाम किमर्थं कां प्रकटयसीति तत्तु प्रार्थयामहे प्रार्थनायां लोट् कीदृशीः साधारणयोगिनां दुर्दर्शा भवत्पादनिषेवया मे योगेश्वरा स्तेषामेवात्मनि मनसि प्रकाशमाना अपि यद्वा हे योगेश्व
र आत्मनि त्वय्येव निर्भाता स्वत्पादसेवया वेदामेति ३७ तर्हि त्वं नस्थित्वा क्रमेण ज्ञानी ही स्याशं कृपाह अन्विति तवान्योपासनां दृष्ट्वा न शंकुमः इति भावः आप्लुतानिति यशस्तीर्थत्वं लोकेभ्यो व्यापकत्वं च ३८ साक्षा
दनुक्तमपि खेदं ज्ञात्वा प्रतिवक्ति ब्रह्मन्निति धर्मस्य वक्ता तएव कर्तानुमोदिता च अतस्तद्धर्मं लोके प्रतिशिक्षयन् आस्थितोनुतिष्ठन्नस्मि ब्रह्मन्निति वेदमयानां त्वादृशानां वेदमार्गरक्षणेन सुखार्थमिति भा
वः तथापि भक्तिमात्रप्रवर्तने छोत्तस्य खेदः शांतिमदृष्ट्वा सत्वालनमाह पुत्रेत्यादि ३९ इति एवमागृहेण गृहमेधिना मुत्तमधर्मानाचरंतं सर्वगेहेषु संतमप्येकमेव तं ददर्शेति अयं भावः न गवद्विग्रहस्याल्प
परिमाणत्व प्रतीतावपि विभुत्वं तत्र तत्र दर्शितमतो योगिवत्कायव्यूहाभावेपि सर्वगृहेषु प्रतीतिरुपपन्ना कायव्यूहेन तदुपपादने सौभर्यादितुल्यता पत्यायोगीश्वर नारदाश्चर्यानुपपत्तेराचार्येण तथाव
र्णानानुपपन्नेत्यश्च तस्माद्विनोरेकस्यैव तत्र तत्र स्फुरितत्वं यथार्कबिंबस्य तदुक्तं प्रतिदृशमिव नैकधार्कमेकमिति अर्कमंडलस्य परिच्छिन्नस्येव दूरस्थत्वादिना तथा प्रतीतिरत्र तु विभोरेवाचिंत्यशक्त्येत्यादि विष
यं तथाप्यनल्पस्याप्यल्पत्वेन भानांशे एकस्यैव तत्र तत्र स्फुरितत्वांशे च दृष्टांतः विभुत्वे सर्वत्र प्रतीतिस्तु सर्वेषां तादृशपुण्याभावाद्भगवदिच्छाभावेन परिहृता एवमुक्तत्रैवदेवनशयनादिविरुद्धक्रियाप्रती
तिरचिंत्यशक्त्या भगवदिच्छामय्येवेति दिक् ४० ऋषिः सर्वज्ञोपि स्वबुध्यगोचरं दृष्ट्वा जातकौतुकतया मुहुर्दृष्ट्वा विस्मितो भवत् ४१ अर्थकामधर्मेषु सेव्यमानेषु सर्वत्रैव सम्यक् मुनीच्छानुसारेण सभाजि
तः ४२ नारद दृष्ट्वा त्वीलां निगमयति एवमिति नारायण आदिनारायणः श्रीकृष्णः गृहीताः स्वस्मिन्ताकृष्टा स्ततस्त्वा शानां शक्तयो येन सत्रीडेन प्रेमविशेषणनिरीक्षणं हासश्च ताभ्यां जुष्टः ४३ प्रसंगात्स
र्वकृष्णलीलानां गानादिफलमाह यानीति नत्वन्यस्य कृतिविषयाणि असाधारणानीत्यर्थः यद्वा अनन्या भक्ता एवविषयाऽदृश्या येषां तानि नतु सत्यादिवदन्यार्थान्यपि अपवर्गो मोक्षः प्राप्यरूपायोयस्य
यद्वा पवर्गोभक्तियोग एव मार्गो यस्य अथवा पगताउपेक्षिताश्चतुर्वर्गा यैस्ते भक्तैर्मृग्यते तस्मिन् ४४ इति श्रीमद्भागवतदशमस्कंधसंश्रयः नवषष्टितमो ध्यायस्तोषिणीसारसंग्रहे १६ एकोनसप्तति
तमोध्यायः ६९ शुकमुखमुनिसंस्तुतमिह भागवतं चित्रमान्हिकं यत्र स्वमुखेदुतं स्वं च बाहुश्रुतिनयनाद्यर्चनं यथाकामं १ श्रीनाथस्यान्हिकं दृष्टं मुनिना व्युत्क्रमेण तत् इहक्रमोक्तं व्याख्यास्ये तद्द
स्थैनोपपत्तये २ प्रसंगाद्भगवदान्हिकमाह अथेत्यादिसार्धैकविंशतिभिः अथेत्यधिकारे उपवृत्तायामासन्नायां माधवस्य भार्याः प्रातर्भाविना विरहेण विकल्लाः सत्यः प्रभातत्तापककूजनकु
तः कुक्कुटानशपयंतां मुक्ता वा भवं त्विंसा यत्रापन् पतिभिरितिबहुत्वं प्रतीति भेदाभिप्रायं १ मंदारवनवायुभिः करताऽनेरिव बोधिते षड्लिषु गायत्सुत द्रानेनानिद्रानिव यासि पक्षिणो बंदिन इव श्रीकृष्णं बो
धयंति संति अरुरुवन् नत्रशंशपुमकुर्वन् २ वैदर्भी तत्कृपल्लक्षणं परिरंभणे विश्लेषोविघ्नस्तमात्मनो च्येति त्व्यं बहूलोपे पंचमी ३ ब्राह्म इति युग्मकं रात्रेश्चतुर्दशो मुहूर्तो ब्राह्मउच्यते नरलीलानुकरणार्थं दध्या
वित्यादि प्राणायामादिनास्थिरां तःकरण आत्मानं स्वस्वरूपं दध्यौ तमसः प्रकृतेः परं ४ एकं अंशनानात्वेप्यंशिन एकत्वात् नतत्समश्चाप्यधिकश्च दृश्यत इति श्रुतेश्च स्वयं ज्योतिः स्वयमेव प्रकाशमानं चिदेकरसत्वा
त् किंचन विद्यतेन्यत् यत्र तं न तस्य कार्यं करणं च विद्यते नेह नानास्ति किंचनेत्यादिश्रुतेः प्रकाशकांतराभावादित्यर्थः अव्ययं सर्वप्रभवत्वेप्यपक्षयादिशून्यं यथाविदासि नः कृत्स्या इत्याद्युक्तेः एवं स्वरूपमु
क्तो तस्योपाधिशबलत्वं निषेधयति स्वसंस्थया स्वप्रभावेणैव निरस्तं निवृत्तं कल्मषमुपाधिशाबल्याभासोपि यत्र तं एवं सर्वतो ब्रह्मत्वाद्ब्रह्मेत्याख्या यस्य यद्वा निराकारब्रह्मणो प्याख्याख्या तिर्ज्ञानं यस्मात्तं
मदीयमहिमानं च परब्रह्मेति शाधि तं वेत्स्यस्यनुगृहीतं मे संप्रश्नैर्विविक्तं उपसत्यादिहेतुशत्या अयत्वात्सदूपत्वं जीवनशत्या अयत्वा हानंदरूपत्वं सदेव सोम्येदं अग्र आसीत्कथमसतः सज्जायेत को
ह्येवान्यात् कः प्राण्याद्यदेष आकाश आनंदो न स्यादित्यादिश्रुतेः ५ अथानंतरमेवाप्लुतः स्नातः संध्यायां उपगम उपासनमादिर्यथा स्यात्तथा क्रियाकलापं चकार यद्वा संध्योपासनादिषु सत्तमः
केशलः श्रीकृष्णस्य कण्वशाखितया नुदितहोमपक्षत्वेनोदयात्पूर्वमेव हुतानलस्ततो ब्रह्म गायत्रीं जजाप ६ क्रियाकलापं त्रिकेणाह उपेति कलाविभूति देवर्षिपितृन् तर्पयित्वा कुलवृद्धान् ७ गृष्टीनां सकृ
त्प्रसूतानां ८ बद्धमिति बद्धं चतुरसीत्यग्रसहस्राणि त्रयोदश १३०८४ गृहे गृहे तु तद्दानादेकविंशतिकोटयः सप्तलक्षी सप्तपंचाशत्सहस्राणि चाधिका द्विसप्ततिरितिज्ञेया गवां संख्या २१०७५७०७२
दिने दिने ९ गुरून् वसुदेवादीन् सर्वभूतानि मनसि भाविता नि नमस्कृत्य आत्मनः संभूतीर्विभूतीः मंगलानि कपिलादीनि १० जीवलोकस्य विशिष्टभूषणरूपमप्यात्मानं स्वीयैः पीतांबरकौस्तुभादिभिः
वाससा बहुत्वं राजवेषत्वात् ११ अवेक्ष्येति सार्धकं वृषश्रेष्ठविप्रस्वेष्टदेवभूतश्रियानेक्ष्य पूर्वं पूजादिकमुक्तमत्र मंगलार्थमीक्षणमात्रं प्रदाप्य दातुमाज्ञाप्य प्रस्यनंदता धिकं प्रीतो भूत् १२ विप्रादि
दारांतान् स्रगादिभिः संविभज्य तेभ्यस्तानि दत्त्वा ततः स्वयमग्रहीत् गृहस्थस्य शेषभोजित्वात् १३ अग्रतः तत्तत्स्त्रीगृहनिर्गममार्गाणामेकताप्राप्तिस्थाने तद्दो पुरागतभागे रथमुपानीय १४ पाणी

कृतेंजलौ गृहीत्वा १५ अथ पुनस्तद्दयारोहास्तदवद्वत्तं सिंहावलोकन्यायेनाह इङ्गितइति प्रथमं मंतःपुरस्त्रीणां सव्रीडप्रेमवीक्षितैर्वियोगासहनव्यंजकै रीक्षितश्चलितुं मध्यतोपीक्षणं स्थिरीकृतइत्यर्थः पश्चा
दूर्ध्वेण किंचिद्दद्वि नमनादिना विसृष्टः प्रस्थानेनुमतः ततोजातहासः अयि प्रेम्णावृतविवेके कथं वृथा तप्यसे मध्यान्हे एव भोजनार्थमागच्छामीत्यादि सांत्वनसूचकहासयुतः सन्निरगादिति १६ ए
वं सर्वगृहेस्यः पृथक् निर्गत्य पश्चादेक एव सन् तस्य वेश्मं विना स्वयमप्रविष्टे वृद्धिमिर्वृतः स्वधर्मो प्रकर्षेण बाद्यादिना विशत् यस्यां प्रविष्टानां १७ परमेउग्रसेनादितोपि श्रेष्ठत्वेन भातेआसने नृसिंह पुरुषश्रेष्ठः स्वतुल्ये
र्यदुभिर्वृतो बभौ १८ उपमंत्रिणः परिहासकाः पृथक् स्वस्वसमुदायैरसेवंत १९ दरः शंखः सूतादयस्तुष्टुवुः नर्तक्यादितोपि वेल्लक्षण्येन नृतुर्जगुश्च २० ब्राह्मणा वेदार्थाभिज्ञाः ब्रह्मवेदमंत्रानाहु व्याचक्षते त्यर्थः वा
दिना तोषणचतुराः २१ जराजन्यैत तीतानां राज्ञां काकुत्स्थामनं तन्नब्ध्ववर्णतयाशोकोद्गतास्यादुष्टतस्तदा १ तदाह षड्भिः तत्रेति प्रतिहारैर्ज्ञापितः प्रवेशितश्च २२ दुःखं दुःखशोकप्रधानं वचनमित्यर्थः कृष्णायावेदयद्दर्था
तमेव नमस्कृत्य २३ के ते राजान इत्यपेक्षायामाह येचेति येजरासंधस्यनम्रतां नययुरतस्तेन गिरिव्रजसंज्ञके दुर्गे रुद्धाश्चासंस्तेइत्यर्थः तेषां दुःखमावेदयदिति भावः निरोधनंचतैर्नृपैः प्रमथनार्थं यद्युद्धमिति सभापर्वणी
२४ जराजनिवेशा नृपाः षड्गुणाश्रयणच्युताः आश्रयंतिस्म षड्पद्याशरणं षड्गुणाच्युतं १ षड्शश्लोक्यालकं तेषां वचनमेवाह कृष्णेति विषादेन्यात् अप्रमेयआत्मा षड्गुणैश्वर्यस्वरूपं यस्य एवं श्रेष्ठत्वे विप्र
पन्नेति अतस्त्वामेव शरणं यामः त्वत्तः पृथक् बुद्धयो भक्तिहीना अतो भवभीताः २५ एतावत्कालं त्वद्भजना देवेमां जीवितसंशयांतां दुर्दशां मापन्नाः स्मइतिस्वरूपं शोचंतोनमंति लोकइति अस्मद्विधइत्यर्थः विकर्मणिका
म्यनिषिद्धे नितरां रतः स्वेसार्ववर्णिकस्वधर्मेरूपे कुशले र्थप्रदेनर्थहरे भवतोचैनं त्वया पांचरात्रादो सामान्यतश्च गीतासु यत्करोषि यदश्नासि ० मन्मनाभव मद्भक्तो मद्याजी मां नमस्कुर्वित्यादिनोदिते तथापितस्मिन्नरु
तो विषयसुखाविष्ठतया न वहितोयाचज्ञाय तेतावदेवास्य लोकस्य जीवितस्याशंद्दृढबांछाल्लतां सद्यश्छिनत्ति यतस्तस्मै तुभ्यमनिमिषायकालात्मनेनमइति अनिमिषायेति निर्निमेषत्वेन तस्यावहितत्वंव्यज्यते २६
किंचल्लोके भवानिति जगतईनः सर्वेश्वरः कलयांशेन सहावतीर्णः यद्वा नोइशांदकल्पअवधेहि एवं च्यविसतां शरणागतानां रक्षणायखल निग्रहाय चावतीर्णे विभ्रन्यः कश्चिज्जरासंधादिः खलः किंकस्मात् त्वदाज्ञामति
यातिलंघयति जनोवाशरणागतः कस्मात्स्वकर्मजं दुःखं प्राप्नोति कर्मजदुःखभोगे रक्षणव्याघातापातात् तदेतदुभयं न विद्मः नयुक्तमिति भावः २७ किंतद्दुःखं तत्राहुः स्वप्नेति न चैवोचितसुखं स्वप्नायितं स्वप्रवज्ज्ञातं यतः पर
तंत्रं विषयवासाच्यं तथाश शाश्वत् तयं यत्र तेनमृतेतुल्येन शरीरेणसह भूरंचिंताभारं शश्वज्जरामरणादि भयव्याप्तां तनूं दुर्वाहां पुत्रदारादिचिंतांचवहामइत्यर्थः यतस्तवमाययातिकृपणा हततब्रुडयः अतएवात्मनिमन
सि प्रकाशमानात् त्वत् त्वत्तः अनीहैर्न कैर्ल्लब्धं यत्तत् असिद्धं परमपुरुषार्थरूपंसुखं विहित्वा क्लिश्यामहे उच्चरीत्या बहुधाक्लिश्यामः २८ त्वद्दर्शनेनैवचेतसः सर्वक्लेशोन्मूलनमितिदर्शनप्रतिरोधकं बंधं मोचयेत्याहुः त
दिति ततस्मात्त्वन्मायाकृतकार्पण्येन क्लेशापरं परामगन्त्वाद्धेतोः नोस्मांस्त्वमेव मोचय यतो भवान् प्रणतशोकहरांघ्रियुग्मो भवति यद्वा भवान्श्रेयो हीनानार्तानः कथमल्पेनैकेन बहुनां बंधस्तत्राहुः मगधोजरासं
धस्तन्त्वामामूर्तिमानस्मत्कर्मपाशएवायं यस्मात्त्वद्धान् कथमन्येथेदृशीतस्य शक्तिस्यादित्याहुः यइति एकएवायुतमजानांवीर्यं बिभ्रत्सन् भुजोस्मान् रुरोध सिंहोमषीरिव २९ किंचत्वदीयावयमित्यधिकं पीडयतीत्याहुः
योवाइति हेउद्यतचक्र अष्टादशकृत्वस्त्वयासहमृधेसतिसप्तदशकृत्वस्त्वयाभग्नः पश्चादनंतवीर्यमपित्वल्लोके निरतं नरलोकक्रीडापरंत्वां सकृज्जित्वा प्राप्तगर्वोयुष्मत्प्रजोनः पीडयति तद्विमोचनं विधेहि ३० दूते
वाक्यं इतीति दर्शनेति नकेवलंमोचनार्थिनः साक्षाद्दर्शनंचेच्छंतीति भावः तस्मात्तेषांशंमंगलंक्रियतामिति ३१ द्विजचक्रमुदंकुर्वन् धर्मकार्यं प्रवर्तयन् सुरासुरप्रियात्लोकोनारदोर्कइवोदितः १ तदाह राजेति गायन्गिरा
मधुरयेति पद्यं क्वचित् प्रक्षिप्तं ३२ आसनादुत्थितः शीर्ष्णा ववंदे सभ्याः विप्रादयः अनुगाउद्धवादयः ३३ विधिवत्पाद्यादिनीराजनांतविधिना मुनिंतादृशात्यादरं दृष्ट्वा विस्मयेनकृतमौनं ३४ अपिस्वित्प्रश्ने गुणो
स्माकमयंल्लाभो यद्वो लोकत्रयेत्ज्ञाने यद्वाभूयान् गुणः प्रभावः ननु निश्चये ३५ हि यस्मादीश्वरः कर्ता येषु तेष्वितिनरत्लीलया स्वस्य मनुष्यत्वं व्यंजयति अथातः हेपूज्य वर्याः पृच्छामप्रार्थनया पृच्छामः ३६ भगवताज्ञा
तमपित्रिलोक्याः अकुतोभयं पदं तस्य पांडवतास्पर्यं कत्वेनोन्नरमदत्त्वाख्वस्मिंन्सर्वदर्शित्वं यदुक्तं तत्त्वच्छन्नमयमेवेतितावदाह दृष्टाइति मायाः मायिककार्याणि नानाब्रह्मांडगतानि तथाविश्वसृजः मायिनस्त्वच्छक्तिश्च
रां ब्रह्मणिदम्बादयश्च दृष्टाः तथा दर्शनेचस्वस्यतवशक्तिर्व्यापकेर्वन्हेरिवछन्नरुचः सतः सर्वभूतेषु चरतो ममनाद्भुतमिति नारदस्य सर्वांतश्चरत्वं मंतश्चरावायुरिवात्मसाक्षीतिप्रथमस्कंधेस्पष्टं ३७ तथापितवे
हितं सर्वज्ञत्वेपि प्रश्नश्नादिरूपं कौमद्विधो मच्छिष्टोवासाक्षाद्वेदितुमर्हति तत्रहेतुः इदं यत् प्रष्टव्यं यं प्रतिचप्रष्टव्यं तत्सर्वं सृजतो नियच्छतः नियंतृ तयाप्रवर्तयतश्च किंचेदं सर्वं यस्यतवविद्यमानात्मतया स्फूर्तिरूपे
णसत्वात् प्रकाशतेतस्मै तुभ्यंकेवलं नमोयुक्तं यतः स्वेनरूपेण सर्वतोविलक्षणमूर्तये अचिंत्यायेत्यर्थः ३८ एवं त्वदीहितेमुह्यमानोहं जीवमात्रस्याविद्याधतमसः नाशकंत्वामेवशरणंयामीत्याह जीवस्येति अनर्थ
प्रापकात् शरीरान्मोक्षणप्रकारमप्यजानतोतएवसंसरतोजीवस्यकृतेयः कारुणिकः स्वयशः प्रदीपं प्राज्वालयत् तंत्वामेवप्रपद्ये ३९ एवंतु मे वाद्यः सर्वज्ञत्र अथापित्वत्प्रश्न पर्यवसितं भक्तचिकीर्षितं सम्यक् श्रावया
मि त्वां यतोब्रह्मापि नरसदृशालीलेन ब्रह्मन्निति क्वचित्पाठः ४० राजसूयाख्येन मखश्रेष्ठेन पारमेष्ठ्यकामस्त्वत्सूजनोचितपरमैसंपत्तिकामयमानोत्वत्पतिस्वायक्ष्यति मुहुर्गृहागतं तयासंपत्त्यासिञ्चाविषतइ
त्यर्थः भगवदर्थतांविनातुसर्वसंपत्तोतस्यरुच्यभावः किंतेकामाः सुरस्पार्हाइतिप्रथमोक्तेरितिभावः ४१ नचात्रैवस्थित्वानुमोदनेननसिद्धिः किंतु तत्रागंतव्यमित्याह तस्मिन्निति ४२ तत्रागताश्च सर्वेत्वद्दर्शनादि
नाकृतकृत्याभविष्यंतीत्याह श्रवणादिति अंतेवसायिनः श्वपचाअपिज्ञात्यादिदोषासूयंते ब्रह्मघनमूर्तेस्तवेक्षाचाश्च्याभिमर्शस्पर्शश्चास्तियेषां तेकिमुतमुक्ताएवतेइतिभावः ४३ सामान्यतः श्रवणादेर्म
हात्म्यमुक्त्वा यशः श्रवणादेर्विशिष्याह यस्येति दिवि पाताल्लेभूमौच प्रख्यातं यस्य यशो विश्वं पुनाति कथंभूतं भवनं मंगलंचतद्दिशांवितानेसर्वेशोभाकरंच तथाचरणांबुचदिविमंदाकिनीतिपाताले भोगवतीतिइ
हमूमोगगोतिप्रथितंसत् विश्वं पुनाति तस्यतवागमनं सकलतीर्थादिफलरूपमेवेतिभावः ४४ तत्रैवं नारदोक्तेतेषु स्वपक्षेषु यादवेषु मागधजीगीषया अगृणहत्सु विसंवादिषु वाचः पेशैर्विलासैः प्राह पक्षेषुअ
गृणहत्सु जिगीषयेत्य संधिः पाठः ससंधिपाठतु चजिगीषयेति भूस्यमिति तस्यमहात्म्यविस्तारणार्थमितिभावः स्मयन्नूतस्मै स्वाशयविशेषं व्यंजयितुंस्मयमानः ४५ चक्षुद्धयेहेतुः सुहृत् हितकारी मंत्रार्थानां मंत्रभाव्या
लोपरिपाकवेत्ताच अथातोहेतोः करिष्यामश्चेति प्रोत्साहनविशेषः ४६ ।सत्रिरसाधायशिरोबद्धांजलितयाहस्येत्यर्थः ४७ इतिश्रीमद्भागवतदशमस्कंधभूषणेअध्यायसप्ततितमस्तोषिणीसारसंग्र
हे १ इतिश्रीभागवते दशमस्कंधे उत्तरार्द्धे श्रीमदनंतोपाध्यायसूनुकाशीनाथोपाध्यायविरचिते तोषिणीसारे सप्ततितमोध्यायः ७० यमंत्राःप्राणिनः सर्वेतरंति भवसागरं कर्तव्यसंशयाच्छि

राम १५

सोऽन्तरं दुद्धवमंत्रतः १ श्रीशिवमुखाः स्कराय मंत्र श्रवणादृत श्रवणाः परमोद्धवः स उद्धवमंत्रेणैवं न वेद मंत्रेण २ भगवतडदीरितमाकर्ण्य देवर्षेर्मतं राजसूययमनं सभ्यानां मतं राजरक्षां भगवन् स्तुत्यं तानि सम्यक् कृत्वा
त्वा १ यागं करिष्यतः पितृष्वस्रपुत्रस्य साहाय्यं यद्देवर्षिणोक्तमिति विशेषणत्रयेण हेतुत्रयं व्यंग्यं तत्त्वयाकार्यं शरणार्थिनो रक्षा च कार्या २ नन्वेवमपि राजभिः पूर्वं निमंत्रणात् तेषां महत्संकटात् त्वयैतद्रक्षा पूर्वं मुचि
तातत्राह यष्टव्यमित्यादिना दिक्चक्रजयिनैव राज्ञा अतो दिग्विजयहेतोर्योजरासंधतज्जयः पांडवद्वारेणैव स उभयार्थः राजसूयार्थो राजरक्षार्थश्च जरासंधतदिति स्थानविदारणात्कृष्णरिति सूचितं ३ न केवलमुभयार्थं ए
व किंतु मस्माकं चेति महानर्थः प्रबलशत्रुवधरूपः तत एव राजमोचनाद्यत्तवा क्षतं यशस्तत्त्वाऽस्माकं महानेवार्थः बद्धान् बंधादिति पाठो ४ पांडवेष्वपि केन कथं स जेतव्य इत्यपेक्षायामाह स इति त्रिभिः भीमं विनान्येषां
बलिनां तत्समबलिनां तदधिकबलिनां च दुर्विषहः असंख्यविक्रमः राज्ञा महासैन्यश्चेति भावः ५ जयप्रकारमाह द्वैरथ इति द्वंद्वयुद्धे स एवैकोजेतव्यः शताक्षौहिणीयुतस्तेन राजवृंदं दग्धा तेन यागशोभा विक्षेपात् द्वंद्वयुद्ध
प्राप्त्युपायमाह ब्रह्मण्य इति प्रतिष्ठाकामेन ब्रह्मण्यवदाचरणशीलः सकृदपि न प्रत्याख्यायात् ६ तस्माद्ब्रह्मवेषेति वृकस्येव रूशमुदरं यस्य बलिष्ठत्वात् बलिनां सिंहादीनां वृशमध्यत्वाच्च लसाम्यपि जयेहेतुः तवेति हन्ति
ष्यत्येव न तु यमात्र ७ ननु किंचिदकुर्वतो मम सांनिध्यात् किं स्यात्तत्राह निमित्तमिति अलक्ष्यकालाख्यशक्तिरूपस्य तव विश्वसर्गप्रलययोर्निमित्तमात्रे हिरण्यगर्भो रुद्रश्च तथात्र कालशक्त्या त्वमेव सन्निधिमात्रेण हंतासि
भीमो निमित्तमात्रमिति भीमयशः ख्यापनायेवं कुर्वतीति भावः ८ किं च स्वे केशरणानां स्वेकजीवनानां दुःखहान्यर्थं मप्येवं कार्यमित्याह गायंतीति सर्वे लोकास्तावदुष्टनाश भक्तरक्षात्मकं ते विशदकर्म गायंत्येव तत्रा
पि प्रस्तुतं श्रृणवीत्याह गृहे क्षेत्ररक्षिता जरासंधा रुद्धानां राज्ञां पत्न्यः भाविनमपि स्वशत्रोर्जरासंधस्य वधमात्मनां पतीनां मोक्षणं च प्रेंखोदोलनार्भरुदितादौ गायंति वत्समारादीः कृष्णाएवं कर्तेति तत्र दृष्टांतमिव कुर्वन् गूढ
मंगीकृतगोपीमंत्रिता साफल्याव संरंल ब्ध्वाविज्ञापयति गोप्यश्च शंखचूडवधं स्वमोक्षणं च भूतमपि सांप्रतिकं भवद्धिरह महाशत्रूंल्लनाय गायंतीति उक्तहृदयरक्षामेव दृढयितुमाह संसारशत्रोर्लब्धशरणा मुनयो मुक्ता
वयं न का श्वेतेऽभयेतु गजेंद्रस्य मोक्षं नक्रस्य वधं सीतायाः मोक्षं तत्पत्रो रावणस्य वधं मत्त्वा पित्रोः कंसगृहान्मोक्षं कंसवधं चैतत्त्रयमेव गायामः नतु देवीनां गोपीनामपीत्यर्थः तासां तत्तदभीष्टस्याद्याप्यसिद्धत्वादिति भा
वः देवीनां गोपीनां चाभीष्टं शीघ्रं पूरणीयं मुनीनामस्माकं च प्रहर्षेण गानार्थमिति तात्पर्यं महासत्त्वायां गोपीनां प्रस्तावो यशोदादीनामेव सभ्येषु तानानुत्वेत्वाषायेति ज्ञेयं ९ उपसंहरति जरेति उक्तरीत्या जरासंधवधो ऽस्तु यथा
ष्ययागसिद्धिरूपार संहारफलककुरुकलिदुमबीजारोपादिरूपाय पाकोराजसूयानुष्ठानं तस्य विपाकः पांडवानां निष्कंटकेराज्यप्राप्तिस्तेनहेतुना पाठांतरे पापानां शिशुपालदुर्योधनादीनां विपाकेन नाशरूपेणेत्यर्थः पू
र्वैयागार्थं गंतव्यं धर्मज्ञया भीमद्वारा मागधं हत्वा राज्ञो मोचयित्वा यागः संपाद्य इति भावः कृष्णेति नाम्ना तां संबुद्धिः सांबादीन् प्रति स्वज्येष्ठत्वव्यंजनाय १० सर्वतोभ्युक्तं तद्वाधश्व ऋन्य प्रतिप्रति पदमभ्यस्य तत्र स्वेष्टसिद्ध्याप्रय
मं देवर्षिणा पूजनं तत्तोति प्रगल्भयदुवृद्धैरेव न तु युद्धलालसावद्भिः सांबादिकुमारैः अंतेश्री कृष्णेन तत्तन्मुखेनैव स्वपक्षसिद्धेः ११ चित्रं स्वभक्तमिलनोत्सुकं यं भक्तेषु नेजभावोपि स्वरूपं हूतेस परिवाराहूय नपेक्ष्यस्तथाय
योस यतः १ तदाह अथेति अनंतरं संध्याएवेत्यर्थः कृष्णमुहूर्तत्वाद्यन पेक्षणात् वसुदेवादीननुज्ञाप्यानुज्ञां प्राप्य १२ निर्गमय्येति सार्धकं अवरोधान् तास्त्वान्दारान् निर्गमय्य प्रस्थानं कारयित्वा सुतपदं पौत्रकन्यकास्त
षाद्युपलक्षणं परिच्छदाः पर्यंकादयो दास्यादयश्च शत्रुहन्तीति दृशाः शत्रुनधो पायात्वया पित्तायं तएवेति भावः गरुडध्वजो गरुडध्वजमिति पाठो १३ भटाः पदातयः सादिना अश्वारोहाश्च तेषु नायकैः श्रेष्ठैः रथादिचतुरंगैः
रात्मयासेनयावृतः स्ततः स्तस्याः पूर्या निरगात् कीदृस्याः मृदंगादिवाद्यैः प्रघोषेण नादिताः कुकुभो यस्यास्तस्याः १४ नृवाजीति नृभिर्नरवाहनैः स्त्रिहिशेषैः कांचनशिबिकाभिश्चाश्वैश्च यद्वा नरएववाजिवच्छीघ्रगा यत्रतानिःस्व
र्णशिबिकाभिः रच्युतं पतिमनुययुः स्वब्रताः पतिमनुव्रताः वरांबरादीनि यासां ताः १५ गोबलवृषागर्दभ्यः अश्वाजनाश्वतरी अनः शाकटं एतैर्नरोष्ट्रादियानैः परिजनयोषितो वारयोषितश्च कटकुटयः तृणादिमयकटनिर्मिता
गृहाः कंबलोवरादयश्चोपस्कारागृहादिरूपायासां ताः सर्वतडष्ट्रादिषु सर्वोपस्करानधियुंज्य दृढं बध्वा १६ रवैरंश्रुभिश्च तद्बलंबलो यद्वा ततसैन्यमंश्रुभिः स्वतेजोभिर्दिवापिरवेरविमतिक्रम्यवभौ कीदृशैः वृहंतीध्वजा
दीनियेषु वराण्यायुधादीनियेषु स्फुरितास्तिमिंगिलादयोयेषु तैरूर्मिभिः ध्वजादीनां तिमिंगिलादिभिः साम्यमंश्रूनां चोर्मिभिः १७ प्रयाणानंतरं यदुपतिना प्रणम्यसंभाजितो नारदो विहायसा ययावितिशेषः मुकुंदस्य दुः
खमोचकस्य संदर्शनमात्रेण किमुत तथा तथा संभाजनेन निर्वृतेंद्रियः १८ भगवानपि स्वगिरैव निकृष्टमपि दूतमेवमुवाचेति किं तस्य दयाब्धित्वं शरण्यत्वं च वर्ण्यमिति भावः हे दूत मा भैष्ट स्वादिकं तान् कथयेति शेषो भा
ति १९ प्रत्येक्षन् प्रतीक्षां चक्रुः पद्यसौदर्शनाय मागधान्मोक्षेच्छवः २० गिरीन् नदीश्चातीत्य आनर्तादींश्च देशान् पुरादींश्चातिक्रम्य ययौ विनशनं कुरुक्षेत्रं २१ ततस्तदतिक्रमणानंतरं अथ दृषद्वतीतरणानंतरं कुरुक्षेत्रं पां
चालादीनामार्गवर्तित्वेपि तत्रस्थभक्तानुग्रहार्थं गमनं २२ नजातशत्रुर्भावो मनसिययस्येति सरलचित्तत्वं २३ हृषीकेशं प्रेम्णा सर्वेंद्रियवशीकारिणं आहूतः सादरः मूर्छाव्यपगमे पुनरागतं सुरव्यप्राणमिंद्रियाणीव २४ कृष्णं
स्वभावतश्चित्ताकर्षकं तत्रापि प्रियतमं तत्रापि चिरादृष्टमतो मुहुरथकात्र्येन परिरेभे १२५ तेषां तदालिंगनानंदमेव प्रेमभरेण वर्णयति दोर्भ्यामिति दोर्भ्यां रमायानिर्दोषमालयं हतमश्रुभं वियोगदुःखयस्य अ
श्रुनेत्रः सरोमांचो विस्मृतलोकव्यवहारश्चेति यथोत्तरं निर्वृत्यतिशयो व्यज्यते २६ निर्वृतोभूत् स्मयन् नृतुष्टमुखः एवं नकुलादयः परिरेभिरे प्रेमनिर्वृतेंद्रियाश्चासन् अर्जुनस्य प्रेम्णास्तंभभावोदये नाग्रशीघ्रगम
नाशक्तेः पश्चाद्युक्तिः २७ एवमादौ संभ्रमेण कृतमालिंगनं तदानंदमोहं चोक्त्वा स्वस्थानां तेषां वंदनादि सदाचारमाह अर्जुनेनेत्यर्धकेन भक्त्या पादौ नस्कुर्वन् अर्जुनः कृष्णेन सख्यात् भुजाभ्यां धृतः इति तेन केवलं परि
षक्त एव यमाभ्यां तु नमस्कृतश्च युधिष्ठिरस्य भीमस्य कृत्वा पादाभिवंदनमिति पूर्वोक्तमत्रापि ज्ञेयं मानिनः कुर्वादिषु मान्यान् २९ सुतेति सार्धकं सूतमागधगंधर्वाः स्वस्वानुरूपं मृदंगादिभिर्नेतृत्तुर्जेगुश्च बंदि
नउपमंत्रिणश्च तुष्टुवुर्नेनृतुश्च ब्राह्मणास्तुष्टुवुरेव यद्वातिहर्षेण सर्वे सर्वं चक्रुः ३० पर्यस्तः परिवृतः ३१ तत्पुरं वर्णयति संसिक्तेति युग्मकेन करिणां मदैश्चंदनादितोयैश्च सिक्तमार्गं चित्रध्वजादिभिर्विशेष
तोराजमानं ३२ प्रतिसद्मदीपैर्दीपैः पुष्पादिप्रकारैश्च जुष्टं धूपैरुचिरं रजतमयानि स्थूलानि श्रृंगाणि कलशा धामभूमिका येषां तैः भवनैर्जुष्टं यतः कुरुराजस्य धामपुरं ददर्श ३३ पुरस्त्रीणां सोभाग्यं त्रिभिराह प्राप्तमिति
नराणां लोचनानां सादरवीक्षणस्य पात्रं विषयं किंपुनर्नारीणां औत्सुक्येन विस्रस्तकेशावसनयोर्बंधो यासां तल्प इति मध्याह्नभोजनोत्तरं विषयासक्तानां शय्यायां निवेशनात् ३४ इभादिभिर्व्यासे मार्गे दृष्ट्वा ततः पुष्पप्र
क्षेपाद्यर्थं गृहाधिरूढाः सुस्वागतं स्वागतप्रश्नादि साध्यं प्रियं रतिव्यंजकस्मितयुक्तकटाक्षवीक्षितेनैव विदधुः यद्वा स्वागतप्रश्नेनवीक्षितेन व्यंजयामासुः ३५ स्त्रियः पुरस्त्रियो न तः पुरस्त्रियश्च पथि मुकुंदसहितास्तत्प
त्नीर्दृष्ट्वा उडुपं सहं तेताश्चंद्रसहचरा इत्यर्थः अमूभिः किंपुण्यमकारि उदारहासायस्यासालीलयावलोकनकलाक्षः अवलोकचातुरी वा तया स्वकविशेषं सम्यक्तनोति यतः पुरुषमौलिः पुरुषोत्तम इति
सौंदर्यादिगुणैरप्युत्सवः अवलोकेति सनर्मसंलापालिंगनादिविविधोत्सवोपलक्षणं यद्वावलोकोत्सवमात्रस्यापि पुण्यमतर्क्यमितिभावः ३६ कृष्णायेति चतुर्थ्यं तादर्थ्ये श्रेण्य एकशिल्पोपजीविनस्तेषां मुख्याः
३७ अंतःपुरप्रवेशमाह अंतरिति आप्लुपेतः अभिगम्य संगतः ३८ भ्रात्रेयं तं च त्रिभुवनेश्वरमिति परमोल्लासः प्रीतात्मा तद्दर्शने प्रेमौद्वेकादुत्थातुमशक्ता पिपर्यंकात् कथंचिदुत्थाय स्नुषया द्रौपद्या कृष्ण

१५

सहस्थिताय एवैतस्य स्वजे द्रौपदी तु पश्चादेव स्थिता वंदनादिना इत्यनतीस्यग्रे वक्ष्यते एवं च व्याख्याता यांस्थितिक्रियाया मन्विस्त्वात्समासः ७९ गोविंदशब्दैकगोचरं ब्रह्मादीनामीशमिति दोर्लभ्यं आदृतः कथं संभ्रांतोसि ततस्त
तो धावसी अहं त्वदधीन एव अलं पूजाप्रयासैः सुखमत्रोपविश्य चिरं त्वां पश्यानीत्येवं बहुधा भगवता सत्कृतः सन् नृपः सर्वसंपन्नोपि नाविदत् नलेभे यतः प्रमोदेति ८० जगतां सक्तेषां हर्षसंभ्रांतानां मरूर्णमपितंत
व्यवहारं पूर्णमत्वास्व कृत्यं च कारेत्याह पितृष्वसुरिति राजन्नित्यहो भाग्यं यत्तेषां कुले जातोसीति भावः ८१ युग्मकं कृष्णपत्नीरिति तद्वत्सूज्यत्वं चात्तस्मेषाः कन्याद्याश्च ८२ गौव्यामिति मित्रविंदाया विशेषणं
तथापदेन लक्ष्मणा गृहीता अन्याश्च अभ्यागता स्तास्त्रपि ८३ सुखमिति युग्मकं प्रत्यहं नवं नवं यथा स्यात्तथा सुखं निवासयामास ८४ तथापि भगवदुपकारस्य किंचिदपि निष्कृयं नमेने इत्याशयेनाह तर्पयित्वेति
योनित्यं फाल्गुनसंयुत इति वात्सल्य अतोर्जुनसहाय स्थित्वा येन खांडवनेग्निं तर्पयित्वा तत्र मयासुरं मोचयित्वा तद्वारा युधिष्ठिराय दिव्यासभार्पिता कृतेति पाठांतरं तेना इत्यं जनार्दनमित्यन्वयः ८५ प्रियान्तर चिकी
र्षयोवास ८६ इति श्रीमद्भागवते दशमस्कंधमध्यगः एकसप्ततितोध्यायस्त्वाषिणी सारसंग्रहे ७१ इति भागवते दशमे उत्तरार्धे एकसप्ततितमोध्यायः ७१ मागधादि भयोपादानतो भीमः पुराधुना भयोपादानतो भीमा
जनि श्रीकृष्णसंनिधैः १ युग्मकं एकदेति योग्यसमयं लक्षेत्यर्थः आस्थितत्त्रासनमिति शेषः यद्वा विज्ञस्यर्थ मासनादवरुह्य सम्यक् बद्धांजल्यादिना भूमौ स्थितः १ श्रृण्वतां श्रृण्वतः सहैवैव तेषु श्रीकृष्णानुमोदनेनैव
तदनुमोदनलाभार्थमिति भावः आभाष्य भोभो भक्तवत्सलेत्यादि संबोध्य २ क्रतुराजेनेति दुष्करत्वं राज्ञोवस्यापेक्ष्यत्वं च रसूचितं भवतो विभूतिरंशानित्यनन्यपरत्वं पावनीरिति तद्भक्त्यंतराय दोषनिरासायेति भावः
पश्येदितिमनसि संकल्पः कृतः तत्संपन्नं कुरु हे गोविंद भक्तेष्टपूरणार्थं कृष्णव्यवतीर्ण तत्रापि नो स्माकं पांडवानां त्वदेकगतीनां प्रभो स्वामिन् अत एतत्संपादनं युक्तमिति भावः सार्वभौमानां संकल्पो यं कथं सह साकृतस्तत्रा
ह त्वत्पादुके इति तव पादुके उपानहौ किं पुनः साक्षात्पादौ कदाचित्स्पर्शचरंती कदाचिदपि किमुतानिरंतरं ये परिचरंति येच शारीरपरिचरणायासाशक्ता मनसैव ध्यायंति तत्राप्यशक्ता ये कदाचिदपि गृणंति श्रीकृष्ण
पादुके एवं मम गतिरित्यादि कीर्तयंति मात्रं अभद्रस्य नाशके अतः शुचयः सर्वाभद्ररहितास्ते भवंत्येकार्थिनोपि यदि भवंत्युपयोगित्वे नाशासिते तदापवर्गमोक्षमाशिषः सर्वान् कामांश्च विंदंति सर्वं मद्भक्तियोगेन म
द्भक्तो लभतेंजसा स्वर्गापवर्गं मद्धाम कथंचिद्यदि वांछतीति स्मृतेः अन्येतु तत्तेसाधनसंपन्नाश्च क्रवर्तिनोपि च नैव विंदंति सर्वासामपि सिद्धीनां मूलं तच्चरणाचेनमित्युक्तेः यतः हे सर्वलोकाश्रय हे सर्वेश यद्वा
शिषो विरतं विंदंतीत्यन्वयः ४ कुतस्तर्हि परिचर्यादिकं हित्वा राजसूयमिच्छसीतत्राह एतदिति तत्तस्मात् हे सर्वदेवताराध्य त्वत्सपरिचर्यया एव सर्वदेवत्वप्तिस्तथापीति भावः इहास्मिन्नवतारे एव बहिः संपत्तिमात्रद
र्शनचमत्कारी लोकस्तव चरणपद्मसेवाप्रभावं साक्षात्पश्यतु तदेवाह येस्मादशाः कुर्वाद्या भजंति येउतवा ये च दुर्योधनाद्या न भजंति तेषामुभयेषां स्थितिं प्रदर्शय त्वद्भक्तिमहिमप्रदर्शनार्थमेवायमुद्यम इति भा
वः नारदोक्तं पारमेष्ठ्यकामस्तत्सेवार्थ एवेति संकोचाद्धोपितः ५ किमेवं ममपि वैषम्यमापादितं नहीत्याह नेति स्वःपर इति भेदधीस्तव नस्यादेव यतः ब्रह्मणोनिरुपाधेः किंच सर्वस्यात्मनः अतः समदृशः किं च स्व
सुखानुभूतेः रागाद्यभावादित्यर्थः अतः कल्पद्रुमस्यायं भजत्वयमयोग्यो मा भजत्विति नैवम्याभावेपि संसेवमानानां तव प्रसादवत्स्यात् परं तत्र भजने कल्पद्रुमवत्सेवानुरूपमेवोदयः फलं न अधिकमपि स्यादित्य
र्थः सेवावैगुण्येपि फलविपर्ययो नेति तुलसीदलमात्रेण जलस्य चुलुकेन च विक्रीणीते स्वमात्मानं भक्तेभ्यो भक्तवत्सल इति विद्धधर्मोक्तेः धावन्निमील्य नेत्रे वा न स्खलेन्न पतेदिहेति एकादशोक्तेश्च ६ सत्यं
मद्भजनामेव केवल्यादीनान्येषामित्यादि स्वदुक्तमित्यनुमोदनं व्यंजयन्नभिनंदति सम्यगिति व्यवसितं निश्चितं कर्तुमिष्टं वा लोकाननुलोकान् व्याप्य भविष्यति ७ नोस्माकं सुहृदामिति स्नेहोदयार्थमीश्वर इ
च्छिवारयति प्रत्तेहेक्रतुविधानसमर्थं ८ तदेव प्रसादीकुर्वन् प्रो... त्साहयति दिग्भ्यो विजित्येति संभारान् यज्ञोपस्करानुपाद्य स्वस्वाधीनमेव महाक्रतुमाहरानुतिष्ठ ९ एते इति तेषां प्रोत्साहनार्थं हस्तो
नाभिमृशति ते भ्रातर इत्यादि तन्मा हानं लोकपालांशा भवाइति साधारणहृत्पावस्तुतो लोकपालैश्चांशस्य संभवोयेषां किंचाहं त्वदधीन एवेति सर्वश्रेष्ठत्वमित्याह जितोनित्यं त्वद्वश्यत्वयैववर्तेइति त
त्रहेतुः आत्माहमेव सत्त्वत्वेन विद्यते यस्य तेन न कृतात्मवेप्यर्पित आत्मा मनो येस्ते दुर्जयः १० आस्तांतावान्न भवनशांकानांनिर्किंचनमपि मत्परं न कोप्यभिभवितुं शक्त इत्याह नेति मत्परमात्रं किमुत कृष्णा
न् देवो लोकपालादिरपि तेजः प्रभावः श्रीः शोभा ११ अयुक्तनियुक्तवान् भगवतस्तेजसासंवर्द्धितान् १२ कथमयुक्तं तदाह सहेति सार्धकेन सुजयशत्रु बहुलं दक्षिणप्रतीच्यायेमो देवगं धर्वबहुला दीच्यामर्जुनं न
रासंधजयाय प्राच्यां भीमं नकुलादीनां मत्स्यादिभिर्योधासंख्येनान्वः १३ अजातशत्रवे इति जराजसूयोर्थमेव विजयेन तस्य कस्मिंश्चिदपि द्वेषाभावात् अतो विजिताराज्ञानोपितस्मिन् द्वेषंनं चक्रुः किंतु प्रीतिमे
वेति भावः आजहुरित्यत्रा जग्मुरिति पाठे ज्ञातशत्रव्यर्थं नृपान् द्रविणं विजित्येत्यन्वयः १४ ध्यायतः कथं भगवानुद्धवमंत्रेनोद्धाधयति कथंवाप्रकारांतरं चिंतयतीति विचारयतः आद्यो हरिः हहर्षे १५ ब्रह्मलिंगस्त्रा
तकविप्रवेषाभारते तथोक्तः तद्धारिणः तत इति जयइति पाठो तवसंनिधाविसृष्टवाक्तेः भीमसहायार्थं श्रीकृष्णगमने अर्जुननयने सख्यमेवांतरं कारणं बहिस्तु मयि नीतिर्बलं भीमे रक्षिता चावयोर्जय इति भा
रते भगवतोक्तं तेयं बृहद्रथस्य महावीरस्य सुतो जरासंधः १६ गृहे सुगत्वातः प्रविश्यं यतस्ते ब्रह्मण्यमेते च ब्रह्मलिंगिनः स्तुत्यादि एवं कमयाचरन्तयाचं तरनू ए च ार्थं याचने हेतुः गृही धर्ममें परमिति गृहमेधिनामी
ति षष्ठ्यंत पाठे आतिथ्यवेलायामित्यत्रान्वयः १७ अतिथीन् तत्रापि याचकान् तत्रापि दूरमागतान् विप्रानित्यनुक्तिरन्नतहानार्थाभद्रं ते भूयादिति याचकोचिताशीः वस्तुतो यदिच्छामस्तते भद्रमेव मोक्षप्राप्तेरित्य
र्थः यद्वा ते तथाहृतावयं नो स्माकं भद्रं यत्तदेवेच्छाम स्वं राजन्त्वा स्वयच्छति १८ नचिंदभिः ति कामविशेषं श्रुत अन्यथादुःसहवियोगं वस्तु कथं देयं कथंवा राजकीरीत्याद्येदयं दातव्यं कथं च पुत्रादियोग्यं परस्मै देयं
तत्राहुः किमिति तितिक्षा वदान्यता समदर्शिता च तत्त्वप्यस्तीति कामितमात्रं दातुमर्हस्येव यदि चैतान्संति तर्हि नार्हस्येवेत्याहुः किमकार्यमिति इयं चार्थीशीत्यास्तकेतिनिंदा १९ केवलां निंदामप्याहुः यइति ध्रुवं नित्यं सा
धुगेयं चेति वाणिग्वन्नैपुण्यं कल्पः समर्थोपि स्वयमप्रेरित एव नसंपादयति सवाच्योनिंद्यः स एव चशोक योग्यः पुनः सइतितस्यैव शोच्यता निर्धारणार्थं २० तत्र सतां व्यवहारमाहुः हरिश्चंद्र इति हरिश्चंद्रः पु
त्रभार्यादिविक्रीयाप्यखेदभाक् पूतकीर्तिर्गतः स्वर्गमयोध्यावासिभिः नैः सकुटुंबोरंतिदेवः ऊनपंचाशके दिने लब्ध्वा तोदकमर्थित्योदत्वा गाढं ह्लणः पदं उंछवृत्तिर्मुद्गलः स षण्मासे सकुटुंबकः निरन्ना
ण्णाः तिथ्यदानाद्ब्रह्मलोकंगतः परं ३ शिबिः श्येनात्स्वमांसेन पारावतं पोतमगाद्दिवं बलिर्विघ्नं वशां चक्रे सर्वस्वात्मसमर्पणात् ७ व्याधातिथिं कपोतोस्वमांसैः संतर्प्य नाकं गौ व्याधस्तयोर्वीक्ष्य सत्त्वं दावदग्धो दि
वंगतः ५ एवमन्येच बहवो देहगेहादि निस्पृहाः अध्रुवेण शरीरेण ध्रुवं लोकेगता इति ६ । २१ स्वरैरदीनैरिति याचापुरुष्यर्थमंगागिभावेन त्रयाणामुक्तिः शैया पुष्टबलिष्ठसुंदराकृतिभिः विप्रास्तत्क्षत्रिया इत्यादि
रूपाः ज्याघातचिन्हैः द्रौपदीस्वयंवरादौ पूर्वं दृष्टान् २२ इदमप्यचिंतयदित्याह राजन्येति विप्रवेषानुदरार्थं बिभ्रतीति निकृष्टक्षत्रियत्वात् स्युः ते ध्येते इति पाठो ददामीददानीति पाठो २३ एते शत्र

यः स्युः श्चेदपि सम्यगेव विप्रत्तिर्गिनेशात्रवेप्यनीच्छ दानाद्वत्तेरिव कीर्तिविरोधल्लाभादित्याह बलेरिति युग्मकेन इंद्रस्य श्रियं जिहीर्षता विष्णुना प्रार्थितस्यापि बलेर्नु अहो नेति पाठे किं न श्रूयते पितुः श्रूयत एव
विप्रव्याजेनेति कस्यपादिति पुत्रत्वे पीन्द्रस्येव स्वर्गैश्वर्यलिप्सया विप्रलोपाच्छ्याज मयमेव विप्रलब्ध मिति भावः २४ कीर्तिमेवाह विद्मुव इति गुरुणाचार्येमाणोपि महीं जिघृक्षुर्विद्मुरिति जानन्नपि २५ तर्हि ते प्राणा
वयाचेरन्न राज्यादिति चेद्विछ्या मे देहसाफल्यमित्याह जीवतेति पतमानेन पतता ब्रह्मणार्थाय विपुलं यशो नेहतानसंपादयता अतः क्षत्रियाधमेन देहेन कोनुकार्थो न कोपि ब्राह्मणेति ब्रह्मवेषमात्रेण ब्रह्मत्वबले
शाचारान्निश्चितमिति भावः २६ इति एवं निश्चित्य हर्षेणाह रूदेम स्यादित्क्रमोयमर्जुनः ३ रूद्धमन्वेतु भीमान्वेतु घनंजयमिति भारतोक्तयुधिष्ठिरादेशानुसारेण तथैवानुस्थितेः हे विप्रा इति सोपहासं २७ तस्य प्रति
ज्ञां प्राप्य तं निक्षेत्व वृकोदर इत्यक्तिमतिक्रम्यापि याच ते युद्धमिति यदीति चेद्भयाभावेन मतमिस्त तेजने युद्धार्थित्वे हेतुः राजन्येति नान्यनान्येति पाठो २८ राजन्यतास्पष्ठयति असाविति हीनिश्चये ते रिपुमि
ति मयैवैतावानीताविति भावः २९ ब्रह्मन्वेषादि देन्येन तो पाहुपहासाच्छ्राच्छैर्जहास मंदा हेल्पवीर्याः तत्व तस्क स्थिरबुद्धयः अमंदा इति वा ३० मद्भियास मुद्रं शरणं गतः वस्तुतः अभीरुणेति छेदः कृपा विक्लवत्वे
तो यस्य सप्तदश रूत्वो मोचनात् क्रीडार्थं स्वपुरीमपि हित्वा समुद्रमेव गृहं कृतवानिति ३१ वयसाप्यतुल्यो नातिबल श्च देहेनापि न समः अतोर्जुनो योद्धा न भवेत् भीमस्त भवेत् तुल्यबलादिमत्वात् अतिस
त्वापि वयसा तुल्यो न भवतीति न मे सम इति तत्वार्थः ३२ प्रादाय प्रसंनत्वादिनादत्वा महतीमिति उज्ज्वलना हासं भवमननात् ३३ समाने खत्वे युद्धांगणे ३४ सव्यं दक्षिणं च यथा स्यात्तथा मंडलानि युद्धगतिभेदान् च
रतोः रंग गतायो र्नटयोरिवेति निर्भयत्वे ३५ वज्रपातशब्दसदृशो गदयोश्च टचटेति शब्दः शिशुभे ३६ असंकरत्यादीनुपत्ये च्छणरिव भूव तुः शत्रू निस्यक वत्वा भाव आर्षः गजयोरर्कशाखाभ्यां युध्यतोस्तेशा
खेव यथेत्युपमा ३७ अपिष्टोमिथोगात्रचूर्णिचक्रतुः निर्घातो निरभ्र महागर्जितं वज्रं वज्रपातः ३८ समानि शिक्षाभ्यासो बलं सत्वमोजः प्रभावश्च ययोः ३९ एवं तयोरिति पद्यद्वयं प्रक्षिप्तमिति भाति ४०
जन्मशाकल रूपेण स्थितिः पुनः शकलीभावात् तेवि द्वान् जानन् जरया राक्षस्या शकलद्वय योजनेन कृतं कथमसौ शकलीभवेदिति मनुष्यनाट्यात् चिंतयामास ४२ अमोघशा नो भगवान् करेण वृक्षशाखां
पाटयन् यथाहं विटपं पाटयामि तथा त्वमेवं विपाटयेति संज्ञया संकेतेनादिवधोपायं भीमस्य दर्शयामासेत्यर्थः ४३ महासत्वो महाबलः ४४ एकं पादं शत्रोः ४५ एकैकः पादादिर्यायोस्ते शाकले ४६ पूजयामास
तुः साधुसाध्वी त्येवं वीजनादिना च संमानितवंतो ४७ साधु पीडाकरत्वाद सोहतो न राज्यलोभेनेति दर्शयन्नाह सहेति सार्धकेन मागधानां पतित्वेनाभ्यषिंचत् यतो भगवानैश्वर्यपूर्णत्वेन तदनपेक्षत्वादि
ति भावः किंच रूतभावः दयालुरिति भावः अथ च्यामे यात्मा परिछिन्नबुद्धिः राजसूयादेतस्मान्महाधनादित्वा भमात्मोच्चयत्रिति भावः किंच प्रभुः समर्थस्तस्यैतदेव योग्यमिति भावः ४८ इति श्रीमद्भाग
वते दशमस्कंधवर्तिनः द्विसप्ततितमोध्यायस्तोषिणीसारसंग्रहे १ इति द्विसप्ततितमोध्यायः ७२ नेत्रयुतात्र अपि नेत्रायुत भूपास्तरु वरा इवोच्छुष्का सस्कमनसोपपर्णा अपि रूहं कंचित्व नेस्रु वीक्ष्यासन् १
अयुत इति सार्धकं येजरासंधेन निर्जितागिरिद्रोण्यां संरोधेन परिकर्षिताश्च ते ततो निर्गता इत्यन्वयः मलिनइतीन्नोतं १ ददृशुरिति त्रिकं घनेत्यादि मेघश्याम त्वादिद्युन्निभपीतवाससा तिशोभितं लक्षणान्या
ह श्रीवत्सेति पादत्रयेण २ चारु सुंदरा वयवं स्मेरत्वेन च प्रसन्नं वदनं यस्य रूषणादीन्याह स्फुरदिति पद्मानि दक्षिणावर्तः करमासः स्याद दक्षिणावर्तक्रमेण योज्यं तेना धोक्षजमूर्तिलक्षणं एवं रूपत्वं तद्भक्त्य
नुसारात् ३ भ्राजमानो वरमणिः कौस्तुभो यस्य साग्रीवा यस्य नीचीतं कंठलंबिन्याख्यं ४ क्षुत् डा र्तानाममृते प्राप्ते इव चिरंदुः खितानां तेषां सह सा भगवद्दर्शनेनात्मानां तस्मिन्नत्यासक्तिमाह पिबंत इति
सार्धकेन इवे स्फुरत्प्रेक्षायां तया चात्यासक्तिर्व्यज्यते दूतप्रेषणेन शरणापन्ना प्रागेव हृतः पाप्मा येषां ५ हृषीकेशं स्तुस्यादो प्रवर्तकं प्रशंसनं गीः करणकमेवेति गीर्भिरित्यधिकोक्तिर्गिरः प्रशंसत्वविवक्षया ६
संरोधाद्रक्षितान स्मान् भयानकायाः संसृतेरपि पाहि मोचय यतः प्रपन्नान् ननु विषयभोगान् याचत तत्राहुः निर्विण्णानिति हे देव देवेशनात्रान्यो देवः समर्थ इति भावः यतः हे अव्यय कालापरिछिन्न
शक्ते तत्रापि हेतुः रूद्धम हे सदानंदब्रह्मस्वरूपेति एवं रूतस्यापत्रागमनं प्रपन्नार्तिहरत्वादिविरुदादेवेत्याहुः प्रपन्नेति ७ ननु मागधास्रयाविशिष्टराज्यवासनाक्रांताश्च भवंतो न संसृतेर्मोचनार्हास्तत्रा
हुः नेति एनं मागधं नान्नरूस्यामो नान्वसूयामः अलोपश्चार्षः राज्यत्याव कसेन दोषदृष्टा मुहुर्नपस्याम इत्यर्थः पतत् यतो नुग्रहो स्वदर्शनादिरूपानुग्रहहेतुरेव राज्यच्युतिः हे नाथेति अधुनात्वप्यास
नाथा जाता इति भावः मत्थिति आदि देत्य हं तुस्तेको स्यवराकस्य वधे महिमेति भावः ८ अनुग्रहव्यतिरेकेणोपपादयंति राज्येति भक्तिरूपं श्रेयो न स्पोनविंदत एवं यतो राज्यैश्वर्याभ्यां मदेनोछृंखलः अत्र हेतुः
अनित्या अपि संपदो चत्ताः शाश्वतीर्मन्यते त्वन्मायामोहितत्वादित्यर्थः ९ किंच मृगेति बालानिबुद्धयो हरिणादयः विकारारूपादिविषयास्तद्रूपेण परिणतां अयुक्ता अविवेकिनः १० राज्यच्युतेरनुग्रहहे
तुत्वं युग्मकेनाहुः वयमिति श्रीमदेन नष्टज्ञाना अस्या भुवो जेतुमिछया न्यो न्यं स्पर्धमानाः स्पर्धते द्विपिसंप्रसारणावर्णलोपाभ्यां स्पर्ध इति छांदसं पुरः पुरतो वस्थितमवस्य भाविनं मृत्युं कालरूपेण संहार
कं त्वाम नादृत्य पुरा ये दुर्मदा वयं ११ एवं राज्ययोगस्यानर्थावहत्वमुक्त्वा तद्वियोगस्यार्थावहत्वमाहुः त एवेति दुर्बोधवेगेना प्रतिकार्यवीर्येण च यस्मात्त्वतन्वा शक्तिरूतेन अतद्दर्शेन कालेन श्रियो वि
चालिताः अतोद्य इदानीं भवतोनुकंपया विनष्टदर्पाः संतः ते नुकंपयेव ते चरणो स्मराम अग्रे च स्मरतु मा शरण स्महे रूद्धम हे सर्वेंद्रिया कर्षक १२ अत एवाधो अनेन तरं मृगतृष्णिमगतृष्णा नत्सहशं मृगतृष्णी
रूपितं इति बोपदेवसंमतः पाठः अर्थः स एव शाश्वत् क्षीयमाणेन रोगाणां जन्मस्थानेन देहेन सेव्यं न स्पृहयाम हे प्रेत्य परलोके च यन्नादि क्रीयाणां फलं स्वर्गलोकं तं सेव्यं नेछामः यतः कर्णयोः रोचनमात्रं स्पर्शो
हि दुःखलाहुत्वेन स्रुखाभासत्वात् १३ तर्हि किमिछथ तत्राहुः किमिछथेत्यपेक्षायामुपक्रमे यदर्थं संसारान्मोक्षणं प्रार्थितं तन्न देव निवेदयति तमिति यथा यथावदस्मदभिलाषानुरूपास्मृतिरखंडा सिध्येत् सम्यक् कर्तुं श
क्यत्वे नादिश अपि संसरतामिति स्मृत्यत्तानेसंसारमोचनमपि विफलं स्मृतिसत्वे तु घोरा संसृतिरप्य किंचित्करेति भावः १४ एतच्छ्रार्थितसिद्धये तत्प्रियनामकीर्तनेनोपसंहरंतः प्रणमंति रूद्धमायेति
स्वयं भगजते लोकरूपयाच स्रु देवा सकरीभूताय सौंदर्यादिना सर्वमनोहराय निरुपाधि प्रेमास्पदाय भक्तानां क्लेशः संसारदुःखं भक्तिविघ्नादिदुःखं च तन्नाशकाय एतदर्थमेव भूव्यवतीर्णा
येति क्रमेण नामार्थः नमो नम इति पुनः पुनः साष्टांगनमनं बोध्यते १५ मुक्तबंधनैर्नतभक्तिभिः श्लक्ष्णया मधुरया करुणस्त त्राणपिः शरणागतवत्सलश्च १६ तादृशास्मृतिनद्याप्ताश्रयाक्षय
सस्मीरूपां भक्तिमेव ददाति अद्येति प्रेमरूपा भक्तिरस्त्वेवाद्य प्रभृति तुस्रु इढा विघ्नाविछेद्या वाढमतिशायेन यथाशांसितं तथैव जायते भविष्यति वर्तमानसामीप्ये लट् यथायथेति पाठो १७ ततः श्ला

घ्यातदुक्तमनुमोदते दिष्ट्येति श्रियेश्वर्य इतीयइन्द्रः ताभ्यां मदत्तेनोन्नाहमुद्धं धनैस्वैरं चारमुत्सादकं पस्यामि तदेवाह हेहयइति कार्तवीर्यो नरेश्वरः पितुर्गोहरणात्ससूनो भार्गवरामेण हतः नहुषो देव
श्वरतां प्राप्यो नमत्तः शचीसंगायविप्रैः शिबिकां वाहयंस्तेऽर्दशितः वेनो धिक्षिप्तो विप्रैर्हुंकृतैर्हतः रावणः सीतां हरन् रामेण हतः दैत्यो नरको दितिकुंडलहरणान्मयैव हतः एवमपरेपि देवादयः श्री
मदात्मस्थानात् भ्रंशिताः १९ सिद्धायामपि मङ्क्तो ममाज्ञया मत्प्रीत्यर्थं यथा स्वतत्तत्पालनादिकुरुतेत्यादिशति भवंतइति सार्धद्वयेन यदुसाद्यं देहादि एतत्सर्वं मं तव द्विजाय युक्ता मत्पराः संतो लोक
संग्रहार्थे यज्ञैरपि मां यजंतः प्रजा रक्षथ रक्षिष्यथ रक्षतेत्यर्थः हे भवंतइति संबोध्य पूय मित्य व्यात्हत्य मध्यमपुरुषायोज्यः २० प्रजातंतून् पुत्रादिसंततीः भवभवो संपद्विपदो प्राप्तं प्राप्तं समत्वेन सेवमा
नागहस्ताचारं कुरुतेत्यर्थः २१ आत्मा मन एवारामो मत्क्रीडावनं येषां यद्धात्मनो ममारामरूपाः व्रतं पूजादिनियमः एवंभूता भवथ मत्प्राप्तिस्तु मद्दर्शनादेव सिद्धेत्याह प्रारव्यक्षये ब्रह्म मां यास्यथेवेति २२
सदानंदो चिंत्य षडैश्वर्यो भुवनाधीशोपि सन् अभ्यंगस्नानादो पुरुषान् स्त्रियश्च तं तत्साधनादौन्यं युक्त २३ सपर्यामिति युग्मकं २४ किं कृत्वा कारयामास इ तदाह भोजयित्वेति कथंभूतानि यत्र क्रमेणाह
स्नातानित्यादि २५ मुकुंदेन दुरवमोचकेन संमानिताः पूर्वतो व्याधिक्येन रेजुः गृहाश्चं द्राद्या यथेति २६ स्तूनंतैः भवंतो मदीया अहं भवदीयो मत्प्रियस्य युधिष्ठिरस्य यज्ञोत्सवस्तत्रागत्य शोभनीयइ
त्यादिप्रियवाक्यैः २७ शोभनो महांश्च आत्मा सौंदर्यलत्या लुत्यादि स्वभावो यस्य तमेवं वदयादि स्वभावं कृतानि मागधवधादीनि स्वस्तपनादीनी चकर्माणि २८ चेष्टितं स्वमोचनादि प्रतियापनं तत्तो कोच
रव्यवहारं जगदुः कीर्तयामासुः तच्चुमत्यादि स्वपि भक्तैः संपन्नमिति भावः २९ प्रायात् मागधस्य दिव्यं रथं पांडवाभ्यां सहारुह्य ययौ न ससाङ्ग्राति कृष्णेषु शास्त्रे श्र्यापि न हीयते दिव्योरथचेशो राजन् दस्य
तेनैवमानुषः तमास्थाय रथं दिव्यमित्यादि भारतोक्तेः ३० खांडवप्रस्थमिंद्रप्रस्थं शंखान् वर्त्म निस्थापिते स्वरथे स्थितान् ३१ तत् शंखध्मानं शांतं मतं ३२ अथ शंखध्मानोत्तरमेवेति राज्ञो भिगमनाद्य
नवकाशः सूचितः जनं दुर्जनं मागधमर्दयति हि न स्तिसः अतः पराक्रमोचितविनयविशेषेण भीमार्जुनतः पश्चाद्विनिवेदने आत्मना स्वयं त्रिनिर्मिलनित्वो नुष्ठितमित्यर्थः ततोन्योन्य पराक्रमं चातुर्या
दिकं वर्णितमिति त्रिये ३३ धर्मराजः भगवत्कर्मश्रेष्ठः अतः प्रेमाश्रु रुद्धकंठतया नोचिवत्तेन वा भक्त्या चादिमयं वकुंनाकोत् ३४ इति श्रीमद्भागवत दशमस्कंधसंश्रयः त्रिसप्ततितमोध्याय ३४ यस्ता
षिणीसारसंग्रहे १ इति त्रिसप्ततितमोध्यायः ७३ राजानं भगवान् यागं राजसूयमकारयत् राजत्वं राजसूयत्वं राज्ञि याग नुसाधयन् १ पार्थो राजा राजसूयं मखाग्ग्यं मन्वारे भेकर्मकृत् प्रत्ययां
ते कृष्णमप्याधारार्थ कृत्यांतमत्र राज्ञो नो स्याचूर्णिताश्चेद्यमुख्याः २ धर्माध्वरेव्यास मुख्यात्र ऋत्विजो माधवाध्वरे कर्णमागधभूपादिप्रशो भीमार्जुनादयः ३ जरासंधवधात्व्यं श्रीकृष्णमस्यतमनं भावं श्रुत्वा चोत्तस्य
स्वाज्ञावर्तित्वं दृष्ट्वा चदिनोतरे तमेवाब्रवीत् विभोइति विभोरिति पाठो १ ये त्रैलोक्यपूज्याः सनकाद्याः सर्वे लोका लोकपालाश्च तेशिरसैव तवानुशासनं वहंति दुर्लभं लब्ध्वेति भाग्येन तल्लब्धमिति बहुमाने
नेत्यर्थः २ स भवान् परमेश्वरो दीनानामकिंचनानां तथापीशमानिनामस्माकमनुशासनं धत्ते पालयति कृपयारविंदवत्प्रसन्नेक्षणः हे भूमन् अपरिछिन्न प्रभाव अतस्तद्धयमात्मनो त्यंतविडंबनमुपहासा
स्पदं मन्यामहे ३ नवतु तेनापि न हानिरित्याह नेति एकस्य समानरहितस्येति शांतरभावादाज्ञा धारणासंभवः अद्वितीयस्यासमानश्चन्यस्येतिस्वः व्यतिरिक्ताभावादाज्ञापनासंभवः परमात्मनः सर्वजीवनि
यंतुश्चेति सुतरामसंभवः तस्मात्परमानुग्रहमयैरेतैः कर्मभिः स्तव तेजो नवर्धते नच ह्रसति किंतु प्रकारमप्रकटं च भवति २ वेरिवोदयास्तकर्मभिः ४ ननु तथापीश्वरोयं ममाज्ञावर्तित्येवं भक्तो नाम निष्ठाव
हान्निमानस्तूस्यादिति किं तत्रापि तत्राह नेति भक्तानां इमां लुत्वादि त्वत्स्वभावज्ञानानामिति भावः अहं भक्तोत्तमो ममाज्ञावर्त्ययमीश्वरस्त्वं तवेत्येवं नानाविधाधीर्नास्ति यथा पशूनाम ज्ञानां वेकृतावेकृतीपा
हो विकारवतीकुत्सितेत्यर्थः इति प्रह्वार्थो भातीति ५ पञ्जियेयज्ञो चिते शुभसमये ऋत्विजो ब्रह्मादीन् वृतवान् ६ तानाह द्वैपेति त्रिकेण द्वैपायनो व्यासो ब्रह्मत्वेन वृतः स्वयं ब्रह्मत्वप्रकाशेत त्रसत्यवतीसुतइ
तिसभापर्वोक्तेः ७ एवेति श्रेष्ठत्वादेते एव वृतानान्येइत्यर्थः चकारः प्रत्येकं समुच्चये ८ अकृतव्रणतानाप तेवृताइति शेषः व्यासाद्या ब्रह्मद्यात्रादि भेदेन शेषाः साहस्त्यादिरूपेण वृताइत्यर्थः ९ युग्मकं
उपहूताइति नकुलं प्रेष्याहूतास्तथा कृष्णानुमोदितप्रकारेण महामतिः ऐहिकपारत्रिकसर्वधर्मवित् १० ब्राह्मणादयश्च यज्ञदिदृक्षव उपहूतास्तत्रेयुरिति द्वयोरन्वयः ११ देवयज्ञनं यज्ञभूमिं सोघ
कृष्णादीक्षयां चक्रिरे दीक्षणीयेष्ट्यादिसंस्कारयुक्तमकुर्वन् १२ हेमाइत्यर्धकं यज्ञपात्राद्युपकरणानि यथा वरुणस्य राजसूये तथासन्निति शेषः १३ इंद्रेति त्रिकं इंद्रादिदेवगणा मुन्यादयो राजाद
यश्च ये समाहूतास्तत्र समीयुः स्म ते सर्वे राजसूयं सूपपन्नो मेनिरे इत्यन्वयः मुनयत्र आत्मारामाः सनकादयः खगा गरुडादयः १४ तथामनेहेतुः पांडुसूतस्य तत्रापि कृष्णभक्तस्य अतएवाविस्मिताः
संतः १५ महाराज्ञे युधिष्ठिरं देवाधिकं वर्चो येषां ऋत्विजः अमरादेवऋषिणः प्राचेतसं वरुणमिव १६ सोमाभिषवदिने सदसस्पतीन् सभाश्रेष्ठान् यथा योग्यमपूजयत् पूजयितुमारभत १७ तत्र
चसदसीति अग्रहार्हेण मग्रपूजा तत्र योग्यं अनेकास्यात् एकस्मिन् योग्यत्वानिश्चयात् केचित्तु विज्ञात्र अपि चेद्यादिदुर्जनाविवादापत्या नोचुः सहदेवस्तु प्राप्तपूजाधिकारत्वादेकां स्याचाब्रवीत् १८
हि एव अच्युतः सर्वपूर्णः श्री कृष्ण एवार्हतीति यतो भगवान् नित्यसिद्धसर्वैश्वर्यः किंच सात्वतां व्यासनारदादिभक्तानां सर्वेपूजानां पत्तिः किंच ये देवतादयो यज्ञे ते प्येष एव आदिनाभीष्मेण सभो
पर्वेण्युक्ता आचार्यादयोपि १९ तत्र हेतुमाह यदीति अशेषं विश्वं यदात्मकं तत्र किं वाच्यं क्रतवः स्तदंगान्यग्न्यादयश्च यदात्मकाइति अतो ज्ञानोपासनाकांडे अपितदर्थे एवेत्याह सांख्य
योगश्चेति २० विश्वस्य तदात्मकत्वं विवृणोति एकइति यः स्वच्छः पुरा एक एवाद्वितीयः सजातीयादि भेदरहितउक्तः सोसौ श्री कृष्ण एव अतइदं जगत् एतदात्म्यं श्री कृष्णात्मकं स्वार्थे ष्यञ् स
देवसोम्येदमग्र आसीदेकमेवाद्वितीयमेतदात्म्यमिदं सर्वमित्यादिश्रुतेः हे सभ्याः यतो यमात्माश्रयोन्यनिरपेक्षः आत्मना स्वरूपेण जगत्सृजति पाति हंति च स्वयं त्वजः २१ किंच विविधानीति यस्या
वक्षयानुग्रह ६ इष्टयस्वधर्मयोगादिकर्माणि जनयन् कुर्वन् भवति अयं सर्वोजनो धर्मादिलक्षणं चतुर्वर्गरूपं श्रेयो यस्मादीहते साधयति यत्स्वरूपयैव सर्वेषां सर्वाणि कर्माणि फ
लानि च सिध्यति सोयं श्री कृष्णइत्यर्थः २२ उपसंहरति तस्मादिति महते सर्वात्मकाय अतएव एवमित्यादि अतः कस्याप्यत्र विप्रतिपत्तिर्नस्यादिति भावः २३ आत्मना क्रीयमाणम

ईणमात्मनः कथं स्यात्तत्राह सर्वभूतानामात्मभूतायेति ननु जीवात्मापि वस्तुत एवंभूतस्तत्राह अनन्यदर्शिने निरस्तभेदमतये सनकादयोप्यनन्यदर्शिनस्तत्राह कृष्णाय परब्रह्मणे विभ्वरूपाय अतः
तत्पूर्णत्वादिना निःससिद्धाय तेनु साधनसिद्धा इति पद्यार्थो भाति २४ श्रीकृष्णानुभावविदित इत्युक्त्वा सत्तमा द्विजाः श्रुत्वा द्विजैरितमिति वक्ष्यमाणात् २५ द्विजैरितं साधु साध्वीत्यादि घोषं सभासदामन्येषां
हार्दं समस्याशयं स्वेष्टसिद्ध्या प्रीतः २६ सम्यक्कृत्वं दर्शयति नन्दितिद्वाभ्यां २७ महार्धनैर्वस्त्रादिभिः २८ नमोनयेति चवदंतः २९ शिशुपालदंतवक्त्रयोः पार्षदत्वेन नांतरस्कारभावः किंतु बहिस्तदनुकरणमेव
अतः सोगपूजोत्तरमेवोवाच तस्मादनयोर्वर्चसि अर्थांतरं वास्तवमन्ये पांतु गीर्देवीप्रेरितं तथापि युद्धरसपोषार्थं यथा दृष्टमाह इत्थमिति सहदेवोक्तमारभ्य नमोज येस्यैतं श्रुत्वा गुणवर्णनेन किं पुनः पूजया जातो मन्युः
क्रोधः क्रोधो वा यस्य अमर्षी मत्सरी क्रुद्धो वा बाहुं दक्षिणं अभीतः साहसिक इत्यर्थः ३० उपालंभगर्भमाह ईशा इति सत्यवतीसत्या श्रुतिरेतिर्षं वेदोवा यत् यस्मात्कालात् ३१ हे सदस्स्पतयः बालस्य भाषितमतो मा
मध्वं मा गृह्णीत पूजां परिवर्तयध्वमिति भावः यतो ममेव पात्रविदां श्रेष्ठा नत्वयं सहदेवः यत् यस्मात् भाषितात्कृष्णोर्हणं संमतः वास्तवार्थे तु सा श्रुतिः सत्यैव विनिवृत्ते सनिश्चयी क्रियते अतो बालभाषितमि
ति मा मध्वं मामन्यध्वं यतो हेतो कृष्णोर्हणे संमत एव ३२ किंचान्येषु योग्येषु सत्सु कथमयं पूजामर्हतीत्याह तपइति युग्मकेन कुलपांसनः मातुलवधादिना स्वकुलदूषणः वास्तवार्थेत्वाह किंतु तपइत्सादि ३३
गोपालो वेदादिपालकः कुत्सितं वेदविरुद्धं लपंतीति कुलपाः तान् सेते नाशयतीति सकुलपांसनः साक्षात्परमेश्वरस्तप आदिधरानतिक्रम्य यासपर्या तन्मात्रमप्याद्दिसाधारणं कथमर्हति किंतु सर्वस्वात्म
समर्पणमप्यर्हतीत्यर्थः अहमिदानीं युद्धयज्ञे आत्मसमर्पणमेव करिष्यामीति भावः कं सुखं अकं दुःखं न विद्यते यस्य सः अकाकः आप्तकामो यथा देवयोग्य पुरोडाशमात्रं नार्हति किंतु सर्वस्वं तद्वत् ३४ ननु दु
ष्टवंचनार्थं गोपालने दुष्टकंसवधे च को दोषस्तत्राहासूययाह वर्णेति स्पष्टं वस्तुतस्तु किंच वर्णाश्रमकुलेभ्यापेतो ब्रह्मरूपत्वात् अतोनधिकारित्वात्सर्वधर्मैर्बहिष्कृतः स्वैरवर्ति परमेश्वरः अतो निर्गुणस्तमश्रा
दिभ्रून्यः एवं रूपो जीवयोग्यं सपर्यामात्रं कथमर्हति ३५ यादवानपि निंदति द्वाभ्यां ययातिनेति शप्तमतः सद्भिः परित्यक्तं वास्तवार्थे सद्भिर्मुनिभिस्तत्तद्यजनादिना तस्मात् छापाद्बहिष्कृतं मोचितं अतः पानं पृथ्वी
पालनं तत्र रतमासक्तं वृथा सपर्या कथमर्हति किंतु सफलामेवेत्यर्थः ३६ अब्रह्मवर्चसे वेदादिरहिते समुद्रं दूरमुपेत्य वः संतः वास्तवार्थे त्वेवं भावि ब्रह्मर्षिसेवितान् देशान् हित्वा दुर्धाग्रपाषणे पोषयित्वेत्यर्थः तेन ब्र
ह्मवर्चसं ब्राह्मतेजश्च संपोष्य अदस्यवः प्रजानुत्र दूर रहिता अपि लीलया समुद्रं दुर्गमाश्रित्य स्थिता एते यादवाः प्रजा बाधंते किंकार्णेनेत्यर्थः यद्वा पूर्वपद्ये घाष्यस्तस्य कथं पदस्यानुषंगः कथंबाधंतेन कथमपीत्य
र्थः ३७ नष्टमंगलः आसन्नमृत्युः नास्ति भद्रं मंगलं येषु शिवा फेरुस्तस्या रुतं श्रुत्वा यथा सिंहो न किंचित् भ्रूते गांभीर्यात्तथा भगवान किंचिद्दूचे वस्तुतस्तु नष्टं गृह्णतया स्थितं मंगलं पार्षदत्वाख्यं यस्य सः। नवि
द्यते भद्राणि येभ्यस्तानि बभाषे भगवांस्तु गांभीर्याद्वीनोवाच भगवान् सिंहः यथा किंचित् सिंहः पक्षइयपि न स्सिंहइत्यर्थः शिवा रुतं शिवस्य सम्यक् स्तुतिमिव ३८ वास्तवार्थमविदुषामन्येषां चैनिंदानुकरणमप्य
सहिष्णूनां चेष्टितमाह भगवदिति दुःसहं अतो निर्जग्मुः ३९ किंच दुर्गतिपरिहारायापीत्याह निंदामिति अधः दुरंतं नरकं ४० एवमशक्तानां निर्गममुक्त्वा शक्तानां चेष्टितमाह ततइति सम्यगुत्स्थस्य तस्थुः ४१
तइति तदन्येन स्वपक्षीयास्तु सर्वे संभ्रांता इत्यर्थः ४२ तावदुत्थायेति जन्मत्रयांते विप्रशापात् मोचयित्वा पुनः पार्षदतां प्रापयितुं तत्क्षणमेवोत्था यतो भगवान् वात्सल्यादिगुणयुक्तः ४३ अथासीदथासीदिति पाठो
कोलाहलः हाहा साधु साधु जयेत्यादि वाक्यैर्नानाविधः ४४ ज्योतिस्तद्रूपेण लीनतया स्थितं पार्षदवपुरेव तस्यानश्वरत्वात् ४५ प्रविवेश च तन्मयतां तद्रूपप्राचुर्यं तत्सदृशतां यातः पुनः पार्षदोभवदित्यर्थः किंकु
र्वन् जन्मत्रयेनुगुणितमनुवर्तितं यद्वैरं तेन संरब्धया विलक्ष्याधियाध्यायन् हियतः भावो भावना अनुध्यानं भवस्यध्येयाकार जन्मनः कारणं ४६ इत्थं विघ्ननाशे यज्ञः समाप्त इत्याह ऋत्विग्भ्य इति ४७ अपि
याचितस्तत्रार्थनावशः ४८ इष्वेशाप्यनुज्ञाप्य ययौ ४९ कथमपि विप्रानावमन्तव्या इत्यानुषंगिकतया व्यंजयन् महाकथामुपसंहरति वर्णितमिति तत् त्वया सप्तमे प्रष्टं प्रसिद्धना ५० उत्कंठया वा तथा
भीषकं स्तोति राज्जेति अत्र भगवता द्रौपदीसहितस्य राज्ञः केशसंस्कारपूर्वकमभिषेकादि विशेषो भारते द्रष्टव्यः ५१ ततश्च राजेतियुग्मकं सुराः ब्रह्मेशादयः मानवाः मुनिपार्थिवादयः खेचराः सिद्धादयः ५२ एवं साधु
नां हर्षमुक्त्वा दुष्टानां तापं बोधयितुं तन्मुखव्यस्ततापमाह दुर्योधनमिति सतु कृष्णं क्रतुं च न प्रशशंस न च मुदायो किंतु शोकतप्तोभूत् यतः पापं धर्मद्विषं तत्रापि कलिं कलेरंशं अत एव कुरुकुलस्याम
यं व्याधिं नाशकं ५३ अभक्तानां कृष्णं क्रतुं पश्यतामपि दुर्योधनादीनां दुःखमेव भक्तानां तु कीर्तनादिपरिणामपि सुखमेवेत्याशयेनाह यइति वितानं यज्ञं ५४ इति श्रीमद्भागवतदशमस्कंधमध्यगः चतु
र्युक्सप्ततितमस्तोषिण्यीसारसंग्रहे १ इतिचतुःसप्ततितमोध्यायः ७४ कुर्वंतं कुर्वंतं समरं समरं जनोयसोजनयन् भगनममानं मानं कुरुते कुरुतेजसो प्रभोर्द्विषतः १ पापमित्यादिनोक्तमपि कारणं वि
शेषतो बुभुत्सुः कृष्णमहृच्छति अजातेति युग्मकेन १ राजानमान्यैव राजस्वाभिमानिनं श्रुतं परंपरया त्वन्मुखाच्चेत्यर्थः २ दुर्योधनस्य दुःखे सहनमेव हेतुं व्यंजयितुमसहनहेतुत्वेन यज्ञमहोत्स
वं पुनः सिंहावलोकनन्यायेन वर्णयति पितामहस्येत्यादिना त्रिंशता महात्मन उत्कृष्टस्वभावस्य अतः स्नेहप्रणाबद्धं तेतेनतथा ३ चतुर्भेण तदेव दर्शयन् द्वाभ्यां मुख्यकर्मसु स्थितानाह भीमइति
अध्यक्षो नियोक्ता कश्चित् कर्ता च सन् प्रवर्तते स्मेति विपरिणामेन श्लोकद्वयेनान्वयः एषां तत्र तत्र नैपुण्यात्प्रवृत्तिः ५ कृष्णइति अन्येषां मानितया नात्र सम्यक् प्रवृत्तिरेतद्धीनश्च यज्ञः सच्छिद्र
इत्यालोच्य तत्स्वरूपया पावनेज्ञ्नेस्वयं बलादेव प्रवर्तते स्मेति भावः महामनास्तत्कर्मणि प्रवीण इति सर्वेषां विशेषणं महात्मन इति पाठे सप्तमे राज्ञो विशेषणं ५ विकर्णो दुर्योधनभ्राता विराडिति
पाठांतरं हार्दिक्यः कृतवर्मा आदिना भीष्मद्रोणादयः कृताकृतपरिज्ञाने भीष्मद्रोणौ महामती इति भारतात् बाल्हीकपौत्रौ भूरिः आदिना भूरिश्रवः प्रमुखाः पुत्रा इति तु पुत्रपौत्रयोरभेदात् संतर्दनः प
थाभागिनेयः आदितत्भ्रातरः ६ निरूपिता नियुक्ताः भीष्मादयस्तु प्रेम्णा स्वयं प्रवृत्तत्वादनुमोदिता एव ७ बहुवित्तदा ब्रह्मतेत्यो न्ये विद्वांसः स्विष्टेषु पूजितेषु सूनृतप्रियवाक् समर्हणं अलंकारादि
भिः। लिंगादयो राज्ञो भवद्थेन सत्पनं चक्रुः धुनद्यां गंगायां इत्यवभृथार्थं तत्र गमने बोध्यं ८ पटहं भूरी आनक दुंदुभयः ९ तल्लकरतालः १० अवभृथोत्सवमेव प्रस्थानमारभ्य विशेषतो वर्णयति चित्र
त्यादिना मेखलया विरेजुः स्त्रियस्तेन चित्रेति सार्धद्वयकं चित्राणि ध्वजाग्रभागानि येषु तैः रथैः द्वैरथैरश्वैश्च भद्रैश्च एवं चतुरंगसैन्यैर्भुवं कंपयंतः ११ भूपानेवाह यदिति अन्ये च द्विजश्रेष्ठाः १२
देवर्षय इत्यर्धकं १३ स्वलंमिति सार्धकं नरानार्यश्च मिथो विजह्रुः किंविधानार्यः तैलादिभिरसैर्नरान् विलिंपंत्यो भिषिंचंत्यश्च १४ पुंभिरित्यर्धकं कुंकुमादिना लिप्तास्तान् लिंपंत्यो गणिकाश्च विजह्रुः

न त्रिगुणात्मदेवस्य युधिष्ठिरस्य पत्न्यो द्रौपद्याद्यास्तदुपलक्षिता रुक्मिण्याद्याश्च रथादियानैर्निरगमन् एतत् अवभृथस्नानं दृष्टुं विमानवरैर्देव्यो यथा गंगातीरगमनानंतरं तासां क्रीडामाह ताइति ताः पूर्वोक्ताः स
वीणवस्वैः स्वैर्नर्मतुल्यैः सखिभिश्च यद्वा ताः द्रौपद्यादय एव मातुलेयः पत्न्यर्मातुलेयः श्रीकृष्णः पतिबंधुत्वाद्देवरस्तदुपलक्षिता भीमादयो दुर्योधनादयश्च सखायस्तेषामेव त्वात्समास्तैः परितः सिच्यमानाः १६ देवरान् पूर्वो
क्तान् कृष्णादीन् तेषां सखीनपि इति शिश्च नर्मदिमयैः सेचनयंत्रैः औत्सुक्येन से कान्तिभिर्वेशेन कबराश्च वमानेति कबरास्यतमानेत्यादि पाठांतराणि मत्वधियो दुर्योधनादीनामेव न तु साधूनां देवरादीनां १७ विशेषतो राज्ञो
गमनं वर्णयति सइति १८ गंगागतस्यावभृथतीर्थे अत्रतुल्यासाद्याधिष्ठिते गंगे श्रीकृष्णयुते किमुतेति भावः २१ अहतेन्द्रतने २२ आदिशब्दार्थं विवृणोति बंधूविति बंधून् श्रीकृष्णादीन् ज्ञातीन् भीष्मादीन् विराटादिमि
त्राणि सुहृदः संबंधिनो द्रुपदादीन् श्रीकृष्णादिक्रमेण पूजयत् २३ जनाः पुमांसः स्त्रियः सुराणामिव रुक्कांतिर्येषां मणिमयकुंडलैः सहितास्त्रगादयो येषां कुंडलयुग्मेनालकवृंदेन च जुष्टाव क्रश्रीर्यासां २५ अथेति युग्म
कं अवभृथांते राजगृहागमनानंतरं महाशालाः परमकुलीनाः २५ लोकपालान्द्रेशस्तद्यदयः ऋत्विगादीनां क्रमेणानुज्ञापनं २६ नेवात्यप्यन् अविरतं प्रशंसां सुहृदित्यर्थः २७ एवं यज्ञसंबंधिनः प्रस्थाप्य स्वीयान् जागमि
ष्टूनपि प्रेम्णा न्यवासयदित्याह तत्र इति ऋत्विगादिगमनानंतरं सुहृद्दो भीष्माद्याः संबंधिनो द्रुपदादयः बांधवाः मित्राणि विराटादयः अत्र हेतुः प्रेम्णेति कृष्णं चेत्यत्र विशेषतो हेतुमाह त्यागेति २८ एवमीश्वरोपि तदधीन इवा
तिप्रीत्या वसदित्याह भगवानपीति नितरां स्त्रीगणसाहित्यादिना वासीत् प्रस्थाप्येति द्वारकावासिनो विरहातुराणामाश्वासनार्थमिति भावः स्वान् स्वां शाम्बादीन् २९ कृष्णेन हेतुना सम्यक्सुखेन संपूर्णतया च्चोत्तीर्य ३०
एवं दुर्योधनस्य तापबीजत्वेन युधिष्ठिरलक्ष्मीं वर्णयित्वाह त्वेतरं चाह एकदेत्यादिना श्रियं साम्राज्यलक्ष्मीं यज्ञस्य महित्वं महाप्रतिष्ठां अतप्यत तापं व्यक्तमकरोत्प्रायः शिबिरनिवादिनेति भावः युधिष्ठिरस्य तु सा श्रीः तन्महित्वं तत्र
चागर्वतेत्यादियुक्तमेवेत्याह अच्युतात्मन इति ३१ तन्महित्वं तां श्रियं च दिक्प्रदर्शनया वर्णयंस्तत्तापमनुवदति यस्मिन्निति अंतःपुरे नरेंद्रादीनां लक्ष्म्यो विशेषतो भांति यतो विश्वसृड् मयेन विश्वकर्मणा वा रचिताः
ताभिः सहपतीन् पतिमिति पाठो यस्यां यास्वलक्ष्मीषु मात्सर्येण सक्तचित्तः ३२ किं बहुना रुक्मिण्याद्याः साक्षाल्लक्ष्म्य एव यत्र खेलंति स्मेत्याह यस्मिन्निति सहस्रमिति बाहुल्योपलक्षणं श्रोणीभरेणोपलक्षितं
अतः शनकैः क्वणद्भिः रंघ्रिभिः शोभायस्य मध्येस्थचारु चारुमध्यं कुचकुंकुमैः शोणो हारा यस्य श्रीमति मुखानि यस्य यतः श्मलैः कुंडलैः कुंतलैश्चाढ्यं संपन्नं विभातिस्मेत्यनुषंगः ३३ ईर्ष्याहेतुकतापफलं तस्य मानभंगे
षड्भिर्विवृणोति सत्यामिति युग्मकं क्वापि कदाचित् सभायां स्वर्णासने आसीनो विरेजे इति शेषः धर्मेति धार्मिकतया चिराद्दृष्ट्वा द्याभिमानशून्य इति भावः किंच कृष्णेन स्वचक्षुषा हिताहितज्ञापकेन वृतः
यद्वा स्वे स्वीये चक्षुषि यस्मिन् अथवास्वस्मिन् नक्तोपवच्चक्षुषी यस्य किंवास्वस्य चक्षुरुपेण चक्षुर्विनेव तं विना सा संपदपि तस्याति दुःखकरीति भावः ३४ किंवाच्यमघवानिवेति परमेष्ठिश्रियापि जुष्टः ३५
तत्र सभायां मानित्वात्स्वैश्वर्यव्यंजनाय महार्घ्यैः किरीटमालाः किरीटाग्राणि तद्वान् प्रशंसायामिनिः वीरप्रदर्शनार्थं असिहस्तः सहायप्रदर्शनार्थं भ्रातृवृतः अतो मानी रुषा द्वास्थादीन् अधिक्षिपंश्च निःसे को चम
निश्रात् ३६ गर्वपर्वतमारूढं दुर्योधनमनोबत तदूहः पतितो गोवृंधा चूर्णितो गर्वपर्वतः १ तदाह स्थलेइत्यादि स्थले वस्त्रा तमभ्यगद्गृहात् आकुंचितवान् कुतः स्थले मोस्पा जलं मत्वा किंच स्थलवत् स्थलतुल्ये
जले मोस्या स्थलभ्रांत्यापतत् पतो मयस्यमायया शिल्पपरिपाट्या विशेषतो मानध्वंसपूर्वकं मोहितः अधिक्षेपादयो द्वास्थादयो मार्गदर्शनार्थं नागमन्निति तिज्ञयं भारतेतु द्वारं च विवृताकारं समापेदे पुनश्च सः व्रतेय
चेति मन्वानो द्वारदेशाद्दुपारमदित्यादि विस्तारेणोक्तं ३७ तमिति भ्रातृसाहित्येपि तस्यैव पतनमग्नचारित्वात अनुमोदिताः नेत्रप्रांतेन स्मितेन च प्रेरिता इत्यर्थः ३८ अवाग्वदनो घोमुखः हाहेति महादुःखात्तस्मादनि
वारितक्या अजातशत्रुरतस्तद्दुःखेनेषद् दुःखितोऽभूत् ३९ बभूवेत्यर्धकं कृष्णमीबभूव स्वेष्टसिद्धेः इष्टमेवाह भुव इति अद्यापि तेन कलहबीजेन प्ररूढं कुर्वादि भूभरसंहारफलिनं समरतरुमासादयिष्यामीतिधि
येति भावः यस्मात् यस्य श्रीकृष्णस्य दृशैव दुर्योधनो भ्रमति स भ्रमयमायातु निमित्तमात्रं कथमन्यथा भ्रमपरंपरास्यादिति भावः ४० राजसूयेतदंते इत्यर्थः ४० इतिश्रीमद्भागवतदशमस्कंधमध्यगः सपंचसप्त
तितमस्तोषिणीसारसंग्रहे १ इति पंचसप्ततितमोऽध्यायः ७५ बहुत्वाद्योविमानोपि विगतायोपि मानवान् बलान्वितैरप्यबलैः शाल्वात्युध्यतयादवैः १ अथेतदनंतरकालिकं यथा येन प्रकारेण शाल्वो हतस्तत्र
कारकं क्रीडामयनराकारविग्रहस्याद्भुतं कर्म १ तत्रोपोद्घातकथामाह शिशुपालेति तस्य कावा तौ जरासंघादयो पीत्यर्थः २ तथापि प्रतिज्ञामकरोत् अयेने [illegible] देवेनादवी तापरहितमितिवाग्देवी व्यंजितोऽर्थः पूर्वमु
क्तः ३ तस्यैवाराधने हेतुर्विशेषणानि देवं स्वेष्टदैवं पशूनामपि पालकं इष्टदाने प्रभुं पांशूविति धूलिस्तेषामुरवं कृष्णं नाश्रयेति द्विष्यतिये फलसाधनकालेपि शाल्वस्तत्र निदर्शनं ४ मितिति तत्रैव केश्वर भावः ५ भग
वान् श्रीकृष्णद्विषि शाल्वे वरवे फल्यादि ज्ञानवान् ततआशुतोषोपि संवत्सरांते वरेण छंदयामास इच्छाकारितवान् वरं वृणीष्वेत्यवाचेत्यर्थः यतः शरणमागतं अन्यथा शरणागतोपेक्षा लोके प्रवर्ततेति भावः ५ देवेति
देवत्व नरत्वादिनास्य वच्छिन्नशरीरिणां मनेद्यं भगवत स्कतादृशशरीरित्वाभावाद्भेद्यमिति भावः भीषणमेव न तु घातकं श्रीशिवेनांतस्तथाप्रेरणादिति भावः ६ तथेत्युक्तो गिरिशेनादिष्टः पराणि अन्यकृतानि
पुराणि स्वकोशात्तेन जयतिसः मुमूर्षुरार्षः पुरं नगराकारं व्योमगं रथं सोभसंज्ञं अयस्मयं लोहमयं अयस्मयादीनि छंदसीति साधुः ७ तमसो धामाश्रयः अतो दुरासदं चक्षुरादिअगम्यं कृष्णकृतं वृष्णिकृतमि
तिपाठो ८ निरुध्येति त्रिकं तत्र स शाल्वः उपवनादि विहारांतान् बभंज भंकु मुग्धवानिस्यंतमेकं वाक्यं ततो दिशाइत्येतमपरं ९ पुरद्वारसहितान्यन्यद्वाराणि प्रासादा गृहा अट्टाला उपरिगृहाः तोलिकास्तत्स्यर्यत
कुड्यानि विहारान् क्रीडास्थानानि १० चक्रवातो वात्या विमानाग्र्यादेव अभूत् वा स्याः रजसाच्छादिताः ११ कृष्णस्य नगर्यपीति भगवतस्तथैवेच्छेति भावः ११ बाध्यमाना बाधितुमारभ्यमाणाः स्वपं भगवान् तृतीयो व्यू
हः लौकिकलीलया तु वीरस्तत्रापि महारथः १२ सात्यकिरिति युग्मकं चारुदेष्णः प्रद्युम्नानुजः भानुविंदो भानुः सत्यभामाज्येष्ठसुतः शुकनामा यादवः सारणो रोहिणेयः चकाराः सर्वेषां प्राधान्याय १४ रथेभा
दीनां यथापूर्वं श्रेष्ठ्यं १५ शाल्वानां शाल्वस्य तदीयानां चेत्यर्थः १६ उष्णगुः सूर्यः १७ ध्वजिनीपालं सेनापतिं संन्नतानि निम्नानि पर्वाणि ग्रंथयो येषामिस्यति ने धकत्वे १८ नेतृन् सारथीन् १९ अद्भुतं लोका
तीतं यतो महात्मनो परिछिन्नशक्तेः पूजया मासुः संमानितवंतः २० ततः प्रद्युम्नभयात्सौभमलक्ष्यमस्थिरं चाकृदित्याह द्वाभ्यां बव्हिति कदाचिद्बहुरूपं कदाचिदेकरूपं कंचित् दृश्येत क्वचिन्न दृश्यते एवमलक्ष्यं २१
कुर्वितक्वाचित्किरेरवतकस्यमूर्ध्नि एवमनवस्थितं २२ उपहीनेकिंचिदपि लक्ष्येत २३ दाहकत्वादग्निरूपैः रश्मिद्वारार्कस्येव सर्वतः संस्पर्शो येषां तैश्च सर्पवद्विषस्पर्शैः नैव मारकत्वाद्दुरासदैर्दुःसहैः परैः यदुभिर्मु
क्तैः पुरमनीकानि च २४ अर्दिताअपि स्वं स्वं रणस्थानं २५ द्युमन्नामनया चापि न यज्ञे प्रीतिमन्नया मत्वेन तोल्य प्रद्युम्नादेवेनायुध्यत द्युमान् १ तदाह शाल्वेत्यादि प्रद्युम्नाद्धतोः प्रागस्त्रादिना दुःखितोऽपि चिरो

षतस्तमाहत्य २६ प्रद्युम्नः सकलानिधिरमित्रजननतापनुद्धिमज्जनतः अस्तूपरेणादानं व्यक्तिति तमसाव्रतः क्षणमकीर्त्या तदाह प्रद्युम्नमिति अशीर्णवक्षस्स्थलमप्यपोवाहन्यतोनिनायकिमर्थं अरिंदमं क्षणं विश्रम्यारिं
दमयितुं तदवस्थां ज्ञात्वा यदुवीराणां युद्धावेशातिशयार्थं चेति भावः २७ अहो स्विदे ममश्रीकृष्णस्य पुत्रस्य २८ क्लीबं पौरुषशून्यं चित्तं यस्य तेन सूतेन त्वया हेतुना प्राप्तं किल्बिषं येन तस्मान्मत्त मत्तो विना २९ रामं शाम्बवि
विरमणं केशवे के शोहं तारं चोपगम्य तान्यो पृष्टः सन् स्वयोग्यं किंन्तु वक्ष्यामि युद्धान्मया दितिपाठः ३० भ्रातृजामयः भ्रातृभार्याः निश्चितं कथयिष्यति किं तदाह मृधे न्येहैं तु निस्तवक्लैब्यं दैन्यं कथं कथं तत्कथ्यतां वीप्सा
हे वीरेति चोपहासातिशायाय इदं सारथिभर्त्सनार्थमारोप्येवोक्तं मर्मभेदकस्योपहासस्य तानिरवाच्यत्वात् ३१ आयुष्मन्नवितोऽइति त्वय्यनिष्ठाशंका नास्त्येवेति भावः तथापि स्वधर्मज्ञात्वा कृतमेतदित्यर्थः धर्ममाह सूते
ति ३२ परेण शत्रुणोपसृष्टः पीडितः यतः गदया हतो मूर्छितश्चेत्येतद्विदित्वेत्यन्वयः अपोवाहितइत्यत्र पकारोत्तर ओकार आर्षः ३३ इति श्रीमद्भागवतदशमस्कंधमध्यगः षट्सप्ततितमोध्यायस्तोधिणीसारस
ग्रहे १ इति षट्सप्ततितमोध्यायः ७६ स्नातः शाश्वत्वानलः सर्वविधयादवनाशाकृत् तमोधामायनश्चित्रं संहृतः कृष्णतेजसा १ तुशब्दो भिन्नोपक्रमे दंशितः संनद्ध इति मध्ये स्थेनकवचोत्तारणात् १ वि
धमंतक्षपर्यंतं प्रतिहत्यनिरुध्य स्वं विध्यंतं प्रत्यविध्यत् २ अष्टानां विनीयोगमाह चतुर्भिरिति चैत्राप्यर्थे शिरोपीत्यर्थः ३ एवमन्यपि यादवाः स्वस्वविक्रमं दर्शयांचक्रुरित्याह गदेति सौभेयाः सौभस्थाः ५ नवानांरा
त्रीणां समाहारो त्रयाणां नवरात्राणां समाहारः सप्तविंशत्यहोराणीत्यर्थः उल्बणं घोरं ५ अथ भागवतसिद्धांतविरुद्धपरमतमिश्रप्रकरणमेवं वदंतीत्यादिना शंकयितुमुपन्यस्यति इंद्रप्रस्थमित्यादिना युग्मकं राजसूयेथे
स्यत्रचेति पाठः ६ निमित्तानि पथि पश्यन् मुनिवासनिवासे किं घटेतारिद्य दर्शनमिति न्यायेनेदं परमतं तथापि तल्लीलत्वेन दुर्निमित्तोद्भवस्य सुवचत्वान्नविरुद्धं ७ आर्यः श्रीरामः सप्रमिश्रः कृज्यस्तेन संगतः इदं संकर्षण
मनुज्ञाप्येति पूर्वस्योक्तिविरोधात्परं मतं सौभागमनोत्तरं कुरुवृद्धानुज्ञापनपूर्वकं स्वागमनार्थं भागते नार्थमिश्रेण संगतमिति व्याख्यानेतु न विरुद्धं न्हनेहन्युः परीममेति भयचिंताविजृंभितत्वात् भगवतितदसंभवात्स्वरम
तं इदमपि नातीव विरुद्धं भाग घतः पलायनादिवास्तल्लीलावद्भयभक्तचिंतादेरोतरल्लीलाया दामोदरलीलादो निरोधं भगवान्मनोदधे नावसाविष्टाः कृष्णं किमत्रास्यखल्लस्येसा दोच्चदेहत्यात् प्रयोजनं चोद्दर्शांतर
लीलायाः सर्वज्ञव्यासादिवर्णने तं कथात्सल्यादिगुणव्यक्तीभावएवेस्फुटं ८ एवं सोऽज्ञावित दुर्निमित्तदर्शनाकुलचित्ततयैव त्वरया द्वारकामागतस्य वृत्तमाह वीक्ष्येति स्वानां कदनं वीक्ष्य सौभं च शाल्वराजं च वीक्ष्य
पुररक्षणे प्रतिनिरूप्य नियुज्य राममित्यध्याहारः दारुकं सूतमाह ९ वैएवसंभ्रमो भयानुभाव आवेगस्त्वयानकार्यः १० आस्थाय सम्यगधिष्ठाय अरुणानुजे ध्वजस्थं गरुडे ११ हतप्रायबलस्येश्वरः १२ नभस्येवाछिन
न १३ तेच शाल्वेन ब्रहत्वेनेत्यादिना काशसामस्य सोभस्य बहुत्वादिना शाराणां रश्मिसाम्यं अयत्नतः शारजालप्रसारणे न सूर्योपमा भगवतः १४ सव्यं वामं बाहुं दोः शार्ङ्गस्य कौबमपि ककुद्दोषणी इत्यादि भाष्यकारादि
प्रयोगात् शार्ङ्गपानस्तद्वीर्यख्यापनायल्लीलाकृतइति न विरुद्धं १५ जनानां ताहृशा दुष्टानामदर्शनमपि १६ यदीति युग्मकं यत् येन त्वया नः सख्युस्तव भ्रातुः पैतृस्वस्त्रेयस्य शिशुपालस्य इक्षतामस्माकं सनाममध्येन तु यु
द्धे अतः प्रमत्तो नवहितः व्याप्यादितो हृतः अपराजितोहमिति मन्यमानं अपुनरावृत्तिं मृत्युं गीर्दंवीमते हेत्र मूढ नः सख्युः भ्रातुः शिशुपालस्येक्षमाणस्य सतो स्माकं चेक्षतां सतां तच्चास्माभ्यानादृत्येत्यर्थः येन
त्वया भार्या स्वज्ञात्यैव हृता तथा प्रमत्तो दुर्वचनादुन्मत्तचेष्टः नपराजितः केनाप्यनिवृत्तो मानः पूजा स्वात्मनीति तं नास्ति पुनरावृत्तिर्यस्मात्तं त्वा नयामि प्रविशामीत्यर्थः नयगतौ यदि मद्भाग्येनात्रेतिष्ठेः १७ १८ आत्मानं
श्लाघसे मंदनिर्बुद्धे यतोनेति शूरोपिन भवसीत्याहपौरुषमिति स्वितिप्रसिद्धौ १९ सशाल्वः २० गदायामित्यर्धकं निवृत्य भगवद्धस्तंगतायां २१ मुहूर्तं जातेसतीत्यर्थः मुहूर्तादितिक्वचित् पुरुषो वभृत्याका
रः गीर्दंवीमते अप्रहितमिति छेदः २२ महाबाहो हेवीर सोनिकेनेति स्वतो मोचनासामर्थ्यं गीर्दंवीमते अपिनापितृसहृशो मायानिर्मितइत्यर्थः २३ प्रकृतिं स्वभावं विमनस्कः शोकाकुलः घृणीपितरिकृपावान् एतस्य
दृढयं ततो मुहूर्तमिति श्लोकद्वयं च एवं वदंतीत्यादिनादूषयिष्यमाणत्वात्पर मुनिमतं गीर्दंवीतु तत्रापि वास्तवमेव भावयति तदेवंभाति भास्मरीत्याविप्रियं निशम्यापि अमानुषीमेश्वरीप्रकृतिं शोकादिरहित्यभे
वगतः यतः कृष्णः स्वयं भगवान् मायापुरुषोक्तस्य वास्तवार्थं पित्रादिक्षेमं च विद्वानिति भावः किंच विशिष्टं सर्वज्ञं मनो यस्येदृशः कृष्णः लायेनसः केस्कादित्वात्सत्वं तस्मादप्राकृतीतो भक्तस्नेहात् कृपयाय थावदे
वस्वजनोतिकमुवाचेति २५ कथमिति चिंतामयोर्थः स्पष्टः देवीमते एवं भाति कथं नीतोपितुर्नेवनीतः किंच मेपितातापिन नीतइत्यर्थः २ विधिरपि बलवान् मत्सूरतो किंचिल्करइत्यर्थः २५ वसुदेवाकारं केचिदानीयपुनः
समीपेस्थितः २६ जनिताजनयिता ताता पितानतु पोषकत्वादिलक्षणः जीवसीति तदर्थं प्राणत्यागएवोचितइति भावः बालिशामत्र भावानभिज्ञ देवीत्वाह यदर्थमिहास्मिन् मयिजीवसीत्वं प्रकटयसि एषमायाम
यः पुरुषः सतवाजनिता जनकोन अइतिन अर्थकं पृथकू पदं किंतु अनातः तातसहृशमात्रं तस्मादिंद्रजालमिव कौतुकेनत्वयिपश्यति अहं हनिष्यामि किमर्थं तत्राह इशाइति चेदिति निश्चये यदि वेदाः प्रमाणमिति
वत् तथाच भ्रान्ताः संतियेषां ते बालिनो मूर्खपतयस्तान् माहशान् नस्यति क्षिणोतिह तथा मृतत्वं निश्चयेने शास्तस्मान्मां पाहि संसारादुद्धरो ननकौतुकेनप्रसन्नः सन्निति भावः २७ उत्सृज्य इत्याद्येतिपाठो २८ स्वब्रो
धः स्वतसिद्धज्ञानो पिस्वजनस्नेहतः प्रकृतौ मानुषस्वभावे उपप्लुतो मग्न आस्ते अतिष्ठत् अनंतरं तत्सर्वं मासुरीमायाशाल्वप्रसारितां ज्ञातवानिति मुन्यंतराभिप्रेतार्थः गीर्दंवी भाषितस्त्वेवं मुहूर्तव्याप्यव
र्तमानेन ततस्तस्मिन् मायिकदर्शने स्वजनस्य वसुदेवस्य मनस्यनुषंगतः स्मरणेन व्याप्तोति प्रकृतो स्वस्वरूपे स्वबोधे स्वसार्वज्ञे एवास्ते आसीत् न तु शोकादौ यतो महानुभावस्तां मासुरीमायां ज्ञातवान् इत्येति २९
मुहूर्तानंतरं तु तदपि नापश्यदित्याह नेति तत्र हष्टांतः प्रबुद्धः स्वाप्नं प्रपंचं यथेति ३० एवं परमतमिश्रं प्रकरणमुपन्यस्य दूषयति एवमिति केचकेचन नान्विताः स्वोक्तानुसंधानशून्याः तदाह स्ववाक्यस्येव येहि
रुद्धस्यात्तदपि तेनानुस्मरंतीति ३१ विरुद्धांशं विवेचयति क्वेति शोकः विमनस्कपदेन ततो मुहूर्तमित्यादिनाचोक्तः मोहः कथं राममित्यादिनोक्तमज्ञानं घृणीस्नेहादितिस्नेहः भयं वेति भयं चिंतादय इत्यर्थः तेच
मानुषी प्रकृतिमित्यादिना संगृहीताः अखंडितं सदा तनं विज्ञानं स्वरूपविषयं ज्ञानं च बालमैश्वर्यं च सर्वत्रान्वितत्वादिकं यस्य सधोः अखंडितविज्ञानादित्वेन शोकादिमत्वे नच स्वयमेवाकृत्वा स्ववाक्विरोधः अ
नुसंगाजादिति मायापरवस्यकृता इत्यर्थः दामोदरलीलादावुक्ता भयभक्तचिंतादयस्तु स्वछाकृता अनुग्रहमया न विरुद्धाइति भावः ३२ मोहाद्यसंभवं कैमुत्येनोपपादयति यदिति स्यपादसेवया बलिष्टाया आ
 त्मविद्यातया नादिमात्मनः स्वस्वरूपस्यवेपरीत्यम् हमहं कृशोहं दुःखीत्यादिरूपं हिन्वंति नाशयंतिसंत ऐश्वर्यं पदं वत्सभं तेनास्य सतो गतेः कुतोनु अहोमोहः अज्ञानादिकं अतो नैतद्वचनं सत्यमित्यर्थः नचगीर्दे
वीमतत्वेनोक्तोर्थएव भपीणामप्यनिप्रेतोनुग्रहमयाबाभयादयस्तेरुक्ता इतिन तेदूषणार्हाइतिवाच्यं तेषां तथोक्तौ बीजाभावात् छलत्वापत्या पत्यासर्वज्ञाचार्यैर्दूषणानुपपत्तेश्च तस्मादर्थांतरवर्ण
 नेन दूषणपरिहार एवासदुत्तरमितिविभावनीयं ३३ एवं पूर्वप्रकरणं संशोध्य केवलस्वमतमुत्तरप्रकरणमाह तमिति वर्मे कवचे रुरोजवभंज हहर्षे ३४ तसौभं तौ येसामुद्रे ३५ प्रलयकालसूर्यसह क्षेपः

शमिति ते ज्ञोविशेषव्यक्तिः २६ बहुमायायुतस्यापि जहारच्छित्वास्वसेनिकाग्रे विचकर्ष हाहेत्यद्भुतं २७ नितरां पतिते मृते द्रस्य पुनरुत्थानं हते नाशिते २८ सखीनामित्यर्धकं अपचितिं प्रत्युपकारं कुर्वन्त देवाभ्यगा
त् ३० इति श्रीमद्भागवते दशमस्कंधे मध्यगः सप्तसप्ततितमस्तोषिणी सारसंग्रहे १ इति सप्तसप्ततितमोध्यायः ७७ पौंड्रकचेदिपशाल्वैः कृष्णस्यापि त्रिवर्णिताः तेति मत्वैव दंतवक्रोभ्यगात्स्वतुर्थवर्णिता
प्रयेकृष्णं १ सखीनामपचितिमित्यर्क्तं विवृण्वन् तदेवाह शिशुपालस्येति युग्मकं परोक्षे करणीयं संस्कृतं कृत्यं १ महासत्वो महाकायो भगवताव्यहस्यत २ रथादवप्लुत्येति प्रतियोधस्य पदातित्वात् प्रत्यधातु रुरोध ३
दुर्मद इति युद्धोत्साहवर्धनाय बहिरिदं छिप्रतीत्याधिक्षेपोक्तेः परमार्थस्तु दुर्मदो दुर्गतमदो मुकुंदेत्ततीये जन्मनि मुक्तिं दातुमागतं तस्माप्तिहर्षेणाह भवानं तेस्मृतिमात्रेण मुक्तिदः सोद्य श्रवणमात्रापावसानेस्मिन् दिने दृष्टि
पथं प्राप्तः एतत् तदं तदं अतिहर्षेण वीप्सा ४ किंच हे कृष्ण त्वं नोस्माकं मातुः ८ श्रुतदेवायाः भ्रातुःपुत्रत्वान्मातुलेयो ना मित्रध्रुक् चासावहं च तं मित्रध्रुग्जिघांससि हंतुं गंतुं स्वीकर्तुमिच्छसीति यावत् अतः हे अ
मंद बज्रकल्पयाहीरकवत् ६ ७ या तास्वर याच गदया त्वदीयपाकोमोदक्या हेतुना त्वांहनिष्ये प्राप्स्यामि आधिक्षेपार्थः स्पष्ट एव ५ अज्ञानास्तिशोपसाभ्रेस्सर्वज्ञेत्यर्थः तर्हि त्वकृदाघाते सति एतद्देहसंबंधेन बंधरूपं ब्रह्मज्ञाप
दर्शज्ञातुत्वेनभातं परमार्थतस्तु व्याधिविगत आधिर्येन तं देहचरमं तर्यामिणं त्वां यथायथा वद्धत्वा ज्ञात्वा मित्राणां तदुपलक्षितपित्रादीनां चानृण्यमुपेष्यामि देवर्षिभूतात्मनृणां पितॄणां न किंकरो नायमृणी चेत्युक्तेः
मित्रान्नृण्यं च ममावश्यकमित्याशयेनाह मित्रवत्सलत्वदिति भाष्यार्थः स्पष्टः ६ रुक्षेस्तु दं निति भोत्स्वार्थ दृष्ट्या तोत्रैरंकुशादिभिः ७ स्वस्थानान्न चचाल ८ केशाब्जार्कछीनीत्येकत्वाभाव आर्षः ९ ततस्तद्देहात् स्व
क्ष्मतरमिंद्रियाग्रात्यं अतोद्भुतं लोकातीतं १० तस्य दंतवक्रस्य भ्राता तज्जिघांसया तत्प्राप्तीच्छया ११ आपततो वेगेनागच्छत एव १२ एवमिति त्रिकं अन्यैः श्रीकृष्णेतरैः दुर्विषहान् दुःसहविक्रमान् १३ मुन्यादिभि
रुपगीयमानशाल्वादिवधविजयः १४ कृष्णप्रवरैः शाल्वयुद्धार्थमागतैः प्रद्युम्नादिभिस्तद्वधोत्तरमागते रुग्मसेनाद्येश्च वृतः अत्र पाद्मोत्तरखंडे विशेषः तथाहि तत्रत्यगद्यानि अथ शिशुपालं निहतं श्रुत्वा दंत
वक्रः कृष्णेन योद्धुं मथुरामाजगाम कृष्णस्तु तच्छ्रुत्वा रथमारुह्य मथुरामाययावित्यादि तदविरोधायात्रैवं व्याख्येयं पूर्वमेव पौंड्रकवधं श्रुत्वानंतरं शिशुपालहतं निशाम्यैवातिरुषा सर्वसैन्यैः शक्रप्रस्थमुद्दिश्य च
लितो नारदेनासंख्यात यादवसैन्ययुतद्वारकागत श्रीकृष्णकृतशाल्ववधं बोधितः परावृत्य तेनैकाकिना गदया द्वंद्वयुद्धं चिकीर्षुस्तत्प्रियपुरीं मथुरां उपद्रावयितुं तत्रैव तदाकानेच्छया ययौ तच्छ्रुत्वा भगवानेका
किरथमारुह्य तदैव मथुरां गत्वा तं सानुजं हतवानिति अन्योपि तत्र विशेषः कृष्णोपि तं हत्वा यमुनामुत्तीर्य नंदव्रजं गत्वा सोत्कंठौ पितरावभिवाद्याश्वास्य तत्र स्यकाल्लिंद्याः पुलिने रम्ये पुण्यवृक्षसमाचिते गो
पनारीभिरहर्निशं क्रीडयामास माधव इति इदं पुनर्व्रजागमनं श्रीभागवतसंमतमेव आयास्य इति दौत्यकैः ज्ञातीन्वो द्रष्टुमेष्यामो आगमिष्यत्यदीर्घेणेत्यादेस्तथाव्यंजनात् अन्यथा सत्यसंकल्पत्वादेरीश्व
राणां वचः सत्यमित्यादेश्च बाधापत्तिः अतएव सलद्दपि प्रतिज्ञातं कुब्जाक्रूरगृहागमनं संपादितं प्रथमस्कंधे च स्पष्टमेवोक्तं कुरून्मधून्वाथ सुहृद्दिदृक्षयेति मधून् मथुरां सुहृदो व्रजस्थान् एवेति व्याख्यानेकृतां स्वा स्कृतत्
म मिनोपि संमत एव न च वक्ष्यमाणसूर्योपरागयात्रायां स्वानामर्थे चिकीर्षया गतोश्चिरायितानित्यादिना व्रजानागमनोक्तिर्विरुध्येतेति वाच्यं तद्यात्राया दंतवक्त्रवधपूर्वकालिकत्वात् तत्रत्वेवं क्रमः कंस
वधोत्तरं नरकवधांते त्वेरेव संवत्सरैः सूर्योपरागयात्रा ततो राजसूयसभा ततः पांडवानां द्यूतवनगमने तद्देवेतः शाल्वदंतवक्त्रवधव्रजगमनानि तेषु वनाद्यागतेषु रामतीर्थयात्रादिकमिति एतत्त्वेव पुन
स्थानं देवेनासादिताः स्वसरिति वसुदेवोक्तिस्वरसात् प्रथमदर्शन एव द्रौपद्या रुक्मिण्यादिविवाहप्रश्नौचित्यस्वारस्यात् तत्र भीष्माद्यागमनोत्या रामतीर्थयात्रोत्तरत्वात् सेतवेन श्रुतक्रमभंगावश्यकत्वाच्च
अनंतरं च बहुप्रेमरसेनात्र मासद्वयमुवासेहत्या युक्त्वा कृष्णस्कनंदगोपव्रजौकसां सर्वेषां परमनिरामयं स्वपदं दत्वा दिवि देवगणैः संस्तूयमानो द्वारवतीं विवेशेत्युक्तं अत्र निरामयं पुनर्विरहदुःखरहि
तं स्वदं स्वस्वरूपं देवादिभिरण्यदृश्यमानं व्रजजनानामेव सदा प्रकाशमानं तद्द्वारं विधाय मूर्त्यंतरेण द्वारकां विविशेत्यर्थः स्वागमनप्रतीक्षया बहिरेव स्थितैर्यदुश्रेष्ठैर्वृतः सन्निति शेषः वृतश्चेत्कृष्णप्रव
रैरित्युक्तत्वात् अत्र वाक्यांतरविरोधसमाधानं विगाढभावेन न मे वियोगस्यादिपद्यानां व्याख्या चेत्यादि बहुविस्तरस्तोषिण्यां द्रष्टव्यः सारसंग्रहप्रतिज्ञाभंगभिया तु नेह संगृहीतः १५ एवं स भगवतः स
र्वविजयमुक्त्वा कदाचित्सराजयोपि जातस्यादिति संभावयमानिदती एवमिति एवं श्रीकृष्णः सर्वदा महाबलानपि जयत्येव कदाचिन्निर्जितोपि स्यादिति तु पशुदृष्टीनामेव यते प्रतीयते न त्वन्येषां पराजयाभावे हेत
वः योगेश्वरो भगवान् जगदीश्वर इति १६ अथ क्रमप्राप्तं रामकृतं सूतवल्वलवधं वक्तुं तत्प्रसंगमाह श्रुत्वेति वनवासादागतैः पांडवैः सह मध्यस्थः उभयपक्षाग्रहरहितः प्रययौ द्वारकातः प्रतस्थे १७ ब्राह्म
णसंवृत इति निर्विंदोभ्यज्यते १८ पृथ्वीति युग्मकं पृथूदकं यत्र पृथुनाश्वमेधशाते नेष्टं तत् कुरुक्षेत्रवर्ति बिंदुसरः कर्दमाश्रमं गुर्जरदेशे त्रितकूपं सरस्वत्यंतरवर्ति त्रितऋषेस्तीर्थं सुदर्शनं नाम तत्रैव वर्ती
र्थ विशालं सरस्वत्यंतर्वर्तितीर्थं विशालामिति पाठे अवंती ब्रह्मतीर्थं चक्रतीर्थं सरस्वत्यामेव प्राचीसरस्वती कुरुक्षेत्रवर्तिनी इदं तीर्थसंग्रहमोत्र न मार्गक्रमः १९ यमुनामनुयानि तीर्थानि गंगामनु च यानि
नितानि सर्वाणि गत्वा नैमिषारण्यं जगाम २० अभिप्रेत्य श्रीरा इति ज्ञात्वा स्वाय प्रणम्य स्वागतादिनाभिनंद्य च यथान्यायमार्चयन् २१ महर्षेर्व्यासस्य शिष्यमित्यविनया योग्यत्वं २२ आदावप्रत्युत्थायिनं
तत्र च न कृतं प्रह्वणमंजलिश्चयेन तत्रापि विप्रानधि उच्चत्वेनासीनं सूतं प्रतिलोमजमित्युक्तरोत्तरं विसमयातिशयाय २३ कस्मादिति युग्मकं इमान्यत्तपरान् दुर्मतिरयं कस्माद्धेतोनेकस्मादपि किं तु दुर्मति
त्वादेवेत्यर्थः २४ न चेदमज्ञानादित्याह ऋषेरिति २५ ननु तर्हि बहुज्ञः कथं विरुद्धमाचरेत्तत्राह अदांतस्येति अनियतेंद्रियस्य अजितात्मनोऽजितचित्तस्य अतो वृथापंडितमानिनः गुणयोपशमादिफला
यन भवंति इतिहासादिसंहितानि धर्मशास्त्राणीत्यनुषंगः २६ विप्रान व्यासामन्य द्वारकरोतु किंचित्तवकिंतेनेतिचेत्तत्राह एतदर्थमिति धर्मध्वजिनो धर्मत्वेष्यत्तु मत्लिंगधारिणः २७ तीर्थयात्राया मसह्यचान्निवृत्तोप्यहन्,
तथैव मृत्योर्नाभिलात् कुशाग्रेण कथमवधीत्तत्राह प्राहुरिति २८ हे प्रभो इति सविनयं संबोध्य यतः संकर्षण देवं तेत्वया अधर्मः पापं वस्तुतो नास्ति धर्मो यस्मात्स परमधर्म इत्यर्थः २९ सूतस्य धर्मध्वजिनो वधे
को दोषस्तत्राहुः अस्येति पुराणप्रवचनाय ब्रह्मासनमात्मनः शरीरस्य न क्लमो यत्र तदायुश्च दत्तं ३० अजानतेव त्वया ब्रह्मवध इवाचरितो न साक्षाद्ब्रह्मवधः किंच योगेश्वरस्येति आम्नाया ब्राह्मणा न हंतव्य
इत्यादिरूपः ३१ तथापि यदिति ईश्वरत्वादन्येनाप्रेरितः स्वयमेव भवान् यदि करिष्यति तर्हि लोकसंग्रहो भविष्यति ३२ वधस्य प्रायश्चित्तं प्रथमे कल्पे मुख्यपक्षे नियमो व्रतमुपदिश्यतां ३३ किंच हे मुनयः एत
स्य सूतस्य दीर्घमायुः सत्वं बलं इंद्रियं तत्पाटवमन्यच्च यद्भवद्भिराशासितं तद्भूतं सर्वं साधयिष्ये ३४ यथास्मादीनां सत्यता भवेत् त्वदीयानामस्माकं च वचः सत्यं यथा भवेत्तथा विधीयतां हे राम इति ते नैव सर्वे

रमणता सिद्धेदिति भावः ३५ तदेवं संपादयति आत्मेति पुत्ररूपेणात्मा स्वयमेवोत्पन्न इत्यर्थः तज्जायाजाया तद्भवति यदस्यां जायते पुनः आत्मा वै पुत्रनामासीत्यादिकं वेदवचनं वै प्रसिद्धमित्यर्थः तस्माद्दस्य रोमहर्षणेः पु
त्र उग्रश्रवाः पुराणप्रवक्ता भवेत् सआयुरादिमांश्च भवेत् ३६ प्रथमं ब्रह्मवधदंडस्थानीयं किंचित्कुर्वित्याह किमिति किंविषयकः कामस्तद्भूतः अथानंतरमपचितिं प्रायश्चित्तमजानतो मे इति नरलीलानुकरणात् यथा
वच्चिंत्यतामपचितिर्निश्चार्यतामित्यर्थः ३७ प्रथममपेक्षितकृत्यमाहुः इल्वलस्येति द्वाभ्यां पर्वणीति वीप्सया सर्वपर्वस्वागमनं ३८ हे दाशार्ह धर्मपालनार्थं तद्दृशावतीर्ण ३९ प्रायश्चित्तमाहुः ततश्चेति परीत्य प्रदक्षि
णीकृत्य द्वादशमासान् कृच्छ्राणि चरित्वा द्वादशानिति चित्सुखपाठः विशुध्यसे शुद्धकीर्तिर्भविष्यसि वस्तुतस्त्वंतर्गतं व्यर्थः विशोधयसि शुद्धयत्रासापावयिष्यसीत्यर्थः एकाग्र्य्वं तंस्तस्य ब्रह्मासनमहिम्ना ब्रह्मतुल्यत्वे
पि मुख्यब्राह्मणत्वाभावादन्यथा द्वादशाब्दं वक्तव्यं स्यादिति भाति ४० इति श्रीमद्भागवतदशमस्कंधटिप्पितः सहाष्टसप्ततितमस्तोषिणीसारसंग्रहे १ इति अष्टसप्ततितमोध्यायः ७८ अथ श्रीरामो बल्वलं
हत्वा द्विजोक्तं प्रायश्चित्तं चचारेत्याह ततइत्यध्यायेन ततस्तु इत्यन्वयः उपावृत्ते प्राप्ते १ ततो वायोरनंतरं अमेध्यं पूयादि अनु तस्य अभ्याद्दृश्यत २ तमिति युग्मकं भिन्नो विदीर्णो अंजनादिरूपमायस्य अतिकृष्णत्वा
त् दंष्ट्राभिरुग्रं भ्रुकुटीयुतं मुखं यस्य ३ स्मरणे हलपरेति हेत्येतिच ४ तयोः स्मरणं किमर्थं तदाह तमिति ५ वज्रहतो वज्राहतइति पाठो अरुणोऽस्रजा शैलस्तु धातुभिः ६ वृत्रघ्नमिति वृत्रवधांते देवा यथेत्यर्थः ७
श्रियो धामानि दिव्यानि अतो नम्लानानि पंकजानि यस्यां ८ तैः सत्रस्थमुनिभिः ब्राह्मणैः स्वसंगागतैः सह यतः सरयूरुदगात् तस्याः सरोवरं ९ सरयुमनुस्रोतेन सरय्वा अनुलोम्येन पुलहाश्रमं हरिक्षेत्रं १० गोमतीमिति सार्धयुग
कं गोमत्यादि स्नात्वेत्यर्थः गयायां पितॄन्निष्ट्वेति पितृपितामहयोः सत्त्वात्प्रपितामहादिपितृश्राद्धानि कृत्वेत्यर्थः गङ्गोतीर्थे च समन्यतस्तीनातीति पतितेसति एभ्यएव पितादद्यात् तेभ्यो दद्यात् स्वयंस्कृत इति स्मृतेः ११ गंगासाग
रसंगमे उपस्पृश्य स्नात्वा रामं जामदग्न्यं सप्तगोदावरमिति पाठः अन्नं तपाठस्त्वार्षः वेणां भीमरथ्यां नदीं पंपाख्यं सरः १२ द्रविडेष्विति सार्धयुग्मकं प्रभुस्तत्र तत्रोचितकृत्येसमर्थः कांचीपुरी १३ श्रीरंगाख्यं क्षेत्रं यत्र हरिः
श्रीरंगशायीमूर्त्या संनिहितः दर्शनमात्रान्महापातकनाशनं १४ अर्धकं तत्रेति ब्राह्मणेभ्यः स्वत्रस्वन्यः १५ कृतेति युग्मकं गतइति परेणान्वयः प्रथमं सामान्यतो नमस्कृत्य पश्चाद्बुद्धिपूर्वकमभिवाद्येत्यर्थः १६ अ
गस्त्येनानुज्ञातो दक्षिणमर्णवं गतः १७ फाल्गुनमनंतपुरं पंचाप्सरसं च तीर्थमासाद्य गवायुतमस्पर्शदस्पृशद्दौ १८ ततइति सार्धकं दीपमयनं यस्यास्तां १९ अथानंतरं श्रीप्रमेव प्रविश्य दंडकं दंडकानीति पाठो २०
मनुतीर्थमित्यर्धकं २१ हतं श्रीकृष्णेनेति शेषः २२ अतएवावशिष्टं निधने वारयिष्यन् मध्येयुद्धाद् भो यदुनंदन इति द्वारकामागत्य यदून्हर्षयित्वा जगामेति भावः २३ सर्वक्षत्रियांतकरणेन रामसंकोचात्सभ्यात्
स्थितो कृष्णार्जुनावपि किं वक्तुमागत इति वितर्क्येति शेषः २४ संरब्धौ क्रुद्धावेतौ नमस्कृतवंतावितिभावः २५ बलेयुद्धसामर्थ्ये हे राजन्निति शिष्ये दुर्योधने स्नेहविशेषात् यद्वा राज्यभोगार्थं युद्धं त्यजेति भावः
भीमं प्राणेन बलेनाधिकं दुर्योधनं युद्धविद्ययाधिकं श्लेषेण प्राणादप्यधिकं शिक्षया शिष्यतयाधिकं प्रियेवेष्टि २६ समसामर्थ्ययोः अन्यः पराजयः २७ अर्थवत् फलितं मदपि २८ ततयुद्धं दिष्टं श्रीकृष्णेना
दिष्टं प्रवर्तितं २९ प्रकर्षेण यत्नेच्छया यत्नोन्वितसंपत्त्याचाप्तमागतं ऋतवो गेषु यस्य यद्वाक्रतोरंगानि सांगता यस्मात् यत्नो मोच्चारणादिना क्रतुः सांगस्तमप्ययाजयन्नित्यर्थः ३० विज्ञानमनुभवं व्यतरद्ददात्
येनज्ञानेन विश्वं जडं चेतनात्मकमात्मनि सर्वाधिष्ठाने बिंबे परमात्मनि विदुर्जानंति तं च विश्वव्यापिनं जानंति ३१ संबंधिनः कोशलाराजादयो बांधवः सुहृदो मैथिलाद्याः ३२ ईदृक् विधानि विक्रमवंतिच अद्भुतानि कर्माणी
ति शेषः यतो बलशालिनो प्रमेयस्यातर्क्यमहिम्नः ९ असंख्यत्वेहेतुरनंतस्येति मायामनुष्योस्येति मध्वराणीति भावः ३३ रामलीलावर्णनमवश्योपादेयं इत्याह यइति स्मरेत्संस्मरेत् विर्भोः श्रीकृष्णस्य दयापात्रं स्यात् अद्भु
तेति श्रीकृष्णेच्छाविरुद्धानि दुर्योधनानुग्रहादीन्यपि तल्लीलाकौतुकार्थानि तत्सुखकराण्येवेति भावः यतोनंतस्य गभीरशायस्य ३४ इति श्रीमद्भागवतदशमस्कंध मध्यगः ऊनाशीतितमोध्यायस्तोषिणीसारसंग्रहे १
इति भागवते दशमे उत्तरार्धे एकोनाशीतितमोऽध्यायः ७९ कथासमाप्तिमिवालक्ष्य श्रीदामसत्काराद्यशेषकथाः श्रोतुं सोत्कंठो राजोवाच भगवन्निति सर्वदुःखमोचकस्योत्तमस्वभावस्य प्रभावान् श्रोतुमिच्छामव
यं प्रार्थनायां लोट् नच वीर्याणां समाप्तिः यतोनंतवीर्यस्य कनेसामर्थ्यं सूचयति हे प्रभोइति १ ननु त्वया बहूनि तद्वीर्याणि श्रुतानि तत्राह कइति उत्तमश्लोकमसिय अज्ञानदुःखं यस्मात्ताहृशः श्लोको यस्य तस्य सतीः श्रे
ष्ठाः कथाः अतोऽसकृदपि श्रुत्वा को नु पुमान् तृप्तो विरमेत् न कोपीत्यर्थः ननु विरमताद्दस्यं नेतत्राह विशेषतः माहात्म्यमाधुर्याख्यौ विशेषावनुभवन् क्षणक्षणप्राप्तविषादध्वंसार्थमपि विरामोनयुक्त इत्या
ह विषण्ण इति कामस्य विषय भोगस्य मार्गेणोरन्वेषणैः श्लेषेण कामं जाणैर्विषादं प्राप्तः २ अन्यथा श्रोत्र वैयर्थ्यमिति व्यंजयितुमन्येषामपींद्रियाणां तथात्वं दृष्टांतयति सेति ययेति करणत्वेन कर्त्रधीनत्वं
निर्दिश्य तत्रापरितुष्यन् सर्वेंद्रियाणां भगवति स्वतः प्रवृत्तिरेव श्रेयसीति ज्ञापयितुं करादीनि कर्तृत्वेनैव निर्दिशति तत्कर्मकरावित्यादीना तदेव मनोयत्स्थिरजंगमेषु वसंतं स्मरेत् कर्णस्यत्वानेंद्रियत्वात् ज्ञानस्ये
चेकेनापि सिद्धेर्न करवद्धि योक्तिः एवमग्रेऽपि ३ उत्तमयलिंगंतस्प्रतिमादिरूपं तत्कृतकरुपंच तस्य स्पर्शादिना नमेत् तदेव पश्यति नान्यत् तद्धि तदेव अंगानि नाभेरूर्ध्वानि अधोधारणनिषेधात् भजंति
अंघ्री धारयंति नित्यमित्यस्य सर्वैः सर्वैरप्यन्वयः मम नत्वदभावेन नागादीनितुव्यर्थान्यभूवन् स्वस्प्रसादाद्धोंत्रेंद्रियमेवसार्थकं भवतीति भावः ४ विद्मु सतेनत्त तदनुग्रहस्य स्थाद्दीप्तप्रेम्णोत्यर्थः
सोऽकंठ पृष्टो भगवतत्वतत्तया सर्वज्ञो वेदांतसारज्ञो व्यासपुत्रस्तत्प्रश्नेन वसुदेवसुते कारुण्यादिगुणाकरे निमग्नमना आसन्नब्रवीत् तस्य कृपामयीं कांचित्कथां सच्चीवाचेत्यर्थः ५ कृष्णस्येति
युग्मकं चित्ताकर्षकगुणनिधेः कश्चिदेकः श्रीदामनामा वेदार्थविदांश्रेष्ठो भक्तिनिष्ठत्वात् अतोविषयेषु विरक्तः यतः कामादिक्षोभरहितचित्तः तत्कुतः जितेंद्रियः ६ प्रयत्नं विनासमीपलब्धेना
र्थेन वृत्तिं कल्पयन् कुचेलस्य जीर्णक्षुद्रवस्त्रस्य भार्या तथाविधा ताहृशगुणक्षुत्क्षामा किंचित्संपन्नमन्नं पत्यादिभ्यः परिविष्य स्वयं क्षुत्कृशासीत् ७ पतिव्रतानात्तो भर्तुर्भोगसंपादनाशक्त्या
शुष्यता मुखेनोपलक्षिता अवसीदंतिच याचनायां प्रेरणास्पतिःभयेनकंपमाना ८ भगवतः पूज्यस्य भवतः साक्षात्सखा रमापतिर्लक्ष्म्याः पतिः ननु ताहशं ब्राह्मण्यं मयि कुतस्तत्राह शरण्यश्चेति
तमितिसार्धकं उपेहि समीपे गच्छ ननु योग्यवेषादित्वाज्जिहेमि बिभेमि च तत्राह साधूनां परमाश्रयमिति लज्जादिना तदनाश्रयणं सतामयुक्तमिति भावः ननुनाहं साधुस्तत्राह हे महाभागेति
असाधुत्वे कथं तेन सह सख्यभाग्यमिति भावः अतोप्रार्थितएवते भूरिधनं दास्यति किं च दारिद्र्येण सीदते कुटुंबिनेचेति दानपात्रता ननुसइंद्रप्रस्थादौगतः स्यात्तावद्दूरं गंतुमशक्तोहं तत्राह

आस्ते इति भोजादीनामीश्वर इति तस्यैव कारमात्रेण ते पीदास्यंतीति भावः यद्वा भोजादय ईश्वराः श्रीमंतो यस्मात् तत्दर्शनादेव सर्वसंपत्तिरिति भावः १० तथाप्ययोग्याय भूरिन दास्यति तत्राह स्मरत इति चतुर्थ्यर्थे ष
ष्ठेयो चिंतनमात्रपरायापि आत्मानं सर्वेत्र्यामपि ददाति भजतः श्रवणाद्यशेषभक्तिपरायार्थान् कामांश्च यच्छतीति किमुताच्यमित्यर्थः सख्येतु भूयं किमुततरामिति भावः अर्थादीनां न्यूनत्वे हेतुः परिणति दैरस्येनान
नीष्यानिति तर्हि नदास्यत्येव तत्राह जगतो गुरुः पितेति पिता यथा बाल्नकेच्छया तुच्छं क्रीडनकादिकमपि दत्ते पश्चाद्रत्नहारादिकमपि तथेति भावः ११ स इति सार्धकं विशेषेण प्रातिकामं पूरयन्तीति विप्रः तत्रा
पिभार्यया एवं भूरिद्रविणलाभाशया येन प्रार्थितस्तत्रापि बहुशो बहुयुक्तिभिः स्तत्रापि मुहुः प्रार्थितः स्मृद्धिति पाठांतरं तथापि अयं हीत्यादि मनसापि संचिंत्य गमनाय मतिं दधे १२ अपीत्यर्धकं दीयतामित्यवाचेति
शेषः १३ चतुर इति तावतैव चतुर्वर्गसिद्धेर्न्यूनाधिकतायां प्रयोजनाभावात् १४ सोपिता नेवादाय अन्यासद्भावात् १५ त्रीणीत्यर्धकं गुल्मानि नवद्विपं नवरथं सप्तविंशति सप्तिकं गुल्मं तत्रैः स्मृतं पंचत्वारिंशा
स्पदातिकमित्यक्ष संख्याकानि स्थानत्रयेर क्षार्थस्थापितसैन्यानि कक्षाः प्रतोली रतीयायातिक्रम्य जगाम स सुदामा १६ विप्र इति सार्धकं अच्युतस्यैव ब्रह्मण्यतादिधर्मो येषां तेषामागम्या नो दुर्गमाना मंधकानां च
हर्मीनां च गृहेषु तथा हरेर्षोडशसहस्राणां महिषीणां च गृहेषु मध्ये श्रीमदेकां तमं श्रीरुक्मिणीगृहं विवेश तदा च स द्विजो ब्रह्मानंदं गतो यथा तथा बभूवेति शेषः तदन्यसर्वविस्मरणात्रो दृष्टांतस्तेनोपेत दानं
दस्याधिक्यात् वाक्यभेदेनान्वयाद्वि प्रद्विजपदयोर्न पुनरुक्तिरिति भाति १७ प्रियायाः पर्यंकमाश्रितोपि व्याश्रित इति चिह्नरवः पर्यंकगृहीदाल्लिंलिंग १८ सख्युसहविहारिणा स्तत्रापि प्रेमविशेषास्पदस्य
किंच विप्रश्चासो ऋषीर्णानीचनिर्वृत्ति रानंदः प्रीतिः स्नेह इति भेदः अपाक्षिंद्रू नानंदाश्रूणि १९ सार्धकं अथेति चिरात्लिंगनोत्तरं भक्त्यादिनानुपविशंते बत्नादुपवेश्य समर्हणमुपायनं समभ्यस्वस्वयमे
वावनिज्य भगवानपि लोकपावनोप्यपोग्रहीत् २० व्यलिंपदित्यर्धकं सहैव च्छेद्धे श्चंदनादिभिर्येदिव्यगंधः सुगंधिद्रव्यविशेषस्तेन २१ धूपेरित्यतः पूर्वं पुष्पाण्युद्यानि अतमधुपर्कपूजोत्तरं स्नपनपूर्व
कंपरमान्नादि भोजनं ज्ञेयं २२ कुचैलमिति वस्त्राप्रदानेव्यज्यते मलिनं विवर्णं तादृशाशीलाद्यभावदुःखात् धमनिभीः शिराभिर्व्याप्तं साक्षाद्देवीमुख्या पट्टमहिषी रुक्मिणी शोभ्येति पाठे तस्या रुक्मिणीगृहा
गतत्वं कत्व्यं २३ अवधूतं मलिनं श्रीवत्सलोमनसानाजितं २४ विस्मयमाह किमिति द्वाभ्यां भिक्षुणायाचकेनातीत्लोके निंद्येनात अश्वनिकृष्टेनेति पुण्येनाप्ययोग्यता २५ ब्रह्मादिपूज्येनापि लक्ष्मीनिवासेनापि सं
भृतः संमानितः संमत इति केचित् आस्तो समानं नं परिषंगेत्वीदृशानाईस्येवेत्याशयेनाह श्रियं रुक्मिणीं हित्वालिंगितः प्रियामिति केचित् यथाग्रज इव स्वादरस्नेहो २६ अतः पूर्वजनविस्मयापनोदाय मिथः स
ख्यसुखाय च हस्तग्रहपूर्वकं पूर्ववार्ता द्विजेन सह चकारेत्याह कथयां चक्रतुरिति द्विवचनानुरोधेन मध्ये मध्ये प्रत्युत्तरानुवादाभ्युपगमादिरूपं विप्रवाक्यमनुसंधेयं आत्मनो गाथावार्ताः १ कुले गृहे सतोर्न
सतोः गुरुगृहीत्वा २७ एवं मध्ये मध्ये विप्रोक्तावपि श्रीभगवानुवाचेति प्राचुर्याभिप्रायेण अपि प्रश्ने लब्धदक्षिणात्वादेः सर्वस्यापि प्रश्नो ज्ञेयः गुरुकुलेलब्धदक्षिणं न वा त्वया समावृत्तं न वा भार्योढा न वा
सदृशीन वेति भावः समावर्तन भार्यापरिग्रहाद्यौपकुर्वाण धर्मेत्र २८ अप्रतिषेधाद्दाहाभ्युपगमं ज्ञात्वाह प्राय इति तर्हि ते चित्तं कामैर्विहतं नेति मया विदितं कुतस्तत्राह तथा हि धनेषु वस्त्रादिषु नैवातिप्रीयसे
हे विद्वन्निति विद्वत्वोचितमेवेदमिति भावः अनेन याचने च्छाशिथिलता तत्रापि प्रायः पदाभ्यां भोगवासनासत्त्वं सूचयित्वा तच्छांत्यर्थं कान् भोगान् दास्यामीत्याश्वसितं च २९ अकामहतत्वे किं गृहे हि धर्मक्लेशः स्तत्रा
ह केचिदिति केचित् कामैरहतचेतसोपि कुर्वंति केचित्तु दैवीर्दैवमायोत्थाः प्रकृतीः कामवासनास्त्यक्तुं कुर्वंति आद्यपक्षं स्वदृष्टांतेन संभावयति यथेति लोकस्य संग्रहो येन तादृशं यथा स्यात्तथा हमीश्वरो
पि कर्माणि करोमि तद्वत् ३० तदनुमोदनमात्रस्य सख्ये हेतुः पूर्वकथाः कथयिष्यन् गुरुतत्सेवामाहात्म्यमाह कच्चिदिति चतुर्भिः नौ आवयोर्वासं विज्ञाय यो नु भूयतमसः अज्ञानदुःखमयप्रपंचस्य पारं वेत्ति कुत
लोके ३१ उत्तरोत्तरपूज्यत्वं वदन् त्रीन् गुरूनाह सवा इति इह संसारे यत्र संभवो जन्म स पिता आद्यो प्रथमो गुरुः पूज्यः द्विजातेः सतः सत्कर्मणां यत्र यन्निमित्तं संभवः स उपनीय वेदाध्यापको द्वितीयो गुरुर्यथा
हमीश्वरोस्तथा पूज्यः आश्रमिणां सर्वेषामपि ज्ञानदो मत्तश्चोपदेशकः सन् साक्षादहं वे अहमेव ३२ तस्मात् ज्ञानप्रद गुरुरूपमदाश्रयेणैव संसारस्तरणीय इत्याह नन्विति ते वर्णाश्रमवतां मध्येर्थकोविदा ननु
निश्चये इह वर्णाश्रमवत्त्वे सति ये गुरुरूपेण मयोपदेशाद्वा चाद्युपदेशमार्गेणैव भवसागरं सुखेन तरंति ३३ किंच गुरुभजनं सर्वधर्माधिकमित्याह नेति इज्यया गृहधर्मेण प्रजातिरुपनयनं तदुपल
क्षितब्रह्मचारीधर्मेण तपसा वनस्थधर्मेणोपशमेन यतिधर्मेणैतैः समुच्चितैरप्यहं तथा न तुष्टोयं यथा सर्वभूतात्मा व्येकया गुरुशुश्रूषयेति ३४ एवं गुरुसेवामाहात्म्यमुक्त्वा लोकशिक्षार्थं तत्प्रकारं द
र्शयन् स हैव दुःखप्राप्त्यादिना सख्यविशेषं व्यंजयति अपीत्यादिना गुरुगृहे निवसतामस्माकं बहुत्वे रामापेक्षया कदाचित् यत् किमपि वृत्तं तत्किं त्वया स्मर्यते ब्रह्मन्नित्यादि मुहुः संबोधनैर्लज्जादिकं निरस्यन्
हर्षयामि ३५ प्रविष्टानां प्रविष्टे ध्रुवमास सत्सु अपर्तावकाले वातश्च वर्षं चाभूत् तीव्राः सगर्जितविद्युतामाश्याभवन् ३६ निम्नं नीचस्थानं कुलमुन्नतं किंचिदपि सम्यक् न ज्ञातमस्माभिः यतो जलमयं ३७ अंब
भोसंप्लवो भिश्रणं यत्र तस्मिंस्तत्र वने परितो भ्रमिमवात्रामि [illegible] मा त्मामयते श्चिलोपरस्पार्थः ३८ एतदस्म दुःखं वितर्क्य गुरुमर्हानपि ३९ उवाच च श्लोकत्रयमत्राह अहो इति आत्मा देहः प्रेष्ठस्तमप्यनादृ
त्य ४० निःकृतं प्रत्युपकारः सर्वे अर्थाय स्मात्स आत्मा देहस्तस्यार्पणं विनियोगः ४१ अयातयामानि अजीर्णानि अविस्मृतानि जीर्णं च परिभुक्तं च यातयाममित्यमरः ४२ इत्थमित्यर्धकं अनेकानि ब
त्तानि किं स्मर्यत इति शेषः गुरोरित्यर्धकं सर्वकामपूर्णः प्रशांतये मोक्षसुखाय च भवति ४३ संक्षेपतः सर्वोत्तरमाह किमिति द्वाभ्यां अस्माभिर्हेतुभिः किमनिर्वृत्तं भवता पृष्टमपृष्टं सर्वं मे नास्माकं स
पन्नमित्यर्थः येषामस्माकं भवता सह वासो भूत् तत्र हेतुः देवदेवेति संबोधनाभ्यां सत्यकामेनेति च ४४ तर्हि किं मयाध्ययनादिना तत्राह यस्येति छंदोमयं वेदप्रधानं वेदैकगम्यं सर्वपुरुषार्थानामु
द्भवस्थानं च यत् ब्रह्म तदेव यस्य देहः विडंबनमनुकरणमात्रं ४५ इति श्रीमद्भागवते दशमस्कंधभूषणे गतोसीति तमोध्याय स्तोषिणीसारसंग्रहे १ इति अशीतमोध्यायः ८० जगध्वासुदामेत्यू
थुकान् पृथुकांश्च ननिर्मितं अदात्सुरेंस सदनं सदनेतरथादि मत् १ स इति युग्मकं सभक्तवात्सल्यादिगुणो ब्रह्मण्यो हरिर्भक्तमनोहरः अत एव तत्प्रियसखत्वात् द्विजे पृथुश्रेष्ठेन तेन सह संकथय

रामू २०

न्सुहृद्गोष्ठीः कुर्वन् सर्वभूतमनसां साक्षी मदर्थं दूरतस्तथा प्रयासैः पृथुकाः समानीता मद्दैन्यवेदक्षाद्दातुं लज्जते प्रेमभरेण दित्साच्च नापैतीति ज्ञानन्नित्यर्थः अतः स्मयमानः प्रेम्णा तं निरीक्षणेन कदा दास्यतीत्य २०
नुसंधानेन प्रेक्षमाणः यद्वा पृथुकग्रंथीं निरीक्षणेनोपलक्षितः प्रहसन् मम प्रज्ञावत्सा दत्तं तद्भवान् कथं गोपायतीत्यादिना परिहसन्नुवाच यतः प्रियेसख्यायं खलु वाक्यालंकारे २ किमित्यर्धकं तल्प
पयदेहीति विशेषः हे ब्रह्मन्निति वेदविदा त्वया मदुपायनं गृहीतुं न युक्तमिति सनर्मभावः भवान् मित्रोचितं न व्यवहरति यतः पत्न्या प्रेरितोपि याचितुं संकुचति अहं तु याचित्वैव गृह्णामीति च मम स्ताशयः ३
परिहासं त्यक्त्वा तं प्रोत्साहयन् पृथार्थं तमाह ४ अण्विति अल्पमन्नादि प्रेम्णोपहृतं यद्वा भक्तविषयमत्प्रेम्णा भूर्यैव भवेत् तावतैव बहु तृप्तिः स्यादित्यर्थः यद्वा तु छमन्नादि वसनं पुष्पादि मया भूषणं स्र
धायंते दिव्यवासायते रत्नायते मयीत्यर्थः ५ अन्नाद्यभावे पत्रादीनां मध्ये यदेव भक्त्या प्रयच्छति तदेवाहं तस्य प्रयतात्मनः शुद्धात्मनो निष्कामस्य यत्तस्यतेपत्र्युपहृतमश्नामीति भक्तिरेव मद्दर्शने हेतुर्न
तु मंत्रादिकमपीति भावः पुनर्भक्तिपदं भक्तोस्वलालसाव्यंजनाय भोज्याभावे तत्तुष्ट्यै नेर्प्यते पत्रपुष्पे अन्नानायोग्ये अपि अश्नामि किमुत फलतोये इति भावः तोयस्य व्ययत्वेऽन्नेनोक्तिस्तदेकाहारत्वविवक्ष
या अप्भक्ष इतिवत् ५ स्वेच्छया नीयच्छन् किंचित्वाङ्मुखो भूत् यतो व्रीडितः व्रीडायां हेतुः श्रियःपतयइति ६ भगवांस्तदा किं कृतवांस्तदाह सर्वेति सार्धचतुर्भिः यर्त्सर्वाणि भूतानि यत्र सर्वाधिष्ठानमित्यर्थः स
चासावात्मदृक् साक्षी जीवबुद्धिद्रष्टाच किमचिंतयत्तदाह नायमित्यादि दशाक्षराधिकश्लोकेन श्रीकामः सन् पूर्वजन्मनि मां नाभजत् ७ तत्प्रियचिकीर्षायां हेतुः पतिव्रतायाइति करुणया धर्महानिभि
याचेति भावः सखेति मत्सखत्वं मामेव प्राप्तान धनान्यांतरमिति भावः अतोस्यास्मेदास्यामि यद्वा तत्पत्नीप्रीत्यर्थमेव दानेन तत्संबंधमात्रविवक्षणेन तत्संप्रदानत्वाविवक्षणाद्दास्येति ८ किमिदमितिवदन्
स्वयमेव बलाद्गृहीतवान् ९ ननु वितर्के एतदेवोपायनत्वेनानीतं न च मंतव्यमयोग्यमिति यतः परमप्रीतिकरं यतो हे सखे सख्यानीतत्वादिति भावः नाप्यल्पं मंतव्यं यतोनेन विश्वकुक्षिं तर्पयति किं पुनर्वि
श्वं १० इति वदन् यकं मुष्टिं जग्ध्वा यावद्द्वितीयां जिघृक्षति तावत्तदेताज्जगृहे त्वरयेत्यर्थः अन्यथा भक्षितस्यादिति भावः परमेष्ठिनः परमेश्वरस्यापि हस्तं जगृहे यतः तत्परा तस्यतादृशः शुद्धान्नभोजनेसोढुं न शक्नोति भावः ११ नन्वस्कृत
स्यापत्रमाशयः किमुक्ता जगृहे इत्यपेक्षायामाह एतावतेति द्वितीयमुष्टिपर्यंतभोजनेनालं प्रयोजनं नास्ति यतः जीवमात्रस्य सर्वेषां पुरुषार्थानां या संपत् च संसारभूयेत्वत्तोषणैकारणे सति तु विश्वातएव पृथुका
न्नेनेन तुष्टतरां अतो यदि गार्हस्थ्योचितां संपत्तिं दित्सति तदा सापि स्वत्तोषादेवानुषंगिकतयास्य गृहे निरतिशयासिद्धेति किमुष्ट्यंतरादनेनेति भावः विश्वात्मन्निति त्वत्तोषयुक्तेव सर्वासिद्धिरिति भावः अथ
श्रीदेवीसखीभिः सह तान् पृथुकान् विभज्य जघासेति ज्ञेयं १२ तां यस्मिन् दिने गतस्तदीयामेकां रात्रीं सुखं यथास्यात्तथा भुक्त्वा पुनः सायमप्यशित्वा पीत्वा च स्वर्गतेवैकुंठगतइव यथा यथावत् मेने भुक्त्वा स्वपि
त्वेति पाठे भगवता सह शयित्वेत्यर्थः छंदोभंग आर्षः १३ ततः किं कृतवांस्तदाह श्वइति उदिते रवौ विश्वभावेन विश्वपालकेन स्वेषामंत्यजानां सुखं यस्मात्तेन प्रातरभिवंदितः धिकृतु छधनयाचनार्थमागतं मामि
त्येतः संकोचेनैव श्रीराममप्यमिलित्वा गृहं प्रस्थितवान् पथीति पथेतिपाठे विनयोक्ति परिक्रमणप्रणतिसांजलिस्थित्यादिनानंदितः न किंचिदपि दत्तमिति कौतुकेनाह हे तातेति १४ ननु स्वयं याचित
वान् यतो व्रीडितो महतः श्रीकृष्णस्य दर्शनेन निर्वृतश्च १५ निर्वृतिमेवाह अहो इति चतुर्भिः यतो लक्ष्मीमुरसि बिभ्रता लिंगितो १६ उक्तार्थमेव विशदयति क्वेति अहं जीवः दरिद्रः पापीयान् इदृशमान
हेतुपुण्यहीनः क्व कृष्णो भगवान् श्रीनिकेतनः तत्संपत्तिमान् कृतथापि विप्रकुले जात इत्येव हेतोर्दोर्भ्यामपि बाहुभ्यामालिंगितः स्वविस्मये परिरंभे विप्रत्वमेव हेतुर्न सख्यादि तदयोग्यत्वादिति भावः १७
नेकवत्सपरिरब्ध एवं किंतु निवासित इति प्रियाजुष्टेमि याजुष्टे इति पाठे भ्रातरोनुज्ञागदादयो यथा स्नेहादरो किंच महिष्येति वीजनहेतुः श्रांत इति अनेन कारुण्यं दर्शितं १८ किंच शुश्रूषयेति पादसं
वाहनादिभिर्यः सेवातया पूजितः सत्कृतः देवानां विप्राणां चाराध्येन देवदेववत् १९ एवं सत्कृत्यापि धनस्यादाने हेतुं विभावयति स्वर्गेति युग्मकेन पुंसां साध्ययोः स्वर्गापवर्गयोर्भूपातालस्य संपदादी
नां चयद्यपि तच्चरणयोरर्चनादिभक्तिरेव मूलं तां विना स्वनुष्ठितेपि साधनांतरे विप्राप्तितिसायात् तत्त्वं मम पृथुकार्पणरूपं संपन्नमिति भावः तथापि मत्त्वमभूर्यपि धनं नादात्तन्नूनं कारुणिकत्वा णि
देवेति २० इतीति सार्धद्व्यकं एवं तत्त्व श्रीकृष्णकारुण्यं मनस्येव चिंतयन्नु तु मुखेन जल्पन् २१ रहस्यत्वात् निजगृहप्रांतं प्राप्तः तद्विशेषणानि सूर्येत्यादि विमानेस्त सद्दृशगृहभेदैः २२ कूजत्स
क्षिसंघव्याप्तैः उपवनाद्यैर्वृतं प्रोत्फुल्लत्रानि कुमुदादीनि येषु तानि वारीणि यत्रोपवनादौ २३ पुंभिर्दासादिभिः स्त्रीभिर्दास्यादिभिः हरिणाक्षिभिरित्यभयविशेषणत्वात्तुं लिंगशेषः अनिसृत्वान्तरसमासां
तः अत्रैवं ज्ञेयं सुदाम्नो हारकावास रात्रौ स्वगृहे सुप्ते यांत सत्त्यां सर्वस्थानं तद्रूपादिकं च दिव्यमभूत् प्रातर्दिव्यतस्यादेरुत्थस्वभर्तृसंगत श्रीकृष्णादत्तं ज्ञात्वा विस्मितया तयापस्यागमनज्ञापकाज्जनास्त
न्मार्गे नियुक्ता इति २४ तद्दृष्ट्वा तर्कयति किमिति सार्धकं प्रथमं तेजःपुंजं दृष्ट्वा किमिदमिति ततो दिव्यगृहाणि दृष्ट्वा कस्येति स्वस्थानं ज्ञात्वा तदिदं स्थानमिति एवं कथमभूदिति प्रत्युद्गच्छन् उपायना
दिना संमानितं तं तः महाभागं तदैव दिव्यरूपादियुतं २५ आकर्ण्य पूर्वं नियुक्तजनेभ्यः श्रुत्वा आत्वया वैकुंठलोकात् श्रीरिव रूपीणि सौंदर्यवती २५ लज्जया मिलिताक्षी अतः पतिरेव पूज्य इति नि
श्चयवत्या बुध्यैव ननाम संकल्पात्मकमनसेवालिंगितवती न साक्षात् २६ पत्नीमित्यितियुग्मकं २७ तया युक्तो मंदिरं प्रविष्टः २८ तदेव वर्णयति पयइति चतुर्भिः यत्र मंदिरे विशिष्टाः शय्याः दय
स्तत्र संपदां समृद्धिर्विलोक्य तर्कयामास इत्यन्वयः दंता गजदंतमयाः पर्यंकाः २९ मुक्तादामविलंबंतीति भ्रमंति च वितानानि ३० महामरकतगृहेषु रत्नरूपादीपाभ्राजमानाः दीपेरिति पाठे तैः सह भ्राजमा
श्राउ॰तो ना रत्नहारादीयुताललनाः संति ३१ स्वस्य सं समृद्धिं विभाव्य तं कुत एषा आगतेति तर्कयामास ३२ निष्किंचनोति भूतमिति एषचासावहं च एतदहं तस्यै तन्मम महती पूर्णा विभूतिर्लक्ष्मीर्यत्र तस्य भ्य
२० भूतमस्यालब्धो कतोन्यत् किमपि महासमृद्धिहेतुर्न अन्यदिति पाठांतरं एतच्छब्दार्थमाह दुर्भगस्य यतो नित्यं दरिद्रस्येति ३३ अवलोकनमात्रेण महदैश्वर्यदद्रो चेन्नुभ्यं दत्तमिति किं भगवान्तो श्रमः

कृवान् तत्राह नन्विति मम सखासौ असमक्षं याचिष्यमेवे साक्षाद्याच्ञकाय किंतु गूढतया सनायुक्तया याञ्चाणोपि असमक्षमपि हरिः समानैश्वर्यादिकमपि ददाति अनुक्त्वैव परोक्षं दाने हेतुरसमक्षं याचिष्यमेवेत्येव असमक्ष
याचने कथं वेति तत्राह स्वयमेवेक्षमाणः सर्वज्ञत्वादित्यर्थः भूरिदाने हेतुः स्वयं भूरिभोजबहुभोगः अनल्पैश्वर्य इति अल्पं दातुं लज्जत इत्यर्थः स एव निरुपाधिदातुः स्वभावोन्यत्रापि दृश्यत इत्याह पर्जन्यवदिति स हि कदाचि
त्कदमयाच्यमानोपि सुप्तेपि लोके गर्जनं विनापि वर्षतीति तद्वत् ३४ न च तावद्दत्त्वापि तस्य तृप्तिः स्वल्पेपि भक्तकृते बहुमननादित्याह किंचिदिति उरुबकपि स्वेन दत्तं यत् किंचिदल्पं मन्यते भक्तकृतं तु छमपि भूरिकरोति
अत एव मयोपानीतं प्रीत्या स्वयमेव प्रतिजग्राहेति ३५ यस्मादेवं तस्मात् तस्यैवेति मम कदन्नमप्यश्नाति समयस्तस्यैव सौहृद दास्य सख्यकृत्ये तस्मिन्नेव प्रेम तस्यैव सेवां करवाणीत्यर्थः सख्यमैत्र्यौ तत्कर्तृके स एवमविहि
ताशंसनमुपकारं चकारोत्यर्थः यद्वा सौहृदं मिथो हितकारित्वं सख्यं सहविहारः मैत्री स्निग्धता मात्रमपि दास्यं तत्कर्मकरत्वमपि पुनरिति मुहुरित्यर्थे वाक्यालंकारेण ननु तस्यैवेत्येवकारेण किं तद्भक्तोपि
व्यावर्त्यते नेत्याह महाप्रभावेण तेन सह सौहृदादिना संगं प्राप्नुवतो मम तद्भक्तेषु प्रकर्षेण प्रेम्णा संगोस्तु ३६ ननु भक्तिफलं संपत्तिः प्राप्ता पुनर्भक्त्या किमिप्ससीत्याह भक्तायेति संपदः कोशादीन् राज्यमैश्वर्यं विभू
तीः पुत्रादीन् ददाति यतश्चित्रा इति नानाविधं भक्तमनः स्यादिति किंच पस्यन्निपातं स्वनिष्ठातो [illegible] रामिति यतो विचक्षणः सर्वज्ञः तर्हि ध्रुवादिभ्यः कुतो ददौ तत्राह अदीर्घेति दीर्घबोधानां तेषां विवेकबलेन
निपातासंभवादिति भावः तस्माद् विविकिनो मे दुराग्रहाद्दत्तमपि नैतद्भक्तिफलं किंतु सेव स्वतः फलरूपा पंचमपुरुषार्थरूपत्वादत्तः सैव जन्मजन्मनि स्यादिति भावः ३७ बुध्या विचारेण कृतनिश्चयः जनो भक्तो स्वस्मिन्
अर्दनमुपायन याचनं यस्य तस्मिन् जातप्रेमा विषयान् त्यक्ष्यन्नपि जायया हेतुना तत्प्रीत्यर्थं बहु जे तथापि नातिलंपटः अनासक्त एव यैवेत्यर्थः ३८ अत्र सर्वत्र हेतुतया भगवतो ब्रह्मण्यतास्वभावं वर्णयति तस्येति
ब्रह्मादिपूज्यस्य यत्तफलदस्यैश्वरस्यापि प्रभवः सेव्या अतस्तेभ्यः परं दैवं देवता न विद्यते वेप्रसिद्धमेतन्नाश्चर्यमिति भावः ३९ तथापि सविप्रस्वन्यैरजितमप्येवं भक्तैरेव पराजितं निश्चित्य तस्य भक्तवशीकृतत्वस्य
ध्यानममुना एवं वशीकृत इत्यादि चिंतनं तस्य प्रवाहेणोद्ग्रथितमात्मबंधनं ब्राह्मणत्वाद्यभिमानो यस्य स सतां ब्रह्मविदां प्राध्ये तद्धाम स्वरूपं लेभे तस्यैतत्सर्वं नाश्चर्यं यतो भगवत्सौहृदिति ४० भगवन्मित्रस्य तस्य
तद्धामप्राप्तिर्न चित्रं तत्कथाश्रवणेनापि तत्सिद्धेरित्याह एतदिति एतत् पृथुकोपाख्यानं तत्र ब्रह्मण्यतां च श्रुत्वा यद्वाप्यसङ्को यो ब्रह्मण्यदेवस्तस्य ब्रह्मण्यतामपि किं पुनस्तादृशात्तिंगनादिप्रेमादि कर्मबंधा
नुच्यते स्वयमेव प्रारब्धाधीन एव स्वेच्छया भक्तिं कुर्वन् तत्पदं यातीत्यर्थः ४१ इति श्रीमद्भागवत दशमस्कंधचमूकृषणः एकाशीतितमो ध्यायस्तोषिणीसारसंग्रहे १ इति भागवते एकाशीतितमोध्यायः ८१ सू
र्योपरागयात्रा परागयात्राति यस्यास्तस्य उक्ता बहुकांता युतकांतायुत देयरथगजादि युजः १ सङ्घोद्वेगप्रदानं यत्नोदानं दनंदनः गोपानानंदयामास दयामास दनेहरिः २ अथ श्रीदामसत्कारानंतरं एकदा राजसूया
दूर्वं श्रीरामकृष्णागमनात्पूर्वं कदाचित् मथुरां त्यक्त्वा द्वारकायां कंतति पयवत्सर्शन् वसतोः सतोः कल्पेति सर्वग्रास इत्यर्थः १ हे राजन्निति श्रीदामकथाविष्टमवधापयति ततोप्यत्र रसविशेषोस्तीति विज्ञनाय
ज्योतिर्विन्मुखादादावेव ज्ञात्वा कुरुक्षेत्रं ययुः श्रेयो दानादि तस्य लिप्सया २ तत्रैवगमने हेतुः निःक्षत्रियामिति द्वाभ्यां परशुरामप्रभावेण तत्क्षेत्रस्यादितिमहत्त्वादिति भावः ३ अन्यः अविद्वान् यथा ४ अर्घकं महत्त्वा
मिति महापर्वत्वात् भारस्य भारतवर्षस्थाः आगन् आजग्मुः ५ युग्मकं वृष्णय इति श्रीरामकृष्णादय इत्यर्थः यथा तेन तथैवाक्रूरादयः अघं क्षपयितुमिच्छव इति श्रीकृष्णपरिजनानां लीलामात्रमन्येषां
वास्तवं ६ कुमाराः अपि ययुरित्याह गदेति सुचंद्रो रुक्मिणीपुत्रश्चारुश्चंद्रमाः शुकसारणो यादवो तैः महानिरुद्धो रक्षायां द्वारकारक्षार्थमास्ते आसीत् कृथपः सेनानीः ७ युग्मकं तेइति रथा द्वयोरथा
दिभिः सेनांगैः व्यरोचंत देवधिष्ण्याभैर्विमानतुल्यैः तरंगवत्प्लवो गतिर्येषां तैरश्वैः ८ महातेजाः महातेजसः दिव्याः अस्रक्तमाः स्रगादयो येषां कलत्रैः सहिताः वृष्ण्यादयो देवी सहिताः खेचरा इव ९
तत्र तेषु हृदेषु उपोष्येति सूर्योपरागनिमित्तं तीर्थोपवासस्य तत्र निषिद्धत्वात् १० पुनराप्लुत्य मुक्तिस्नानं कृत्वा दानादौ संकल्पमाह कृष्णइति ११ एवं ग्रहणदिने कृतमुक्त्वा तत्परदिने प्याह स्वयमिति तदनुज्ञातो भो
जनानुज्ञां प्रार्थ्य प्राप्य चेत्यर्थः शीतलच्छायवृक्षमूलेषु १२ तत्रेति सार्धद्वयकं कांश्चित्सागमनानपूर्वमागतान् कांश्चित् पश्चात् तत्र कांश्चिद्ग्रहणात् पूर्वं कांश्चित्पश्चाद्ददृशुरित्यर्थः नृपानेवाह मत्स्य
इति १३ आरद्धान् सिंधुपारीणान् तान् तालीन् वोद्रष्टुमेष्याम इति भगवदुक्त्या द्वारकायामागमने प्रतिबंधाद् दुर्लभं उद्यातीर्थयात्रामिषं कृत्वात्रागतान् नंदादींश्च ददृशुरित्यर्थः १४ तत्रादौ सामान्यतः पुंसां संगतिसु
खमाह अन्योन्येति हर्षवेगेन प्रोत्फुल्ले हृदयकंजपद्मे श्रीः शोभा येषां १५ तथैव भक्तियुतानां स्त्रीणामाह स्त्रियश्चेति अतिसौहृदेन यस्मिंतैनामलैरपांगैर्दृग्भिर्दर्शनानि यासां ताः मिथ इति बीक्षणा दौस
दैत्र १६ एवं सर्वेषां सामान्यतः उक्त्वा विशेषतमाह नतइति मिथः पृच्छामिथः कथाश्चक्रुः १७ पंचभिः कुंतीवसुदेवयोर्विशेषमाह पृथेति भ्रातॄन् वसुदेवादीन् स्वसृः श्रुतदेवाद्याः तत्सु
तानू रामादीन् पितरौ शूरं भोज्याख्यमातरं च भर्तृपत्नी देवक्याद्याः १८ श्रेष्ठ्याद्वसुदेवं संबोध्याह आर्येति हे ज्येष्ठभ्रातः अपूर्णाशिषं यतः युतः अनुसर्वतः पश्चादपि न स्मरथ बहुत्वं पित्राद्यपेक्षया १९
यस्य दैवं नानुकूलं तं संबोध्याद्यापि नानुस्मरंति २० अंबेति स्वसः स्नेहात् ईशाक्रीडयाकातरान् विवशान् देवक्रीडनकान्नरानिति पाठांतरं एवमस्वातंत्र्यमुक्तं स्पष्टयति ईशास्येति अथ वेति समुच्चये हि यतो
लोकोयत्कुरुते तैन्येन कार्यते च तत्सर्वमीशाधीनमेवेत्यर्थः २१ कंसेन दुःस्वभावेन केशयरिष्टादिदेवैर्भिलित्वा पूर्वमेव प्रतापिताः तो वाणीमारव्यतु विशेषतः कीर्तिमदादिजन्मतः स्तु अतितरां प्रतापिताः देव
र्विवचनमारभ्य तु दिशं दिशं गताः उपलक्षणमेतत् रोहिणीश्रीकृष्णादीनां गोकुलस्थापनादेः कंसवधोत्तरं तु मागधभयेन दुर्गमाश्रिताः क्वापि गंतुमशक्ताश्चेत्यपि ज्ञेयं एतर्हि त्वत्पुत्राणां कुर्वे धर्मराज्यप्राप्तिसम
यस्थानमव्यग्रावस्थानमासादिताः हे स्वसः त्वयाज्ञायत एवेति भावः २२ अच्युतस्य प्रत्यक्षदर्शनेन परमानंदः ब्रह्मानंदाद्यानंदविशेषस्तेन लब्धाः पूर्णाइति यावत् २३ नृपानेव चतुर्भिः पाहं भीष्मेति २४
महानिति भक्त्या भगवते निजकन्यादानात् २५ दमघोष इति शिशुपालजरासंधयोर्मुक्तिर्भगवदागमनं ज्ञात्वामत्सरेण तत्रानागमनात् २६ युधिष्ठिरमनुव्रता इति तदानीं राज्यार्धप्राप्तेः सस्त्रीकं यथा स्यात्तथा
वीक्ष्य २७ परिग्रहः परिजनेन पत्न्या स्वीकारमूल्ययोरिति विश्वः २८ यदुराजत्वेनोग्रसेनं संबोध्याहुः अहो इति सादरसंबोधने आश्चर्ये वा २९ न केवलं तस्य दर्शनमेव किंत्वतिदुर्लभं बहु युष्माकं स्वतः सपत्न्यमित्या
दुर्युगमकेन यदिति यस्येत्यर्थः षष्ठ्या लुगार्षः विश्रुतिः कीर्तिः वेदैः स्तुता इदं विश्वमत्यर्थं पुनाति यस्य पादप्रक्षालनरूपं गांगं पयो यस्य वाक्यरूपं वेदाख्यं शास्त्रं च विश्वं पुनाति एवं प्राचीनं माहात्म्यमुक्त्वा सांप्रतं

राम॰ २१

विशेषमाहुः भूरिति कलिकालेन दग्धं जगं माहात्म्यं यस्यास्तथाविधापि यस्याङ्घ्रिपद्मस्य स्पर्शेनाविर्भूतासर्वार्थशक्तिर्यस्याः सोऽस्माकमखिलानर्थान् अभितः सन्ततं संपादयति ३० तदिति प्रथमायाः छान्दसो लुक्
स इत्यर्थः विभुर्व्यापको भगवान् येषां वो गृहे दर्शनं च स्पर्शनं चानुपथोऽनुगतिश्च संलापश्च शायनं चोपवेशनं च भोजनं च योनेन विवाहादिसंबंधेन सहितं सपिण्डत्वं ज्ञातित्वं च तेन बध्यते संबध्यते तथाभूतः सन्
स्वर्गापवर्गविरमः दर्शनादिमहासुखदानेन स्वर्गादिभोगब्रह्मानुभवसुखे च वैतृष्ण्यापादकः स्वयं युष्मास्वयत्नेनैव आसन्निरुपमसुखप्रदो बभूवेत्यर्थः निरयवर्त्मनि प्रवृत्तिमार्गे वर्तमानानामपि युष्माकं तेषु
यज्जन्मभाजः इति ३१ एवं कुन्त्यादीनां संलापादिकमल्पत्वादादावुक्त्वा दुर्घटमिलने श्रियरोत्कंठितैर्नन्दादिभिः सह भगवतः संगत्यादिकं विस्तरेणाह नन्द इत्यादिना यावत्समाप्ति कुरुक्षेत्रे स्वपुत्रपुरोगान् यदूनागतान् चारा
दिद्वारा ज्ञात्वा गोपैरुपनन्दादिभिरेकशेषेण गोपीभिश्च वृतः संस्तत्राजगाम अनःस्थाः अर्थाः श्रीकृष्णार्थप्रियद्रव्याणि येषां तैर्दिदृक्षयेति तेषां श्रीकृष्णदिदृक्षयैव तत्रागमने निमित्तं न त्वन्येषामिव पारलौकिकादि
कमिति भावः ३२ वृष्णयः श्रीकृष्णावासस्थानतो बहिः सभायां स्थिताः चिरं दर्शनेकातराः अत्युत्सुकाः अतएव गाढं परिषस्वजिरे ३३ एवं सामान्यतः सर्वेषां संगतिमुक्त्वा वसुदेवस्याह वस्विति प्रीतो हृष्टस्ततः प्रेम्णा पु
लकाद्याकुलो हृदिति शेषः पुत्रयोर्मूर्त्या संचेतितदीयमहोपकारानुसंधानं ३४ अथ यशोदां च दर्शनोत्कंठाविस्फुटहृदयां कृष्णरामस्नाविन्ते मुरबीसखीच्छतबाहू दूरत एवागतौ निशम्य वसुदेवेन तौ नन्दं च निजान्तःपुरं प्रा
८ पयातत्रैव श्रीकृष्णरामयोराह तयोः सतोर्यद्वृत्तं तदाह कृष्णेति पित्रोः स्नेहभराकृष्टः कृष्णस्तत्स्नेहदुरमितो रामश्च पितरौ यशोदानन्दनौ परिष्वज्योत्कंठानिवृत्त्यास्तेयोरालिंगनेन किंचित्स्वास्थ्यं विधाय पश्चादभिवाद्य कु
शलप्रश्नादिकं किमपि वक्तुं न शक्तो यतः प्रेम्णा साश्रुकण्ठौ बाष्परुद्धकण्ठौ प्रेम्णेति पूर्वत्रापि योज्यं तेन कंपपुलकादिकं ज्ञेयं पितराविति तत्र तयोर्मातापितृत्वबुध्यविच्छेदो व्यज्यते प्रेमोद्रेके णाह हे कुरुद्वह इति अत्र
नन्देन सह भगवतो मिलनं वसुदेवादिसभायां यशोदया तु देवक्यादिमहोपविष्टया स्त्रीसभायामिति योचित्यात् गम्यते तथाप्यत्र युगपदिव तद्वर्णनं संक्षेपार्थं ज्ञेयं ३५ ततश्च ताविति वसुदेवदत्तासने स्वयमुपविश्य तौ
रामकृष्णौ स्वासनमुपवेश्य परिरभ्य च यशोदा च नन्दश्च शुचः विरहशोकान् अश्रूणि वा मुमुचतुः प्रौढयोः प्रकटीतैश्वर्ययोः कथं स्वासनारोपणादि तत्राह रूताविति तयोरपि पुत्रत्वबुद्धिच्युतिं दर्शयति
३६ अथ रामकृष्णसंगत्या स्वास्थ्ये जाते तयोश्च परस्परं हस्तं व्रजवासीमिलनार्थं बहिर्निर्गतयोः सतोरित्यर्थः रोहिण्या आदौ बुद्धिर्व्रजे चिरं सहवासादिना स्नेहविशेषात् मैत्री हिताचरणं ३७ रोहिण्याह केति
वीदंपत्योः विस्मरेत सदानानुचिन्तयेत् अनिवृत्तौ दूरागमनेन तस्त्वक्तयोरप्यनुवर्तमानां मुहुः संदेशाहरप्रेषणादधुनायात्रामिषेण स्वयमागमनाच्च ऐंद्रमैश्वर्यं प्राप्यापीति द्वारकैश्वर्यस्य ततोप्याधिक्यं मत्वा अन्य
मैत्र्याः प्रत्युपकृतायाः स्यादविस्मृतिर्नेत्तवदीयायाः प्रत्युपकारासंभवादित्याह यस्या इति ३८ देवक्याह एताविति न दृष्टमात्रावपि पितरौ याभ्यां तौ जातमात्रावित्यर्थः हे भवति युवयोर्न्यस्तौ संप्रीणनं प्रियदानादिना संतो
षणमभ्युदयो जातकर्मादि पोषणं स्तन्यादिना लालनं विश्रमणं पालनमिति ह्यश्चित् तानि प्रकर्षेण लब्ध्वा अतः पित्रोरेव युवयोरकुतश्चिद्भयौ भूत्वोषतुः किं वि घयोः नेत्रयोः पक्ष्मयद्वत्तथा रक्षकयोः स्वपुत्रत्वेन
ज्ञाते श्रीकृष्णे एवमास्तां श्रीरामे कथं तत्राह सतीं परः स्वइति भेदं न मन्येते देवक्याभिप्रेतोर्थः यशोदाया रुक्मस्ववासनानुसार्येवार्थः स्फुरति स्म सत्येषं एतौ युवयोर्युवाभ्यां पितृभ्यां न्यस्तावस्मास्वर्पितौ योः पूर्वं संप्रीणना
दीनि युवयोरेव प्राप्यापि अदृष्टपितरावधुना युवयोः पित्रोरकृतदृष्टी संतावूषतुरस्मासु वासं स्वीकृतवन्तौ अत्र तादृक्वैशिष्ट्याभावे पीति भावः तर्हि कथं तत्राह नेति परः पित्रादिभिन्नः स्वः पित्रादिरिति सतां नास्ती
ति ३९ अथ हृदयेषितृज्ञे ऐश्वर्याः प्रत्युत्तरं न युक्तमिति सा न किंचिदुक्तवतीति तद्भुक्त्वा विरहक्षीणानां मुहुराश्वासनेन धृतप्राणानां चिरादागतानामुद्धवादिद्वारा निजांतर्वासंनीतानां गोपीनां समागममाह गोप्यश्चेति
ति त्वर्थे च चिरादभीष्टं सर्वतोऽपीष्टं वांछितं तं समीपे लब्ध्वा यद्दामीष्टं स्वप्राणादितोऽप्यधिकं प्रियं चिरादुपलभ्य यस्य प्रेक्षणे निमित्ते दृशिषु सर्वास्वेव न तु कस्याश्चिद्द्वयेकस्यामपि दृशीपक्ष्मदूरीकृतमिति भावः व्यवधा
यकपक्ष्मकर्तारं विधातारं शापति नेत्रद्वारैर्हृदीकृतं दीर्घ आर्षः हृदयं प्रवेशितं अत्र परिरभ्य सर्वाप एवं तन्मयत्वं देहादिविस्मृत्या तदेकस्फूर्तिताभापुः नित्ययुजामारूढयोगिनां यद्धासदात्स्य दीकृतमधुना दृग्भिः परि
रभ्य तस्मिन् भावं परकाष्ठापन्नं प्रेम तेन चानंदमूर्छामापुरित्यर्थः नित्ययुजां रुक्मिण्यादीनामपि दुरापं ४० भगवास्वयमेवकृतं तासां सांत्वनमाह भगवानिति तथाभूतौ विरहेणातिदुरवस्थां प्राप्ताः विविक्ते निर्जने
न प्रदेशे आश्लिष्य प्रत्येकं युगपद्देवस्वैश्वर्येणालिंग्य रुदतीः पृष्टा अनामयं आलिंगनेन सांत्वयित्वास्वस्थाश्च कृत्वेति भावः कुशलप्रश्नादिना कतिपयक्षणानतिक्रम्य शोकाश्रुसागरशोषणं हासं कुर्वन्नाह इदमद्भुतमत्र
वीत् ४१ अपि किमस्मान् स्मरथ हे सख्य इति मां स्मर्तुं सख्येव सख्युरिति न्यायेन परापकर्षं तु च योग्याद्वयमिति भावः निजमहापराधमाह स्वानामिति नंदगोपत्वेन वसुदेवादित्वलक्षणज्ञातीनां कंसवधरूपार्थचि
कीर्षया गतान् तत्प्रसंगेन विलंबितान् अत्र हेतुः शत्रुपक्षाणां मागधादीनां क्षपणे सक्तान् अतएव यादवादीसहायीकर्तुं वसुदेवपुत्रत्वं प्रख्याप्य विवाहादिकमत्रैव कृतवन्तः स्म इति भावः ४२ अपि स्वित् अकृत
ज्ञ इत्याशं सर्वतो विशंकयास्मान् अवध्याय यथावज्ज्ञया स्मरथ अथवा अविशंकया निश्चयेन प्रेमसंबन्धमान्निजैश्वर्यविस्मरन् निवलोकवद्धीलामनुसरत्यतत्त्वतानरीत्या सांत्वयति नूनमिति निश्चये भगवानीश्व
रः ४३ नन्वेवं तस्य वैषम्यनैर्घृण्ये स्यातां तत्राह वायुरिति आक्षीपते वियुनक्ति वायोः स्वाभाविकलीलयैव ते चलंति न तु तद्भिन्निवेशेन तथेति भावः ४४ अथ प्रसिद्धममैश्वर्यं नूनमाभिर्ज्ञातं स्यादित्यनुसं
धायाह मयेश्वरो मतश्चेत्तर्हि मयैव शत्रुपक्षक्षपणलीलावेशेन किंचित्कालं कृतेपि वियोजने आत्यंतिके तस्मिन्न ममशक्तिर्नैव स्वेह परवस्यादित्याशयेनाह मयीति श्रवणादीनां मध्ये एकापि भक्तिर्मोक्षा
यकल्पते यतु मां प्रापयति समत्स्वेह भवतीनामासीत्संयोगवियोगलीलाभ्यामाविर्भूततद्दिष्ट्याति भद्रं ४५ कथं भवत्याप्तोऽस्नेह एव हेतुः इत्याशंक्य सर्वाश्रयत्वान्ममस्नेह एवापेक्षितो हमेव च स्नेहयोग्य इत्याशयेना
ह अहं हीति द्वाभ्यां हे अंगनाः भौतिकानां शरावकरकादीनां पृथिव्यादीनि पंचमहाभूतान्याद्यंतादिरूपाणि एवमहं सर्वभूतानां जरायुजादीनां स्वादीनां चेति सर्वाश्रय इत्यर्थः ४६ ननु जरायुजादीनां तत्क्रोडीकृतेवाद्यंतादिरूप
त्वादाश्रयो न तु सर्वास्तत्राह एवं हीति शरावादिभौतिकवदेतानि जरायुजादिभूतान्यपि भौतिकत्वाविशेषात्स्वयोनिषु भूतेष्वेव वर्तते न त्वोक्तर्यामनि भोक्तात्मा तु तेषु भूतेषु नातो त्कृष्टरूपेणैव ततो व्याप्तानकारणतया
अतउत्तयं भोक्तृभोग्यादिरूपं मय्येव परे सर्वभूतकारणे विराजमानं पश्यतेति एतदासां भावतोतिबहिरंगमित्याशंक्योद्धवद्वारकसंदेशार्थद्योतरं द्योतयति अहं भूतादिरहंकारः सर्वभूतानां खादीनां माद्यंतादि
रूपः भौतिकानां चरखादिभूतान्याद्यंतादिरूपाणि एवं सर्वभूतेषु स्थिरचररूपेषु मध्ये एतानि भवंतीभिर्दृश्यमानानि इदं तास्पदानि भूतानि आत्मनाम पाततानि आत्माप्यहं तास्पदं च मया ततः कार्यकारणे नेव पस्य

कृष्ण

तिदिशिदिशि रहसितवंतं मधुरिपुरहमिति भावनशीलेत्यादिरित्येदं तास्पदमहंतास्पदं च मयाव्याप्तं सर्वं मद्रूपं ज्ञातमित्यर्थः अतएतदुभयं परिहारकादौ वर्तमानेपि अक्षरेनित्यमेव युष्मत्संगिनीमयी आत्मा तं विराजमानं प
श्यतमद्भिन्नान किंचिदिति पश्यतेत्यर्थः स्फूर्त्यस्फूर्त्योरेव संयोगविरहत्वं भवतीनां तु परममहत्प्रेम्णैन सदैव मत्स्फूर्तिर्वर्तत इतीवस्तुतो नास्त्येव विरह इति भावः ४७ तदुपदेशफलमाह अध्यात्मेति आत्मानं श्रीकृष्णमेवा
धिकृत्य या शिक्षा तया एवं कृष्णेन गोपीहितार्थैः सत्यं तदनुस्मरणेन शिक्षितार्थस्य सदा चिंतनेन नष्टः जीवस्यात्मनः कोशः परिच्छेदो प्राप्तिर्भावनारूपो यासां तास्तं श्रीकृष्णमध्यगन् प्राप्तत्वेनैवामन्यंतेति अर्थांतरे तु त
स्याविर्योगस्यानुस्मरणेन प्रेमातिशयाद्देवतथानुभवेन ध्वस्तो जीवनस्य कोशः आच्छादनं विरहान्तर्जीविष्याम इति भावना यासां ता इति शेषं समानं अर्थद्वयेपि श्लेषेणोपमाव्यंजना अन्येयथाध्यात्मशिक्षया आत्मानम
धिगच्छंती तद्वदिति ४८ एवं परोक्षबाधाय दृष्टांताय वाध्यात्मरीत्या कृपितादृगर्थमनादृत्य निगूढार्थावधारणेन तत्प्राप्तिं निश्चित्य तुष्टा अप्योत्सुक्येन प्रार्थयामासुरित्याह आहुश्चेति हे नलिननाभ परमसुंदर ते
पदमरविंदवत्तापहरं मधुररसं च अतो भक्तियोगेश्वरैः हृदि उत्कृष्टतया चिंत्यं अगाधबोधैर्ज्ञानिभिः परमपुरुषार्थतया चिंत्यं किंच संसारेति एवं भक्तमुक्तमुमुक्षुसेव्यत्वात्साध्यसाधनरूपं सदा मानसि जुषां
सेवीनीनामपि नोस्माकं गृहं प्रति सक्तानामुदियात् तत्र प्रकटं भवतु यद्वा नलिननाभेति संबुध्या तत्सर्वांगपरिचयं ज्ञापयित्वा प्रार्थनाभंग्या विरहस्य दुःसहत्वं ज्ञापयंति तथाहि हे पद्मनाभ आस्तां दूरे वा नोनः
त्वद्दर्शनवार्ता त्वत्पादारविंदमस्माकं मनस्यपि उदियात् ननु किमत्रासंभाव्यं तत्राहुः योगेश्वरैरेव हृदि विचिंत्यं न त्वस्माभिः स्मरणारंभे एव मूर्छागामिनीभिः यतो गाधबोधैर दर्शने प्यक्षुभितबुद्धिभिर्नत्व
स्माभिरिव दर्शनेच्छया क्षुभितबुद्धिभिः पादस्यारविंदरूपकं स्पर्शेनैव दाहशांतिर्न स्मरणेनेति व्यंजनाय ननु तन्निदिध्यासएव योगीनां संसारदुःखमिव भवतीनां विरहदुःखं दूरीकृत्य तदुदयं करिष्यति तत्राहुः
संसारकूपतितानामेवोत्तरणावलंबनं त्वस्माकं विरहमहासिंधुमग्नानां तच्चिंतनेपि दुःखवृद्धेरेवानुभवात् नन्वेतत्रैवागत्य मुहुर्मां पश्यत तत्राहुः गेहंजुषां परगृहीणीनां यद्वा त्वदीयपूर्वसंगविलासास्पदस्य
गृहे एवास्मत्प्रीतिरिति तथाविलासाय गोकुलेएव संगतिर्भवत्विति भावः तस्मादस्माकं मनसि भवद्भिन्नसामर्थ्याभावात् धारयंत्यतिकृच्छ्रेणेत्यादि भवत्ता तास्मन्मतानुसारेण वृंदावनएव यद्यागच्छसि तदेवास्म
दुःखनिस्तार इतिभावः अत्र श्रीदामादिगोपानां उद्धवयानेकेरीत्या विरहएव नेत्यागमनाभावात् गोरक्षणेस्थितत्वात्संगमो न वर्णित इति शेयं ४९ इति श्रीमद्भागवतदशमस्कंधमध्यगः द्व्यशीतिपूरणोध्याय
स्तोषिणीसारसंग्रहे १ इति द्व्यशीतितमोध्यायः ८२ स्वविवाहे महोदारे महोदारे रमापतेः द्रौपद्यै कथयामासे थयामासेह पूर्ववाक् १ एवं गोपीनां प्रथमदिनस्थसंवादमुपसंहरंस्तनादेनांतरस्थमपि लक्षयन्यु
धिष्ठिरादिसंवादं प्रस्तौति तथेति तेन प्रार्थनाप्रकारेण गोपीरनुगृह्य यतः सएव तासां गुरुरूपं देष्टा गतिः प्राप्यश्च अथ तदनंतरमेवेति तावत्कालं युधिष्ठिरादीनपि नस्मृतवानिति भावः अपृच्छत् तत्पूर्वतान्प्रष्टुमपि न स
स्मारेतिभावः अव्ययमहानि कुशलमिति यावत् १ एवं क्रमरीत्या नानोपहारादिना सत्कृताश्च अतो हृष्टमनसः तस्मादक्षयागतकृशास्ते युधिष्ठिराद्याः प्रत्यूचुः २ अशिवममंगलं ते यांकुतः सदामंगलमेवेत्यर्थः के
षां ये तव पादपद्मामाध्व्यं मत्त्यर्थं कर्णपुटैः सादरं पश्च एवेति ननु तद्दुर्लभं तत्राहुः कश्चित्प्रेमोल्लासमये त्वद्भक्तानां मनस्तो मुखद्वारानिःसृतं मनःपरिपूर्योद्रेकाद्बहिर्निगतं आसवपदेन माद्कतया दुःखविस्मारकत्वमपि
दुःखमयदेहं दधतां देहोत्सादिकाया स्वद्विस्मृतिस्तच्छिदं सदा स्मरणमंगलकरं यदा श्रृण्वतां मम मंगलं नास्तित दा येषामेवं तव दर्शने कृपाप्रश्नश्च तेषां तत्कुतो वर्ततां अतः सदा मंगलमेवेति भावः ३ अतः सर्वापेक्ष
यात्वामेव प्रपद्यामहे इत्याहुः हि त्वेति द्वे पदे हि एव त्वा त्वां त्वामेव नरतास्मेति प्रसिद्धो स्मइति सविसर्गः पाठो वा कीदृशं आत्मधाम्ना स्वरूपप्रकाशेन निरस्ता बुद्धीकृतास्तिस्रोवस्था यत्र तं आनंदघनमपरिच्छि
न्नमकुंठितचिच्छक्तिकं यद्वा आत्मा शरीरं च धाम गृहं च तद्द्विस्त्यात्यक्त्वा यद्वा विधुतेत्यादिविशेषणचतुष्टयवर्णितरूपं आत्मधाम निराकारशुद्धस्वरूपं हित्वा तद्विज्ञानमनादृत्य नतास्मो नित्यमेव भजामस्त्वामि
तिप्रकरणाज्ज्ञातव्यं कुतः परमहंसानामपि गतिं भजनीयं अत्रहेतुः कालेनोपसृष्टानां निगमानामवनेरक्षणार्थं आत्ता गृहीता योगमाया स्वरूपशक्तिर्विलासा यत्र यत्रता दृशा कृतियेस्य यद्वा आत्ता प्रकटी
कृता योगमायारव्यचिच्छक्तिप्रधानामूर्तिर्येन तं ५ इति युधिष्ठिरादिवदन्यराज्ञादिष्वपि स्तुवत्सु याः कथाः अगुणं ताश्चि षुलोके षुगीता स्तुभ्यं वर्णयामि एवं च नानाकथासु प्रवृत्तास्वपि विवाहप्रसंगस्यैव कथनं मह
माधुर्येण तत्रैव निजादरात् ६ तत्र द्रौपदी सख्यादिविवाहवृतमेव पृच्छति हेवैदर्भि इति युग्मकेन कोशल्ले सत्ये शैब्ये मित्रविंदे उपवेशान क्रमापेक्षया संबोधनक्रमः प्रत्युत्तरं विवाहक्रमेणैव तत्र जांबवत्याः प्रा
कृतस्य भामायाउत्तरं भगवत्प्रेमविशेषेण प्राधान्यात्तस्याः सखुर्हेशाष्टौ मुख्यत्वादादरेण रोहिणीप्रभृतीनां षोडशसहस्रेषु मुख्या तेन भामादितुल्या ६ हे अन्याः श्रीकृष्णपत्न्यः लक्ष्मणया चान्नित्यमहिषीरपियुष्मा
न् भक्त्या स्वरूपयात्लोकमनुकुर्वन् यथोपयेमे तथेति ७ चैद्यायमांदातुं राजसु मागधादिषु उद्यतचापेषु सत्सु अजेयभटैर्निजाजेयतासिध्यर्थं स्वशिरो भूषणीकृताश्चरणरेणवो येषां तेषां स्वीयं भाग्यं मान्नि
न्ये तत्रानायासदृष्टांतः मृगेंद्र इवेति एवं वृत्तकथनमसहन्त्या अपि नयनात्कारुण्यभरव्यंजनाय नन्वत्वं च पूर्णा श्रीशानेतु योग्येवत त्राह तदिति तस्य चरणएव श्रीनिकेतस्तत्प्रसादाद्देवममता दृशी त्वमिति
भावः अस्त्विति तद्दास्यमपि नाहमि कुतस्तत्स्त्वीत्वमतो दासित्वेन तत्पादसेवैव काचित्प्रार्थ्यते इति भावः ८ सनात्राजितोतु वैव रेन सिंह कृतेन तत्प्रसृतन् यस्य तेन शोकव्याकुलेनतया भ्रातृवशेन तातेन वाते
नलिप्तं दुर्यशोपमार्ष्टुं परिहर्तुं मृक्षराज जित्वा स्यमंतकरत्नमुपाजहारानीतवान् यः अथ अनंतरं मत्पित्रे रत्नं मद्दात् तस्मैप्रभवे मे पिता मामदिशत् दद्दौ तेन स्वापराधेन भीतः सन् अतो दत्तां स्वरक्षणा
र्थमक्रूरादिभ्यः प्रतिश्रुतामपि तेभ्यः भयात्लाभात् ददाविति भावः अत्रान्याभिरिव दास्यार्थप्रार्थनमन्यासां दास्य प्राधानात्कां तभावादस्यास्तु सख्य प्राधानात् युक्तमेव ९ देहकृत् पिता अमुं श्रीकृष्णस्व
स्वापिने दैवमीश्वरं सीतापतिमत्वा त्वाचिरेव हानि सप्तविंशति दिनानि आसीत्तदाद्धविंशोह मितितु समाप्तिदिने गृहीत्वा अमुनासहासीद्युध्यततस्तं सीतापतिं ज्ञात्वा तेन परीक्षितः हस्तास्पर्शादिना सर्वांगेषु निःशिक्षि
ना तः सन् मणिना सह मामर्हणतया समर्पितवान् १० अर्जुनेन सहोपेत्य ११ श्रृंयूथगतं स्वबलिसिंहइवाअपकारं कुर्वतोमेभ्रातृतंश्च विजित्याविंदानुविंदाविति भ्रात्रद्वये प्रागुक्ते प्यत्र बहुत्वं च तदुपलक्षितान्य
बोधनार्थं श्रियोकइस्यत्रश्रियइति षष्ठ्यंतं पृथक्पदं संधिरार्षः पुरविशेषणं अनुभवं प्रतिज्ञ क्रमेतस्याः प्रिक्षाल्लनकर्तृत्वमस्तु १२ उक्षणः उक्ष्णः वृषभान् अतिशायितबलवीर्यतो क्ष्णाशृंगयुतान् पित्रा
नृपवीर्य परिक्षार्थं कृतान् तान् प्रसिद्धान् वीरमदं हंतृन् शीघ्रं निगृह्य क्रीडन्तनायासेनैव बबंधेत्यर्थः छागापत्यानि शिशवइवेति बहुत्वं चदार्ढ्यंतिके सप्तधा भवनात् १२ दासीभिः सहगजाश्वादि चतुरंगसे

रामः

नोयुतानामपुरं निन्ये १७ पितादत्तवानिति कैकेयीभ्रातृभिर्दत्तामिति पूर्वोक्तो प्रतिश्रुतामिति व्याख्येयं कृष्णे हे द्रौपदी अहं यद्दाने हेतुः कृष्णायेति त॰ चेत्तमिति च साक्षात्स्वस्कन्धोमग्रहणं हर्षेण नवधानात्
१५ सत्कृपादसंवाहनादिना स्पर्शः कर्मभिरित्यादिनरलीलयोक्तं यतः तत् स पादसंस्पर्श एव मे श्रेयः परमपुरुषार्थः १६ ताभिः स्वस्वोद्वाहभाग्य त तज्ज्ञया संक्षेपेणोक्तं मन्वाना तत्र च द्रौपदी स्वोद्वाहे द्यम
प्रवृष्टं मन्वाना तर्कयंती तद्द्वयसहमाना सपत्नीनां मुक्तिसमाप्त्यावकाशं प्राप्यासंकोचेन स्तोद्वाहवृत्तमाह ममेति हे राज्ञि अच्युतस्य देवक्यां तादृशं जन्म व्रजक्रीडादिकर्म च मुहुः श्रुत्वा भद्राया इव ममापि चित्तं मुकुं
दे आसहर्षं बहुवल्लभे तस्मिन् कथमासेत्याशंक्य एवं विचारादित्याशयेनाह किलेति स विचार्य पद्महस्तया लक्ष्म्या रुद्रादीन् दूरतो हित्वा वृतः क्षीरोदमथने इति विचार्य ममापि चित्तं तस्मिन्नेवासीदित्यर्थः
यद्वा मयैव लीलापद्महस्तया स लोकपान् राज्ञो हित्वा वृतः श्लेषेण लक्ष्मीदृष्टान्तो व्यज्यते १७ तत्र श्रीकृष्णप्राप्तावुपायमकारयत् १८ तमेवाह यथेति नवस्वयंवरे पार्थप्रातीछया यादृशो मत्स्यस्तथैव सिंत्रो कृत
स्तथैव मत्स्यित्रापि भगवत्प्राप्तीछये त्यर्थः पार्थप्राप्त्या कृत इति पाठे पार्थेपुण्यानिहतो मत्स्यो यथा तथा भगवदिप्सया कृत इति शेषः मत्स्यित्वकृतस्तु ततोपि दुर्भेद इत्याह अयं त्विति बहिः सर्वत आछन्नः केवलं सजलेन जल
पूर्णस्तंभपरितः स्थितपरिखामंडले दृश्यते जलगर्तस्थितस्तंभमूलस्यागम्यत्वेन साक्षाद्दर्शनात् स तु स्तंभमूले तत एवोर्ध्वदृष्ट्या दृश्यः दूरत एवावरणत्वे दोत्तरं तन्मात्रभेदसंकेतादेव दुर्भेदः अयं तु सर्वज्ञं श्रीकृष्णं विना
सर्वस्यापि सर्वथा दुर्भेद इति भावः १९ एतदाश्चर्यं लोकनं च २० चापमस्थित्राः स्थापितं चापविशेषं मद्धिय इति वैधेयत्वविशेषः २१ तथापि आदायेति द्वितीकोटो योजयितुं ज्यामाकृष्य स्थिता ज्यायोजनाशक्ताश्च्यावितं चापेन ह
ताः २२ लक्ष्यस्यावस्थितिं २३ यतोयस्तवान् ज्ञात्वा चावितर्क्य सबाणो मत्स्यं नाछिनत् केवलं यस्पर्शं बाणेक देशेन संयोगादिति भावः अत्रार्जुनस्य प्रवृत्तिर्भगवन्माहात्म्यख्यापनार्था २४ राजन्येति युग्मकं २५ अभिजि
ति जयादिप्रदेष्टमहूर्ते मध्याह्ने इत्यर्थः २६ जयशब्दसहितादिविभुविच २७ भगवत्याप्ति हर्षेणाति शायितां स्वशोभामेव वर्णयन्त्याह तदिति द्वाभ्यां नत्तदाकल्लस्वनन्नूपुरायुताभ्यां पादाभ्यां रंगप्राविशं विवाहोचि
तवान्नूतलेकोशेयातं भेवोस्त्रेनिवीय प्राव्रस्य परिधाय च सत्नादिक्रीड्या महितो हासआनंदहेतुकमुखप्रसादो यत्र तत् मुखं यस्या इति २८ उरवः कुंतलकुंडलयोस्त्विषः शोभा यत्र ते गंडस्थले यत्र तत् शिशिरः शीतः मंदो
हासो येषु तैः श्रीकृष्णकयक्षे रनुरक्तहृदया यद्वा मुरारेरनुरक्तं हृदयं यस्यां सा परितो राज्ञोवलयया दृष्ट्वा २९ तावत्क्षण एव ३० एवमुक्तप्रकारेणापि वृतेपि दूराशागतस्ता जरासंधादयस्पर्धमानाः यतो हृच्छयेन कामे
न विवशाः हे याज्ञसेनि द्रौपदीतिविस्मयात् ३१ हयश्रेष्ठानां चतुष्टयं यत्रतं रथमितिवेगादि द्वाभ्यामालिंग्य द्वाभ्यां धनुरादिग्रहणार्थं चतुर्भुजः आजौ युद्धार्थं सन्नद्ध उद्यतः सन् तस्थौ रथोपर्यूर्ध्वावस्थाने नासीत् ३२
मिषतां पश्यतां मित्यनादरे षष्ठी मृगाननाद्दृत्य सिंहइव तानना दृत्य दारुकोरथं यापयामासेत्यर्थः ३३ केचन अन्वसज्जंत पृछतः सक्ता बभूवुः अन्ये हीनवेगतया सक्तुमशक्ता दूरत एव स्थिता इति भावः पथि निषद्धं ऊ
र्ध्वकृतचापाः यतः संयता युद्धोद्यताः ग्रामसिंहाः श्वानः सिंहं यथेति श्वानोपि चापवद्वक्रोर्ध्वपुछाः ३४ केचिछिन्नबाहवः केचिछिन्नाग्रयः केचिछिन्नकंधराः अतः केचिस्येवुरेके दुद्रुवुः ३५ ततः तत्पश्चात्तान् जित्वैवेति
भावः रविं छादयंतीति ते ध्वजपटा यस्यां चित्राणि तोरणानि यस्यां सा च सा च स्वकेतनं निजावासं कुशस्थलीपुरीं गीतवाद्यादिनानंदेन विवेश स्वकेतनं स्वमंडलं विद्युन्मा सूर्य इवेति स्वयं भ्राजत्वल्यमानस्तत्रस्त्रांश्वेवि
द्योतयन्निति भावः ३६ द्वारकायामागतो मे पिता पाणिग्रहकाले भगवतः सुहृदादीनपूजयत् ३७ सर्वाभिः संपद्भिः धनादिभिः सहपूर्णायापि दानहेतुः भक्तितइति रवेरुपदवेतिभावः ३८ एवं प्रेमावेशेन वर्णइत्वा
सल्लज्जा इव स्वकृत्येप्ता स्तोषयंस्तपसंहरति आत्मेति इमा अष्टौ वयं सर्वसंगनिवृत्त्यादि सा धनैन खलु कृष्णस्य तस्य साक्षाद्गृहदासिका अभूमेति ३९ नो ममिति त्रिकं यो स्मान् परिणिनाय एतस्येति लतीयेनान्वयात्
क्षितिज येद्दिग्विजये जितानां राज्ञां कन्या अस्मान् तो मेन रुद्धास्तात्वा तेसगणं निहत्याथ अनंतरमेव तद्रोधान्निर्मुच्य परिणिनाय उद्वहति स्मे निर्मोके हेतुः संसृतेरपि मोक्षयति किं पुनस्तद्रोधात्तत्पादांबुजं निरं
तरं स्मरंतीः आप्तकामोपि प्रियइति कारुण्यं यद्वा आप्तकामोपि परिणिनाये त्यत्र हेतुः संसृतिविमोक्षमपि दिनिर्मुच्य किमुत स्वर्गादिकं निर्मुच्य पादांबुजमेवानुस्मरंतीरिति ४० अत एव साम्राज्यादिकमपि नेच्छामः किंतु तद्दा
स्यमेवेत्याहुः नेति द्वाभ्यां हे साध्वि पातिव्रत्यनिष्ठावित्ते साम्राज्यं सार्वभौमपदं स्वाराज्यमिंद्रपदं भोज्यमत द्भुभयभोगवत्त्वं वैराज्यमणिमादिभाक् पारमेष्ठ्यं हिरण्यगर्भपदं आनंत्यं निर्विकल्पकब्रह्मानंदं हरेः प
दं सालोक्यादिकमपि साम्राज्यादीनां यथोत्तरं श्रेष्ठ्यं एतत्सर्वमनेन दीयमानमपि न कामयामहे ४१ किमपि किं कल्पुं कामयत्वेतत्राहुः कामयामह इति सर्वसंपत्तियुतं पादरज एवं मूर्ध्ना वोढुं कामयामहे तत्रा
पियत् श्रियः कुचकुंकुमगंधेनाढ्यं प्राप्तसंपद्विशेषं श्रीरत्र राधिका रुक्मिणीरूपश्रीकुंकुमांकरजसो नित्यप्राप्तेः तथा च राधिकावत्प्रेमप्रकर्षं लब्धुं तत्कुचकुंकुमांक रज एवेछाम इति भावः गदाभृत इति नर
कवधार्थं गदया भिन्नेनाद्रिरित्यादिना प्रागुक्तं गदाधरत्वाभिप्रायेण ४२ तदेव तत्स्पृहाकरणाय विशिंषति व्रजस्त्रिय इति राकेत राश्चंद्रावल्याद्या इत्यर्थः तर्हि तद्दुर्लभं कथं प्राप्स्यथ तत्राहुः पुलिंद्य इत्यादि वां
छंति वांछुः कल्पतरुस्वभावात् तस्मात्प्रापुश्चेत्यर्थः प्रेमैकरूपत्वभत्वादिति भावः तृणवीरुधो दुर्वाद्याः आसां वांछाकेवलेन हि भावेन गोप्योगावो नगा मृगा इत्युक्तेः ४ गोपास्त्वगावश्चारयतो महात्मनस्तस्य पाद
स्पर्शमपि वांछंति यद्वा गोपांताः सर्वे नर रजएव वांछंति किंतु पादस्पर्शं च अतो वयमपि तच्च कामयामहे इति भावः यद्वा तत्पादस्य स्पर्शो यस्मात् यस्येति रजसो विशेषणं तच्चरणस्पर्शसुखनिधानमित्यर्थः ४३
इति श्रीमद्भागवतदशमस्कंधमध्यगः त्र्यशीतितमो पूरणो ध्यायस्तोषिणीसारसंग्रहे १ इति भागवते उत्तरार्धे त्र्यशीतितमो ध्यायः ८३ द्वैपायनादयोः पारदयो पारचिताकृतिं अपश्यन्नश्रितत्सदानंदं सदा
नंदप्रतिप्रियं १ पूर्वप्रसंगमुपसंहरति श्रुत्वेति अत्र कुंती गांधार्यौः द्रौपद्यादि मुखं तत एव श्रवणं नतु साक्षात्ताभ्यः कुंत्यादि समक्षं द्रौपद्यास्तोद्वाविनोदस्य पट्टमहीषितिस्तोद्वाकथनस्य चायोग्यत्वात् एवं स्त्राः श्री
कृष्णप्रियागोप्योपि परं परये वश्रुत्वेति ज्ञेयं गोपीनां तत्र सत्त्वे तासां कथा भाएवास्यो श्चर्येवेन प्रस्ताव्यस्तात् यद्वा स्वगोप्यो द्रौपद्यादिपात्त्य थिच्चयस्तासख्या दयः सर्वा तेनिर्देशात् रोयाः स्त्रबल्लपुत्री गांधारि माध
वीसुभद्रा प्रणयंपातिव्रत्यं तानानुबंधं च श्रुत्वा विस्मयं च जग्मुः न केवलं विस्मयो भगद्विषयक प्रीत्युद्वा सश्च जात इत्याह अत्यमश्रुकलेति १ एवं नानाविधकौतुके कौतुकांतरमापन्नमित्याह इतीति एवं विचि
त्रप्रकारेण आजग्मुरायवुरिति पाठे २ मुनीनेवाह द्वैपायनइतित्रिकेण ३ भगवानितिरामविशेषणं दशावतारांतर्गतत्वात् ४ ब्रह्मपुत्रा इति पाठे सनकादयः आदि पदात्पराशरमैत्रेयादयः अत्रागमनो द्यम

ष्टसारीक्रमोक्तेयः ५ प्रागासीनादिति पूर्वं तदागमनाच्छ्रवणादन्यथागते भिगता स्युरिति भावः आदिनानंदादिगोपाः ६ अच्युतो यथार्चयत् तेनैव प्रकारेण सर्वेप्यानर्चुः ७ धर्मगोप्त्री तनुर्यस्य स स्वधर्मरक्षणार्थ
मवतीर्णः महतोपि सदसो यतवाचः कृतमौनस्य अनुशृण्वतः तच्छ्रवणार्थमिति भावः ८ अहो हर्षे वयं मनुष्याः सफलजन्मानः तत्फलं जन्मफलं किं तत् कर्मज्ञानतत्क्रियोगात् दातुं दुष्करं तु च समर्थानां दर्शनं य
त् ९ एवं महातपसां देवानां दुष्प्रापं चेद्दर्शनं यान्ते तेषां देवानां प्रतिमायामेव देवदृष्टीनां देवानामपि दर्शनभाग्यहीनानामल्पतपसामस्माकं दर्शनस्पर्शनादिकं चेदं किं संभवति अपितु नैवातो युष्मत्कृपाविलासितमेवे
दमिति भावः १० तीर्थादयोपि दोषहान्या ज्ञानं जनयंत्येव ततोप्यस्ति भवतामतिशय इत्याह न हीति अम्मयानि जलमयानि तीर्थानि पावनानि न हि का कालेन कालवशेनेत्यर्थः प्रतिमादिदेवा अपि पावना न किं किंतु ते पुनं
तीत्यादि ११ अस्तु प्रतिमादिषु देवताबुद्ध्योपासनं साक्षादग्न्यादिदेवोपासनमपि भूम्यादिजडोपासनमपि च भवादृशोपासनतो तीति निकृष्टमेवेत्याह नाग्निरिति तारकास्तदाकारविमानयानाः बृहस्पत्यादयः
वागिति वाङ्मनसयोरपि ब्रह्मत्वेनोपासनश्रवणात् भेदकर्तारः अहमिंद्रो हरिरिति ज्ञापयितारो न तु परमेश्वरं विपश्चितस्तु परमेश्वरमेव ज्ञापयितारः अतस्तदज्ञानमूलं महदमपराधं मुहूर्तमात्रसेवये
व घ्नंति १२ अतः साधुष्वेव प्रेमास्पदत्वादिबुद्धिरुचिता न्यत्र तु तद्बुद्ध्या सज्जमानोतिमंद इत्याह यस्येति स्वात्मबुद्धिः सर्वतः प्रेमास्पदत्वादिबुद्धिः पित्रादित्रिधातुमूलकशवे रोगाकुले कुणपे जीवं छर्वा भा
गवतांघ्रिरेणुभिः स्पृक्तेः शवतुल्ये इत्यंत मात्मबुद्ध्ययोग्यता कलत्रादौ स्वीया इति बुद्धिः भौमे प्रतिमादौ इज्यधीः देवताधीः यत् यस्य सामान्येपि जलेत्तीर्थधीः स्नानेनैव शुचिरहमिति अभिज्ञेषु तत्त्व
वित्सु यस्यैतानि बुद्धयो न संति कर्हिचिदिति कदाचिदप्येकतरधीसत्वेदोषाभावः स एव गोरिति मंदश्चासो खरोस्त्यं तावधमश्च सिंधुदेशे गोखरवराख्यो ८ दंताकारो निरर्थः पशुरस्ति कचिन्नत्वेछविशेषो प्य
पि अत्र प्रकरणे शिलादिसामान्यदेवप्रतिमैव विवक्षिता भगवत्प्रतिमोपासकस्यैकादशप्राकृतभक्तत्वोक्तेः प्राकृतः प्रारब्धभक्तिः शनैरुत्तमो भविष्यतीति तत्र सिद्धांतितत्वेन तस्य गोखरव्यपदेशा
र्हत्वात् १३ अकुंठमपरिच्छिन्नं ज्ञानं यस्य इत्थं दुरन्वयमननुरूपं तात्पर्यनिश्चयाशक्त्या भ्रमंति संशयाकुला धीर्येषां ते १४ इंगितव्यतां तदुक्तं निजानीश्वरतो चिरं विचार्य सस्मयंतः साश्चर्यं सत्य
कृतोसानंदमन्योन्यं वीक्ष्य हसंत एष जनसंग्रहो लोकशिक्षणमात्रमिति जगतां गुरुं सदाचारप्रवर्तकं तं कृष्णमूचुः १५ तदेव च सो दुरन्वयत्वविवरणपूर्वकं जनसंग्रहरूपत्वं पुनश्चोचुरित्याह मुनय ऊचुरि
ति कथमूचुस्तत्राह यदिति पंचभिः तत्र द्वाभ्यां दुरन्वयत्वविवरणं यस्य मायया तर्केण त्वया वयं मोहितास्तस्य भगवतो विचेष्टितमतर्क्यं तत्वविदसदुत्तमा इति विश्वसृजामीशा इति च रव्याता अपीत्यर्थः यत्
यस्माद्गूढः वेदागोचरोपि भवान् इहया विविधलीलया इंगितव्याप्नति जीववदाचरति परस्मैपदमार्षं १६ एवं सृष्ट्यादिचेष्टितमपि विचित्रमित्याहुः अनीह इति अक्रियः एकः असहाय एव भवानात्मनास्वरूपमात्रेण
तद्विश्वमपि सृजतीत्यादि तत्रापि बहुधा तत्तद्ब्रह्मादि भेदेन नानाविधतया यथा भूमिः स्वरूपमात्रेण सोमे घटादिविकारैर्बहुरूपिणी अथापि न बध्यते तत्तद्दोषैर्न लिप्यते तस्मात्परिपूर्णस्येत चरितं सर्वमेव विडं
बनमस्मादृशानुद्दिशतिरस्कारकमित्यर्थः १७ जनसंग्रहमाहुः अथापीति अतर्क्यशक्तिरपि तत्तत्काले भक्तगुप्तये यः खलनिग्रहः स्वस्मै सत्वं स्वमपि प्राकट्यं बिभर्षि तत्र च स्वलीलया वर्णाश्रमप्रवर्तकः स
सनातनं वेदमार्गं पुष्णासि १८ अस्तु स्वजनाभिगुप्तये प्राकट्यं वेदपथपोषणेन किं तत्राहुः ब्रह्म वेदाख्यं शास्त्रं शुक्लमनुग्रहमयं यत्ते हृदयं तद्रूपं यत्र ब्रह्मणि धर्माद्यनुष्ठानतच्छिक्षणमनोनियमनैः सहसत्
परं ब्रह्म व्यक्तं जगत् अव्यक्तं प्रकृतिस्तेभ्यः परं भगवतत्वं चोपलभ्यमिति १९ एवमपि युष्मान् कथं पूजयामि तत्राहुः तस्मादिति वेदप्रवर्तकं विप्रकुलं वेदप्रमाणस्य तव सत् श्रेष्ठमुपलब्धिस्थानमतः सभाजय
सि तस्मात्वं ब्रह्मण्यानां मुख्यः तत्प्रवर्तनार्थमेव माचरसीति भावः भवत्वेवं किमचिंत्यचिंतनेन वयं तु संप्रति कृतार्था इत्याहुः अद्येति अस्मिन्नस्माकं कुलस्य काल एवास्माकं जन्मसाफल्यं वृत्तं वेदाभ्यासस्य तपसः
परोक्षज्ञानस्य दृशः अपरोक्षज्ञानस्य च जन्मसाफल्यमद्यैव किं कृत्वा सतामाश्रयेण त्वया सह संगं प्राप्य ननु निराकारब्रह्मानुभविनो यूयं किमद्यैव जन्मसाफल्यवर्णायथ तत्राहुः यतस्त्वं श्रेयसां सर्वपुमर्था
नां परावधिरिति २० एवं तन्माहात्म्यचमत्कारेण भक्त्युद्रेकात्प्रणमंति नम इति तुभ्यमिति शेषः तस्मै सर्वगोचराय यतो भगवे कृष्णाय अकुंठमेधसे नावृतज्ञानरूपाय तर्हि कथमत्र नित्यं न तिष्ठत तत्राहुः स्वयो
गेति नेतादृशं ज्ञानं स्पदतिभावः तर्ह्यधुना कथं ज्ञातं तत्राहुः परमात्मनैतवानुग्रहमय्या प्रेरणयेति भावः यद्वा तादृशत्वे हेतुः स्वयोगमाययापि नच्छन्नो महिमा यस्य तस्मै अत्र शेषैश्वर्यप्रकटनात् अतएव पर
मात्मने परप्रियतमायेति २१ अहो दूरस्थाः के वयं यद्भवंतममी निकटस्थास्तपात्रपि एकाशमाकृष्टमयोपि यथावन्न विदंति अत्र हेतुः माययेति यथावत्वमेवाहुः आत्मानं ब्रह्मरूपं कालं सर्वनियामकमीश्वरं भग
वत्स्वरूपं यद्वा एवमत्रत्यापतस्मै नमोच्येति धन्या इत्याहुः ये त्वाममी भूपा युधिष्ठिरादयः वृष्णयो अक्रूराद्याश्च माया जवनिकाच्छन्नं न विदंति न पश्यंति किं स्विनाच तं ब्रह्मरूपमेव अनाच्छन्नत्वेपि आत्मानं निर्विशेषमा
त्रेन पश्यंति किंतु सगुणरूपमपि कालमीश्वरमिति जगत्कारणत्वादिरूपमात्रमपि न पश्यंति किंतु स्निग्धबांधवकुलपतित्वादिरूपमपि राजन्पतिर्गुरुरलं भवतां यदूनामित्युक्तेः २२ तत्र दृष्टांतः यथेति युग्मकं
शयानः स्वप्नद्रष्टा गुणेषु स्वप्नविषयेषु तत्वदृष्टिः सन् नाममात्रमिंद्रियेण मनसा भातं व्याघ्रादिरूपमात्मानं वेद तद्रहितं डित्थादिनामकमात्मानं न वेद यथा एवं त्वां नाममात्रेषु मिथ्याभूतेषु विषयेषु इंद्रियप्रवृत्तिरू
पया मायया भ्रमच्चित्तः पूर्वोक्तो भूपादिः स्मृतेर्विवेकस्य नाशान्न वेदेति यद्वा भूपादीनां सुषुप्तिरविज्ञायाज्ञानात् नात्मोपस्थादि वक्ष्यमाणात् भवतस्माधिरेवेत्याह यथेति एथकूपछेन शयानोपि वृष्ण्या
दीनामप्येकश्चित्पुरुषः आत्मानं स्वां यथावन्न वेद यथावत्वमेवाहुः नामश्रीकृष्णादिसंज्ञा मात्रारूपमिंद्रियाणि च तैराभातं शोभितमेव श्यामसुंदरपद्मपत्रनेत्रादिरूपं वेद न तु तै रहितं परं ब्रह्मरूपं यतो गुणा
नां करुण्यादीनां तत्वं सत्यत्वं पश्यति सः २३ उपसंहरति एवमिति त्वा प्रति अयं सर्वोपि जनः वेदानां स्मृतीनां चोपप्लवाद्दपि नाममात्रेषु येषु केषुचित् विषयेषु या इंद्रियप्रवृत्तिस्तया मायया भ्रमच्चि
त्तो न भवति प्रकटं त्वां सदानुभवतीत्यर्थः एवं त्वा नाममात्रेषु विषयेष्वि एवं त्वां यं जनो ब्रह्मन्नाममात्रेंद्रियेहयेति च पाठो २४ अनुग्रहं प्रार्थयंते तस्येति विरत्वा नु भवस्य ते श्रीहृदयमद्य वयं दृष्टवंतः
तस्मादेवाद्य नो जन्मसाफल्यमित्साधुपक्रम उक्तमिति भावः यतः साधनसाध्यरूपमिति विशेषणत्स्यामाहुः अद्येति तद्धे मुख्योपराधकुलक्षमाकर्तृ गंगादितीर्थं तस्यास्पत्तिस्थानं स्वविपक्वयोगे रासमारामे
ऽर्थं हृदिकृतं नन्वात्मारामत्वादिकमनादृत्य किं भक्तिमेव श्लाघध्वे तत्राहुः उक्तिका उद्भिक्ता या भक्तिस्तया उपहतआशयलक्षणो जीवोपाधिर्येषां त एव त इति मां पुनीन्ये तस्मात् भक्तान् कृत्वानुग्रहा

राम २२

णः अथोन्विति संधिरार्षः २६ इति विज्ञप्तिप्रकारविशेषेण दाशार्हं श्रीकृष्णं गमनानुज्ञां प्रार्थ्य धृतराष्ट्रमिति तन्मध्ये उपविष्टत्वाद् धृतराष्ट्रं युधिष्ठिरानुरोधाच्च स्वस्वाश्रमेषु भक्त्युपदेशार्थं गंतुं बवांछुः २७ तच्छ्री २२
गमिषायुतं मनोज्ञं त्वा भगवत्पितृत्वेन महायशाः भगवद्भक्त्यस्व यज्ञसाल्लोकानां नंदयितुमिति भावः उपसंगम्य चरणौ गृहीत्वा बभाषे स्यात्मनेपदं भावस्तदनित्यत्वादार्षत्वाद्वा २८ सर्वे देवा येषु तेभ्यः यथायाद
शेन कर्मणा कर्मणां निरासः स्वयं ज्ञात्वापि प्रश्नस्तेषामुपदेशाधिकारिणां मर्यादापालनाय २९ अस्मद्दुष्यापभाग्यः श्रीकृष्णपितान्यच्छेयः पृच्छति तत्रापि तं त्यक्त्वा स्मान् पृच्छतीति। विस्मिस्य मुनयस्तत् ऊचुरिमा मास
न् नारदस्तु श्रीकृष्णमहिमज्ञोयं न तु नंदवन्नमाधुरीमात्रमग्नस्तथाप्येवं पृच्छति तत्स्वस्यापि भगवद्वत् यायजूकत्वादि यशो वितानायेवेति ज्ञात्वा सर्वेनवहिष्ठस्य तस्य तादृशाय यशो निलषणं तुच्छं मत्वा अ
धचस्वमहिम गोपनी लीलां कुर्वंतं भगवंतमयमनुवर्तते यद्यहमप्यनुवर्ते मुख्येते वल्लोकस्तस्मादेतदुपाल्लंभव्याजेन तन्महिमाख्यापनीय इत्यालोच्याह नातीति च तुर्भिः तत्रादौ द्वाभ्यां तदुपालंभः द्वाभ्यां
लोकमोहदोषः नापीति पाठांतरं कृष्णं सर्वपुमर्थसारमपि सर्वज्ञमपि लौकिकापत्यतुल्यं मत्वा श्रेयः पुरुषार्थसाधनं पृच्छति तत्रापि नः पृच्छति ३० पूर्वत्र हेतुः संनिकर्षो हीति कर्षोत्रेत्यपि पाठः गां गमं भंग इति शेषः ३१
यस्येति युग्मकं अनुभूतिः स्वरूपप्रकाशलक्षणा कुतश्चिदपि न रिष्यति न नश्यति तदेवाह अस्य विश्वस्य लयादिहेतुनापि कालेन न नश्यति फलेरिका फलवत् नापि विद्युदादिवत्स्वतः न चान्यस्मात् घटादिरिव मु
द्गरादेः न वा गुणतः यथा रूपाद्यंतरोत्पत्तेः पूर्वरूपादिनाशद्वारा देहादिर्नश्यति तथा न नश्यतीति व्यतिरेकेण दृष्टांताः ३२ तं क्लेशरागाद यस्तत्पूर्वकाणि कर्माणि च तत्परिपाकः सुखदुःखे वसत्त्वादिगुणानां प्रवा
हश्च तैरव्याहतानुभवं तेषां तत्रात्यंताभावात् अत एवेश्वरं सर्वस्य द्वैतस्य तत्प्रकाश्यत्वाद् द्वितीयमिमं श्रीकृष्णं अन्यः पृथक्जन एव स्वविभवैः स्वरूपविभवैरपि प्राणेंद्रियैरादिनाततत्त्वदवयवैश्च्योपगू
ढं परिच्छिन्नज्ञानादिकं मन्येतेति संभाव्यते मेघतुषारराहुभिः सूर्यमिवेति अयमर्थः सूर्यो हि मेघादिभिराच्छन्नप्रकाशो भवतीति युक्तं मेघादीनां धूमादिरूपत्वेन सूर्यस्वरूपविभवत्वाभावात् अस्य तु चक्षुराद
यः स्वरूपविभवरूपा अतस्तैराच्छन्नज्ञानादिर्न भवति न हि सूर्यो मेघाद्यैरिव स्वरूपविभवैः किरणैराच्छन्नप्रकाशो भवति तस्मात्वामरंजन एव भगवंतं तथा मन्यत इति ३३ अथानंतरं वसुदेवनारदयोरपरायं ज्ञात्वो
भयसमाधानार्थमित्यर्थः तत्र नारदसमाधानं वसुदेवभावान्नूनमिति पद्येन आनाथ्य हे कृतार्थशिरोमणे जगत्स्वज्येत्यादि संबोध्य राज्ञो राजसु शृण्वत्स्विति तेषामुपदेशार्थं अच्युतेतितदुक्तिप्रामाण्यार्थं ३४
एष एव कर्मणा क्रियमाणेन कर्मणां कृतानां साधु निर्हारः उक्तः शास्त्रज्ञैः कः विश्वासेन विद्युमेवममरवैः सर्वैर्यज्ञेदिति यत् सः तस्यैव यजने हेतुः सर्वेषां यज्ञादीनां फलदातारमिति त्वत्पुत्र एवायं प्रकारांतरेणा
राधनीय इति भावः ३५ साधुत्वमेवाहुः चित्तस्येति अयमेवोक्तप्रकारकः सर्वकर्मनिर्हार एव चित्तस्याधिक्येन शमः शमहेतुः तत्रापि सुगमः सुकरो योगो मोक्षोपायः न तु हठयोगादिवत्कष्टसाध्यः अयमेव
मुख्यो धर्मः भगवत्स्फूर्तिमयत्वेनात्ममुदावहश्च न तु कामस्फूर्तिमयधर्मवन्मात्सर्यादिदुःखावहः ततोयमेव शास्त्रज्ञैः शास्त्ररूपचक्षुर्दर्शनेन प्रकाशितः ३६ शुक्लेन शुद्धेन यत्नाप्तेन न्यायलब्धेन वि
त्तेन श्रद्धया निष्कामतया ईश्वर इज्येतेति यत् अयं पथाः त्रैवर्णिकस्य गृहिणः स्वस्त्ययनः आत्यंतिकक्षेमप्रापकः तथा च विद्युधर्मांतरे याजनाध्यापनप्रतिग्रहलब्धं विप्रस्य शुक्लं वित्तं युद्धप्रजापाल
नादंडाद्यलब्धं क्षत्रियस्य कृषिगोरक्षवाणिज्यलब्धं विशः द्विजशुश्रूषालब्धं शूद्रस्य तद्यलब्धं प्रीतिदत्तं पित्रादिक्रमागतं शुल्कलब्धं च सर्वेषामित्युक्त्वा शुक्लेन वित्तेन कृतं पुण्यं बहुफलं भ
वेदित्युक्तं ३७ भगवति तत्तदर्पणतत्प्रसादेन तत्तद्दूषणापिक्षीयत इत्याहुः वित्तेति यज्ञदानैर्वित्तव्ययमयकर्मभिरुक्तरीत्यानिष्कामतया भगवदिज्यार्थैः गृहेस्तत्र त्यदारसुतादिभिस्तादिज्यार्थं योजितैः
ततो देहासक्तिं लोकद्वयवशीकारेच्छां च देवकालेन देवस्य भगवतः कालेन तदिज्यानुसंधानव्याप्तसर्वावसरेण विसृजेत्त्यक्तुमर्हः स्यात् बुधो विवेकी ३८ अत एव ग्रामे इति अर्धकं ग्रामे गृहाश्रमे ए
षणाक्षये एव गृहादित्याज्यमिति भावः ३९ किं च ऋणैरिति प्रभो हे सर्वेऋणमोचनसमर्थस्य शास्तुः स्यनन ह्येषां बहुमिति भावः तानि ऋणानि तानितिपाठे देवादीन् तदृणानीति तात्पर्यं पतेद्भुभयतो भ्रस्येत विघ्नाकुलः
४० स्यादिति भावः चेदेव द्वाभ्यां मणभ्यां मुक्त एव निर्मुक्तऋणः सन् शरणे भव भगवदर्थं गृहादित्यज ४१ इयं त्वज्ञात भक्तिश्रद्धानां साधकानां रीतिः कृता भवांस्तु प्रथमत एव कृतार्थ इत्याहुः वसुदेवेति वसुना भक्तिलक्ष
णेन दिव्यति तथा भूत नूनं निश्चयेन हरिं सर्वदोषदुःखहरं यतो जगतां देवर्ष्यादीनामीश्वरं प्रकर्षेण तस्य पुत्रत्वेच्छया र्चितवान् यत् यतो वां युवयोः अतस्त्वमपास्तसमस्तऋणः मुक्त भक्तवर्गाच्यें एवेत्यत आज्ञायां
नंतरेणेव तत्रायमुद्यम इति भावः ४२ इतिसूद्धाभिप्रायं तेषां वचः महामना इति तथैव बुबुध इति भावः ४३ श्रीवासुदेवजनकं वसुदेवजनकं परं कर्तुं विप्रा महायागान् महायागानकारयन् १ तदाह तइति सर्व
सामर्थ्यसत्त्वा मुख्यकल्पैः ४४ तदिति युग्मकं ४५ तस्य वसुदेवस्य महिष्यः कुंकुमादिभिः शालिभिः गृहीतार्हणहस्ताः ४६ नेदुरिति सार्धकं गंधर्व्यः गायकानां स्त्रियः ४७ अक्तं नेत्रयोरंजनेन नवनीतेन सर्वांगे
षु त्यक्तं सोमराजमिवेति बाहुनो सोमानां तदधिकतेजाः कश्चन यदि राजा भवेत्तर्हि स उपमीयतेति भावः ४८ ताभिः पत्नीभिः सहितो दीक्षितो विबभौ विरेजे ४९ उत्सवश्च भविष्योरंद्रीन् राज्ञीन् ३ रत्नवद्ध
क्वलकौशायपरिधानाः पीतकौशेयेति क्वचित् यथा स्यात् पातमात्रं च मल्कारायोपमा ५० सर्वजीवानामीशो राजयुवराजाविव निर्यंतारो बंधवो मातुलेयादयः दारसुतबंध्वादिरूपैः स्वस्वैवैभवैः ५१ अनु
यज्ञे यज्ञादिक्रमेण यो विधिस्तेन तदाह अग्नीत्यादीना अग्निहोत्रं ततः प्राकृताः उपदिष्टं गादर्शदीष्टयः ततो वैकृता अतिदिष्टांगाः सौर्यादयः ततः प्राकृताः यज्ञाज्योतिष्टोमादयः वैकृताः सत्रादय इत्येवं स
र्वैर्यज्ञैर्हविर्मंत्रकर्मणा मीश्वरं ५२ अथ यागानंतरं स गवाद्यादक्षिणा अलंकृत्या दात् स्वर्णरत्नादिमहाधनयुताः ५३ सस्नुरवभृथस्नानं चक्रुः अन्ये च विप्राः ५४ अर्धकं स्वात इति नानालंकारेति पंतातरं
स्त्रियस्तस्य महिष्याप्यदुः ५५ ततइति युग्मकं वर्णान् प्रजय दृ प्रजयत् अन्यांश्च श्वपर्यंतान् पारिबर्हेण प्रीतिदानेन ५६ विदर्भादीन् तत्तद्देशान्पादीन् नरोन्येमनुष्याः ५६ श्रीत्यर्धकं लक्ष्मीनिवासमिति
सर्वेषां संतोषोत्पत्तिः ५७ प्रयाणे केषांचिद्विशेषमाह ५८ तेति युग्मकेन अनुज्ञो विदुरः पार्थास्त्रयः यमो नकुलसहदेवौ ५९ सुहृद्दादयोन्ये च जनाविरहदुःखेनोपलक्षितायमुः एवं सर्वेषां भगवता प्रस्थापने
भा·द·उ·तो· व्रजजनैः सहास्नेकोचेन चिरं तत्र स्थातुमिति सूचयन् आह नंद इति तु पदं सर्वतो विशेषात तमाह ६० हस्येति न्यवात्सीदिति च महत्स्येति क्वचित्पाठः ६१ श्रीकृष्णरामान्दसाहित्येन नंदादिभिः संगत्य
सुक्षेत्रे मुनिनृपसुहृत्समाजे कश्चनमहोत्सवः कार्य इति चिरकालिको वसुदेवमनोरथः स एवमहार्णवः दुरुर्घटत्वात् तमनायासेनोत्तीर्य प्रीतमनाः सन् सुहृद्भिः सहनं दनिवासं गतस्तान्के रुक्म

२२

रं गृहीत्वा तमाहेत्यर्थः एतच्च तस्य श्रीकृष्णवियोगसांत्वनार्थमिति ज्ञेयं अतएव सर्वेषां यत्त्वदधीना इति सूचयंश्चतुर्भिराह हे तातेति आवयोरपत्यादिषु भेदो नास्तीति भावः ईशकृतत्वात् दुस्त्यजं शूराणां बले
नयोगिनां ज्ञानेनापीत्यर्थः ६२ द्वयोर्मध्ये रन्योन्यगलबंधनवत् स्नेहस्य पारस्परिकत्वेऽसत्त्वे वपाशतायुक्ता ममतत्संयोगाभावेपि तेन मयि बंधो दृढ इत्याह अस्मास्विति कृतज्ञत्वात्स्नेहेन बद्धमशक्येषु सत्तमैः कृतज्ञैर्यामे
त्रीमत्सुतहृदयपालनादिरूपार्पिता सा त्वनुपमापि अफला बद्धुमसमर्थापि कदाचिदपि निवर्तितुं नैव संभाव्या स्यात् ६३ प्रत्युपकारेण निवृत्तिमाशंक्याह प्रागिति कुशलं प्रियं अग्रेवर्तमानानपि वो न पश्यामः किं
पुनर्दूरस्थान् ६४ मा अभूद्दिष्टवशागमः आर्षः मानदेति अन्येभ्यो मानदातॄणां युष्माकमेव सोचितेति भावः ६५ सौहृदेन शैथिल्यं यत्र तच्छ्रिन्नं यस्य ६६ अत्र श्रीनंदोपि श्रीकृष्णे स्वपुत्रत्वं व्यंजयंतं वसुदेवं न किंचित्प्र
त्युवाच किंतु श्रीकृष्णे स्वज्ञातत्वे संदेहाभावेन ज्ञातीन्वो द्रष्टुमेष्याम इत्यादि स्वपुत्रवाक्यैः स्वपुत्रस्य दारसुतादिभिर्वेश्मातः परमतुष्टो बहिः तदुक्तानुसारमेव व्यवजह्रे इति नंदस्य वसुदेवतोपि साधुत्वं व्यंजनाया
याह नंदस्त्विति प्रत्यहं वर्द्धितमानः सन् त्रीन्मासान् सख्युर्वसुदेवस्य प्रियकृद्देवसन् अवसत् श्रीकृष्णे स्वात्मजत्वमव्यंजयन् तं स्वसंगेन नेतुमागृहमकुर्वं श्चोवासेति भावः कथमिव अद्यश्व इति दिनद्वय
मेवावसमिति प्रकारेण ६७ तत इति युग्मकं मासत्रयानंतरं यथा माथुरदेशं प्रति नंद इति शेषः शत्रुपक्षक्षपणस्यावशिष्टत्वात् श्रीकृष्णस्तैः सह न ययावितिज्ञेयं वसुदेवोग्रसेनाभ्यां श्रीकृष्णादिभिरन्यैश्च यदुभिः
कामैः व्रजे श्रीकृष्णप्रत्यागमनाभिलाषैः पूर्यमाणः स्वयं संकल्पेन दृढमाश्वास्यमानः तत्र वसुदेवादिभिरेतावंतं कालं त्वं पुत्राद्युपद्रवेणानागमनं तयोर्वृत्तं संप्रति भविष्यतीत्येवमाश्वासनं श्रीकृष्णमाश्वास्य तु
राती न्वो द्रष्टुमेष्याम इत्यादि युक्तं तस्य समयो यमतः परं शीघ्रमेवागत्य तत्रैव निवत्स्याम इति उद्धवादिभिस्तदनुमोदनेन एवं गोपीष्वपि भगवत आश्वासनमुन्नेयं तथापराद्याभरणादिभिश्च पूर्यमाणः आप्रियमाण इव
पादिबर्हैः तदाभरणादिकं पापितो वसुदेवाद्यैरनुव्रजितः ६९ मनो हर्तुमनीशा इति मनस्तस्मिन्नेवातिष्ठत् निजागमनप्रतिज्ञायुक्तं नंदं गवद्भ्यो महाकेवलं देहेनैव ययुरित्यर्थः माथुरानिति मथुरामिति पाठे ७० बंधुषु नंदा
दिषु प्रति पुनः पुनः परावृत्य दृढं यातेषु सत्सु इति विरहोद्रेकेण तत्स्थाने स्थातुमशक्ते इति भावः तथा तेषु सत्सु श्रीकृष्णागमनासंभवात् श्रीकृष्णदेवताकत्वेन श्रीकृष्णं विना गंतुमक्षमत यातेषु यातेष्वेव ययुरितितास
र्थ ७१ यदुदेवस्य वसुदेवस्य यज्ञाद्युत्सवेन दादिसुहृत्संदर्शनादिकं चाकथयन् वृष्णयः इत्यनुषंगः ७२ इति श्रीमद्भागवते दशमस्कंधे चर्वतनः वैद्याशीतितमोध्यायस्तोषिणीसारसंग्रहे ।। इति चतुराशीतितमोध्या
यः ८४ जनकायज्ञानमदात् यज्ज्ञानमदात् सुदुर्लभं मुनिभिः अनयज्ञननीतनयान् ज्ञननीतनयात् महासुरात् भगवान् १ वसुदेवेन सह भगवतस्तत्त्वज्ञानगोष्ठीमयं कदाचित्कं लीलाविशेषं प्रस्तौति अथेति
लब्धमुन्युपदेशविशेषकुरुक्षेत्रयात्रानंतरं एकदाकदाचित्प्रातर्नित्यवंदनसमये यत आत्मज्यो अतः कृतेति अतएवाशीर्भिरभिनंद्याह प्रीत्या ईश्वरयोरपि स्वपुत्रत्वेत्यंतः संतोषेणेत्यर्थः १ एवमैश्वर्यज्ञानपित्व
भावमिश्रप्रेमवत्त्वेपि तदानीमैश्वर्यज्ञानप्राबल्ये हेतुं व्यंजयन्नाह मुनीनामिति सतज्ज्ञन्मकाले ऐश्वर्यज्ञानवान् मुहुःश्रुतवीर्यः ज्ञातवित्रंभः संप्रति च मुनिवचः श्रुत्वा ऐश्वर्यद्योतिपदैः संबोध्याह तथेवाह कृष्णेति हेभ
गवन् वीप्सा तद्दार्ढ्याय महायोगिन् योगमायाश्रय हे संकर्षण द्वितीयव्यूहत्वात् श्रीकृष्णेन संकृष्यते नित्यं सहचरः क्रियते तेन तथाभूत सनातन नित्यसिद्ध युवामस्य विश्वस्य यथाक्रमं ध्येयं कारणभूतं च प्रधानं श्रेष्ठं प्र
कृतेः परं भगवद्रूपं पुरुषः प्रकृतीक्षणकर्ता भगवदंशश्चतो स्थइतियत् तद्यथास्यात्तथाजानामि तत्रापि साक्षात्परौ सर्वमूलस्वरूपभूतौ न तु तयोरंशादिरूपौ च परौ २ सर्वमूलस्वरूपत्वमेव दर्शयन् संकर्षणस्यापि
तदंशत्वमभिप्रयन् तमेव स्तौति त्रिभिः यत्रेति इदं चराचरात्मकं सर्वं यत्रस्याद्येन स्यादि स्यादि योजयित्वा स भगवान् श्रीकृष्णाख्यस्त्वमेव साक्षाद्यतः प्रकृतिपुरुषयोरीश्वर आश्रय इति योज्यं तत्र यत्रेत्यनेनाधारः येने
तिकर्तृकरणं च यत इत्यपादानं यस्य संबंधीति दंडादिकरणातिरिक्तचीवरादिवत् इष्टाद्युद्दिहेतुवर्गोक्तेः यस्मा इति संप्रदानं यद्यदिति देवानमृतमाशयतीत्यादिकयोः प्रयोज्यकर्म शुद्धकर्मणोः संग्रहः ननु प्रयोज्यक
र्मभिन्नं शुद्धकर्म नास्त्येव तंदुलं पचतीत्यादौ तंदुलः पक्वो भवतीतं पक्वं करोतीत्यादेरर्थात् तदुक्तेर्भवत्यर्थस्य कर्तान्विकरोतेः कर्मजायत इति भविता तमपेक्ष्याथ प्रयोज्यत्वं प्रपद्यत इति च मैवं अवस्थाभेदेन भेदस
द्भावात् तंदुलः पक्वो भवतीत्यादौ हि तंदुल ओदनो भवति ततंदुलमोदनं करोतीत्यर्थो न पूर्वावस्थस्य तंदुलादेः प्रयोज्यकर्मत्वादुत्तरावस्थौदनादेः शुद्धकर्मत्वात् यथा येन प्रकारेणेति क्रियाविशेषणानां यद्यस्मि
न्काल इति कालशक्तेः संग्रहः स्यादिति सर्वक्रियोपलक्षणं ३ तत्र सृष्टिधारणपोषणक्रियाद्युदाहरति एतदिति आत्मन् आत्मनि अधिकरणे आत्मनाकरणेन आत्मसृष्टमित्यवसिष्टकारकसंग्रहः आत्मनाकर्त्रा आत्म
नेसंप्रदानाय आत्मन आपादानात् आत्मनः संबंधेन सृष्टं आत्मरूपं सृष्टमिति पंचविधसमासात् एवमनुप्रविश्यात्मन्येव बिभर्षि धारयसि पुष्णासि च आत्मनैव निभर्षि प्राणः क्रियाशक्तिः जीवः ज्ञानशक्तिश्च सन्नि
तिधारणादिकरणकर्मरूपोपि भवन्नित्यर्थः ५ ननु प्राणादीनां विचित्रशक्तीनां कारणत्वावगमात् कथं ममैव सर्वकारकत्वं तत्राह प्राणादीनामिति प्राणः सूत्रात्मा तदादीनां विश्वकारणानां याः शक्तयस्ताः परस्परमका
रणस्य तवैव कुतः तेषां त्वत्पारतंत्र्यात् तमेव तेषामपि स्वव्यापारे स्वातंत्र्यमेवास्तु तत्राह नैसा इत्स्यात्तद्धयोरिति चेतनाचेतनत्वेन तवप्राणादिवर्गस्य च विसदृशत्वान्न तवद्भवक्ष्यनां तेषां स्वातंत्र्यमित्यर्थः अतश्चे
ष्टमानानां तेषां चेष्टेव न शक्तिर्यथा वायोः शक्त्यात्मणादेश्चलनमेव न तु चलनशक्तिरिति ६ शक्तीराह कांतिरिति पंचभिः या चंद्रस्य कांतिर्या दृग्नेस्तेजः अर्कस्य प्रभा ऋक्षविद्युतां सत्ता स्फुरणमात्रं तदर्थं तोन
स्तेतो भवो नित्यमहादिस्य गतं तेजः ईश्यादि स्मृतेः भूमेर्वृत्तिराधारत्वं गंधश्च भवान् तवैव शक्तिरित्यर्थः ७ अपां तृप्तिहेतुत्वं जीवनहेतुत्वं च ता आपश्च तासां रसश्च त्वमेव वायोः ओजः सह आदितवैव शक्तिः
चेष्टाप्रयत्नः गतिश्चलनं हदैवतत्त्वद्रूपेणानंत भासमान तथेश्वरेति गौडपाठः ८ दिशामुदया चलोपपाधिनाकाशेकल्पितानामवकाशश्च तादिशश्च खमखंडाकाशश्च स्फूलाकाशस्याश्रयः शब्दतन्मा
त्रारख्याः स्फोटः परावागित्यर्थः नादः पश्यंती ओंकारो मध्यमा वर्ण आकृतीनां घटादीनां पृथक् कृतिते देनाभिधानं यस्मात्स्पदं वर्णपदात्मिका वैखरी च त्वमित्यर्थः ९ इंद्रियाणामिंद्रियं विषयप्रकाशनशक्तिः
देवाश्चेंद्रियनियंतारः तदनुग्रहस्तेषां तन्नियमनशक्तिः अवबोधो ध्यवसायशक्तिः जीवोपाधेर्बुद्धेस्त्वानुस्मृतिर्धारणासती भगवन्निष्ठानुकूला १० भूतानां कारणं भूतादिस्तामसोहंकारः इंद्रियाणां कार
णं तैजसोहंकारः विकल्पानां देवानां कारणं वैकारिकः सात्विकोहंकारश्च यं अनुशाययिनां जीवानां संसारनिदानं प्रधानं त्वं ११ किंच नाशशीलेषु भावेषु पदनश्वरमवशिष्यमाणं ब्रह्म तदेवाविकृतं त्वम
सि विकारेषु घटकुंडलादिषु द्रव्यमात्रं मृत्सुवर्णादिमात्रमनश्वरं यथा तद्वत् १२ ननु तत्तच्छक्तिरूपत्वे तत्तद्दोषेणाहमपि दुष्येयं तत्राह सत्वमिति तद्वत्तेयस्तद्विकारा महदादयश्च सर्वे आद्या साक्षात्सर्वे
ब्रह्मणि त्वयि कल्पिताः कल्पितत्वाच्चेषां त्वयि सत्स्वेपि स्पर्शो नास्तीति न दोष इति भावः १३ कल्पितानां कथं सत्यत्वेन प्रतीतिरित्याशंक्य सत्तात्मदस्य तवानुवर्तनादिति व्यतिरेकपुरःसरमाह तस्मो

दिति कल्पितत्वादेवाभीविकल्पिता भावा यर्हि सुप्तिप्रलयादौ न संति कल्पकाभावात्तदा त्वमप्येषु विकारेषु नासि सत्वेन नानुवर्तसे अन्यदा स्वच्छिस्थित्यादौ तु व्यावहारिकः व्यावहारिकसत्तासाधक तथा तेषु वर्तस
इत्यर्थः १५ इदं शास्त्रदत्तान्मूलश्यायं जीवानां संसार इति तानुत्क्रोशचति गुणेति एतस्मिन्नत्यक्षे गुणानां स्वस्कारुण्यं दीनोप्रवाहे सत्यपि अखिलस्यात्मनो जीवस्य दुर्ज्ञेयां गतिं शरणं त्वां प्रत्यबुध्वा अजानंतः अबु
ध्येति वा पाठः तेनाबोधेन कृतैः कर्मभिः संसरंति १६ विशेषतो नरं शोचति यदृच्छयेति लब्धां मनुष्यतां सुकल्पां स्वार्थसाधनयोग्यां स्वार्थे पुरुषार्थे त्वयि अनवहितस्य १७ तत्र सप्रणयरोषमिवाह असा
विति देहेहमिति देहस्यान्वयादिषु पुत्रादिषु ममेति १८ त्वत्सुतयोरावयोः किमिदमारोपयसि तत्राह युवामिति ह निश्चितं तथास्म कथितवानसि जन्मकाले इत्यर्थः १९ तत्तस्मात्तवैव जीवानां बंधकत्वात्
तेषां तन्निवृत्त्यर्थं शरणं गतोस्मि नन्वयोग्यं भक्त एव सकथं मुच्येत तत्राह आपन्नेति आपन्नाः शरणागताः नन्वनते जीवाः शरणागताः त्वमेव तदर्थं प्रार्थयसे तत्राह आर्तबंधो इति करुणस्य तव न तदपेक्षे
ति भावः एवं जीवानां निवेदनं कृत्वा भक्तभावोचितदैन्येन निजनिवेदनमाह एतावतेति इंद्रियलांपट्येनेश्वरे पुत्रे सति संपत्तिविशेषः स्यादिति इदमायां यत् येनेंद्रियतर्षेण मर्त्यात्मना मर्त्याकारेण इदस्य मा
ने त्वयि परे परमेश्वरे पत्यबुद्धिरस्मि १९ ननु तवमपि अपत्यबुद्धिः सत्येव स्वप्रतिज्ञासत्यत्वाय युवाभ्यां जातत्वादिस्वांशस्य तद्धर्मीकारेण परिहरति सूतीति किं जगाद तदाह अजो जन्मरहितोप्यहं नौ युवयोः सम्यक्
जन्मजन्मप्रकारं स्वीकृतवानस्मि इति तत्र हेतुमाह निजानां भक्तानां धर्मो भक्तिलक्षणस्तत्पालनाय यद्वा निजस्य दीयो धर्मः स्वभावो भक्तमनोरथपूरणलक्षणस्तस्य गुप्त्यै तर्हि सत्येव मय्यपत्यबुद्धिः के
थमाक्षिप्यते तत्राह गगनवत्तत्तद्दोषास्पृष्ट एव त्वं नानातनूः वराहनरादिजातीयाविदधत् प्रकटयन् क्रीडंतेन हासीति तिरोभावयसि तस्माद्ब्रह्मादेरिव नावयोरपि त्वय्यपत्यबुद्धिर्युक्तेति भावः ननु नि
त्या एव युवां प्राप्ते ये मद्गति मिश्रकृतामेव कुतो दैन्यं कुरुषे तत्राह हे उरुगाय भूम्न अनंत ते भवस्य तत्तद्विभूतिरूपां मायां स्वरूपशक्तिं कोजानात्यपि ज्ञातुमप्यनर्हाणां दीनानां नस्तत्प्राप्तावनाश्वासादिति
भावः २० तमगवांस्तु स्वमहिमव्यक्तौ सोऽङ्गीलेन संकुचित इत्याह आकर्ण्येति पितुरिति संकोचे हेतुः ब्रह्मादिमनोरथागोचरपितृत्वेनायं मया अंगीकृतो मुन्यादिकृतं तमैश्वर्यज्ञानमाजं नाहेति मा संकोचय
ति च तदिति कंसवधातेष्वादितोपि ज्ञानांशो मुनिवाक्यैः पुनरुदित इति प्रहासं कुर्वन्नित्यर्थः मोहकेन हासेन नेश्वर्यज्ञानं तिरोभावयन्निति भावः २१ स्वस्मिन् पुत्रभावं दृढीकुर्तुं ऐश्वर्यमपलपन्नाह वचइ
ति नोस्मान् आवां गदादीश्च पुत्रानुद्दिश्य विनयात् स्तुतिव्याजेन तत्वमसि श्वेतकेतो इतिवदुपदेशात् स्वदीकृतस्तत्वग्रामः ईश्वरत्वे भवरूपः २२ यथा मत्तः मुखाः पुत्राः रूपयाविभाव्यं ते तथा सर्वे विभाव्या
इत्याह अहमिति यूयं युष्माभिरेवं रूपाविषयत्वेन विमृश्या अनुसंधेयाः विमृग्या इत्यपि पाठः ततः संसारिणोपि निस्तरिष्यंतीति भावः २३ तथा विमृग्यतायां हेतुत्वेन जीवानां संसारदशां प्रपंचयति आ
त्मा हीति द्वाभ्यां अद्वितीयः स्वयंज्योतिर्निर्गमादिशून्यो देहत्रयाद्भिन्नो निर्धर्मकोप्यात्मा आत्मनैव सृष्टैः सत्वादिगुणैस्तद्वारात्मनैव कृतेषु भूतेषु देहाद्युपाधिषु बहुधा जन्मजरारोगादिसंसारधर्मवत्तया प्रतीय
ते २४ एतदेव सदृष्टांतं दर्शयति खमिति यथा खवादिभूतानि तत्कृतेषु घटादिषु आविस्तिरोल्पबहुभावादिरूपतां यांति एवं मसावेकोपि नानाविधत्वं यथा त्रयं यथोपाधियाति तथा तथात्मानं मन्यते संस
रतीति यावत् अतस्तया स सर्वोपि संसारी तथा रूपया विमृश्य इति भावः २५ एवं निजैश्वर्यगोपनस्वविषयकपुत्रभाववर्द्धनप्रकारेण भगवतोदाहृतं श्रुत्वा विनष्टमुन्युपदिष्टैश्वर्यादिनानाधीः संस्त
स्मिन्नेव प्रीतियुतमनस्तया तूष्णीमभूत् २६ एवं पितुः स्वस्मिन् पुत्रभावविरोध्यैश्वर्यज्ञानं शमयित्वा मातुरप्यन्यत्र पुत्रभावमशमयदिति दर्शयितुमाह अथैत्यादिना युग्मकं पूर्वमेव सुविस्मितत्वेन
स्थितापि अथ तद्वत् स्वेष्टत्वाभार्थं वसुदेवसंवादमयसमयविशेषत्वाभानंतरमेव प्राहेत्यर्थः २७ समाश्राव्य संबोध्य २८ रामेति युग्मकं योगेश्वराणां सनकादीनामपि ईश्वर अचिंत्यप्रभाव २९
कलिना ध्वस्तसत्वगुणानामतः शास्त्रातिरिक्तक्रमेण वर्तनशीलानामत एव भारभूतानां राज्ञां मर्दनं तेषां निधनार्थं मेमावतीर्णौ अद्येदानीं ते ३० यस्यांशाः पुरुषस्तस्यांशो मायां तदंशा गुणास्तेषां भागेनेके त
देशेन विश्वोत्पत्त्यादयो भवंति तं त्वां गतिं शरणंगतास्मि अद्येति एतावंतं कालमेवं प्राथितमधुनायत् किंचित्प्रार्थितुं शरणं यामीति भावः ३१ अतो गुरोरिव ममाभीष्टं पूरयतमित्याह चिरादिति युग्मं बाल चि
रं मृतस्यापि सुतस्यादाने गुरुदक्षिणारूपं तत्सुतं ३२ एवमति देशेनोक्तमपि उत्कंठया स्पष्टमेवाह नोजेति ३३ चोदितइति चोदिताविति पाठे ३४ विश्वस्यात्मा च देवमाराध्य श्रुत्वेति तथात्मनस्तु सु
तरामालदैवं एवमलभ्या अपि स्वसमीप एव लब्धा दैत्यराट् बलिः सान्वयः सपरिवार इति सर्वेषां तादृशो भावः स्वचिन्तः ३५ तयोर्वेरासनमभेद इदं ध्येयकमेवानीय तस्मिन्नुपानिविष्टयोः सतोः त
योरिति पुनरुक्तिर्वक्तिंतरेण तदेतिवा पाठः यदंबु उपयोरवनेजनोदकं ब्रह्माणमपि व्याप्य जगत्पवित्रयद्वर्तते तो पासे ३६ सवितावित्यत्र महेति वा पाठः विभूतीराह महार्हेति अमृतवत्कृष्यते तानि मिष्टान्ना
दीनि यद्वाम्रतेच भक्षणं फलादिकं च आदिना तल्पपर्यंकादि च ३७ इंद्रस्य सेनेव सेना यस्य सबलिः भगवतो पदांबुजं मुहुः पुनः पुनः शिरसि वक्षसि च धारयन् यद्वाम्हरुद्भूत प्रेमगद्गदयाधिया प्रे
मलक्षणान्याह आनंदेत्यादिना गद्गदाक्षरं यथा स्यात् पाठांतरे ग वर्णो च्चारः ३८ अनंताय संकर्षणाय बृहते शेषरूपेण फणेनैकदेशे विश्वधारणात् कृष्णाय स्वयं भगवत्त्वेन प्रसिद्धाय ब्रह्मणे य
तोवेधसे सर्वकर्त्रे ननु ज्ञानशास्त्रे ब्रह्म सर्वेतत्तयोक्तं योगशास्त्रे च परमात्मा तत्राह सांख्ययोगयोः ज्ञानानां शास्त्रयोर्वितानो यस्मिन् यदेकनिष्ठस्तयोर्विस्तार इत्यर्थः ज्ञानयोगश्च मन्निष्ठ इत्यादि
कपिलदेवोक्तेः अतएव ब्रह्मणे परमात्मने च तुभ्यमेव ३९ दुष्प्रापमपि युष्मत्कृपया केषांचिद्दुर्लभं सुलभमपि भवति यतो राजसतामसानां नः प्राप्तो दृष्टिविषयो जातो ४० देवा इत्येवत्वद्दर्शनमर्हति
नवयमित्याह दैत्येति त्रिकेण ४१ यतस्ते दैत्यादयो वयं च विशुद्धसत्वाधिष्ठानरि अतः शास्त्रस्य शरीरिणी आत्मनिवेदमार्गप्रवर्तके त्वयि निबद्धवैराः अन्ये च मनुष्याः पौंड्रकाद्यास्ता इत्याह देत्यादितुल्याएव
गंधर्वादीनां केवलाश्चिद्धेर प्रसिध्यभावे प्युक्तिदैत्या ग्रत्वेन राजसत्वादिविवक्षया ४२ तादृशत्वे हेतुः केचनेति बद्धवैरेण विशिष्टाः केचन कामतः स्वार्थसाधनायैव भक्त्या विशिष्टाः भावानुवद्ध
वैराएव सुरादयो न तथा न तादृशाः यतः सत्वाविशिष्टाः अत संनिकृष्टाः दर्शनादिना त्वत्सन्निकर्षयोग्याः ४३ तथाप्यस्माभिर्यद्दर्शनं तव प्राप्तं तद्धेतुः केनज्ञेय इत्याह इदमिति इदमिति स्वरूपतद्
स्थमिति विशेषतश्च तव योगमायामैश्वर्यविशेषं योगेशा अपि ज्ञातुं नराः कुर्वंति प्रायइति भक्तानां केषांचिद्वैशेष्यात् ४४ तस्मादेवं कृपालुत्वं ततत्स्मादेव हेतोरस्मान् प्रसीद प्रसादमेवाह निर

पेक्षेमुकैरपि विशेषेण तज्ज्ञानेनैव मग्यं न तु सहसा लभ्यं यद्युवयोः पदं तद्देवसौंदर्यतापहरत्वादिना रविंदं तद्देवधिषणं धिदम्यं तस्मादन्यत् गृहमेवांधकूपः नरकबंधहेतुत्वात्स तत्तद्रूपत्वाच्च तस्मान्निष्क्रम्य विश्वस्य
शरणं रूतो यो ध्रिस्तस्मात् दारविंदं तस्य समीपे लब्ध्वा व्हति दर्सोचितवर्तनं येन तथा भूतः सन् उत चार्थे एकाक्येव च सन् सर्वसखैर्भगवज्ज्ञैः सह चरामि सर्वमरवत्वान्मज्जुगुप्सां न करिष्यंतीति भावः ७५ यद्यस्मा
त्तादृशानुग्रहीनान् मन्यसे तर्हि स्वागमनप्रयोजनमप्यादिस्यतां तदनुष्ठानेनैव धन्यते स्याह आधीति किंचिदादिश्य इशितव्या ईशा ब्रह्मादयोपि यस्य हे तादृशानिष्पापान् तादृशान्तदादेशयोग्यान् कुरु येन नानु
शासनं वेदरूपं पारं परिकमपि अनुतिष्ठन् विधिकैंकर्यान्मुच्यते किमुत साक्षाद्दात्मविषयकमित्यर्थः ७६ चरमप्रार्थनमनुमोदितुमुपोद्घातं प्रस्तौति आसन्निति ऊर्णायां भार्यायां प्रथमेंतरे स्वायंभुवे मन्वंतरे ते दे
वा अपि कं प्रजापतिमुपहसितवंतः ७७ तेनेति सार्धकं तेनावद्यकर्मणा पापेनासुरीयोनीं गताः तदेवाह अधुना तत्क्षणमेव हिरण्यकशिपोर्जाता इति ते च योगमायया ततो नीताः संतो देवक्या उदरे जाताः स्तेच्च कंसेन विहिंसि
ताः ७८ सार्धद्वयेन प्रस्ताव्यमाह सेत्यर्धकं यतः स्वात्मजान् ते च न गोपनीया इति सनर्माह तद्भ्रमेइति ७९ स्वचिकीर्षितमाह इतइति द्वाभ्यां एषामपि कुत्रात्तत्तविष्यतीत्याह ततइति शापेति शापादिति पाठे प्रथमतस्ता
न देवलोकं यास्यंतीति लोगछावशेषात् ८० तानेव नाम्ना निर्दिशन् तोगांते मद्धामापि प्राप्स्यतीत्याह स्मरेति स्मरस्यैव पूर्वकीर्तिमदिति नामस तां गतिमां ८१ पूजितौ तदर्पणादिना संमानितो मातुः मात्रे ददतुः ८२ बा
लकान्मात्रतोषार्थं श्रीकृष्णेछया बालकरूपेण विर्भूतान् कीर्तिमदादीन् कृष्णमरामोचपरिष्वज्य ८३ सुतानां श्रीकृष्णादीनांस्पर्शेन परिस्नुतं स्तनं परिप्लुतेति क्वचित् मायया योगमायाख्यया स्तक्षिणन्निज नाना
लीलानिर्माणं प्रसिद्धार्थ द्वारासाधारणज्ञानबोधार्थं स्वव्यादिपदप्रयोगः ८४ पीत्वेति युग्मकं स्वतेअमृततमयमानंदमयं तत्रापि गदाभृतः पीतशेषं गदाभृतइति गदामादाय पातालगमनादिकं व्यज्यते
पीतशेषमिति मातुरिछया प्रथमं तदा भगवता पानं ततस्तैरिति सूच्यते भगवदंगस्पर्शस्यात्त देवत्वादिज्ञानाः तदा सनानुसारेण संप्रति तन्मात्रज्ञानस्य भगवतादानात् ८५ दिवौकसामित्यत्र विहा
य सेति पाठे धाम देवलोकं ८६ एवं भगवतास्वस्मिन्नेव तस्याः स्नेहो रक्षित इत्याह तमिति आगमनपूर्वकं निर्गमं तेषां जन्मादिकं च श्रीकृष्णेन वकंसवंचनादि कार्याय मायया रचितं मेनेइत्यर्थः स्नेहाददर्श
नादिति भावः ८७ अथ शास्त्रोमुक्तिकालमासन्नमाशंक्य ग्रंथमाशु समापयितुं श्रीकृष्णकथामुपसंहरन्नाह एवमिति अनंतानि प्रतिक्षणं युगपदपरिमितलीलाविष्कारस्य नारदेन दर्शनात् ८८ अथ गुरु
भिः श्रीशुकाचार्यैर्वर्णिते नैवं भूतश्रीकृष्णचरिते नोल्लसितः स्वतोप्युपसंहारानुरूपमाशीर्वादं प्रायेण चरितमाहात्म्यानुवादेन श्रोत्रेस्तोषयन् आह य इति इदं पूर्वोक्तं किंचिदपि तच्चरितं अनुनिरंतर
मिति सकृच्छ्रवणस्यैव रुच्युत्पादकत्वादनुवाद एव योग्यता चेत्स्वपरकृतार्थतार्थमनुश्रावयेद्वा अमृतं परानंदरूपा कीर्तिर्यस्य तस्य अतएव व्यासपुत्रेर्वर्णितं सर्वस्य जगतोघभिन्नत्तितत् अत्लंनिःशेषं यथो
भवति तथा न तु कृष्णादिवत् अतएव श्रीकृष्णेकृतमावेशितं चित्तं यस्य स इत्यस्मिंल्लोके महासुखं पारलौकिकमित्याह तस्य कालादिभयरहितं धाममल्लोकं यातीति एवं साधकानां फलक्रमः सिद्धानां सद्यः स्वयं फलता
माह भक्तानां सुखावहं कर्णोत्तरणरूपमिति ८९ इति श्रीमद्भागवत दशमस्कंधे कृष्णः पंचाशीतितमोध्यायस्तोषिणी सारसंग्रहे १ इति भागवते दशमे उत्तरार्धे पंचाशीतितमोध्यायः ८५ अर्जुनो हृत्कंज
हारो जहारोपेंद्रसोदरीं अनुमेने सदारामो सदारामोदितानराः १ सुभद्रासुमतीउद्यास्मिन्सुदरे सुरराट्सुते रत्कानदुर्योधने दुर्ज्ञौ दुर्मतिमानवे २ अथोपसंहारमुद्रामालक्ष्य परीक्षितभीत इव पुनस्तत्कथाम
वतारयितुं भगवतास्वसंबंधे मुख्यहेतुभूताया पितामह्याविवाहं चिरं प्रष्टुमिच्छन्पृच्छति ब्रह्मन्निति यथोपयेमेते न प्रकारेण तदुपयमनं वेदितुमिच्छामः अप्युक्तं ठायाहेतुः येति १ अर्जुन इति सार्धकं तां दुर्योधना
यरामएवदातुमिच्छति अपरे वसुदेवादयो नेत्येवं मातुलेयीमश्टणोत् ३ अर्धकं तल्लिप्सुरिति शेषषष्ठ्या समासः तां लिप्सुरित्यर्थः रामवंचनाय भिक्षाव्याजेनोतः पुरप्रवेशायेच त्रिदंडी यतिर्भूत्वा ३ अज्ञान
तेति श्रीकृष्णलीलाज्ञत्या माहितत्वादिति भावः ४ एकदा चातुर्मास्यांते तद्गृहमना शंकयेति भावः ५ मातिथ्येन निमंत्र्य गृहमानीय बलेन श्रद्धया यस्यापरिविष्टं तद्भैक्ष्यं बुभुजे किलार्जुनः ६ महतीं प्रौढां वीरेति धी
रेति पाठे रतिभावेन क्षुभितं मनो निदधे ६ वीक्ष्य शेषेण दृष्ट्यास्तायं यतिः किंतु कोपि मम पतित्वार्ह इति वेदग्ध्याज्ञात्वा हर्षेण नर्मणा च हसंती कुलीनत्वाद्व्रीडितकटाक्षा च ७ अंतरं हर्तुमवसरं कामेन चलस्थि
तः अतः शं पौरसंमानजं सुखं शांतिसुखं वा ८ महत्यामिति युग्मकं पित्रस्या श्रीकृष्णेन चानुमतः अतएव रथस्थो तस्मै रथसामग्रीदातुं भगवेते तैव रथमारोहिता ९ आसमंतात् रुध्यत आवरणं कुर्वतः १० अनुसा
रिताः अन्वगाम्यतेति पाठे ११ पारिबर्हाणि वरवध्वोर्देयानि मुदेति श्रीकृष्णाद्यनुमत्यैव ते न हृतेति ज्ञानादिति भावः पारिबर्हाण्याह महेति उपस्कराः पर्यंकादयः १२ मिथिलामायया वीशामायया वीशाकृत
नः द्विधा भूत्वा मुनियुतो नियुतो स्वगृहाहान्वितो १ वीक्ष्य सकृत्क्रयोर्द्वैतं विदेहस्थितयोरपि एकएवाद्वितीयोपि तनुद्वैतमदर्शयत् २ अथस्वयं प्रत्यक्षतो नुभूतं तत्स्वचरितविशेषमपृष्टमपि स्वयमेव समस्त्वाह स्या
ह श्रुकुंठवाचेति मध्ये पुनरुक्तिः कथांतरापेक्षया श्रीकृष्णस्येति तत्स्वामीकः कृष्णोपवैकया भक्त्या पूर्णः अनाहृता अपि सर्वाशान स्थिता धर्मादयो यस्य विषये घल्पकः १३ विदेहेषु देशेषु अनीहया नुद्यम
नागतं यदृक्षोग्यं तेन संपादित भगवत्स्वज्ञादिक्रियः १४ तत्र देवानुकूल्यमप्यस्तीत्याह यात्रेति तु एव शरीरादिनिर्वाहमात्रमेव देवाद्वीश्वरादुद्धेतोः उतएवउपनमत्येव योगक्षेमं वहाम्यहमित्युक्तेः तौनतेन तुष्टः १५
तद्राष्ट्रस्य राजापि तथा भक्त्यादिनाश्रूदेवसदृशः राजत्वकृतको षोभिमानशून्यः अतो द्वावप्यच्युतप्रियौ १६ अतएवतयोः प्रसन्न इति युग्मकं नारदादयो येमुनयस्तैः सहा रूस्य १७ कृष्णो व्यासः रामोता
र्गवः अहंशुकः १८ हेनृपनृपाइति पाठे तत्तद्देशपतयः गृहैः सहितं सूर्यमिति अकृतोपमा १९ आनर्ताद्यर्णात देशीयान्नरानार्यः अन्ये अन्यदेशीयाश्चजनाः उदहनसंस्कृतीघमीक्षणं यत्र ततनेत्रैः पपु
रस्यासन्त्यादहश्युः आनर्तादयः केचन मार्गस्थाः केचित्पार्श्वस्था अपि तेषां कृपया वक्त्रोणापि पथा गमनात् अतएवागाछत्तनेकैरिति वक्ष्यते २० नन्द कथं चित्तु घनं तमत्ताम चक्षुर्भिरपस्यंस्तत्राह तेभ्य
इति भनारीभ्यः पुमान् स्त्रियेत्येकशेषात् स्ववीक्षणेन निजकृपादृष्ट्या विनष्टं तमिस्रमज्ञानं यस्याः सा दृक् येषां क्षेमं पुनरज्ञातानापातेनिरासं अर्थदशां तत्स्वरूपतत्त्वज्ञानं च यतः त्रिलोकगुरुः
सुरैराकाशगामिभिः भक्तिस्तत्रतत्रमिलितैः २१ तस्मैतदर्थं गृहीतमर्हणं यैस्ते पाणयो येषां २२ उत्तमश्लोकं यद्यशः श्रवणात् चिरं दिदृक्षासीत्तमित्यर्थः आशायांतःकरणं कैः शिरोभिरिति श्रीमुख
दर्शनार्थं २३ जगतो गुरुं ब्रह्मादिपूज्यं स्वयोरनुग्रहायैव मुनिसाहित्यादिना प्राप्तं प्रभोः सर्वातीष्ठदानसमर्थस्य विप्रस्यापि भूतदेवस्य पश्चादुक्तिः संस्नानसंकोचेन पश्चात्स्थितत्वात् २४
द्विजैः सहितं २५ अभिप्रेत्यांगीकृत्य उभाभ्यां रूपाभ्यां द्वयोर्गेहं मुनिसाहित्यादिना प्रविवेश ताभ्यामलक्षितः ममैव गृहं न अन्यगृहं यातीत्यविलक्षित २६ उक्तक्रमानुसारेणोदितराज्ञोवतेमानेमा

राम
२५

ह श्रोतुमिति सार्धकं २७ भक्त्या कृत्वा उद्धर्षेः हृदयं यस्य स च स च वहन् धारयन् ईश्वरं तत्तुल्यान्मुनीश्च २८ गं चेति सार्धकं गंधादिभिर्मधुरया वाचा च तान् प्रीणयन् अन्नतर्पितान् स तद्देवक्ष्यमा
ह श्रीकृष्णमिति शेषः गोवृषान्बलिवर्दाः गंधादेरार्थिकः क्रमः शानकेरिति सकोमलत्वात् २९ अयोग्यस्यापि गृहं स्वयमागमनादयालुतां वर्णयन् स्तौति त्वावानिति हि यत आत्मा च दयितो साक्षी प्रकाशकः स्व
दृशास्वप्रकाशकः अथ अतः जीवानां त्वद्दर्शनशान्त्यभावाद्भुतो नौ स्मत्कर्तृके दर्शनं स्वयमेव रूपयागत इत्यर्थः स्मरतां कथंचित् स्मरणमात्रं कुर्वतामपि न तु प्रेमयुक्तानां प्रयासं वा कुर्वतां भूतानां जीवाना
मिति पाठो ३० अथवा स्वं च इति एकांतभक्तान्ममानतो भ्रातृत्वेनापि श्रीजीयात्वेनापि अजः पुत्रत्वेनापि न प्रियः किंतु ते प्येकांतभक्तत्वेनैव मे प्रेष्ठा इत्यर्थः यतियदास्थत तत्स्ववचः ऋतं कर्तुं दर्शयितुं अ
स्मदृग्गोचरो भूत भक्ताभासानस्मान्प्रति अतिकृपा कृतवानित्यर्थः ३१ अतः कोन्विति युग्मकं एवमुक्तवक्ष्यमाणप्रकारकं गुणं वेत्ति स को विसृजेत् मुक्तावपि त्यजेत् निष्किंचनानां त्वदर्थं त्यक्ताशेषाणां
यतः ज्ञातानां त्वदेकनिष्ठानां मुनीनां शास्त्रतत्वमननशीलानां आत्मानमपि ददासि यस्त्वं ३२ यः भक्तकृपालुर्भवान् भक्तार्थमेव अवतीर्यापि नृणां सर्वे प्रामवतछान्ते संसारोपशमाय यशो विस्तारयामा
स ३३ किंचित्स्वार्थयितुं प्रणमति नम इति अकुंठमेधा ज्ञानं यस्येति किमल्पेशाप्यमिति भावः किंचल्लोकहितार्थं नारायणरूपेण तपोलीलामपि कुर्वन् इत्याह नारायणायेति अतोस्माकमपि हितं कर्तुमर्हसी
ति भावः यद्वा जीवाश्रयाय वेदद्रष्ट्रे निर्विकाराय तपःकर्त्रे इति क्रमेणार्थः शांतायेत्यत्र सुशांतमित्यपि पाठः ३५ एवं स्तुत्वा प्रार्थयते दिनानीति गृहान् गृहेषु निवस निवसन्निति पाठः भूमन् सर्वपूर्ण ३५
उपाधिकेन प्रार्थितः ३६ जनको यथेति तद्वत्स्वकृतभक्त्या सावित्लक्षण इत्यर्थः मुनीश्च मुनीन्स इति पाठो ३७ एतान्च्युतादीन् अवनिजे अवनिनिजे क्षालितवान् ३८ महाभाग इति मुनेस्तस्मिन्नादरः
उद्धर्षे हेतुः लब्ध्वेति ३९ तद्भाग्यविशेषं दीर्घछंदसा गायन्नाह फलेति द्वाभ्यां फलानि मंगलापायन भूतानि अर्हणानि अर्घ्यादीनि सुवासनार्थं नीरणभूतेन मिष्टतार्थं शिवबाद्य निक्षिप्त पद्ममु
क्षामत्वक्या चांमृतवत्स्वादूनां भसा अंबुभिरिति क्वचित् ततो गतश्रमस्य सति मध्याह्नस्नानाद्यर्थं केतक्यादिवासितया मृत्स्नाकस्तूर्यादि तुल्ययावा ततो देवपूजाद्यर्थं तुलस्यादिभिः ततस्तेषामेव यथो
पपन्नया पूजया ततश्चाद्यो मत्स्यादिगुणैः सत्ववर्धनैरनाघसान्नेन ४० तस्य निरभिमानतां दर्शयितुमाह स इति अस्य श्रीकृष्णस्य आत्मा मनसि स्फुरंती मनोमयी मूर्तिस्तस्या आश्रयभूतः ब्राह्मणेभ्य
सर्वतीर्थास्पदपादरेणुभिः यः संगमः स कुतो भूदनु विस्मयते ४१ समीपोपविष्टः भार्यानर्तव्याः स्वजनाः पत्न्यादयो पत्न्यानि च तैः सहितः मुनीनामंघ्रिमभिमृशति समर्दयति तथासन् धन्योस्मि कृत
कृतोस्मि इत्यादि सामान्यतः सर्वान्प्रत्युवाचेत्यर्थः ४२ विशेषतो भगवंतं यदुवाच तदाह श्रुतदेव उवाचेति तत्र भगवद्दर्शनेन प्रीतः स्तौति नेति नोस्मत्कर्तृकं दर्शनं परं केवलमद्यास्मिन्नेवावतारेन
प्राप्तः अपितु नैवं किंतु यर्हि इदं सृष्ट्वा आत्मतया आत्मरूपेण प्रविष्टस्तदारभ्यैव न प्राप्तः कदाप्यस्मद्दृष्टिगोचरो न जातस्त्वमित्यर्थः तदिदानीं दर्शनं परमकृपयैवेति भावः तदेवमस्य स्वदीनतामत्याविष्कारकादव
नागमनं व्यज्यते ४३ ततश्च यथा शयानः पुरुष आत्मनस्तव मायया हेतुना मनसा करणेन स्वाप्नं परं लोकं देहादिकं स्वेच्छा कल्पयित्वा तमाविश्य अवभासते तथाहं प्रभासस इति शेषः ४४ नमन्नदृष्टपित
बस्मरणं न संभवतीति सदैन्यमाह शृण्वतामिति ये नित्यं श्रवणकीर्तनादिपरा अतएवामलात्मानस्तेषामेवाविर्मुखे मनसि भासि न तु मादृशानामित्यर्थः ४५ ननु सर्वेषामेव त्वं हृदि स्थितः कथं श्रवणादिपराणामेवत्व
ति तत्राह हृदीति कर्मभिर्भ्रमद्भिर्मतेषां दूरस्थत्वेनाहंकारादिवृत्तिभिस्तिरस्कृतः एवं भूतोपि उपेत गुणः प्राप्तश्रवणादिसंस्कार आत्मा मनो येषां तेषां मतिसमीप एवेत्यर्थः ४६ तदसंपन्नस्य मम युष्मत्संगमे हेतुस्व
कैपेव पर्यवस्यतीत्यानंदेन प्रणमन्नेतस्मै पंचयति नम इति अस्त्विति सदा सत्तामात्रास्ते आध्यात्मविदां त्वत्तत्वज्ञानां परमात्मत्वेन स्फुरते यतः न विद्यते आत्मा यस्मिन् तेस्मै निरुपाधिकाय सत्त्या यच्च सोपा
धिके कल्पिते हि वस्तुनि अधिष्ठानत्वेनात्मा विद्यत इति भावः अतएव स्वात्मना स्वरूपभूतमभूत्स्यां विभक्तो दूरीकृता मृत्स्फुर्येन तस्मै भूतनादिनामप्यमृतदायेत्यर्थः सकारणमनित्यं वैकुंठादिरूपं द्वयमपि लिंगं वेभ
वरूपं ज्ञापकमीप्सितेषु प्राप्नुवते तथापि सर्वेषां दुर्ज्ञेयायेत्याह स्वमाययात्लोकस्थानामसंवृतान्न जगत्संबंधिनां रुध्वाद्युद्धिर्येन तस्मा इति अस्माकं त्वदृष्टो त्वद्रूपैव हेतुरिति भावः ४७ स एवंभूतस्त्वं नःशीक्ष
य यतः स्वभृत्यो तेत्वं च प्रीत्यर्थं किं करवाम तत् यतोहि देवाः स्यानां स्वदेवप्रीणनस्यावश्यकत्वात् संसारक्लिष्टा पूयं कथमनुशीष्यास्तत्राह एतदिति संप्रति नष्टकृच्छ्रोहं त्वदनुशासनानुष्ठानमेव पुरुषार्थमा
शोस इति भावः ४८ सावधानत्वेन श्रुत्वा हर्षेण प्रकृष्टं हसन् यतः सत्कृष्णतानामव्यार्तिहा ४९ सन्मुकुटमणित्वात् स्वस्तोत्यासंकुचन् भक्तवात्सल्यात्स्वभक्तिं तापि स्वभक्तभक्तिं बहुमन्यमानस्तत्प्रार्थितो
पायत्रिक्षयन्नाह ब्रह्मन्निति त्वदनुग्रहप्रयोजनाय सम्यक् मत्साहित्यादिना प्राप्तान् स्वयमागतान् विहृदिस्थेन क्वचित्साक्षाद्भूतेन मया अप्रधानेनैव सह ५० देवादयस्तु न तादृशास्तदेवं भवाभ्येत्याह देवा
इति प्रतिमारूपा साक्षाद्रूपा नाशानैस्तत्रापि चिरकालेनैव पुनंति तदपि सामर्थ्यतेन्यापि पूज्यानामेषामीक्षयैव एतेतु पुनंत एवं चरंतीत्यर्थः ५१ ते पांतादृशत्वं कैमुत्येनाह ब्राह्मण इति तपः स्वधर्मः विद्याशास्त्रज्ञानं
यथालाभतुष्टिः मत्कलामस्फूर्तिर्यैः तैर्यथोत्तरं श्रेष्ठैः रश्रेयस्त्वं किं वाच्यमित्यर्थः ५२ एवं भूता ब्राह्मणादेतत्त्वया दृश्यमानेन चतुर्भुजं श्रीकृष्णाख्यमपि तत्र हेतुः सर्वेति मानाधीना प्रमेयसिद्धिरिति प्रमेयरूपान्
मत्तो वेदमयो विप्रः श्रेष्ठ इत्यर्थः ५३ एवमत्तातार्चादावेवेज्यबुद्धयः विप्रं जात्यैव पूज्यं तत्रापि गुरुं सर्वोपदेष्टारं अतो मांम दभिज्ञो अतएव परमात्मरूपमवजानाति यतो दुष्प्रज्ञाः तेनासूयवो दोषदृष्ट्यो ५४
तादृशस्य महाभागवत्वमेवात्मानेदेहेतुर्दर्शयति चरेति अस्य विश्वस्य हेतवो भावा महदादयः मम रूपाणि अभिव्यानाति त्वच्चेतसि धारयति तत्र हेतुर्मद्दीक्षयेति तत्रतत्र मदेकस्फुरणात् तदुक्तं सर्वभूतेषु यः पश्येद्भगव
द्भावमात्मनः भूतानि भगवत्यात्मन्येष भागवतोत्तम इति आत्मनो भीष्टो यो भगवद्भावो भगवदवतारस्तमेव सर्वभूतेषु पश्यति आत्मनि स्फुरन् यो भगवान् तत्रैव भूतानि पश्यति स भागवतोत्तम इत्यर्थः ५५ ब्राह्म
णेषु कृष्णीन्मत्वा त्वज्ञान् एतानि स्वपत्लक्षणं सर्वानेव सकृत्कान् ५६ एवमुपदेशं बहुलाश्वोपि चकारेस्यति देशात् उभयो रंतिमं फलमाह स इति स विप्रो मैथिलोन्द्रपश्यादिष्टः तस्यतेषां च गतिं नित्यलोके ५७ भक्तेष्वा
दरवान् अतश्चिरं तत्रावस्थाय सतां वेदानां मार्गं प्रवृत्तिप्रकारं यद्वा संतः श्रेष्ठमार्गं स्वभक्तभक्तिरूपं समनंतरोक्तमुपदिश्य ५८ इति श्रीमद्भागवत दशमस्कंधे भ्रमध्यायः षडशीतितमोध्यायस्तोषिणीसारसं
ग्रहे॰ इति श्रीमदनंतोपाध्यायसूनु काशीनाथोपाध्याय विरचिते तोषिणीसारे श्रीमद्भागवते अष्टादशसहस्त्रसंहितायां दशमस्कंधे उत्तरार्धे षडशीतितमोध्यायः ८६

भा·द·तो·
२५

छप्म

श्रीपरीक्षिदुवाच ब्रह्मन्ब्रह्मण्यनिर्देश्ये निर्गुणे गुणवृत्तयः कथं चरंति श्रुतयः साक्षात्सदसतः परे १ बहिरिव मलिनतरं ते मन इति तज्ज्ञातां वचो धृत्वं श्रुत्वा पठ्वासदुग्धदधि शिवनवनीतैः पांडुरंग इह जयति
१ श्रीधरस्वामिचरणान् श्रीमद्रूपसनातनौ श्रीगुरून्व्रजचरणान्नमस्याम्यसवकृन्मुदा २ श्रीधरस्वामिमधुसूदनप्रमुखदर्शितं अद्वैतशास्त्रानुगुणं नकिंशास्त्रार्थमाप्रियन् ३ आदृत्य तोषणीकारदर्शितां पदयोजनां
मितां श्रुतिनुतिव्याख्या संग्रहेणाभिये यथामति ४ पूर्वाध्याये उषित्वा दिश्यसन्मार्गे इत्यत्र सतां स्वतःप्रमाणभूतानां वेदानां त्रिकांडविषयाणां प्रवृत्तिप्रकारं उद्दिश्येत्युक्तं तथा सर्ववेदमयो विप्रः सर्ववेदमयोस्यहं
इत्यत्र वेदाख्यप्रमाणमयो विप्रः तत्प्रमेय सर्ववेदमयोहमिति स्वस्य वेदप्रमेयत्वमुक्तं तत्र निराकारे ब्रह्मणि सत्यं ज्ञानमनंतं ब्रह्मेत्याद्युपनिषत्कांडस्य पूर्णब्रह्मनराकृति नदमितं ब्रह्माद्वयं शिष्यते यन्मित्रं परमा
नंदं पूर्णं ब्रह्म सनातनमित्यादि सिद्धे साकारे श्रीकृष्णाख्यब्रह्मणि तापिन्याद्युपनिषत्कांडस्य प्रवृत्तिमघटमानां मन्वानः श्रीपरीक्षिदुवाच ब्रह्मन्निति ब्रह्मणि निर्विकल्पके निराकारे अनंतस्वरूपगुणे श्रीकृष्णाख्ये सा
कारे चोभयविधे प्यनिर्देश्ये सर्वप्रत्यक्षरूपत्वात्कथमपि निर्देष्टुमशक्ये श्रूयंत इति श्रुतयः पराग्रूपाः साक्षान्मुख्यया वृत्त्या कथं चरंति प्रवर्तंत इत्यर्थः किंच निर्गुणे प्रकृतिसंबंधिसत्वादिगुणसंबंधरहिते श्रु
तयस्तु गुणवृत्तयः सत्वादिगुणेषु तत्कार्येषु वृत्तिर्यासां तथाभूताः त्रैगुण्यविषया वेदा इति गीतोक्तेः श्रीकृष्णाख्यब्रह्मणोपि निर्गुणत्वं प्रसिद्धमेव तथा च वक्ष्यति हरिर्हि निर्गुणः साक्षात्पुरुषः प्रकृतेः पर इति मां भजंत्यगुणाः सर्वे नि
र्गुणं निरपेक्षकं सुहृदं प्रियमात्मानं साम्यासंगादयो गुणाः इति च व्याख्यास्यते स्वामिपादैः निर्गुणं प्रकृतिगुणैरसंस्पृष्टं मामगुणाः गुणपरिणामभूता न भजंति ये गुणास्ते भजंतीति स्वरूपभूताश्चिद्रूपा गुणा इत्यर्थः विष्णुपुरा
णेपि सत्वादयो न संतीशे यत्र च प्राकृता गुणा इति तर्हि लक्षणा गुणवृत्तिस्त्यां चरंतु तत्राह सदसतः परे इति कारणे त्वां गुणे त्वस्य तत्कार्ये त्वस्य परे तत्संबंधरहिते नहि संबंधशून्यत्र शक्यसंबंधरूपा लक्षणा शक्यनिष्ठगुणसं
बंधमूला गौणी वा संभवति अनेनैव प्रत्यक्षानुमानयोरपि आक्षेपो ज्ञेयः नहि गुणकार्यरूपादिहीने तत्कार्यच चक्षुरादीनां प्रवृत्तिः प्रत्यक्षाधीनव्याप्तिग्रहमूलकानुमानप्रवृत्तिर्वा युज्यते एवं सर्वप्रमाणागोचरे प्रमाणपर
तंत्र मनः प्रवृत्तिरपि कथमित्याक्षेपतात्पर्यं अत एव इत्येतद्वर्णितं राजन् यन्तः प्रश्नः कृतस्त्वया यथा ब्रह्मण्यनिर्देश्ये निर्गुणेपि मनश्चरेदित्युपसंहार इति संक्षेपः १ श्रीशुक उवाच बुद्धींद्रियमनःप्राणान् जनानामसृज
द्विभुः मात्रार्थं च भवार्थं च आत्मनेकल्पनाय च २ अत्र समाधानं श्रीशुक उवाच बुद्धीति जनानां नानाजातिजीवानां महाप्रलये प्रकृत्या सह स्वस्मिंल्लीनानां मात्रार्थे मीयंते गुणकार्याणि गुणातीतं च यानि रिति मात्राः श्रु
तयः स्तादर्थं तद्धारणार्थं बुद्धिमसृजत् बुद्धिं तद्धारणयोग्यताविशिष्टांसृष्ट्वा इत्यर्थः ततश्च भवार्थं पूर्वकांडस्य श्रुत्युक्तत्रिवर्गरूपाभ्युदयप्राप्त्यर्थं तत्साधनयज्ञादिकर्मसादनयोग्यतावंतीद्रियाणि श्रोत्रवागादीन्यसृज
त् ततश्च आत्मने लोकांतरगामिने आत्मनस्तत्तल्लोकगमनपूर्वकं तत्तत्फलभोगाय मनः सर्वविकारात्मकं तत्संपादकमसृजत् मनस्संपत्संपादकं चेतु यतो यतो धावति दैवचोदितं मनो विकारात्मकमाप पंचसु गुणेषु मायारचि
तेषु देह्यसौ प्रपद्यमानः सह तेन जायत इति वसुदेवोक्तेः कल्पनाय कल्पनातीतं यन्निराकारं साकारं च ब्रह्म तत्तज्ज्ञापयितुं क्रियार्थोपपदस्य च कर्मणि स्थानिन इति चतुर्थी प्राणान् बुध्यादीनि सर्वाण्येवासृजत् तेह प्रा
णा इति श्रुतेः इंद्रियादिष्वपि प्राणशब्दप्रयोगात् उत्तरकांडश्रुत्यादिधारणद्वारा यज्ञादिकर्मासादनद्वारा भोगपूर्वकतत्तत्फलवैतृष्ण्यदृढवैराग्यद्वारा च ब्रह्मज्ञानोत्पत्त्यर्थं बुद्धींद्रियमनांस्यसृजदित्यर्थः सर्वापेक्षा च यज्ञादि
श्रुतेरश्ववदित्यधिकरणे ज्ञानोत्पत्तौ यज्ञादिसर्वापेक्षाप्रतिपादनात् तथा च बुध्यादयः श्रुत्यादिद्वारा ब्रह्मज्ञानसाधनना इति बुध्यादिषु श्रुत्यादेश्च तत्तद्योग्यता श्रोत्रादिषु शब्दादिमात्रग्रहणयोग्यतामिवन्यस्तवान् य
तः प्रवृत्तिरिति पर्यवसन्नोर्थः अयंभावः विज्ञानमानंदं ब्रह्मेत्यादिश्रुतयस्तापिन्याश्रुतयश्च मुख्यवृत्त्या वृत्तिज्ञानादिकं प्राकृतत्वात्सत्यादिगुणांश्च प्रतिपादयंत्यो लक्षणया ज्ञानादिस्वरूपमप्राकृतस्वरूपभूतचिद्
पगुणं च ब्रह्म प्रतिपादयंति नचासंगोह्ययं पुरुष इति श्रुतेर्ब्रह्मणि केनचिदपि संबंधाभावात्कथं लक्षणापीति वाच्यं श्रुतेः संयोगसमवायादिसंबंधपरत्वेनाध्यासिकसंबंधस्य सत्वात् आध्यासिकसंबंधानंगीकारे सं
बंधहीनस्य बुध्यादिजगत्कर्तृत्वोपादानत्वाभावेन जगदभावापत्तेः सत्यसंबंधाभावेप्याध्यासिकसंबंधमात्रेण लक्षणया श्रुतीनामद्वितीयब्रह्मबोधनयोग्यतायाः प्रभूणा सृष्टत्वात् अत्र च प्रमाणं तत्वोपनिषदं पुरुषं
पृच्छामि नावेदविन्मनुते तं बृहंतं वेदैश्च सर्वैरहमेव वेद्य इत्यादिश्रुतिस्मृतिवचनान्यथानुपपत्तिरेव यतो वाचो निवर्तंते ० विद्वान्न कवीर्याणि प्रवोचं ० नेजुर्मुकुंदपदवीं श्रुतिभिर्विमृग्यामित्यादिना मुख्यवृत्तेः परा
कृतत्वात् त्रैगुण्यविषया वेदा इति तु मुख्यवृत्त्या त्रैगुण्यविषया इत्यर्थकं पूर्वकांडाभिप्रायं वा तेयं एवं श्रुत्यादिशब्दप्रमाणजन्यसाक्षात्काररूपवृत्तिव्याप्यतया वृत्तिकृतज्ञाननिवृत्त्यधिकरणताख्यया मनः प्रवृत्तिरप्यु
पपद्यते मनसैवानुद्रष्टव्यं दृश्यते त्वग्र्यया बुध्या बुद्धिग्राह्यमतींद्रियमित्याद्युक्तेः यन्मनसा न मनुते इत्यादिश्रुतेस्तु न वृत्तिप्रकाश्येन ब्रह्म प्रकाश्यते स्वयंप्रकाशत्वात् सूर्यादिना दीपादेरिव तत्प्रकाश्येन वृत्तिप्रकाश्यस्य प्रतिह
तत्वाच्चेत्यर्थकत्वात् श्रीकृष्णाख्यब्रह्मणि तु चक्षुरादिजन्यवृत्तिव्याप्यतापि विदितोसि भवान्साक्षात् स एवायं द्विविषयेस्वयंस्थित इत्याद्युक्तेः नच गुणकार्यरूपादिरहितकृष्णब्रह्मविषयकवृत्तिश्चक्षुरादिभिः कथं जन्य
तेति वाच्यं चक्षुरादेस्तद्योग्यताया अपि भगवता सृष्टत्वात् अकल्पने श्रीकृष्णब्रह्मज्ञापयितुं प्रभुश्चक्षुरादींद्रियाणि तद्योग्यतावंत्यसृजदित्यस्याप्यर्थस्योदनीयत्वात् अत्र च निर्गुणत्वद्वविषयत्वबोधकवाक्यद्वयान्यथा
नुपपत्तेरेव मानत्वात् इदानीं घटः इह खपक्षिणश्चरंतीतीत्थं नत्ते इत्यादिसाक्षात्कारेषु सिद्धं तिकालाकाशादिगोचरचाक्षुषवृत्तेः स्वाकारांशस्य तत्र घटाद्याकारवृत्त्यस्य तिव्यनु साक्षिणैव कालादि भास्यते नस्वातंत्र्येण का
लादिगोचरचाक्षुषवृत्तिः रथ्युपेयत इति चेत् इहापि भूतलाद्याकारवृत्त्यैव श्रीकृष्णब्रह्मस्फूर्तिरित्यस्तु कालाकाशादेर्जडत्वात्साक्षिभास्यता श्रीकृष्णस्य तु चिद्रूपत्वेन स्वयंप्रकाशत्वान्न साक्षिभास्यतेति विशेषस्तु
विदितोसि भवान्साक्षादित्यत्र प्रपादितरीत्या सर्वत्रोहनीयः स एवं सति स एष यद्द्विविषयेस्वयंस्थित इत्यादेर्नसद्दृशे तिष्ठति रूपमस्य परां च वाणि व्यत्नणादित्यादिना तत्र तत्रातींद्रियत्वात्यां चेंद्रियजन्यज्ञाना
गोचरत्वार्थकाधोक्षजत्वसमाख्यया च न विरोध उक्तविधवृत्तिव्याप्यत्वे फलव्याप्यत्वाभावे च यथायथं तास्वर्मादिति दिक् २ उक्तं प्रमाणयति सैषेति च सेति सैषा ह्युपनिषद्ब्राह्मी पूर्वेषां पूर्वजैर्धृता श्रद्धया धार
यत्येतां क्षेमं गच्छेदकिंचनः ३ सा प्रसिद्धा एषा बुद्धींद्रियेति श्लोकरूपा यद्वा नत्रोदाहरिष्यमाणं पकरणं स्तोति सैषा जयजयेत्यादिवक्ष्यमाणेति ब्राह्मी ब्रह्मणी चरंति श्रद्धया नैतंडिकतर्कानभिनिवेशेन यः श्रवणादिना
धारयेत् सोकिंचन उपाधिमुक्तः सन् भगवतः पदं प्राप्नुयात् ३ अत्र ते वर्णयिष्यामि कथां नारायणान्वितां नारदस्य च संवादमृषेर्नारायणस्य च ४ अत्र गाथामितिहासं च ते वर्णयिष्यामि वर्णद्व्यामीति यावत् ना
रायणब्रह्मणी श्रीकृष्णे समन्विता गाथामेव विशिनष्टि नारदस्य नारायणस्यर्षेश्च संवादरूपामिति ४ एकदा नारदो लोकान् पर्यटन् भगवत्प्रियः सनातनमृषिं द्रष्टुं ययौ नारायणाश्रमं ५ श्रीनारायणमृषिं द्र
ष्टुं बदरिकाश्रमं ययौ ५ यो वै भारतवर्षेस्मिन् क्षेमाय स्वस्तये नृणां धर्मज्ञानशमोपेतमाकल्पादास्थितस्तपः ५ ऋषित्वे हेतुं तदीयकारुण्यमयलीलामाह यइति क्षेमाय ऐहिकाय स्वस्तये आमुष्मिकाय च
भगत्वाय लोकशिक्षार्थं स्वयमेवास्थितः आकल्पात् ब्रह्मदिनारंभप्रभृति ६ तत्रोपविष्टमृषिभिः कलापग्रामवासिभिः परीतं प्रणतो पृच्छदिदमेव कुरूद्वह ७ तत्र स्वाश्रमउपविष्टमव्यग्रमिति प्रश्नावसरः
तस्मैह्यवोचद्भगवानृषीणां शृण्वतामिदं यो ब्रह्मवादः पूर्वेषां जनलोकनिवासिनां ८ शृण्वतां शृण्वस्थिति सावधानत्वं ब्रह्माणि विद्दविषयेवादस्तत्वं नु भुत्सु कथारूपः जनलोक इत्यकाशतोपि नु

७

वनवासीजनवत्स्वः क्वचित् ८ हे स्वामिन् युवेति ब्रह्मसत्रे त्वमपि योग्य इति भावः पुराकल्पादौ ब्रह्ममानसपुत्राणां मननशीलानां ब्रह्मचर्यवतां ब्रह्मसत्रे तुल्याधिकारो सम प्रधानैर्वक्तृश्रोतृभिः प्रवर्तितो ब्रह्मविचारः
९ श्रीभगवानुवाच स्वायंभुव ब्रह्मसत्रं जनलोकेभवत्पुरा तत्रस्थानां मानसानां मुनीनामूर्ध्वरेतसां ९ श्वेतद्वीपं गतवति त्वयि द्रष्टुं तदीश्वरं ब्रह्मवादः सुसंवृत्तः श्रुतयो यत्र शेरते तत्र हायमभूत्प्रश्नः त्वं मां यम
नुपृच्छसि १० तर्हि कुत्र न ज्ञातं वास्त तत्राह श्वेतेति तत्र जनलोके अनु ते त्वं यं प्रश्नात् पृच्छसि तत्प्रश्नान्तरे नान्यं पृष्टमिति भावः अत्र पद्ये मध्यत एव ब्रह्मवाद इत्यर्थः किंचिदधिकमस्ति १० तुल्यश्रुततपःशीला
स्तुल्यस्वीयारिमध्यमाः अपि चक्रुः प्रवचनमेकं शुश्रूषवोपरे ११ सर्वे ते पुत्रेषु कः प्रष्टा वक्ता वा तत्राह तुल्येति तुल्यश्रुतादिमत्त्वेनारीमित्रादिहीनत्वादतिकारुण्येन च सर्वे प्रवचनयोग्या अपि कुतुकादेकं प्रवच
नं प्रवक्तारं चक्रुः अपरे पप्रच्छुरित्यर्थः ११ सनंदन उवाच स्वसृष्टमिदमापीय शयानं सह शक्तिभिः तदंते बोधयांचक्रुस्तल्लिंगैः श्रुतयः परं १२ तुल्यन्यायत्वादेकं द्वयोरुत्तरमित्यालोच्योभयविधब्रह्मविषयकप्र
श्ने विप्रायन्नाः साकारब्रह्मविषयकश्रुत्यर्थोदाहरणे नैवोत्तरं ब्रवीमीत्याशयेन श्रीसनंदन उवाच स्वसृष्टमिति स्वेनैव सृष्टमिति विश्वस्य तदभिन्ननिमित्तोपादानकत्वं इदं महदादिस्थूलपृथिव्यंतं विश्वं आ सम्यक् प्रकृ
त्या लोकं निर्जरी वै श्वसहितं यथा स्यात्तथा पीत्वा संहृत्य शक्तिभिः सहेति पुरुषादिनिजावतारैः सहैकीभूयेत्यर्थः अनंतानि यथोक्तानि यान्यण्डानि मया पुरा तानि सर्वाणि संहृत्य समकालं जगत्सतिः प्रवृत्तो तिष्ठति तदासारा
त्रिस्तस्य कीर्तितेति निहक्षर्माचारात् जगत्सतिः पुरुषावतारः प्रवृत्तो स्वकारणे भवति प्रविशति तदा तस्य रात्रिरिति तदर्थः शयानं जगत्कार्यप्रतिनिद्राणमिवाह तानधानं संतं परं भगवंतं श्रीकृष्णं तद्दशाशयनांते बहिरावर
णभूताः श्रुतयः स्त्रीष्टात्त देवताः तल्लिंगैर्लक्षणादिना तत्प्रतिपादकैर्वाक्यैर्विश्वसृष्ट्यादिकमवधापयांचक्रुः सर्वज्ञेपि तथा प्रबोधनस्य स्वाधिकारप्राप्तत्वेनावश्यकर्तव्यत्वात् तदिदं स्पष्टं नेमिश्चीकादिप्रलयेपि प्रलयार्ण
वशायिनं वैकुंठेश्वरं वा बोधयांचक्रुरितिज्ञेयं १२ यथा शयानं सम्राजं वंदिनस्तत्पराक्रमैः प्रत्यूषेभ्येत्य सुश्लोकैर्बोधयंत्यनुजीविनः १३ तच्च तासां प्रबोधनं तस्य दास्यभावेनैवेति दृष्टांतेनाह यथेति शोभनैः श्लोकैः प
द्यैः स्तस्य पराक्रमः प्रभावो यत्र तैरिति सर्वैश्वर्यं सूचयित्वा सर्वेश्वरे श्रीकृष्ण एवास्य स्तवस्य समन्वयो ज्ञाप्यते तल्लीलामहाप्रकरणात् पातात् निश्चतमरुन्मनोक्षेत्यादिलिंगात् कृष्णं तत्रं छंदोभिस्तूयमानमित्यन्यत्र वा
क्यात् एतच्छ्रुत्वा नारदेन कृष्णायेति कृष्णाय इत्येव तस्य नमस्कृतत्वाच्चेति संक्षेपः १३ श्रुतय ऊचुः जयजय जह्यजामजित दोषगृभीतगुणां त्वमसि यदात्मना समवरुद्धसमस्तभगः अगजगदोकसामखिलशक्त्यवबो
धक ते क्वचिदजयात्मना च चरतोनुचरेन्निगमः १४ तत्र सर्वाः श्रुतयः तत्तद्वर्गे तदेनाद्याविर्भावा ह्लाद्याविर्भाविताः स्तुवंतीत्याह श्रुतय ऊचुरिति तत्र प्रथमं द्विजनोचितजयाशंसनपरिहासपूर्वं स्वमनोरथं निवेदयति जय
जयेति नर्कुटकं छंदः हयदशातिर्नौ भजजलागुरुनर्कुटकमिति तल्लक्षणात् अजित हे मायाघनविजित जयजय निजोत्कर्षमवश्यमाविष्कुरु केन प्रकारेण तत्राहुः अजामायां जहि नाशयेति यथा पुनरेषा स्वच्छाया दोषवत्य
जीवान्ननु दुयात् तथा कुर्वित्यर्थः निष्कृष्टपश्च ज्ञाहननेनोत्कर्षमाविष्कुरु इति परिहासः अबलाध्येषा भवत्पश्रयेण ब्रह्मादीनपि ग्रसत्यारुत्स्वदुनोति अतो भवतापि न वशीवदास्यादितिवा परिहासव्यंजना ननु विद्यात्मलक्षणगुणे
नगुणवत्त्वे षानुकंप्या भवति तत्राहुः दोषगृभीतगुणां दोषाय विपर्ययग्रहीतो गृहीता गुणा यया तामिति अविद्यारूपेण जीवानावृत्य … विद्यारूपेण मोचयतीति गुणोप्यस्या दोष एव पर्यवस्यतीत्यर्थः ननु मम जगद्धेतुर्भवहेतोरस्या हनने म
मैव हानिस्तत्राहुः त्वमिति यत् यस्मात् त्वमात्मना चिदानंदस्वरूपेणैव स्वरूपभूतया चिच्छक्त्यैव च सम्यक् प्राप्तसमस्तसाकारनिराकारस्वरूपमैश्वर्यं येन तथाभूतोसि नहि निरंतराह्लादसंवित्कामधेनुवृंदपतेरजया
कृत्यमस्तीति परिहासः ननु मम तादृशत्वे किं प्रमाणं तत्राहुः अगेति अगानि स्थावराणि जंगमानि ओकांसि शरीराणि येषां तेषां जीवानां या अखिलाः शक्तयः अविद्यादिकारणकार्यरूपास्तासामवबोधक उ
द्बोधक प्रवर्तक इत्यर्थः तव चिदानंदस्वरूपस्याभावे तादृशस्वरूपशक्त्यभावे च जडानां शक्तीनां प्रवृत्तिर्न हि संभवतीति भावः ननु युक्तिमात्रमेतत् किं च तावतापि नोक्तो भवत्स्वरूपैश्वर्यसिद्धिरेकतरेणापि शक्त्यु
द्बोधसिद्धेरिति चेत्तत्राहुः ते क्वचिदिति कर्मणि षष्ठी सृष्ट्यादिलीलायामजया मायया ईश्वररूपेण चरंतं क्वचिद्विशुद्धानंदलीलायामात्मना निराकारब्रह्मरूपेण स्वरूपचिच्छक्त्या स्वयं भगवदादिरूपेण च चरंतं त्वां
निगमः सम्यक् लक्षणो वेदकदंबोनुचरेत् प्रतिपादयेत् अजायजयेति दृष्टांतार्थमुख्यवृत्त्या मायिनमीश्वरमिवल्लक्षणया मायातीतं सच्चिदानंदं निराकारं साकारं च ब्रह्म प्रतिपादयाम इत्येतं भवत्स्वरूपैश्वर्यं वयमेव सा
क्षिण इत्यर्थः नहि प्रमाणसिद्धे त्वादावगौरवविचारावसर इति भावः श्रुतयस्तु यो ब्रह्माणं विदधाति पूर्वं यो विद्यास्तस्मै गापयति स्म कृष्णः तं ह देवमात्मवृत्तिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये यथात्मनि तिष्ठ
न्मायिनं तु महेश्वरं यतो वा इमानि भूतानि जायंते सत्यं ज्ञानमनंतं ब्रह्म प्रकृतेः परो यो मामात्मा गोपालः कथं त्ववतीर्णो भूम्यां हवे कृष्णमात्मको नित्यानंदैकरूपः सच्चिदानंदरूपाय कृष्णायाक्लिष्टकारिणे अक्लिती
याय महते श्रीकृष्णाय नमो नमः यो सौ परं ब्रह्म गोपाल इत्याद्याः १४ १ जयजय भाभव दजयान रसिंहा अपि जिता अतो जहि तांच्चिदमृतकामदुघां गां दधतो गोपाल किमजया कृत्यं १ एवं प्राकृतगुणनिरसनपू
र्वकं निर्विकल्पकात्मचित्स्वरूपगुणनिर्देशो न श्रुतिषु स्तुवतीषु इदं ज्ञान्यादिपक्षपातिन्यः सत्त्रैगुण्यविषयाः अन्याः श्रुतयः सत्यं ज्ञानमिव भूत्वा वयमपि त्वामेव प्रतिपादयामः सर्वस्य त्वद्रूपत्वादित्याहुः बृहदिति
बृहदुपलब्धमेतदवयंत्यवशेषतया यत उदयास्तमयौ विकृतेर्मृदिवाविकृतात् अत ऋषयो दधुस्त्वयि मनोवचनाचरितं कथमयथा भवंति भुवि दत्तपदानि नृणां १५ २ उपलब्धं उद्दृष्टं श्रुतानुमितं यत् किं
चिदेतत्सर्वं बृहत् ब्रह्मस्वरूपत्वमेवेत्यवयंति जानंति कुतः अवशेषतया यस्मात्प्रलये वशिष्यमाणत्वेन सर्वोपादानत्वादित्यर्थः तत्र दृष्टांतः विकृतेर्घटादेरुपादानं मृदिवेति ननु घटादेरुत्पत्त्यादिकं मृद इव
जगतस्तु ब्रह्मणो न दृश्यते तत्राहुः यतो बृहत उदयास्तमयौ उत्पत्तिलयौ जगतो वर्येवदंति श्रुतयः तर्हि किं विकारित्वं बृहतो नेत्याहुः अविकृतात् विवर्तो धिष्ठानतया विकारशून्यात् विवक्षितमाहुः अत इति
अस्मादेव हेतोः ऋषयो वेदाः स्त्रैगुण्यविषया स्वरूपगुणाविवेकिनोप्यस्मद्विधास्त्वयि बृहत्येव मनसाचरितं तोरस्यर्यं वचनाचरितं च ध्यानं च दधुः न्यस्तवंतः सर्वस्य कार्यस्य कारणं विना स्थित्यभावात् नन्व
वर्णस्य त्वस्यर्यवसायित्वमेवेति भावः अर्थांतरन्यासमाहुः कथमिति नृणां भूचराणां यत्र कुत्रापि दत्तानि पदानि भुवि कथमयथा अदत्तानि भवंति तस्माद्यत् किमपि विकारजातं वदंतो वयं वेदास्त्वामेव प्रतिपा
दयामः स्वामेव चोद्दिशामो मंदा एवात्र परिच्छारित्वमस्माकं विदंतीति भावः श्रुतयस्तु इदो या तोवसितस्य राजा ० अग्निर्मूर्धा दिवः ककुत् ० सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः जनिताग्नेर्जनि
तास्सूर्यस्य जनितेंद्रस्य जनितोत विष्णोः एकं सद्विप्रा बहुधा वदंति ० सर्वं खल्विदं ब्रह्म ० वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्याद्याः १५ २ इदं चंद्रपदघटदंड महानिलशिलानलजलादि ब्रह्मो
वचसा मनसा यस्तद्धीनं वंदे तमेव नुमः २ इति तव सूरयस्त्र्यधिपतेऽखिललोकमलक्षपणकथामृताब्धिमवगाह्य तपांसि जहुः किमुत पुनः स्वधामविधुताशयकालगुणाः परम भजंति ये पदमजस्रसुखानुभवं ३
अथ शुद्धलीलातात्पर्यवत्यः श्रुतयः आसां सर्वासां तात्पर्यं श्रुत्वा लब्ध्वा समया स्तुवंति इतीति हे त्र्यधिपते ऊर्ध्वाधोमध्यस्थितानां सर्वेषामधीश्वर यतस्त्वमेव सर्वश्रुतितात्पर्यविषय इति अतो हेतोः सूरयो कुम

विवेकिनः अखिलस्य लोकमलस्य वासनापर्यंतकर्मदोषस्य निरसनीकर्थवाम्रुताब्धिरपारपरमानंदस्तत्वतमवगास्यनिषेव्यतयांसि सर्वदुःखानि जहुः यदा कथामात्रेणैवं तदा किमुत वक्तव्यं ये पुनः स्वधाम्ना स्वरूपस्फूर
णेन स्वक्ता आशयगुणा अंतःकरणधर्मा रागादयः कालगुणा जरादयश्च यैस्ते आत्मारामा अपि हे परम सर्वोत्कृष्ट अजस्रसुखानुभवे अनवरतानंदानुभवस्तुतिरूपं पदं पादपद्मं भजंतीति तत्तमव गास्यतानिजहुरिति अपि तु नत्स्कं
खेनात्मारामता सुखावेशमपि जहुरित्यर्थः श्रुतयस्तु यस्य नाम महद्यशः ० विष्णोर्नुकं वीर्याणि प्रवोचं ० कं कः प्रवोचं प्रवदेदित्यर्थः ० त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः ० विष्णोः कर्माणि पश्यत ० तद्विष्णोः परमं पदं
सदा पश्यंति सूरयः अज्ञान एवल्पेबाधनस्य च इत्याद्याः चरमश्रुत्यर्थो गोवर्धनोद्धरणे व्यक्तीकृतः १६ २ दुखैर्मुक्तास्तव ततकथामृतांबुधिनिषेवणादपयः समपदकमलभजकस्वमनंततदनंतमितिकिमुतवाच्यं १६ २
इतयइवश्वसंत्यसुभृतो यदि ते नु विधाम हृदह मादयोंऽ मस्ज जन्न यदनुग्रहतः पुरुषविधोन्वयोत्र चरमोन्नमयादिषु यः सदसतः परं त्वमथ यदेष्ववशेषमृतं १७ ५ एवं सामान्याकारेणोपनिषत्कांडस्थानां कर्मकांडस्थानां तत्र तत्रे
षहितानां श्रुतीनां लापराणां च श्रुतीनां समन्वयं दर्शयित्वा तत्तदनुगामिनीनां तद्विशेषाणां स प्रदर्श्यते तत्र श्रुद्रस्वरूपलीलापरश्रुत्यनुगामिन्यः श्रुतयोन्वयव्यतिरेकाभ्यां तद्वाक्यं पुद्दर्शयो भजन हीनाम्नि दस्यः स्तुवंति इत
यइवेति असुभृतो जीवा यदि ते तवानुविधाभक्ता भवंति तदेव श्वसंति प्राणंति सफलजीवना भवंति अन्यथा इतयो भस्त्रा इव वृथा श्वासा इत्यर्थः ननु भक्तानामपि कामादिफलमस्त्येव तत्राहुः महदिति महानहंकारश्च क्रा
दिर्येषां ते यदनुग्रहतः यस्य प्रवेशात्मगुच्छशक्तेयांडं समष्टिव्यष्टिदेहं सृष्टवंतः कार्यकारणानुग्राहकतया जीवन हेतोस्तवाभजने कृतघ्नानो त्वदुपेक्षिता नो न कोपि पुरुषार्थः सिध्येदिति भावः एतदेव स्पष्टयितुं न केवलं सृष्ठा
देवानुग्राहकत्वं किंतु पंचाध्यान्नमयादिकोशानाविस्य चेतयतस्तत्व स्थितावप्यनुग्राहकत्वमित्याहुः पुरुषेति पुरुषविधः श्वेत गवेणुधरं तु नेत्यादितापिनी श्रुतौ परं ब्रह्म मनुष्यलिंगमित्यादौ च प्रसिद्ध नराकारस्त्वमत्र महत्
दादिपरिणामरूपे समष्टिव्यष्टिजीवदेहे अन्वेति स्यन्वयो जीवानामनुग्रहार्थं प्रविष्टोसि ननु साकारस्य परिछिन्नतया कथं सर्वव्याप्तिसमष्टिप्रवेशासंभवः कथं च प्रवेशमात्रेण जीवानुग्रहस्तत्राहुः अन्नमयादिषुप
दिश्यमानेषु यश्चरसः सर्वाधारत्वेनोक्तः स त्वं ननु निराकारं ब्रह्मानंदमयांतवाक्ये स्तथोक्तेन त्वहं तत्राहुः एषु प्रतिष्ठांतं तद्वाक्येषु यदवशेषं ब्रह्मपुछं प्रतिष्ठा रसो वै सः इत्यादिवाक्यशेषावगम्यं ब्रह्म तदेव त्वं ब्रह्मणोहि प्रति
ष्ठाहं ० यस्मात्क्षरमतीतो हमित्यादिगीतोपनिषदाद्युक्तेः साकारत्वादिभासे पिवितो रेव परमानंदरूपात्वत्तः प्राणादि सर्वं चेष्टा समुद्भवः को ह्येवान्यात् कः प्राण्याद्यदेष आकाश आनंदो न स्यादिति श्रुतेरिति तव सर्वजीवानुग्राह
कत्वमिति भावः नन्वेवमपि सत्यस्य कथमनुग्रहार्थमुपाधिप्रविष्टस्योपाधिनाशे नाशसंभवात् असंगत्वमप्यन्वितत्वे व्याहतमेव तत्राहुः सदसतः स्थूलसूक्ष्मादन्नमयादेः परं व्यतिरिक्तं असंग अन्नमयादिष्ठारोपाधिष्ठानत
यान्वयात् अतएव ऋतं सत्यं चेति श्रुतयस्तु नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् तं पीठगं येनुयजंति धीरास्तेषां सिद्धिः शाश्वती नेतरेषामित्यादितापिनीस्था अन्याश्च असन्नेव स भवति असद्ब्र
ह्मेति वेद चेत् अस्ति ब्रह्मेति चेद्वेद संतमेनं ततो विदुः असुर्या नाम ते लोका अंधेन तमसावृताः तांस्ते प्रेत्याभिगछंति ये के चात्महनो जना इत्याद्याः असत्प्रविषयनिष्ठाः द्वौ भूतसर्गौ लोकेस्मिन् दैव आसुर एव च विष्णुभक्तिप
रो दैव असुरस्तद्विपर्यय इत्याग्नेये विष्णुधर्मे चोक्तेः १७ ५ तवलीलाः सरवसदनेव दनें सदनें सवस्य सदनं तं नो सेवंते मनुजा दिनिजादीति नाश्यदति समानास्ते १७ ५ उदरमुपासते य ऋषिवर्त्मसु कूर्पदृशः परिसरपद्धतिं हृ
दयमारुणयो दहरं तत उदगाद नंत तव धाम शिरः परमं पुनरिह यत्समेत्य न पतंति कृतांतमुखे १८ ५ अथ तान कांड श्रुत्यनुगामिन्यः क्रममुक्तिवर्त्मना ब्रह्मप्रापकसोपाधिब्रह्मोपासना श्रुतयः पंचकोशश्रुतिवत्त्वेषामपि परं
परयातस्पर त्वं दर्शयंत्यः स्तुवंति उदरमिति ऋषीणां संप्रदायमार्गेषु ये कूर्पदृशः कूर्पशर्करा रजो दृष्टयो येषां ते स्थूलदृष्टय इति यावत् ते उदरं तत्स्थितवैश्वानरं ब्रह्मतयोपासते अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रित इति
गीतोक्तेः आरुणयस्तु दहरं सूक्ष्मं हृदयं हृदयस्थं प्रत्यगात्मानं श्रवणादिप्रनाड्या ब्रह्मतया साक्षात्कर्तुमक्षमा ब्रह्मत्वेन केवलमुपासते अन्ये त्वेवमजानंतः श्रुत्वान्येभ्य उपासते तेपि चातितरंत्येव मृत्युं श्रुतिपरायणा इति
गीतोक्तेः यद्वा हृदयस्थं दहराकाशाख्यं ब्रह्मोपासते आविष्टलिंगद्वयोर्विशेषणं परिसरपद्धतिमिति त्वन्निकटप्रापकमित्यर्थः ततस्तस्मादुपासनद्वयात् तव धाम सुषुम्नाख्यं यत् शिरो ब्रह्मरंध्रं प्रत्य उदगात् उदसर्पत् ततसमे
त्य तद्द्वारा यत् परं मशिरः समष्टिशिरोभूतः सत्यलोकः सत्यं च शीर्षाणि सहस्रशीर्षा इत्युक्तेः तत्र ब्रह्म समेत्य प्राप्य पुनरिह कृतांतमुखे संसारे न पतंति कर्मबलेन सत्यलोकं गताः पुनरावर्तंते तत इत उपासनाबलेन गताना
वर्तंते क्रमेण मुच्यंत इत्यर्थः सुषुम्नामार्गेण गतिप्रकारो द्वितीयस्कंधे उक्तः इदं तेर्चिषमभिसंभवंति स एतं देवयानं पंथानमासाद्याम्नि लोकमागछंतीत्यादिश्रुतिस्तु मार्गस्योपलक्षणं श्रुतयस्तु उदरं ब्रह्मेति शार्कराक्ष्या
उपासते हृदयं ब्रह्मेत्यारुणयः आत्मानमेवेमं वैश्वानरं संप्रत्यध्येति तमेव नो ब्रूहि स य एषोग्निर्वैश्वानरो यत्पुरुषः स यो हैतमग्निं वैश्वानरं पुरुषं पुरुषेंतःप्रतिष्ठितं वेद यदिदमस्मिन् ब्रह्मपुरे दहरं पुंडरीकं वेश्म दह
रोस्मिन्नंतराकाशस्तस्मिन् यदंतस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यं शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका तयोर्ध्वमायन्नमृतत्वमेति एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तंते इत्याद्याः एतदर्थ
श्च वैश्वानरः साधारणशब्दविशेषात् शब्दादिभ्योंतःप्रतिष्ठानान्नेति चेन्न तथा दृष्ट्युपदेशात् दहर उत्तरेभ्यः अनावृत्तिः शब्दादित्यादिना शारीरकमीमांसायां निर्णीतः एतेन तत्र निर्णीतानामुद्गीथ शांडिल्याद्युपासो
पासनावाक्यानां समन्वय उक्तो वेदितव्यः १८ निरुपाधिनिर्गुणं तव पदयुगमाख्यातुमक्षमा मुनयः उदरे हृदये दहरे तत्वपदं गताउपास्यत्वं ५ स्वकृतविचित्रयोनिषु विशन्निव हेतुतया तरतमतश्चकास्यनलव
त्स्वकृतानुकृतिः अथ वितथास्वमूष्ववितथं तव धाम समं विरजधियोन्वयंत्यभिविपन्यव एकरसं १९ ६ ननु जीववन्ममाप्युदरहृदयाद्युपाधिप्रवेशेन तारतम्ये सति केन विशेषेणोपास्यत्वमित्याशंक्य परिहरंत्य
एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मा कर्माध्यक्षः सर्वभूताधिवासः साक्षी भूता केवलो निर्गुणश्चेत्याद्यास्तदनुगामिन्यः श्रुतयः स्तुवंति स्वकृतेति स्वेनैव कृतासु विचित्रासु योनिषु ब्रह्मादिस्थाव
रांतासु कार्योपाधयः तासु हेतुतया प्रयोजकतयांतर्यामितयाविशेषमुख्यप्रवेशासंभवात् द्विशन्निव तरतमतस्तारतम्येन स्वशक्तिं तत्र तत्र प्रकाशयसि न तत्र हेतुः स्वकृता योनीरनुकरोतीति यावत्कार्यमुपाधिं सता
वतीं तत्र शक्तिं प्रकाशयसि यावत्स्फुलिंगादिकमादत्ते तावतीमेव तत्र शक्तिं प्रकाशयन्नलो यथा अथ अतो वितथासु स्वतः सफलप्रवृत्त्यादिहीनासु अमूषु योनिषु अवितथं सत्ये हितं विषमप्रवृत्तिहेतु
त्वेपि समं सुखैकरसं तव धाम स्वरूपं निर्मलधियोन्वयंति जानंति यतोभितो विपन्यवो विगतव्यवहाराः अतस्तवोपाधिकृततारतम्याभावादप्रच्युतैश्वर्यतयोपास्यत्वमिति भावः १९ ६ विकृराज राजसेबहु
धार्मान् स्वकृतान् विशन्नहेतुतया सममेकरसं सूरसंनुत परसंपद मबोधिश्रुचिधीस्त्वां ६ स्वकृत पुरेष्वमीष्वबहिरंतरसंवरणं तव पुरुषं वदंत्यखिलशक्तिधृतोंशकृतं इति नृगतिं विविच्य कवयो निगमा
वपनं भवत उपासतेंघ्रिमभवं भुवि विश्वसिताः २० ७ एवं भगवतः शुद्धस्वरूपवर्णनेनोपासनाश्रुतीनां तत्परत्वं वचनं श्रुत्वा सोपाधिकब्रह्मपरत्वं साम्येनोपस्थितानां श्रुतीनामपि तत्रैव तात्पर्यं दर्शयंत्यन्याः
श्रुतयः सोपाधिकब्रह्मोपासनातः श्रेष्ठं तत्वज्ञानोपायं भगवतश्चरणभजनं वदंत्यः स्तुवंति स्वकृतेति स्वकर्मार्जितेषु पुरेषु ब्रह्मादिस्थावरांतदेहेषु अमीषु वर्तमानं पुरुषं जीवसमूहं पावदति श्रुतयः

जीवतत्ववादीनं

राम्
२८

बुद्धेर्गुणेनात्मगुणेन चैव ह्याराग्रमात्रोऽप्यवरोऽपि दृष्टः आत्मनि तिष्ठन्नात्मानमंतरो यमयति सर्वे एतस्मात्मनो व्युच्चरंति अत्रायं पुरुषः स्वयंज्योतिः स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु इत्येवमाद्यास्ता
स्त्वांशीकृतं त्वदंशेनैव सिद्धं यद्वा अंशा इवांशाः शास्त्रे सोऽयं तो विद्याद्युपाधिना संपादितश्च तं वदंति तथापि प्रायेणैव तं वर्णयंतीत्यर्थः कथमपरिच्छेद्यस्य ममांशा इत्याशंक्याहुः अखिलशक्तिभृत इति मायाच अविद्या
स्वयमेव भवति नीहारेण प्रावृता अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे परामित्याद्युक्ता अखिलाः शक्तीर्धरसि तस्य तयाविद्याद्युपाधिप्रतिबिंबवदंशा भाव इत्यर्थः ननु प्रतिबिं
बमिथ्यात्वात्राहुः अबहिरंतरसंवरणमिति बहिः कार्यमंतरं कारणं तदेव संवरणमुपाधिर्वस्तुकृतशून्ये बिंबमेव प्रतिबिंबात्मनागच्छते भेदादिधर्मोऽपि वस्त्वंशस्तान भ्रम इत्यर्थः एतेन चराचरव्यपाश्रयस्त्विन्यादिना तास
एव चेत्यं तेन सूत्रजातेन निर्णीतानां तत्त्वश्रुतीनां ममन्वयो दर्शितः इति एवं तु जीवस्य गतिं त्वदंशत्वलक्षणां तत्त्वविविच्य विचार्य कवयो मन्यमानं प्राप्य तद्विज्ञानेनो निगमाः सर्वे वेदाश्चोयं ते समन्विताः क्रियं ते यस्मिन्नते
सर्ववेदप्रतिपाद्ये भवतो सिस्वरूपस्यांघ्रिमुपासते अर्चनवंदनादिना सेवंते अंघ्रि भजने विनां शास्त्रस्य तुच्छत्वानपगमात् यतः अभवं भवनिवर्तकः स एवेति विश्वसिता दृढजातविश्वासाः यद्वा सावयवतुल्यत्वेऽपि भवं जन्मादिधर्म
न्यमित्यर्थः श्रुतयस्तु ब्रह्मणोंऽशा भूतस्तथेतरा भोक्तेति तापिनी स्था अयमात्मा ब्रह्म योनिं योनिमधितिष्ठति एको यस्मिन्निदं सं च वि चैति सर्वं उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजो यमात्मा यस्य देवे परा भक्तिर्यथा देवे त
था गुरौ तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मन इत्याद्याः २०७ जीवोऽयं भवदंशोऽप्यभवं भवदंघ्रिमाश्रयन्नेव त्वद्रूपः स्यात्तव योनिश्चयस्येदं भजंतीति सततं त्वां ७ दुरवगमात्मतत्त्वनिगमाय तवात्ततनोश्चरितमहामृताब्धिप
रिवर्तपरिश्रमणाः न परिलषंति केचिदपवर्गमपीश्वर ते चरणसरोजहंसकुलसंगविसृष्टगृहाः २०८ भगवतश्चरणभजनस्य तत्त्वज्ञानोपायत्वात्ततोऽपि मोक्षसाधनतुल्यत्वापत्त्या मोक्षकाले हेयत्वमापन्नं तदसहमानाः
अन्याः श्रुतयो भक्तेर्मोक्षोपरि विराजमानं पंचमपुरुषार्थरूपत्वं सूचयंति दुरवगमेति हे ईश्वर सर्वोपरि विराजमानं वै भवं केचिद्विरलप्रचारा अपवर्गमपि परिसर्वतः एकांशेनापि न लषंति नेच्छंति कथं भूताः दुरव
गमं दुर्बोधं यदात्मतत्त्वं निराकाराद्वितीयब्रह्मतत्त्वं तस्य निगमाय एव भूतमखंडानंदचिद्रूपं तादित्वदृष्टात्तेनानुभावनायावनाराज्यकालिकान् प्रति व्याख्यानादिनानुभावनाय च आत्मनः स्वस्य वैकुंठादिविहारिणस्तत्त्व
स्वरूपगुणलीलादियाथार्थ्ये तदनुभावनायाऽत्ततनोः प्रपंचे प्रकटितनिजविग्रहस्य तव चरितरूपे महामृताब्धौ यद्वा महान्मृताब्धिः स्यात्तदात्तेन निरूप्यते इत्यर्थः श्लेषणामृतानां सायुज्यादिमोक्षाणां समुद्रतुल्ये यः परिवर्तैव
गाहो नु भवस्तेनानुषंगिकतयैव परिश्रमणाः परिवर्जने गतश्रमा इत्यर्थः तच्चरितं श्रुण्वतः सर्वेष्ववनतादृशाः किंतु केचिदेवेति सत्कारणं व्यंजयंति चरणेति हंसास्तत्त्वानुभविनस्त्तदपि चरणसरोजसंबंधिनो युक्तानाम
मपि सिद्धानामित्यादिवर्णितोत्कर्षायतत्वाच्छ्रूयां स्वादतिरस्कृत मोक्षानंदास्तेषां कुलं श्रीशुकोपनिषद्व्यादिरूपं तदेकस्यापि संगेन त्यक्ता गृहा स्तेपि किमुत ता दृशा हंसा इत्यर्थः श्रुतयस्तु चरणं पवित्रं विततं पुराणमित्याद्या अमृतस्य
धारा बहुधा दोहमानं चरणं नो लोके सुधितां दधात्विंसंता अमृतस्य धारा इत्यादिना चरितामृताब्धिमग्नोक्तिः अन्याश्च मुक्तात्येतमुपासते य एवे वेदा न मंति मुमुक्षवो ब्रह्मवादिनश्चेत्याद्याः ब्रह्मवादिनो मुक्ताः तथोचश्रीमच्छंक
र भगवत्पादैः मुक्ता अपि लीलया विग्रहं कृत्वा भजंतीति लीलार्थं भगवतो विग्रहं मूर्तिं मत्वैव हि वीकृत्वा भजंतीति वा लीलया हेतुना न तु जीववत्कर्महेतुना विग्रहं कृत्वा स्वस्वयमेव देहं धृत्वा सायुज्यादिकमनादृत्य भज
तीति वा तत्त्राप्यार्थ एतेन मुक्तितोऽपि भक्तेराधिक्यं दर्शितं २०९ त्वच्चरितं सायुज्याद्यमृताब्धिपरिविगाह्य परममुदा प्रतिरोधि चतुर्वर्गा धन्यास्ते येऽत्रणा यमन्यंते ८ त्वदनुपथं कुलायमिदमात्मसुहृत्प्रियवच्चरति तथोन्मु
खे त्वयि हिते प्रिय आत्मनि च न वत रमंत्यहो असदुपासनयात्महनो यदनुशया भ्रमंत्युरुभये कुशरीरभृतः २१० एवं तत्कृतेः सर्वतः प्रकर्षश्रुत्वा परास्तदनुगताः श्रुतयो व्यतिरेकेण युष्मत्स्य स्तुवंति त्वदिति तदुपधान
मनुगतं जीवाख्यं त्वदंशसंबंधं प्राप्तं परमात्मनस्तव जीवात्मना संबंधाद्देवदत्तवदजडं कोल्लीयतइति कुलायं नश्वरं शरीरमात्मादिवच्चरति भातीति अर्थः स्थूलशरीरे तत्तद्ज्ञानाभावादिति भावः तत्रात्मवत्त्वे अहंतास्पद
त्वात्सुहृत्त्वं विषयार्पणेन हितकारित्वात् प्रियवत्त्वं ततस्ततः प्रीतिविषयत्वात् एवं यत्संबंधेन शरीरे तत्तद्ज्ञानात्प्रीतिः तस्मिंस्त्वयि साक्षादेव आत्मनि हिते प्रिये च सदानुरवेन तु विषयवत्क्वचिदपि यतः पराङ्मुखे त्वपि
एवं भूते पित्र्यवित्तथा देहतुल्यं तथापि न रमंति रमंते अहो आश्चर्यं बत कष्टं चेत्यर्थः नोप्याश्चर्यं यतः असतो देहादेरुपलालनेनात्महनः प्रमादिनः तस्मादुक्तमेवेति दित्याहुः यस्यामसदुपासनाया मनुश
यो वासनाये षां ते कुशरीरभृतः संतः उरुभये संसारे भ्रमंति परिवर्तंते इति श्रुतयस्तु आराममस्य पश्यंति न तं पश्यति कश्चन नीहारेण प्रावृता जल्प्याश्चोक्थशासश्चरंति नास्ति प्रेत्यापि गच्छंति ये के चात्महनो
जना इत्याद्याः २१२ यत्संबंधात्कुत्सितदेहोऽप्यास्मासु सुहृत्प्रियस्तस्मिन् त्वयि परमात्मनि देहवदपि न रतिं विदधते बतात्महनः ९ निभृतमरुन्मनोक्षदृढयोगयुजो हृदि यन्मुनय उपासते तदरयोऽपि ययुः स्मरणात् स्त्रिय उ
रगेंद्रभोगभुजदंडविषक्तधियो वयमपि ते समाः समदृशोंऽघ्रिसरोजसुधाः २१३ १० अथ माहात्म्यविशेषवर्णनपरा गोपालतापिनीप्रभृतयो जीर्यगणसर्वाः ते स्तोतुकामतया स्थिता अप्यवतारांतरसाधारणमहि
मवर्णनं श्रुत्वा स्वोत्कृष्टां सर्वरीतुमशक्ताः सेर्ष्यमिव किमहो साधारणं वर्ण्यते सर्वेतदुत्कृष्टमिदं श्रूयतामित्याशयेनाहुः निभृतेति निभृतानि नियमितानि प्राणमनइंद्रियाणि यैस्ते च ते दृढयोगं युंजंतीति दृढयोगयुजस्तथा
भूता मुनयो मननशीलाः स्ततो हृदि योग्यातः करणे यत् निराकारब्रह्मास्वरूप तत्त्वरूपं त्वामुपासते केवलमुपासनायामेव वर्तंते प्राप्स्यंति ते चिरादेव तदेव अरयोऽपि त्वयि विपरीतभावनया महानरकयोग्या अपि तव स्मरणा
द्वयुः प्रापुः ते भ्यः मुनिभ्यः पूर्वमेव तत्रब्रह्मणि लीना बभूवुरित्यर्थः एवमेकं तावत्यसाश्चर्यं समाप्यान्यत्साश्चर्यमाहुः स्त्रिय इति उरगेंद्रो शेषस्तस्य भोगो देहस्तत्सदृशौ यो भुजदंडयोर्विषक्ता धीर्यासां ताः
परिच्छिन्नदृष्टयः स्त्रियोऽपि तथांघ्रिसरोजंसुधाधारयं त्वापि समदृशः सममपरिच्छिन्नत्वापसत्वोवयं श्रुतयोऽपि समाः रूपाविषयेन या तुल्याज्जाता इति शेषः यद्वा स्त्रिय स्तव नित्य प्रेयस्यो राधाद्याः यास्तवांघ्रिसरोज
सुधाः पादपद्मस्पर्शमाधुर्याणि हृदि यत्तेसुजाततच्चरणांबुरुहं स्तनेषु क्षिप्ताः तत्तरी त्याव क्षस्येव उपासते भजंते ता एव धावयमपि मुकुंदपदवीं श्रुतिभिर्विमृग्यामिति न्यायेन तद्योग्या अपि यदि मत्प्रा ताः तत्रापि समाः गोपीत्व
प्राप्य तत्तुल्यरूपाः सत्यः कथंभूताः स्त्रियः उरगेंद्रेत्यादिलक्षणाः गोप्यस्तपः किमचरन्निति यदनुसारेणान्यदुर्लभमाधुर्यानुभवो स्थमाहानुरागा इत्यर्थः कथंभूता वयं समदृशः तत्प्रेमानुगत प्रमाण इत्यर्थः यद्वा ता
स्वस्मात्सु समानदृष्टेस्तत्त्वेत्यर्थः एवं मस्येदृशस्य भावतेदृशपरिवारताचवर्ण्यतामिति भावः श्रुतीनां गोपीरूपत्वं बृहद्वामने तु श्रेष्ठसिद्धश्रुतेः प्राप्तावरं यन्मनसेप्सितमिति भगवदुक्ताः श्रुतेरूचुः यथा त्वल्लोक
वासिन्यः कामतत्वेन गोपिकाः भजंति रमणं मत्वा चिकीर्षाजनिनस्तथेति प्रार्थितो वाचभगवान् भजंगोप्याभविष्यथेत्यादिना स्पष्टीकृतं श्रुतयस्तु अमृतः भूतो भवति यं मां स्मृत्वा अश्नीतो ध्रुतो भवति यं मां स्मृ
त्वा सक्तो मानिष्को मोभवति यं मां स्मृत्वेत्याद्याः २३ गोपीनाम्यिवतव पदसुधास्वादनं भूतिस्तु दुर्लभायदिति स्मरणं मुनिर्बदरिवदपितदपि भवेऽनुभवं भवं नसंस्मलयं १० कइह नु वेद बतावरजन्मलयोऽग्रसरं यत उदगा
दृषिर्यमनु देवगणा उभये तर्हि न सन्न चासदुभे न च कालजवः किमपि न तत्र शास्त्रमवकृष्य शयीत यदा २१४ ११ अथ कालव्यपृष्ठुतयः तदेवानुमोदमानास्ते इज्ञानेस्व दोषं परिहरंति कइति बत अहो भग
वन् इह जगति अग्रसरं पूर्वसिद्धं त्वामवरजन्मलयः अर्वाचीनोत्पत्तिनाशवान् को नु वेद न कोपीत्यर्थः नेरयै स भूतं गचिंतकैः अस्यागसरत्वे सर्वेषामवरत्वे च हेतुः यत ऋषिर्ब्रिह्मा सेन भेदप्रवर्त

य

बद्ध

रामः

कः कारणार्णवशायी ब्रह्मणोपि जनकउदगादुत्सन्नः यत्पि मनुष्ठयेइंद्रियाधिष्ठातारः सत्यलोकाद्यधिष्ठातारश्च देवगणाब्रह्मादयोजाता इति एवंस्थितिकाले शास्त्रोदेज्ञानसाधनसत्वेपि त्वदज्ञानं यदातु प्रल
यस्तदाज्ञानमात्रसाधनाभावात् कुतरां तदज्ञानमित्याहुः यदात्वनात् सर्वमवरुध्य संहृत्य शायीनतर्हि नदा न सत् स्थूलमाकाशादि नचासत् महदादि नचोभयं स्थूलसूक्ष्मारब्धं शरीरं नचकालस्यजवः स्वप्नयोदिव्या
पारः अतोन किमपि प्राणेंद्रियादि नच बोधकं शास्त्रमपीति अतस्तदेककारणतया श्रवणकीर्तनादि त्वत्क्तिपरा॰णामेव पूर्वोक्तं तत्वज्ञानमिति भावः श्रुतयस्तु को अद्धावेद कइह प्रवोचत् कुतआजाता कु
तइयं विसृष्टिः अर्वाग्देवा अस्य विसर्जनेनाथा को वेद यत आबभूव यतोवाचोनिवर्तंते अप्राप्य मनसासह एको ह वै नारायण आसीन्नब्रह्मा नेशानस्तस्मादेते नजायंते इत्याद्याः अद्धासाक्षात्प्रवोचेत्
कुतजाता कुतः कुत्रास्ति अभद्गति को वेदेत्यर्थः २७ सर्वावतारमूलं सर्वादिमवरजनिर्मुनिःकोपि नोवेदत्वां ब्रह्मत्वच्चरणपरिचरणादिपरिहीनः २७ ११ जनिमसतः सतो मृतिमुतात्मनि येचभिदावि
पणमृतं स्मरं स्म उपदिशंति त आरुपितैः त्रिगुणमयः पुमानिति भिदायदबोधकृता त्वयिन ततः परत्रसभवेदवबोधरसे २५ १२ अथैतदेवानुमोदमानोः काश्चित्सर्वगुरुं मन्यानां शास्त्रकृतामपितद
ज्ञानेदर्शयंति जनिमिति १ असत एव ब्रह्मत्वस्योत्पत्तिं ये पातंजलादयो वदंति असतः प्रागविद्यमानस्य जगत्कार्यस्य उत्पत्तिं येकणभुगादयः सतः सत्वस्यैव दुःखस्येंद्रियषट्कविषयषट्कसुखदुःखशरीरस्ये
वमेकविंशति प्रकारकस्य नाशं मोक्षं एव वदंति गोतमीयाः उतअपि येच सांख्यादयोजीवात्मन्यपि भिदामन्योन्यभेदं जीवब्रह्मणो जडचिज्जडयोर्ब्रह्मजडयोश्च भेदमिति समुच्चयार्थः आत्मभेदादिवादिनः सर्वे
एवतथापि तेषांतेषां तत्रतत्र तात्पर्यविशेषो विवक्ष्यते येचमीमांसका विपणं कर्मफलव्यवहारं ऋतं सत्यमक्षय्यं स्मरंति वदंति एवं पंचसूत्रकाराणां सिद्धांतानन्द्य षष्ठेन वेदांतशास्त्रेणापवदंति तेसर्वे आ
रुपिते रारोपितैः मैरेवोपदिशंति नतत्वदृष्ट्या ब्रह्मैव सन् ब्रह्माप्येति सदेवसोम्येदमग्रआसीत् अनीशयाशोचति मुह्यमानः एकमेवाद्वितीयं ब्रह्म नेहनानास्ति किंचन नतद्यथेह पुण्यजितोलोकः क्षीयत एवमे
वामुत्रपुण्यजितोलोकःक्षीयत इत्यादिश्रुतीनां समाकेतात्पर्यविरोधादिति भावः अनीशयामायया अनेन लमस्तलेके स्ततत्स्मृत्यादिति नैविरोध इति द्वितीयाध्यायप्रथमपादार्थसंग्रहः सर्वेषां त्वमनिदानमा
हुः त्रिगुणमयः पुरुष इति हेतुनायाभिदा जीवब्रह्मादि तेदः पंचतीर्थकाराणामिष्टः उपलक्षणमेतत् भेदमूलकानां तत्तत्सिद्धांतानां सा यतः यस्मात्त्वयि विषये अवबोधकृता त्वद्विषया ज्ञानविजृंभिता तर्हि किम
ज्ञानमस्तिवस्तुनोनेवेत्याहुः ततः अवबोधात् परत्र असंगेअज्ञानविषयत्वाश्चयत्वयोरयोग्ये तावबोधरसे चित् घनेसः अवबोधोन भवेत् नसंभवति अंशुमालिनीतमसआश्रय इत्यर्थः तथा
चश्रुतयः आदित्यवर्णंतमसःपरस्तात् सयथासैंधवघनोनंतरोबाह्यः कृत्स्नोरसघनएवस्यादेवं वा अरेयमात्मानंतरोबाह्यः कृत्स्नःप्रज्ञानघनएव नैषातर्केणमतिरापनेया अविद्यायामंतरेवर्तमानाः
स्वयंधीराः पंडितंमन्यमानाः जघन्यमानाः परियंतिमूढा अंधेनैवनीयमाना यथांधा इत्याद्याः आपनेयादूरीकर्तव्या आपत्याव्या जघन्यमाना दुःखैः पीड्यमानाः परियंति भ्रमंतीत्यर्थः २५ नानाकुतर्ककर्क
ना शमतयोमतयो जननाजनाधाराः त्वयि शास्त्रकृतोपिबहुत्वमयंति जननानंत सफूजनान् १२ सदिवमनस्त्रिवृत्त्वयि विभात्यसदामनुजात्सदभिमृशंत्यशेषमिदमात्मतयात्मविदः नहि विकृतिं जंति कनकस्यतदात्मतया
स्वकृतमनुप्रविष्टमिदमात्मतयावसितं २६ १३ ननु असदेवेदमग्रआसीदसतो वै मनो सृज्यत मनः प्रजापतिमसृजत प्रजापतिः प्रजा असृजतेत्यादिश्रुतिभिर्जगतः शून्यपूर्वकत्वमुच्यते इति केचित्सिद्धः कणभगा य
दिसंमतो सत्कार्यवादः किंच श्रुत्यादेर्मनोजन्यत्वोक्तेर्मानसतर्काणामेव मुख्यप्रामाण्यं श्रुतेस्तु तत्स्पष्टत्वाभावेनेतिकथं वेशेषिकादिभिस्तर्कबलेनोक्ताः सिद्धांताः श्रुतिबलेन दूष्यंत इत्याशंक्यां तदनुगताः श्रुतय आ
हुः सदिति उत्पत्तितस्त्रिषु गुणेषु वर्तत इति त्रिवृत् मनस्त्वयि असत् अवर्तमानं तदविषयं चेत्सदिवयथार्थदर्शिवद्विभातिप्रतीयते वस्तुतस्तु यथार्थदर्शयेत्यर्थः तर्कप्रतिष्ठानात्मनसः प्रामाण्यमितिभा
वः अनेन परतर्काणां दुष्टत्वमिति द्वितीयाध्यायद्वितीयपादार्थसंग्रहः किंच आत्मविद आत्मानं मूलस्वरूपं त्वाविदंतिते आमनुजात् जीवमभिव्याप्याशेषमिदं आत्मतया सर्वमूलस्वरूपत्वद्रूपत्वात् सद्रूपानुगत
मेवाभिमृशंति पश्यंति नतु शून्यानुगतमित्यमित्यर्थः यदुपादानकं यत्कार्यं भवति तत्तेनैव रूपेण प्रतीयत उपादीयते चेति लोकाचारेण दर्शयंति नहीति कनकस्य विकृतिं कुंडलादिकं कनकार्थि नोन हि स्यजंति अ
त्रहेतुः तदात्मतयाकनकरूपत्वेनेति अतःस्वकृतमिदं विश्वमनुप्रविष्टंच जीवरूपमात्मतयासद्रूपत्वत्स्वरूपतयैवावसितं निश्चितं तस्मान्न शून्यस्योपादानत्वं नवामानसतर्काणां प्रामाण्यं किंतु सतस्तस्यैव बोपा
दानत्वं तद्वचनरूपायाः श्रुतेरेव मुख्यं प्रामाण्यमित्यर्थः असत् शून्यकल्पं ब्रह्मैवाग्रे आसीत् असतो ब्रह्मणो निमित्तोपादानरूपात् अधिमूलाज्ज्ञानमयं मनः सह तत्वारव्यसमष्टिबुद्धिरूपमसृजत ताजायत तत्र्यम
नःमहत्तत्वात्मना भवति ष्ठमानं ब्रह्मैव भूतादि सृष्टिपूर्वकं ब्रह्माणमसृजदित्यर्थः श्रुत्यभिमतोर्थः असदिति चेन्न धर्मांतरेण वाक्यशेषात् तदभिध्यानादेव तु तल्लिंगात्स इत्यादिसूत्रेभ्य इति भावः श्रुतयस्तु आ
त्मा वा इदमेकएवाग्रआसीत् महतः परमव्यक्तमव्यक्तात्पुरुषः परः पुरुषान्नपरं किंचित्सा काष्ठा सा परागतिः तत्वौपनिषदं पुरुषं पृच्छामीत्याद्याः २६ त्रिगुणमनोर्गुणेत्यव्यवसदसत्सदिव भासयत्यखिलं
भवतासतानुगतमिदमात्मविदस्त्वन्मयं विज्ञानंति १३ तवपरियेचरंत्यखिलसत्वनिकेततया तउतपदाक्रमंत्यविगणय्यशिरोनिर्ऋतेः परिवयसे पशूनिव गिरा विबुधानपितांस्त्वयि कृतसौहृदाः खलु पुनंतिन
येविमुखाः २७ १४ एतच्छ्रुत्वा काश्चिद्भक्तिपराः श्रुतयः किंतेन कष्टसाध्येन तत्त्वमध्ये श्रुत्येन ज्ञानेन तत्फलभूतं प्रेममयं त्वत्परिचरणमेव श्रेयः किंच त्वत्परिचरणं विना मुक्तिहेतुज्ञानं नस्यादेवेत्याहुः तवेति कर्म
णीषष्ठी त्वां ये परिचरंति अखिलसत्वनिकेततया सर्वभूतावासत्वाद्धेतोरित्यर्थः उत एवतएव निर्ऋतेर्मृत्योः शिरोप्यविगणय्यातिरस्कृत्य पादेनाक्रामंति मुच्यंत इत्यर्थः परिचरणे तदेकपुरुषार्थतया प्रवृत्ता
नामपि मोक्षोप्यनुषंगिकतयात्वत्प्रसादेन भवतीत्यर्थः ये पुनर्विमुखा अभक्तास्तान् विबुधानपि श्रुतिनिर्णिज्योक्तज्ञानसंपन्नान् समाध्यादिसाधनपरानपि गिराविधिनिषेधलक्षणयावाकूतेत्याप शूनि
वपरिवयसेबध्नासि तदुक्तं श्रेयःश्रुतिं भक्तिमुदस्येत्यादि यतस्त्वयि कृतं सौहृदं प्रेमसंवादि येः तएवपुनंति आत्मानं परंच नतु येततोविमुखास्ते इति अयं भावः ब्रह्मणोनित्यापरोक्षत्वात् श्रवणादिसाधने
रपरोक्षमेवज्ञानमुत्पादितमपि विपरीतभावनादिप्रतिबद्धत्वात् स्वरक्षकल्पमेव तिष्ठति नजन्ममरणाद्यपरोक्षसंसारभ्रमनिवर्तनसमर्थं भगवत्परिचर्यायातु तत्प्रसादेनायत्नतएवापरोक्षज्ञानान्मोक्षः
सोप्यानुषंगिकतयैवेति अनेनतृतीयाध्यायोक्तसाधनसारनिर्णयः श्रुतयस्तु यमेवैषवृणुते तेनलभ्यः यस्य देवे पराभक्तिः भक्तिरेवैनं दर्शयति यइहस्थानमपेक्षते सर्वैश्वर्यं ददाति यत्रकुत्रापिम्रियते द
हांते दैवः परंब्रह्मतारकं व्याचष्टे इत्याद्याः श्रवणं मननं ध्यानं कुर्वंतु समाधिधारणेनापि च भृगुपातयागयोगान् तवपरिचरणं विना न भवति तरणं २७ १४ लमकरणः स्वराडखिलकारकशक्तिधर

रास
२८

स्तवबलिमुद्वहंति समदंत्यजया निमिषाः वर्षभुजो रखिलक्षितिपते रविविश्वसृजो विदधति यत्र येत्वधिकृता भवतश्चकिताः २८ १५ नन्वंतर्यामितयाखिलसत्वनिकेतत्वेतत्प्रवर्तनाद्यर्थं करणसंबंधर्घवस्य भावाज्जी
वबदेवकर्तृत्व तोल्कृत्वे स्यातामिति केन विशेषेणोपास्यत्वमित्याशंका निरासेन पूर्वासां वाक्यं पुष्टं मत्योन्या आहुः त्वमिति त्वमकरणः अखिलजीवप्रवर्तनलीला यातदिंद्रियसंबंधरहितः पृथगिंद्रियसंबंधरहि
तश्च स्वच्छयादेकुलीलादिवत् पृथक्करणादिकारकरहितश्च एवंभूतोपि अखिलानि सर्वाणि सर्वसंबाधीन्यनंतानि यानि कारकाणि इंद्रियाणि करणाधिकरणादीनि च तेषां तत्तदर्थिकास्तत्तच्छक्तीर्घरसीवि
भर्षि स्वरूपेणेव तत्तत्संपादयसि तथा भूतइत्यर्थः यतः स्वराट् स्वरूपभूतोचिंत्यशक्तिमयेन स्वेनैव राजसे अतो जीवानामिव तव करणाधीनशक्तित्वाभावात् प्रत्युत तत्कारणानां त्वदधीनत्वादनिमिषाइंद्रा
दिदेवा विश्वसृजस्तत्सृज्याब्रह्मादयोपि तव बलिंपूजामुद्वहंति सदा कुर्वंति सर्वमोहिका माया च पूजयतीत्याहुः अजयासहेति समदंतिच स्वसेवकमनुष्यादिभिर्दत्तं हविरादिकरूपं बलिं भक्षयंतिच अत्रह
ष्टांतः वर्षभुजः खंडपतयः अखिलक्षितिपतेः सार्वभौमस्य बलिमुद्वहंति स्वप्रजादत्तं स्वयमदंतिच तद्वत् कथंवहंतितदाहुः भवतश्चकितास्त्वत्तो भीताः संतः यत्र कर्मणि येधिकृतास्तानि युक्तास्ते तद्विदधति
कुर्वंति एवं स्तुताः सतो वहंतीत्यर्थः अतः साधूक्तं पूर्वाभिस्तव परिर्यचरंतीत्यादिति तावः श्रुतयस्तु अपाणिपादोजवनोग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः न तस्य कार्यं करणंच विद्यते भीषास्मा
द्वातः पवते भीषोदेति सूर्यः भीषास्मादग्निश्चेंद्रश्च मृत्युर्धावति पंचमः यस्सर्वे देवान मंतीत्याद्याः २८ इंद्रियकारकहीनः पश्यसि गृह्णासि यासि सृजसि जगत् यमयसि चेति भवतेः भजंत्यजाद्याः प्रजाअजा
पितयात् १५ स्थिरचरजातयस्युरजयोत्थनिमित्तयुजो विहरउदीक्षयायदि परस्यविमुक्त ततः नहि परमस्य कश्चिदपरो न परश्च भवेद्वियतइवापदस्यतव शून्यतुलां दधतः २९ १६ एवं करणानपेक्षः
करणप्रवर्तको भगवांस्तदधीनकरणपरतंत्रो जीवो भजनीय इतिसदाचारेण पूर्वाभिर्हीकृतं श्रुत्वा नकेवलमियदेव कारणं किंतु ततउत्पन्नत्वमपि इत्याहुः श्रुतय आहुः स्थिरेति हेविमुक्त प्रवृत्त्यादिसंगातीत
यदितवविहरः भक्तवत्सलस्वार्थं प्रपंचे तत्तद्वतारे विहार इच्छा स्यात् पदकृतानां विनोदार्थं करोमि विविधाः क्रिया इति पाद्मोक्तेः ततस्तदा उदीक्षया भक्तार्थत्वादुत्कृष्टेक्षणेन उत्थापितानि प्रकृतिक्षोभेणावि
र्भूतानि निमित्तानि कर्मादीनि तैर्युक्ताः स्थिरचरजातयः उद्भूतभजज्जातिसंस्कारयुतलिंगदेहवंतः सर्वएव जीवाः स्युर्दाविर्भवंति कीदृश्याइक्षया अजया प्रकृतिक्षोभात्प्राचीनत्वात् अजन्यया स्वरूपभूत
येत्यर्थः यतः परस्य शुद्धस्वरूपस्य भक्तार्थमीक्षाचेत्सर्वएव कथं भवंति तत्राहुः नहीति परमस्योत्कृष्टस्य महाकारुणिकस्य तव कश्चिदपरः स्वीयः परोस्वीयश्च नभवेत् न संभवति अन्यत्ररागद्वेषाभावेन
तदसंकोचनादित्यर्थः समोहं सर्वभूतेषु नमे द्वेष्योस्ति न प्रियः ये भजंति तु मां भक्त्या मयिते तेषु चाप्यहमित्युक्तेः तर्हि वं महाकारुणिकं त्वां कथं ते सर्वेपि न भजंतीति तत्राहुः शून्यसाम्यं दधतो वियतइवापदस्य
तिनपद्यतइत्यपदस्तस्य सर्वागोचरत्वादित्यर्थः नाहं प्रकाशः सर्वस्य भक्त्याहमेकया ग्राह्यइति गीतोक्तेः श्रुतयस्तु आत्मा वाइदमेकएवाग्र आसीत्स ऐक्षत अस्मादात्मनः सर्वे प्राणाः सर्वेलोकाः सर्वेदेवाः
सर्वाणि भूतानि सर्वएत आत्मनो व्युच्चरंति अक्षरात्परतः परः असद्वाइदमग्र आसीत् यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनूं स्वां स्वप्रभासच्चिदानंद भक्त्या जानाति चाव्ययमित्याद्याः २९ न
कार्थमीक्षया तव जीवा जाताश्चरास्थिराः सर्वेत्वां न भजंति विदंत्य पितानूदीनान् पाहि पांडुरंगगुरो १६ अपरिमिता ध्रुवास्तनुभृतो यदि सर्वगतास्तर्हि न शास्यतेति नियमो ध्रुव नेतरथा अजनि च यन्मयं तद
विमुच्य नियंतृ भवेत्सममनुजानतां यदमतं मतदुष्टतया ३० १७ ततउत्पन्नत्वाज्जीवैर्भगवान् भजनीय इत्युक्तं तत्र ततउत्पन्नत्वमसिद्धं जीवानां विभुत्वेन नित्यत्वात् अणुत्वे देहव्यापिचैतन्यानुपपत्या
मध्यमपरिणामत्वे सावयवत्वानित्यत्वापत्या कृतनाशादिदोषेण च विभुत्वसिद्धेः ते च बंधमोक्षादिव्यवस्थानुपपत्या बहव एव नाना इति वैशेषिकादिशंकां परिहरंत्यस्तदनुगतास्त्रयो न्या आहुः अपरिमिताइ
ति वस्तुतएवानंताः स्वरूपेणैव ध्रुवानित्याः सर्वगताश्च तनुभृतो जीवा यदि स्युः तर्हि तेषां त्वया समत्वात्वच्छास्यतेति न घटतइति कृत्वा हे ध्रुव सर्वाश्रय नियमनियमनं त्वया न स्यात् तथा चांतर्यामिब्राह्मणं कुतु
नेछसि यन्माहात्म्यं करिष्यस्य वक्रोपितदिस्पृक्तचरीत्यापारंतंश्चानु भवेश्च बाध्ये तेति भावः इतरथा तु भवेत् घटेत् कथं तदुपपादयति अजनीति यन्मयं अग्न्यादिमयं स्फुलिंगादिकमज्ञाने जातं तदग्न्यादिकमेव
कर्तृस्फुलिंगादिकस्वकार्यमविमुच्य कारणतया व्याप्येव नियंतृ तत्तद्दाहादिकार्यप्रवर्तकं भवेत् तदभावे तत्स्वस्य भावात् तद्वज्जीवोपि त्वत्प्रतिबिंबत्वात्त्वन्मयो जनितत्त्वन्नियम्यो भवेदित्यर्थः अयं भावः
अविद्याप्रतिबिंबो जीवः स चाविद्योपाधि भेदेन भिन्नः एकाविद्यापक्षे तत्तच्छक्तिभेदेन भिन्न इति सिद्धांते बंधमोक्षादिव्यवस्था प्रतिबिंबस्य च बिंबरूपेणैव नित्यत्वादिनस्वरूपेण एवं च बिंबस्य तव नियंतृत्वे
जनकत्वे च सिद्धे सिद्धं पूर्वोक्तं भजनीयत्वमिति ननु परमेश्वरोप्यहं मायाप्रतिबिंब इत्यविद्याप्रतिबिंबेन जीवेन समएवेति कथं तन्नियंतृत्वं नहि महदपि स्वदादिप्रतिबिंबं प्रतिबिंबांतरस्य नियामकं दृष्टं त
त्राहुः सममिति -बिंबरूपं त्वां जीवेन समं तदैक्येनत्वत्प्रतिबिंबमनुजानतां केषांचित्तथावदतां मनुष्याणां तदमपि यत्त्वत्स्वरूपमसतमज्ञातं तत्र हेतुः मतस्य तस्य दुष्टतया श्रुतिदुष्टत्वादिति श्रुत्याहि मुक्ति
विषयिण्या परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इत्युक्त्वा केन रूपेणोपसंपत्तिरिति विशेषजिज्ञासायां य आत्मापहतपाप्मेत्यादिना सत्यकामः सत्यसंकल्प इत्याद्युक्तेन जीवस्य प्रत्यगभिन्नब्रह्मसाक्षा
त्कारवतः परमेश्वरभावापत्तिरूपा मुक्तिः प्रतिपद्यते तेन परमेश्वरस्य बिंबचैतन्यरूपत्वं स्थाप्यते प्रतिबिंबरूपत्वे मुक्तजीवसायुज्यासत्वत्संभवात् नहि प्रतिबिंबस्योपाधिविलये प्रतिबिंबांतरे
लीयते किंतु बिंबएवेति स्पष्टं तदाहुः कल्पतरुकाररूपनमाप्रतिबिंबस्य विमुक्तरूपत्वं प्यतेति उपपादितं चैतत्स्फुटतरं कारकाररहस्यज्ञैः श्रीमदप्पदीक्षितैरिस्फपरम्यतइति चतुर्थाध्यायोक्तप्राप्यफलस्वरू
पनिर्णयः श्रुतयस्तु बुद्धेर्गुणेनात्मगुणेन चैव आराग्रमात्रोह्यवरोपि दृष्टः बालाग्रशतभागस्य यश्चात्मनि तिष्ठन्नात्मानमंतरो यमयति न ततसमश्चाभ्यधिकश्च दृश्यतइत्याद्याः ३० अंतर्यंता
रं त्वां बिंबप्रतिबिंबभूतभूतमयाः तमयास्वाजीवास्तेमुक्ता अपि परिचरंति मतसमयाः १७ न घटतउद्भवः प्रकृतिपुरुषयोरजयोरुभययुजा भवंत्यसुभृतो जलबुद्बुदवत् त्वयितइमततोविवि
धनाम गुणैः परमे सरित इवार्णवे मधुनि लिल्युरशेषरसाः ३१ १८ ननुस्वदेहेंद्रियादिनियंतुर्जीवस्यनान्यतउत्पन्नत्वेननियम्यत्वं परमात्मनो प्यात्मत्वे नियंतृत्वाविशेषादन्यतउत्पन्नत्वमसि
भा॰द॰उ॰तो॰ त्याशंकामसंभवस्तृसतोनुपपत्तेरिति न्यायेन निरसितुं प्रकृतिपुरुषयोरेव तावदुत्पत्तिर्न संभवति किमुत तत्कल्पाधिष्ठानस्य भवतइति कैमुत्यन्यायं द्योतयंत्यः अजनि च यन्मयमिति समनंतरोक्तय
२८ स्तदर्थं स्फुटीकुर्वत्यश्चान्याः श्रुतय आहुः न घटतइति प्रकृतेस्त्रिगुणात्मकमहत्त्वशक्तेः पुरुषस्य महत्त्वभूश्च उद्भव उत्पत्तिर्न घटते न संभवति अनादित्वात् किमुत तदुभयाधिष्ठानस्य परमात्मन

२८

छप्म

स्तानेत्यर्थः अजन्यमहत्त्वकारणानंगीकारेनवस्थापातादिति भावः श्रुत्याजत्वप्रतिपादनादपीत्याहुः अजयोरिति अस्मात्ततः प्राणाद्युपाधयोजीवास्तु उभयप्रजा उभयंप्रकृतिपुरुषात्मकंविश्वंयुनक्ति व्याप्नो
तितेनमहत्ताधिष्ठानेन भवतांविना हेतुना भवेतिजायंते जलेनबुद्बुदइव बुद्बुदायथाजलेनैवोपादानेनजायंते वा ७ ष्यादिस्तु निमित्तमेवंजीवास्त्वदुपादानकाअविद्याद्युपाधयस्तुनिमित्तमात्रमितित्व
न्मयमेवजीवत्वंदमजनीत्यर्थः अस्मात्तइत्यनेनप्राणप्रमुखलिंगदेहाद्युपाधिजन्मनैवजीवानांजन्मनस्त्वतइतिबोधितं तथाचश्रुतिः प्रज्ञानघनएवैतेभ्योभूतेभ्यः समुत्थायतान्येवानुविनश्यति अ
विनाशीवा अरेयमात्मेत्यादिस्पष्टं चेदं नात्माश्रुतेर्नित्यत्वाच्चताभ्यइत्यधिकरणे यतएवंततएवात्यंतिकप्राकृतप्रलययोरुपाधिविलयेसति तेषां त्वयिविलयइत्याहुः त्वयीति यतोनवास्तवंज
न्मयतश्चत्वमेवोपादानं ततस्तस्मात्त्वयिपरमेकारणात्मनितइमेजीवाः विविधनामगुणैरनेकप्रकारैरुपाधिभिः सहलित्युलयं नाबहुधा प्राकृतप्रलयादौ ६ ञंतः मधुनिअशेषाणांपुष्पाणां
रसावइवेति तेहिरसाविशेषतोनलक्ष्यंते सामान्यतस्तुलक्ष्यंत एव अत्यंतिकलयास्यमुक्तौतु कारणापायेरपिलयादर्णवेसरितइवेति तथाचश्रुतयः अजामेकांलोहितशुक्लकृष्णांबह्वीं
प्रजांजनयंतीस्वरूपां अजोह्येकोजुषमाणोनुशेतेजहात्येनांभुक्तभोगामजोन्यः अस्मादात्मनः सर्वेएतआत्मनोव्युच्चरंति यथासोम्यमधुकृतोमधुनितिष्ठंति नानात्ययानांवृक्षाणांसमवहारमेकतांगमयंति
तेयथाविवेकिनेनलभंते अमुष्याहंवृक्षस्यरसोस्मीत्यादि एवमेवखलुसोम्येमाःप्रजाः सतिसंपन्नविदुः सतिसंपद्यामहइति यथानद्यःस्पंदमानाः समुद्रेस्तंगच्छंति नामरूपेविहायतथाविद्वान्नामरूपाद्विमु ४
त्या क्तः परात्परंपुरुषमुपैतिदिव्यमित्याः अनुशेतेमुच्यति अन्यःपरमात्मानिस्तिष्ठतिनिष्पादयंतिनानाजातिवृक्षाणांरसान् समवहृत्येत्यर्थः २१ जीवाअजाधिकरणादजाद्जायंतमहत्त्वहेतोस्त्वत् त्वयिलो
यंतेरसवन्मधुनिसरितइवसरित्पतौ परमे १८ न्वभुतवमाययाभ्रमममीश्वगत्यभृशंत्वयिसुधियोभवदधति भावमनुप्रभवं कथमनुवर्ततांभवभयंतवयत्भ्रुकुटिः सृजतिमुहुस्त्रिनेमिरभवच्छरणेषु
भयं ३२ १९ सरितइवार्णवेइत्यनेनोक्तानजन्यात्यंतिकलयाख्यमोक्षप्रस्तावमसहिष्णवः कांश्चिदन्याभक्तिपराः श्रुतयआहुः न्वधिति अमीषुपूर्वोक्तेषुमुक्तिसाधकेषुन्वेषुत्वद्भक्तिस्वानवधानरूपंत्वन्माया
हेतुकंभ्रममवगत्यज्ञात्वासुधियस्त्वयि अनवेभवभयनिवर्तके भृशंभावंपरमप्रेमलक्षणांभक्तिंविदधति अनुअनुक्षणंप्रभवउद्भवोसोयस्मिन् तंभावंयद्वाप्रभवोजन्मप्रतिजन्मेवंभावंदधतिप
रममाधुर्यानुभवेनतांनत्यजंतीत्यर्थः तेषांभवदुःखभयनिवृत्तिस्वानुषंगिकत्वेनायत्नसिद्धेत्याहुः कथमितित्वामनुवर्तमानानांभजतांभवभयंकथंभवेत् नकथंचिदपीत्यर्थः महौषधिप्रभावेणवि
षमप्यमृतायते तद्वद्भक्तस्यसर्वोपिभावोभक्त्यास्वात्मकइतिभावः तत्रकैमुत्येनहेतुः यत् यतःतवभ्रुकुटिः भ्रूभंगरूपस्त्रिणेमितिस्रोनेमयोभूतभविष्यद्वर्तमानात्मकायस्यसमहाकालोपि अभवच्छर
पं णेषुभवंतंशरणागतमात्रस्तद्भिन्नेष्वेवमुहुर्भयंसृजति नतुसकृदपित्वांप्रपन्नेषुकिमुतपरमभक्तेष्वित्यर्थः सकृदेवप्रपन्नोयस्तवास्मीतिचयाचते अभयंसर्वदातस्मैददात्येतद्व्रतंहरेरितिगरुडपुराणो
क्तेः श्रुतयस्तु मुक्तानामपिक्रीडार्थंपरमानंदरूपिणीं परीक्ष्यभूतानिपरीत्यलोकान् परीत्यसर्वाःप्रदिशोदिशश्च उपस्थायप्रथमजामृतस्यात्मनात्मानमभिसंविवेशइत्याद्याः अन्याश्चोक्तार्थानुसार
णान्वेषणीयाः परीक्ष्यअसारान् ज्ञात्वा कृतस्यभगवतःप्रथमजांभक्तिप्रतिपादिकांवाणीं कालेननष्टावाणीयंप्रलयेवेदसंज्ञिता मयादौब्रह्मणेप्रोक्ताधर्मोयस्यांमदात्मकइत्येकादशोक्तेः उपस्थाय
स्थायात्मनामनसात्मानं हरिमभिसंविवेशआश्रितवानित्यर्थः ३२ तवभजकेषुजकेषुयमसृजद्भीतिं भवभ्रमः किमितिमु। त्वयिलोपःकालोपिभयंसकृदपिभवत्प्रपन्नेभ्यः १९ विजितहृषीक
वायुभिरदांतमनस्तुरगंयइहयतंतियंतुमतिलोलमुपायखिदः व्यसनशतान्विताः समवहायगुरोश्चरणंवणिजइवाजसंत्यकृतकर्णधराजलधौ ३३ २० एतच्छ्रुत्वान्याः श्रुतयोएवंत्वद्भक्तिमहा
त्म्यंश्रीगुरुवरचरणाश्रयणंविनानावगम्यतेसाधनांतरैश्चवत्यापेक्षोमनोनिरोधोपिनस्यादितिवयंगुरुचरणाश्रयणमेवप्रशंसामइत्याहुः विजितेति हेअज येगुरोश्चरणंसमवहाय ईषदप्यनाश्रित्यस्वतएवातिलो
लंचंचलंअदांतं तदनाश्रयेण दमनाशक्यं मनएवतुरगं दुर्दमत्वसाम्यात् तं विजितहृषीकवायुभिः इंद्रियैः प्राणैश्चविजितैः क्रियमाणैर्नियंतुंप्रयतंते तेतत्तद्विजयाद्युपायेषुखिद्यमानाएवभवंति यतो
व्यसनशतैरन्विताभवंति अतःसाधनबाहुल्येसत्यपि वणिजःसांयात्रिकाअस्वीकृतकर्णधाराइवसंसारजलधावेवसंतितिष्ठंति नतुतत्पारंपरमानंदंत्वांप्राप्नुवंतीत्यर्थः श्रीगुरुप्रभावेणतुभक्ति
माहात्म्यावगत्याभजनस्वरूपानुभूतौभवतिप्रेमलक्षणाभक्तिर्मनोनैश्चल्यंचायत्नतएवभवतिनान्यथा युंजानानामभक्तानांप्राणायामादिभिर्मनः अक्षीणवासनंराजन् दृश्यतेपुनरुत्थितमित्युक्त
केरितिभावः श्रुतयस्तु तद्विज्ञानार्थंसगुरुमेवाभिगच्छेत् आचार्यवान्पुरुषोवेदनैषातर्केणमतिरापनेयेत्याद्याः ३३ भजनमहिमानमपितनविदुर्नमनोनियंतुमपिशक्ताः यावद्गुरुणाकरुणात्नयेन भवतानुकंपि
तानराः २० स्वजनसुतात्मदारधनधामधरासुरथैस्त्वयिसतिकिंनृणांश्रयतआत्मनिसर्वरसे इतिसदजानतांमिथुनतोरतयेचरतांसुखयतिकोन्विहस्वविहतेस्वनिरस्तभगे ३४ २० एवंभगवद्भज
नस्यैवसर्वोत्कृष्टसुखत्वंमनोनिगमनादिहेतुत्वंच तस्मादेववयंततोन्यत्रासक्तिंनिंदामइत्यपराः श्रुतयआहुः स्वजनेति आत्मादेहःधामगृहं असुःप्राणः तैःसर्वैरसाःसुखानियस्मिन् एतस्यैवानंदस्यान्यानि
भूतानिमात्रामुपजीवंतीतिश्रुतेः तस्मिन्परमानंदेत्वयिश्रयतःत्वांसेवमानस्यपुंसः आत्मनिरुपाधिपरमप्रेष्ठत्वेनस्फुरतिसतिनृणांतुच्छैःस्वजनादिभिः किंकउपयोगः इतिसत्तत्त्वंपरमार्थस्वरूपमजानतोअत
एवमिथुनतःस्त्रीपुंसयोःप्रत्येकपंचम्या स्त्रियासहमिथुनीभावंसंपाद्यरतयेविषयसुखार्थंचरतांप्रवर्तमानानांकर्मणिषष्ठ्यौ अजानतश्चरतःवानुअर्थः इहसंसारेसुखयतिआनंदयति नकोपीत्यर्थः कथंभूतेसंसा
रेस्वविहतेस्वतएवनश्वरेस्वनिरस्तभगेस्वतएवगतसारेस्वविहतःस्वनिरस्तभगइतिपाठेकइत्यस्यैतद्विशेषणद्वयं श्रुतयस्तु परीक्ष्यलोकान्कर्मचितान्ब्राह्मणोनिर्वेदमायात् अमृतत्वस्यतुनाशास्ति
वित्तेनआत्मावाअरेसर्वस्यकामायसर्वंप्रियंभवति आत्मनस्तुकामायसर्वंप्रियंभवति आत्मावाअरेद्रष्टव्यःश्रोतव्यइत्याद्याः प्रतिबिंबरूपोजीवात्मैवसर्वतोनिरुपाधिप्रियः किमुतबिंबभूतःपरमात्मापरमनि
रुपाधिप्रियत्वेनपरमानंदरूपइत्यतःसर्वतोनिर्विद्यसएवसाकारोनिराकारोवाभेदेनाभेदेनवासाक्षात्कर्तव्यस्तदर्थंश्रोतव्यादिश्चेतिश्रुतितात्पर्यार्थः ३५ सुरपतिमुखसुखंत्वद्दासानंदाब्रह्मानंदाच्चशातगु
णानंदः भजतामात्माहिभवान्विभवान्नमयतनुतनुजदारैःकिं २१ भूविपुरुपुण्यतीर्थसदनान्यृषयो विमदास्तउतभवत्पदांबुजहृदोघभिदंघ्रिजलाः दधतिसकृन्मनस्त्वयिनित्युसुखेनपुनरुपास

ते पुरुषसारहरावसथान् ३५ २२ एतदेवान्याः सदाचारेण दृढयंति भुञ्जीति ये ऋषयः सर्वे वेदार्थतत्त्वज्ञानेनतः त्वयि सकृदपि मनो दधति ते पुनः स्वजनादिमयान् पुरुषसारहरावसथान् पुरुषाणां सारं विवेक
स्थैर्यधैर्यक्षमाशांत्यादिरूपं हरंति तथाभूतानावसथान् गृहान्नोपासते ते पुनर्रमंते कीदृशे त्वयि आत्मनि निरुपाधिप्रेमास्पदे प्रत्यगभिन्ने अत एव निरस्तसर्वे निरुपाधिसुखस्वरूपे कथंभूताः संतः भवस
दंबुजहृदः तदारभ्य भवस्य दांबुजं हृदि संततं स्फुरमाणं येषां तथाभूताः संतः २ अतः स्वयमेवाद्यनाशकमंघ्रिजलं येषां ते तथाभूताः संतः ततः पूरूणि बहूनि पुण्यतीर्थसदनानि क्षेत्राणि स्वयमेव तद्रूपाः संतः
उत अपि तथापि विमदाः गतगर्वाः संतः यद्वा तादृशा अपि विमदाः संतः तादृशावसथान्नोपासते असमसंबंधेन गृहा अपि तीर्थत्वमापन्ना इति तत्रैव नु तिष्ठंति किंतु भूविस्थितानि पुण्यतीर्थसदनान्येवोपासत
इति श्रुतयश्च भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः क्षीयंते चास्य कर्माणि तस्मिन् दृष्टे परावरे इत्यादि सन्महिमप्रतिपादिकास्तीर्थप्रतिपादिका अन्योन्याश्रयाः ३५ भूतावनयो मुनयो विमदास्तीर्थास्पदा हृदी
शपदाः संतो नवसंतो गृहबिलेष्वश्रयसत्कथानि तीर्थानि २२ सतइदमुत्थितं सदिति चेन्ननु तर्कहतं व्यभिचरति क्व च च मृषात्मतयोभययुक् व्यवहृतये विकल्पइषितो द्वपरंपरया भ्रमयति भारती तउरुवृत्ति
भिरुक्थजडान् ३६ २२ ननु कथमावसथानां पुरुषसारहरत्वं सर्वस्यैव जगतः सदानंदघनात् त्वत्तउत्थितत्वेन स्वर्णतद्विकारवत्तदेकरूपतया सत्यत्वात् आनंदरूपत्वाच्च नच तदुत्थित्वमसिद्धं सदेव सो
म्येदमग्र आसीत् आनंदाद्ध्येव खल्विमानि भूतानि जायंते इत्यादिश्रुतेः उक्तत्वादित्याशंकानिषेधनपूर्वकं जगतो मिथ्यात्वमेव दृढयतः पूर्वोक्तमेव स्वेषामपि तात्पर्यमिति तदनुगामिन्योन्याः श्रुतयो दर्शयंति सतइति
सतउत्थितमिति हेतुत्वगर्भविशेषणं इदं विश्वं पक्षः सदिति साध्यं तथा च विश्वं सतोनभिन्नं सतउत्पन्नत्वात् यद्यत उत्थितं तत्ततो न भिन्नं यथा कनकादुत्थितं कुंडलादि सत्यत्वमात्रसाधने पुरुषार्थाभा
वादिदमुपलक्षणमानंदत्वादिसाधनस्य तथा चेदमानंदरूपमानंदप्रसन्नत्वादित्यादि इति चेत् न तन्न घटते नूवितर्के तर्कहतेहितत् विश्वं मिथ्या दृश्यत्वात् जडत्वात् जन्यत्वाच्च रज्जुसर्पवदित्या
दिभिस्तर्कैः सत्प्रतिपक्षानुमानैर्वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्यादिकारणसत्यत्वकार्यमिथ्यात्वप्रतिपादकश्रुत्यनुगृहीतैर्हतं बाधितविषयं तदनुमानमित्यर्थः ननु मदीयतर्केणे
वदृश्यत्वादितर्काणां कुतो न प्रतिहतिः तथैवोक्तश्रुतिव्याख्यानस्यापि स्वकरत्वात्तत्राहुः व्यभिचरति क्व चेति पितुरुत्पन्ने पुत्रे नाशोत्पन्ने प्रध्वंसाभावे च कारणतो भेददर्शनाद्व्यभिचरितो हेतुरित्यर्थः ननु तद
सन्नत्वं नाम तदुपादानत्वं पिता च नोपादानं किंतु तद्वीर्यं अभावस्तु निरुपादानक एवेति न व्यभिचार इत्याशंक्य दूषयंति क्व च मृषेति गुणोपादानस्यापि फणिनो न गुणत्वं किंतु मिथ्यात्वमन्यथा रज्जुवदबाध
प्रसंग इति तत्र व्यभिचार इत्यर्थः अनिर्वचनीयस्यास्यानंगीकर्तृमते तु पुरुषोत्पन्ने केशादौ गोमयाद्युत्पन्ने वृश्चिकादौ च व्यभिचार इति भावः उक्तानुमानदूषणमुपसंहरंति तथाकारणमस्तु वत् उभययुक्
युक्त सत्यत्वानंदत्वमुक्तं विश्वं नेति यद्वा तथाकारणवत्तत् किं तु न ययुक्तं मिथ्यात्वदुःखत्वमित्यर्थः यद्वा कारणवत्तत्सदेव न किं तु तयेन कारणानिष्ठसत्त्वेन स्वगतसत्त्वेन च युज्यते प्रतीयत इति यद्वा तथा
उ इति छेदः उभिन्ध्ये कारणवस्तुसत्त्वेन किं तु न ययुक्तं कालत्रयमुक्तं नश्वरमेवेत्यर्थः ननु तर्हि विश्वस्य समर्थक्रियाकारित्वात् यन्नैवं तन्नैवं यथा शुक्तिरूप्यमित्यादितर्कोत्तरे रक्षय्यं ह वै चातुर्मा
स्ययाजिनः सुकृतं भवतीत्यादि कर्मफलनित्यत्वप्रतिपादकश्रुत्यनुगृहीतैः प्रतिहतिरस्तु तत्राहुः व्यवहृतये अर्थक्रियार्थं विकल्पः भ्रम इत्येव स्वप्नांगनालिंगनादिना सत्यसुखवत्याद्येः सत्यस्य
नाविश्रुताश्रुतज्ञानस्य च दर्शनात् शंकाविषादिना मरणादिदर्शनाच्च ननु कुत्र सतः प्रमाहितसंस्कारजन्योन्यत्रारोपो भ्रमो दृष्टः प्रपंचस्यात्यंतासत्त्वे कथं भ्रमः स्यात्सत्त्वे च नाद्वैतसिद्धिस्तत्राहुः अपप
रंपरयेति संस्कारजन्यो भ्रमस्तत्सिद्धये पूर्वप्रतीतिमात्रमपेक्ष्यते न तु प्रमैव गौरवादिति वस्तुसत्यत्वं विनैवानादित्वात्पूर्वपूर्वभ्रमदृष्टस्योत्तरोत्तरारोपो भवपरंपरान्यायेन व्यवहारश्च सत्यतीत्यप्रयो
जको हेतुरिति भावः किंच भो भगवन् ते भारती उक्तश्रुतिरूपा वाणी उरुवृत्तिभिर्गौणलक्षणादिभिः उक्थजडान् कर्मजडान् भ्रमयति मोहयति अतः श्रुतीनामपि प्राशस्त्यमात्रे लक्षणया तात्पर्येण
सत्यत्वतात्पर्याभावात् तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो इत्यादिश्रुतिभिः वाचारंभणमित्यादिश्रुतिभिश्चोपक्रमादिलिंगावधृततात्पर्यवतीभिस्त्याया पोद्बलिताभिर्विरोधात् दृष्टि
प्रत्ययप्रतिपादकश्रुत्यादिविरोधाच्च न नित्यत्वप्रतिपादकत्वं तस्मात्तद्विलक्षणत्वादस्येत्यधिकरणोक्तरीत्या सच्चिदानंदादिस्वरूपाद्भगवतो सत्ज्जडदुःखात्मकमेव जगत् पुरुषात् केशादिकमिव गोमय
यादिभ्यो वृश्चिकादिकमिव च जायत इति सिद्धांतान्न जगतः सत्यत्वादिसिद्धिरित्यलं श्रुतयस्तु यथा सतः पुरुषात्केशलोमानि तथाक्षरात्संभवतीह विश्वमित्याद्याः २६ नित्यसुखात्त्वत्तो जातं जगन्न सत्सुखव
मिव स्रज्जः सर्पः भ्रान्तत्वादपि सत्योर्थः स्वप्नादिवदेव आह न जगतस्तत् २३ न यदिदमग्र आसन्न भविष्यदतो निधनादनुमितमंतरा त्वयि विभाति मृषैकरसे अतउपमीयते द्रविणजातिविकल्पपथैर्वितथ
मनोविलासमृतमित्यवयंत्यबुधाः ३७ २५ एवं प्रपंचस्य सदानंदत्वाभावादनुपादेयत्वं दर्शितं तत्र कथं तर्हि नाहि विविक्तिं त्यजंतीति पूर्वमुक्तमित्याशंकायामन्याः सिद्धांतयंत्यः पूर्वदर्शितमेव मिथ्या
त्वमुपपादयंति नेति यत् यस्मादिदं विश्वमग्रे सृष्टेः पूर्वं न आसन्नासीत् निधनात्प्रलयं प्राप्य न भविष्यत् न भविष्यंति अतः अनुमितं तर्कितं किं अंतरा स्थितिकालेपि सदाद्यैकरसे त्वयि मृषैव विभातीति अत्रेवं प्र
योगः विश्वं मिथ्या आद्यंतयोरविद्यमानत्वात् अन्वयेन शुक्तिरजतवत् व्यतिरेकेणात्मवदिति अत एव द्रविणजातीनां मृत्सुवर्णकार्दमायसरूपाणां विकल्पा भेदा घटककटकादयस्तेषां पथानः प्रकारास्तैरु
पमीयते विश्वं सदृशीक्रियते यथा घटाद्याकाराणां नामधेयमात्रता मृदाद्येव सत्यं तथाकाशादिजगतो नाममात्रता ब्रह्मैव सत्यमिति निरूप्यत इत्यर्थः तस्मात्प्रबलतर बहुप्रमाणसत्त्वान्मनोविलासमा
त्रमतो वितथं मिथ्याभूतं विश्वं कृतं सत्यमिति ये वमंति जानंति ते अबुधा अज्ञा एवेत्यर्थः अयं भावः प्रपंचस्य सर्वथा हातुमशक्यत्वादिंद्रियैर्गृह्यमाणदेहयात्रामात्रार्थमुपादीयमाने चरवेदद्यभावाय कार
णब्रह्मदृष्टिविधित्सया सदभिमृशंतीति न हि विविक्तिं त्यजंतीत्यादिकारणदृष्ट्या त्वेदं तु तत्राप्यासक्त्याभावाय कार्यदृष्ट्यास्यं तम् मिथ्यात्वमनुपादेयत्वं च स्वजनसुतेत्यादि चतुःश्लोक्या प्रतिपादितं
इति न किंचिदविलमिति श्रुतयस्तु आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषत् नासदासीन्नोसदासीत्तदानीं वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यं यथा सोम्यैकेन मृत्पिंडेन सर्वं
मृन्मयं विज्ञातं स्यात् यथैकेन लोहमणिना यथैकेन नखनिकृंतनेनेत्यादिलोहमणिनास्वर्णपिंडेन २७ आद्यंतयोरसत्त्वाज्जगदन्तेतं नवतिसतिचितिच भागारंभणमात्रं मात्रकृतमिति मतिरत्रजं

तोऽर्हतः २७ स यदजया त्वजामनुशयीत गुणांश्च जुषन् भजति सरूपतां तदनु मृत्युमपेतभगः त्वमुत जहासि तामहिरिव त्वचमात्तभगो महीयसि सेऽष्टगुणितेऽपरिमेयभगः ३८ २५ ननु भवतो जगतोऽसज्जडदुःखा
त्मकत्वेन नश्वरत्वेन च महद्वैलक्षण्यं जीवस्य तु सत्वसंज्ञायाव्याप्तत्वेन ज्ञातृत्वेन च चिद्रूपत्वात् सर्वतः प्रेमास्पदत्वेन सुखरूपत्वात् जीवापेतवांच किलेदं म्रियते सवाप्येष महानज आत्माजरोमरोऽमृतो भय इ
त्यादिवचनैरविनाशित्वाद्युक्तेश्च महत्साम्यत्वमवेतिकथं ममैव भजनीयत्वं कुतो वा मम साम्यप्रार्थयत्न इत्याशंक्य काश्चित्तदनुगताः जीवेश्वरस्वरूपवैलक्षण्यं प्रतिपादयंत्यः स्तुवंति सइति सजीवोयत् यस्मादज
यामायया अज्ञो स्वरूपाज्ञानमनुलक्षीकृत्य शायीत मुह्यति तत्तस्मादपेतानंदादिस्वरूपः सन् सरूपतामविद्याकार्योपाधिसाधर्म्यं जुषन् भजन् गुणान् विषयांश्च भजन् अनुक्षणं मृत्युं येत्रतं संसारं भजति त्वमु
तत्वेवु तामजां मायां जहासि ननु साम्यदन्यत्र नेति कथंस्यागस्तत्राहुः अहिरिव त्वचमिति सर्पः स्वगतमपि किंचुकमहं त्वममत्वबुद्ध्या न स्पृशतीति तथा त्वमजामित्यर्थः यत आत्तभगः अलुप्तचिदानंदाद्यैश्वर्यः अष्टगु
णिते अणिमाद्यष्टविभूतिमति महसि परमैश्वर्ये महीयसे विराजसे कथंभूतः अपरिमेयभगः अन्येषामिव देशकालादिपरिच्छिन्नं न भवति तादृशमणिमाद्यैश्वर्यं यस्य परिपूर्णस्वरूपानुबंधित्वादित्यर्थः अत एव
खु द्वासुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते तयोरन्यः पिप्पलं स्वाद्वत्यनश्नन्नन्यो अभिचाकशीतीत्याद्याः ३८ मायामोहितनोहितनिजरूपान् स्फुरन्नरान् कुदेहरतान् त्वममेयाष्टगुण भगोहतमायतमान्त
नोऽल्लुद्धरतान् २९ यदि न समुद्धरंति यतयो हृदि कामजडा दुरधिगमोऽसतां हृदि गतोऽस्मृतकंठमणिः असुतृपयोगिनामुभयतोऽप्यसुखं भगवन्ननपगतांतकादनधिरूढपदाद्भवतः ३९ २६ तदेवं भगवत एव सतत
भजनीयत्वे सिद्धे कृतेऽश्रुत्वा न्यायान् अतएव वयं संततं त्वत्कृत्यर्थमीषदप्यन्यपरत्वं न सहामहइति न्यायेन योगमिश्रभक्तिप्रतिपादकाः श्रुतयः आहुः यदीति यतयो निर्जितबहिरिंद्रियाः सन्यासिनोऽपि यदि हृदि स्थिताः काम
वासनाः सा जीवाएव नोन्मूलयंति अंतर्वासिनो भवंति तर्हि तेषामसतामसिद्धयोगानां हृदिगतोऽपि त्वं न सिद्ध्यर्थमनस्याश्रितोऽपि भवान् दुरधिगमः कथंचिदेव स्मृतिविषयः स्यात् वासनावद्भिश्चित्तत्वात् सततस्मृतिविषयो
न स्यात् यथा कंठस्थितोऽपि मणिः कामांतरव्यासक्तमनोभिः सततं न स्मर्यते किंतु कदाचिदेव तद्वदित्यर्थः ये तु असुतृप इंद्रियतर्पणपरा योगिनस्तेषां योगसिध्य[?]र्थं त्वदुपासनाप्रवृत्तानामप्युभयतोप्यसुखं तत्रानप
गतांतकात् मृत्युपरंपरामयसंसारादाध्यात्मिकादिदुःखं अनधिरूढं न अधिगतं न निजेन मुखीकृतं पदं चरणारविंदं यस्य तस्माद्भवतः लेपेक्षारूपमिति यद्वा अनधिरूढमप्राप्तं पदं यस्य तस्माद तएवानपगतः न दूरीकृ
तः अंतको येन तस्माद्भवतः इह लोकापवादापमानरोगभयादिवामरणपादिदुःखं परत्र नरकदुःखमिति यद्वा असुखं दुःखं तावत् लोके भोगवैभवप्राकट्यसिध्या भोगचौर्येण प्रापंचिकजनवत् पर्याप्तसकलसुखभोगमपि क
र्तुं न ददासि नापि भोगासक्तानां स्वपदसुखमिति न देवो नापि संसार इत्युभयतोप्यसुखमिति श्रुतयस्तु कामान् यः कामयते मन्यमानः सकामभिर्जायते तत्र तत्र यदा सर्वे प्रमुच्यंते कामा येस्य हृदि स्थिताः अथ मर्त्योमृतो भ
वत्यत्र ब्रह्म समश्नुत इत्याद्याः ३९ यतीनां कामपराणां योगकराणां कुं भोगसाराणां असुखमुभयतो भयतो मरणाछरणाह भवदुपेक्षातः २६ त्वदवगमी न वेत्ति भवदुत्थशुभाशुभयोर्गुणविगुणान्वयांस्तर्हि देहभृ
तां च गिरः अनुयुगमन्वहं सगुण गीतपरंपरया श्रवणभृतो यतस्त्वमपवर्गगतिर्मनुजैः ४० २७ तदेतच्छ्रुत्वा तदेकपरायणाः सोल्लासमभीष्टं स्पष्टयंति त्वदिति त्वदवगमी त्वत्स्वरूपयाथार्थ्यानुभववान् भवदुत्थयो
र्देहरक्षणार्थं भवता स्थापितयोः शुभाशुभयोः पुण्यपापयोः प्रारब्धरूपयोर्ये गुणविगुणौ सुखदुःखे तदन्वयान् अनुवृत्तीर्न वेत्ति सतिन संतीति न जानात्यपि तदा च देहभृतां विधिनिषेधरूपा गिरोपि सुतरां न वेत्ति यद्वा
देहभृतां गिरः स्वस्तुतिनिंदारूपा न वेत्ति यद्वा त्वज्ज्ञायमानं तु स्थमुषितं जातं तयोः संचितक्रियमाणयोः पुण्यपापयोर्गुणदोषसंबंधान्न वेत्ति स्वस्मिन् परस्मिन्वा कार्मकृतगुणदोषान् स्तुत्यादिगिरश्चनानुसंधत्त
त्वदनुभवाने दाविष्टत्वादित्यर्थः तर्हि किं करोतीत्यपेक्षायां तत्संप्रदायप्रवर्तकमहाजनदृष्टांतेनाहुः अन्विति यतो वगमाद्धेतोः स भक्तस्त्येकवच्च्यस्त्वमनुजैः स्वायंभुवमनुतुल्यैर्ज्ञानिभक्तैर्जनैर्युगेयुगे प्रसह्य गुणगान
संप्रदायानुसारेण श्रवणद्वारा चेतसि धृतो भवसि यतः अपवर्गस्यापि गतिराश्रयो द्वाभपदार्थस्त्वं परमपुरुषार्थरूप इति अथवा कथं ताहश्रां मदवगमित्वं स्यादित्यपेक्षायां गुणगीतादिनैवेति सदाचारेण दर्शं
यंति अन्विति यत इति यदर्थमित्यर्थः हे सगुण षड्गुणैश्वर्ययुक्त गीतस्य त्वद्रूपगुणादेर्गानस्य परंपरयेत्यादि यावदेवं भूतत्वच्छ्रवणादि महिमाज्ञानं तावदेव साधनांतरे प्रवृत्तिरिति भावः श्रुतयश्च एष नि
त्यो महिमा ब्राह्मणस्य न कर्मणा वर्धते नो कनीयान् तत्सुकृतदुष्कृते विधुनुते एवं ह वा न तपति किमहं साधु नाकरवं किमहं पापमकरवमित्याद्याः ४० भवदनुभवतो भवतो दुःखसुखे न नु तिथिक्कृतिष्ठ
तिनः अनुसंहितहित गुणगीते नुरतस्य विधिमतीतस्य २७ सुखदुःखे अनुभवतो भवतो भवतो न निंदनस्तवने १ द्युपतय एव ते न ययुरंतमनंततया त्वमपि यदंतरांडनिचया ननु सावरणाः खइवर
जांसि वांति वयसा सह यच्छ्रुतयस्त्वयि हि फलंत्यतन्निरसनेन भवन्निधनाः ४१ २८ तदेवं संक्षेपदर्शितनिजनिजार्थाः सर्वविधश्रुतीर्लक्षणादिवृत्या तत्स्वरूपनिरूपणद्वारा तत्स्वरूपगुणनैर्भवनिरूपण
द्वाराच अपदार्थेपि तत्रचरंतीरपि पर्याप्तिमनाप्नुवतीर्दृष्ट्वा लब्धावसराः काश्चित्तथैव तत्र संचरणं युक्तमित्युपसंहरंत्योऽपदार्थस्यापि वाक्यार्थत्वमतन्निरसनमुखवाक्योदाहरणेन दर्शयंत्य आहुः द्युप
तय इति हे भगवन् ते अंतं द्युपतयः नानाब्रह्मांडसंबंधिनो नानाब्रह्मरुद्राद्या अपि न ययुर्न प्रापुः तत्कुतः अनंततया यदंतवत्त्वं तत्किमपि त्वं न भवसि आस्तामेतत् यस्मात्त्वमपि सर्वब्रह्मांडव्यापकोपि अंतम
नोऽतं न यासि तर्हि सर्वज्ञत्वादिव्याहतिस्तत्राप्याहुः अनंततयेति अंताभावात् नहि नरशृंगज्ञानाभावेन सर्वज्ञताताद्रप्राप्त्या सर्वज्ञशक्तिर्वा विहन्यते अनंतत्वमेवाहुः यस्य तवांतरा मध्येन नू अहो सा व
रणाः उत्तरोत्तरदशगुणावरणयुक्ता अंडनिचया ब्रह्मांडसमूहा वांति सच्छया दो निष्क्रामंति तत्र यासेप्रविशंति च सहएकदेव न तु पर्यायेण खेरजांसीव गवाक्षेत्रसरेणव इत्यर्थः वयसा तेषां परिच्छेद
केन कालचक्रेण सहेति देशतः कालतश्च स्वरूपानंत्यं दर्शितं यत् यस्मादानंत्याद्धेतोः श्रुतयोप्यतन्निरसनेन अनंतस्वरूपादन्ने तत्त्वेभवाश्रुत्वलक्षणान्यंशांत स्वरूपाणांसांत वे भवानोंच निरासेन त्वयि गमन त
त्स्येव निधनं परिसमाप्तिर्यासां तथाभूताः सत्यस्त्वयि अनंतेनंतत्वे भवे च फलंति सर्वाअपि श्रुतयस्तात्पर्यवृत्त्या पर्यवसानेन सफला भवंति कृतकृत्या जायंत इत्यर्थः ननु पदार्थस्यैव वाक्यार्थत्वं पदार्थ
त्वं च पदस्य शक्त्या लक्षणया वा बोध्यत्वं तत्र न तावद्ब्रह्मणः शक्त्या बोध्यता उपक्रमाद्यव हृषितत्वात् नापि लक्षणया साहि न पदस्य वक्तुं शक्या अनेकसत्त्वनादिपदलक्ष्यार्थानामन्यो
न्यसंसर्गबोधावत्त्वं तावेन वाक्यानामखंडार्थत्वं संगापत्तेः संसर्गानवगाहि यथार्थज्ञानजनकत्वस्यतल्लक्षणत्वात् नापि वाक्यस्य लक्षणा वाक्ये लक्षणाया लदर्शनाद पदार्थस्य वाक्यार्थ
त्वादर्शनाच्च कथं सर्वा अपि श्रुतयः फलंतीति चेन्मैवं निषेधमुखवाक्यादि पुषु रास्तदर्शनात् तथाहि अस्मिन् ज्योतिर्मंडले कश्चंद्र इति प्रश्नोत्तरे न तारारूपो नोद्माकर इत्यादिनिषेधमुख

राम ३०

वाक्ये चेद्दोन नञस्तारादि पदस्य वार्थः ७ अथापि समस्तवाक्येन लक्ष्यया बोध्यते तद्विदस्थूलादिवाक्ये ब्रह्मेति निर्दुष्टं वाक्यनिष्ठाया अपि लक्षणाया अर्थवादाधिकरणे मीमांसकैः स्वीकृतत्वात् स्तो ३०
केपि शत्रुग्घ्ने तुंजीयेति पुत्रेणार्थितस्य पितुर्विषं भुंक्ष्वेत्यस्य खंडे वाक्येन च तद्गृहभोजननिवृत्तिलक्षणायाः प्रसिद्धेः इत्थं च विधिमुखेष्वपि प्रकृष्टप्रकाशश्चंद्र इत्यादिष्विवसत्यज्ञानमनंतं ब्रह्मेत्यादिषु
सर्ववाक्येनाखंडाचंद्रव्यक्तिरिवसत्यादिस्वरूपमखंडं ब्रह्म तल्लक्षणया बोध्यत इति सर्वश्रुतिसमन्वयास्पदत्वं सिद्धं श्रुतयस्त्व अनं० तत्त्वस्य प्रतिपादिका यतो वाचो निवर्तंत इत्याद्याः ब्रह्माडाद्याश्रय
त्वस्य यद् ऊर्ध्वं गार्गि दिवो यदवाक् पृथिव्या इत्याद्याः सर्वश्रुत्यर्थत्वस्य सर्वे वेदा यत्पदमामनंतीत्यादयः साक्षादतन्निरसनपरा नतस्य कार्यं करणं च अस्थूलमित्याद्याः आदयः अर्थात्तत्पराः सत्यं ज्ञा
नमनंतमित्याद्याः सत्यादिवाक्यैरप्यर्थादसज्जडादिनिरसनपूर्वकं ब्रह्मबोधनादित्यलं ७९ स्वःपतयोनंततयोरुगुणस्यांतं यद्युनैतवननवान् स्वनिगमशिरोभिरोप्यतदपवादेस्त्वयि फलंत्यंतातिज्जय
२८ श्रीभगवानुवाच इत्येतद्ब्रह्मणः पुत्रा आश्रुत्यात्मानुशासनं सनंदनमथानर्चुः सिद्धा ज्ञात्वात्मनोगतिं ७२ इति एवं एतत् श्रुतस्तुत्युक्तं आत्मानुशासनं भगवत्संबंध्युपदेशं आसम्यक् श्रुत्वा अथ अत
एवात्मनो जीवस्य गतिं गम्यमपूर्वं वदनुभूयसिद्धाः पूर्णमनोरथाः संतः ७२ इत्यशेषसमाम्नायपुराणोपनिषद्रसः समुद्धृतः पूर्वजातैर्व्योमयानैर्महात्मभिः ७३ इत्ययं साम्नायादेरसः भगवद्भक्तिरसमयं
तात्पर्यं ब्रह्मणः सकाशात् सर्वादौ जातैः सर्वोत्कृष्टज्ञानैरतो व्योमयानैः सर्वत्रोनासक्त्याचरद्भिरतो महात्मभिरुदारचित्तैः समुद्धृतः प्रकटितः अत्र ऋगादिचतुर्वेदात्मकः समाम्नायः पंचमवेदाख्यपुराणं
तदुपलक्षितेतिहासश्चेति त्रयं कर्मकांडरूपं उपनिषदस्तत्र तत्र ज्ञानोपासनाभागः पुराणस्य मध्यपाठस्तद्भेदविवक्षया ७३ त्वं चैतद्ब्रह्मदायाद श्रद्धयात्मानुशासनं धारयंश्चर गां कामं कामानां भ
र्जनं नृणां ७४ ब्रह्मदायाद हे ब्रह्मपुत्रेति धारणयोग्यता हृदि मुखे च धारयन् यथेष्टं भुवि परिभ्रम नृणां कामानां वर्जनं निवारकं भर्जनमित्यपि पाठः एतच्छ्रवणस्य भक्त्या नृणां कामनाशार्थमित्य
र्थः ७४ श्रीशुक उवाच एवं स गुरुणा दिष्टं गृहीत्वा श्रद्धयात्मवान् पूर्णः श्रुतधरो राजन्नाह वीरव्रतो मुनिः ७५ वीरव्रतो नैष्ठिकब्रह्मचारी तेनाविक्षिप्तचित्तत्वाच्छ्रुतधराः श्रवणमात्रेण धारणक्षमः तत्रापि
मुनिर्मननशीलः आत्मवान् भगवन्निष्ठः अतो गुरुणा दिष्टं श्रद्धया निश्चयवत्या बुध्या गृहीत्वा पूर्णः प्राप्तमनोरथपूर्तिः सन्नुवाच सऋषिणा स्वगुरुणेति पाठे ७५ नारद उवाच नमस्तस्मै भगवते कृ
ष्णायामलकीर्तये यो धत्ते सर्वभूतानामभवायोशतीः कलाः ७६ मनोरथपूर्तिं दर्शयितुमाह नारद उवाचेति सर्वश्रुतितात्पर्यं श्रीकृष्णमेवधार्यतुष्टः स्वेष्टदेवतश्रीकृष्णाभेदेन तदवतारं स्वगुरुं श्रीना
रायणऋषिं नमस्यति नम इति तस्मै तद्रूपाय तुभ्यमित्यर्थः तस्यैवावतारित्वमाह भगवते कृष्णायेति एते चांशकलाः पुंसः कृष्णस्तु भगवान्स्वयमित्युक्तेः अमलाः सर्वमलशोधिनी कीर्तिः अहो बकी
यमित्यादिवर्णिता कृपालुत्वपर्यवसायिनी ख्यातिर्यस्य युक्तं चैतदित्याह य इति सर्वभूतानां भूतनादिपर्यंतानामभवाय मुक्तये कलाः शक्तीर्धत्ते किंच सर्वभूतानामुशतीः कमनीयाः प्रेमवधी
नीश्च धत्ते इति वर्तमानप्रयोगेण नमस्कार्यस्य सदातनत्वं व्यंजितं ७६ इत्याद्यमृषिमानम्य तच्छिष्यांश्च महात्मनः ततोगादाश्रमं साक्षात् पितुर्द्वैपायनस्य मे ७७ साक्षात्पितुर्यो निव्यवधानं वि
नाजनकस्य अग्निमंथनावसरे रणिपतितरेतस उत्पन्नत्वात् ब्रह्मवैवर्ते तु व्यासपत्न्या उदरे बहुवर्षाणि स्थितः प्रित्रा व्यासेन प्रार्थितोपि मायानियानं निर्गतः द्वारकात आनीतेन भगवता मातेयं
ते बहु दुःखिता निर्गच्छेत्युक्तः उवाच यदि त्वया माया दूरीक्रियत इति भगवता तथा गीकृते निष्क्रम्य प्रव्रजित इत्युक्तं तस्य क्षेत्रसाक्षाद् धुनाधिष्ठितमाश्रमं ७७ स भाजितो भगवता कृतासनपरिग्रहः
तस्मै तद्वर्णयामास नारायणमुखाच्छ्रुतं ७८ भगवता व्यासेन ७८ इत्येतद्वर्णितं राजन् यन्नः प्रश्नः कृतस्त्वया यथा ब्रह्मण्यनिर्देश्ये निर्गुणेपि मनश्चरेत् ७९ उपसंहरति इतीति यत् यः प्र
श्नः कृतः स त्वेतदिति अत्र वर्णितं किं तदाह यथेति श्रुत्यादिप्रमाणद्वारा मनश्चरेत् प्रविशेदित्यर्थः ७९ योस्योत्प्रेक्षक आदिमध्यनिधने योव्यक्तजीवेश्वरो यः सृष्ट्वेदमनुप्रविश्य ऋषिणा चक्रे पुरः शास्तिता यं संप
द्य जहात्यजामनुशयी सुप्तः कुलायं यथा — — कैवल्यनिरस्तयोनिमभयं ध्यायेदजस्रं हरिं ८० इति भा॰ समस्तवेदस्तुत्यर्थसंग्रहश्लोकेनानुस्मारयति य इति योस्य विश्वस्योत्प्रेक्षकः अनुशायिनां जीवानां समस्तपुरुषा
र्थसिद्धये एवमिदं स्रष्टव्यं पालनीयं संहर्तव्यमित्यालोचक इत्यर्थः इति सृष्टिस्थितिलयकर्तृत्वमुक्तं आदिमध्यनिधने आदिर्जन्म मध्यस्थितिनिधनमंत एतेषु योवर्तत इत्युपादानत्वं ननु प्राकृतिपुरुषयोरुपादान
कर्तृत्वे प्रसिद्धे तत्राह योव्यक्तजीवयोः प्रकृतिपुरुषयोरीश्वरो नियंता तयोरपि मूलकारणमित्यर्थः अथप्रवेशनियमनलीलामाह य इति इदं समष्टिरूपं विश्वं स्रष्ट्वा हिरण्यगर्भादिरूपेणानुप्रविश्य ऋषिणा समष्ट्येत
र्यामित्वं ऋषिणा ब्रह्मणा द्वारभूतेन पुरो व्यष्टिशरीराणि तद्भोग्यजातं च चक्रे इति विसर्गकर्तृत्वं ताः शास्ति चेति व्यष्ट्यंतर्यामित्वं तदेवं मायातत्कार्यप्रवर्तकत्वरूपत्वेभयं दर्शयित्वा तच्छेदकत्वेन तद्दर्शयति यमिति अ
नुशायी सोपाधिस्वरूपो जीवो यं संपद्य प्राप्य अजां कार्यकारणलक्षणामविद्यां त्यजति ननु ब्रह्मसंपन्नस्यापि जीवतस्तत्संबंधो दृश्यते तत्राह सुप्त इति यथा सुप्तः स्वस्मिन् शरीरसंबंधं न पश्यति नरोहं स्थूलोहमित्येवं
किं त्वन्य एव तच्छरीरं तं पश्यति एवं जीवन्मुक्तमन्ये सतु नात्मानं तथा पश्यतीत्यर्थः तं हरिमजस्रमनवरतं ध्यायेत् किमितितत्राह अभयं न भयं यस्मात् भयनिवर्तकमित्यर्थः कुत एतत् कैवल्येन अप्रच्युतस्व
रूपत्वेन तेन निरस्तानि नित्यमेव दूरे क्षिप्ता योनिर्मूलकारणं माया यस्मात् तं स एवं भूतो हरिरेव परमशुद्धस्वरूपत्वात् जीवहितार्थं तत्तत्कर्तृत्वेन परमकारुण्याच्च ध्यानादियोग्य इति भावः ८० जनिस्थितिस्मृतिहे
तुयः स्वच्छाच्चाविन्यस्य शास्ति भात्राधीशान् तं हरिमभयं कैवल्यपदं विदृत्तविन्नु प्रपद्येहं १ इति श्रीमद्भागवतदशमस्कंधभूषणः सप्ताशीतितमोध्यायपिणीसारसंग्रहः २ ॥ इति श्रीमदनंतोपाध्यायकृ
तस्वकृतकाशीनाथोपाध्यायविरचितसोपिणीसारे भागवतदशमस्कंधे उत्तरार्धे श्रुतिस्तुतिसमाप्ताः सप्ताशीतितमोध्यायः ८७ ८७ ८७ ८७ ८७ ८७ ८७ ८७

रुदम

श्रिविद्योः सुप्रसन्ने तज्जने मुक्तिराप्यते नान्यस्य मुक्तिर्भवतो भवतो भोगसंपदो १ अतस्त्वं ध्यायेदजस्रं हरिमित्यत्र हरिर्मुक्तिद इत्युक्तं तत्र त्रिदेवी साधारणदृष्टीनैहिककामिनः कटाक्षयन् कृपया शिक्षयं
श्च पश्यति देवेतिहास्यां अशिवमस्वीकृतं भवभोगं धनिनो भोजा भोगिनश्च लक्ष्म्यास्तदधिष्ठात्र्याः श्राय इति कश्चिद्भ्यति चारादपि संदेह एवेति भावः १ एतत् अत्र हेतुं नइति संदिहाना सकटाक्षं सं
गृह्णाति अत्र पूर्वोक्ते विरोधे तमेव व्यंजयति विरुद्धेति प्रभ्वोरिति कर्मणि षष्ठी तत्तत्स्वभावविपरीता भोगप्राप्ति तन्नाशरूपा गतिः फलं अतः शिवभक्तानां संपद्दर्शनाद्दूरे पत्यपि लक्ष्मीः शिवाधीनेति
शिवस्योत्कर्ष इति भावः २ तत्रस्वज्ञामी तन्नियुक्तोहं हरो हरति तद्वशः विश्वं पुरुषरूपेण परिपाति त्रिशक्तिः ध्यगीतिक्रमस्तोक्तानुसारेण त्रिमूर्तिधारिणो निरुपाधेः श्रीकृष्णस्य माहात्म्यं भावदास्तां न तेम
प्यच्युते जेच भिदामणवपि चक्षते इत्यादावीश्वरत्वाद्युपहितधर्मैरभिन्नत्वेनोक्तानामपि स्वीकृतमायागुणोपाधीनां त्रयाणां मध्ये एव तदुपाधिधर्मयुक्तेच तदयुक्तत्वात्त्वां भासमानुत्वरूपं वैलक्षण्यं स्पष्टमे
वेति व्यंजयन् तदुत्प्रेक्षिते संपत्प्रदत्वादिगुण एव दोषत्वं दोष एव गुणत्वं च प्रतिपादयं स्तेन चेद्दत्राप्रश्नस्यातिमोर्खी मूलत्वव्यंजयन्नाह शिव इत्यादिना यावदध्यायसमाप्ति शश्वच्छक्तियुतः गुणसाम्याव
स्थप्रकृत्युपाधिना नित्ययुक्तो भ्वरा विर्त्तावविशेषः शिवः यत ईश्वर एव गुणक्षोभे सति त्रिलिंगो गुणत्रयोपाधिः प्रकटैश्वर्यसङ्क्षिप्तोर्गुणैर्वैतथ्य गुणप्राकट्यमेवाहंकारद्वाराविशादयति वैकारिक इति अ
हमहंकारः तामसाहंकाराद्यधिष्ठाते व शिवादिनामाक इत्यर्थः श्रीकृष्णावन्निरुपाधिकं एव त्रिव इतिवादे तु नाममूर्तिमात्रेविवाद इति भावः ३ आस्तामेवं प्रवृत्ते किं तत्राह ततइति तेन भगवत्प्रतिनि
धिरूपेणाधिष्ठिताद् हंतत्वात् षोडशविकारा अभूवन् अमीषु अहंकारादिषु प्रकृतिविकृतिरूपेषु मध्ये कंचन यत् किंचिदुपाधिकं भजन् उपाध्यनुरूपाणां विभूतीनां स्वरूपं प्राप्नोति ४ अथ विद्योरुपाधि
धर्मा स्वच्छतया भासमानत्वं दर्शयन् परमपुरुषार्थहेतुत्वमाह हरिर्हीति हि प्रसिद्धौ विद्मुः स्वीकृतसत्त्वगुणाधिष्ठात्त्वत्लीलोपि प्रकृतेः परो निर्गुणः पुरुष एव स्वप्राधान्येनैव स्फुरति न तु कदाचिदप्युपा
धिधर्मप्राधान्येनेत्यर्थः अत एव सर्वेषां शिवब्रह्मादीनां दृक्साक्षी यस्मात् तथाभूतः सन्नुपद्रष्टा सर्वसाक्षी भवति अतस्तद्गुणाधिष्ठातारमपि भजन् निर्गुणो गुणातीतफलभाक् भवति अतोयस्यालक्ष्म्याः
पतिरसौ तस्याः स्वरूपभूता प्राकृतशक्तिरुपत्वादेषप्राकृतविभूतिरवंडयत्येव अतः कोगुणः कोवा दोष इति विचार्यतामिति भावः ५ न केवलं तस्य स्वभावोयं किं तु तद्विचारश्चेति दर्शयंस्तद्वाक्यमयमि
तिहासमाह निवृत्तेष्विति समाप्तेषु नानामतमुनिसभायां भगवतेव निणश्तमस्तीति प्रसिद्धमिदमिति भावः ६ आहेत्यत्र हेतुः प्रीतइति शुश्रूषव इति च तथापि स्वोत्कर्षं स्वमुखेन कथमुक्तवांस्तत्रा
ह भूणामित्यादि स्वोत्कर्षप्रकाशने स्वभक्तस्य शिष्यत्वोकनि श्रेयसासिद्धेरिति भावः ७ स्वतुतेन देवास्करेस्यादिनोऽप्यदृष्ट्याच्चरंतदाशयविपरीतमेवाहेत्याह श्रीभगवानुवाचेति यस्य यमनुगृह्णामि
यं तु कामयमानं नानुगृह्णामि तस्माप एव धनं दहामीति भावः हरिष्यइति अनवकृप्तमर्षयोरिति लृट् तद्धनासहनपूर्वकं हरामीत्यर्थः शनैरिति सहसाहरणे तस्य क्षोभः स्यात् छनैर्हरणे तु क्रमेणोदासी
नत्वादित्याशयः पुनः पुनर्दरिद्रस्य दुःखितं शनैस्त्यजंति ८ स यदा कृतहदाग्रहणे पुनर्धनेहया प्रवृत्तोपि मदनुग्रहणेवानिष्फलोद्योमो निर्विण्णः स्यात् तदा भक्तैः कृतं मेत्रहितं यस्य तस्य ममाभिरुचि
तमनुग्रहं करोमि तदेवं सवासनानां प्रत्येत्योक्तं ननु निर्वासनानां प्रल्हादादीन् प्रतीति तत्राह तेन ध्रुवप्रल्हादादिभ्यो राज्यादिदानं तन्माहिमख्यापनार्थमेवेति ज्ञेयं ९ अतो धनप्राप्तेर्हेतोर्जनः ७ साधा
रणः तस्माद्व्यस्तेनापि परमं श्रेष्ठं अतः सूक्ष्मं दुर्ज्ञेयं यत् अश्चिदेकरसं सच्चिदानंदं तच्च यत्कं परमानंद स्तत्स्वरूपं मां हित्वान्यं भजते ननु त्वमपि अकामः सर्वकामो वेत्याद्युक्तेरीत्या कामिनो ननु गन्ताह्याय धनं दद्दस्य
व कुतोन्यान् भजतेतत्राह सुदुराराध्यमिति सुविचार्यफलदातृत्वादिमत्त्वभावात्तानेन दुराराध्यमत्वस्यर्थः तं सुरवाराध्यम् जुत्तिरिति दुराराध्यमसाधुभिरिति तृतीयोयाताः १० आशुतोषेभ्यो विचारं वि
नैव तुष्येद्भ्योन्येभ्यः उद्धतास्तत्कृमर्यादाः गर्विता अनवहिताश्च संतो वरदानपि विस्मरंति कथंचित्स्मरणेप्यवजानते च ११ तदेवं तेषामाशुतोषतया प्राप्तमविचारित्वं श्रीविद्योस्तु दुराराध्यता सिद्धं सुविचा
रित्वमितिहासेन दर्शयितुमुपन्यस्यति शापेति शिवः ब्रह्मा च १२ पुराविदः पौराणिकाः पुरातनमिति पाठांतरं १३ पथिदृष्टं तत्रैवाप्रच्छादिति दुष्टत्वेन सद्यः वहाराननिमित्तं त्वं व्यंजितं १४ सिध्यसि सिद्धार्थो
भविष्यसि १५ एवं चेत्तर्हि बिभेमीति नाशंक्यं यतो वरलब्धबलस्य तव न किंचित्कर्तुं शक्ष्यतीति दृष्टांतेनाह दशास्येति स संकटे कैलासोत्पाटनं रावणात् बाणात्तु स्वेन युद्धप्रार्थनं भगवता सह युद्धादिप्र
संगश्चेत्यादिकं १६ केदाराख्ये शिवक्षेत्रे देवानामग्निमुखत्वात्कुरमुद्दिश्यात्ममांसं जुह्वन् नग्नो होमं कुर्वन्नित्यर्थः १७ देवस्य शिवस्योपलब्धिं प्राप्तिं दर्शनं वा निर्वेदाद्दुःखात् स्वधितिः खड्गः परशुर्वा अ
वश्यच्छेत्तुमुद्यतः १८ तदासच्चमूर्तिमानग्निरिव देदीप्यमानः वयमधुनातनाः साधारणजना यथा कंचिद्दुःखेन मर्तुकाममवारयंति तद्वत् भुजयोर्निग्रहेणान्यवारयत् यतो महाकारुणिकः स चंडप
स्वकृताकृतिः परिपूर्णदेहो भवतु १९ निकामं यथेष्टं मत्तो वरं वृणीष्व निकामं वरं ददामि तोयेनापि प्रीतः स्यात्त्वया तु देहो व्यथापीडयतइति २० ददातस्वहरप्रदादपि यतः पापीयान् देवमीति क्वचित् यस्य यस्ये
तिवीप्सया देवादिसर्वसंग्रहः सकृच्चनिरासश्च २१ इवेति श्रीविष्णुस्तत्प्रतीकारसंभावनया दोर्मनस्य हासात् यतो भगवान् सर्वज्ञः तस्य दुर्मतित्वेन प्रहसन् दातुमनर्हमपि दत्तवान् सर्पायामृतमिव २२
इत्युक्तं इत्यर्थकं क्षेपकं तोषण्यादावध्ययनत्वादिति भाति अविभ्रंतः भयंप्राप्तः अविभ्य इति पाहस्वार्थः शिव इति सर्वभूतानां क्षेमेच्छया अन्यथा तर्हि तो भविष्यदिति भावः २३ पराधावन् सन् पराधाव
दितिपाठे वाक्यभेदः उदगादभावत उदकउत्तरत इति श्वेतद्वीपगमनेच्छया २४ वैकुंठं श्वेतद्वीपं अस्यामृत गतत्वेपि अज्ञाननमसः परस्त्वं श्रीकृष्णामृत तद्देव २५ तत्रैव हेतुमाह यत्रेति भगवदर्श
न्यस्ताशेषाणां रागद्वेषादिहीनानां त्यक्तहिंसानां सर्वोत्तमा गतिः प्राप्यः अतएव यत्र गतो नावर्तते पुनः संसारे न पतति २६ तमिति सार्धकं तमसुरं तथा तादृक् व्यसनमभिनिविष्टो यस्य ते भगवान्तत्त्व
नस्तन्तच्छक्तिमांश्च शिवस्यापि दुःखार्दनः दूराद्वैकुंठाद्बहिः प्रत्यक् दिया तत्संमुखमाविर्भूतः अक्षमक्षमालां दृष्टिमात्रा तद्बुध्याद्यभिभावकेन तेजसा २७ अभीत्यर्धकं तेरुकं वंदने कारयामास आश्रिर्ष
ब्रुवन्तीति भावः विनीतवदिति तत्वतस्तत्स्वभिनयाभावेपीत्यर्थः २८ शाकुनेयति पितृतः परिचिततया विश्वासार्थं व्यक्तं निश्चितं किं किमर्थं यतो मस्यकस्यापि पुंस आत्मा देहः सर्वपुमर्थहेतुः किंपु
र्नर्महा पुरुषस्य तव अतो मापीडयेति भावः २९ विभ्रांतप्रत्याह यदीति अल्पयोग्य विनोसर्वं कर्तुं समर्थे लब्धवसितं से त्स्यस्येवेति भावः पुंभिर्ध्वतेरिति पुंभिर्नजान्तितिपाठो धृते नेरी

कीर्तेः पुंभिः स्वार्थं साधयितुमिच्छति ३० वचसा गतश्रमः श्रमापगमेन प्रीतः सन् अमृतवर्षिणेति तात्पर्यस्यान्यथात्वेपि स्वभावो न हि हीयते ... भावः ३१ पेशाच्च पिशाचवदिति अतएव प्रेतेति ३२ जगद्गुरुत्वादिना
नेत्यस्तीति प्रतीयतां तद्वाक्यस्य मिथ्यात्वं मद्वाक्यस्यैवेति आशु अपीतिपाठो ३३ कथंचिदेकांशेनाप्यसत्यं यथा न वक्ताऽवदिष्यति हे दानवर्षभेति तत्र तत्वे शक्त एवेति भावः ३४ चित्रैः विस्माप्य रम्यैः मकैः सुपेशलैः विन
यादिनारम्येः विस्मृतः अनुसंधानशून्यः सर्वत्र हेतुः कुमतिरिति दुर्मेधसाराधनेमपि स्वपरानर्थभाजनं प्रभवज्जन्तीश्वरमपि त्रासयित्वा मृतो वृकः १३५ तदाह अथेति अथानन्तरमेव क्षणात्तद्गीरस्या तं क्षणमतिक्र
म्य जयशब्दाद्यभवत् जयेत्युत्कर्षस्य व्यंजकं नम इति नतेः साध्विति विस्मयस्य ३६ एवं मोचितइत्युपसंहारः ३७ मुक्तमित्यर्धकं विनयादिगुणैः सर्वपुरुषेभ्य उत्तमः ३८ अहो इति ८ सार्धकं स्वेनैव पाप्मनान
तुमया ईशोति तस्वयमेव तं हन्तुं शक्तोपि निजाराधनापेक्षयैवोपेक्षितवानिति भावः ३७ साक्षाद्भगवताशिवस्य संकोटान्मोचनेन न चित्रं यत एतच्चरित्रश्रवणादिनापि सर्वेषां सर्वसंसारदुःखान्निवृत्तिरित्याह य
इति यः कश्चिदपि अव्याकृतानां प्रपंचातीतानां शक्तीनां समुद्रस्य साक्षात्सरस्य निरंकुशपरमेश्वरस्य यतः परमात्मनः विबरूपस्य ब्रह्मादिस्तुतिप्रति बिंबरूप इति भावः तथा समुच्चये अरिभिः श्रीयति सकामस्त्लोक रोच
नार्थं यद्वा तथा शिववदनायासेन संसारहेतुकामादिभिरिति मुच्यते ५० इति श्रीमद्भागवते दशमस्कंधमध्यगः अष्टाशीतितमोध्यायस्तोषिणीसारसंग्रहे १ इति भागवते अष्टाशीतितमोध्यायः ८८ वृत्रसंज्ञ
ध्यानपादेन नमेनेशंकरं विधिं माधवः पूजयामास सतमप्यधकारिणं १ महापराधिकोपास्य राधिकोपास्य ईश्वरः अनुगृण्हाति सदयः सदयः खलु मूर्तिमान् २ तदेवं विचारपूर्वकं परमार्थदार्ढ्यतया श्रीविष्णो
रुत्कर्षमुक्त्वा महापराध्यंगीकारूण्यकारुण्यादिगुणतोप्युत्कर्षं दर्शयति सरस्वत्यामित्यादिना आसतेइतिलट् सदा सत्रपरत्वेनाद्यापि संतीचेत्स्फपचारात् को महानिति वितर्को विचारः १ भृगुमिति महर्षिणां भृगु
रहमिति महिम्नात स्यैवयोग्यत्वादिति भावः ब्रह्मसुतमिति पितृत्वभ्रातृत्वाभ्यां ब्रह्मशिवपक्षपातिनमेवेति भावः अभिअभयं यथा स्यात्तथागतेः पितृत्वभ्रातृत्वब्रह्मण्यतासत्त्वात्ततद्व्यापगमादि
ति भावः २ सत्वं महत्त्वाख्यमुत्कृष्टत्वं तस्य परीक्षया यतो न चक्रे ततस्तस्मै चुक्रोध ३ आत्मनि मनसि आत्मनास्वयमेव क्षमणं विनेवेत्यर्थः स्वयोन्यास्वकार्यत्वात् स्वाभिव्यक्तिस्थानेन पुत्रोयमिति भावेनेत्यर्थः
यथा कश्चिद्धारिणा वह्निं शामयति तद्वत् ४ देवोजगद्गुरुज्यायतामहेश्वरः तथापि मुदा परिरब्धुं सम्पक्वबाहुप्रसारादिना रेभे यतोभ्रातरं तत्वेनांगीकृतं ५ उग्रपथगः श्मशानवासारथ्यादिसाधारणेन पाखंड
मार्गप्राप्तोसीति वदंस्तत्परिरंभणादिकं नैच्छत् क्रोधानुभावमेवाह शूलमिति ६ पतित्वेत्यर्धकं शिरसा न्यायो भूया ७ वैकुंठं विकुंठाकृतनिर्मितं प्रपंचातीतं विद्युल्लोकविशेषं श्रियउत्संगे शयानमि
ति तयोस्तत्रागमनाज्ञाने हेतुः मिथः प्रेमाकृतज्ञानत्वके तव भाजमिति भावः पदेति तदेवमुत्तरोत्तरमविनयाधिक्यं ८ ततस्तादनानंतरं तद्दृष्ट्वा लक्ष्म्यासहआशु उत्थायेति आशुपदस्य यथापेक्षं सर्वत्रा
न्वयः स्वपदेन तुल्यस्य सर्वोत्कृष्टत्वं ततोप्यवरुह्य भगवान् साक्षात्सर्वेश्वरोपि उत्थानादौ हेतुः सतां साधूनां गतिः सद्धर्माश्रयः ९ तवशोभनमागमनं ब्रह्मन्नवेदरूप अत्र महत्तआसनइति स्वयमेवा
सनानयनं नन्वत्वयाभिगमनादिना न सत्कृतोहमिति नासनेस्वीकुर्वस्तत्राह अजानतामिति न इति त्वत्क्षम्यादिस्वजनापेक्षं बहुत्वं १० क्षणाप वेशोप्रयाजनं च मत्कृतमेवेत्येव मतिस्तत्राह पुनीहिति द्वाभ्यां
वैकुंठलोकेन चतुर्दशलोकस्था च सहितं लोकपालान् ब्रह्मरुद्रादीन् भगवन् परमपूज्य क्षणमुपविष्टस्य ते पादोप्रक्षाल्य तज्जलं धारयामीति भावः ११ ननु मयापराधः कृतो तोत्रोपवेष्टुं जिह्रेमीत्याशंक्याह
लानुग्रह एवकृतस्त्वयेत्याह अद्येति एकांतभाजनं नियता श्रयणयोग्यः अतो लक्ष्मीः सदा वत्स्यति तद्धेतुस्पष्टयति तववदिति तदेवमतदनन्तरमवतद्वक्षसि स्वशरीरे खारूपेण समीचिनं जातमिति गम्यते १२ निवृ
तः स्वस्थचित्तः यतस्तर्पितः प्रीणातः अतोन तत्यारुद्धकंठाश्रुनेत्रस्तूष्णीं बभूव १३ मुनीनां ब्रह्मवादीनां एवं मननार्थं वेदाभ्यासपरायणं १४ भृगोः संशयं त्रिषुमहत्तमं तच्च युक्तमेवेति तेषां वाक्यमनुवदति मतइत्या
दिना तीर्थं साधनं तिस्थंतेन यतो हेतोरन्येषामपि शांतिरभयं भवति किमुततस्य महत्तमस्येत्यर्थः स्वल्पेहि दोषादोषो भोनतुरूर्यादावेति महत्तमत्वमनुमितमिति भावः सापराधतया पूर्वमसन्तानां न
यानाभ्यन्नवति पुगोरिवेति भावः १५ एवं श्रेष्ठत्वचिन्तामुक्त्वा हेतुमपि केमुख्येन दर्शयन्न प्राकृतमहासंपत्तिं दर्शयति धर्मइति त्रिभिः यस्मात्साक्षाद्धर्मो भगवद्धर्मः साक्षाज्ज्ञानं भगवदनुभवः तदन्वि
तं सप्रेमतदनुभवान्वितं वैराग्यं नतु शुष्कं चतुर्विधमिति पाठे चातुर्विध्यमेवद्रष्टव्यं विषयात्यागे प्रिसमानेष्टा त्यागरूपं यतमानसंज्ञं वैराग्यमाद्यं लवणादिव्यतिरेकेणापि वृत्तिर्व्यतिरेकसंज्ञं द्वितीयं मन
सि रागशेषस्थितत्वेन बाह्येन्द्रियैरेव विषयसेवनमेकेन्द्रियाख्यं तृतीयं तत्राप्यौदासिन्यं वशीकाराख्यं चतुर्थं यद्वा भक्त्यैकरागतश्चतुर्वर्गत्यागेन चातुर्विध्यं अणिमाद्यष्टैश्वर्यप्राप्तिर्यस्मात् मनसश्चांचल्या
दिमलं श्रवणादिनापहंति तद्यशो यतः प्राप्यते १६ मननशीलानां मननार्थं सत्त्वं भूतद्रोहाणां यदृच्छालाभतुष्टानां भगवदेकस्पृहत्वेन स्वर्गापवर्गनरकादौ तुल्यचेतसां सर्वत्र ममताशून्यानां मत एव प्रो
क्षितकेतनानामिति क्रमेणार्थः १७ एवमप्राकृतवैभववत्त्वेपि प्राकृतसत्त्वेनुग्रहमयोगीकारमाह सत्वमिति प्रियाकृपादृष्टियोग्या मूर्तिरधिष्ठानं इष्टदेवतास्तद्वाराध्यमानाः येषां येन च कुशलबुद्ध
यो भजंति यद्यपि तेन्याशिषः शांताः सर्वत्र रागद्वेषशून्याः १८ सत्त्वं प्रियामूर्तिरित्युक्तं तत्रान्या वा का मूर्तय इत्यपेक्षायामाह त्रिविधा इति क्रमेण तामस्यो राजस्यः सात्विक्यश्चेत्यर्थः तत्तात्कृतसत्त्वेखलु तस्य
भगवतस्तीर्थं भक्तिप्रतिपादकं शास्त्रं तस्य साधनम वगमद्वारं भवति ततसत्त्वमेव प्रियामूर्तिरिति भावः १९ एवं तेषां निर्णयमनूद्य स्वयमेवाहेत्याह वृष्णिकडवाचेति सरस्वतीतीरवासिनो विप्रान् ऋणां शंसय
तुन्नर्थं एवं पूर्वोक्तप्रकारेण निश्चित्य त[illegible]कृत्या मुक्तिं प्राप्ताः २० तदेवं सर्वजनसंशयायनोदकं श्रीगुरुपदेशं संतोषेण श्लाघमानः सूतउवाच इतीति पूर्वप्रकारकं व्याससनंदनमुखपद्मस्य गंधश्यामोद इव स्वा
दविशेषाय त्रताद्दृशोपि स्पष्टतुल्यमिति स्वतः पुरुषार्थरूपं जरामरणादि भवभयच्छेदकं चश्रोत्रभिः लोकोयत्र तदेत चरितं यः संसारपथिको मुहुः सेवते सोध्वभ्रमणं तद्धर्मं च जहाति ततः परं भ्रमणाभावात् तदानं
देन प्राचीनदुःखविस्मृतेश्च २१ एवमुक्त्वा श्रीविष्णोरुत्कर्षः सर्वाश्चानि श्रीकृष्ण एव पर्यवस्यतीत्याशयेन साक्षात्तन्माहात्म्यमेव वक्तुं प्रसंगांतरमारभते एकदेति किलेति विख्यातमेतन्नास्ति वितमित्यर्थः २२
रात्नउग्रसेनस्य द्वारिच्छकोशा आतुरः शोकपीडितः दुःखितमानसः २३ ब्रह्मद्विट् ब्राह्मणद्वेषी ब्राह्मणमरणेपि यो दाक्षिण्यात् विषयासक्तमनसः यतः क्षत्रियाधमस्य २४ राजदोषेण स्वशिशु मृतो शास्त्रप्रमाणयति
हिंसेति नित्यं दुःखिताचितिधरणौ कार्ताः सरयः २५ चकारादन्यमपि नवमं तं विप्रर्षिरिति स्वतोदोषाभाववत्त्वं तीगाथां ब्रह्मद्विषइत्यादिवाक्यमगायत चुक्रोशेत्यर्थः २६ नृपातिकस्थितके शावंतिके वर्त
मानः सम्यक्साश्वासनमुवाच २७ किंस्वित्किमर्थं वक्ष्यधारोदिपि यतइह धनुर्धरमात्रो राजन्यबंधुरपिनास्ति किमुत राजन्यः एतेतु सत्रयागइव ब्राह्मणामिलिता इत्यर्थः २८ किं वा ति नीचक्वे

महा

नैवचितकर्थो इत्याह ध्वनेति अपक्वाविमुक्ताः यत्र येषु जीवत्सु नोचंति ते क्षत्रियवेषेण जीविकां संपादयंति २९ हतकल्मषः अग्निप्रवेशेन ब्राह्मणरक्षणपापात् हतः स्यामिति शेषः ३० व संकर्षण इति युग्मकं
यत्र यदपत्यरक्षणरूपं कर्म त्रातुं निर्विघ्नीकर्तुं न शक्नुवंति नोत्सहंते ३१ ते जगदीश्वरैरपि दुष्करं तत्कर्म भवान् कथं नु त्रातुं शक्नोति तस्माद्बालिश्या देवत्वं त चिकीर्षसी तत एव वयं न श्रद्दध्महे ३२ कार्ष्णिरेव प्रद्युम्नो-
पि चाद निरुद्धोपि ३३ त्र्यंबकस्य किरातरूपिणः तोषणं तुल्यतया प्रीतिकरं अतो मम त्र्यंबकजय तुल्यत्वान्न त्वस्त्रमपि मरणादिना जित्वा प्रजाः प्रजामिति पाठे अर्जुनस्यापीदृशी गर्वोक्तिर्ब्राह्मणे देवस्य विक्षोभेच्छया
क्रोधेन दुःखविशेषात् तेन तदुपेक्षा च द्विजात्मजा मे युवयोर्दिदृक्षुणेति वक्ष्यमाण तदुत्कंठा प्रतिपालनाय ३४ विस्रंभितः विश्वासं प्रापितः निशामयन् पश्यन् ४८ एवनु इति यावत् ३५ प्रसूतीति तदर्थद्वारं
कायामेकाप्यर्जुनस्य वासः सूचितः रात्रावर्जुनो नीतिकमागत्येति शेषः गतेऽर्धरात्रसमय इत्यादि हरिवंशोक्तेः ३६ सोर्जुनः तद्विप्रगृहं गतः सन्निति शेषः महेश्वरमिति क्रोधेन श्रीकृष्णावज्ञयेति भावः श्रीकृ
ष्णावज्ञया शिवभजनमप्यकिंचित्करमिति द्योतं ३७ ब्रह्मास्त्रप्रभृतिमंत्रितैः शरैः ३८ आकाशमार्गेण दर्शनं प्राप्य देहोपि नावशिष्ट इत्यर्थः ३९ तदा ततः ४० यस्मायं तस्याविता न्यः क ईश्वरोस्ति ४१ दैवेनेश्वरेण यो
पसृष्टं कृतं दुर्मति दुष्टबुद्धिः नाहं संकर्षण इत्याद्युक्तेः ४२ भगवान् भूतानां प्रद्युम्नस्यादिकेनेति तद्बालनयने योग्यता ४३ विप्रेति सार्धकं अचक्षाणः अपश्यन्निति विद्यां बलादवगतस्य तद्रूपस्यादृष्टेः इत्यन्या
मुगमनं स्वगुरुणा शिवेन तत्त्वयना संभावनात् धिष्ण्यानि ब्रह्मादिस्थानानि उद्यतशस्त्रास्त्रः ४४ ततः तेषु हि निश्चितं प्रति प्रवृत्तानि वारयता तन्मरणेच्छाप्रातिकूल्येनोक्तः ४५ दर्शय इत्याश्वासनार्थं व
तेमानसामीप्ये त्वद् मावज्ञ मावज्ञानीहि ये मनुष्यानिंदंति त एव नः कीर्तिं स्थिरां करिष्यंति देवादयस्तत्त्वं विंदंत्येवेति भावः येनेह कीर्तिं विमलां मनुष्याः स्थापयंति न इति पाठांतरं ४६ भगवानीश्वरोपि इ
च्छामात्रेण बाल्याद्यानयनसमर्थोपि दिव्याश्वरथमेवाविशत् दिव्यं स्वमिति पाठांतरं तस्य च मत्कारायनिजदिव्यविद्यादिव्यैश्वर्यादि प्रकटयितुमिति भावः अत एव स्वाविर्भावविशेषस्याग्रे बकांजलि
त्वादिकं दिव्याश्वानां तमसि लब्धगतित्वादिकं च दर्शयिष्यते ४७ सप्तसप्तगिरयो येषु तान् सप्तद्वीपान् सप्तसिंधून् सप्तसिंधूश्चेति पाठे ४८ हे भरतर्षभ तेषामैश्वर्येण ४९ तान् तथाभूतान् भगवानतो यो
गेश्वरेश्वरोपि स्वचक्रमेव प्राहिणोत् ननु स्वतेज आदिकं प्रकटयामासेत्यर्थः ५० गहनं निबिडं महत् विततं च पृथा स्यात्तथाभूतमीश्वरेण संपादितं ५१ ततश्चक्रानुपथेन चक्रानुगमनद्वारेण सप्तावर
णभेदनं तमसः प्रवृत्तेः परं परं पारभूतं तत् वेदांतादिप्रसिद्धं परं ज्योतिर्ब्रह्म समश्नुवानं व्याप्नुवत् प्रसमीक्ष्य प्रतिहतनेत्रो नेत्रे न्यमीलयत् ततस्तत्र वर्तमानं सलिलं महाकालनिर्मितमप्राकृतजलं प्रविष्टः
फाल्गुण इत्यनुषंगः एजंतमहांतऊर्मिभिर्वायोर्भूषणं यस्य तत् तत्र सलिले भवनं महाकालपुरं तत्र प्रविष्टः भ्राजतां स्वयंप्रकाशमानानां मणिमयस्तंभानां सहस्रेण शोभितमिति भवनस्यातिविस्तार उक्तः त
तोपि परतः श्रीकृष्णभवनं महत्स्वं जयत्र तत्रेत्युक्तं त तः श्रीब्रह्मपीयूषवारिधिर्निस्यंदतमः तस्यांतरे समुद्भासी रत्नद्वीपः शिलाकृयः ध्यायेत्तत्र परानंदं रामोपास्यं परं महः बल्लवीवल्लभं कृष्णं गो
पकन्याः सहस्रशः इति आदि ५३ तस्मिन्निति सितयोर्निलाः कंठाजिह्वाश्च यस्य तद्ददर्श फाल्गुण इति प्रकरणलब्धं ५४ तस्य भोगो देह एव सुखं करं मासनं यस्य तं च ददर्श अपरिछिन्नप्रभावं पुरुषो
त्तमाः संकर्षणादयस्तेभ्योप्युत्तमं ५५ महांतो मणिव्राता येषु तेषां किरीटकुंडलानां प्रभया परितो व्याप्ता अपरिमिताः कुंतला यस्य तं ५६ मूर्तिधरैः स्वमस्तकोपरि तत्तच्छिन्नशोभितं देहेरायुधैः आदिप
देन श्रीखगदारवड्गचर्मशार्ङ्गचापपाशाः अष्टभुजत्वात् कीर्तिसहितया जयया अणिमादिऋद्धिभिश्च मूर्तिधराभिः परमेष्ठिनां द्विपरार्धांते मुक्तानां ब्रह्मणां तत्रागतानां पतिं ५७ आत्मनामिति गोवर्धनपूजायामि
त्वलीलाकौतुकार्थं तत्त्वं सर्वमिति भावः जिष्णुस्तत् दर्शनजातसाध्वसः सन्नववंदे स तु भूमा गोवर्धनेन मुग्धदेव श्रीकृष्णमादपि दर्शितनिजमहत्वः अतऊर्जया अर्जुनस्य स्ववाक्यादराद्युत्पत्तये प्रगल्भ
या गिरा ५८ तथापि तस्य मुखात्तयोर्माहात्म्यं स्वस्मात् आप्याधिक्ये नवनिर्गतमिति तद्वाक्यमेवाह द्विजेति हे धर्मगुप्तये कलावतीर्णौ कलातिः सर्वशक्तिभिर्युक्तावेवावतीर्णौ सर्वांशिनावेव प्रकटौजा
तो युवयोर्युवां दिदृक्षुणा मया मे मम भुवि भाप्ति द्विजात्मजा आनीताः हरिवंशे प्यर्जुनं प्रति श्रीकृष्णोक्तिर्मद्दर्शनार्थं ते बाला हृतास्तेन महात्मनेति युक्ता चेयं स्वाविर्भावस्यापि स्वदिदृक्षा विस्मापनं
स्वस्य च सो भगवद्भेः परं पदमिति तत्तीयोक्तेः सर्वथा सौदर्यादिगुणाद्यतिशय उपपाद्यते नन्वास्तामेवम धुना किं करणीयं तत्राह भूयः पुनरपि अवतिष्ठान् भक्ते मे भेरास्कुरान् हत्वा मे अंतिसमीपायता
न्स तत्समीपं प्रापयितुं त्वरयेतं त्वरयतं त्वरे हेतु मणिर्जल्लिडु शीघ्रं तान्मुक्तस्थाने मां प्रापयतमित्यर्थः तत्कामोमुक्तप्राप्यत्वेन हरिवंशोक्तेः अंतीत्यव्ययोत् क्रियार्थोपपदस्य च कर्मणि स्थानिनः
ति विहितायाश्चतुर्थ्या लुक् ५९ ननु सर्वतः परिपूर्णयोरावयोर्धर्मगुप्तिपरत्वेन किमित्याशंक्य करुणया धर्मस्थापनार्थमेवेति सिद्धांतयन्नुदाहरणं दर्शयति पूर्णेति युवामृषभौ सर्वाविर्भावश्रे
ष्ठावतएव पूर्णकामावपि स्थित्यै सर्वपालनाय लोकसंग्रहं धर्ममाचरतां मध्ये नरनारायणावृषीभूतं तद्रूपाभ्याम् शेनावतीर्णावित्यर्थः अधुना तु साक्षात्स्वयमेव स्वरूपयावतीर्णाविति भावः व्या
ख्यांतरं तु कृष्णस्तु भगवान् स्वयमित्यादिविरोधात् मदंतिकमागच्छतं नरनारायणौ भूत्वा धर्ममाचरतमिति च परस्परविरोधाच्च यद्यद्व्येपि नादृतं ६० इतीति सार्धकं इति पूर्वोक्तप्रकारेण गोवर्ध
नमखवद्वीलाविशेषसंपादनाशयेन आदिष्टौ प्रार्थनारीत्या वचनाहीव व्यादेशरीत्योक्तौ भगवतास्वस्य महैश्वर्यशालिना कृष्णोपूर्णब्रह्म चेपि नरलीलौ अत्र सर्वत्रार्जुनस्य श्रीकृष्णसाम्येनोक्तिः
प्रापश्चान्नियायेन साहचर्यात्तत्तया धामद्वारकां संप्रत्त्पाविति अर्जुनस्यानीकसिद्धे भगवतस्तत एव हर्षः यथागतं पूर्ववत् तम आदिभेदनप्रकारेणेत्यर्थः ६१ विप्रायेत्यर्धकं प्रभूदुर्ग
दघटनासमर्थौ ६२ फलितमाह निशाम्येति वैष्णवं धाम महाकालपुरादिकं दृष्ट्वा विस्मितोपि पुंसां सर्वेषामीश्वरप्रादुर्भावानां यत्किंचित्पौरुषं तत्कृष्णकृपासंपादितं मेने तेनापि युवयो[illegible]
व्याप
दिदृक्षुणेत्यादि भाषणात् यद्वा विष्णुः सर्वाविर्भावकः कृष्णस्तस्य प्रभावं कालपुराधिपमुखेन श्रुत्वेति एवं व्याख्याने मूलं तु एते चांशकलाः पुंसः कृष्णस्तु भगवान्स्वयमिति प्रथमस्कंधे तत्तीया
ध्यायोक्तिदैवेति समनंतरमेवोक्तं तद्वि सर्वभगवदाविर्भावसूत्ररूपत्वतीयाध्याये परिभाषारूपं परिभाषा हि सकृत्स्वहितापि संदिग्धप्रदेशे तत्तद्वाक्यार्थपरिष्काराय सर्वशास्त्रं व्याप्नोतीति प्र
सिद्धं न चेतदनुरोधेन तद्वाक्यस्यैवान्यथा व्याख्यानं शक्यं तस्योपक्रमस्थत्वेनासंजातविरोधितया प्राबल्यात् दुत्तरवाक्यानामेवो[illegible]नुसारि व्याख्यानौचित्यात् किं च कृष्णस्तु भगवान्स्वयमि
तिवाक्यं विस्पष्टार्थतया निरपेक्षरवत्वेन श्रुतिरूपं उत्तरवाक्यानि तु शापनादिविषयालिंगादिरूपाणि लिंगाद्यपेक्षया श्रुतेः [illegible] च पूर्वोत्तरमीमांसयोः प्रसिद्धं स्वामिपादैरपीदं वाक्यंत

भा ३२

तत्र प्रमाणीक्रीयत एव एवं स्थिते लीलायां तत्र तत्र भगवतास्वल्पघुता प्रदर्शनं न तत्समापकं नारदादिभिरपि तस्य लघुत्वव्यवहारदर्शनादिति दिक् ६३ अथैतत् [illegible] न्यपि तच्चरिता
नि स्मृत्वा सर्वाणि विचक्षन्नपि परीक्षिदायुः स्वल्पतासंकोचेन सदुःखमुपसंहरन्साश्रुगद्गदमाह इतीति त्रिभिः वीर्याण्यद्भुतकर्माणीह लोके प्रकटयन्नपि लौकिकानेव सर्वविषयान्निजशक्तिति
लौकिकीव स्वभुभुजे इत्यर्थः ६४ कामानिष्टार्थान् यथाकालं तत्तदवसरे अविच्छेदेन ववर्ष इंद्रो यथा जलानीत्यतिबाहुल्ये दृष्टांतः यतः सर्वावतारेभ्यः श्रैष्ठ्यमास्थितः ६५ धर्मस्य भक्तिप
यं तं प्रावर्तयत् एवं भगवतः सर्वसुखकर्तृत्वं स्मृत्वा क्षणं श्रीशुकः कौरुरोदेति ज्ञेयं तदिदमर्जुनस्य चरितं भारतयुद्धात्पूर्ववृत्तमपि श्रैष्ठ्यकथनप्रस्तावादत्रोक्तमिति विभावनीयं ६६ इति
श्रीमद्भागवतदशमस्कंधसंस्थितः नवाशीतितमोध्यायस्तोषिणीसारसंग्रहे १ इति नवाशीतितमोध्यायः ८९ राजते बहुभार्याभिः सुभार्यासु भगवदृतिः तदात्मापाश्यसुरसोः सुरसा
र्थसुखावहाः १ अथ न्विचित्तसमाधाय समाधायकन्तत्कराद्दू स्मृत्वाहानंदसरसां सरसां निलयां कथां २ एवं क्षणं प्रेमाश्रुधाराधरोद्धृत्वा ततश्चित्तसमाधाय समाधौ परमसुखमयीं ली
लां स्मारयन्नाह सुखमित्यादिना तत्राद्यैः षड्भिः कुलकं नितरां मुख्येन सर्वाभिरूपेण वसन् अतः श्रियः रुक्मिणीरूपाया माहात्म्यश्च्याः पतिः अत एव सर्वाभिः स्ताइत्यत स्त्रीलीलायोग्याभिः संप
द्भिः समृद्धायां षोडशसहस्रपत्नीनामेकवल्लभः सन् तासां गृहेषु रेमे इत्यन्वयः ३ नवं प्रत्यहं पूर्वपूर्वतो विलक्षणं यौवनं कांतिश्च यासां कंदुकगीतनृत्यादिक्रीडयेतस्ततश्चलंतीनां तडिता
मिव द्युतिर्यासां तासां तिर्जुष्टायां २ एवं मातरं संपत्तिमुक्त्वा बाह्यामाह नित्यमिति अलंकृतैरिति गजादिभिरुपलक्षितैः ३ ततोपि बाह्यां शोभामाह उद्यानेति ४ रेमे बहुधा विचिक्रीडे कथं तत्राह
षोडशेति एकोपि वल्लभः सन् रूपाणि एकस्यैव विग्रहस्य सर्वत्र स्फुरणानि ५ गेहविशेषणे प्रोत्फुल्लेत्यादिश्लोकेन वासितान्यमलतोयानि गृहारामगतवाप्यादिसंबंधीनीयेषु ६ बहुधा चि
क्रीडेत्युक्तं तत्रोपलक्षणार्थं जलक्रीडां विवृणोति विजहारेत्यादिना हेमंतवसंतादिऋतुषु जलकेलियोग्यो [illegible] तादिजलमयीषु तावत्सली विहारोचित विस्तारासु स्वगृहपुरतो निर्मिता
सु नदीनीषु सरस्यादिरूपासु अंग अंतर्विगाह्य विजहार महानुदयो वैभवं यस्य योषितां कुचकुंकुमैर्लिप्तांगः यन्नस्ताभिः परिरब्धः ७ उपेतियुग्मकं गंधर्वैः स्तुतादिभिश्चोपसर्वतोधिकृतयागी
यमानः मुदेति सर्वत्र ८ अच्युतोपि जलक्रीडायां मे स्मातिः परिभूत इति मत्वाह सतीभिः रेचकैः चर्मादिमयजलसेचनयंत्रैः ९ [illegible] त्वस्त्रा अत एव विवृतोरुकुचप्रदेशाः उद्धृतानि विचित्राणि [illegible] बरेभ्यः प्रसू
नानि यासां ताः तेन जलसेचनैः पराभूतत्वात्तद्वस्ततो रेकहरणेच्छया तं गाढपरिरंभणरूपेण [illegible] स्मरेणोत्सवास्तेन रोचितवदनाः १० तासां स्तनेभ्यो विषक्तात् कुंकुमात्तक्रयस्य सः क्रीडायाः अतिषंगेणाभिनिवे
शेन कंपितः केशबंधो यस्य सः स्वच्छंदतया क्रीडा मुखदर्शनतः करेणुभिरिवेति ११ नटानिति षष्ठी चतुर्थ्यर्थे १२ तत्रैवाश्चर्यविशेषं वक्तुमाह ऊहमस्येति द्वाभ्यां उक्तप्रकारेण कदाचित् गृहे कदाचिज्जले च क्रीडतः
स्त्रीणामुल्लसितविचारप्रेमस्वभावानां धियो हृताः स्ववशीकृताः किल वार्ता यो इदमाश्चर्यवृत्तं शृणवीत्यर्थः १३ तत्र के दाचिदुन्मत्तवत् भक्त्युद्रादिविक्षिप्तचित्ताः वागिराः क्षणं मोहप्राप्यानिद्राणो इव तद्धर्मी स्थिताः सत्या
रविंदाक्षं परोक्षमपरोक्षं वा स्थितं चिंतयंत्यः परोक्षतया भावयंत्यः जडं विचारश्च न्यथास्यात्तथोचुः स्वप्न इव प्रलेपुः उन्मादे पितच्चिंतने हेतुः मुकुंदैकेति अत्रापरोक्षपक्षे भगवांस्तद्दृष्टवण कौतुकायतत्रैव स्थित
इति ज्ञेयं वैचित्र्यविप्रलंभारव्यो भावो यं प्रलापदेवनमुक्ताफलादिग्रंथे व्यक्तीकृतः वर्णितश्च श्रीहर्षादिभिरपि १४ तत्र सर्वासामेकजातीयभावत्वात्तौरग्रादिवाचश्च सर्वा एवोचुरित्याह महिष्य ऊचुरिति त
त्र स्वभावत एव रुवतीं कुररीमाहुः हे कुररि जगती त्वमेवैका वीतनिद्रासती नत्रैषे राय नेच्छामपि न करोषीत्यर्थः यतो विलपसि ईश्वरो रासमस्यतिस्करात्र्या मन्वेषणनिरोधिन्यां गुप्तबोधः कोप्याछन्नः शेते तस्मादिदंत
कर्याम इत्याहुः वयमिवेति नलिननयनस्य हासेनोदारं यल्लीलेक्षितं तेन गाढं निर्विद्धचेता स्वमिति १५ ततोप्यधिकं चक्रवाक्या आर्तनादं श्रुत्वाहुः नेत्रे इति नक्तं रात्रौ वदृष्टप्रियतमा सती करुणं यथास्या
त्तथाभवत्प्राप्तार्तरावं ततोपि बत खेदे अस्मत्समेव त्वमपीति भावः स्वपत्युदर्शनमात्रेण नैतावत्स्यादिति मत्वा पक्षांतरमाहुः दास्यमिति भगवत्पादा [illegible] दगस्पृष्टामिति यावत् स्रजं वयमिव दास्यं गतास
ती वोढुं स्पृहयसे तस्य कांतो भूत्वा तदुचितसौभाग्यमिच्छामीत्यर्थः तदलाभाद्रोरवीषीति भावः १६ ततोप्यधिकतरमाक्रोशंतं समुद्रं प्रत्याहुः भो इति विप्रासावदात् अलब्धनिद्रत्वादेवाधिकं प्राप्तः प्रवृष्टजाग
रो येन तथा सन्न सदाकिंनिष्ठनसे क्रोशसि अस्माकं केनापि दुःखेनेदृशात्वं तव तु नामत वतु कुत इति भावः क्षणं विमृश्याहुः किंवेति सर्वदुःखमोचकेनाप्युपत्तमात्मलोछने स्वभावसिद्धधैर्यगांभीर्यादि
लक्षणं यस्य तथाभूतः सन् अस्माभिः प्राप्तां त्वं च अस्मद्वत्त्वमपि दुर्लंघ्यां दशां तदप्राप्तिदुःखावस्थां प्राप्नोसी हा कष्टमिति भावः १७ अहो तीर्थगाद्या अपि क्रोशंति अयं सर्वेषु गुणश्चंद्रमाः कथं मौनी वर्तते इ
ति विभाव्य तं चेदमपीत्याहुः त्वमिति सौइंद्रोऽसु भामयात्वत्तोपि बलवता यक्ष्मणा रोगेण गृहीतोसि यतः क्षीणः सन् निजसर्वदीधितिभिः दुर्णिमायामपि तमः सूर्यवन्नाशयितुं शक्नोषि पतिविरहेण वयं य
था क्षीणाः स्वदुःखहरणप्यशक्ताः स्तथात्वमपि यक्ष्मणेति भावः अत्रापरितुष्य पक्षांतरमाहुः कच्चिदिति किंवा मुकुंदस्य गदितानि समयबंधादीनि विरहदुःखाद्विस्मृत्य तत्संगाभिश्च येन क्षीणः सन् तमो न क्षि
णोषि यतो वयमिव त्वं स्थगितगीः स्तब्धवाक् नो स्मांतिः लक्ष्यसे १८ रात्रिं ग्रोषेव हंतेस्मरोद्दीपनं दक्षिणवातं व्याजस्तुत्याहुः किन्निति हे मलयस्य चंदनाकरस्यानिल किं तवेष्टमस्माभिः कृतं यतो गोवि
दकटाक्षनिर्भिन्ने म्लछितप्रायेस्मरं स्मरंति चेतनां प्रवेशयसि यद्वानितरां भिन्नत्वात्त तुल्ये हृदिकामाग्निमंत्र्य [illegible] याचितं दहसि पुत्रादितुल्यात्रवसीति भावः वस्तुतस्तु किं तवाप्रियं कृतं तद्वद यतस्त्वं
टाक्षे रेवाकुले हृदि काममपीरयसि अप्रियाचरणं विना स्मरोद्दीपनेन व्यथाव्यथां जनयं स्वमति मृखदृति भावः १९ वर्षतं मेघं भगवद्विरहादुदंतमत्वा तत्सारूप्यदर्शनोत्थसौहार्देनाहुः मेघेति वि
तर्कार्थं कं नूनमिति सर्वत्र योज्यं हे मेघ त्वं नूनं भिवृत्तस्य प्रियसखोसि यतो हे श्रीमन् प्राप्ततत्सारूप्य श्रीकृष्णसारूप्यत्वात्तेपि स्वाधिकलक्ष्मीक ममहं नवान्ध्यायति साहस्य लक्षणं च रमफलत्ना
ते किं ध्यानेन तत्राहुः प्रेमबद्ध इति श्री [illegible] स्तस्तथा स्वभाव एवेति भावः प्रेमबद्धत्वे हेतुः अत्युत्कंठ इति अत्र लिंगं शबलं वैवर्ण्यं नानाविधं हृदयं मध्यभागो यस्य तद्व्युक्तमित्याहुः अस्मद्विध इति
रतन मत एव तं स्मृत्वा स्मृत्वा वृष्टिरूपा बाष्पधारा मुहुर्विकिरसि युक्तं चैतत् यतो दुःखदस्तस्य प्रसंग आसक्तिर्वो तो मात्रैवेति २० रात्र्यवसाने कूजंतं कोकिलं व्याजस्तुत्याहुः प्रियेति हे कोकिल पंच
मगानलिपुण तत्रापि मत्प्रियेण शिक्षाविशेषाद्दत्तोल्लतः कंठो यस्य प्रियस्यैव रावैः पंचमस्वरायेषु तानि पदानि हृत्वानुरूपान् शब्दान् तापसे तद्विरहमृतान् संजीवयसि ततया गिरा अतः प्रियं किंक

रवाणि तन्मेवद वस्कृतस्तु. मृतसंजीविक येति मया तद्विरहत्वा सहिष्णुत्वान्मरणं नेवेष्यते त्वं तु मत्प्रिय वद्भापातामृत वचनेन तद्विघातयन् दुःखमेव ददासि अतस्तव अप्रियं तु डवेञ्जो टनादिकं किंकरवाणि तत्त्वमेव वद
अत्रापराधे स्वदंडं स्वयमेव ब्रूहीत्यर्थः २१ स्थिरं त्रायीत सर्वज्ञं तु त्वा त्वहमी स्थितं चरेव तकाद्रिमरुणोदयं हृष्ट्वाहुः नेति हे क्षितिधर सर्वां पृथिवीं धरसि तथापि न चलसि न चवसि तस्मा दुदारा महती बुद्धिर्यस्य सः अ
त एव कमपि महांतं पुरुषार्थं चिंतयसे कामयसे तत्र सशंकमाहुः अपि प्रश्ने बत खेदे देवस्यास्मत्त्वत्स्य श्वशुरस्य नंदनः श्रीकृष्णस्तस्याध्रिं वस्कृ महामणिरूपस्तं नैर्विघ्नं तु स्वयं नारी त्वयस्तनीकृतेः श्रंगे सान्त्विं
गितु कामयसे किं यदि कामयसे तर्हि स्माकमिव तवाप्यबुद्धिः त्वं स्वप्राणमात्रेपि धारणासामर्थ्ये च न विष्यतीत्यर्थः साक्षाच्छ्वशुरनाम्नोच्चारणानौचित्यात् दास्विति पृथक्पदच्छेदेन व्याख्याने उन्मादात्त्याद्दोषात्ता
वेरत्वखंडमेवास्तु २२ अथ निदाघशुष्कानदीं दृष्ट्वा तोदष्ट्वा म्लच्छितामत्वा असंबोध्यमिथ आहुः शुष्यदिति सिंधोरपि पत्न्य एताः संप्रति जपेतकमलरूप मुखश्रीः ताजातोः शूष्यद्दृदरूपह्रदयाः कृत्रातदाः कृत्राग्य
श्च ज्ञाता बत खेदे किं कृता इष्टः प्रियो भर्त्तो यः सिंधुस्तस्य प्रणयावलोकविरहरूपनिदाघेन निष्कृदनाद प्राप्य तस्मादहोकष्टमस्मत्सादृस्यमेतावत्यविगता इत्याहुः यद्वदिति पुरुकर्शिता इति पुरुपदेनापेतमुखश्रीत्व
संगतः २३ आत राग तहंसं दूतं मत्वाहुः हंसेति स्वागतं सुष्ठु आगतं किं यद्वात्राव सरे स्वयमागतं तं छात न मिन्यर्थः ततश्चोपविश्य ता पयः क्षीरं पिब एवमातिथ्येन सत्कृत्य प्रार्थयन्ते ब्रूहीति अंग हे अस्मदंग
तुल्य हे अस्मदीयेत्यर्थः श्रीकृष्णस्य कथां समाचारं ब्रूहि यतो नु निश्चितं त्वां दूतं विद्मः तत्र कुशलत्वं पृच्छति कच्चिदिति अजितः अकृपः प्रेमणा प्रवशीकृत इत्यंतर्भाव्यं जयन्ते भव द्विरहे कथं सुखमास्ताभिति चेत्तर्हि
नोस्मा प्रति पुरानुनयादि समये उक्तं किं वा स्मरति न न्हु सदा स्मरत्येव कुतो वः संदेहस्तत्राहुः चलसौहृद इति ननु स्थिरसौहृद एवासौ हृद एवासौ युष्मान् कामयते इत्याशंकायमसमानमाहुः हे क्षौद्र क्षुद्रस्य दूत तं वयं क
स्माकृज्जा म इति विरहार्तोत्रिर्युष्माभिः कामदो सावकस्य तज्जनीय इति चेत्तर्हि तमत्रैवात्रापय आकारय स्वीकृत्य गच्छ तन्निवर्तते पुनराहुः अस्मत्प्राबल्लसपत्नीं श्रियमृतेत मेवैकमाकारय एकनिष्ठासाकथं परिहर्तुं त्रा
क्या तत्राहुः स्त्रियां स्त्रीषु मध्ये सेवक निष्ठा किमिति काकुः क्षौद्रालापमकामदं निष्ठास्त्रियइति पाठे मधुरालापमइति प्रदत्तं श्रियमृतेव यं कुतो भजामः किंतु सैव भजतु यतो स्माद्वयः स्त्रियो मानेकनिष्ठा इति २४ एवं प
लितता दृश्यप्रेमवतीनां तासां माहात्म्यमाह इतीति उक्तरीत्या दुर्लक्ष्ये भगवती सदा विधीयमाने नेदृशेन सर्वविलक्षणेन तावन्मात्रेण पत्न्यः वेदृशीं गतिं लेभिरे भगवत्तुल्य व्यापकचिद्विग्रहात्ता इत्यर्थः परमामि
ति पाठांतरं अर्जुन पराजयानंतरं कासांचिद्दुर्जनाकर्षणादि प्रदर्शनं तु मायामात्रमिति ज्ञेयं २५ इदं नाति चित्रमित्याहुः श्रुतेति उरुगीयो शिर्गीते गिरिभिः रुरु यथास्यात्तथा गितः किं पुनः तत्रापि साक्षात्स्वस्यं तीनां किं वक्तव्य
मित्यर्थः कुतः पुनरिति पाठांतरं अतस्तासां सर्वदा तेन विरहं तीनां तादृशभावोयुक्त एव कचिदन्यथा श्रवणं तु एवं वदंति राजन्यर्थे इति न्यायेन मुनीनामपि मोहनमेवेति भावः २६ अतस्ता एव धन्या नत्वन्यः कोपीत्याह
या इति याः काश्चिदन्या अपि भर्तृबुद्ध्या भावनामात्रगम्य भर्तृत्वेन मानसपादसंवाहनादिभिः सेवंते तासां तपो वर्णयितुं न शक्यते साक्षात्तमेव भर्तृत्वेन तथा सेवमानानां वा तो दूरत एवेति भावः २७ एवमस्तौ कि कींक्री
डां वर्णयित्वा वेद कर्माण्यपि तथैव स्यतीति दिज्ञात्याह एवमिति धर्मं यज्ञादिकं मुहुरनुतिष्ठन् गृहं धर्मार्थकामानां पदं मन्यमान उपदिदेशेत्यर्थः २८ अथ ता दृशगार्हस्थ्यांगभूतानां भगवत्पुत्रादियादवानां माहात्म्यमु
क्ता नुवाद पूर्वकं वर्णयति आस्थितस्येत्यादिना गृहिणां परं मुख्यकल्पेनानुष्ठेयं धर्मं कृष्णस्य धर्मानुष्ठानमाधुर्येण सर्वचित्ताकर्षकस्य महिष्यस्त्विति रुक्मिण्याद्या अष्टौ तु महामहिष्य इति भावः षोडशसहस्रं महिष्य
स्तत्राधिकं यथा स्यात्तथासन् महिष्यश्चेति पाठे पिएवार्थः २९ तासां महिषीणां अष्टौ यामहामहिष्यः प्रागुदाहृतास्तासां च पुत्रा अनुक्रमेणोदाहृता एव व्यास समासाभ्यामित्यर्थः ३० तद्वानुस्मरयति एकेति यावत्यो ना
र्यस्तावतीष्वप्येकैकस्यां दशदश पुत्रान् हि यतः अमोघरति अव्यर्थसुरतांत इत्यर्थः दशानां पुत्राणां येषु श्रुत्यनुसारी सत्यसंकल्प इति भावः ३१ महारथा महावीराः उदारयशसः सत्कर्मपराः ३२ प्रद्युम्न इति यु
ग्मकं अनिरुद्धनामा कश्चित्पुत्र एव तेनैकेन तद्धितमाध्याया योक्तेत्यो न्ये पि केचिन्नान्या सांपुत्रा अप्यत्रोक्ता इति लभ्यते ३३ विरूप इति पूर्वं वरूथ नाम्नोक्तः ३४ पितृवत् पितृतुल्यत्वादित्यर्थः तत्रापि हेतुः रुक्मिणीसु
त इति सर्वश्रेष्ठायाः श्रेष्ठपुत्रत्वादित्यर्थः ३५ महारथ इति राजवर्ग्यजयेन युद्धे रुक्मवतीहरणात् नागायुतबलेति लोकेरीत्या वस्तुतस्त्वीश्वर एवेति ३६ स चापीति न केवलं प्रद्युम्न एव मातुलत्वि मुपयेमे किं
त्वनिरुद्धोपीत्यर्थः रुक्मिण एव दौहित्रः ३७ श्रुतसेन इति भद्रसेन इति पाठो अग्ने वज्रानुक्तिः सांकर्यादिना वंशाल्लोपारं नीत ३८ एतस्मिन् भगवत्कुले जातो उस्त्ना धनहीन न जज्ञिरे इत्यादि ३९ विख्यातकर्म
णामपि किं पुनरन्येषां ४० संख्या नाम्नाक्तो हेतुः तिस्र इति यदुकुलस्याध्यापकाः सहस्राणां कुमाराणामिति एकैकं सहस्रमेकस्याचार्यस्य शिष्या इति सहस्रगुणिताचार्यसंख्येव कुमारसंख्येत्यर्थः श्रुतेत्यश्रुतिरिति पाठो ४१
नित्य राज्ञः सेवकानां संख्यामाह संख्यानमिति येषु मध्ये अयुतानां त्रयाणामयुतलक्षेण त्रयोदशबिंदुयुक्तेन शंखत्रयेणेति यावत् आहुकः उग्रसेनः सदास्ते सदाहुकस आहुक इति पाठो आसीदिति वाच्ये आस्त
इत्युक्तिर्नित्यलीलास्फूर्त्या ४२ यादवाद्विविधा देवा नित्यपार्षदरूपाश्च तत्र देवानामवतीर्णत्वमसंख्यत्वं च सहेतुकमाह देवेति द्वाभ्यां सुदारुणा असुरग्राः अतः उत्तरजन्मन्यपि बबाधिरे ४३ तेषां निग्रहाय वधा
य अवतीर्णाः प्रत्येकं बहु भीरू पैरित्यर्थः ४४ नित्यपार्षदानां ततो पि संख्याधिक्यमाहुः तेषामिति ये च ये तु भगवतोनुवर्तिनः नित्यपार्षदाः सर्वयादवाः संख्यातीवैभवतश्च वृद्धिं प्राप्तास्तेषां विभुत्वे वैभवेचा
संख्यायां च हरिरेव प्रमाणं साक्षी न त्वन्यः अयं च देवगणांकृत्य हरिवंशे अक्रूरोक्त्यो व्यक्तः देवानां च हितार्थाय वयं याता मनुष्यतामिति ४५ तेषां च इमीनां माहात्म्यमाह शय्येति शय्यादिषु संततं जाग्रतम
प्यात्मानं न विदुः भगवत्प्रेरणयैव सर्वं कुर्वंति न त्वनुसंधातुं शक्नुवंतीत्यर्थः यतः कृष्णे चेतसः यद्वा यादवकुलमहो अविषयं एवमास्त इत्यादिना तेषां देहः व्यापकं किंतु तद्विरहोन्मादं व्यापकं एव ४६ एवं यदु
कुलरूपं परिवारं प्रशस्य भगवंतं प्रशंसति तीर्थमिति भगवतः क्षिति भर हरणं पूर्ववर्णितं चित्रं बहुधा विस्मयावहं न यतो द्विपरार्धांतः काल एव सुदर्शनाख्यमायुधं चक्रं च स्व परिवर्तमानं संहारसाधनं
वा यस्य तद्विचित्रतार्थमेवात्ति चित्रे विशेषणेर्विशिनष्टि यतः यस्ता दृशोपि यदुषुजातः यश्च स्वः सरिद्वारव्यपादशौचरूपं तीर्थं कृतं स्वकीर्तितः स्वचरणरजः संबंधि यमुनादि तः आत्ममाहात्म्यं चक्रे येन
हेतुना विद्विषोपि स्निग्धाः पितृत्वात्रादयोपि स्वरूपंतत्साहृप्य यत्सु पतयत्र श्रीरूपादि संपत्तिः परा सर्वोत्कृष्टा अजिता अन्याः स्पृष्टाच यदर्थे यस्य दर्शनाद्यर्थमन्येषां मुहाकाल्त पुराधिप [illegible]नाम भविप यत्नः ब्रह्मण्यत्वेपि
श्रेष्ठ बालहननादि दोषानादर पूर्वकः प्रयासः यस्य नाम अबाधकालीनं नाम मंगलध्वमिरूपलक्षणं सर्वमंगलदातृच तत्रापि श्रुतमेव किं पुनर्गदितं किंच यत्कृतो येनोपदिष्टो गो. त्रमे परोक्तो भग
वद्धर्मः यद्वा गोत्रेषु ऋषिवंशेषु वर्णादिधर्मो येन प्रवर्तितः यद्वा गोत्राणामच्युतगोत्राणां वेदमवाणां धर्मः यद्वा अगोत्राः स्त्रीशूद्रादयः तेषामप्यनुष्ठेयो भागवतधर्मः स्त्रियो वैश्य इत्युक्तेः यद्वा

नी·द·उ·नो·

राम
३२२

अत्र जगति सर्वो धर्मः अगःसदास्थिरो येन कृतः यद्वा गां पृथिवीमपि त्रायते स एव तद्धर्मः भक्तियुक्तो भुवनं पुनातीत्युक्तेः यद्वा गोत्रस्य ...नोर्द्धधर्मो मखरूपो येन प्रवर्तितः यद्वा तत्रैव मखगोत्रधर्मः त्रै-
लोक्यमपि येन स्वस्मिन् कृतं प्रकाशितं यद्वा यस्मिन् गोत्रधर्मः देहसंबंधभावनारूपो विहितः येषामहं प्रिय आत्मा सुतश्चेत्युक्तेः यद्वा नंदादीनां वसुदेवादीनां च गोत्रधर्मो ज्ञातित्वसंबंधो प्रेमा येन कृतः यत्र वा ते ।
कृतः यद्वा गोत्रा गोपास्तेषां धर्मः स्वभावसिद्धः परप्रेमा येन कृतो वर्धितः यद्वा गोत्रधर्मो गोपत्वं येन स्वस्मिन् प्रकाशितमिति दिक् अथ व्याख्यांतरं स्वः सरित्स्यादत्रोच्चभूतं नं च चक्रे इत्येतत्तु न चित्रं यतो विद्धिद्रस्ति
ध्यात्रपि स्वरूपं ययुः तदपि न चित्रं यतो जितपराश्रीरित्येवं परपरत्र योज्यं अतस्तस्य सदानंदब्रह्मणः क्षितिभरहरणं नैव चित्रमित्यर्थः ७७ एवं तस्य सर्वोत्तमत्वं प्रख्याप्य स्वविनोपि तस्यातीतत्वमाशंक्य
यतः स्वानुभवेन संख्ययन्नाह जयतीति देव क्यां जन्मेति वादः ख्यातिर्नंदस्यात्मजः उत्पन्न इत्यत्र व्याख्यानतरीत्यातु यशोदायामपि तत्वं जन्म यस्येत्यर्थः स श्रीकृष्णो जयति अधुनाप्युत्कर्षेण वर्तते नातीत इत्यर्थः
कथंभूतो वर्तत इत्यपेक्षायामाह जनेषु भक्तेषु गोपालेषु निवासो यस्य यदुवराः पार्षदा यादवाः त्वत्र भूरादयः परिषत् सभा रूपा यस्य गोपयादवसहित इत्यर्थः अत्रासंभावनानिरासायाह स्वैरात्मीयैर्भक्तैः भुजैश्च
धेर धर्मं नास्ति क्यादिक मस्यन् भक्तानां तत्परिकरयुतत्वेन प्रत्यक्षीभूय तद्वारा लोकासंभावनां दूरीकुर्वन्नित्यर्थः अतो भक्तसंबंधेन स्थिरचराणां वृजिनं निजविरहदुःखं संसारदुःखं च हंतीति तथा सन् किं
चतत्त्रिया गणसहितोपि वर्तत इत्याह शोभनं स्मितं तदुपलक्षिते विलासादिकं च यत्र तेन सोदर्यश्रीमता मुखेन व्रजवनितानां गोपीनां पुरवनितानां महिषीणां च काममेव दिव्यति सर्वतो विराजते प्रेमरूपत्वो दि-
ति देवस्तस्ते दीपयन्तिति एवं वर्णित० परिकरो भगवान् पुनाप्य प्रकटरूपः सर्वोत्कर्षेण राजत एवान्यथा तत्तनोर्वि भुत्वनित्यत्वे नेत्याता तत्तत्कृत्तानां तत्तद्रूपेण सदा साक्षाद्दर्शनादिकं च न स्यादिति भावः
अत्र श्रुतिपुराणादि प्रमाणोपन्यासविस्तरस्तोषिण्यां द्रष्टव्यः ७८ हंत इत्यस्य भगवतो नुगतिं जनः कथं लभेतेत्यपेक्षायां नेदं भागवतशास्त्रं शास्त्रांतरवत्तत्त्वो र्थानुष्ठाने नैव फलदं किंतु श्रवणमात्रेणापी-
त्याह इत्थमिति उक्तप्रकारेण परस्य सर्वोत्तमस्यापि कृपया निज वर्त्मनो भक्तिरूपस्य परिरक्षया इड भावश्चार्षः रक्षणेच्छया आत्ता प्रपंचे प्रख्यानीता प्रकटिता लीला प्रधाना तनुर्येन तस्य कर्माणि अनुष्ययद्वृत्त
मस्य गोपपतेर्यदुपतेर्वा पदयोरनुगतिमिच्छन् जनः शृणुयात् कथंभूतानि तदनुरूपाणि लीलातनुर्योग्यानि च तानि विडंबनानि अन्यकर्मतिरस्कारिणी च तानि तथा कर्मरूपाण्यपि कर्मकषणानि जगतां कर्षवि-
लोपकानि ७९ यथात तच्छ्रवणेन तदनुवृत्तिः स्यात्तथाविवृणोति मर्त्य इति ननु हे राजन् मर्त्यः मरणधर्मा यः कोपि तया भक्तमाहात्म्यया मुकुंदस्य दुःखमोचकतया महाकारुणिकस्य भगवतः श्रीमति सर्व-
संदोषात्रीविद्यात्रीचयाकथा तस्याः श्रवणेन यत्कीर्तनं गानं तत्र याचिंता तया प्रमुक्तं ठामयीस्मृतिस्तया समेधितया नित्यमेव गानेन वर्धितया सत्या तस्य धामलोकमेति कथंभूतं दुस्तरः ब्रह्मादिभिर-
पि स्वतोपरिहार्यः कृतांतः कृतः सर्वस्यांतो येन स कालस्तस्य विक्रमस्य समाप्तिर्यत्र तत् तत्त्वविषयिणमपि लोभनीयश्चेत् किमुत मुमुक्षुमुक्तभक्तानामित्याह ग्रामादिति सप्तद्वीपां पृथिवीमुपभुंजते
ते पि बहवः यदेव अर्थः पुरुषार्थो येषां तथाभूताः संतो ग्रामात् जनवासमात्रं त्यक्त्वा वनं जनभूत्य प्रदेशं वृंदावनादि द्वादशवनात्मकं मथुरामंडलं वा ययुः गत्वा तत्र नियमवसन् श्रीमथुराप्राप्तेः
परमधन्यतानिदानत्वं वा राहादाभुक्ते लाभानां मधु रात्मोत्थो ज्ञानानां ज्ञानमुत्तमं प्रीतीनां परमप्रीतिर्गतीनां गतिसत्तमेत्यादि ८० इति श्रीमत् भागवतदशमस्कंधसंश्रितः नवतः एर जो ध्याय-
स्तोषिणी सारसंग्रहे १ त्रय्यर्थान् गायतः सह पुराणार्थै रुपाध्यायतः श्रीकृष्णवसाध्यायतः श्रीकाशपाध्यायतः जातः श्रीमदनंतषड्गुणगणानंताभिधो नंतहृद्धिद्धन्मान्युतोप्यमानद
पमाहीनोपि सच्छ्रीयुतः १ श्रीमद्भागवतार्थगानरसिको नैवश्रुतो यत्समः श्रीमद्विठ्ठलपादयोर्गुरुपदे श्रद्धायदीया तुला तस्य श्रीभगवत्पदं गतवतो भक्तोत्तमः स्यात्मजः काशीनाथ इति श्रुतः कविरु-
पाध्यायान्वये ग्रामणीः २ तेन श्रीतातचरणदर्शितावानु वर्तिना आचार्यवर्गादगाधद्विषणाद्विषणोपमात् ३ वेदांतितिलकाच्छ्रीमद्धरेर्लब्धप्रसादतः शारीरकादिवेदांतग्रंथाध्यापनचंचुना ४
पाठकश्रीशेषमूर्तिलक्ष्मणोध्यनुकंपया पाणिनेयेन रचितस्तोषिणीसारसंग्रहः ५ श्रीमत्सनातनाचार्यारूपाग्रजेनुषा बुधाः गोपालरूपिणः साक्षाद्धरेः संलेभिरे पयः ६ स्वप्नेभागवतं प्राप्य विभोर्वि-
प्राकृतेः किल आचरव्युर्जा गरे सर्वतोषणीटीप्पणीमपि ७ चक्रुः सूविस्तरां तां च तदंघ्रियुगचिंतकाः जीवनाथाभिधाधाः प्राज्ञाः शास्त्रे भक्तिरसाप्लुताः ८ संक्षिप्तोरचयामासुः मंदानामनुकंप-
या सापि संप्रति दुष्पारा लसैर्विदग्धैरपि ९ स्वामीपादीयटीकोपसंहाराक्षेत्राद्यप्यतः तत्सारसंग्रहोल्पेन मया कारि यथामति १० संशोध्यः कृपया विदग्धैर्रसिकैः सरवरैः क्षुद्रत्वान्मे विच्युतेर्वा पेक्षायु-
क्तानमत्कृतौ ११ संतोसध्वास्त्रविदुषां यतो हं शरणागतः बालानां विच्युतेरेव पदन्यासे रसावहे १२ मादृते गुरवः सद्भिर्हि व्याख्यादिफलेरसः किं न पेयेतवापेक्ष्यं शैवलं निर्मलं जलं १३ मात्सर्यात् यद्युपेक्षा
स्यात्तन्नयुक्तं यतस्त्वहं लघुत्वात्तु समस्तेषां सर्वज्ञविदुषां सतां १४ अतो मुहुः प्रार्थयेहं परभक्तिरसार्थिनः श्रीमद्भागवतार्थज्ञश्रद्धालून् श्रीहरिप्रियान् १५ श्रीकृष्णभक्तिभक्तोक्तेर्ष्यारहितान् बुधा-
न् क्षुद्रदीनतिरस्काराऽसूयासंसर्गिमानसान् १६ सरसाभिनवार्थश्चेत् दृष्टाकुतूहलान् हेलनाद्यापि संद्रेक्ष्याटीके यमितिसादरं १७ निजमत्येवलिखितं टीकाद्वयविलक्षणं अत्यल्पत्वात् तु तत्र किंचि-
त् नातिशब्देर्न चिन्हितं १८ शालिवाहनशाके स्मिन् शिवसप्तेंदु १७ ११ संमिते सहो मासे सितपक्षे बुधवारेष्टमीतिथौ १९ समाप्तस्तोषिणीसारसंग्रहोयं मयार्पितः श्रीपांडुरंगपादाब्जयुगुले येनका-
रितः २० वर्वर्ति तोषणी टीका तथा श्रीस्वामिदीपिका तथापि तत्सैशतं हे यत्प्रेरितो हं स तुष्यतां २१ अनपेक्षितमात्रलिखि अपेक्षितमुपेक्षितं मया यदत्र तत्सर्वं सहंतां तोषणीकृतः २२ इति श्रीमदनं-
तोपाध्यायसूनुकाशिनाथोपाध्यायविरचितो तोषणीसारः समाप्तः श्रीकृष्णार्पणमस्तु करंजनगरे वासी शिवाद्वर्चनरतः सदा शेषान्वयातिविख्यातो महाराष्ट्रे पुकीर्तिमान् १ तस्मिन्वंशे समुद्भूतो
समत्यंद्रे इति नामतः तत्सुतो भूधरकरस्तु सखारामश्च तत्सुतः २ शालिवाहनशाकेस्मिन् खत्रीसप्तेंदु १७ ३० संमिते सहोमासे सिते पक्षे रविवारे शिवातिथौ ३ लिलेख तोषणीसारः अदः विभव
संज्ञिके रक्षणीयः प्रयत्नेन हितार्थं तेन हेतुना ४ स्वं वंशास्थैश्च सर्वैश्च विद्वद्भिश्च सदा मुदा पुत्रवत्पालनीयोसौ भूतले कुत्रचित् क्वचित् ५ न प्राप्नोति सदा तेषां कीर्तिं धूनां च मानिनां ७ ७

नी·दउ·नो·
३२२

रेणस्फुरीवेल्लामवज्ञायानादृत्यारुणोदयात्पूर्वमेव कल्लार्धोद्धादशीं दृष्ट्वा निशीथाद्ध्वमेवहि आमध्यान्हाः क्रियाः सर्वाः कर्तव्याः शंभुशासनात् इति शास्त्रबलान्निशीज
ल्लप्रविष्टं तदनभिज्ञोवरुणस्य भृत्यो नयदिति वरुणस्यापि दोषाच्छज्यते २ चुक्रुशुरिस्सर्धकं गोपाः रामस्तस्य दिकूर रक्षकाः जनाः ३ तत्कोशानं दूरगोपि समीपएव श्रुत्वा वरुणहृतं तं
त्वेतिशेषः तत्रहेतुः विभुरिति स्वानां ज्ञातीनां गोपानामभयदः किंपुनः पितुरित्यर्थः अतस्तदंतिकंगतः ४ हृषिकेशं इंद्रियागोचरमपि निकटप्राप्तं ज्ञात्वा लोकपालइति महापूजासामर्थ्य
लोकपालत्वसाफल्यंच अयंभावः एवंदुष्टभृत्यके तस्मिन्भगवतः क्रोधदुःस्थितः दंडवसादपतितं शरणागतं दृष्ट्वा क्षमायकृतादृष्टिर्जाता ततोमहोत्सवेन तेन पूजितस्ततश्चेति ५ हे प्रभोज्जग
दीशेति सोत्लत्वं मयानितरांभूतः ध्वतः देहः धारणफलमद्यैव लब्धमित्यर्थः यतोरत्नाकरपतिनापि मयावस्तुतोर्थोनामयः सोद्यैव प्राप्तः यतस्त्वत्प्रसादभाजः अध्वनः पारं मोक्षं त्वत्रवहेल्लयेवप्रा
पुः ६ माहात्म्यं वर्णयन् भक्त्या प्रणमति भगवते षड्गुणैश्वर्याय परमात्मने सर्वांतर्यामिणे नचमायया एवंरूपस्त्वमित्याह नयत्रेति तत्रहेतुः लोकानामेव सृष्टिं विविधतया कल्पयं
तीनत्वीशेत्वयि प्रभवतिचिच्छक्त्येव रूपादिप्रकाशस्यानंतत्वादित्यर्थः अतोएतादृशस्य तवग्रहांतरेबदर्शनाद्धैव कृतार्थोस्मीति भावः ७ अतोममापराधः क्षंतव्य इत्याह अज्ञानतेति त्व
स्थितेस्यज्ञानता किंचमूढेन भगवद्धर्मात्तेन कश्च कार्येत्रसत्कार्यमेव वदितुंशील्लमस्य दुर्बुद्धिनेत्यर्थः अयमिति स्वगृहेरक्षितमंगुल्या दर्शयति स्वगृहेरक्षणे हेतुः तवपितेति ने
त देचमोक्ष्यति भयाद्वरुणस्य पाशादित्यत्र पाशाद्यं भयं तस्मादित्यर्थो पाशाबंधनेतिशेय तत्आनयनागः ननुमहानपराधोयं तत्राह प्रभोदासानां तमपि क्षंतुशक्तो तद्भवानित्यादि
पाठांतरं ८ तद्गृहमानीयनंदं दर्शयन्नाह अर्धकेन गोविंदेति महापराधीदाभिषेकस्वीकाराद्धेकरुणाशील्लेति व्यंग्यं पितृवत्सलेति त्वदागमनभाग्याकांक्षयैवायं गृहेरक्षितः
तिभावः ९ एवंवचनेराचरितेश्च ननुमहापराधेतावतेव कथंप्रसन्नस्तत्राह भगवान्सर्ववित्तः तत्वतस्तद्दोषोनेतिज्ञानादिति भावः १० भगवन्महिमप्रदर्शनायतल्लोकमहिमान
मानमाह नंदस्त्वित्यादिना अतींद्रियमदृष्टपूर्वंवरुणस्य महोदयमैश्वर्यं तेषां वरुणस्य तल्लोकवासिनांच ११ लोकपालमात्रस्य तादृशमैश्वर्यं तेषामपि दुर्ज्ञेयस्यास्मदीयश्रीकृष्ण
स्यकीदृशंस्यादित्युत्कंठितधियः सूक्ष्मां दुर्ज्ञेयां स्वगतिं स्वस्थानं उपाध्यायस्य दर्शयिष्यति किमिति संकल्पितवत इत्यर्थः दिदृक्षाचेयं तत्प्रेम्णैव नमुमुक्षुतया ऐश्वर्यज्ञानेपि पुत्रत्वादिज्ञा
नानुपमर्दात १२ इतिएवंभूतं संकल्पं स्वानां ज्ञातीनां स्वमत्ताभिधानाख्यायामितिपर्युदासात्सर्वेनामत्त्वाभावः तैर्ल्लज्ञादिति रविज्ञापितमपि स्वयमेव विज्ञाय कल्यसिद्धये एतद्वक्ष्यमाण
मच्चिंतयत १३ जनइति विनाभक्त्यैवनंजना इतिवक्तव्ये जनपरेण जनशब्देनात्र प्रकरणबलाद्ब्रजवासिनएवोच्यंते ततश्चायमर्थः जनोब्रजवासिलक्षणः स्वजनसमूहोयं अविद्यादि
भिर्याउच्चावचाः गतयोदेवमनुष्यादयस्तासु भ्रमवतीणेतयात्वमन् तत्तत्सायुज्यं जानन् स्वांगतिं वैकुंठादिवासितां न जानाति अहोकष्टं मन्माधुर्यावेशेन ज्ञानांशावरणादिति भावः य
छायंब्रजजनोवैकुंठादिवास्यपि एतस्मिन्प्रापंचिके भूलोके अविद्यामहीलावेशादन्यामनुसंधानं कामोमद्विषयकनानामनोरथः कर्ममत्परिचरणं तैरुच्चावचास्तु नानाविधास्तु
गतिषुप्रेमजलेषु लमन्नुवर्तमानः स्वांपूर्वंसिद्धांगतिं वैकुंठगोलोकादिवे नवरूपां नजानातीत्यर्थः अविद्यादिशब्देनोपादानेच कारुण्यवृत्तनतापेनाधिक्षेपादेवेतिशेयं १४ स्वब्रह्मस्व
रूपं यतः प्रकृतेरपि परंलोकं वैकुंठाख्यं यद्वागोपानांलोकं गोलोकमित्यर्थः १५ किंतद्ब्रह्मस्वरूपमयः सलोकइत्यपेक्षायां तन्निरूपयति सत्यमिति अबाध्यमनंतं अपरिच्छिन्नं स्वप्रका
शं शाश्वतसिद्धं चेत्यर्थः यच्चब्रह्मज्ञानिनोगुणापोहे पश्यंति तदिति १६ अथ तल्लोकप्रदर्शनं विशेषतआह तेइति ब्रह्मपूर्वोक्तं तेददृशुः वगाहत्वात् ह्रदः तेनीताः तदनुसंधानं गमिताः
मग्नास्तत्समाधिमपि प्राप्ताः पुनस्तस्मात्तेनोद्धृताः संतः ब्रह्मणः श्रीकृष्णस्य तस्यैव लोकं ददृशुः चक्षुषा अपश्यन् यत्रश्रीकृष्णे निमित्तभूते सती अक्रूरोप्येवमेव दृष्टवानिति शुकप
रिक्षिसंवादास्सूर्वाभाविलेन कृतनिर्देशः १७ नंदादीनां तद्दर्शनानंदमाह नंदेति छंदोभिः करणैर्वा १८ इतिश्रीमद्भागवतदशमस्कंधसंश्रयः अष्टाविंशोगताध्यायस्तोषिणी
राम
सारसंग्रहे १ इतिश्रीमद्भागवतेदशमस्कंधेपूर्वार्धे अष्टाविंशोध्यायः २८ राम राम

नागवद.

तोषीजी

राम

४०

४०

नाग.

४०

छप्पम

श्रीमन्महाभागवते अष्टादशसाहस्रसंहितायां वैयासिक्यां दशमस्कंधे रुक्मिणीसारसंग्रहटीकायां नवतितमोध्यायः ९९ राम् पत्र राम् संख्या राम् १००१० सम्

[OrderDescription]
,CREATED=18.05.20 09:34
,TRANSFERRED=2020/05/18 at 10:06:11
,PAGES=221
,TYPE=STD
,NAME=S0003010
,Book Name=M-2985-BHAGWAT
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF

FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF

FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF

FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF

FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF

FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF

FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF

FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
,FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF

FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF
,FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF

FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
,FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF
,FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF
,FILE216=00000216.TIF
,FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF
,FILE220=00000220.TIF
,FILE221=00000221.TIF